REPRINT FORM THE PANDIT

(श्रीः)

खण्डनखण्डखाद्यम्

नाम

अनिर्वचनीयतासर्वस्वम्,

विचक्षणचक्रचूडामणिसमर्चितचरणाम्बुजकवितार्किकसार्वभौम-

श्रीयुतश्रीहर्षप्रणीतम् ।

तार्किकशिरोमणिश्रीमच्छङ्करमिश्रप्रणीतव्याख्यासनाथम्,

साधुप्रवरश्रीमन्मोहनलालवेदान्ताचार्योपनिबद्धया

उपकृत्या संवलितं च ।

काशीस्थराजकीयसंस्कृतप्रधानपाठशालास्थव्याकरणाचार्यपरीक्षायां

कतिपयखण्डोत्तीर्णेन निगलिये-इत्युपाह्वविठ्ठलशास्त्रिणा संशोधिता

द्वितीयावृत्तिः

तत्र—काश्याम्

बी० ए० श्रेष्ठिवरेण बाबू भगवती प्रसादेन स्वकीये

मेडिकल-हाल नामकमुद्रालये मुद्रयित्वा प्रकाशितम् ।

सं० १९७३-१९१७ ई० ।

ANIRVACHANÍYATÁSARVASVAM

STYLED

KHANḌANKHANḌAKHÁḌYAM

OF

SRI HARSHA

FIRST EDITION (1888) EDITED BY

PANDIT MANMOHAN LAL VEDANTACHARYA.

THIS SECOND EDITION EDITED BY

PANDIT VITTHAL SHASTRI SCHOLAR, SANSKRIT COLLEGE, BENARES.

PRINTED AND PUBLISHED BY
BHAGAVATI PRASAD, B. A. AT THE MEDICAL HALL
PRESS, BENARES, FOR PROPRIETORS
E. J. LAZARUS & Co., BENARES.

 1917. [*2nd Edition, 1000 Copies.*

Price Rs. 7—8.] [मूल्यम् ७॥)

खण्डन शुद्धिपत्रम् ।

पृ०	पं०	अशुद्धम् ।	शुद्धम् ।
१	२८	कटनम्	प्रकटनम्
२	१६	विद्य	विद्य–
२	१९	उमानु	उमानु–
१५	१९	व्यवस्था	व्यवस्था–
३	५	हमया	उमया
३	१४	शक्ति	शक्तिं
४	१३	भङ्गनिं	भङ्गिनं
४	१८	शनिसमीप	शतिसमीप
४	२१	स्वर	स्वर-
७	८	त्वदर्शने	त्वद्दर्शने
७	१३	वाधन	बाधन
७	२३	पगन्तु	पगन्तृ
८	८	त्वापाधिक	त्वोपाधिक
८	२४	मत्त्वदिति	मत्त्वादिति
८	२७	पाट	पाठ
९	१०	नयायिकृ	नैयायिक
९	१८	वन्ति	वन्ति
१०	४	व्यवह्लियते	व्यवह्रियन्ते
१०	२५	प्रमाण	प्रमाणं
१३	५	ह्राधा	ह्राधा
१३	२०	भ्युपगन्तणां	भ्युपगन्तृणां
१३	२१	पृष्ठः	पृष्टः
१५	३	पयवस्य	पर्यवस्य
१६	९	पारुपर्या	पारम्पर्या
१६	१९	निवायस्य	निर्वायस्य
१८	६	प्रवृत्यव	प्रवृत्त्यैव
२०	२४	बाध्यत्व	बाध्य
२१	१६	निष्ट	निष्ठ
२३	२५	तद्वग-स्यापि	तद्वगमस्यापि
२५	१७	स्युः	स्युः
२७	२	स्यव	स्यैव
२७	२२	यावत्त्वस्य	यावत्त्वस्य
२८	१२	वाह्नि	वह्नि
२८	२२	तुल्ययोः	तुल्ययोः
३२	१०	तद्वत्त्व	तद्वत्त्वे
३३	३	वत्त्व	वत्त्वं
३३	१०	वत्ताय	वत्तायां
३३	१२	भव	भेव
३७	६	कारणत	कारणता
३७	११	वत्तान्तभाव	वत्तान्तर्भाव
३८	३	वर्ण	वर्ण
३८	१९	प्रतिवन्दि	प्रतिबन्दि
३९	९	प्रतिवन्दिः	प्रतिबन्दिः
३९	१०	प्रतिविन्दस्य	प्रतिबन्दिस्य
४१	२६	षड्विंशति	षड्विंशति
४२	८	बुद्ध	बुद्धि
४२	२१	त ह्वयो	ताह्वयो
४३	४	कालीन	कालीनं
४३	१७	पर्यवसा-स्यति	पर्यवस्यति
४४	१४	तियापि	तथापि
४४	१२	तथा-	तथा
६	२५	इष्टावादि-त्यर्थः	इष्टत्वादि-त्यर्थः

पृ०	पं०	अशुद्धम् ।	शुद्धम् ।
४७	२८	पर्यवमा-स्यति	पर्यवस्यति
४८	१७	मच्छून्या	मच्छून्यं
४८	६	जिज्ञ सुत्व	जिज्ञासुत्वे
५१	१५	योगाचार	योगाचार
५४	२८	मद्भारेण	मद्भारेण
५४	२८	मद्दिक्लिष्ट	मद्दिक्लिष्ट
५५	२	अनुभूयेते	अनुभूयेन
५५	१२	विक्लिश्य	विक्लिशान
५६	१३	अस्यां	अस्यां
५६	१४	प्रकाशत्वेन	प्रकाशत्वेन
५६	१७	तथ्यदाखाय	तथ्युदाखाय
५६	२४	विद्वौ	विद्वौः
५६	२८	विषयकत्व-स्यपि	विषयकत्व-स्यापि
५६	३०	प्रत्यासत्त्व	प्रत्यासत्त्या
५७	१८	भवन्ति	भवति
५७	२२	प्रमाश्यते	प्रम स्यते
५७	२३	त्वय	त्वय
५७	२४	द्वयि	द्वयो
५८	१५	तद्गीकारे	तद्गीकारे
५८	२२	तदुरीकारे	तदुरीकारे
५८	२६	समवाय:	समवाय:
५८	२६	गुणत्वात	गुणत्वात्
५९	७	तद्धर्माण	तद्धर्माणं
५९	२४	बुनरग्रे	पुनरग्रे
६०	२१	ब्रह्मेव	ब्रह्मैव
६१	२३	भेदनिष्ठो	भेदनिष्ठौ
६२	२०	कारणस्यैव	कारणस्यैव
६२	२६	पेक्षेति	पक्षेति
६३	३	काण्यदिति	कार्यमान
६३	११	किञ्चिति	किञ्चेति
६४	१४	अपादान-स्यति	अपादानस्येति
६४	१६	बलात्	बलात्
६४	२६	काष्ठ	काष्ठं
६४	२८	सत्योग	सत्याग
६५	१५	कर्मत्व	कर्मत्वं
६५	२६	यथाश्रुतपाट	यथाश्रुतपाठ
६७	२५	अत्वारौ	अत्वारो
६७	२६	तमसुर्थं	तमसुमर्थं
६८	७	बहुव्रीहि:	बहुव्रीहि:
६८	११	पर्यवसा-स्यति	पर्यवस्यति
७०	३	भ्युपेय	भ्युपेय
७१	६	सत्तासम-वाय:	सत्तासमवाय;
७२	८	लक्षकरण	लक्षकर्ण
७२	१	स्वाविषययेपि	स्वाविषयेपि
७३	६	पर्यवस.स्यति	पर्यवस्यति
७५	१३	प्रमाणान्त-पेक्ष	प्रमाणान्तर-पेक्षा
७५	१६	स्वव्धाय	स्वव्धाय
७७	१८	दूगण	दूषण
७८	७	ब्रह्मत्त्व	ब्रह्मत्त्वे
८०	७	वाक्यत्वा	वाक्यत्व
८१	२७	निर्वाहात्	निर्वाहात्
८१	२४	बीजाङ्कुरेद	बीजाङ्कुरव
८२	७	जेष्यामि-त्यत:	जेष्यामीत्यत:

पृ०	पं०	अशुद्धम् ।	शुद्धम् ।
८२	२०	निर्वह्यार्थिः	निर्वाह्यार्थिः
८७	७	तथापीष्टा-त्वत्	तथापीष्टत्व तु
८७	२४	तत्पर्ये वा	तात्पर्ये वा
८८	१४	कल्प्यभः	कल्प्यामः
८८	१८	घञ्लो	घल्लो
८८	२१	कार्यैपरागः	कार्योपरागः
८९	२३	चाङ्क्षीमा	चेङ्क्षीवा
९०	२४	नहोति	नहीति
९१	३	स्वभिन्न-स्याऽपि	स्वभिन्नस्यापि
९१	२२	आरोप्या	आरोप्या
९१	२३	पूर्वकत्वान	पूर्वकत्वात्
९१	२३	फारोप्यारोप	आरोप्यारोप
९३	२५	अग्निषोमवि	अग्नीषोमीय
९३	२१	परथा	परधा
९३	२५	विधिना	विधिना
९४	१	महिमस्य	महिम्नस्य
९४	२८	वाक्यस्य	वाक्यस्य
९५	२०	विशेषान	विशेषान्
९५	२१	शालीन	शालीन्
९५	२२	धर्मेव	धर्मेऽपि
९५	२२	प्रकृतेऽप्यभे	प्रकृतेऽप्यभेद
९६	२	ततप्रमाण्य	तत्प्रामाण्य
९६	२२	परिच्छिन्ती	परिच्छिन्ती
९६	२५	मुत्पद्य	मुत्पाद्य
९७	५	पर्यवसन्नो	पर्यवस्यन्ती
९७	२२	पार्ष्णिग्राह	पार्ष्णिग्राह
९७	२५	पार्ष्णिग्राहै	पार्ष्णिग्राहै
९७	२७	पार्ष्णिग्राह	पार्ष्णिग्राह
९८	३	पद्यपि	यद्यपि
९९	३	व्याप्यव्या-पकौ	व्याप्यव्यापकौ
९९	६	शुद्धया	शुद्धया
९९	१५	स्वविषया-द्भेदो	स्वविषयाद्भेदो
१००	१३	अनुमा	अनुमानम्
१००	१७	प्रमाणस्येव	प्रमाणस्यैव
१०१	५	नसु	ननु
१०१	२८	घटपटादे	घटपटादेः
१०२	६	विषयभ्यो	विषयेभ्यो
१०२	१८	च्छेदकम	च्छेदकम्
१०२	२२	श्रुतिम	श्रुतिम्
१०३	१	व्यतिरेक	व्यतिरेक
१०३	८	र्वीकृते	स्वीकृते
१०३	१०	सर्वाद्वैतं	सर्वाद्वैतं
१०३	१८	निरस्य ये-	निरस्याणे-
१०३	२६	पर्य्यवस्य-ताति	पर्य्यवस्यतीति
१०४	२२	यद्दि	यद्दि
१०४	२४	पर्यवसास्यति	पर्यवस्यति
१०५	४	विषयव धर्म्य	विषयधर्मस्य
१०५	१८	प्रवृत्तेनापि	प्रवृत्तेनापि
१०५	२०	नैमित्तकस्य	नैमित्तिकस्य
१०५	२०	तद्वैपरीत्य	तद्वैपरीत्य
१०५	२४	प्राणा	प्रमाणा
१०५	२५	प्रत्यक्ष	प्रत्यक्ष
१०६	३	प्रवृत्तनापीति	प्रवृत्तेनापीति
१०६	८	तत्परत्व	तत्परत्वं
१०६	९	संवद्वाय	संवद्वाय
१०६	१०	स्वोक्ताविरोध	स्वोक्तविरोध

पृ०	पं०	अशुद्धम् ।	शुद्धम्
१०६	१५	ह्रियमाण-णाया	ह्रियमाण-णायां
१०६	१७	बहुव्राहिः	बहुव्रीहिः
१०६	१८	प्रतिबन्धादे	प्रतिबन्धादे
१०६	३०	पर्यवसानस्य	पर्यवसानस्य
१०७	१२	अनिलम	अनिलम
१०८	१६	वाच्य	वाच्यं
१०८	८	त्वद्भूचवि	त्वद्भूचवि
१०८	१०	भूत	भूत्
१०८	१५	यद्धौ	यद्धौ
१११	८	मर्हन्ति	मर्हन्ति
१११	१७	चतुर्विधो	चतुर्विधौ
११२	१७	प्रत्यक्षणा	प्रत्यक्षेण
११८	१५	स्पर्शमाण	स्पर्शमाण
१२१	२७	त्रिगाकारिका	त्रिगात्मकारिका
१२८	२८	दोषाधिक्तरेव	दोषापत्तिरेव
१२८	२८	पदार्थास्तित्वेन	पदार्थतित्वेन
१३२	२२	श्रीदर्पणे	श्रीदर्पणे
१३५	४	निवृत्तो	निवृत्तौ
१३६	६	सिद्धि	सिद्धिः
१३६	१५	नैतरः	नेतरः
१३७	१७	पुंसा	पुंसां
१३७	२१	युर्क्त	सयुक्ति
१३७	२५	हत्यनेनं	हत्यनेन
१३८	२८	सपक्षसत्त्वादे	सपक्षसत्त्वादेः
१३८	३०	अनुमानादिः रूपाः	अनुमानादि-रूपाः
१४०	६	विश्व	विश्वं
१४०	२१	कथामालस्य	कथामालस्य
१४१	२७	सिद्धताधः	सिद्धतायाः

पृ०	पं०	अशुद्धम् ।	शुद्धम्
१४५	१७	आक्षेयात्	आक्षेपात्
१४५	२६	साध्यस्येतरभेभादेः	साध्यस्येतर-भेदादेः
१४८	२०	क्रियाकारित्व	क्रियाकारित्व
१४८	२८	खेन	दुःखेन
१५०	२४	अङ्करादिक	अङ्कुरादिक
१५१	८	रजतत्व	रजतत्वं
१५१	८	शुक्तावतत्त्व	शुक्तावतत्त्वं
१५१	१२	सद्यो	सद्यो
१५२	२०	खण्ड्यते	खण्डयते
१५	२४	तत्त्वायिनः	तत्त्वायिनः
१५२	२४	त्रिवेणीस्ना-यिनः	त्रिवेणीस्ना-यिनः
१५८	३	इदन्तवि-शिष्टो	इदन्तावि-शिष्टो
१५८	४	अभिन्नप्रया-यम	अभिन्नप्रया-यम्
१५८	६	प्रत्येक	प्रत्येकं
१६०	७	संयोगप्रति-बन्दी	संयोगप्रति-बन्दी
१६८	११	सशयखण्डनं	संशयखण्डनं
१७१	२८	अन्तरेणव	अन्तरेणैव
१७४	२२	सहकारित्व-पक्षे	सहकारित्व-पक्षे
१७८	६	संस्कारज-त्वपि	संस्कारज-त्वेपि
१८२	१०	प्रतिबन्दि	प्रतिबन्दि
१८४	२५	सस्कारोद्बो-धकं	संस्कारोद्बो-धकं
१८६	१६	तथास्तीति	तथास्तीति
१८७	७	मानान्तार	मानान्तर

पृ०	पं०	अशुद्धम् ।	शुद्धम् ।
१८७	८	प्रतिबन्दि- माह	प्रतिबन्दिमाह
१८७	१६	तत्तांशमाव:	तत्तांशमोव:
१८७	१८	प्रतिबन्दि:	प्रतिबन्दि:
१९१	२८	बटे	बटे
१९२	८	सार्वद्दयमिद	सार्वद्दयमिदं
१९२	१५	स्मृतित्व	स्मृतित्वं
१९२	१८	धूमादनु- मिति	धूमादनु- मिति:
१९२	२२	मन्वय:	मन्वय:
१९८	२३	परिरहरति	परिहरति
२००	२	सवा:	सर्वा:
२०१	९	स्मृतात्वपि	स्मृतावपि
२०२	१५	वविरहो	भावविरहो
२०५	२८	माभ्युपगम्यते	नाभ्युपगम्यते
२०८	१२	प्रमाकारणा- भावात	प्रमाकारणा- भावात्
२०८	२०	विरो: स्यातृथ-	विरोध: स्यात्
२०८	२९	प्रतियोगित्व- नुयोगित्व	प्रतियोगित्वा- नुयोपगित्व
२१२	१९	अन्येन्याभावो	अन्योन्या- भावो
२१२	२६	आशङ्कायमाह	आशङ्काया- माह
२१५	११	अनवस्थाना- तिदि	अनवस्थाना- दिति
२१६	१५	घटाभवो	घटाभावो
२१७	२०	जगद्रुपभात्मा	जगद्रूपमात्मा
२१९	१५	तमावन्ता- भावे	तथावन्ताभावे
२२०	८	बाधायमाना	बाधायमाना
२२०	१४	तस्माद	तस्मात्
२२०	२०	बाध:	बाध:
२२०	३०	वारबाण:	वारबाण:
२२०	२१	वारबाणो- ऽस्वी	वारबाणो- ऽस्वी
२२२	१५	प्रतिसंपात्म- कतैव	प्रतिक्षेपात्म- कतैव
२२३	२८	स्मुतित्व	स्मृतित्व
२२५	१६	कारणादीह	कारणादौ इति
२२९	१८	कारणत्व	कारत्वं
२३०	२१	कार्यतावच्छे- दक	कार्यतावच्छे दकं
२३१	७	पत्येक	प्रत्येकं
२३२	१०	कृषीवला	कृषीवला
२३३	३	व्यभिचारि- करण	व्यभिचारि- कारण
२३४	१७	तथ्य	तस्य
२४२	१२	अशबाधमा- नेण	अंशबाधमा- नेण
२४२	१५	विषयत्यात्	विषयत्वात्
२४४	८	तदहि	तदिह
२४५	२५	घटोगं	घटोयं
२४६	२७	वारबाणाय- माना	वारबाणाय- माना
२४७	१४	प्रामाण्या- प्रमीतो	प्रामाण्या- प्रमीतौ
२५१	३८	उक्तदूणानि	उक्तदूषणानि
२५६	२७	भोजनोत्तर	भोजनोत्तरं
२५८	२७	अप्रमाया	अप्रमायां
२६१	२८	तयाच	तथाच
२६२	११	वृत्यात्मा- श्रय:	वृत्यात्माश्रय:

पृ०	पं०	अशुद्धम् ।	शुद्धम् ।
२६४	८	ओमिति	ओमिति
२६४	२८	ओमित्या- भिधाने	ओमित्यभिधाने
२६४	२८	भाव:	भाव:
२६५	५	ओमिति	ओमिति
२६५	८	लिङ्गितस्य	लिङ्गितस्य
२७१	५	ओम्	ओम्
२७२	१८	आत्माश्र- यादिति	आत्माश्रया- दिति
२७२	१८	शुद्धस्य	शद्धस्य
२७२	२८	अग्यादी-	अग्यादिभि:
२७२	२८	द्रष्टाव्य	द्रष्टव्या
२७५	८	व्याप्ता	व्याप्ति
२७५	१०	धूमादि	धूमादि
२७७	२८	अभवादि	अभावादि
२७८	२१	प्रतिवन्दि	प्रतिबन्दि
२८१	२५	अप्यपि	अप्यपि
२८२	११	ओम्	ओम्
२८२	१६	भृत्	मृत्
२८८	२७	तद्गुणसंविज्ञानबहुव्रीहि:	तद्गुणसंविज्ञानबहुव्रीहि:
३२१	२१	करणत्वां- ङ्कोकार	करणत्वाङ्गी- कार
३३१	२१	दुरुत्तर	दुरुत्तर:
३३४	२१	च्येश्वरा- भिन्यौ	चेश्वराभिन्यधौ
३३४	२७	भ्रान्तिविद्ध	भ्रान्तिविद्धं
३४८	२४	सूचयेत	सूचयेत्
३४८	२५	माङ	माङ्
३४८	२८	अनुमित्या- दित्रये	अनुमित्या- दित्रये
३४८	२२	विशेषणत्व	विशेषणत्वं
३४८	२०	अनुमान- भीधीयते	अनुमानमभि- धीयते
३४८	२१	संपग	सम्यग्
३५०	२७	धूमादिकाश्च	धूमादिमाश्च
३५२	२५	बहुथिन	बहूच्यर्थिन:
३७७	२४	तत्रैत्यर्थ:	तत्रेत्यर्थ:
३८५	१८	विद्रूध्या- भाव:	विद्रूप्यभाव:
३८५	२८	दुगन्धानु- मित्वा	दुर्गन्धानु- मित्वा
३८६	२४	वाद्ध्य	वाद्ध्यं
३७६	७	पृच्छति	पृच्छति
४०१	२	यत्वयलो- पादे:	यत्वयलोपादे:
४३१	२६	यत्वपलो- पादे:	यत्वयलोपादे
४०४	२३	विषयप्रति- निमत:	विषयप्रति- नियत:
४०५	२७	प्रकापक्षम- वान्य	प्रमापक्षमव- लम्ब्य
४१८	२५	सापिं	सापि
४३०	२८	प्रत्यक्ष	प्रत्यक्ष
४७७	२७	अधिकपदा- र्थविगाहित्व	अधिकपदा- र्थावगाहित्व
४७८	२४	विश्रातम्	विश्रान्तं
४८०	२६	सत्प्रतिंपक्षस्य	सत्प्रतिपक्षस्य
५२८	७	प्रतिवन्दी- करोति	प्रतिबन्दी- करोति
५२८	१४	प्रतिवन्ध्या	प्रतिबन्ध्या
५२८	१६	प्रतिवन्ध्या	प्रतिबन्ध्या
५२८	२६	प्रतिवन्दी- करोति	प्रतिबन्दी- करोति
५६०	२६	व्यत्पानीय	व्युत्पादनीय
५८१	२६	प्रहेह्लिका	प्रहेलिका

(श्रीशः)

(“इदंप्रथमसंभवत्कुमतिजालकूलङ्कषा
मृषामतविषानलज्वलितजीवजीवातवः।
स्मरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तय-
श्चिरन्तनसरस्वतीचिकुरबन्धसैरन्ध्रिकाः॥
कपर्दिमतकर्दमं कपिलकल्पनावागुरां
दुरत्ययमतीत्य तद्द्रुहिणतन्त्रयन्त्रोदरम्।
कुदृष्टिकुहनामुखे निपततः परब्रह्मणः
करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः” ॥)

॥ भूमिका ॥

—:o:—

इह खलु निसर्गतएव प्राणिमात्रमिष्टमभिलाषुकमनिष्टं व्युदसिसिषु च भवतीतीष्टाऽनिष्टप्राप्तिपरिहारोपायप्रकाशनैद-म्पर्येण भगवानाम्नायश्चातुर्वर्ण्यं चातुराश्रम्यप्रभृतिविभाग-प्रविभागभक्तान्यभ्युदयसाधनानि सदृष्टादृष्टफलानि नानावि-धानि विदधत्[illegible] निःश्रेयससाधनमपुनर्बोधं प्रत्यगात्म-परमात्मयाथात्म्यावबोधं प्रविरलेभ्योऽपि धीरधौरेयेभ्यः। ‘क्रिया हि नाम विकल्पनाऽऽस्पदं भवति, न तु वस्त्वि’त्येवंरू-पमप्यात्मयाथात्म्यमतिलौकिकतया च परमगहनमूर्त्तितया च, पुरुषबुद्धिवैविध्याच्च भगवल्लीलावैभवविधेयतया चेदृक्तया च दुष्परिच्छेदमापेदे परःशतरूपताम्। तथाहि, आत्मनः कर्तृ-त्वभोक्तृत्वादिकमातिष्ठन्ते तार्किकाः; भोक्तृत्वमेव तस्य, न परं कर्तृत्वमपीति संगिरन्ते कपिलकमलासनाद्यनुगामिनः। आसतां वा तावत्परेषां कथाः; औपनिषदाएव परस्परवि-लक्षणनानाविधसिद्धान्तेषु समासते समर्पितसमादराः। न चैते-ऽर्वाञ्चएव राद्धान्तावभेदाः, महर्षीणामेव तेषु तेषु विशेषेषु वैशेष्यात्(१)।

---

(१) यथा चायमर्थस्तथैवोदीच्यमीमांसायां भाष्यकारेण व्याख्या-

विरुध्यतो विश्वस्य . चरमतात्पर्यमपि वितण्डाकथायां (१)
निर्विशेषवस्तुपरतयैवाऽऽलीलपत् (२) निवर्तितोऽविशुद्धमुख्यश्रु-
त्याश्रवतःसारस्वतभगवदादेशतन्मीमांसादिकं (३) यथायथम् ।
अथाऽप्यस्याद्वैतवादस्य युक्तिप्रायग्रहग्रहीतविग्रहतया शाङ्कर-
भाष्यादेश्च श्रुतिस्मृतिसूत्रानुसारितयैवावश्यमुपनिबन्धनस्या-

सविशिष्टैवोपास्यते । अतः सगुणमेव ब्रह्म तथापि मान्यमिति यद्विद्या-
दहरविद्ययोर्विकल्प इत्यर्थः—इति हि भगवन्तो भाष्यकाराचार्यचरणाः ।
युक्तिमिदमेवमादिना निषेधमन्त्रोपनिषदहार्दसुधारसानां यथा
सम्यग्नविदः पूर्वोपनिषदाचार्याणां सिद्धान्तः सविशेषब्रह्मवादो
निर्विशेषब्रह्मवादस्तु तदीयस्वप्नसंभावनायामप्यनभ्यासमितयः (दूरतः
परिहार्यः) इत्यलं राजपथस्य वीथिकोपलक्षणयेति ।

(१) "अथ नाऽविद्या कस्येति । यस्य दृश्यते तस्यैव । कस्य दृश्य-
त इत्यत्रोच्यते अविद्या कस्य दृश्यत इति प्रश्नो निरर्थकः । कथम्—दृश्यते
चेदविद्या तद्वन्तमपि पश्यसि । न च तद्वत्युपलभ्यमाने सा कस्येति प्रश्नो
युक्तः (भगवद्गीता १३ अ० क्षेत्रज्ञं चापि मां विद्धीत्यस्य शाङ्करभाष्यम्)
इत्यादौ व्यक्तोऽयमर्थो दूरदर्शिनाम् ।

(२) यत्र खलु "सूत्राभिप्रायसंवृत्या स्वाभिप्रायप्रकाशनात् ।
व्याख्यातं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये" इति स्वयमद्वैतवादिनः
सन्तोऽपि श्रीभास्कराचार्याः (वेदान्ताचार्यास्ते न तु ज्योतिषिकाः) व्यक्त-
मुक्तवन्तः सन्ति स्वीयमीमांसाभाष्ये । आनन्दमयाद्यधिकरणेषु च 'सूत्र-
णि त्वेवं व्याख्येयानी' त्यादिना विलक्षणलक्षणादिपरणोकारचरणसं-
चारेण व्याचक्षाणानां श्रीमच्छङ्कराचार्याणां सूत्राभिप्रायसंवृत्या स्वाभि-
प्रायप्रकाशनं यथास्ते, न खलु तत्परोक्षं दीर्घदर्शिनाम् ।

(३) "न द्वैतं नाऽद्वैत" मित्येवञ्जातीया श्रुतिरेव निर्विशेषाद्वैतं
प्रतिषेधति, । तथा

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च,, ।
"यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः,, ॥
"मम साधर्म्यमागताः, ।
नोपजायन्ते प्रलये न व्यथन्ति च" ।
असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्" ॥

इत्यादिना भगवानपि; तथा "नाऽभाव उपलब्धेः" "हार्दानुगृ-
हीतः शताधिकया" "जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च"

स्त्रते, संजातायां च तदीयविरलतायां तदीयेष्वेव पुस्तकेषु यत्र कुत्रचिदुपलभ्यते स्म । अथ समतिक्रामति चिरकालेऽप्य खलु महामनीषी स्वोपयोगिनं तं विज्ञाय तदीयपुस्तकेभ्यः प्रायः सकलयां चकार । यथाऽत्र भारते बौद्धानां मनोज्ञम्भवमासीत्तरां, तथा विदुरैवैतिहासिकाः, पुराणेष्वपि च पठ्यते, यथ-बुद्धोऽवतीर्य विज्ञानवादेन जगति जनानस्तु मोहं कलौ कल-यिष्यतीति ।

आसीच्चायं खण्डनकृत् कान्यकुब्जाधीश्वरस्य विद्वद्गोष्ठ्यां समधिकप्रतिष्ठो वरिष्ठस्तदस्य समयस्तावदुपरिष्टादष्टशत्या अन्तश्च नवमशताब्द्या इतः पुरस्ताद्भवितुमर्हति । तथाहि-"ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरा"दिति स्वयं स्वयमेव विलिखति; तदीदं ह्यस्य विलेखन स्पष्टमाचष्टे कान्य-कुब्जाधीश्वरात्ताम्बूलद्वयाद्युपलम्भस्य परमतमवैदुष्यप्रतिष्ठा-हेतुताम्; सेयञ्च तस्य कान्यकुब्जाधीश्वरीयसाम्राज्यमन्तरा न संघटते; यदि हि कान्यकुब्जाधीश्वरो राजान्तरसाधा-रणएवाऽभविष्य, ततो हि यथैव राजान्तराणि, तथैवैकः कान्य-कुब्जाधीश्वरोऽपीति ततस्तदुपलम्भः किमिव नाम चमत्कार-कोऽभविष्यत्; कथं नाम परीक्ष्यदोद्भूतस्य लोकोत्तरकवेः प्रत्यभिज्ञाबहुमानवाचोयुक्तिपदवीम्; तथात्वेऽपि चैवंविलेख-नमस्य विद्वन्मणेरयुक्तं स्थले जलबीजारोपणं स्यात् । तस्मिन्नं स कान्यकुब्जाधीश्वरस्समाङ्गास्त । नच कान्यकुब्जाधीश्वराणां साम्राज्यमितोऽष्टशत्याः, परं, पुरस्तादेवाऽस्तीत्यस्याऽपि सिद्धा तत्कालीनता ॥ किञ्च, नैषधीयचरितेऽस्ति लिखितं खलु—

"काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महा ।
काव्ये तद्भुवि नैषधीयचरिते सर्गोऽगमत् षोडशः" ॥

इति; कश्मीरे महीयांसो विद्वांसो ऽष्टशत्याः पूर्वपूर्वा-मेवाभूवन्नितोऽपि तत् तथा ।

अपिच, काश्मीरदेशीयलब्ध(१) वर्गेष्वेतदीयप्रबन्धानां

(१) विद्वज्जनेषु ।

निबन्धनसमममयं प्रचारश्च सम्मानश्चतन्त्रीवाहूगन्त्री(१)वि-रहिणि नादृशेऽनेहसि गमयति स्फुटम् । यथा, कान्यकुब्जा-धीश्वरस्य काश्मीरेश्वरो भवति स्म करदो वा, मित्रं वा, सम्बन्धी वेति । ततश्चात्रत्यग्रन्थानां तत्र निर्माणयौगपद्येन प्रसिद्धिरुपपद्यतेतराम् । जयचन्द्रस्य चान्तिमकान्यकुब्जेश्वर-स्याष्टौ शतानि समतियन्ति समानाम् । न च ततः परमिह तथाप्रसविख्यातोऽभूवंस्तद्वंश्याः, येषां स्यात्काश्मीरादिषु सम्ब-न्धादिरित्यपि द्रढयत्येवाऽस्य कवेस्तत्कालताम् ॥ किञ्चाऽस्य कवेःकवितानिबन्धेषु वर्णनीयराजानां सन्ति नामानि "साह-साङ्कः,स्कन्दः, शिव"—इत्येवमादीनि; तदेतेषां तावदधुनात-नक्षत्रनाम्नामिव सिंहोपपदत्वेनाऽनासादनादधिगम्यते यत-दानींमास्ति स्मेह भारतभुवि यवनजनदुश्चरणसञ्चारः, प्रचा-रश्च सिंहान्तनाम्नामार्यजनतायाम् ।

यदा हि भारते विनयवाचाटाःप्रविष्टवन्तो यवना-स्तदा तदीयवेश्यापुत्राणामपि, 'खां' शेर, बहादुर, अली'त्येवमादी-नुपाकारयं प्रतिक्षणं नामाङ्कान् "वयमेव किमित्यनुपपदना-मानो भवेम"त्याकलय्य क्षत्रियार्या अपि स्वानि नामानि सिंहोपपदानि धर्तुमारभन्तेति ।

ततःप्रभृति क्षत्राणामत्र देशे सिंहपदोपबृंहितानि प्रव-र्तन्ते नामानि । यवनजनचरणचारिकायाश्चेह भवन्त्यष्टौ शतकानि शरदां । ततश्च तद्वर्णनीयतत्तद्राजसञ्ज्ञानां कैवल्यं च गुणानुरूपस्वच्छन्दविशिष्टसंस्कृतिमत्वं च स्फोरयतस्तदीयसम-यस्य । यवनानुपस्पृष्टताम् । सा चाष्टशत्यूर्ध्वं नामित्यतोऽपि तत्तथा ।

किञ्चान्यत्, तत्र भवता न्यायाचार्येण श्रीमदुदयनाचार्येण सहास्य कदाचित्समागमो विचारश्च संवृत्तः । उभयोरप्येत-योर्लोकोत्तरे द्दामोदात्तविद्वत्ताशालितया नासीत्तदानीमेव किं-चिद्विचारपर्यवसानम् । पश्चात्तु खण्डनकृता 'त्वद्धाधेशान्यथा

---

(२) तार रेल इति प्रसिद्धयतः ।

का(१)रमक्षराणि कियन्त्यपीत्याद्याचार्यमतखण्डने उपनिबद्धे, श्रीमानाचार्योऽप्यात्मतत्त्वविवेके (बौद्धधिक्कारे) एतन्मतं निरास्थतराम्(२) ॥ काव्यप्रकाशकारेणापि सार्धमस्य समागममाचक्षते बहुविदः(३) ।

न्यायाचार्यप्रकाशकारयोश्च नवशतकनैकटिकत्वमित्यायातममुष्याऽपि तदानीन्तनत्वम् । तदेवमादिहेतुभि(४)रैतिह्याभिकार्थैर्विद्वज्जनावबोधदत्तकरावलम्बैः सिद्धं यथाऽष्टशत्या औपरिष्टिको नवमशतकोपान्तवर्त्ययं महासुधीः ।

---

(१) कियन्त्यप्यक्षराण्यन्यथाकारं कतिचिदक्षराणि परिवर्त्येत्यर्थः । यथेदमस्ति, तथाऽऽकर एव द्रष्टव्यम् । अत्र खलु खण्डयित्वाऽन्यथा कृत्वेत्येव वक्तुं न्याय्यमासीत्, "अन्यथैवंकथमित्थंसु सिद्धाऽप्रयोगश्चे" दित्यनर्थकादेव कृञो णमुल्विधेस्तथापि प्रमादादित्थं प्रायोजीति विविञ्चन्तु सन्तः । कृत्वेत्याद्यध्याहृत्य वाऽश्रूणि प्रमृज्यन्ताम् ।

(२) तत्रालीकं विचाराऽसहमनिर्वचनीयं वा यमाश्रित्य जगद्भिन्द्यते, स एव विचारश्चिन्त्यतां कोऽसौ, कीदृशश्चेति । सतर्कं प्रमाणमेव वाक्यारूढमिति चेत्तच्चेद्विचाराऽसहं, किन्तेन भौतविचारकल्पेनेत्यादिना ग्रन्थजातेन ।

(३) किं गवि गोत्वमुताऽगवि गोत्वं; यदि गवि गोत्वं तर्हि मयि नष्टम् ।
अगवि च गोत्वं यदि भवदिष्टं, भवति भवत्स्वपि संप्रति नष्टम् ॥
इति श्लोकमपि तद्विवादविषयकं परिपठन्ति ।

काव्यप्रकाशकारः खलु खण्डनकृता स्वीयं नैषधं कदाचित्प्रदर्श्यमानोऽश्रौषत् 'हन्त हन्त भवतैव वाक् चेद्दर्शितं स्यात्तर्हि काव्यप्रकाशस्य सप्तमोल्लासे उदाहरणगवेषणे मम न सवृत्तः स्यात्प्रयास' इत्यपि च कथयन्तो भवन्ति वर्षीयांसः । समस्तदोषैकभाजनमिदं भावत्कं काव्यमिति तु तत्र स्फुटाकूतम् ।

(४) अप्रतिसंख्यसंख्यसंख्यावत्त्वविभीमस्यास्य संभवस्थितिसमयसमन्वेषणसमुत्सुकैरनेकैर्युरोपियमहाशयैः The Indian Antipuary ग्रन्थे तत्र तत्रानेकत्र बंहीयो बंहीयः खलु लिखितमास्ते ।

तत्र तावल्लेखाः प्रायो विविधसंभावनासमाकुलाः क्वचिदुत्प्रेक्षामूलकपरस्परखण्डनमयाः क्वचि तत्तन्महोदयमतोपन्यासोत्तराश्च

अयं च कान्यकुब्जब्राह्मणस्य श्रीहीरविपश्चितस्तनूभवो-ऽभवत् । यत्तु केचन मैथिलाः श्रीहर्षमिश्र इति व्याहरन्तो मिश्र-पदव्याभिख्यव्यवहारमात्रात्तदीयां मैथिलतां साधयितुं समी-हन्ते ; न तन्मिश्रोपपदत्वं समस्तप्रामाणिकजनश्रुतिश्रुतकान्य-कुब्जतां(१) प्रत्यावर्त्तयितुमीष्टेतमाम् । मिश्रोपपदत्वं च मिश्रा-ऽऽस्पदकान्यकुब्जत्वेन घटते जगत्प्रख्याते चैतदर्थे नैव कन्तामनो मुधा मुधा शङ्कन्त इति न पुनर्विशिष्य तद्धेतूपन्यासादिना वस्तरयामः ।

भवति चाख्यायिकाऽस्य त्रिहर्षगोपचरिते यथा—"अय-मसौ दैववशाद्बाल्यएव भवन् पितृवियोगभाजनम्यैव केवलं चिराल्लब्धएकलोपमपत्यं मे सन्तानतन्तुरित्याकलयन्त्या पत्या-ऽपि चरमसमयेऽपत्यसंरक्षणएव सर्वथाऽऽदिष्टया भर्तृवियोगेन दुर्धारण्यप्रायं जगत् प्रतियत्याऽपि पालितश्च लालि-तश्चाऽऽस्त कुलक्रमाऽऽगतविद्वत्तामाहात्म्यात् स्वपितृव्यादि-कोटिकजनान्तिके किञ्चित्किञ्चिद(२)धीयन् । एव पञ्चषवर्षदे-शीयएव च जातु प्रसक्तानुप्रसक्ततया क्वचन लोकैरुपकथ्यमानं केनचित्पण्डितेन मुधाकृतं स्वपितुः शास्त्रविमर्शे ऽवमानना-कार्यं विदीर्णहृदयस्तत्क्षणमेव सुजैत्रसुत्राध्यवैदुष्यकाम्यया देवतामुपासितुमध्यवसौ ।

ततोऽनतिचिरस्य सरस्वतीं देवीमुपासितुमुद्युक्तो ऽयं बालस्याल्पसत्त्वतया यथावद्विधेरनिर्वहण सम्भावयन्त्या-

क्वचित्तत्पुस्तकनिरुक्तरूपतत्तद्घटदर्शननिर्देशप्रधानाश्च क्वचित्सन्तीति तेष्विदं मदीयमल्पकं चेतो न खलु समश्नुतेऽध्यवसायमिति तानत्र नोपन्यास्थं प्रमाणतया । एवं बालदत्ताभूमिकायां तत्तदीयस्तत्स्व-पुस्तकेष्वन्येतद्विषयकेषु च बहु गवेषितं हृष्ट्वा. परं नेदं ज्ञानलवदुर्वि-दग्धं मामकं चेतः प्रापच्छुचि मानमित्यनापत्ता यत्किञ्चित्स्वतन्त्राभि-प्राय विषये चेष्टितमनेन, तत्क्षाम्यन्तु दयाविद्वत्तोदन्वन्तस्ते सन्तः ।

(१) कान्यकुब्जनगरे भूरयो गृहाः संसन्त्या,ऽऽपद्यन्ते च ते एत-त्संतानप्रतानरूपतामात्मनः । एतेन काश्मीरत्वमस्योत्पश्यन्तएकद्वा जना जातोत्तराः संजाताः ।

(२) विशेषे ज्ञाता ।

जनन्या प्रथमं निवार्यमाणोऽपि च न विरताग्रहोऽभूत्, स्तदे-
तन्महासत्त्वतया प्रसीदन्त्याऽनुमोदितश्चारेभे तच्चिन्तामणि-
मन्त्रतद्यन्त्रजपार्चनादिना प्रसादयितुं वागधिदेवताम् ।
तदेवं यथाशास्त्रमनुतिष्ठतोऽल्पवयसोऽप्यस्य कया चन काल-
कलया प्रतिबभूवऽव्याहता प्रतिभा । निश्चक्राम चायं,
यथा सुप्रसन्ना देवता, जातश्च नः समीहितामिति ।
ततोऽयं सकृदीयन्मात्रगुरूपदेशेन सुबहुप्रतिभातशास्त्रार्थो नाति-
चिरेणैव कालेनाऽवकलनमां चतुर्दश विद्याश्चोपविद्याश्चापि
नास्तिकतन्त्राणि । अथाऽयं कान्यकुब्जाधीश्वरस्य परिषदि
व्यजेष्ट तं, यो ऽहिन स्माऽस्य पितुरमन्तृचरः ।

राजेश्वरेण च सबहुमानं कान्यकुब्जनगरमेव स्वराज-
धानीमधिवासितोऽभूत्समां तमेवाऽऽश्रितः । यदा यदा च
महीमहेन्द्रसंसदमगा, तदाऽधिकार्होऽऽसनमविन्दत ताम्बूले च,
विद्वदन्तराणि चैकैकमेवऽविदन्त"—इत्यादिर्बहीयसी विद्वज्जन-
प्रसिद्धा । सेयदपि यथार्थैव । यथाऽपि नास्ति ग्रन्थोपनिबद्धेति
सर्वसमक्ष्या तस्यास्तथात्वे प्रामाणिकबहुश्रविद्वज्जना एव प्रमा-
णम् । तथाऽत्रासंभूतस्याऽस्ति कश्चिदर्थ इति वयमपीत्थ-
मिदमिति मन्यामहे ।

देवताऽऽराधनजन्यपरमतमवैदुष्यादिषु तु तेषु तेष्वर्थेषु
नास्त्येवतरां कथमपि कस्य चिदपि बुद्धिमतो विशयो नाम ।
भवति चात्र प्रमाणं नैषधीयचरितम् । तथाहि, तस्य प्रथमस-
र्गान्तिमश्लोके "श्रीहर्षमि"त्यादिश्च चतुर्दशे च सर्गे "अवामा
वामे" त्यादिः संदर्भ(१) "तत्र च तत्र वृत्ते कवयितुः" "भवद्-
वृत्तस्तोतुर्मदुपहितकण्ठस्य कवितुरि" त्येवमादिना स्पष्टमाचष्टे
देवताप्रसादलब्धामस्य कवयितुर्विद्वत्ताम् ॥

---

(१) (८५-८८) स सन्दर्भः प्रतीक्ष्यत एव, नत्वत्रोपन्यस्यते
विस्तरभयात् । अवामावामेत्यादेः पद्यस्य यथा मन्त्रात्मकत्वं,
तथा कस्यां चिदप्येकस्यां सैनद्धव्याख्यायामवलोकनीयम् । तत्र वृत्ते कव-
यितुरित्येवं आत्मीयकेन वाक्येनात्मानमभिसंदधाति ग्रन्थितेत्यवदधतु
सुधियः ।

नैषधीयचरित, अर्णववर्णन, शिवशक्तिसिद्धि, साहसाङ्कचम्पू, छन्दप्रशस्ति, विजयप्रशस्ति, गौडोर्वीशकुलप्रशस्तीः काव्यनिबन्धान्; ईश्वराभिसन्धि, खण्डनखण्डखाद्य, स्थैर्यविचारणप्रकरणानि च शास्त्रीयसन्दर्भान् सोऽयं धीरधौरेयोऽनेकधाऽतिधिषणस्तदानीमप्रतिसंख्येयमङ्ग्यावान् वाराशिमिव भगवान् कुम्भसम्भवश्चुलकयन् स्मारस्वतसर्वस्वं व्यधासीत् पीयूषवर्षिणो दीर्घदर्शिहर्षिणो लोकोत्तरानितराऽतिदुष्करान्; येषां सुधाम्भोनिधीनामगाधहार्दानामप्रतिमयुक्तिरत्नैकभुवां महाप्रमाणसत्वानां परमरमणीयानामत्यतिविभीषणविवर्त्तभाजां संपर्केण श्रमवोऽपि जनाः कणानणुमात्रानप्यासाद्य सम्पद्यन्ते गीर्वाणायमानाः।

तत्र नैषधीयचरितं जगति को वा पण्डितम्मन्यो न वेद। अन्येषान्तु ग्रन्थानां पुस्तकानि प्रायो नास्मादृशां भवन्ति दृग्गोचरा, स्तथापि नामान्येव सन्तु साक्षिणो वर्ण्येषु;।

यथा—अर्णववर्णनं नाम समुद्रमन्थनवर्णनं स्यात्। शिवशक्तिसिद्धिरिति शिवनाम्नो नृपस्य शक्तिप्रकाशकतच्चरितवर्णनमयं स्यात्; गौरीगिरिश(१)माहात्म्यवर्णनस्वरूपन्तु न स्यादित्यपि कोवेद। साहसाङ्कनाम्नो महाराजस्य चरितमयी खलु साहसाङ्कचम्पूर्नाम(२) छन्दप्रशस्तिरपि तच्छन्दनाम्नो राज्ञः कीर्त्तिसंकीर्तनम्। विजयप्रशस्तिः कस्यचन महाराजस्य संग्रामाङ्गणे विजयप्राप्तिवर्णनम्। गौडोर्वीशकुलप्रशस्तिश्च गौडदेशाधीश्वरराजवंशवर्णनं रघुवंशादिकल्पमिति।

ईश्वराभिसन्धिस्तु साधितेऽपि जगतो यथेश्वराज्जन्मस्थेमभङ्गभाक्त्वं, तथाभावनिरूपणं बौद्धमतनिराकरणं प्रतिभावो

(१) परं, स्त्रीयसमर्थकपदानां पुंसमर्थकपदेभ्यः प्राक्प्रयोगस्य दर्पितद्वन्द्वस्थलेऽप्यावश्यकतया प्रकृते च तदसत्त्वान्न पुनरिदं सुष्ठु। यद्यपि नेदं पाणिनीयनुशासनानुशिष्टमथापि बालानां प्रथमिकादिदर्शनं तदिति ध्येयम्। गिरिशमाहात्म्यवर्णनमयत्वे वा पूर्वस्वप्रोक्तपुरुषेण स्यादपि।

(२) "केऽभूवन्नाऽऽढ्यराजस्य राज्ये प्राकृतभाषिणः।
काले श्रीसाहसाङ्कस्य के न संस्कृतवादिनः" इति॥

मन्यते । वैदुष्यस्य परमपरिपाकावस्थायामस्य ग्रन्थनमासीदि-
त्येतावदाह अस्माकं प्रियसुहृत्खञ्जनराजाकरनन्दरः श्रीमा-
न्मोहनलालविपश्चिच्चूडामणिः ।

ग्रन्थस्य चास्य खण्डनखण्डखाद्यम्, खण्डनखण्डम्, खण्डनखाद्यम्, खाद्यखण्डनम्, खण्डनञ्चेति नामानि प्रथन्ते । तत्र खण्डनखण्डखाद्यमिति पूर्णं नाम । भामा, सत्येत्यादिव "नामैकदेशग्रहे पदग्रहः" इतिन्यायेन सुखभाषणकाम्यया लघूकृतानि तु नामधेयान्तराणि । खण्डनस्य=लक्षणप्रमाणादिशास्त्रीयपदार्थनिर्वचनप्रतिद्वन्द्विभूतखण्डनस्यैव खण्डस्यैतद्ग्रन्थोदरस्य खाद्यमाद्य स्वाद्यमिति यावत्, य तत्खण्डनखण्डखाद्यमित्येकोऽर्थः । खण्डनेनोक्तलक्षणेन खण्डाः खण्डिताः खमाद्य येषां ते खाद्या गगनादय (1)पदार्था येन यस्मिन्वा तत्खण्डखण्डनखण्डखाद्यमिति तु द्वितीयः । वैद्यकमतानुसारेण पुनरयमर्थः' यथाऽऽमयखण्डने खण्डखाद्याख्यः पाकस्तथाऽशेषमतखण्डनेऽयमपि प्रगल्भते प्रबन्धः । खण्डखाद्यं चोक्तं हारीते—

"शतावरी छिन्नरुहा वृषो मुण्डितिका(2) बला ।
तालमूली च गायत्री त्रिफलायास्त्वचस्तथा ॥
भार्ङ्गी(3)पुष्करमूलं च पृथक् पंच पलानि च ।
जलद्रोणे विपक्तव्यमष्टभागावशेषितम् ॥
दिव्यौषधिहतस्यापि माक्षिकेण हतस्य वा ।
पलद्वादशकं देयं रुक्मलोहस्य(4)चूर्णितम् ॥
खण्डतुल्यं घृतं देयं पलषोडशकं बुधैः ।
पचेत्ताम्रमये पात्रे गुडपाको मतो यथा ॥

---

(1) यद्यपि गगनादिपदार्था नात्र खण्ड्यन्तेऽपि तु प्रमाप्रमाणाद्या, तथापि गगनादीनामात्मप्रतिलम्भका ये प्रमाप्रमाणादयस्तेषां खण्डने कृते सति सुखण्डिता एवैत इति ध्येयम् ।

(2) मुण्डितिकेति पुस्तकान्तरपाठः ।

(3) भार्गीति पु० ।

(4) रुक्मलौहस्येति पु० ।

प्रस्थार्द्धं मधुनो देयं शुभाश्म जतुकस्य च(१) ।
शृङ्गी विडङ्गं कृष्णा च शुण्ठी जाजी पलं(२)पलम् ।
त्रिफला धान्यकं पत्रं त्वगेला मरिचं केशरम् ।
चूर्णं दत्त्वा सुमथितं(३)स्निग्धभाण्डे निधापयेत् ॥
यथाकालं प्रयुञ्जीत विडालपदमात्रकम् ।
गव्यक्षीरानुपानं च सेव्यं मांसरसः पयः(४) ॥
गुरुवृष्यान्नपानानि(५)स्निग्धमांसादिबृंहणम् ।
रक्तपित्तं क्षयं कासं पक्तिशूलं विशेषतः ॥
वातरक्तं प्रमेहं च शीतपित्तं वमिं कृमिम्(६) ।
श्वयथुं पाण्डुरोगं च कुष्ठं प्लीहोदरं तथा ॥
आनाहं मूत्रसंस्रावमम्लपित्तं निहन्ति च ।
चक्षुष्यं बृंहणं वृष्यं माङ्गल्यं प्रीतिवर्द्धनम्(७) ॥
श्रीकरं लाघवकरं खण्डखाद्यं प्रकीर्त्तितम्''(८)–इति ॥

तत्र प्रथमोऽर्थो ग्राम्यो, द्वितीयतृतीयावेव तु साधू इति श्रीगुरुचरणाः ॥

तदेतत् खण्डनखण्डखाद्यं व्याख्यच्छङ्करमिश्रः । अयं हि मैथिलब्राह्मणो भवनाथविदुषः पुत्रः प्रशस्यपाण्डित्यो विश्रुततार्किकोऽभूत् । दीधितिकारस्य शिष्यो मथुरानाथस्तर्कवागीशो,

(१) जतुकं त्वमिति पु०

(२) जातीफलं पलमिति पुस्तकान्तरपाठस्तु न साधीयान् प्रतिभाति ।

(३) सुमथितमित्यस्य स्थाने समुत्थाप्येति पाठान्तरम् ।

(४) सेव्यं मांसरसं पयइति पु० ।

(५) गुरुवृष्यानुपानानीति पाठान्तरन्तु 'गव्यक्षीरानुपानं च'त्यनुपानस्योक्तत्वान्न साधीय इति विभावयामि ।

(६) शीतपित्तवमिं क्लममिति पुस्तकान्तरं तु न बहुमन्ये ।

(७) आरोग्यं पुत्रदं श्रेष्ठं कायाग्निबलवर्द्धनमित्यर्द्धमधिकं पुस्तकान्तरे ।

(८) (खण्डखाद्यं प्रकीर्त्तितम् इति पु०) । पूर्वोक्तश्लोकान्तरयथापथ्यं प्रयोजयेदिति च शेषः ॥

धीरा यथोक्तमपि कीरवदेतदुक्त्वा
लोकेषु दिग्विजयकौतुकमातनुध्वम्'' ॥
चित्सुखीयादिषु न्यायमतखण्डनादिकमस्यैव विस्तीर्ण-
विवर्त्तभूतमास्ते ।

तदेतद्ग्रन्थरत्नं विद्वज्जनानामकारणमित्रेण विद्यापरमेण संस्कृतमभूतसमादरेण श्रीमता A. Venis, M. A. महाशयेन प्रोत्साहितः खलु प्रथमतस्तु । टीकोट्टङ्कितेष्वपि दुरवगाहेष्वन्तराऽन्तरास्थलविशेषेषु स्वयमुपनिबध्यमानया गतिप्रदर्शिन्या नामोपवृत्त्या (टिप्पण्या) संप्रकाशयन् सुसंस्कुर्वन् व्यत्ययैश्च चिह्नविशेषैः प्रकाशयितुमारब्ध श्रीमान्मोहनलालवेदान्ताचार्यः । अथ दुर्दैवोपनिपातप्रभावादन्तरैव स्मृतिमात्रतां सम्पन्ने चास्मिन् भवति मोहनलालेऽस्यावश्यकर्त्तव्यसंस्कृतिमुद्रितस्यास्य ग्रन्थरत्नस्य संस्करणमुद्रणयोः परिसमाप्तिरिति विभावयद्भिः श्रीशास्त्रिवर्यैः पूर्वसंस्कर्तृसमानपाण्डित्यशाली सांख्ययोगवेदान्तोपाध्यायः श्रीमान् कुलयशस्विशास्त्री खल्वत्र संस्करणकार्ये स्म प्रवर्त्तितः । मुद्रायन्त्रा च भारतवर्षश्रेयसानुध्यायिना दीनदयार्द्रहृदयेन सौजन्यधन्येन दुष्प्रापशास्त्रीयग्रन्थाङ्कनोज्जीवनगृहीतदीक्षाकङ्कणेन श्रीयुत Dr. E. J. Lazarus, महाशयेन 'शुभस्य शीघ्र'मिति मन्वानेन तथाऽऽवेदितोऽयं शीघ्रतया प्रायो निर्दिष्टपणीकमेव संस्कर्तुं प्रावृतत् परिसमाप्य च तत अशक्तत्वेन द्विषयविशेषान्सूचीमुद्रयाऽसूचयाऽऽपाततः सञ्जाताः किलाऽशुद्धीः । तदेतत्समाप्तमखण्डस्यास्य खण्डनखण्डखाद्यस्य मुद्रणम् ॥

प्राक्किल कालिकापत्तने (कलकत्ता)ऽस्य द्विस्समवृत्तन्मुद्रणं, यथा व्याख्यासंस्कृतिविरहत्त्वाऽऽलोक्य दोषज्ञानां चेतएव नोदसहताऽध्येतुमध्यापयितुं वा । तच्चिरात्राय समभिलष्यमाणं सांप्रतं व्याख्यासनाथमद्भुतश्रोपवृत्तिसमलङ्कृतं सुसंस्कृतं सुव्यक्तमुद्रितं ससूचीपत्रमखण्डं तदेतत्खण्डनखण्डखाद्यं समास्वादयन्तु सपादयन्तु च तदध्ययनाध्यापनादिपारम्पर्यं पण्डिताऽऽखण्डला, नन्दयन्तु च तत्र भवतो वशीकृतसारस्वतसमृद्धि-

विभूषः संशोधनकृतश्च, तत्सनाभवैदुष्यप्राग्भारभुग्नस्तद्रूपया कृपा-
कृतश्च, तदनुदिष्टपत्रीकृतश्च समग्रोदयप्रत्यग्रमायत्कीर्त्तिविम-
लैर्जगन्ति । अथ शाश्वततावितानिर्बन्धोपघ्नकल्पमहीरुहा
भारतभूविभूषणभूताऽस्मदीयाश्च पश्चिमचूडामणयश्चेत्प्रमनस्यन्ति,
हन्त तर्हि प्रथमपर्यायमुद्रितेष्वस्यैतेषु पुस्तकेष्वयुक्तेषु न चिरा-
देवैतद्ग्रन्थरत्नमासाद्यन्तः सुपर्याप्तोपवृत्तिसमलङ्कृतमतीवसरां
संस्कृतं च भूयोऽपि मुद्रणं लम्भयिष्यन्तीति संभावयामि—

१९४४ तमवैक्रमाब्दे
माघशुक्लपक्षती

कश्चिदाऽऽवसथ्यान्तेवदकान्यकुब्जो,
ब्रह्मामृतवर्षिणीनमस्तारः, साहित्य-
धर्मशास्त्रसांख्ययोगवेदान्ताचार्यो,
रा० भागवताचार्यः ।

(श्रीशः)

(ॐ नमः प्रातःस्मरणीयेभ्यो भगवद्रामानुजाचार्यचरणेभ्यः)

श्रीमदुदासीनसाधुप्रवरमोहनलालवेदान्तादिवि-
विधशास्त्राचार्यस्य ।

जीवनवृत्तान्तः ।

श्रीमान् मोहनलालवेदान्ताचार्यः खलु दुर्लभगुणमयमूर्त्ति
रित्यत्र किमिव बहु ब्रूमो, नन्वेतावदेव पर्याप्तं नाम, यदिह प्रायः
सङ्गीतादिगुणगणभाजो जना नो खलु जायन्ते विपश्चितां चि-
त्ताभिनन्दकवैदुष्यशालिनः । अथ शतेषु सहस्रेषु वा कश्चित्कदा-
चिद्भवत्यपि यद्विधो, द्विविधो दरीदृश्यते विनयसम्पदाम् । अ-
थास्तु क्वचित् कदाचित्कश्चिल्लक्षेषु लक्ष्यस्तथाच, तथाच, तथा-
च; तथाऽपि दुष्प्रापः खलु जगति जन, स्तथाविधो यो भगव-
द्भक्तिसुधानिष्णातो नाम । वर्णसौरभयोगः खल्वयं, यो जगति
जनस्य दुर्लभगुणगणोपबृंहितस्य पुरुषार्थचतुष्टयप्रतिभूभूतभगव-
द्भक्तियोगो नाम । अयन्तु पुनर्वेणुवीणावीणार्द्ध (=सितार)
मृदङ्गजलतरङ्ग प्रभृतिवाद्यप्रयोगेष्वनवद्यविद्योतमानयशा, गा-
नेष्वभिगानकौशलो, विचक्षणः परस्सहस्राणां भगवद्भक्तिसु-
धासमुद्रसमुद्रिक्तप्रेमकल्लोलपरीवाहवेलायितमानसवृत्तिश्रीमत्सू
रदासप्रमुखमहामहानुभावप्रणीतगीतिकादीनां, स्वयं च तद्व(१)
त्कानां तेषां संप्रणेता, मृदुमञ्जुलकाव्यान्तरनिर्माणनिपुणश्चे-
ति साङ्गोपाङ्गसङ्गीतकल्पतरुसङ्गीतकीर्त्ति, रथ तथाविधानाञ्च
ग्रन्थानां निबद्धा चास्मदेतरः (स्वयं) सन्ति, त्वेतावतैव न-
त्वनुमेयविद्यासमृद्धिरत्न, तथा शान्ततया गृह्यमाणोऽप्यपि मित्रा-
यमाणस्य यस्य पुरस्ताच्छत्रवोऽपि मित्रायन्ते इमेऽत्र तु मे ता-

---

(१) मन्दराद्रिणा यथा मथ्यमानात्क्षीरोदन्वतो निरगादमृत-
म्, तच्च प्राश्याऽस्वस्थाः (देवाः) कृतकृत्याः समभूवन्यथा, तथा वयं यद्व-
चाद्भुता विबुधाःस्मः, सः—इति ।

माणिकचन्द्रस्तस्मादभवन्माणिक्यमस्य यशश्च ।
लोकेऽद्यवाप्रमाणो मानविहीनश्च यः स्वयकम् ॥
दानारुचन्द्रनामा तस्मादजनिष्ट शिष्टलोकानाम् ।
सम्भृतगुणश्च निपुणो हरिचरणस्मरणनिष्ठायाम् ॥
उद(१)यादिचन्द्रनामा तस्मादभवत्समुल्लसद्धामा ।
रामाराधनपरमो यः कामाराधनोपरमः ॥
तस्मात्सुजानराये, तिप्रथितः पृथुलसत्कीर्त्तिः ।
कमनीयगुणगणाढ्यः सज्जनसंस्तुताऽभिख्यः ॥
तस्माद् बभूव च सदा मदाऽऽशयाच्छ्रीमदाज्योतिः ।
यः सर्वदाऽब्द(२)रुचिरं चिरन्तनं ध्यातवाञ्ज्योतिः ॥
तस्मात्सकलकलानां केतनमभवत्कलामिश्रः ।
कीर्त्या कलानिधेर्यः प्रतिनिधिरिव लक्ष्यते स्म संसारे ॥
तस्माच्चन्द्रसिंहाह्वयो बभूव लोके समुन्नतस्थितिकः ।
अन्वर्थीकृतनामा सिंहच्छद्मोऽसद्गुणः ॥
लक्ष्मीचन्द्रादभवल्लक्ष्मीपतिपादपद्मरोलम्बः ॥
नानकवंशेत्यभिधो नानकवंशोचितस्ततो जातः ।
ददत्पि नाणकराशिं दिनं दिनं यः कपर्दिनं(३)भेजे ॥
तस्य हि भूत भ्राताऽन्यो पूरसिंह इति श्रुतः ।
दोषे(४) दन्तावलं नित्यं पूर्णसिंह इति श्रुतः ॥
तदात्मजोऽयं श्रुतिमार्गगामिनां सुसंमतः पात्रगुणोपक्लृप्तिमान् ।
गभीरसुस्वच्छसुशीलताशयो रसोत्तरो मोहनलालनामकः"(५) ॥
तदित्थमयं श्रीमन्मामकाश्रयोदशतमपुरुषः । जन्मतः-

---

(१) उदयचन्द्र इत्यर्थः ।
(२) घनाघनघटामेचकच्छवि शाश्वतिकं तेजो, वैष्णवं धामाऽऽदिपुरुषं पुरुषोत्तममिति यावत् ।
(३) कपर्दः शैवोजटाजूट, तद्वाञ्छिवएव ।
(४) दोषरूपे गजे इति व्यस्तरूपकं हुँपद्ये, अथ च दोषाणामिदन्तावलं सर्वजनसंवेदनमित्र्यऽऽकर्षाकतावलं, तद्वेत्यैकपद्यकोटिः । कोटिद्वये चनयोर्भिदा तु तयोरैक्यस्य कविसंप्रदायसिद्धत्वाद्देतादृशोऽत्रवरेऽकश्चित्करी ।

प्रसुप्त्येवास्य चेतो लौकिकविषयाणामस्ति स्म वैदेशिकम्(१)
स्तनन्धयोऽपि(२) यो हरिभक्तः स्तनन्धय(३) इवासीत् । यथा
यथा च वर्द्धते स्म, तथा तथा हरिभक्तिरसास्वादादखण्डवदपुष्य-
दतुष्यच्च । तदेवमयं समानशीलेन ज्यायसा सोदर्येण श्रीराम-
मदनाभिधेन सह कौमारादेवारभ्य वर्तमान आस्वादयन्भक्ति-
रस, मधीयन्परिशीलयंश्च ब्रह्मवादानासीत् पञ्चनदविषयेष्वे-
व । अथ स्वैरं स्वैरं पवित्रक्षेत्राणि समीक्षमाणो, नानाजनपदा-
न्गाहमानः, पुण्यसरित्स्ववगाहमानो, भगवदर्चाश्चार्चयन्, भूदे-
वांश्च प्रणमन्, गाश्च प्रदक्षिणीकुर्वन् वेदान्तादिविचारैर्विदुष
श्च सन्तोषयन्, न्दयानन्दसरस्वतीप्रमुखांश्च प्रच्छन्नान्नास्तिकान्
अयमायातोऽयमायात इति जनतातः स्वीयतद्दिगागमनश्रुतिमा-
त्रेण कान्दिशीकांश्च विदध, द्धश्च सनातनवैदिकधर्मकर्मप्रतिष्ठां
जनयन्स्वा,ऽऽसादयामास(४) वाराणसीम् । तत्र च तदीयरम-
णीयतापहृतहृदयोऽधिकं वासमरोचयत् । निवसंश्च 'वारा
णसी साम्प्रतं परमं विद्याक्षेत्रमि'ति के केऽत्र कीदृशाश्च विप-
श्चितइति तांस्तानाकर्णयन्निर्वर्णयंश्च कदाचन श्रीयुतसाहि-
त्याचार्याम्बिकादत्तव्यासेन समगच्छताऽपृच्छच्च तमेकथानु
कथनपारम्परीसम्प्रवृत्तौ—'अप्यस्ति तादृशोऽत्र कश्चिदवश्यद-
र्शनीयो, योऽसौ विपश्चितामपश्चिमः स्याद्दर्शनेषु. निपुणानां

---

(१) विविधदेशभाषाव्यासंक्रमणिजनानां बहुमतो ज्ञानविज्ञान-
सौजन्यकलाकलापादिसद्गुणसंपन्नो गम्भीर, मायामात्सर्यादिदोषजाता-
नुपहतप्रशान्तचित्तवृत्तिः श्रीकृष्णलीलाविलासदर्शनाऽऽदरइति प्रकृत-
कोटिः । भीष्मग्रीष्मपथिकाभीष्टो भवति किल कलिकाले रिक्तानु-
पहितो गम्भीरतया सर्वथा चनाविलसुखशीतलसुरसजलपरिपूर्णः कूप-
इत्यप्रस्तुतकोटिः । एवं च निरुक्तरूपकूपद्वावाविरुपमा पर्यवस्यति ।
तेन च परोपकारसंभारसंपादनमात्रप्रयोजनसंभृतशरीरत्वादिलक्षणो
वर्ण्यगतो विशेषः परिस्फुरतीति विदांकुर्वन्तु हृदयालवः ।

(२) तेभ्यो विरक्तस् ।
(३) शिशुस्तदेकवृत्तिश्च ।
(४) "आङः पद गत्यर्थे" ।

मूर्द्धाभिषिक्तः स्याच्चातुरीषु, आचार्याणामग्रणीः स्यात् पवित्राचारेषु, सभास्ताराणां(१)प्राग्रहरः स्याद्व्यवहारेषु, भागवतानां च परमः स्याद्भगवद्भक्तिप्रमुखमोक्षोपाये, एवमुक्तेष्वन्येष्वेवंजातीयकेषु लोकदुर्लभगुणेषु गरीयान्, गरीयांश्च स्याद् ब्रह्मविद्यातर्कविद्ययोः" । आकर्ण्य चेदं विस्मेरहृदयः स व्यासवरः सुस्मेरवदनमेवमुत्तरं तरङ्गयति स्म "अयि कौतुकिनां शिरोमणे, कुतोऽद्य श्वो जगति जायन्ते भवदुपवर्णितगुणानां सम्बद्धपौर्नामैवंविधा विशिष्टाः शिष्टाः । प्रायो दृष्टाएव च भवेयुरत्र भवता तत्तद्गुणशालिनस्ते ते ब्रह्मचारिणश्च, गृहस्थाश्च, संन्यस्ताश्च, विदग्धाश्चान्ये च गुणिनः । परं विलक्षणगुणसमष्टिमेवान्विष्यति खलु तादृशीं महिमेव । नूनं साधूक्तमभियुक्तैः "यो यादृशः, स तादृशेऽभिरमत" इति । भवत्प्रश्नवाचोयुक्तिरेव च व्यनक्ति, यथाऽद्यावधि नो खलु लोचनगोचरीकरोति स्म भवानत्र भवन्तं श्रीराममिश्रशास्त्रिवर्यम् । तदुत्तिष्ठापनय चेदं कौतूहलं, मा विलम्बस्व, सफलयाद्यैव चक्षुषी, पश्याद्य वाराणस्याः समस्तभारतस्यैव वा सारवत्ताम्–इत्यभिदधदेवोदस्थात् । अथैतौ ग्रीष्मर्तुसायाह्नेऽस्ताचलचूडामणीभवति भगवति भास्वति दशाश्वमेधगङ्गाघट्टमगाताम् । तत्र च सान्ध्यं विधिमनुष्ठाय द्वित्रैः प्रियच्छात्रैः समं समासीनं शास्त्रिवर्यं भगवत्या भागीरथ्यास्तटघट्टके दूराद्दर्शताम् । अथ व्यासवरो 'ऽयमेवासावत्र भवानास्ते, तदहं भवन्तमावेदयामि तावत्तत्रभवते शास्त्रिवर्याये'त्युक्त्वा, गत्वा, नत्वा च, वेद्य, तेनाभ्यनुज्ञातश्च प्रापय्य मोहनलालमदीदृशत् । मोहनलालस्तु सहजविनयव्यासवरस्तदुदारमूर्त्तिदर्शनाच्च सुदूरमारोपितश्चमत्कारेण, ववन्दच्छास्त्रिवर्यम् । शास्त्रिवर्यस्तु 'आगम्यतामास्यतामिहे'त्युभावप्युपवेष्टुमादिदेश । अथ शास्त्रिवर्यो व्यासवरमन्वयुङ्क्त–'क इमे, कुतः समायान्ति, किं चोद्दिश्येत्यशेषमाख्यायताम्' इति । व्यासवरस्तु–'जन्मनगरतोऽयं पश्चिमाञ्चल्यैते ता

(१) प्राग्रहरः श्रेष्ठः ।

यदुपश्चिमा महात्मानो वाराणस्यामायाता निवसन्तश्चात्र कियतोऽपि कालं, तदद्य भवद्दर्शनार्थिनैवेह मया सह समायाताः'—इत्यचकथत्। शास्त्रिवर्यस्तु परमतुष्टः मोहनलालस्य शान्त्या च, गाम्भीर्येण च, विनयेन चा, बोधश्च 'भद्र, यथावकाशं भूयोऽपि कदाचिदागन्तव्यमि'ति वक्ता चोदतिष्ठत्। एतावपि च नमस्कृत्य शास्त्रिवर्यं यथागतं गतौ। अथ गच्छतोरेनयोः प्रावृतदालापः—'अहो धन्या वाराणसी, यत्रैतादृशो विद्वद्वृन्दारको द्रष्टुं प्राप्यते, अहो सम्प्रत्य गीर्वाणगुरोर्दर्शनम्। यदि शास्त्रिवर्योऽनुगृह्णीयात्तदस्मादधीयीयेति स्पृहयते मे चेतः'। एवं भविष्यतीति चाह स्म श्यामवरः। अथापरेद्युरयं श्यामवरेण सहैवोपगत्य सदनं शास्त्रिवर्यस्य, वेदयामास च श्यामवरमुखेन स्वं मनोरथम्। शास्त्रिवर्योऽप्येतस्य तादृशीं सुशीलतां शुभंयुहार्दतां(१) चालक्ष्यान्वमोदत तम्। अथ प्रारब्धः मोहनलालोऽध्येतुम्। षड्भिर्वत्सरैरनतिच्छिन्नमधीयन्करक्रोडीकृतवान् स्मावश्याध्येतव्यं वेदान्तसांख्ययोगादिग्रन्थजातम्। अथायं स्वयमनिच्छन्नपि पुरस्कृत्य गीर्वाणीमाज्ञां संस्कृतसाम्राजविद्यामन्दिरे वेदान्ते सांख्ययोगयोश्च तीर्थाचार्यपरीक्षां तेष्वर्जिजदाचार्यतामाप्नोहताम्। तदनु च पुनः संस्कृताङ्ग्लप्रबन्धे प्रतिष्ठाप्यमाने परीक्षावदेव प्रावर्तिष्ट शिक्षितुं समासाद्याऽऽङ्ग्लीविज्ञानं तदुपनिबद्धान्मौतिककलाग्रन्थान्यद्यावसातारयिष्यमार्याया, (हिन्दी) भुवाकरिष्यन्तर्हि स्वदेशबन्धुजनतायाश्चैव समीहमानः। अथास्य धिषणासु मेधासु प्रतिभासु तत्त्वाऽऽकलनासु प्रेक्ष्य प्रमद्य च प्राह स्म शास्त्रिवर्यः 'अयि भवन्! भवान्नाभतेऽद्याऽपूर्वमुपनिबन्धुम्। तद्ग्रहणतु कांश्चिन्निबन्धान्। क्षममाणे ह्यकिञ्चित्कुर्वाणो गीर्वाणोऽपि न खलु बहु मन्यते जनैः। कुर्वाणश्चैवमु कुर्वाणो भविता भवाञ्जनतायाश्च बुद्धिमतायाश्च। तदेवमभिहितोऽहितोपदेष्ट्रा गुरुणा करुणावरुणालयेन मोहनलालोऽपि गुरुणा विनयेनाब्रवीत्, 'गुरुचरणानां करुणास-

---

(१) शुभतात्पर्यवत्ताम्।

रणिमण्डलमध्यासीनस्याज्ञानामस्यापि जनस्य किमिव दुष्प्रा-
पमामे'ति(१) । अथासौ प्राणैषीन्निबन्धान् । ते यथा, दोषदूष-
कतामूलनिर्णयः, महामोहमोहविद्रावणम्, वेदान्तसिद्धान्ताद-
र्शः, खण्डनगर्तप्रदर्शिनीत्याद्याः संस्कृतस्य; शिल्पचमत्कारचि-
न्तामणिः, प्रतिबिम्बचित्रचिन्तामणिश्चाऽऽर्यायाः (हिन्दी),
आर्यामयं निश्चलदासकृतवृत्तिप्रभाकरं च संस्कृतभाषाया प-
द्यैरवातीतरत् । अथैकदा दयानन्दः काश्यामागत्यावृतत् । तां-
स्तांश्च तदीयान्प्रच्छन्नद्वेषवादाञ्जनमुखेभ्यः श्रावं श्रावमयं ब-
हिर्विहारार्थं विनिर्गतः कस्मिँश्चिदुद्याने दयानन्देन दृष्टो 'ऽय-
मेवासावित्यभिजानता च 'प्रतारयिष्यामीत्यभिचयता च दा-
पितासनः समुपाविशत्, अन्येऽपि चैनत्सहचराः । ततोऽन्यबु-
द्ध्या प्रतारयितुं प्रलाप्यमाने कुहनाकाषायेऽस्य शास्त्रीयं श-
स्त्राशक्तिं किमपि तथा प्रावीवृत,-द्यथा स कुहकः क्षणमात्रं
'कोऽयमापतितः खलु मत्पा(२)शुपतः खण्डनप्रचण्डमार्तण्ड'
इति सविस्मयं चिन्तयित्वा यदैनदीयसारस्वतप्रवाहस्य प्रतिरोधे
न किञ्चिदपि शास्त्रीयमध्यगच्छत्, तदाऽशोचद्दार्य्याऽऽर्यांस्तट-
स्थान् "भवन्तस्तु वदन्तु किमेतैरिदमुक्तम्, भवन्तः संस्कृतं न
जानन्तीति कृत्वा युष्माकं पुरस्तादेतावद्दैते व्यर्थमुद्घोषितम्'
इति । तां तु तस्य मायां दृष्ट्वा विहस्यार्ययैव तेषां सर्वेषां प्रबो-
धनार्थं मोहनलालएकैक मायाभिक्षोर्मतमखण्डयत; यच्च कि-
ञ्चिद्धौत्यं वचोभिः प्रकटीकुरुते स्म स मायिक, स्तत्सर्वं सर्वेषा

---

(१) जनस्येत्यत्र "न लोकाऽव्ययनिष्ठे" त्यादिना षष्ठीप्रतिषेधे-ऽपि 'कोऽशदग्धसमग्राणां किमेषां खलु दुष्कर' मित्यादाविव कविकुल-भूषणत्वेन गुणत्वाच्छेषिकी षष्ठी । अतएव "इदं हि पारब्रह्माहात्म्यदर्शना-ऽलसचेतसाम् । प्रपभावमवज्ञाति न च सौभाग्यमुज्झती" त्याहुर्हृदयज्ञाः । एवमेव 'भवन् !' इत्यादावपि तत्र तत्र समीक्षितव्यं सूरिभिः ।

(२) पाशुपतशब्दं धर्मिमात्रवचनं केचिदाहुः । वयं पुनर्मत्वरा-दिपदवदस्य धर्मिधर्मोभयाभिधायितां मन्यामहे ।

पुरो निरास्थत् । तदेवं सूर्यास्तमयनसमयात्संप्रवृत्तेऽस्मिन्प्रश्न-
नास्तिकमतखण्डने निशीथसमये च संपरिप्राप्ते प्रक्षिप्तगात्रो मू-
कप्रायः कपटभिक्षुः प्राणपरित्राणस्य प्रकारान्तरमपश्यन्नचकथत्,
'अद्य दिवसान्तरे पुनर्विचारं करिष्ये, अद्य समाप्यतामि'ति ।
तत्रस्थास्ते सर्वे लोका भृशं कपटकाषायमुपाहसन्नवदंश्च "कि-
मद्य भवद्वक्तव्यमखण्डितं श्रीमता मोहनलालमहानुभावेनाऽव-
शिष्टं, यस्य कृते पुनरागमिष्यति भवान्'इति । मोहनलालस्तु तं
तथाभूतं दृष्ट्वा स्वयमेव तस्यापमानेन खिन्न इवावोचत्—"अहो
भवन्, भवतः सनातनवैदिकधर्मविलोपवासनाकलुषं यत्किंचिद्
भवद्भिर्निर्गतं मन्मुखात्, तत्सर्वं तेषां धर्मसंशयापनोदनायैव
नत्वन्योद्देशेन । तन्माभूद्भूयोऽपि मे मुखाद्दुर्मावधीरणेत्युक्त्वा
सर्वैः सभ्यैः सह तत उदचलत् । मध्येमार्गं चाथ ते रङ्गप्रेक्षकै-
र्धर्मसंशयविनिर्मुक्तचित्तैः सुपक्षैः सबहुमानं प्रार्थितः—"अयि
श्रीमन्, इदं पाखण्डमतखण्डनसर्वस्वं भवान्ग्रन्थरूपया संकलय्य
संप्रकाशयेच्चेत्पुस्तकमेकं, सर्वथा सनातनधर्मः पुनरुज्जीवित-
स्स्यादि"ति । एवमेव भविष्यतीति चोक्त्वाऽयं व्यवर्जयत्तान् ।
भूयोऽपि च यदाऽश्रौषीदयं कपटभिक्षोरनभिज्ञजनताप्रतारणा-
वादांस्तदाऽयमकरोच्चेतसि—"अद्य श्वो भारतभुवि भूरयो
व्यक्ताश्चाव्यक्ताश्च पिचण्डभारहरणार्थिनः सनातनधर्ममु-
षयितुं सन्ति प्रवृत्ताः तदेते कुक्षिम्भरयो निर्लज्जा निर्मर्या-
दाश्च यद्यपि शतकृत्वोऽपि पराजीयेरंस्तथापि न निवर्त्स्यन्ति,
कथंकारं वा निवर्त्तेरंस्तेवराकाः, नो खल्ववकल्पते नाम स्व-
न्यपाकारमनायासरमणीय पिचण्डकुण्डिकाऽऽवपनं पूर्वार्जित-
भस्मकघस्मरतया विस्मर्त्तुं स्वीकर्त्तव्यतामकिञ्चित्कराणाम-
किञ्चनानामीदृग्जनानाम् ; तथाप्यनभिज्ञानामार्यजनानामार्य-
जनानां मा भून्महामोहेनानार्यतेत्यावश्यकं पुनः पाखण्डमत-
खण्डनग्रन्थग्रन्थनम्" इति । आकलय्य चैवं निरमिमीत मिश्र-

ष्यमभिधानमहामोहविद्रावणम्(१) । अथायमेकदा श्राम
यावी संवृत्तः पक्षमात्रमिव, तन्मात्रं चिरक्लेशतश्च लौकिक-
कृत्येषु सशोकं तत्तच्चिन्तयन् अनुष्टुभ्येव स्वानुभवोद्रेकं नाम
व्यधत्त ग्रन्थम् । अहो महात्मनां क्लेशोऽप्यनल्पतरोपकृतयएव
लोकानाम् । ननु शोकोऽपि परमर्षेर्भगवतो वल्मीकजन्मनः
सुरगणस्येव(२)प्रतिपेदे श्लोकतां, सकलजगद्विस्मयैकहेतोर्महे-
श्वरशिरःसत्कृतस्य विशङ्कटविकटमीमांसानक्रचक्राक्रान्ताऽपा-
राम्नायपयःपारावारसारायमाणरामायणसुधादीधितेश्च निदा-
नताञ्चेति तस्यैव निदर्शनभूतमिवास्याप्येतदालोकयामः ।

अथैकदा संस्कृतविद्यारसिकशिरोमणिर्भूयस्तदुज्जीवन-
जीवातुसमीहितो वाराणसेयराजसंस्कृतविद्यामन्दिराध्यक्षः
श्रीमान् G. Thibaut, Ph. D. महोदयः शास्त्रिवर्यं ब्रवीति स्म
प्रसक्तानुप्रसक्त्या—“अद्यत्वे खलु प्रायोऽन्यादृशमेव किञ्चित्पङ्गु-
पाण्डित्यमालोक्यते । भूम्ना हि भारतरत्नाकरः पुरस्तात्तैस्तैस्ता-
दृग्विनिर्देशनविरलमहारत्नैः प्रतिभाप्रभाभास्वरस्वरूपैरसमानन-
दभिमानोन्नतचित्तानां सुसमृद्धबुद्धिविभवानामभिरूपमूर्द्धा-
भिषिक्ताचार्याणां शिरोधार्यैर्हार्यैर्व्यभाति स्म यथा, न तथा

(१) यद्येतत्तावदार्यभाषया रूपकरूपेणानार्याऽऽभाणकादिनोपबृ-
हितं निरूपितमास्ते श्रीमता विजयानन्दपण्डितेन महामोहविद्रावणमेव
नामतो, वस्तुतश्च यत्र खलु सा वैदिकधर्म्मशर्म्मोदयरूपाऽऽर्यमहोत्स-
वमाकलय्याऽऽर्य्यभाषा कमनीयसुप्रसन्नभास्वररूपा स्मितोन्मुखी नरीनर्त्ति
च मञ्जुलमञ्जुलैः पदन्यासैः, गूढार्थभावाविष्कारैः सहृदयहृदयेषु वर्षति
च चमत्कारसारं, परोक्षमपि वस्तु समक्षमिव कुर्वती साधारणजनान-
प्यावर्जयति च, जयति च सर्वथा सौहित्योद्गारिमनोहारिभिः सर्वैरेवाङ्गैः ॥

(२) कदाऽपि त्रैलोक्यं दौर्वाससशापोपहतं निःश्रीकमत्यन्तं संवृ-
त्तमिति तदा महेन्द्रादयो देवास्तापोपहता भूयो जगत्स्वास्थ्याऽऽप्यायनं
संपिपादयिषवो भगवता विश्वम्भरेण ते स्म समुद्रं मन्थितुं प्रवर्त्तिताः ।
निर्वृत्ते च तस्मिन्नारम्भे चन्द्रः समुदपादीत्यादिस्तत्कीर्त्तिकथेतिहासे-
ऽनुसन्धीयताम् ।

वशिवनरैः। तेषां तावदेतेषां भारतवैदुष्यसर्वस्वभूतानां दार्शनि-
कप्रबन्धचिरन्तनानां खण्डनादीनामध्ययनाध्यापनादि स्वति-
विरलायितमास्ते। अमुष्य च वैरल्यस्यापरं हेतुं विभावया-
मस्तदर्हपुस्तकवैरल्यम्। तदेवंजातीयकानां ग्रन्थानां सुसंस्कृति-
माञ्जिसटीकसोपवृत्तिक(१)पुस्तकवैपुल्ये सति सम्पाद्यमाने,
संभाव्यते भूयस्तत्समुज्जीवनम्। पुस्तकवैपुल्यं च मुद्रणामन्तरा
न खलु सौकर्येण सम्भवतीति भवद्भिरेषां मुद्रणं युक्तरूपमुत्प-
श्यामो, वाञ्छामश्च। कश्चेतरो वा भारमेवरूपमुद्वोढुमर्हेदी-
शोऽत वा, यो न भवति खलु भवादृशः" । शास्त्रिवर्या अपि
तदाकर्ण्य, लब्धलक्षप्रभोस्तत्तादृशशास्त्रसमुज्जीवनसमुत्साहमाक-
लय्य हृदैव श्लाघंश्च तं सुस्मेरमेवमाह स्म—"सत्यमिदमेवम्;
तदात्वे तावन्ने विचक्षणसार्वभौमाः प्रायो मातृभिर्लालनपाल-
नावसरेषु 'अयं चन्द्रमाः, अयं सूर्यः, इमे ग्रहाः, एते सप्तर्षयः' एता-
स्तारका इतीत्थं शैशव एव ज्योतींषि परिचायिताः पुनः पितृभिः
परमसौकर्येण नाद्विद्यामलम्भयन्; व्याकरणं च बाल्य एव संस्कृ
तभाषाशिक्षणेषु तां भङ्ग्यन्तरीयैर्नितरां तावदध्यापयिषतैषत्क-
र्यचर्यया। अथ ते प्रज्ञाप्रौढिमत्सु यथायथं दर्शनान्यध्यगीषताऽ-
ध्यजीगपंश्च विद्वद्वृन्दारकाः। यदाह च भवान्, भवितुमर्हति
तत्तथा। तत्र यावदस्मास्वायतते न खलु तावद्वक्तव्यमपक्षते।
नन्वस्माकं मोहनलालवेदान्ताचार्यः खण्डनं पाठयत्येवाऽविरतं
प्रायो, द्वित्रान्सुमेधसश्छात्रान्। तन्मदुक्तः स खण्डनं तु शीघ्र-
मेव तावन्मुद्रणां लम्भयिष्यति। नात्र दुर्घटमिवास्ति किञ्चित्।
परं परस्ताद्द्रष्टव्यं परम्" इति॥

अथ कदाचिन्मोहनलालं खण्डनखण्डखाद्यमध्यापयन्त-
माकर्ण्य कश्चिद् द्वेषदूषितधिषणं धिषणम्मन्यमना समागत्य श-
ठदाद्यगादीत्—'अहो जन्मतः पठतः पठतोऽपि मम खण्डनं
नायातम्, कथमसावध्यापयेत्, हन्त प्रथमतो बुद्ध्यतां तु खण्डनं,
चरमतोऽध्याप्यताम्'' इति। तदेतत्कर्णाकर्णि चाकर्ण्य शास्त्रि-

(१) उपवृत्तिष्टिप्पणीनाम।

वर्यो मोहनलालमाकार्याऽब्रवीत्- 'भवान् सुपरिष्कृत्य सटीकं सोपवृत्तिकं खण्डनं प्रकाशयत्वि'ति । तदाऽसावपि च मशाङ्करण्याख्यं तत् स्वकृतया गर्त्तप्रदर्शिन्या प्रदर्शितपद्धति सुपरिष्कृत्याङ्कनां प्रापयितुमारभतराम् । तदेवं प्रत्यक्षखण्डनं यावद्गर्त्तप्रदर्शिनीं निर्माय परिष्कृत्याङ्कनां गमयित्वा च खण्डनखाद्यं, विघ्नबहुलतया शुभकार्यस्याऽसारतया च संसारस्याऽनित्यतया च शरीरस्य, साधुपुरुषचिरस्थास्नुत्वाऽसहिष्णुतया च कलेः, सतां चेतस्सु च शोकशङ्कुं कीलयन्निव, चक्षुष्षु च प्रणालकबन्धुनां बध्नन्निव, मुखेषु च हाकष्टानर्थधिक्शब्दपारम्परीं पक्षवयन्निव, गीर्वाणगुरुणा सह सम्भाषितुमिव, विशिष्टाद्वैत, शुद्धाद्वैत, केवलाद्वैत, शुद्धद्वैताद्यौपनिषदोपनिष्करेष्वत्र भवन्तः कतमं परिशीलयन्तीति सनकादीन् परिप्रष्टुमिव, प्रजापतिं द्रष्टुमिव, मन्दाकिन्यामुपस्प्रष्टुमिवोर्द्ध्वस्तष्टेः सत्त्वविशालता कियतीति परिच्छेत्तुमिव च भूलोकमजहात् । कीर्तिमूर्त्या तु पुनरद्यापि विद्यत एव । सुश्लोका हि लोका दुर्गन्धमलीमसपरिच्छिन्नक्षणभङ्गुरबीभत्सशरीरकं जहतोऽपि सुरभिविभ्राजिष्णुविशालशाश्वतिकस्पृहणीयकीर्तिकलेवरप्रकाण्डैर्वरीवृत्यन्त एव स्वलवजस्रं जगत्याम् ॥

तदेतावत्तावत् स्वरूपयमिदमादर्शयितुमस्मद्भारतीयभातृन्, यथाऽद्यापि यशस्विनी सनाथा धन्या च भवति यशस्करैर्भाग्यशालिभिर्महानुभावरत्नैरेवंविधैः; परं कलिकालकरालकटाक्षक्षेपविक्षेपैर्न चिरत्राय तु पुनः प्रतितिष्ठति पुत्रवतीयं तैरिति हन्त प्रसादविषादयोः समं समुपनिपात इत्यहो विधिसंविधानमिति ॥

१९४४तमवैक्रमाब्दे
माघशुक्लपञ्चती

भारतधुरन्धराणां कनीयान् भ्राता
यः कश्चन
रा० भागवताचार्यः

(श्रीशः)

(ॐ नमो भगवद्भ्यः श्रीभाष्यकारचरणेभ्यः)

अनिर्वचनीयतावाद-विज्ञानस्वप्रकाशता-वाद-स्वरूपदिक्प्रदर्शनम् ॥

इहास्ति खलु विज्ञानविशेषात्मकतया प्रथमाने जगति विज्ञानं सत्, तदितरत्त्वनृतम् । अनिर्वचनीयं हि सदसत्त्वसदादिरूपमेतद्विश्वं न तावत्सदस्तीति शक्यते वक्तुम्, तथाहि—"लक्षणप्रमाणाभ्यां वस्तुसिद्धि"रिति हि प्रमेयमलावादिनां वादाहवदुन्दुभिध्वानः । न च लक्षणानि दूषणचक्रमुखेभ्यः शक्नुवन्ति निस्तर्तुम् । लक्षणानां चैवंगतौ 'लक्षणाधीना लक्ष्यव्यवस्थिति'रिति सुदूरनिरस्ता तपस्विनी लक्ष्यव्यवस्थितेरात्मलाभप्रत्याशा । प्रमाणेषु च विपुलं वादिनां विविधविप्रतिपत्तिसद्भावादवतरति लक्षणापेक्षेति परीक्षायां तेषां स्वयमपि लक्ष्यतया न नाम लब्धपदत्वम् । प्रमाणाधीनश्च प्रमेयाङ्गीकार इति कुतस्तरां प्रमेयाणां सिद्धिः ।

नन्वेतेषां पदार्थानां लोकसिद्धत्वादेवाङ्गीक्रियतां सत्त्वं, किमनया विडम्बनयेति चेत्, लोकसिद्धत्वादेवाङ्गीकारे युष्माकमपि परस्परं विप्रतिपत्तेरनवकाशः । किञ्च, 'लोकसिद्धत्वा'दिति तावन्निरूपणमर्हति । किन्नाम लोकसिद्धत्वं, सर्वैः प्रतीयमानत्वं, माहोस्वित्सत्त्वेन प्रमाणसिद्धत्वम् । तत्राद्ये, मरुमरीचिकोदकादीनां सत्त्वस्य को वा वारयिता स्यात् । ननु सर्वैस्तथाप्रतीयमानत्वमुच्यते, न च मरुमरीचिकोदकादीनां सर्वः प्रत्येति तथात्वं, अपि तु कश्चिदेवेति चेत्, न हि भो घटादिकमपि सर्वः प्रत्येति । अथोच्येत, अस्ति तत्र सर्वेषां तथाप्रत्ययस्य स्वरूपयोग्यता, न तु मरीचिकादाविति चेत् । निरूप्यतां सा योग्यता, कथंकारं चाधिगता तदित्यादिपर्यनुयोगपरम्परां न खलु विश्रमयितुं पारयिष्यसि । किञ्चैवं सति शरीरात्मतादात्म्याङ्गीकारिभिर्लौकायतिकैरेवार्जितं जितं, हंहो आस्तिक्यं

साध संरक्षितं धोधनैः। अपि भेः, पश्चाद्बाध्यतया तत्तथा नाङ्गीक्रियत इति चेत्, तर्हि एतेषाम् खलु पश्चात्तनबाधबाध्यतेत्यत्रार्थे कस्ते देशिकः।

अथास्तु द्वितीय इति चेत् (सत्त्वेन प्रमाणसिद्धत्वं), तर्हि परीक्षामधिकरोति। न हि परीक्षामन्तरा सत्त्वेन वाऽसत्त्वेन वा प्रमाणतः सिद्धाऽपि संभवति परिच्छित्तिः। न चैते प्रमेयाः सन्ति विज्ञानमिव स्वप्रकाशाः, येन न स्यात्साधकापेक्षा।

(विज्ञानस्वप्रकाशतावादः)

विज्ञानं हि स्वप्रकाशं स्वतःसिद्धस्वरूपम्। तद्धि नो परतः सेद्धुमर्हति। तथाहि—यत्र यत्र हि जिज्ञासितस्य(१)संशयविपर्ययव्यतिरेकप्रमायाश्च यावदभावकूटं वर्तते, तत्र तत्र जिज्ञासितस्य प्रमितत्वमि'त्यय नियमस्तावद्धर्मसत्ताद्दिनैव निर्धारितः। जायते च विज्ञाने न तावत्कस्यचिदपि कदाचिदपि 'जानामि, न वे'त्याकारकः संशयो, न वा विपर्ययो 'न जानामी'त्याकारकः न जानामीत्याकारा विज्ञानव्यतिरेकावगाहिनी प्रमा तु वराकी दूरापास्ता। तत्सद्भावे तदभावावगाहिग्रहस्य भ्रमत्वनियतेः। विज्ञानमस्वप्रकाशं चेदभविष्यत् तर्हि विज्ञाने सत्यपि जिज्ञासायां सत्यां ज्ञानाभावविषयकं ज्ञानं संशयो वा विपर्ययो वा व्यतिरेकप्रमैव वा निरर्गलमभविष्यत् 'यत्र हि प्रमितत्वाभाव,—स्तत्र तत्र सत्यां जिज्ञासायां प्रमितत्वाभावावगाहि ज्ञानं जायत' इति प्रतिनियमात्। तदित्थं विज्ञानस्य परानपेक्षप्रमितत्वमेव स्वतःसिद्धत्वस्वप्रकाशत्वादिपदव्यपदेशभाक्।

(१) यद्यपीच्छाया अनिश्चितवस्तुविषयकत्वस्वाभाव्यप्रतिनियमेन जानीयामित्येवं स्वप्रकाशस्वरूपे भाने न तावत्प्रभवन्त्यन्तरीतुमिच्छा वेति जिज्ञासास्वप्रकाशतयोः परस्परप्रत्यर्थिस्वरूपता न संघटते जिज्ञासया लिङ्गभेदनं, तथापि न खलु स्वप्रकाशताया लैङ्गिकभानगोचरत्वमत्राभिप्रेयते, यथा सति हि परिपन्थिनी परप्रकाशतैव भवति तद्रूपदेति व्याप्त्युपदर्शनस्य तात्पर्यं विभावनीयम्।

व्यवसायानन्तरमनुव्यवसायो भवतीति न व्यवसाये संशयादिरिति चेत्, तत्रैव गत्वा ज्ञानस्य ज्ञानं नाभ्युपगंस्यते, तत्र तदज्ञानव्यक्तेः संशयादिर्दुर्वार इति प्राथमिकविज्ञानविषय-पर्यन्तविशयादिः प्रसरिष्यतीति व्यवहारोच्छेद एव पर्यवस्यति । विषयिसंशयादेर्विषयसंशयादिजनकताध्रौव्यात् । अथ व्यवसा-यानुव्यवसायतदनुव्यवसायपुनस्तदनुव्यवसायपारम्पर्येऽविश्रा-न्तेष संस्यत इति चेत्, तर्हि यत्किञ्चिदेकमात्रविषयविषयकविज्ञा-नधारायामविच्छिन्नप्रवाहतया जन्मशतकेनाऽपि विषयान्तरस-ञ्चारो दुर्लभ आपद्येत, ऽपर्यैश्च मूर्च्छासुषुप्तिमरणमोक्षाः शश-विषाणायिताः । मूर्च्छादौ हि तत्तद्विषयावगाहियावज्ज्ञानाभा-वः सर्ववादिसंप्रतिपन्नः । न चैतज्ज्ञानधारायाः संतत्त्वे संघ-टते । ननु ज्ञानप्रामाण्यसंशयाधीनः संशयस्तत्राऽपि (वैज्ञानिक-स्य) विषयपर्यन्तो निरर्गल एवेति चेन्नैतत्; ज्ञानस्वप्रकाशतानये हि मानमेयभावव्यवस्थाया अभावादेव तदाश्रया दोषाः सन्ति निरवकाशाः । यदि तु भेदेन विषयविषयिभावो भवेत्, तर्हि ज्ञानस्वरूपमेव न सिद्ध्येत् । विज्ञानस्य परमुखनिरीक्षकत्वे ख्या-पतति पूर्वोपदर्शितविधया मूलक्षयकरी खल्वनवस्था दुरवस्था । अथोच्येत, अवश्यज्ञेयतां ज्ञानस्य नाभ्युपेमः, स्वार्थसंव्यवहा-रस्तु ज्ञानस्य स्वरूपसत्तयैव निर्वक्ष्यतीति ब्रूमह इति, न तदपि विचारचारु, यतः स्वरूपसत्तायां प्रमाणाप्रवृत्तौ स्वरूपसत्तैव कुतः समायातम्, येन व्यवहारः समासादयेदात्मानम् । कुतो-ऽवसितमिदं सतो सा भित्तिरिति, असत्येव कुतो न स्यात् । तदिदमुच्यते "अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति" इति ।

घटपदादेः सत्तां व्यवहरन् हि प्रामाणिकस्तत्र प्रमाणसद्भाव वक्तुमर्हति, न हि प्रमाणमनुपन्यस्य परीक्षकेण तत्सत्ता शक्यते ऽङ्गीकर्तुम् । प्रमाणमव्यापारयतो वाङ्मात्रेण चेद्वस्तुसद्भावः सिध्येत्, तर्हि नास्तितावाङ्मात्रेणाऽसद्भाव एव किमिति न स्यात् तदवश्यं तेन घटसत्तायां व्यवस्थाप्यायां व्यवस्थापक-प्रमाणसत्तोपन्यास्या । सापि च प्रमेयसत्तान्यायेन स्वावगाहि-प्रमाणसत्तामपेक्षते । यदि हि प्रमाणसत्तान्तरमन्तरेणैव तत्प्रमा-

णसत्तां परोऽङ्गीकुर्यात्तुन्त तर्हि प्रथमतएव विनैव प्रमाणसत्तया घटसत्तामेव किमिति नाङ्गीकरोति 'अन्तेरण्डाविवाहश्चेदादावेव कुतो नही'ति न्यायात् । तत्रास्ति चेत्प्रमाणसत्तान्तरं, तर्हि तत्राऽप्येवं, ततस्तत्राप्येवमेवेत्यनवस्थाडाकिनी न मुञ्चति पृष्ठम् । अथ नास्ति तत्र यत्किञ्चित्प्रमाणसद्भाव,स्तर्हि प्राथमिकी प्रमाणसत्तैव नात्मानमासादयति, कुतस्तरां तु वराकी प्रमेयसत्ता । अन्यथा कस्कः शशविषाणादिर्न सिध्येत् । तदित्थं तत्र यस्य कस्यचिदपि प्रमाणस्याऽप्रवृत्तौ प्रथमप्रमाणसत्ताया असद्भाव: समायाति, यावत्प्रमाणसत्ताविनिवृत्तिर्हि स्वप्रमेयविनिवृत्तिप्रतिनियता खलु भवति । प्रमाणस्य चाभद्भावे तदुच्छिष्टपुष्टस्य तस्य तस्य खलु विषयसत्त्वस्य स दूरपराहतो नामात्मलाभ: । अथोच्येत, न तावद्व्यवहितपूर्वापरवित्तिद्वित्तिपारम्परीमभ्युपगच्छाम:, (येन व्यवहारानिष्पत्त्यापत्तिरियं स्यात्) किन्तु यदा कदाचित् कयाचिद्वित्तिव्यक्त्या कादाचित्की काचिद्वित्तिव्यक्तिः प्रमीयते इति । इत्थं च सर्वाऽपि वित्तिः प्रमाणसिद्धैव भवतीति चे'त्स्यात् खल्विदं तदा, यदि नाम 'अयं घट:' 'घटमहं जानामी'त्यतोऽधिका काचित्कदाचिद्वित्तिरस्मदादेरुत्पद्यमानानुभूयेत, या स्याद्घटवित्तितद्वित्तिवित्तिप्रवाहं गोचरयन्ती तादृग्विषयशतभारोद्वहनमन्थरा । अथ मन्येताऽस्मदादेरेतज्जन्मावच्छेदे नैवंविधा वित्तिरभवन्त्यपि योगिप्रभृतिविलक्षणजन्मावच्छेदेन स्यादिति संभवतीति, तर्हि यस्या वित्तेस्तावद्विषयगर्भिता धीर्विषय:, साऽप्यन्यया कयाचिद्वित्तिव्यक्त्या क्रोडीकरणीयेत्यमुष्मिन्नर्थे प्रमाणाभावो नाम, न नाम च तथा सति संभवति मोक्षः । तद्दर्शिनमुद्रया हि वित्तितद्वित्तिधाराप्रवाहप्रवृत्तौ कथंकारं यावद्विशेषगुणोच्छेदलक्षणो मोक्षः स्याल्लब्धपद: नापि च स्वात्मना सह तं तादृग्वित्तिप्रवाहं काचिद्वित्तिव्यक्तिरवगाहुमीष्टे, तथा भावे तत्रैव स्वप्रकाशता पदं निदधाति । निदधात्विति चेद्धन्त भोः, एतावद्धि भवतः प्रयासजातं शालमरण्यरुदितं नाम, प्रथमतएवास्माभिरुपदिष्टं तत्कुतो नाङ्गीकृतम् । एतेन 'अन्योन्यवित्तिगोचराऽन्योन्यवित्ति'रित्यपि निरस्तम् ।

चरमा हि वित्तिव्यक्तिः स्वावगाहिनीमुपान्त्यां वित्तिव्यक्ति
गोचरयन्ती स्वात्मानं विषयीकुर्यादेव । एवमेवोपान्त्या वित्ति
व्यक्तिरन्तिमां स्वावगाहिनीं विषयीकुर्वतीं स्वात्मानमपि
गोचरयेदेवेति सविषयकान्योन्यग्रहे स्वप्रकाशतापत्तिः । ननु
चरमा वित्तिव्यक्तिः पुरुषान्तरेण प्रमास्यते इत्यस्त्येव सा
प्रमितेति न तावत्तद्भावः सेद्धुमर्हतीति चेद्, आपि प्रमाणवि-
शेषस्य त्वया दातुमशक्यतया कुतस्तदस्तितासिद्धिः । तद्दाने वा
भूयो भूयः प्रमाणपरम्पराप्रधावनमित्यावेदितैवानवस्था । ननु
ज्ञानसिद्ध्यन्यथानुपपत्तिरेव पर्यवस्यन्ती ज्ञानपरम्परामाक्षिपेत्,
अन्यथा तु घटकादाचित्कत्वान्यथानुपपत्तिर्घटसामग्रीपरम्परा-
मपि नाक्षिपेत् इति चेतन्न, यदि हि घटसामग्रीविच्छेदः स्यात्,
तर्हि घटस्य कादाचित्कत्वं न स्यात् । ततश्च स्यादेव वा घटो,
न स्यादेव वेत्यनयोरन्यतरत् प्रसजेत् । अकारणकानां हि पदा-
र्थानामुभय्येव विधा, ऐकान्तिकं सत्त्वमसत्त्वं वा यथा आत्म-
नः कदाचिदपि नाऽसत्त्वम्, शशशृङ्गस्य तु कदाचिदपि न
सत्त्वम् । तच्चेदमुभयं घटस्य प्रत्यक्षबाधितमिति घटस्य कादा-
चित्कत्वान्यथानुपपत्त्या घटसामग्रीतत्सामग्रीतत्सामग्रीसाम-
ग्रीधारा निराबाधा समापततीत्येवं घटसामग्रीपरम्पराङ्गीका-
रेऽनवस्थामात्रम् । तच्च तत्कादाचित्कत्वान्यथानुपपत्तिरूप-
प्रमाणपरिकल्पितत्वान्न खलु दोष इतीयं घटकोटिः । ज्ञानकोटौ
तु ज्ञानसिद्धिस्स्वस्मादपि भवन्ती न प्रभवति ज्ञानपरम्परामा-
क्षेप्तुम् इत्यन्यथोपपत्तिरेव, तत्कुतोऽन्यथानुपपत्तिः । ज्ञानस्थले
तु यदि ज्ञानसिद्ध्यन्यथानुपपत्तिर्ज्ञानस्य ज्ञानान्तरवेद्यत्वाक्षे-
पिका भवे, तर्हि एवं ज्ञानपरम्पराङ्गीकारे सुदूरं ज्ञानधारां
धावयित्वा अन्तिमज्ञानस्वरूपस्यापि तद्विषयकुक्षौ निक्षेपश्चेदु-
ज्झ्येत, तर्हि शरणीकृतैव स्वप्रकाशतेत्येतावद्धावनस्याऽप्रेक्षाव-
च्चेष्टितत्वमेव तत्त्वं पर्यवस्यति । तत्कुक्ष्यऽनिक्षेपे वाऽनवस्था-
पिशाची न मुञ्चति पक्षम् । अथ तत्कुक्षावनिक्षिप्यैव स्वरूपं,
चेद्विश्रम्यते, तर्ह्यन्तिमस्य तस्याऽलब्धपदत्वे तदायत्तानां पूर्व-
पूर्वेषां ज्ञानानामसिद्ध्यापत्त्या सिकताकूपविशरणन्यायो दुस-

यदो भवतीत्येवं ज्ञानपरम्परा नाम दुरुत्तरव्यसनपरम्परैव हन्त कृता ज्ञानपरप्रकाशतावादिभिः । न चैतैर्दोषैर्नास्त्येव ज्ञानमिति साधु, स्वतएव सर्वसिद्धस्य तस्य दुरपह्नवत्वात् ।

तदेवं सति भेदो ऽयं बौद्धानां ब्रह्मवादिनाम् ।
यदाहुरेके ऽनिर्वाच्यं कृत्स्नं ब्रह्मेतरत् परे ॥

तदुक्तं बुद्धेन लङ्कावतारे (ग्रन्थविशेषे)

"बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते ।
अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः" ॥

(अथाऽनिर्वचनियता)

इति । विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसद्भ्यां विलक्षणमिति यथा ऽस्ति, दिशं दर्शयानस्तथा । तथाहि—

नेदं सद्भवितुमर्हति वक्ष्यमाणदूषणगणग्रस्तत्वात् । नाप्यस-देव, तथासति लौकिकविचारकाणां सर्वव्यवहारव्याहत्यापत्तेः ।

अथेयमनिर्वचनीयता वस्तुतोऽस्ति, नास्ति वेति चेत्, तदि-दमगृहीतवाद्यभिसन्धेः प्रतिवादिनः प्रत्यवस्थानम्; यो हि नाम वस्तुमात्रं सत्त्वाऽसत्त्वाभ्यामनिर्वचनीयमातिष्ठते, स ता-वत्प्रपञ्चाऽनिर्वचनीयतां तु पुनः सतीं ब्रूयादित्यहो दुराशापा-शो मुग्धमनसाम् । इयमपि खलु जगदन्तःपातिन्येवेति, 'सर्व-मनिर्वचनीय'मिति वदता जगन्मात्राभिधायिसर्वपदेनाऽनिर्वच-नीयतात्प्यऽभिहितैव । न चाऽनिर्वचनीयतास्थापनेन भवतो द्वैतमापतितमिति वाच्यम्, यतो नो खलु वयं तां व्यवस्थापया-यामो,ऽपि प्रतिवादिमतानुसारेणैवेदं व्यवतिष्ठते, तेन जगन्नि-र्वक्तुं नो पार्यत इति सत्य अनिर्वचनीयत्वं पर्यवस्यतीति । वि धिनिषेधयोरेकतरनिरासस्तदन्यपर्यवसायीति हि तैरभ्युपग-म्यते । नन्वनिर्वचनीयत्वं पर्यवस्यतीत्यभ्युपगच्छतोऽपि भवतो भवत्येव द्वैतापत्तिरिति चेत् । न, तथा वयमभ्युपगच्छामो,ऽपि तु युष्मन्मतानुसारेणैवेदमायातीति केवलं युष्मान्प्रबोधयामः, व-स्तुगत्या तु वयं सर्वप्रपञ्चसत्त्वासत्त्वव्यवस्थापनविनिवृत्ताः स्वतः सिद्धस्वरूपे विज्ञानात्मके ब्रह्मतत्त्वे केवले निर्भरजुषः कृतकृत्याः

सुखमास्महे । ये तु स्वैरिकल्पितां साधनबाधनव्यवस्थां पुरस्कृत्य विचारमवतारयन्ति तत्त्वं विनिश्चिकीषन्तः, तान् प्रति ब्रूमो वयम्, न खलु साध्वीयं भवतां विचारव्यवस्था भवत्कल्पितव्यवस्थयैव व्याहतत्वात् । अत एवास्मदुपन्यस्यमानदूषणास्थितिविषयाः पर्यनुयोगा निरवकाशाः ॥ युष्मद्व्यवस्थयैव युष्मद्व्यवस्थाया व्याहत्युपन्यासात् । न च विचारे एव व्याघातोपन्यासो भवता कर्त्तव्यस्तस्य च तयोः सत्त्वमङ्गीकृत्यैवेति तयोः सत्त्वमभ्युपगतमिति द्वैतापत्तिरिति वाच्यम्, तदीयसत्त्वासत्त्वोपगमोदासीनैरेवास्माभिर्विचार्यमित्येतावन्मात्रमुद्दिश्य विचारप्रवर्त्तनायाः सुकरत्वात् । यदि तु विचारस्य सत्त्वमनभ्युपेत्य नैवं विचारयितुं शक्यमित्युच्यते, हन्त तर्हि प्रमाणमव्यापार्य न तदीयसत्त्वाभ्युपगमोऽपि कर्त्तुं शक्यो, अन्यथा मप्रमरमादेरपि सत्त्वाभ्युपगमः प्रसजेत् । ततश्च प्रथमत एव विचारस्यापि विचार्यताङ्गीकारे विचारविषयकविचारसाधनान्तरमपि पुनरुक्तमुद्रया विचार्यत्वापत्तिरित्यनवस्थादौःस्थ्येन चिकीर्षितविचार एव न तावदात्मानमासादयेत् । न च पूर्वपूर्वसिद्धत्वाद्विचारस्य तत्र विचारान्तरं नावश्यकमिति वाच्यम्, यतः, यदि विचारः पूर्वसिद्धस्तर्हि विचारस्य विचार्याऽविनाभूतत्वाद्विचार्यमपि पूर्वसिद्धमिति विचारस्य पुनरनारम्भ एव सांप्रतम् । अथ विचार्यविशेषस्य पूर्वमसिद्धत्वादस्त्यावश्यकः साम्प्रतं विचारारम्भ इति चेत्तर्हि तद्विषयकविचारविशेषस्याऽपि पूर्वमसिद्धिरेवेति सिद्धं तस्य विचार्यत्वमित्यनवस्थादौःस्थ्येन विचारारम्भ एवाशक्यः स्यादिति विराम एव रमणीयो लौहचणकचर्वणस्य ।

तत्र "व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्" इत्याऽऽचक्षते तावल्लाक्षणिकाः । व्यावृत्तिर्नामेतरभेदानुमितिः व्यवहारस्तु शब्दप्रयोगो हानादानादिरूपो वा । तत्र लक्षणाधीना, 'पृथिवी तदितरेभ्यो भिद्यते गन्धवत्त्वादि', त्यादिव्यावृत्तेः प्रक्रिया, 'यद्गन्धवत्,—तत्पृथिवीत्वेन व्यवहर्त्तव्यं हातव्यमादातव्यञ्चे'ति व्यवहारस्य । न चैतत्संभवि । तथाहि, लक्षणेन गन्धवत्त्वादिना ज्ञातायामेव पृथिव्यां ज्योप्रिवलेन व्यावृत्तिरूप

व्यवहाररूपं वा साध्यं साधनीयं स्यात्। लक्षणज्ञानं च लक्ष्या-
न्तरसाधारण्येन भवदप्यकिञ्चित्करमित्यवश्यं लक्ष्यान्तरव्यावृत्त-
तयैव लक्षणस्य ज्ञानमङ्गीकार्यम्। तदेवं स्थिते, लक्षणस्य गन्ध-
वत्त्वादेर्व्यावृत्तिः पृथिव्यादिलक्ष्याधीनैव चेत्, तर्हि अन्योन्याश्रयः।
गन्धवत्त्वेन हि पृथिवी जलादिभ्यो व्यावर्त्तनीया। गन्धवत्त्वं
च जलादिसाधारणतया गृहीतं जलादिभ्यो व्यावर्त्तयितुं न खलु
प्रभवतीति जलादिव्यावृत्ततया गृहीतं गन्धवत्त्वं पृथिव्या जला-
दिभ्यो व्यावृत्तिः पृथिवीस्वरूपेण क्रियत इति पृथिवीरूपलक्ष्य-
व्यावृत्तिर्गन्धवत्त्वरूपलक्षणव्यावृत्त्यधीना, अथ गन्धवत्त्वरूपलक्ष-
णव्यावृत्तिः पृथिवीरूपलक्ष्यव्यावृत्त्यधीनेत्यनयोरेकतरस्य व्यावृ-
त्तिरन्यतरव्यावृत्तिमपेक्षते परस्परमित्यन्योन्यव्यावृत्तिमुखनि-
रीक्षकत्वादन्योन्यव्यावृत्तेर्भवत्यन्योन्याश्रयः। अथ लक्षणान्तर-
मस्य लक्षणस्य व्यावर्त्तकं, तच्च लक्षणं लक्ष्येण व्यावृत्तम् इति
चेत्, युक्तम्। अथ लक्षणे लक्षणान्तरं तत्रापि लक्षणान्तरमेव
व्यावर्त्तकमिति चेत्, देवमुपरिष्टादारोहणेऽपरावृत्तावनवस्था। एवं
जलादिसाधारण्येन ज्ञातायां पृथिव्यामितरभेदसाधनमकिञ्चि-
त्करमिति व्यावृत्तायां तस्यां तत्साधनं वाच्यम्। तद्व्यावृत्तिर्यदि
प्रकृतलक्षणाधीना, तदान्योन्याश्रयः। लक्षणान्तरेण चेत्, प्रकृत-
लक्षणानुपयोगः। तदपि लक्षणं व्यावृत्तायामेव पृथिव्यां, सापि
व्यावृत्तिर्लक्षणान्तरेणेत्येवमनवस्था।

एवमत्रेदं प्रमाणमित्युपन्यस्ते वादिना, प्रष्टव्यम् 'कि-
मिदं प्रमाणं नाम'? प्रमाकरणं प्रमाणमित्यत्र केयं प्रमा
नाम। तत्त्वानुभूतिः प्रमेति चेत्, तस्य भावस्तत्त्वम्। प्रकृतश्च
तच्छब्दार्थः। न चात्र प्रकृतं किञ्चित्, यत्तच्छब्देन परामर्श-
नीयं स्यात्। यथानुभूतिः स्वसम्बन्धिविषयमाक्षेपेण बुद्धिस्थी-
करोति, स एव तच्छब्देन परामृश्यते, तदादिसर्वनाम्नां प्रकृ-
तपरामर्शकत्वात्, वक्तृश्रोतृबुद्धिस्थतायां च प्रकरणपदार्थस्य विश्रा-
मात्। एवं यस्यार्थस्य यो भावः, स तस्य तत्त्वमुच्यते इति चेन्न,
भ्रान्तानादेरपि रजताद्यात्मनाऽनुभवविषयतासद्भावादसत्या-
नुभूत्यव्यवच्छेदात्। उक्तविधया तत्त्वशब्दस्य धर्मवाचकत्वा-

द्रव्यवाचकतया धर्मिप्रमाया विशिष्टवस्तुविषयकप्रमायाश्चाऽप्र-
मात्वापाताच्च । अथोच्यते चेत्, अवयवार्थपुरस्कारेण यदिदं
दूषणाभिधानं तदकिञ्चित्करं, यतोऽयं तत्त्वशब्दो वस्तुस्वरूप-
मात्रवाचकइति, तदप्यापातरमणीयम्, यतः स्वरूपत्वस्य जा-
तिरूपस्यो,पाधिरूपस्य वा यदि स्वस्मिन् वर्त्तमानत्वमङ्गीक्रि-
यते, तदात्माश्रयः । नो चे,त्तर्हि स्वरूपत्वप्रमायास्तत्त्वानुभू-
तित्वविरहाच्च स्यात्प्रमात्वम् । न च स्वरूपशब्दार्थः कश्चि-
दनुगतइति तत्र तत्र तस्य तस्य स्वरूपशब्देन धर्त्तव्यतया
लक्षणस्यास्याऽव्यापकत्वम् । किञ्च, अत्र तत्त्वपदेन विपर्यया-
देर्निरासो भवतामभिप्रेतः, स च कथं स्यात् । तथा हि,
शुक्तौ योऽयं रजतत्वप्रत्ययः, सोऽपि स्वरूपबुद्धिर्भवत्येव । न हि
शुक्तिर्वा रजतत्वं वा न स्वरूपम् । न च तयोः प्रतिभासमानो
यः सम्बन्ध,स्स न स्वरूपमिति वाच्यम् । यतः समवायो हि
तयोर्भासमानः सम्बन्धः, स च स्वरूपमेव । सत्यम् । समवाय-
स्वरूपम् । शुक्तिव्यक्तौ तु स रजतत्वस्य नास्तीति चेन्माभू-
त्तत्र, नहि तावता स्वरूपता व्यपैति । न हि गेहे चैत्रो ना-
स्तीत्येतावता स्वरूपं न स्यात्, स्वरूपमात्रं च लक्षणघटकमुक्त-
मस्ति भवताम् । अथ न स्वरूपमात्रं तत्त्वमुच्यते, किन्तु
यद्देशकालसम्बन्धि यस्य यत्स्वरूपं प्रतीतं, तस्य तद्देशकाल-
सम्बन्धि तत्स्वरूपं तत्त्वमित्युच्यतइति चेन्नैवम्, देशका-
लयोर्देशकालसम्बन्धोऽस्ति । तयोः केवलस्वरूपमेव तत्त्वशब्दा-
र्थइति चेत्, एवं सति तत्त्वशब्दस्यानेकार्थत्वेन तत्त्वेत्यादि,
प्रमालक्षणस्याऽव्यापकतापत्तिः । अथोच्यते चेत्, ज्ञानोल्लिखि-
तप्रकारवत्त्वं खलु विषयस्य तत्त्वम् । एवं च देशस्वरूप, कालरूप
देशकालसम्बद्धस्वरूपाणामनुगमोऽस्त्विति, तदपि फल्गु, भावि-
रक्तिम्नो घटस्य प्राग्यत्र रक्तपित्तादिदोषवशाद्रक्तिमपुरस्कारेण
ज्ञानं जातम् । तज्ज्ञानमप्येवं सति प्रमा स्यात् । ज्ञानकाले
ज्ञानोल्लिखितप्रकारवत्त्वमित्येवं यदातनत्वतदातनत्वविशेष-
णप्रक्षेपे कालावगाहिप्रमायाप्रमात्वापातः । न हि खलु
काले कालवैशिष्ट्यम् । अथ दिवसस्य प्रहर,श्चतुष्प्रहरो

दिवसो, यामवती यामिनीत्यादिसर्वजनीनप्रतीत्या कालेऽ-
प्यस्तु कालमत्वमस्त्विति चेत्, तर्हि दण्ड्यपि देवदत्तः कुण्डलित्व-
मध्यारोहतु । उपाधिभेदेऽप्युपधेयस्यैकत्वाऽनिवृत्तेर्नोक्ता-
पत्तिरिति चेद्धन्त निपुणोऽसि स्वयमेव दत्तोत्तरः न हि का-
लोपाध्यन्तरस्याऽपरकालोपाधिवृत्तावपि कालस्य कालवृत्तित्वं
सिद्धं भवति ।

किञ्चेदमनुभूतित्वं नाम? ज्ञानत्वावान्तरजातिविशेष एवा-
नुभूतित्वमिति चेत्, कस्मादनुभूतित्वं जातिरभ्युपगम्यते । अनुभ-
वत्यनुभवतीत्याकारानुगतप्रतीत्यन्यथानुपपत्तिमाहात्म्यात्, न, हि
विषयागममन्तरा प्रतीतेरनुगमः संभवी । कथमन्यथा नीलपी-
तादिघटव्यक्त्यवगाहिप्रतीतेरिव पटावगाहिप्रतीतेरपि 'घटो
घट' इत्याकारता नेति चेत्, न तथा च, माघमासीयनिशा-
वसाने सितासितसरित्संभेदस्नायिनः सत्यपि शब्दबलाद्भावि-
स्वकीयस्वर्गसुखसंप्रत्यये सुखमनुभवामीति प्रतीत्यनुदयात्,
प्रत्युत शीतसभेदमभूतवेदनासंवेदनादेव । यदि तु शब्दो-
पदर्शितव्याप्तिकाऽनुमितिरनुभवएव स्यात्तर्हि सुखमनुभवामीति
वा प्रत्ययः स्यात्तस्य । अथ मन्यसे, साक्षात्काररूपं खल्व-
नुभवशब्दार्थं मत्वाऽनुभवामीति तस्य प्रत्ययव्यवहारौ न भव-
तः, शब्दानुमानापेक्षौ तु तौ परीक्षकस्य भवेतामेव । सत्य-
प्यनुभवत्वे व्यवहारार्थं साक्षात्त्वमवश्यापेक्षणीयं चेत्किमनुभ-
वत्वेन, परीक्षकस्य तु साक्षात्त्वमन्तरेणाप्यनुमादौ तद्व्यवहा-
राभ्युपगमेऽननुगमएव । अथ स्मृतिव्यावृत्तेन रूपेण यः प्रत्य-
क्षादिष्वनुभवइत्यनुगतावगमः, स साक्षात्कारित्वादनुपपन्नः ।
ततश्च साक्षात्कार्यऽसाक्षात्कारिविशेषेषु साधारणमनुभूतित्व-
मन्यदेवैष्टव्यमिति चेत्, तदपि न, पदार्थान्तरव्यावृत्तेन रूपेण
यस्तदितरेष्वनुगतः प्रत्ययस्तत्र तदेवरूपं निमित्तं, न तु
जातिः काचित्तदनुरोधात्कल्पनीया, तथा सत्यऽक्षपदार्थेभ्यो
घटादिभ्यो व्यावृत्तेन रूपेण विभीतकादिभ्यो व्यावृत्तेन
रूपेण विभीतकादिषु साम्यावगमादक्षत्वजातिकल्पनापि
प्रसजेत् ॥

तदेवं प्रमितेरनिरुक्त्या प्रमाकरणं प्रमाणमित्यप्यनिरुक्तम् ।
अनया खलु प्रमाणत्वनिरुक्तिखण्डनदिशाऽपरेषामपि

पदार्थानां निरुक्तेः खण्डनं सम्प्रत्येतव्यम् ।

"समस्तलोकशास्त्रैकमत्यमाश्रित्य नृत्यतोः ।
का तदस्तु गतिस्तत्तद्वस्तुधीव्यवहारयोः ॥
उपपादयितुं तैस्तैर्मतैरशकनीययोः ।
अनिर्वक्तव्यतावादपादसेवागतिस्तयोः" ॥

इति सर्वं चतुरस्रम् ॥

"यदि च त्वद्दर्शनरीत्याभिधीयमानमस्माभिर्बोधं बाध, से, तदा स्वाभ्युपगतरीतिबाधविधायितैव ते स्यात् । अस्माभिर्निर्वाच्यमानस्य त्वया खण्डनयुक्त्यैव बाधेऽस्माकमेव जैत्रता, खण्डनयुक्तयो बाधिका, निर्वाच्यपक्षश्च बाध्यस्त्वस्मदुक्तपक्षस्य त्वयैव निर्वाहात् । तस्मात्त्वयानिर्वाच्यमप्यस्माभिस्तु खण्डनीयमितीदृश्यामेव परं कथायां त्वन्निर्वाच्यनिर्वाहे तव जयो, नान्यथेती"दं प्रतिवादिनं प्रति तत्कर्तव्यताप्रबोधनं खण्डनकृतः ।

अयं चास्य ग्रन्थकर्तुरुपदेशः—"एवं प्रकारासु खलु खण्डनयुक्तिषु कामपि स्थानान्तरस्थां केनाऽपि प्रकारेणानीय, तत्सदृशीमन्यां वा स्वयमूहित्वा परैर्विविच्यमानान्यपि पदार्थान्तराणि बुद्धिमता बाधनीयानि । अत्र चास्माभिर्दूषयितुं शङ्कितेभ्यः पञ्चप्रकारेभ्यो यदि प्रकारान्तरं कोऽपि स्वयमूहेतोक्तानां बाधकानां मध्ये क्वचित्स्वप्रज्ञया प्रमादध्या, तत्र च खण्डनवादिनः प्रस्तुता प्रतिक्रिया न स्फुरेत्, तदा परेण प्रयुज्यमाने वाक्ये बहुपदात्मके कस्यचित्पदस्यार्थं खण्डयितुं खण्डनान्तरमवतारणीयम् । एवं तत्राऽपि परेण प्रज्ञाशोषणे पुनस्तथैव शाखान्तरेषु संक्रमणीयमिति खण्डनमये चक्रे सम्यगवधेयम्" इति ।

"तत्तुल्योऽहं, त्वदीयं च येनाऽन्न विषयान्तरे,
शङ्कन्ता तस्य शोचे च, त्रिधा भ्रमति मन्मतिः" ॥

इति च स्वकीयकर्त्तव्यतोत्कीर्त्तनम् ।

इति ।

एवं तावदिदं संवित्स्वप्रकाशतावादाऽनिर्वचनीयतावाद-स्वरूपं दिङ्मुद्रया प्रादीदृशं संकलय्य ग्रन्थयुक्तीरितस्ततस्त्या त्तेषां कृते, ये खलु खण्डनपद्धतावपरिशीलितसंनिवेशाः सहसा संचारे भवन्त्यातङ्कभाजः । तदत्र क्षाम्यन्तु ये ते खण्डनरत्नाकरे मन्दरसोदराः करकलितसमस्तयुक्तिकलापा हृदयालवो दयालवो, दयलवोऽपि तु तैः कर्तव्योऽस्मिञ्जने । अरण्यानीकान्तार-तारणोपायो हि साधारणस्य कृते कृतो भवति, न तु हुताशनस्य पवनस्य वा ; पारावारपारप्राप्तौ हि तरीरितस्य जनस्योपयुज्यते, न तु पावमानैर्वैदेहीजानेर्वा ; शिखरिशिखरसमारोहे एकपद्याऽऽ-वश्यकी संजायते नवपान्थस्य, न तु पञ्चास्यस्य वैनतेयस्य वेति साञ्जलिबन्धमभ्यर्थयते—

१९४४ वैक्रमाब्दे माघशुक्लपञ्चम्यां } रा० भागवताचार्यः ।

श्रीमत्यश्रान्तं जयति प्रकामं राजाधिराज्ञी जयिनी जगत्याम् ।
यद्राज्यसाम्राज्यगतौ नितान्तं नास्तं गतौ स्तस्तपनप्रतापौ ॥
तत्संप्रतिष्ठापितकाशिकेन्द्रहिन्दूमहामन्दिरकल्पवृक्षः ।
आमोदमुन्मीलयतादनल्पमाचन्द्रमावारिधि चैवमेव ॥
दुर्दान्ततादुग्रवनेऽशुष्यन्मतकुञ्जे दुर्गतिमागतोऽत्र ।
अविघ्नमास्ते यदुपघ्ननिघ्नः प्रागार्यविद्याप्रततिप्रतानः ॥
विजृम्भितः पल्लवितः प्रकामं सुपुष्पितश्चाथ फलेग्रहिश्च ।
यत्संश्रयाद्याऽप्रतिमोपकारसंभारलाभोऽस्य जनस्य जातः ॥

——:o:——

अथ खण्डनखण्डखाद्योक्तमुख्यविषयाणां

सूचीपत्रम् ।

अकारादिवर्णानुक्रमेण

सूचीपत्रम् ।

॥ संस्कर्तुः स्वसङ्केतसूचनम् ॥

आद्यन्तयोः * अस्य चिह्नस्य (सीमापुष्पस्य) दर्शनेन शङ्काया आद्यन्तयोरवधिरूह्येयः, न चेत्यस्य वाक्यमित्याद्यभिमेणाऽन्वयसूचनार्थमपि चाद्यन्तयोस्तदेव चिह्नमुपन्यस्तम्, यत्र च नचेत्यस्यान्ते वाक्यमित्यादिपदं न दृश्यते तत्राप्यन्ते निरुक्तचिह्नदर्शनेनैव वाक्यमित्यादिपदमध्याहृत्यार्थ उपवर्णनीयः, शङ्कान्ते च प्रायः सर्वत्र? एतत् प्रश्नचिह्नमुपन्यस्तं, परत्र चौत्थानिकशङ्काद्यन्तयोरायासबाहुल्यं सम्भाव्य प्रायः शङ्काद्यन्तसूचकम् * एतच्चिह्न (सीमापुष्पम्) उपैक्षिषि, अन्ते शङ्काद्योतकम् ? एतत्प्रश्नचिह्नमपि चौपैक्षिषि । पौर्विकाग्रिमयोः शब्दयोः (क्वचिदर्थयोरपि) चाङ्गुलीनिर्देशपुरस्सरं प्रदर्शनार्थं सर्वत्र—एतत् (निर्देशचिह्नं) प्रयुक्तम् । अपि च मूलप्रतीकस्य सद्योलाभार्थं मूलव्याख्यानयोः a, , c, इत्यादिक्रम उपन्यस्तः, यत्र चार्थान्तरव्याचिख्यासया व्याख्यायां पुनः प्रतीकधारणं तत्र a, b, c-इत्यादिक्रम उपचितः, गर्तप्रदर्शिन्यां च मूलव्याख्यानयोः सद्यः, प्रतीकलाभार्थं a, c, इत्यादिचिह्नस्थाने (१) (२) (३) इत्याद्यङ्कक्रम उपन्यस्तः, यत्र चैक एव विषयोऽनेकत्र शुशूचयिषितस्तत्र (१) (२) (३) इत्याद्यङ्कस्थाने † ‡ इति त्रिशूलषट्शूलादिचिह्नमुपन्यस्तम्, यथा ११२ पृष्ठे, क्वचिच्च गर्तप्रदर्शिन्यां सनासिद्धोन्तकपद्येऽपि, यथा पृष्ठे । परोक्त्युपक्रमे "एतद्, अन्ते च" एतद् (अन्योक्तिचिह्नं) प्रतिष्ठापितम् । गर्तप्रदर्शिन्यां च प्रायः प्रतीकाद्यन्तयोरस्य विशेषोपयोगमनालक्ष्य त्यक्तमेतद्, क्वाप्यङ्गुल्या निर्दिष्टयोः पूर्वाग्रिमयोः शब्दयोरर्थयोर्वाऽऽद्यन्तसीमाबन्धनार्थमादौ 'एतद्, अन्ते च' एतत् (सीमाबन्धं) प्रायुक्षि । अपि च यत्र, एतद् (लघुविरामचिह्नं) भवेत्तत्र किञ्चिदेव स्थातव्यं, यत्र च ; ए- द् (अर्धविरामचिह्नं) तत्र ततो द्विगुणो विरामः कर्तव्यः; पूर्णो विरामश्च । एतत्पूर्णविरामचिह्नस्थले । परन्तु व्याख्याय

प्रतीकाद्यन्तयोः पूर्णविराममन्तरापि निरुक्तचिह्नमुपन्यस्तम्, त्यक्तं च तद्गर्तप्रदर्शिन्यां विशेषोपयोगमनालोक्य । यत्र तु प्रतीके किञ्चित्पुनर्वक्तव्यं नावशिष्यते तत्र शाङ्करव्यायां एतद् (विश्लेषचिह्नम्) उपन्यस्यम् । पूर्वापरशब्दयोरेकार्थताद्योतकं व्याख्यानव्याख्येयभावद्योतकं वा =एतद् (एकार्थताचिह्नम्) । यत्र च किञ्चिद् वाग्धाराप्रवाहे मध्यतो वक्तव्यं भवति तत्र मध्योक्तिसीमाद्योतनार्थमाद्यन्तयोरनुलोमार्द्धचन्द्राकारम् ( ) एतत् (मध्योक्तिचिन्हं) व्यवालिखियम् । अपिच, यत्र गर्तप्रदर्शनावसरेऽन्वयोपयोगीन्यधिकानि कानि कानिचिदक्षराणि प्रयुक्तानि तत्सीमाद्योतनार्थमप्याद्यन्तयोर्निरुक्तचिह्नमनुसन्धेयम् । क्वचिद्बहूनि नामान्यालक्ष्य विभागशो नाम्नां प्रदर्शनार्थमपि मध्येमध्ये नाम्नाम्–एतद् (योजकचिन्हं) प्रालिखिषं, यथा पञ्चमपृष्ठे गर्तप्रदर्शन्यां "प्रमाण–प्रमेय–संशय–प्रयोजन–दृष्टान्तेत्यादि । पङ्क्त्यन्तेऽपरिसमाप्तपदे चैतद्योजकचिह्नमुपन्यस्तम् । मूलव्याख्यानयोश्च मुख्यप्रकरणावान्तरप्रकरणयोः समाप्तिसूचनार्थं———एतत् (समाप्तिनिर्देशचिह्नम्), तस्यैव प्रतिसूचनार्थं च गर्तप्रदर्शिन्यां { } एतन्मध्योक्तिचिह्नद्वयान्तराले पद्यान्यप्युपनिबद्धायुक्तमिति ।

॥ सर्वाणि चिह्नानि ॥

!	सम्बोधनचिह्नम् ।	।	पूर्णविरामः ।
*	सीमापुष्पम् ।	॥	विश्लेषः ।
" "	अन्योक्तिचिह्नम् ।	–	योजकम् ।
( )	सीमाबन्धः ।	( )	मध्योक्तिचिह्नम् ।
—	निर्देशः ।	——	समाप्तिनिर्देशः ।
?	प्रश्नचिह्नम् ।	†	त्रिशूलम् ।
,	लघुविरामः ।	‡	षट्शूलम् ।
;	अर्धविरामः ।		

॥ ओं श्रीगणेशाय नमः ॥

॥ खण्डनखण्डखाद्यम् ॥

अथ प्रथमः परिच्छेदः ।

मू० अविकल्पविषय एकः, स्थाणुः-

हरिशङ्करयोः (१) सितासितं, भुजगारातिभुजङ्गलाञ्छनम् ।
वपुरस्तु मुदे विरुद्धयोरपि संसर्गे न भिन्नतां गतम् ॥ १ ॥
विरुद्धधर्मद्वयसन्निपातेऽप्यभेद एवेति विभावयन्तम् ।
पुनातु भेदप्रतिभासशून्यं स्त्रीपुंसरूपं शिवयोः(२) शरीरम् ॥ २ ॥
भवनाथ (३)सूक्तिगुम्फनमिह खण्डनखाद्यटीकायाम् ।
श्रीशङ्करेण विदुषा, विदुषामानन्दवर्द्धनं क्रियते ॥ ३ ॥

प्रारिप्सितप्रतिबन्धकदुरितनिवारणकारणेष्टदेवतानमस्काररूपं मङ्गलं कुर्वन्नेव प्रेक्षा(४) वत्प्रवृत्त्यङ्गप्रयोजनाभिधेयसम्बन्धप्रतिपादनपरः परमतनिराकरणचिकीर्षया स्वमतं ब्रह्माद्वैतमास्थायुको (५) वैतण्डिकोऽपि स्वप्रौढिप्रकटनाय (६) सूचयन्नाह-। "अविकल्प"-इति ॥ "एकः पुरुष" इति । 'अद्वितीयं ब्रह्म(७)' इत्यर्थः, श्रुतिषु तथा श्रुतत्वात्, यद्यथा श्रुतिषु श्रुतं, तत्तथा;

---

(१) विरुद्धयोरपि हरिशङ्करयोः संसर्गे वपुर्मुदेऽस्त्वित्यन्वयः । संसर्गेत्यस्यैव विवरणं-न भिन्नतां गतमिति, तदुक्तं "स ब्रह्मा स शिवः स हरिः" "शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः" इति । उक्तं विरोधमेव स्फुटयति सितेत्यादिना; सितः=श्वेतः शङ्करः, असितः=कृष्णवर्णो हरिः ; भुजगारातिर्गरुडस्तल्लाञ्छनः=तद्वाहनो हरिः, भुजङ्गलाञ्छनः=भुजङ्गभूषणस्तु शङ्कर इति विवेकः ।

(२) शिवा, शिवश्च शिवौ ; तयोः शिवयोः गौरीशङ्करयोरित्यर्थः ।

(३) भवनाथस्य मत्पितुर्याः सूक्तयः=सुव्याख्यानानि तासां गुम्फनमित्यर्थः ।

(४) हेयोपादेयगोचराबुद्धिः प्रेक्षा, तद्वन्तः प्रेक्षावन्तः ।

(५) अत्र "लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्" (अ० ३ पा० २ सू० १५४) इति पाणिनीयसूत्रेण "आक्रोस्तच्छीलतद्धर्मतत्साधुकारिषु" (अ० ३ पा० २ सू० १३४) इति तत्साधुकारित्वेऽर्थे उकञ्प्रत्ययस्तथा च "ब्रह्माद्वैतमास्थायुक" इत्यस्य ब्रह्माद्वैतव्यवस्थापनसाधुकारीत्यर्थः । कर्मोत्सर्गिकषष्ठीविरहस्तु "न लोकाव्ययनिष्ठाखलर्थ तृनाम्" (अ० २ । पा० ३ । सू० ६९) इति पाणिनीय सूत्रेण । ब्रह्माद्वैतमास्थापकः" इतिपुस्तकान्तरे पाठिकः पाठस्तु प्रामादिकः, प्रकृतानुपयुक्तार्थाभिधायित्वात्, प्राचीनपुस्तकविरुद्धत्वात्, द्वितीयाया असम्भवाच्च ।

(६) वैतण्डिकस्यापि मङ्गलाचरणं स्वमतस्य च व्यवस्थापनं स्वप्रौढिप्रकटनम् । स्वमतं सूचयन्नित्यन्वयः ।

(७) 'प्रसिद्धोद्देशेनाऽप्रसिद्धं विधीयते' इति न्यायेन ब्रह्माद्वितीयमित्यन्वयः

यथा ब्रह्मणः आनन्दमयत्वं, तथा चाऽद्वितीयं ब्रह्म' इति स्थापनसूचना। तमीश्वरं वन्दे यः अविकल्पविषयः, विकल्पः=संशयस्तदऽविषय इत्यर्थः। विरुद्धनानाप्रकारकं हि ज्ञानं संशयः स चाद्वैते न सम्भवति न वा सर्वसिद्धे संशयावकाश इति भावः। यद्वा विकल्पः=विशिष्टज्ञानं, तदविषय इत्यर्थः, अद्वैते प्रकाराभावात् सप्रकारकज्ञानानुत्पत्तेरिति भावः। यद्वा अविकल्पः=निर्विकल्पकं, तद्विषयः तन्मात्रविषय इत्यर्थः। अद्वैते प्रकाराभावेन सविकल्पत्वाऽभावादिति भावः। यद्वा विकल्पस्य=कल्प(१)नायाः अविषयः पारमार्थिकत्वात्। यद्वा अविकल्पः=निर्विकल्पकज्ञानं(२), तद् विषयो यस्येति बहुव्रीहिः, ब्रह्मणः स्वप्रकाशचिद्रूपत्वात्। एकः, अद्वितीय इत्यर्थः॥ "स्थाणुरि"ति। स्थिर इत्यर्थः, कूटस्थनित्यत्वात्। यद्वा स्थाणुरिव स्थाणुः सुखदुःखाद्युपाधिमर्मद्वरहित इत्यर्थः॥

मू० पुरुषः श्रुतोऽस्ति यः श्रुतिषु। ईश्वरमुमया न परं वन्दे नु मयापि तमधिगतम्॥ १॥

टी० पुरुषः=क्षेत्रज्ञः, तेन क्षेत्रज्ञाऽभेदो ध्वनितः॥ सर्वत्र प्रमाणमाह—"श्रुत"इति। 'श्रुतिषु'-इति(३)सर्वाः श्रुतीराह, तथा च कर्मकाण्डस्यापि ब्रह्मपरत्वमिति ध्वनितम्। 'अस्ति'—इति स्वसात्त्विकविद्यमानैकरूपतामाह॥ उमाया इव स्वस्यापि भगवदेकताननामाह—उमया परमधिगतमेव न, किन्नाम श्रवणादनु=पश्चान्मयापि=श्रीहर्षेणाप्यधिगतमेवेति। नु—शब्दः सम्बन्धने(४) वा। अधिगमस्त्वत्र मननमेव। उमाऽनुमे=विद्याविद्ये वा। ताभ्यां स्वर्गसंसारदशाविशेषेणाधिगतत्वा(५)द्विषयो-

(१) कल्पनायाः=मिथ्याज्ञानस्येत्यर्थः।

(२) ब्रह्मात्मकं ज्ञानं ब्रह्माकारं वा।

(३) 'बहुवचनम्' इति शेषः पूरणीयः।

(४) न केवलनुमयैवाधिगतं परं मयाप्यधिगतमित्युभयोरप्यधिगमस्य सम्बन्धने=समुच्चये नु शब्द इत्यर्थः। 'सम्बोधने,' इति स्वपपाठः, सम्बोध्यस्य देवदत्तादेरनुपलभ्यमानत्वात्।

(५) विद्यया=उपासनया स्वर्गदशाविशेषेणाधिगतत्वादविद्यया च संसारदशाविशेषेणाधिगतत्वादिति विभागः। यद्वा ब्रह्मात्मैकत्वप्रतिपत्तिरेव मुख्या विद्यापदार्थः, यतस्तत्र स्वर्गपदेन सुखरूप आत्मैव ग्राह्यः। अत्र यद्यपि स्वर्गसंसारदशावि

ज्ञतत्वात् । यद्वा उमया=गौर्या, मया=च लक्ष्म्या, अधिगतम्=आश्लिष्टं । तेन विष्णुगौरीश्वराभेद उक्तः "मा मातरि च माने च, मा च लक्ष्मीः प्रकीर्तिता" इति कोशात् । विरोधाभासश्चालङ्कारोऽयं, तथाहि—'एकः, स्थाणुः पुरुषश्च'इति विरुद्धं; स्थाणुः पुरुषः, संशयाविषयश्च'इति विरुद्धं; 'श्रुतिषु श्रुतश्च, विशिष्टज्ञानाऽविषयश्च'इति विरुद्धम्; इमयाऽधिगतस्याऽनुमाधिगतस्य च विरुद्धम्; यथाच न विरोधस्तथा व्याख्यातमेव । अत्र पुरुषसमभिव्याहृतस्यैकपदस्य कैवल्यार्थकतया पुरुषकैवल्यपरमप्रयोजनमुक्तं, सङ्ख्यार्थतया(१) पुरुषस्य ब्रह्मणा एकत्वमद्वैतमभिधेयमुक्तम्, अवान्तरप्रयोजनं चाऽनुमया=मननेनाधिगतत्वमुक्तं वेदितव्यम् ॥ १ ॥

मू० माना(२)ऽपनोदनविनोदनते गिरीशे
भासेव सङ्कुचितयोरुचितं तदिन्दोः ।
भेत्तुं भवाऽनिशचितं दुरितं भवानि
नम्रीभवानि घनमङ्घ्रिसरोजयोस्ते ॥ २ ॥

टी० शिवं नत्वा शक्तिं नमस्यति—। "मानापनोदन"—इति । हे भवानि!=भवस्य पत्नि', घनं=निरन्तरं यथा स्यादेवं, तवाङ्घ्रिसरोजयोश्चरणकमलयोर्नम्रीभवानि=अवनतः स्याम् । किंविशिष्टयोरङ्घ्रिसरोजयोः? गिरीशे=महेशे, मानापनोदनविनोदनते=मनस्विताानिराकरणक्रीडानम्रे, तदिन्दोः=तन्मौलिचन्द्रस्य, भासेव=ज्योत्स्नयेव, उचितं यथा स्यादेवं सङ्कुचितयोः=उपजातसङ्कोचयोः । भर्त्तरि प्रणिपातायोद्यते लज्जया चरणसङ्कोचस्तावदुचितः

शेषांशे चैव बहुषु पुस्तकेषु पाठ उपलभ्यते तथापि पाठसारूप्यानुरोधेन स्वर्गिसंसारिदशाविशेषेण इति, स्वर्गसंसारदशाविशेषेणेत्येव वा पाठ उचितः ।

(१) यद्यपि "आद्यतः सङ्ख्याः सङ्ख्येये" इत्यनुशासनेनैकशब्दस्य सङ्ख्येयार्थकतया सङ्ख्यार्थकताऽऽख्यानमप्राप्तं तथापि द्व्येकयोर्द्विवचनैकवचने" इत्यादाविव भावप्रधाननिर्देशाभ्येन सङ्ख्यार्थकतयेत्युक्तम । "सङ्ख्यार्थकतया" इति क्वाचित्कः पाठस्तु केवलं भ्रमविजृम्भितः, अन्यथा 'ब्रह्मणा एकत्वमुक्तम्' इत्यपिमग्रन्थस्य स्थाने "एकं ब्रह्मोक्तम्" इत्येव परिपठितं स्यात् ।

(२) भवानीमनादृत्य भवेन सपत्न्या गङ्गायाः कपर्दे धारणे भवान्या मानजनकं बोद्धव्यम् ॥

तव तदिन्दोर्भासेवेत्युत्प्रेक्षा । दवीय(१)स्यपि चन्द्रमसि सरोजसङ्कोचो नेदीय(२)सि सुतरामित्युत्प्रेक्षोद्दीपनम् । किं कर्तुं ? भवानिशचितं दुरितं भेत्तुं; संसा(३)रविश्रान्तसञ्चितकल्मषनिरासायेत्यर्थः । यद्वा हे भवानि! अहं त्वच्चरणयोर्नम्रोभवानि, त्वं पुनरनिशचितं दुरितं भेत्तुं भव=प्रभवेत्यर्थः । एतेन जगद्वन्दनीयस्यापि गिरीशस्य वन्दनीययोर्भवानीचरणकमलयोरत्यन्तवन्द्यत्वमुक्तम् । अथवा (४) "हे ब्रह्माद्वैतोपदेशक! त्वं ममानिशचितं दुरितं भेत्तुं भव=प्रभव, अहं तवाङ्घ्रिसरोजयोर्नम्रोभवानि" इति गिरीशे=वादिनि (५) मानापनोदनविनोदनते,=वादित्वाभिमानखण्डनक्रीडानम्रे सति, अहं भवानि, अर्थादनुगतवादिदुरितभेत्ता भवानि=भविष्यामि; तथा तत्त्वमुपदिशानि यथाऽनुगतवादिनो दुरितं भङ्ग्यती-(६)ति ग्रन्थकृतः स्वंप्रत्याशंसा । तदिन्दोर्भासा सङ्कुचितयोः, स चासाविन्दुश्चेति तदिन्दुर्वादी पराजयकलङ्कशालीत्यर्थः; तस्य भासा=जितत्वेन मन्दया प्रभयेत्यर्थः, भवति हि स्वव्यवसायेन भङ्गिनं वादिनं दृष्ट्वा साधोः सङ्कोचः "विप्रं निर्जित्य वादत" इत्यादिनिन्दाश्रवणात् ॥ २ ॥

मू० शब्दार्थनिर्वचनखण्डनया नयन्तः
सर्वत्र निर्वचनभावमखर्वगर्वान् ।

---

(१) दवीयसि=अतिदूरस्थे ।

(२) नेदीयसि=अतिसमीपस्थे ।

(३) संसारेऽविश्रान्त=निरन्तरं सञ्चितानि=उपार्जितानि यानि कल्मषाणि तन्निरासायेत्यर्थः ।

(४) वस्तुप्रदर्शनेन स्वप्रौढिविख्यापयिषया प्रदर्शितोऽयमर्थो जेतुर्जितवाद्यन्यतरोक्तरीत्याऽङ्घ्रिसरोजयोर्विशेषणत्वेन तदिन्दोर्भासा सङ्कुचितयोरित्येतदुपादाय स्वरसतो योजयितुमशक्यत्वेनाऽस्वारसिकोऽपि कथञ्चिदङ्घ्रिसरोजयोरिन्दुतत्पराजयान्तरं प्रकल्प्य जेतुःकर्त्तृत्वेनैत्यमुपपादनीय–तदिन्दोर्भासेत्यनन्तरं सङ्कुचितयोर्मदङ्घ्रिसरोजयोः "तेऽङ्घ्रिसरोजयोर्नम्रोभवानि" इति गिरीशे मानापनोदनविनोदनते सति तदीयं दुरितं भेत्तुमहं भवानीति ।

(५) गिरि- ईशः गिरीश, इति व्युत्पत्त्या गिरीशो वादी ।

(६) "भञ्जो आमर्दने" इति स्मरणात मर्दितं विनाशितं भविष्यतीत्यर्थः ।

धीराः यथोक्तमपि कीरवदेतदुक्त्वा
लोकेषु दिग्विजयकौतुकमातनुध्वम् ॥ ३ ॥

अथ कथायां वादिनो नियममेतादृशं मन्यन्ते—'प्रमाणादयः(१) सर्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति कथकाभ्यामभ्युपेयम्' तद्(२)अपरे न क्षमन्ते, तथाहि—प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन, तत्कस्य हेतोः ?

टी० वीतरागाणामेतद्ग्रन्थप्रवृत्त्योपयिकं मननलक्षणं प्रयोजनं दर्शयित्वा रागिणामपि विजिगीषूणां विजयलक्षणं प्रयोजनमाह—। 'शब्दार्थे"—इति । हे धीराः ! कीरवदेतद्=अस्मदुक्तं खण्डनमुक्त्वा, लोकेषु=भुवनेषु, दिग्विजयकौतुकमातनुध्वं=विस्तारयत ; किं कुर्वाणाः ? सर्वत्र विवादपदेषु शब्दार्थयोः=शब्दतदर्थयोर्निर्वचनं=निरुक्तिस्तत्खण्डनया=तदनुपपत्तिव्यवस्थापनेन, निर्वचनभावं=मूकत्वम्, अखर्वगर्वान्=प्रौढाहङ्कारान्, नयन्तः=प्रापयन्तः सन्त इत्यर्थः । मदुक्तस्य खण्डनस्य सर्वत्रादिविजयः फलमिति ध्वनितम् ॥ नन्वद्वैतव्यवस्थापनं विजयो वा यत्फलद्वयमुक्तं तत् कथासाध्यं, कथायां च न वैतण्डिकस्य प्रवेशः, तस्याः (३)प्रमाणादिसत्त्वाभ्युपगमाधीनत्वात्, तस्य (४) च प्रमाणाद्यनभ्युपगन्तृत्वात्, प्रमाणाद्यभ्युपगमे च नाद्वैतव्यवस्थापनं, न वाऽद्वैतलक्षणस्वपक्षरक्षणाधीनो विजयः ? इति प्रमाणाद्यभ्युपगमाधीनत्वं कथायाः खण्डयितुमुपक्रमते—। "अथे"ति । अथेति मङ्गलम्, "ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा, कण्ठं भित्वा विनिर्यातौ तेन माङ्गलिकावुभौ" इति स्मरणात् । कथायां कर्त्तव्यायां तत्पूर्वं 'प्रमाणादीनि सन्ति'—इति द्वाभ्यामपि वादि-

(१) आदिपदेन "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति न्यायदर्शनोक्तप्रमेयावयो ग्राह्याः ।

(२) 'तद् अपरे न क्षमन्ते'इति मूलग्रन्थस्य 'अपरे, क्षमन्ते 'इति पदयोरर्थकथनपूर्वकं प्रतीकमुपादायेदानीं तच्छब्दार्थं वर्णयति=तदिति ।

(३) तस्याः=कथायाः । (४) तस्य=वैतण्डिकस्य ।

भ्यामवश्यमभ्युपगन्तव्यमिति भेदवादिनो मन्यन्ते, तद् अपरे=ऽभेदवादिनो न सहन्ते इति, तत् इत्यवश्याभ्युपगन्तृत्वमर्थलभ्यं परामृशति। कथकेनेत्येकवचनं खाण्डनिकाभिप्रायेण, तदितरस्य प्रमाणाद्यभ्युपगन्तृत्वसिद्धेः (1)।

मू० किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसाहित्यनियतस्य वाग्व्यवहारस्य प्रवर्तयितुमशक्यत्वात्? १, उत कथकाभ्यां प्रवर्तनीयवाग्व्यवहारं प्रति हेतुत्वात्? २, उत लोकसिद्धत्वात्? ३, अथ वा तदनभ्युपगमस्य तत्त्वनिर्णयविजयफलातिप्रसञ्जकत्वात्? ४। न तावदाद्यः, तदनभ्युपगच्छतोपि चार्वाकमाध्यमिकादेर्वाग्विस्तराणां प्रतीयमानत्वात्; तस्यैव (2) वा ऽनिष्पत्तौ भवतस्तन्निरासप्रयासानुपपत्तेः। सोयमपूर्वः प्रमाणादिसत्तानभ्युपगमात्मा वाक्स्तम्भनमन्त्रो भवताऽभ्यूहितो—

टी० यो यः कथकः स प्रमाणाद्यभ्युपगन्ता? या या कथा सा प्रमाणाद्यभ्युपगन्तृकर्तृका? यत्र वा कथकत्वं तत्र प्रमाणाद्यभ्युपगम? इति प्रथमविकल्पार्थः। प्रमाणादीनामभ्युपगमः कथाकारणम्? इति द्वितीयविकल्पार्थः। "प्रमाणादीनामेव कथाकारणत्वं विकल्पितं न तु तदभ्युपगमस्यापि" इति केषाञ्चिदाक्षेपोऽसङ्गतः द्वितीयविकल्पदूषणावसरे प्रमाणाद्यभ्युपगमस्यैव कथाकारणत्वखण्डनात्। लोकाः प्रमाणाद्यभ्युपगच्छन्तीति कथकाभ्यामभ्युपगन्तव्यम्? इति तृतीयविकल्पार्थः। अनतिप्रसक्ततत्त्वनिर्णयविजयफलाकाङ्क्षया कथकाभ्यां प्रमाणादिसत्त्वमवश्या(3)भ्युपगन्तव्यमिति चतुर्थविकल्पार्थः॥ "चार्वाक"—इति। यद्यपि

(१) प्रमाणाद्यभ्युपगन्तृत्वसिद्धेः=प्रमाणाद्यभ्युपगन्तृत्वस्य प्रथमत एव सिद्धत्वात्।

(२) चार्वाकादिवाग्व्यवहारस्यैवेत्यर्थः।

(३) यदि प्रमाणादिसत्त्वानभ्युपगन्तॄणामपि तत्त्वनिर्णयविजयौ स्तस्तदा पामराणामपि तौ स्यातामित्यतिप्रसञ्जनभीत्या ऽनतिप्रसक्ततत्त्वनिर्णयविजयफलाकाङ्क्षया प्रमाणादिसत्त्वमवश्यमभ्युपगन्तव्यमित्यर्थः।

चार्वाकस्य प्रत्यक्षाभ्युपगमोऽस्ति तथाप्यनुमानैकगम्यतत्प्रामाण्यस्यानुमानानभ्युपगमेऽनभ्युपगम इत्यभिप्रेत्य तद्वाग्व्यवहारे व्यभिचारो दर्शितः । अथवा यत्किञ्चित्प्रमाणाभ्युपगमः सकलप्रमाणाभ्युपगमो वा कथाव्यापकः ? आद्ये माध्यमिककथायां व्यभिचारोऽन्त्ये चार्वाककथायाम् । यद्वा प्रमाणादीत्यादिपदेन तर्कादेः परिग्रहः, तथाच—चार्वाकस्य प्रमाणाऽभ्युपगमेऽपि तर्काभ्युपगमो नास्तीति व्यभिचारः । चार्वाकैकदेशी वा चार्वाकः ॥ ननु चार्वाकादेर्वाग्व्यवहार एव नास्ति कुत्र व्यभिचारः ? इत्यत आह—"तस्यैवे"ति । त्वद्दर्शने तदुक्तयुक्तिनिराकरणान्यथानुपपत्तिरेव तद्वाग्व्यवहारे प्रमाणमित्यर्थः ॥ सोपहासमाह—। "सोऽयमि"ति ।

मू॰ नूनं, यस्य प्रभावाद्भगवता सुरगुरुणा लोकायतकानि सूत्राणि न प्रणीतानि; तथागतेन वा मध्यमागमा नोपदिष्टाः; भगवत्पादेन वा बादरायणीयेषु सूत्रेषु भाष्यं नाभाषि । *प्रमाणाद्यनभ्युपगम्यापि प्रवर्तयन्तु नाम ते वाचोभङ्गीः, (१) तास्तु साधनबाधनक्षमा न भवन्ति तावता (२) इति ब्रूमः* ? इति चेन्न, प्रमाणाद्यनभ्युपगम्य प्रवर्तितत्वं तदीयसाधनबाधनाक्षमतायां न नियामकं, किन्तु सद्वचनाभासलक्षणयोगित्वमित्यवश्याभ्युपेयं भवता,

टी॰ तथागतेन=बुद्धेन, मध्यमलक्षणा आगमा=मध्यमागमा यदध्ययनान्माध्यमिक इत्युच्यते, भगवत्पादेन=शङ्कराचार्यपादेन, (३) बादरायणो=व्यासः, अत्र सर्वत्र त्वदुक्तव्याप्तेर्व्यभिचार इति भावः ॥ ननु चार्वा-

---

(१) वाचोभङ्गीः = वाक्प्रकारानित्यर्थः । ताः = वाचोभङ्ग्यः ।

(२) वाग्व्यवहारत्वमात्रेणेत्यर्थः ।

(३) अद्वितीयब्रह्मवादित्वाच्छङ्कराचार्यस्यापि न तात्त्विकप्रमाणाद्यभ्युपगन्तृत्वम् । यच्च प्रत्यक्षादि प्रमाणानां तद्ग्रन्थे स्थाने स्थाने प्रतिपादनं, तद्व्यावहारिकप्रामाण्याभिप्रायेणैव ।

कादिव्यवहारो रथ्यापुरुषवाग्व्यवहारवदनुपादेय एव, प्रमाणाद्यभ्युपगमस्तु साधनबाधनक्षमवाग्व्यवहारव्यापकत्वेन मयोपन्यस्तस्तत्र च न व्यभिचारः? इत्याह–। "प्रमाणादी"ति । साधनबाधनयोः फलत ऐक्येपि(१)लोकप्रसिद्धिमनुरुध्य भेदेनोपन्यासः । एवमपि माध्यमिकादिवाग्व्यवहारे एव व्यभिचारस्तस्यापि साधनबाधनक्षमत्वात् । * न च "माध्यमिकादिवाग्व्यवहारः साधनबाधनाक्षमः, प्रमाणाद्यनभ्युपगम्य कृतत्वात्, रथ्यापुरुषवाग्व्यवहारवदि"त्यनुमानान्माध्यमिकादिवाग्व्यवहारस्य साधनबाधनाक्षमत्वसिद्धिः * । तस्य सद्वचनाभासलक्षणयोगित्वोपाधिकवलितत्वादित्याह–। "प्रमाणादी"ति । सद्वचनाभासः=स्फुटावभासो व्यभिचारादिस्तल्लक्षणं साध्यात्यन्ताभावसामानाधिकरण्यादि, तद्योगित्वमित्यर्थः, तथाच–वाग्व्यवहारसाधनबाधनाक्षमत्वे साधनाभासत्वं दूषणाभासत्वं तन्त्रं, न तु प्रमाणाद्यनभ्युपगन्तृप्रणीतत्वमिति भावः । सद्वचनाभासं निग्रहस्थानं, तल्लक्षणं कथाङ्ग(२)तत्त्वज्ञानाभावलिङ्गं, तद्योगित्वमित्यन्ये ॥

मू॰ येना(३)भ्युपगम्यापि प्रमाणादीनि प्रवर्तिता मतान्तरानुसारिभिर्व्यवहारा अभ्युपगतप्रमाणादिसत्त्वैर्मतान्तरव्यवहारिभिरपरैरतथाभूता(४)इति कथ्यन्ते । यदि त्वमद्वचसि सद्वचनाभासलक्षणं न भवान् दर्शयितुमीष्टे, तदा 'ऽनभ्युपगम्य प्रमाणादीनि भवता प्रवर्तितोऽयं व्यवहार' इति शतकृत्वस्त्वयोच्यमानेऽपि नास्माकमादरः । अन्यथा(५)भ्युपगम्य प्रमाणा-

(१) यदेव विजयादिलक्षणं फलं स्योद्भावितहेतौ सद्धेतुत्वव्यवस्थापनेन भवति तदेव तत्र परोद्भावितदोषस्य बाधनेनापि भवत्यतः साधनबाधनयोः फलत ऐक्यम् ।

(२) कथाङ्गं समयबन्धादिस्तेषां तत्त्वज्ञानाभावं प्रति लिङ्गमित्यर्थः, तद्यथा–चैत्रः कथाकारणसमयबन्धादिज्ञानाभाववान् प्रतिज्ञाहान्यादिमत्त्वादिति, तद्योगित्वं, तादात्म्येन ।

(३) ननु प्रमाणाद्यनभ्युपगम्यप्रवर्तितत्वसद्वचनाभासलक्षणयोगित्वयोरविशेषात् कथमाद्यस्याप्रयोजकत्वमित्यत आह–येनेति, इति विद्यासागरः ।

(४) साधनबाधनाक्षमा इत्यर्थः । क्वचित्तु "तथाभूता" इति पाठस्तत्राप्ययमेवार्थः ।

(५) अन्यथा = सद्वचनाभासलक्षणयोगित्वमप्रदर्श्य प्रमाणाद्यनभ्युपगम्यप्रवर्तितवाग्व्यवहारस्याऽऽभासत्वकथने इत्यर्थः ।

दीनि भवता प्रवर्तितोऽयं व्यवहार इत्येतावता भवदीयो व्यवहाराभास इत्यस्माभिरपि वक्तुं । शक्यत एव । * ननु यदि प्रमाणादीनि न सन्ति तदा व्यवहार एव धर्म्मी(१)कथं सिध्येत्, दूषणादिव्यवस्था वा कथं स्यात्, सर्वविधिनिषेधानां प्रमाणाधीनत्वात् * ?। मैवम्,

टी० ॥ प्रमाणाद्यनभ्युपगमस्य साधनाद्यक्षमत्वे ऽप्रयोजकत्वमेव दर्शयितुमनभ्युपगम(२)पूर्वकत्वसाधनासत्त्वेऽपि साधनाद्यक्षमत्वसाध्यसत्त्वमाह–। "येने"ति । अन्यथा व्यापकव्यभिचारोपदर्शनमसङ्गतं(३)स्यात् ; नयायिकमीमांसकयोः कथायां प्रमाणाद्यभ्युपगम्य प्रवर्तितायामपि साधनबाधनाक्षमत्वं तदेकतरेण व्यवस्थाप्यते तत्राभासत्वमेव तन्त्रं नतु प्रमाणाद्यनभ्यपगम्य प्रवर्तितत्वमिति न तुल्ययोगक्षेमत्वमपीत्यर्थः ॥ वैतण्डिकवाग्व्यवहार(४)पक्ष एव प्रमाणाद्यनभ्यपगम्य प्रवर्तितत्वं साधनमस्ति, सद्दूषणाभासलक्षणयोगित्वमुपाधिर्नास्तीत्युपाधेः साधनाव्यापकत्वमाह–। "यदित्वि"ति ॥ यथा प्रमाणाद्यभ्युपगमपूर्वकत्वमतन्त्रं साधनबाधनक्षमत्वे(५) तथा प्रमाणाद्यनभ्युपगमपूर्वकत्वमप्यतन्त्रमेवे(६)त्यप्रयोजकत्वमेवानिष्टोपदर्शनमुखेन द्रढयति–। "अन्यथे"ति ॥ ननु प्रमाणादीनि न सन्तीत्यभिमानिनस्तव प्रमाणानभ्युपगम एव चेत्तदा प्रमाणमन्तरेण न कथासिद्धिर्न वा साधनदूषणनिष्ठा स्यादित्याह–। "ननु यदी"ति ॥

---

(१) धर्मी=पक्षः ।

(२) प्रमाणाद्यनभ्युपगम्यकृतत्वलक्षणस्य पूर्वोक्तसाधनस्यासत्त्वेपीत्यर्थः ।

(३) साधने साध्याभाववद्वृत्तित्वलक्षणव्याप्यव्यभिचारे दर्शयितव्ये साध्ये साधनाभाववद्वृत्तित्वलक्षणव्यापकव्यभिचारोपदर्शनमसङ्गतं स्यादित्यर्थः ।

(४) यद्यपि माध्यमिकादिवाग्व्यवहार एव पक्षतया प्रागुपन्यस्तो न तु वैतण्डिकवाग्व्यवहारोऽपि तथापि आदिपदेन तस्यापि तत्र ग्रहीतुं शक्यत्वाच पौर्वापर्यविरोधः शङ्कनीयः । एतामेव व्याख्याकारस्य शैलीं परिज्ञायाऽपि यत्र तत्र प्रतीयमानो विरोधः परिहरणीयः ।

(५) "साधनबाधनाक्षमत्वे",इति क्वाचित्कः पाठस्तु प्रामादिकः "येनाभ्युपगम्यापि"इत्यादिमूलोक्तार्थेन,"प्रमाणाद्यनभ्युपगमस्य"इत्यादिनटीकोत्थानिकार्थेन च विरोधात् ।

(६) साधनबाधनाक्षमत्वलक्षणसाध्ये इति शेषः ।

मू० न ब्रूमो वयं न सन्ति प्रमाणादीनीति स्वीकृत्य कथारभ्यतेति, किंनाम(१) सन्ति न सन्ति वा प्रमाणादीनीत्यस्यां चिन्तायामुदासीनैः (यथा स्वीकृत्य तानि भवता व्यवह्रियते तथा व्यवहारिभिः(२) एव कथा प्रवर्त्यतामिति । अन्यथा न सन्ति प्रमाणादीनीति मतमस्माकमारोप्य यदिदं भवता दूषणमुक्तं तदपि न वक्तुं शक्यम्, कीदृशीं मर्यादामालम्ब्य प्रवृत्तायां कथायामिदं दुषणमुक्तं ? किं प्रमाणादीनां सत्त्वमभ्युपगम्योभाभ्यां वादिभ्यां प्रवर्तितायां कथायाम् ? १, उतासत्त्वमभ्युपेत्य ? २, अथैकेन सत्त्वमपरेणचासत्त्वमङ्गीकृत्य ? ३, । नाद्यः, अभ्युपगतप्रमाणादिसत्त्वंप्रत्येतादृशपर्यनुयोगानवकाशात् । द्वितीये च स्वतो(३) व्यापत्तेः । न तृतीयः, तथैव कथान्तरस्यापि प्रसक्तेः, उभयाभ्युपगमानुरोधित्वाच्च कथानियमस्य ।

टी० ॥ कथापूर्वकाले प्रमाणाभ्युपगमस्याऽप्रयोजकत्वमाचक्ष्महे नतु प्रमाणादीनि न सन्तीति तदानीमेव वदामो येनेदं (४) देश्यं स्यादित्याह— । "न ब्रूम"इति ॥ "अन्यथे"ति यदि प्रमाणाद्यभ्युपगममन्तरेण कथाप्रवृत्तिर्न स्यात्तदेत्यर्थः ॥ "आरोप्ये"ति । प्रमाणाद्यभ्युपगमः कथाप्रवृत्त्यावतन्त्रमित्यस्माकं मतं, प्रमाणादिकं विनापि कथाप्रवृत्तिरिति तत्र तदारोप इत्यर्थः ॥ "दूषणमि"ति ॥ प्रमाणाद्यसत्त्वेपि तदधीनदूषणादिव्यवहारसत्त्वमित्यभ्युपगमे व्याघातलक्षणं दूषणमित्यर्थः ॥ दूषणाभिधान-

---

(१) किंनाम=किन्तु ।

(२) व्यवहारिभिः=उभयसिद्धव्यवहारनियमेन व्यवहरद्भिरित्यर्थः । विद्यासागरास्तु अत्र यथाशब्दानुरोधेनैकं तथाशब्दान्तरं प्रकल्प्य "तथा, तथाव्यवहारिभिः=उपेक्षितसदसत्त्वप्रमाणमात्रमूलव्यवहारिभिरित्यर्थमाहु ।

(३) 'सार्वविभक्तिकस्तसिल्' इति स्वतः=स्वस्य तव दोषापत्तेरित्यर्थः ।

(४) इदं=दूषणं, देश्यं=प्रतिपादनीयं, स्यादित्यर्थः ।

स्याशङ्क्यत्वं व्युत्पादयति— । "कीदृशीमि"ति । कथायामेव दूषणाभिधानद्वैाष्यादयं विकल्पावसरः ॥ "एतादृशे"ति । यदि प्रमाणादीनि न सन्ति तदा व्यवहार एव धर्मी न सिद्ध्येदित्येतादृशपर्य्यनुयोगानवकाशादित्यर्थः ॥ "स्वतोपी"ति । त्वमपि प्रमाणादिसत्त्वमनङ्गीकृत्य प्रवृत्त इति तन्मूलको व्याघातस्तवापि तुल्य इत्यर्थः ॥ "तथैवे"ति । प्रकृतनिग्रहाधिकरणकथाप्रवृत्तिवत् कथान्तरप्रवृतिरपि न दुर्लभेत्यर्थः ॥ नन्वेतावता कथाप्रवृत्तिः समाहिता, व्याघातस्तु न समाहितः ? इत्यत आह—। 'उभये"ति । प्रमाणादिकमन्तरेण व्यवहारासिद्धिलक्षणो यो व्याघातस्त्वया दत्तः स मया नेष्यते इत्यर्थः ॥

मू० अन्यथा स्वाभिप्रायमालम्ब्य तेनापि त्वद्वचसि यत्किञ्चिद्वागात्मनि दूषणे ऽभिहिते कस्य जयो व्यवतिष्ठतां ? प्रमाणाद्यभ्युपगन्तुरेव यावन्नियमभरयन्त्रणा महती स्यात् । तस्मात्प्रमाणादिसत्त्वासत्त्वाभ्युपगमौदासीन्येन व्यवहारनियमेन समयं बद्ध्वा प्रवर्तितायां कथायां भवतेदं दूषणमुक्तमित्युचितमेव तथा सति स्यात् । योयं भवान्स्वाभिप्रायमपि नावधारयितुं शक्नोति दूरतस्तस्मिन्पराभिसन्धानावधारणप्रत्याशा ।

टी० ॥ ननु त्वदनिष्टोप्ययं दोष एव, नहीष्टत्वमपि दोषत्वे तन्त्रमित्यत आह—। "अन्यथे"ति । वागात्मनि=वाङ्मात्ररूपे (१)त्वयापादितोपि व्याघातो वाङ्मात्रमेवेति भावः ॥ किञ्च यद्युभयाननुमतोपि दोषस्तदा प्रमाणाद्यभ्युपगन्तुस्तव प्रामाणिकदोषानुसरणव्यग्रता स्यादुद्भावितदोषस्य प्रामाणिकत्वव्यवस्थापनप्रयासश्च भवेदस्माकं तु नेयं व्यापृतिरित्याह— । "प्रमाणाद्यभ्युपगन्तुरेवे"ति ॥ कथातः पूर्वं प्रमाणाद्यभ्युपगमनियमोभयवाद्यननुमतदोषोद्भावनयोरकर्त्तव्यता(२) मुपसंहरति— । "तस्मादि"ति ।

(१) हुंफट्शब्दादौ सङ्केतितदूषणाभावे इत्यर्थः ।

(२) मकर्त्तुगततामित्यपि क्वचित्पाठः ।

उचितमेव तथा सति स्यादित्यत्र 'यद्युभयाभ्युपगतं स्यादि'ति शेषः ॥ उपसंहृत्य परस्याहृदयज्ञत्वमुपपादयति–। "योयमि"ति। प्रमाणाद्यनभ्युपगम्य प्रवर्तितायां कथायां व्याघातोऽयं दत्तः, प्रमाणाद्यनभ्युपगम्य कथायामप्रवृत्तिरिति वाभिधत्से, इति स्वा(¹)भिप्रायामवधारणम्, कथातः पूर्वं प्रमाणाद्यभ्युपगमो न तन्त्रमिति मयोक्तं, प्रमाणादीनि न सन्तीतिमदुक्तत्वेन त्वया गृहीतमिति पराभिसन्धानानवधारणम्, इयमस्माकं पैतृकी व्याख्या ॥ व्याख्यान्तरं (²) तु–ननु मदीयस्तत्रापि प्रमाणाद्यभ्युपगमे स्त्येवेति प्रमाणाद्यभ्युपगमपूर्वकत्वं कथायां न व्यभिचरतीत्यत आह–। "उभये"ति। तथा च नान्यतराभ्युपगमोऽपि तन्त्रं, न चान्यतरसिद्धदोषाभिधानमुचितमित्यर्थः ॥ कथातः पूर्वमवश्यं समयबन्धः स्यात्, अन्यथा तवेदमनिष्टं स्यादित्याह–। "अन्यथे"ति उभयानभ्युपगतदूषणाभावस्यापि यदि दूषणत्वं तदा जयपराजयादिव्यवस्था न स्यादित्यर्थः ॥ प्रमाणादिसत्तानभ्युपगन्ता हि प्रमाणाभासेनाप्यभिदध्यात्तदभ्युपगन्ता हि प्रमाणत्वेन निश्चितेनैवेति तस्य महती यन्त्रणेत्याह–। "प्रमाणे"ति। एव–यावदिति निपातद्वयमवधारणे, उचितमेवेति सोपहासम्। तदिदं व्याख्यानमसत्सन्दर्भमिव (³) ॥

मू० *अथ वादीकृत्य दुर्वैतण्डिकं तस्मिन्नुपाधौ(⁴)बाधोऽभिधते इत्येव नेष्यते, शिष्यादयस्तु तस्य(⁵)कथान-

(१) विद्यासागरोक्तनस्तु कीदृशीं मर्यादामालम्ब्य प्रवृत्तायां कथायां भवता दूषणमुक्तमिति पृष्टे 'ईदृश्यां कथायां दोषमहमवादिषम्' इति स्वाभिप्रायाऽनवधारणमाहुः।

(२) 'उभयाभ्युपगमानुरोधित्वाच्च कथानियमस्य' इत्यत आरभ्य निरुक्तग्रन्थस्य व्याख्यान्तरमाह–व्येति।

(३) उपाधौ = वादिवाग्व्यवहारमूले इत्यर्थ इति विद्यासागराः केषुचित्पुस्तकेषु तु नास्त्येवोपाधाविति पाठः।

(४) तस्य = वैतण्डिकस्य कथानधिकारंप्रत्यस्माभिः स्वशिष्यादय एव ज्ञाप्यन्ते इत्यन्वयपूर्वकार्थः।

(५) असत्सन्दर्भसदृशत्वं चास्य व्याख्यानस्य कथाप्रवृत्तेः समाहितत्वेऽपि व्याघातस्याऽसमाहितत्वादुक्तम्। पूर्वोक्तस्वीयव्याख्यानस्य तु व्याघातसमाधानपक्षे योजितत्वादसत्सन्दर्भत्वम्।

धिकारं ज्ञाप्यन्ते, अत एव भाष्यकारः "स (1)प्रयोजनमनुयुक्तो यदि प्रतिपद्यते" इत्याहस्म नतु प्रतिपद्यसे इति *। मैवम्, शिष्यादीन्प्रत्यपि 'चार्वाकादेर्दोषोऽयमि'त्येवाभिधातव्यम्, कथं च तथा स्यात्, तस्य कथाप्रवेशनाऽप्रवेशनयोस्तद्बाधाक्षमत्वात्,

टी० ननु मया त्वयि व्याघातो नोक्तो येन तदनुरोधात्कथाऽभ्युपगमः, सा च कथा प्रमाणाद्यभ्युपगममन्तरेणैव प्रवृत्ता स्यादपितु शिष्या एवं ज्ञाप्यन्ते यद्वैतण्डिकः कथानधिकारीत्याशङ्कते— । "अथे"ति । यदि वैतण्डिकस्य जयाद्युद्दिश्य, तदा तदनुरोधात् प्रमाणाद्यभ्युपगन्तृत्वमपि, अथ किञ्चिदनुद्दिश्यैव कथायां प्रवर्तते तदोन्मत्त इवोपेक्षणीय, इति शिष्यशिक्षा 'नतु प्रतिपद्यसे' इत्युपलक्षणं नतु स्व प्रयोजनमनुयुक्त इत्यपि द्रष्टव्यम् । वादिनि सम्बोध्ये मध्यमपुरुषप्रयोग उचित इति भावः ॥ शिष्योऽपि हि वैतण्डिकस्यायं दोष इति बोधनीयो, दोषश्च कथायामेवेति सा कथा प्रमाणाद्यभ्युपगममन्तरेणैवेति स्वीकार्य्यमित्याह— । "शिष्यादीनि"ति । प्रयोजनसत्ता न प्रवर्तिका किन्तु तज्ज्ञानं, तच्च वैतण्डिकस्यापीति न तस्य कथानधिकारोऽपीति हृदयम् ॥

मू० कथायामेव हि निग्रहः । नापि द्वितीयः, तथाहि-स्या(2) दप्येवं यदि कथकप्रवर्तनीयवाग्व्यवहारंप्रति प्रमाणादीनां हेतुता तत्सत्त्वानभ्युपगमे निवर्तेत, नत्वेवं सम्भवति तथा सति तत्सत्त्वानभ्युपगन्तॄणां

---

(1) स = दुर्वैतण्डिकः, अनुयुक्तः = पृष्टः सन् यदि प्रयोजनं प्रतिपद्येत यद् एतादृशं विजयादिकं फलमुद्दिश्याहं कथायां प्रवृत्तस्तदा प्रतिपद्येतैव प्रमाणमपि तद धीनत्वात्प्रतिपत्तेः, अथ न, तदोन्मत्तवदुपेक्षणीय इति न्यायवात्स्यायनभाष्यार्थः ।

(2) कारणत्वं ह्यन्वयव्यतिरेकाभ्यामेव गम्यते तथा च— प्रकृते व्यतिरेकाभावात्र प्रमाणाद्यभ्युपगमस्य वाग्व्यवहारंप्रति कारणत्वमित्याह–स्यादपीति, स्यादप्येवं कथकप्रवर्तनीयवाग्व्यवहारं प्रतिप्रमाणादीनां (अभ्युपगतप्रमाणानां, वा प्रमाणादीनामभ्युपगमस्य) हेतुता, यदि तत्सत्त्वाऽनभ्युपगमे निवर्तेत वाग्व्यवहार इत्यन्वयः ।

वाग्व्यवहारस्वरूपमेव न निष्पद्येत हेत्वनुपपत्तेः, उक्तश्चायमर्थो यन्माध्यमिकादिवाग्व्यवहाराणां स्वरूपापलापो न शक्यते इति। अथ मन्यसे * कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं, सत्त्वाच्चाभ्युपगमो, यत्सत्तदभ्युपगम्यते इति स्थितेः * इति। नैवम्, कयापि नियमस्थित्या प्रवृत्तायां कथायां कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं, सत्त्वाच्चाभ्युपगमो भवता प्रसाध्यः,

टी०। "कथायामेवे"ति। अखण्डिताहङ्कारेण पराहङ्कारखण्डनस्य कथाकारणसम्यक्ज्ञानाऽभावस्य वा नियतत्वादिति भावः॥ 'प्रमाणाद्यभ्युपगमो वाग्व्यवहारहेतुः' इति द्वितीयं पक्षं निराचष्टे-। "नापी"ति। वाग्व्यवहारंप्रति प्रमाणादीनां हेतुत्वं सम्भाव्यतापि तदभ्युपगमस्यापि, माध्यमिकादिवाग्व्यवहारे व्यभिचारादित्यर्थः॥ * ननु प्रमाणादीनां हेतुत्वं यदि मनुषे तदा तदभ्युपगमस्यापि हेतुत्वं मंस्यसे, यतो नियतपूर्वसत्त्वं त्वयाऽवश्याभ्युपेयमित्यवर्जनीयसिद्ध एव प्रमाणाद्यभ्युपगम-इति शङ्कते (१)-। "अथे"ति। यद्यदा सत्तया ज्ञायते तत्तदाऽभ्युपगम्यते इति व्याप्तेरुभयसिद्धत्वादिति भावः॥ 'प्रमाणादीनि सन्ति हेतुत्वात् ब्रह्मवत्, प्रमाणादीन्यभ्युपगमविषयः सत्त्वात् ब्रह्मवत्, इति यस्यां कथायां त्वया साधनीयं तद्वदेव कथान्तरमपि स्यात्, अथ सापि प्रमाणाद्यभ्युपगमादेव प्रवृत्ता तदा तस्यां प्रमाणाद्यभ्युपगमहेतुत्वसाधनानर्थक्यम्, अथ तस्यामेव कथायां प्रमाणाद्यभ्युपगमस्य हेतुत्वं प्रसाध्य तत्कथाप्रवृत्तिस्तदाऽन्योन्याश्रय (२) इत्याह= । "कयापी"ति। अये वक्ष्यमाणायेत्यर्थः। नियमस्थितिः=समयबन्धः॥

---

(१) शङ्कते - पूर्वपक्षिणमुद्दिश्य स्वयं शङ्कां समर्पयतीत्यर्थः। शङ्का तु 'कथक-इत्यारभ्यैव।

(२) तत्कथाप्रवृत्तौ प्रमाणाद्यभ्युपगमस्य हेतुत्वसिद्धिः, तत्सिद्धौ च कथाप्रवृत्तिरिति।

मू० कथातः पूर्वं तत्त्वावधारणं वा परपराजयं वाऽभिलषद्भ्यां कथकाभ्यां यावता विना तदभिलषितं न पर्यवस्यति तावदनुरोद्धव्यं, तच्च व्यवहारनियमसमयबन्धादेव द्वाभ्यामपि ताभ्यां सम्भाव्यते इति व्यवहारनियमसमयमेव बध्नीतः (१) । स च 'प्रमाणेन तर्केण च व्यवहर्त्तव्यं वादिना, प्रतिवादिनापि कथाङ्गतत्त्वज्ञानविपर्य्ययलिङ्गप्रतिज्ञाहान्याद्यन्यतमनिग्रहस्थानं तस्य दर्शनीयं, तदुद्भावने प्रथमस्य भङ्गो व्यवहर्त्तव्यः, अन्यथा तु द्वितीयस्यैव, तादृशेतरौ च जेतृतया व्यवहर्त्तव्यौ, प्रामाणिकः पक्षस्तात्त्विकतया व्यवहर्त्तव्यः' इत्यादिरूपः । अत (२) एव 'व्यवहारनियमसमयबन्धेपि हेतुर्वक्तव्यः तथाच सोऽपि हेतुः कथायां प्रवृत्तायामभिधातुं युक्त' इति प्रमाणसत्त्वाभ्युपगमहेत्वभिधानवत् प्रत्यवस्थानमनवकाशम्,

टी० ननु प्रमाणाद्यभ्युपगमवत्समयबन्धोऽपि कथायामतन्त्रमेवेत्यत आह-"कथातः पूर्व"मिति ॥ ननु प्रमाणादिसत्तापि तथैवानुरुद्धेतामित्यत आह- । "तच्चे"ति । समयबन्धस्यावश्यकत्वात् तन्मात्रमनुरोध्यं नतु प्रमाणाद्यभ्युपगमोपीत्यर्थः ॥ अनुरोध्यं समयबन्धं दर्शयति- । "स-चे"ति । कथाङ्गतत्त्वज्ञानविपर्ययो ऽज्ञानमसम्यग्ज्ञानं वा ॥ कथाव्यवस्थामुक्त्वा फलव्यवस्थामाह-"तदुत्पादने" इति । उद्भावितनिग्रहव्यवस्थापने प्रथमस्य भङ्गः, तदव्यवस्थापनेनिरनुयोज्यानुयोगात् द्वितीयस्यैव भङ्ग इत्यर्थः ॥ "तादृशेतरावि"ति । समर्थितनिग्रहा(३)शक्यसमर्थननिग्रहभङ्गप्रयोजकरूपरहिताविव्यर्थः ॥ जल्पे वितण्डायां च फलव्यवस्थामभिधाय

(१) वादिप्रतिवादिनो, इति शेषः ।

(२) अत एव=वक्ष्यमाणादेव हेतोरित्यर्थः ।

(३) समर्थितो यो निग्रहोऽशक्यसमर्थनश्च यो निग्रह एतदुभयं भङ्गप्रयोजकं रूपं, तद्रहिताविव्यर्थः ।

यादे तामाह—। "प्रामाणिक"इति। व्यवहारश्च वस्तुसत्त्वं विनापीति भावः॥ ननु समयबन्धस्यापि कथाहेतुत्वे विप्रतिपन्नः कथायामेव प्रबोध्य इति तत्कथावत् कथान्तरमपि स्यादित्यत आह—। "अत एवे"ति।

मू० द्वाभ्यामपि वादिभ्यां विचारप्रवृत्त्याभिलष्यमाणतत्त्वव्यवस्थाजयमूलत्वेन व्यवहारनियमस्य स्वेच्छयैव परिगृहीतत्वात्। * नचैवं प्रमाणानुपज्ञ (१) स्वेच्छामात्रपरिगृहीतमूलत्वात् मूलापरिशुद्धिसम्भवेन सर्वविचारविचार्यफलविप्लवापत्तिः स्यात् *। अविद्याविद्यमानाऽनादिपारम्पर्यायातस्य (२) लोकव्युत्पत्तिगृहीतसंवादस्य (३) च तस्यान्यथाभावासम्भाव्यतालक्षणस्वतःसिद्धिपरिशुद्धत्वात्। * नच प्रमाणादीनां सत्तापीत्थमेवोभाभ्यामङ्गीकर्त्तुमुचिता *। तादृशव्यवहारनियममात्रेणैव कथाप्रवृत्त्युपपत्तेः। प्रमाणादिसत्त्वाभ्युपगमेपि तथाविधव्यवहारनियमव्यतिरेके तत्त्वनिर्णयस्य जयस्य वाऽभिलषितस्य कथकयोरपर्य्यवसानात्।

टी० अत एवेत्यस्यातिदेश्यमाह—। "द्वाभ्यामपी"ति। यद्यपि समयबन्धस्येच्छापरिगृहीतत्वे विप्रतिपन्नः कथायामेव प्रबोध्यते इत्यत्रापि दोषस्तदवस्थ एव, तथापि समयबन्धमात्रेण कथाप्रवृत्तौ प्रमाणाद्यभ्युपगमस्य कथाङ्गत्वकल्पना गौरवपराहतेति भावः॥ समयबन्धस्यावश्य

---

(१) प्रमाणेनाऽनुपक्रम्य स्वेच्छामात्रपरिगृहीतो नियमबन्धो मूलं यस्य विचारस्येति विग्रहः "उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वारम्भ उपक्रमः" इत्यभिधानात्। प्रमाणेनोपज्ञा=आद्यज्ञानं यस्य नास्तीति, प्रमाणज्ञानशून्येनेति वार्थः।

(२) अविद्यया विद्यमानश्चासावनादिपारम्पर्येणायातश्चेति तथा, तस्येत्यर्थः। विद्यमानाङ्गीकारात्तु "अविद्यमानादिपारम्पर्यायातस्येति पाठः तदर्थस्तु अविद्यमान आदिर्यस्य परम्पराभावस्य तेनायातस्येति।

(३) लोकव्युत्पत्त्या=वृद्धव्यवहारेण गृहीतोऽ'न्यथा न भवति' इति संवादो यस्य समयबन्धस्य तस्येत्यर्थः।

हेतुत्वेऽनिष्टमाशङ्कते– । [b]"नचैवमि"ति । विचारविप्लवः=साधनदूषणाप्रयोगाद्यव्यवस्था । विचार्यविप्लवः=पक्षविपक्षाव्यवस्था, वादिप्रतिवाद्यव्यवस्था वा ; तयोरपि विचार्य्यत्वात् । फलविप्लवः=जयभङ्गाऽव्यवस्था, तत्त्वनिर्णयाऽव्यवस्था च । यद्वा विचारविप्लवः=प्रमित्यजनकत्वं, विचार्य्यविप्लवः=प्रमित्यविषयत्वं, फलविप्लवः=जयाद्यभावः । अविद्याविद्यमानत्वाभिधानं समयबन्धस्याप्यपारमार्थिकत्वाय । अनादिपारम्पर्य्यायातस्येत्यवश्याभ्युपगन्तव्यत्वार्थम् । गृहीतसंवादस्येत्यप्रामाण्यशङ्कानिरासाय । ननु समयबन्धस्याज्ञानरूपतया स्वतःसिद्धत्वमनुपपन्नम् ? अत उक्तमन्यथाभावासम्भाव्यतालक्षणेति । समयबन्धो न कर्त्तव्यः–इति सम्भावनाविरह एव तस्य स्वतःसिद्धत्वमिति भावः ॥ [c]"इत्थमि"ति । समयबन्धाङ्गताङ्गीकारप्रकारेणैवेत्यर्थः ॥ अन्यथासिद्धिमाह–। [d]"तादृशे"ति ॥ समयबन्धस्योपजीव्यत्वमाह–। [e]प्रमाणादीति ॥

मू० नापि तृतीयः, लोकव्यवहारो हि [a]प्रमाणव्यवहारो वा स्यात्?, पामरादिसाधारणव्यवहारो वा? । नाद्यः, विचारप्रवृत्तिमन्तरेण [b]तस्य दुर्निरूपत्वात् [c]तदर्थमेव च पूर्वं नियमस्य गवेषणात् । नापि द्वितीयः, [d]शरीरात्मत्वादीनामपि तथासति भवता स्वीकर्त्तव्यतापातात् । * [e]पश्चात् तद् विचारबाध्यतया नाभ्युपेयते*?–इति चेत्, [f]तर्हि प्रमाणादयोपि यदि विचारबाध्या भविष्यन्ति तदा नाभ्युपेया एव, अन्यथा तूपगन्तव्याः; इति 'लोकव्यवहारसिद्धतया सत्त्वमभ्युपगम्यते'–इति तावन्न भवति । नापि चतुर्थः, [g]यादृशो भवता प्रमाणादीन्यभ्युपगम्य व्यवहारनियमः कथायामालम्ब्यते तस्यैव प्रमाणादिसत्त्वा

ऽसत्त्वानुसरणोदासीनैरस्माभिरप्यवलम्बनात्, तस्य(१) यदि मां प्रति फलातिप्रसञ्जकत्वं, तदा त्वां प्रत्यपि समानः प्रसङ्गः ।

टी० । [a]"प्रमाणे"ति । लोक्यते (२)इति लोकः प्रमाणमित्यर्थः । प्रामाणिकलोकव्यवहारइति वाऽर्थः ॥ [b]"तस्ये"ति प्रमाणव्यवहारस्येत्यर्थः ॥ तर्हि विचारप्रवृत्त्यत्र तद्विकल्प्यतामत आह-। [c]"तदर्थमेवे"ति । विचारार्थमेवेत्यर्थः । तथाच-विचारप्रवृत्त्या प्रमाणाद्यभ्युपगमस्य प्रमाणसिद्धत्वे, तत्प्रमाणसिद्धत्वेन च तदधीनविचारप्रवृत्तिरित्यन्योन्याश्रय इति भावः ॥ [d]"शरीरे"ति । 'अहं स्थूलः' इति प्रत्ययात् शरीरे एवात्मव्यवहारादित्यर्थः ॥ विचाराऽबाध्यलोकव्यवहारासिद्धत्वमभ्युपगम्यतायां तत्त्वमित्याह-। [e]"परश्चादि"ति ॥ विचाराऽबाध्यलोकव्यवहारासिद्धत्वं प्रमाणादीनामप्यसिद्धमित्याह-। [f]"तर्हि"ति ॥ [g]"यादृश"इति । तत्त्वनिर्णयविजयातिप्रसङ्गभिया प्रमाणाद्यभ्युपगमः कथातः पूर्वं त्वया क्रियते, यदि नियतसमयबन्धेनैव तद्द्वयं निवर्तेत तदा वृथा प्रमाणाद्यभ्युपगम इत्यर्थः ॥

मू० *"स्यादेतत्, नियत(३)वाग्व्यवहारक्रियासमयबन्धेन कथां प्रवर्तयतापि व्यवहारसत्ताभ्युपगन्तव्या, 'न हि सत्तामनभ्युपगम्य व्यवहारक्रियाऽभिधातुं शक्या, क्रिया हि निष्पादना, असतः सद्रूपताप्रापणमिति यावत् । ''प्रमाणै(४) व्यवहर्त्तव्यमि'ति निय-

(१) तस्य=व्यवहारनियमस्य ।

(२) यथा व्युत्पत्त्या मूले लोकव्यवहारपदस्य 'प्रमाणव्यवहारः'-इत्यर्थो निष्पद्यते तथा दर्शयति,-तत्र कर्मधारयमभिप्रेत्याह लोक्यते इति षष्ठीतत्पुरुषपक्षे व्याचष्टे-प्रामाणिकेति तट्टीकाव्याख्यानुरोधेन मूले 'प्रामाणिकव्यवहारः'-इति प्रायो दृश्यमानः पाठ उपेक्षितः, अन्यथापि तस्येति प्रमाणव्यवहारस्येत्यर्थ.'-इति व्याख्यानासाङ्गत्यप्रसङ्गात् ।

(३) नियतश्च समयबन्धस्य विशेषणं, तथा च वाग्व्यवहारक्रियया क्रियमाणो वा, वाग्व्यवहारक्रियाकर्ता वा, वाग्व्यवहारक्रियायाः सम्बन्धो वा, यो नियतसमयबन्धस्तेन कथां प्रवर्तयतापीत्यर्थः ।

(४) न केवलं व्यवहारसत्त्वं त्वयाभ्युपेयं प्रमाणादिसत्त्वमपि त्वदुक्तबलादेवापद्यते-इत्याह-प्रमाणैरिति । प्रमाणैः-इति तृतीयया करणत्वेनाभिधानात् तस्य च कार-

मबन्धनं (प्रमाणकारणभावस्य नियमान्तर्भावात् नियतपूर्वसत्त्वं कारणत्वं प्रमाणानामनादाय) न पर्य्यवस्यति । दूषणानां(¹) चास्तित्वेन भङ्गावधारणनियमबन्धने, साधनाङ्गव्याप्त्यादीनां सत्त्वेन तद्विषयस्य तत्त्वरूपताव्यवहारनियमनादौ च, "कण्ठोक्तमेव तस्य तस्य सत्त्वमङ्गीकृतमिति रिक्तमिदमुच्यते–'प्रमाणादीनां सत्तामनभ्युपगम्य कथारम्भः शक्यते'–इति" ?। नैवम्, 'एभिरपि बाधकैः कथायामारब्धायामेवाभिमतस्य प्रसाधनीयत्वे पूर्वोक्तबाधाया अनिस्तारात् ।

टी० ननु द्वैतापत्तिभयेन प्रमाणादिसत्तां नाभ्युपैषि, तच्च व्यवहारसत्त्वाभ्युपगमेऽप्यविशिष्टं, किञ्च व्यवहारादिसत्ताभ्युपगमनान्तरीयक एव प्रमाणादिसत्ताभ्युपगमोऽपीति कथायां तदुभयमवर्जनीयमिति शङ्कते–[a]"स्यादेतदि"ति ॥ व्यवहारसत्ताभ्युपगममुपपादयति–। [b]"न ही"ति ॥ प्रमाणसत्ताभ्युपगममुपपादयति–। [c]"प्रमाणैरि"ति ॥ [d]"कण्ठोक्तमि"ति । 'दूषणानि सन्ति' 'व्याप्तिरस्ति'–इत्यादिवचनं तत्सत्ताभ्युपगमपरमेवेत्यर्थः ॥ प्रवृत्तायामेव कथायामयं बाधस्त्वया वाच्यः, तत्कथाप्रवृत्तिवत् कथान्तरप्रवृत्तिरपीति न किञ्चिदेतदिति परिहरति–। [e]"एभिरपी"ति । यद्यपि सा कथा प्रमाणाद्यभ्युपगमपूर्विकैव, त्वं पुनरिदानीं तत्र विप्रतिपन्नः समयबन्धमङ्गीकुर्वन् प्रमाणादिसत्ताभ्युपगममङ्गीकार्य्यसे, इति नानुपपत्तिः, तथापि प्रमाणादिसत्ताभ्युपगमेऽपि न प्रमाणादिसत्तासिद्धिः, अपेक्ष्यप्रमाणयुक्तेरिति हृदयम् ॥

णनियतत्वात् कारणत्वस्य च कार्याव्यवहितप्राक्क्षणसत्त्वरूपत्वात्प्रमाणानां सत्त्वमनङ्गीकृत्य नियमबन्धनमेव न पर्य्यवस्यतीत्यर्थः ॥

(१) 'यस्य मते दूषणानि सन्ति तस्य भङ्गोऽवधारणीयः, यस्य तु हेतौ साधनाङ्गव्याप्त्यादीनां सत्त्वं तस्य पक्षस्तत्त्वरूपो व्यवहर्त्तव्यः'–इति नियमबन्धे कण्ठोक्तमेव तस्य तस्य व्याप्त्यादेः सत्त्वमित्याह–। दूषणानामिति ।

मू० *[a]"ननु व्यवहारनियमस्य स्वेच्छास्वीकृतस्यैव प्रमाणादिसत्तास्वीकारपर्य्यवसायितया नायं दोषः स्यात्* । यतः सत्ताज्ञानस्य तत्रा(१)ङ्गत्वं, नतु सत्तायाः । [b]तत्र(२) किं सत्त्वावगममात्रात् सत्ताभ्युपगम्येति मन्यसे ?, अबाधितात्तदवगमाद्वा ? । न तावदाद्यः, मरुमरीचिकादौ जलरूपतासद्भावाभ्युपगमप्रसङ्गात् । द्वितीयेपि किं वादिप्रतिवादिमध्यस्थमात्रस्य (तस्यापि कथाकालमात्रे एव) बाधितावगमाभावात् ?, अथवा कस्यचिदपि कालान्तरेपि च बाधितबोधविरहात् ? । नाद्योऽतिप्रसङ्गात्, [c]पुरुषत्रयावगतस्यापि (३)एकक्षणावगतस्य पुरुषान्तरेण, तेनापि क्षणान्तरे, बहुलं बाध्यत्वदर्शनात् । नचासावर्थोऽसत्योपि द्वित्रादिपुरुषमात्रपूर्वजाततत्प्रतीत्यनुरोधा(४)द्, बाधदर्शने सञ्जातेपि, तथैव सन्नित्यभ्युपगम्यते । तस्माद्, [d]द्वितीयः पक्षः परिशिष्यते–'यत्र सर्वप्रकारेण बाधितत्वं नास्ति तत्सदित्यभ्युपगन्तव्यम् ।

टी० ननु कथायां कस्याञ्चित्प्रमाणादिसत्ताभ्युपगमो न मया त्वां प्रति साध्यते, किंतर्हि, स्वेच्छया यः समयबन्धः परिगृहीतः स प्रमाणादिसत्त्वाभ्युपगमपर्य्यवसन्नः–इति त्वं बोध्यसे ? इत्यत आह–।[a]"नचे"ति। समयबन्धः प्रमाणादिसत्ताज्ञानमात्रमाक्षिपति, नतु प्रमाणादिसत्तामपि, येन द्वैतापत्तिरिति भावः ॥ ननु प्रमाणादिसत्ताज्ञानं चेदायातं तदा तदभ्युग-

(१) तत्र=कथायाम ।

(२) तत्र=प्रमाणादिसत्ताज्ञानस्य कारणत्वस्वीकारे सति ।

(३) पुरुषत्रयावगतस्यापि पुरुषान्तरेण बहुलं बाध्यत्वदर्शनात्, एकक्षणावगतस्य च क्षणान्तरे तेनापि बहुलं बाध्यत्वदर्शनादित्यन्वयः ।

(४) अबाधितबुद्ध्यनुरोधादित्यर्थः ।

मेऽभि(१)सिद्धः, तत्रैव च स्व विप्रतिपत्तिः ? इत्यत आह—। [b]"तत्र किमि"ति । यद्वा 'नावगममात्रं कथाहेतुरपितु प्रमाणादिसत्तावगमः'—इति विशिष्टकारणताग्राहकं मानं(२) विशेषणमपि विषयीकरोतीति प्रमाणादिसत्ताभ्युपगमो(३)ऽपि कथाहेतुः,—एवं तदवगमोऽपीत्यत आह—। "तत्र किमि"ति ॥ अतिप्रसङ्गमेव दर्शयति—। [c]"पुरुषत्रये"ति ॥ [d]"द्वितीय"इति द्वितीयपक्षस्य द्वितीयपक्ष इत्यर्थः ॥ तमेवाह—। [e]"यच्च सर्वप्रकारेणे"ति ॥

मू० [a]"तदित्थं (४), यदि नाम वादिप्रतिवादिमध्यस्थमात्रस्य दूषणादिसत्तावगमः कथाकालमात्रे तै(५)रबाध्यमानः कथाङ्गत्वेनाभ्युपेयते तदा [b]किमायातं सर्वप्रकाराबाधिततत्सत्त्वावगमायत्ततत्सत्ताभ्युपगमकथाङ्गतानङ्गीकारस्य(६) । [c]कतिपयप्रतिपत्तृ-कतिपयकाल-तथात्वावगमादेव प्रायेण लौकिको व्यवहारः प्रतीयते, तादृशश्चायं सत्त्वावगमः कथाङ्गम् । [d]एतत्तदुच्यते(७)—[e]व्यावहारिकीं प्रमाणादिसत्तामादाय

---

(१) प्रमाणादिसत्तास्वीकारोऽपीत्यर्थः ।

(२) प्रमाणादिसत्ताविशिष्टाऽवगमनिष्ठकारणताग्राहकं मानं विशेषणीभूत सत्तामपि कारणत्वेन विषयीकरोतीत्यर्थः ।

(३) 'अभ्युपगमः'—इत्यापाततः कीर्तनं, प्रमाणादिसत्तापि कथाहेतुरिति तु परमार्थः । यद्वा पूर्वं प्रमाणादिसत्ताविशिष्टावगमोक्त्या प्रमाणादिसत्ताभ्युपगमवि शिष्टत्वमेवलक्षणयोक्तं भवतीति ।

(४) 'तद् इत्थं वादिनोच्यते एव, परं न घटते, सर्वप्रकाराबाध्यत्वस्याऽसर्वज्ञेनाऽविज्ञेयत्वात्'—इति विद्यासागरोक्तोऽर्थः । तत्र तदित्थमित्यस्य तत्रेत्यर्थकस्य पूर्वेणैवाऽन्वयः, प्रक्रान्तपाठक्रमव्याख्यानुरोधेन त्वपि इति विज्ञेयम् । क्वचित्तु मूलव्याख्यानयोः 'तदिदम्' इति पाठः ।

(५) तैः—वाद्यादिभिरित्यर्थः ।

(६) मदभ्युपगतस्य,—इति शेषः ।

(७) 'तदेतद्वृद्धैरपि "स्वप्नवद्व्यवहारेण" इत्यादावुच्यते, न तु मयैव'—इति विद्यासागराः । अयं तु, तत्=तस्मिन्नर्थेऽस्मत्पूर्वाचार्यैः, एतत्=वक्ष्यमाणम्, उच्यते=उक्तं भवतीति भावः ।

विचारारम्भः-इति । तस्माद् 'यादृग्व्यवहारनियमः कृतस्तन्मर्यादाऽनेन नोल्लङ्घिता'-इति यद्वादिवाऽव्यवहारे मध्यस्थावगमः, स विजयते; यस्य तु क्वचित्सि नैवं तस्यावगमस्तस्य पराजयः; यत्र(१)वाद्युक्तनिग्रहस्थानावगमः, स निगृहीतः; तदितरस्तु न तथा-इत्यादिनियम एव कथारम्भाय ग्राह्यः।

टी० कथाव्यवहारे(२) सर्वप्रकारबाधितत्वं(३) नास्ती(४)त्यत आह-।[a]"तादृत्यमि"ति ॥ ननु प्रमाणादिसत्ताभ्युपगमे त्वं विप्रतिपद्यसे, स च त्वयैवाङ्गीकृतः? इत्यत आह-।[b]"किमायातमि"ति । सर्वप्रकारेणाऽबाधितो यः प्रमाणादिसत्तावगमस्तदायत्तः(५) प्रमाणादिसत्ताभ्युपगमः कथाङ्गं न भवतीति मदीयः पक्षः, तत्र त्वया न किञ्चिदुक्तमिति भावः। *ननु प्रतिज्ञान्तरमिदं यत्प्रमाणाद्यभ्युपगमः कथाङ्गं न भवतीति प्रतिज्ञाय सर्वप्रकाराऽबाधितप्रमाणादिसत्ताऽधिगमायत्तप्रमाणाद्यभ्युपगमः कथाङ्गं न भवतीति प्रतिज्ञायते*?-इति चेन्न, पूर्वमपि विशिष्टस्यैव प्रतिज्ञानात्, प्रतिज्ञान्तरस्यापि खण्डनीयत्वा(६)च्चेति भावः ॥ नन्वबाधित एव प्रमाणादिसत्ताभ्युपगमः कथाङ्गमस्त्वित्यत आह-।[c]"कतिपये"ति । त्रैकालिकसार्वलौकिकबाधवैधुर्याकलनमशक्यमिति कतिपयप्रतिपत्तृमात्रबाधविरह एव प्रवृत्त्यङ्गम्,-इत्यवश्यं वाच्य, नैतावता वस्तुस्थितिरिति भावः।[d]"एतत्तदुच्यते"इति। तदेतदुच्यते इत्यर्थः ॥[e]"व्यावहारिकीमि"ति । पारमार्थिकत्वस्य दुष्परिच्छेद्यत्वा(७)दिति भावः ॥

---

(१) यत्र=प्रतिवादिनीत्यर्थः।

(२) मूलानुरोधात् 'कथाव्यवहारे'-इत्यस्य, कथाव्यवहारकाले-इत्यर्थः।

(३) 'सर्वप्रकाराऽबाधितत्वं नास्ति,-इति तु प्रायो दृश्यमानः पाठः प्रामादिकः।

(४) प्रमाणादिसत्ताऽवगमस्य,-इति शेषः।

(५ तदायत्तः=तदधीनः।

(६) सर्वनिषेधख्यानखण्डनवेलायां द्वितीयपरिच्छेदे,-इति शेषः। इति भावइति। पूर्वमेकदा भावस्योक्तत्वादत्र 'भावः' इति नोचितं, यद्वा प्राथमिकस्य "भावः"-इत्येतस्य स्थाने 'अर्थः'-इति पाठेन भाव्यम्।

(७) परिच्छेदः=अवधारणं, तथा च 'दुष्परिच्छेद्यत्वात्'-इत्यस्य, दुरवधारणत्वादित्यर्थः। अत्र खलु भावप्रधानत्वेन दुष्परिच्छेदत्वादिति पाठं तु युक्तमनुमन्ये।

मू० [a]"अनेन नियमेन वक्तव्यम्'-इत्यस्यायमर्थः,-'अनेन(१) नियमेनोक्तमनेने'ति मध्यस्थावगमस्य विषयीभवितव्यमिति। *[b]नचवाच्यमन्ततस्तदवगमस्यापि(२)सत्ताभ्युपेयेति* । तस्यापि(३)सत्ताचिन्तायां तत्सत्तावगमान्तरस्यैव शरणत्वात्।*[c]नचैवमनवस्था*। तदनुसरणाऽवश्यम्भावानङ्गीकारात्, [d]"एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः"-इति न्यायात्।* नचान्तिमासत्त्वे पूर्वप्रवाहाऽसत्त्वापत्तिः, तथाचाऽवगममादायापि व्यवहरतो न निस्तारः-इतिवाच्यम् * । 'अस्तु,'एवं हि, [e]तथापि त्रिचतुरज्ञानकक्षागवेषणमात्रविश्रान्तेन विचारेण ततः परमननुसरणरमणीयेनैव च समयं बद्ध्वा कथायां मिथः सम्प्रतिपत्त्या प्रवर्त्तनात् ।

टी० ननु प्रमाणादिसत्ता माभ्युपगम्यतां, नियमबन्धस्त्वङ्गीकृत एतावतैव द्वैतापत्तिरित्यत आह-।[a]"अनेने"ति॥ अवगमसत्तया द्वैतापत्तिं निरस्यति-।[b]"नच वाच्यमि"ति। आपाततः सर्वशून्यतानयनगरप्रवेशे तात्पर्य्यम् ॥ ननु ज्ञानमपि चेच्च परमार्थसत् किन्तु तज्ज्ञानात्तद्व्यवहारसिद्धिरिवं तत्र तत्रापि मन्तव्यं तदाऽनवस्थया कोऽपि व्यवहारो न सिद्ध्येदित्यत आह-। [c]"नचे"ति। भवेदेवं यदिज्ञानमवश्यं स्वव्यवहारार्थं स्यात्, किन्तर्हि विषयव्यवहारार्थमनुसृतस्य व्यवजिहीर्षायां ज्ञानान्तरमनुश्रीयतां(४)नतु तत्तज्ज्ञानव्यवहारपरम्पराधीव्यं, येनाऽनवस्था स्यादित्यर्थः॥ अत्रार्थे भट्टाचार्य्यानुमतिमाह- [d]"एवमि"ति। प्राकट्यानुमेयज्ञानपक्षे तत्तज्ज्ञानपरम्पराऽनुमानानवस्थापरिहारार्थं भट्टाचार्य्यवर्य्यैरिदमुक्तमिति भावः॥ ननु ज्ञानस्यापि

---

(१) अनेन वादिना अनेन नियमेनोक्तम् -इति मध्यस्थाऽवगमस्य विषयत्वेन भवितव्यमित्यर्थः, तथाचाऽवगमसत्तैव सिद्धा, न नियमबन्धसत्तेति भावः ।

(२) तदवगमस्यापि=नियमबन्धावगमस्यापीत्यर्थः ।

(३) नियमबन्धविषयकाऽवगमस्यापि प्रातीतिकमेव सत्त्वमित्याह-तस्यापीति ।

(४) अयं तु अनुश्रीयतामित्यस्य स्थाने अनुश्रियतामिति पाठः साधुरिति वदामः ।

व्यावहारिकी सत्ता, तथा वास्तिमज्ज्ञानमप्यसद्भूतमस्माकमसत्यमस्तु तन्मात्रा-धीनसत्ताकं तत्पूर्वज्ञानमप्यसदापद्येत–इत्याशङ्क्य सर्वशून्यताभिप्रायेणेष्टा-पत्त्या परिहरति–। [c]"अस्त्वि"ति। अस्त्वितीष्टापादनं, सर्वासत्त्वमस्त्वित्य-र्थः॥ [d]"एवं ही"ति। एवमेव यतो विचारबलात् सेत्स्यतीत्यर्थः। (१)हि-शब्दः किलाऽर्थे वा॥ ननु प्रमाणादिसत्त्वमनभ्युपगम्यापि कथाप्रवृत्तिरितीदानीं तत्रोद्देश्यं, तच्च सर्वासत्त्वस्वीकारविरहं, प्रमाणाद्यसत्त्वे विचारस्य-नवकाशादत आह–। [g]"तथापी"ति॥

मू० [a]"अन्यथा प्रमाणादिसत्त्वाऽभ्युपगमेपि ज्ञानाऽनवस्थायाः दुष्परिहरत्वात्।* [b]नच वाच्यं–मत्पक्षे स्वरूपसत्ता ज्ञानेन व्यवहारस्य चरितार्थयितुं शक्यत्वात् तज्ज्ञानपरम्पराऽननुसरणमुचितं, नत्वेवं त्वत्पक्षे स्वरूपसत्ता ज्ञानेन व्यवहारस्य चरितार्थता, ज्ञानस्वरूपसत्त्वाङ्गीकारप्रसङ्गादिति*। स्वरूपसत्त्वमादायापि परिहरतोऽनवस्थाप्रसङ्गस्य स्वप्रकाशप्रस्तावे वक्तव्यत्वात्। [c]यथा च त्वत्पक्षे स्वरूपसत्त्वाऽविशेषेपि विज्ञानस्वरूपसत्तैव परं व्यवहारोपपादिका, न घटादिसत्ता, एवमेव(२) असत्त्वाविशेषेपि ज्ञानमेवासद् व्यवहारोपपादकं नान्यत्।* [d]असच्चोपपादकं च–इति व्याहतम्*?–इति चेन्न, 'सदुपपादकम्–इति कुतो न व्याहतम्?। नहि सदुपपादकम्, असच्च,–इति क्वचिदावयोः सिद्धम्।* [e]ननु तदसत्त्वाविशेषात्कार्यस्याऽन्यदापि जन्मप्रसङ्गः*?।

---

(१) 'यत'-इत्येतदर्थे हि-शब्दमभिधायेदानीं किलार्थे आह–हीति।

(२) असत्त्वे.–इति शेषः।

टी० ननु प्रमाणादिसत्त्वेव कुतो नाभ्युपगम्यते इत्यत आह— । [a]"श्र-
न्यथे"ति । चिरतरकालविश्रान्तिरेव तत्रापि श्रवणमनवस्थाभयादित्यर्थः ॥
ननु सत्यवे ज्ञानं स्वरूपसदेव विषयव्यवहारसमर्थं, स्वत्यवे स्वरूपाऽसतो-
ज्ञानस्य ज्ञानान्तरमेव सत्त्वमिति तज्ज्ञानसत्त्वार्थमपरापरज्ञानाऽनुसरण-
मवश्यमित्यनवस्थेति वैषम्यमाशङ्क्य परिहरति—। [b]"न च वाच्यम्" इति ।
अज्ञायमानतायां ज्ञानस्य स्वरूपसत्तापि न स्यात् "को (१)ब्रूते सती सा वि-
त्तिः ? असत्येव किं न स्यात्"—इत्यादेः स्वप्रकाशप्रस्तावे वक्ष्यमाणत्वात्
न वैषम्यमित्यर्थः ॥ ननु ज्ञानस्याऽसत्त्वे कथं तदधीनो व्यवहारः ? यथा-
ऽसदपि व्यवहारहेतुस्तदा सदैवासतो व्यवहारः स्यादविशेषादित्याश-
ङ्क्याह— । [c]"यथाचे"ति ॥ [d]"असत्त्वे"ति । उत्पत्तिकारणमुपपादकं, कारणं
च नियतप्राक्कालसदिति व्याघातः ॥ कारणं (२) नियतप्राक्सदित्येव
नास्ति, कुतो व्याघात इत्याह— । [e]"सदि"ति ॥ ननु यद्यसत्कारणं तदै-
तत्कालीनोत्पत्तिको घटः पूर्वमेव कथं नोत्पन्नः ? इत्याह—। [f]"नन्वि"ति ।
एतद् (३)घटोत्पत्तिक्षणभिन्नाः क्षणा यद्येतद्घटप्रागभावकारणाऽधिकरण-
क्षणाऽव्यवहितोत्तरत्वविशिष्टाः स्युः, एतद् घटोत्पत्त्यधिकरणानि स्युरि-
त्यापादनार्थः । यद्वा (४) एतद्घटोत्पत्तिक्षणपूर्वक्षणो यद्येतद्घटसामग्र्य-
व्यवहितोत्तरक्षणः स्याद् एतद्घटोत्पत्तिक्षणः स्यादित्यापाद्यम् ॥

---

(१) कोऽनुभवः ब्रूते=अनुभावयति यत सत्येव सा वित्तिरिति ? न कोऽपि, ततश्चाऽनुभावकाऽभावादसत्येव सा वित्तिः किं न स्यादिति वक्ष्यमाणग्रन्थार्थः ।

(२) कारणं यन्नियतप्राक्सदेव, नाऽसदित्येव नाद्यापि निर्व्यूढमिति तदाटाप कथं व्याघातः स्यादित्यर्थः । यद्वा कारणं=नियतप्राक्सत्, तथा च यथा ऽसत्त्वादिति नास्ति तथा नियतप्राक्सन्नियतप्राक्सदित्येव नास्ति कुतोऽस्माकमिति व्याघातः ।

(३) यथाश्रुतमौलिकार्थव्याख्याने काऽर्थस्याऽन्यत्र अन्वयसिद्ध्यभावादप्रसिद्धापादनं दोष इति तदुद्धाराय विशिष्टमापादनार्थमाह—एतदिति. अस्तु नाम एतद्घटोत्पत्त्यधिकरणक्षणा एतेतद्घटकारणाऽव्यवहितोत्तरत्वविशिष्टः. यदि तु एतद्घटोत्पत्तिक्षणभिन्ना अपि क्षणा एतद्घटकारणाद्यव्यवहितोत्तरत्वविशिष्टाः स्युस्तदैतद्घटोत्पत्त्यधिकरणानि स्युरित्यर्थः ।

(४) पूर्वं घटोत्पत्तिक्षणभिन्नेषु यावत्सु क्षणेषु [illegible] घटाऽव्यवहितप्राग्भाव्येकक्षणं तदापादयति—यद्वेति ।

मू० "न, कार्यस्या(¹)ऽसत्ताक्षणे इवान्यदापि सामग्र्यसत्त्वाऽविशेषात् तथापि किं नान्यदा कार्यजन्म। * [b]अथ न मम तदानींतनं सामग्र्यसत्त्वं तदानींतनस्य कार्यजन्मनो नियामकं, किंतु ततः प्राक् सामग्रीसत्त्वं, तथादर्शनात् *, ?। [c]तर्हि ममापि कालान्तरस्थ(²)मपि तदसत्त्वं तदातनकार्यजन्मनो नियामकं, तथादर्शनादेव। * [d]मम तु तदव्यवहितोत्तरत्वं तदा कार्यजन्मनो नियामकम् * ?-इति चेन्न,

टी० कार्योत्पत्तिक्षणे सामग्री त्वयापि नेष्यते प्रागभावस्य तद्घटकस्याऽभावात्, तथाच यथा सामग्रीविरहेऽपि तस्मिन्क्षणे कार्यं, तथा क्षणान्तरेऽपि कथं न स्यादविशेषादित्याह-। [a]"'न, कार्यस्ये"ति ॥ क्षणान्तराणां सामग्रीविनाकृतत्वात् त्वया घटोत्पत्त्यधिकरणत्वमापाद्यते.तच्च तदा स्याद् यदि सामग्र्यसत्त्वं कार्योत्पत्तिनियामकमस्माभिरुक्तं भवेत्, नचैवं, किन्तु कार्य्याव्यवहितपूर्वक्षणसामग्रीसत्त्वमिति शङ्कते-। [b]"अथे"-ति ॥ तस्मिन्(³)क्षणे नियमतः कार्योत्पत्तिदर्शनात् यथा पूर्वक्षणसामग्रीसत्त्वं तव नियामकं, तथा ममापि नियतकालकार्यदर्शनात् पूर्वक्षणसामग्र्यसत्त्वमेव किं न नियामकं स्यादिति परिहरति-। [c]"तर्ही"ति। सामग्रीसत्त्व पूर्वक्षणमात्रे, तदसत्त्वं च सार्वत्रिकमिति महद्वैषम्यम्, तथापि कार्यमप्यसदेवेति(⁴)हृदयम्। पूर्वापादनं तु तदा स्याद् यदि घटोत्पत्तिक्ष-

(१) तथाविध त्वारणवादिनो मते किं कारणसामग्रीघटकस्य प्रागभावस्याऽभावात्कार्य्यजन्म ? वा पूर्वक्षणसामग्रीसत्त्वात् ? आहोस्वित् सकलसामग्र्यव्यवहितोत्तरत्वात् ?; तत्राद्यं आह-कार्य्यस्येति।

(२) कालान्तरस्य तदसत्त्वमित्यस्यैव पूर्वक्षणसामग्र्यसत्त्वमिति विवरणमुत्थानिकामिषेण शङ्करेण स्मर्यते भवति। एवमन्यत्रापि प्रायोऽस्मिन् व्याख्याने उत्थानिकयैवाऽर्थः अवधारणीयाः।

(३) तस्मिन् क्षणे = कार्य्यक्षणे।

(४) अयमाशयः-भवेदिदं वैषम्यं यत्रैतादृशं कार्यस्याप्यसत्त्वं मया नोच्येत, किन्तु पारमार्थिकत्वधर्मपुरस्कारेण कार्य्यकारणयोरुभयोरप्यसत्त्वमेव, व्यावहारिकत्वेन तु

व्यतिरिक्तानामपि क्षणानां याव(१)द्घटप्रयोजकोत्तरत्वं मयाऽभ्युपगम्येत, नत्वेवं, किन्तु घटजन्मक्षणस्यैव, तत्पूर्वक्षणवर्त्तिसामग्र्यसत्त्वस्यैव घटप्रयोजकत्वेन मयाऽभ्युपगमात् ॥ न वयं भिन्नकालीनं सामग्रीसत्त्वं कार्यजन्मनियामकं ब्रूमोऽपि तु कार्योत्पत्तिसमानकालीनमेव सामग्रीसत्त्वाऽव्यवहितोत्तरत्वं, तथा च न साम्यमित्याह –। [d]"ममत्वि"ति ॥

मू० [a]"समसमयत्वाद[b]ऽऽगन्तुकत्वा(२)च्चाऽविशेषेण नियम्यनियामकव्यवस्थाऽनुपपत्तेः ।

टी० [a]"समसमयत्वादि"ति । यदेव कार्योत्पत्तिक्षणत्वं तदेव सामग्र्युत्तरक्षणत्वमिति कथमभेदेनैव नियम्यनियामकभावः, समयस्य=क्षणस्य, समत्वादेकत्वादित्यर्थः । * नचोपाधिभेदाद्भेदः * । तथा सति दण्डित्वकुण्डलित्वाभ्यां देवदत्तो भिद्येत, "देशकालौ(३)कामं भिद्येयातां नतु तदुपरक्तस्वभावः पद्मरागो मणिः"–इति च तवैव वाचस्पतेरभिधानादिति भावः । यद्वा तुल्यकालयोः सामग्र्युत्तरक्षणत्वकार्यक्षणत्वयोः सव्येतरविषाणवद्विपर्ययनियामकभावाऽभावादित्यर्थः । यद्वा समयः=व्यवस्था, तेन समसमयत्वाद्विपर्ययनियामकयोः समव्यवस्थत्वात्, तथाच–कार्यनियामकत्वेनाभिमतस्य सामग्र्युत्तरत्वस्य नियामकान्तरं वाच्यमित्यर्थः । एतदेवाग्रे "अन्यथा यद्विशेषान्तरं तदपि"–इत्यादिना स्फुटयिष्यति । यद्वा, समयः=सङ्केतः(४), तथाच कार्यक्षणसामग्र्युत्तरक्षणयोरेकार्थवाचकत्वेन तदुपस्थाप्ययोर्घटकलशपदोपस्थाप्ययोरिव न नियम्यनिया-

कदाचित्कार्यस्य सत्त्वोपलम्भात्तदव्यवहितप्राक्क्षणमात्रे परमार्थतोऽसतोऽपि कारणस्य व्यावहारिकं सत्त्वं मयाप्यङ्गीकरणीयमेवेत्यतो न वैषम्यमिति ।

(१) यावत्त्वस्य प्रयोजकेऽन्वयो न तु घटे ।

(२) उत्तरत्वमपि नियामकान्तरपूर्वकं चेदनवस्था, न चेत्स्वयमव्यवस्थितं कथमव्यवस्थापयेदित्याह–आगन्तुकत्वादिति"–इति प्रगल्भमिश्राः शोधर्षके ।

(३) देशकालौ कामं = यथेष्टं भिद्येयातां नतु देशकालभेदेन पद्मरागो मणिर्भिद्यते इत्यर्थः ।

(४) सङ्केतः=शाब्दशाब्दकभावः सम्बन्धः, शक्तिरिति यावत् ।

मकभाव इत्यर्थः । [b]"आगन्तुकत्वादि"ति । अन्यत्रस्थितोऽपि निपातित्वात्, आकस्मिकोऽपि निपातिन्यतिथ्यादावागन्तुकपदप्रयोगात्, तथाचाऽऽगन्तुकाऽऽकस्मिकी सामग्री स्वोत्तरत्वेन कार्यजन्म कथं नियमयेदित्यर्थः । यद्वा प्रागभावेतर(१)यावत्कादाचित्ककारणप्रागभावाऽनाधारः कार्यप्रागभावाधारः क्षणः सामग्रीत्युच्यते, कार्यप्रागभावः कार्यानुत्पादएव, तथाच–'कार्यानुत्पादः कार्योत्पादं नियमयति'–इति पर्य्यवसितं, तच्चाऽनुपपन्नं, कार्यानुत्पादस्य कार्य्योत्पादं प्रति आगन्तुकत्वात्=उदासीनत्वात्, उदासीनो ह्यागन्तुक इत्युच्यते इत्यर्थः । तथाच समसमयत्वाऽऽगन्तुकत्वाभ्यामविशिष्टयो(२)रस्मदभिमतनियम्यनियामकयोर्न नियम्यनियामकभाव इति समुदायार्थः । अन्ये तु "आगन्तुकत्वादन्यथासिद्धत्वादिति वा, आगन्तुकत्वादक्लृप्तनियामकत्वादिति वाऽर्थः"–इत्याहुः । यद्यपि समसमययोरप्यागन्तुकयोरपि रूपरसयोर्वन्हिधूमयोरिव नियम्यनियामकभावो दृष्ट एव, तथापि कार्यस्याऽसत्त्वमेवेति हृदयम् ॥

मू० [a]तस्मात् 'अन्यदाऽस्थाया(३)एव सामग्र्यास्तदा कार्य्यजन्मनियमोऽभ्युपेयः, तथा दर्शनात्'–इत्येव वाच्यम्, तथाच समः(४)समाधिः । * [b]तथापि कार्य(५)जन्मकालस्य को विशेषः *? [c]कार्यजन्मैव । [d]अन्यथा यद्विशेषान्तरं(६)

(१) कार्य्यप्रागभावाधारः क्षणः सामग्रीत्येतावन्मात्रोक्तौ दण्डादिकारणप्रागभाववत्क्षणस्यापि घटादिसामग्रीत्वं स्यादतउक्तं यावत्कारणप्रागभावाऽनाधारइति, एवमपि यावदन्तर्गतानां देशकालादीनां प्रागभावस्यैवाऽभावात्तदनाधारः क्षणः सर्वदैवास्तीति पुनरपि स एव दोषस्तदवस्थ इत्यत उक्तं कादाचित्केति, कादाचित्कं कारणमत्रादिप्रागभावोऽपीति पुनरुक्तदोषानुद्धार इति प्रागभावेतरेत्युक्तम् ।

(२) अविशिष्टयोः=तुल्ययोः । (३) अन्यदाऽस्थायाः=पूर्वक्षणावस्थितायाः ।

(४) यथा तव भिन्नकालीना सामग्री नियामिका तथा ममापि भिन्नकालीनता मध्यक्षस्य किं न नियामकं स्यादिति समः समाधिरित्यर्थः ।

(५) "यद्यपि कारणमिव कार्य्यमप्यलग्नमेवेति तत्र समयविशेषप्रश्नो न युक्तः, तथापि प्रतिबन्दिरूपत्वेनैव साधनस्योपक्रमाद्विशेषमाह–कार्य्यजन्मेति"–इति प्रगल्भमिश्राः प्राहुः ।

(६) विशेषान्तरं=सामग्र्युत्तरत्वादि ।

तदपि विशेषान्तरवतः कालस्य स्यादित्यपर्य्यवसान-मेव पर्य्यवस्येत् । * तथापि(१)तत्कालस्यानुगतं किं रूपम् * ?,-इति चेन्न, 'रूपान्तर(२)वतोपि किं तद् ?'-इत्यस्यापि पर्य्यनुयोगस्यापत्तेः(३) ।

टी० [a]"तस्मादि"ति । सामग्र्युत्तरक्षणत्वस्य नियामकत्वे खण्डिते भिन्नकालापि त्वया सामग्र्येव नियामिका वाच्या, तथाच भिन्नकाल-सामग्र्यसत्त्वमेव किं न नियामकमिति मम: समाधिरित्यर्थः ॥ ननु क्षणा-न्तरेभ्यः कार्यजन्मक्षणस्य वैलक्षण्यमवश्यमभ्युपेयं, तच्च वैलक्षण्यं न ताव-त्सामग्र्यसत्त्वं, तस्य क्षणान्तरसाधारण्यात्, तथाच सामग्र्युत्तरक्षणत्वमेव तथा वाच्यम् क्षणान्तरव्यावृत्तत्वादिति तदेव नियामकमित्यनुशयानः पृच्छति। [b]"तथापी"ति ॥ उत्तरम्—। [c]"कार्य्ये"ति ॥ विनिगमकमाह—। [d]"अन्यथे"ति । सामग्र्युत्तरत्वेपि विशेषान्तरमनुसरणीयम्, एवं तत्रतत्रा-पीत्यनवस्थेत्यर्थः । यद्यपि कार्य्यजन्मकाले सामग्र्युत्तरत्व, तत्र च सामग्री, तस्यामपि तत्सामग्रीत्यपर्य्यवसानमेवेष्टं प्रामाणिकत्वात्, * नच कार्य-जन्मकालगता एव सर्वे विशेषा अभिमताः नच सामग्रीपरम्परायास्त-थात्व(४)मिति वाच्यम् *, सामग्रीपरम्पराया अपि परम्परया कार्यजन्मका-लस्यैव विशेषत्वात् ; अन्यथा "कार्यजन्मकालस्य कार्य्यजन्मैव विशेषः"-इति त्वदुक्तमपि न निर्वहेत, तत्रापि विशेषान्तराऽनुसरणौचित्यात्, तथापि कार्यमप्यसदित्यत्रैव हृदयम् ॥

---

(१) कार्य्यजन्मकालानामनुपसङ्ग्राहकं रूपं पृच्छति—तथापीति ।

(२) परिहरति – रूपान्तरेति । अयमाशयः – नियामकं रूपान्तरं वक्तव्यं तस्यापि रूपान्तरसापेक्षत्वेऽनवस्था, अन्ततोगत्वा कस्यापि रूपान्तराऽनपेक्षत्वे यादृच्छिक तत्स्वीकार्य्यं, तच्च जनिसम्बन्धित्वमेवेति ।

(३) { असतः कारणभावो भवतीति समर्थितं तावत् । न च सत एव तु सिद्ध्यति कारणमिति प्रदर्श्यते तदनु ॥ }

(४) तथात्वम्=निरुक्तोत्तरोत्तरसामग्र्यात्मकविशेषत्वम् ।

मू० [a]किञ्च ।

अन्तर्भावित(१)सत्त्वं चेत्कारणं तदसत् [b]ततः ।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत् ततः ॥ ४ ॥
[d]तथा हि अन्तर्भूतसत्त्वं यदि कारणत्वं तदा स्वविशिष्टे स्ववृत्तिरंशतः स्वाश्रयत्वमापादयति ।

टी० असतः कारणत्वमुपपाद्य सतः कारणत्वं खण्डयति-। [a]"किञ्च" इति । कारणे सत्ता विशेषणम् ? उपलक्षणं वा ? । यदि विशेषणं, तदा सत्तायामपि कारणत्वमित्यायातं, सत्तायां च न सत्तेत्यसदेव कारणं प्राप्तम् ॥ [b]"तत" इति । सत्ताविशिष्टे कारणत्वाऽभ्युपगमादित्यर्थः । उपलक्षणत्वे त्वसदपि कारणं प्राप्तं, सत्तायाः कारणकोटिबहिर्भावात् ॥ [c]"तत"इति । सत्ताया उपलक्षणत्वाऽभ्युपगमादित्यर्थः । यद्वा कारणमित्युभयत्र भावप्रधानो निर्देशः, तथाच सत्तायां कारणत्वं वर्त्तते ? नवा ? इति विकल्पार्थः । आद्ये सदपि कारणं, सत्तायाः सत्ताविरहेणाऽसत्त्वात् । द्वितीये सत्तया सदाकाराऽनुगतप्रत्ययोऽपि न जननीय इति तन्मात्रप्रमाणिकायाः सत्ताया विलोपे सर्वकारणमसदेवेति प्राप्तम् । यद्वा कारणं=कारणत्वम्, अन्तर्भावितसत्त्वं=व्यापकीभूतसत्त्वं ? न वा ? तथाच कारणत्वं सत्ताव्याप्यं ? न वा ? इति विकल्पार्थः । आद्ये सत्तायां सत्तानिवृत्त्या कारणत्वमपि निवर्तते, इति अनुगतप्रत्ययजनकत्वाभावात् प्रमाणाऽभावेन सत्ताविलोपे सर्वकारणमसदेव प्राप्तम् । अन्त्ये सत्तामपहायापि कारणत्वं वर्तते इति त्वयैवासत्कारणमभ्युपेतमित्यर्थः ॥ वार्त्तिकार्थं प्रपञ्चयति-। [d]"तथाही"ति ॥

---

(१) अन्तर्भाविता = अन्तः प्रवेशिता (विशेषणीभूता इतियावत्) सत्ता यस्मिंस्तदन्तर्भावितसत्त्वं, तच्चेत्कारणं, तदा सत्ताविशिष्टे सत्ताऽसमवायात्कारणमसदेव स्यात्, सत्तासमवायात्सद्व्यवहारोपपत्तिरित्यर्थः । अन्तर्भावितसत्त्वः कारणं न, किन्तूपलक्षितमिति चेत् (कश्चित्तत्राऽनुपपत्तिमाशङ्कते) ततोऽपि कारणकोटौ सत्ताऽप्रवेशात्कारणमसदेवेति श्लोकार्थः ।

मू० ^a^"विशिष्टस्यार्थान्तरत्वे(१)पि च स्वस्मिन्स्ववृत्तिव्यतिरेकवत्स्वविशिष्टे स्ववृत्तिव्यतिरेकनियमदर्शनात् न सैव सत्ता तस्मिन्निति ^b^अन्यस्या विशिष्टवृत्त्यभ्युपगमे तामनिवेश्य कारणत्वमभ्युपगन्तुः सर्वथैवासत्कारणं पर्यवस्यति, ^c^अपराऽपरसत्तानिवेशने चाऽपर्यवसानमेव ।

टी० ननु सत्ताविशिष्टे दण्डादौ कारणे सत्ता वर्तते चेत्कथमात्माश्रयः(२)इत्यत आह—। ^a^"'विशिष्टस्ये"ति। स्वस्मिन्स्वं वर्तते इति यथा विरुद्धं, तथा स्वविशिष्टे स्वं वर्तते इत्यपि विरुद्धमेव, विरोधप्रयोजकस्याऽदर्शनस्योभयत्राऽविशेषादित्यर्थः ॥ ननु स्वविशिष्टे स्वं मावर्तिष्ट, स्वभिन्नया द्वितीयया सत्तया प्रथमसत्ताविशिष्टानां सत्त्वं, सत्त्वाच्च कारणत्वमुपपत्स्यते? इत्यत आह—। ^b^"अन्यस्या" इति । प्रथमसत्तायाः अकिञ्चित्करत्वेपि तत्तुल्यतया द्वितीयसत्तामप्यनिवेश्यैव त्वया कारणत्वं वाच्यम्(३)तथाच न प्रथमया न वा द्वितीयया सत्तया सतां कारणत्वमिति सर्वथैवासत्कारणमिति भावः ॥ ननु स्वविशिष्टे स्ववृत्तावात्माश्रयः, अन्योन्यविशिष्टेऽन्योन्यवृत्तावन्योन्याश्रयः, इति पूर्वपूर्वसत्ताविशिष्टापरापरसत्तया सत्त्वात्कारणं च स्यादिति कथमसत्कारणमित्यत आह—। ^c^"अपरापरे"ति । उत्तरोत्तरसत्तास्वप्यन्तर्भावितसत्त्वं चेदित्यादिविकल्पकदर्थनया क्वापि पर्यवसानं न स्यादित्यर्थः ॥

मू० *'नच सत्ताभेदानन्त्यमस्त्येवेत्यपि पादप्रसारिका निस्ताराय*। सत्ताभेदे हि सद्बुद्धिव्यवहाराऽनुगमसमर्थनलङ्घिनः प्रथमापि सत्ता नस्याद् इति वृद्धिमिच्छतो मूलमपि ते नष्टमिति हा ! कष्टतरम् । * ^a^"नच स्वरूपस-

---

(१) विशेषणविशेष्यतत्सम्बन्धेभ्योऽतिरिक्तत्वपक्षेऽपीत्यर्थः ।

(२) अत्र 'विशिष्टस्य विशेषणीभूतसत्तादितोऽतिरिक्तत्वस्य मयाऽभ्युपगन्तव्यत्वात्'--इति हेतुः पूरणीयः ।

(३) अत्रतत्प्रकारस्तु--'स्वभिन्नया तृतीयसत्तया द्वितीयसत्ताविशिष्टानां सत्त्वं सत्त्वाच्च कारणत्वमुपपत्स्यते'--इति ।

सोपगवाय स्वस्ति *। भिन्नानप्यनुगत(१)बुद्ध्याधान-पदेऽभिषिञ्चता त्वया हि जातिमात्राय जलाञ्जलि-र्वितीर्य्येत। ""माभूदनुगतिः स्वरूपसत्त्वस्य"-इति च वदन् तद्धर्मिणीं कारणतां कथमनुगमयितासीति।

टी० ननु बीजाङ्कुरपरम्परावत्सत्तापरम्पराऽस्तु को दोषः? इत्यत आह—। ""नचे"ति। यथा तावत्यः सत्ताः सत्तामन्तरेणैव सत्यस्तथा दण्डादयोऽपि सत्तामन्तरेणैव सन्तः सन्तु किमाद्ययापि सत्तया। * न च तावतीषु सत्तास्वेका काचित्सत्ता वर्त्तते यया तासामनुगमः, तस्याः पुनरेकस्याः(२) किमनुगमकेन सत्तान्तरेणेति वाच्यम् *। तर्हि सती(३)न स्यात्, तदसत्त्वे च तासामसत्त्वात् तदाऽऽश्रयपर्यन्तमसत्त्वमित्यसदेव कार्यं पर्यवसन्नमिति भावः। यद्यपि स्वविशिष्टे स्वं वर्त्तते एव विरोधाभावात् *नचादर्शनं* सर्वत्र तथैव दृष्टत्वात्। नहि स्वाऽविशिष्टे क्वचित्स्ववृत्तिर्दृष्टा। यदि च स्वविशिष्टे स्वं न वर्त्तेत, तदा स्वविशिष्टमेव न स्यात्स्ववृत्त्यैव हि तत्स्वविशिष्टम्, अन्यथा दण्डिनि दण्डवत्कुण्डलिनि कुण्डलवत् कुण्डलिनि दण्डोऽपि स्यात्। *एवं तर्हि दण्डेऽपि दण्डः स्यात्*?। न, आपादकाभावात्। *विशिष्टवृत्तित्वमेवापादकम्*?, इति चेन्न, यद्विशिष्टवृत्ति तद्विशेषणवृत्तीति नियमाभावात्, व्यभिचारस्य(४)दर्शितत्वात्। *तत्र(५)दण्डकुण्डलयोर्न

---

(१) अनुगतबुद्ध्यादिराधीयते अनेनेत्यनुगतबुद्ध्याद्याधानं, तत्पदे - तत्स्थाने इत्यर्थः।

(२) 'एकस्याः'-इति सावधारणं हेतुगर्भं विशेषणम्, एकत्वादेवेत्यर्थः।

(३) यदि सर्वसत्तास्वनुगतैकसत्तायां सत्तान्तरं न स्यात्तर्हि सा सत्यव न स्यादिति तदसत्त्वे तदाधारभूतानां प्रथमसत्तानामप्यसत्त्वं तदसत्त्वे च तदाश्रयाणां दण्डादीनां कारणानामप्यसत्त्वमित्यर्थः। न च सर्वसत्तास्वनुगतैकसत्ता स्वात्मकसत्तयैव सती। तथा सति प्रथमास्वेव तत्स्वीकरणीयतया तत्त्यागे मानाऽभावात्।

(४) सर्वत्र स्वविशिष्टे एव विशेषणं वर्त्तते, न चैतावता स्ववृत्तित्वं तस्येति (यद्यपीत्यत आरभ्य स्यादित्यन्तं) व्यभिचारस्य दर्शितत्वादित्यर्थः।

(५) ननु विशेषणं सर्वत्र स्वाऽविशिष्टे एव वर्त्तते, नचैवं सति कुण्डलिनि दण्डोऽपि स्यादिति वाच्यम्, दण्डादीनामुपलक्षणत्वेन विशेषणत्वानङ्गीकारादित्यत आह—तत्रेति।

विशेषणत्वं, किन्तूपलक्षणत्वम्*? -इति चेत्तर्हि सत्ताप्युपलक्षणमस्तु, यथा चोपलक्षणेनापि दण्डेन पुरुषो दण्डी, तथा सत्तयापि भाट्टमते कारणं सदस्तु । वस्तुतो विशेषणत्वेऽपि न दोषः, नहि विशेष्यगतधर्मत्वं विशेषणत्वं किन्तु स्वकालनियत(१)व्यावृत्तिबोधजनकत्वं, प्रत्याय्य(२)व्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यवच्छेदकत्वं वा, तच्च(३)विशेष्यवृत्तिधर्मविरहेऽपि समानम् । यत्र(४)संयोगलक्षणा वृत्तिर्दण्डादौ तत्र कथञ्चिद्विरोधोपसंहारेऽपि समवायलक्षणवृत्तौ स्वविशिष्ट एव स्ववृत्तिरभ्युपगन्तव्या, तत्र स्वाऽविशिष्टदशाया अभावात्, गोत्वाऽविशिष्टे महिषादौ गोत्ववृत्तिप्रसङ्गात् । तथा च तत्रावश्यं स्वविशिष्टे स्ववृत्तिरङ्गीकर्तव्या । *तत्र केवले वृत्तिः*? -इति चेन्न(५); केवलस्यापि स्वविशिष्टत्वात् । नहि तत्र स्वं न विशेषणम् । *ननु (६)सत्तायाः सत्ताविरहात् कथं साऽनुगतप्रतीतिकारणम्*? -इति चेत्, सत्तैव केवलमसती कारणमिति न, किन्तु घटाभावादिरप्यसन्नेव कारणम् । *तर्हि सत्कारणं नत्वसदिति कोऽयं तव सिद्धान्तः*? -इति चेत्, सोपाख्यं कारणं, न तु निरुपाख्यमलीकमित्यवेहि । *तर्हि सत्तास्थाने उपाख्यामावेश्य उपाख्या-

---

(१) औदासीन्येन व्यावृत्तिबोधजनकत्वमुपलक्षणस्याप्यस्त्यतः स्वकालनियतत्वेन बोधो विशेषितः ।

(२) पूर्वोक्तविशेषणलक्षणस्योपाधावतिव्याप्तिमभिप्रेत्य लक्षणान्तरमाह प्रत्याय्येति । प्रत्याय्या = ज्ञाप्या या व्यावृत्तिस्तदधिकरणता दण्डादेस्तदवच्छेदकत्वं दण्डादेरेव विशेषणस्य, नतूपाधेरुपलक्षणस्य वेति नातिव्याप्तिः ।

(३) तदेतल्लक्षणं विशेषणे विशेष्यगतधर्मस्याभावेऽपि सति समनुगतमित्याह-तच्चेति ।

(४) ननु "नहि स्वाऽविशिष्टे क्वचित्स्ववृत्तिर्दृष्टा"-इत्यस्य त्वदुक्तवचसोऽव्याप्यवृत्तित्वेनाऽभिमतसंयोगादौ व्यभिचाराद्विरोधस्तदवस्थ इत्यत आह-यत्रेति । संयोगेति । संयोगेन लक्ष्यते = ज्ञायते या सा संयोगलक्षणा, संयोगाऽवच्छिन्ना वृत्तिरिति यावत् । यद्वा वृत्तिवृत्तिमतोऽवच्छेदकयोः समनियतत्वेनाऽभेदोपचारात् संयोगलक्षणा वृत्तिरित्युक्तम् । एवं "समवायलक्षणवृत्तौ"-इत्यत्रापि ज्ञेयम् ।

(५) 'केवले वृत्तिः'-इत्यत्र केवलशब्देन किं सर्वथा गोत्वादिविशेषणाऽसंसृष्टं ग्राह्यं ?, वा तत्संसृष्टम् ? । आद्ये महिषादावपि गोत्ववृत्तिः स्यादित्येतद्दोषनिधायाह-नेति, द्वितीये तु पूर्वोक्तमेव स्मारयति-केवलस्यापीति ।

(६) नन्वेवं स्वविशिष्टे स्ववृत्तित्वमुपपाद्य त्वया दण्डादीनां कारणत्वं व्यवस्थापि, सत्तायां तु सत्ताविशिष्टत्वस्याप्यभावात् कथं कारणत्वं स्यादिति काऽदनिका माऽदनिकं शङ्कते-नन्विति ।

विशिष्टं निरुपाख्यमेवेति पूर्ववदावर्तनीयम्[1]-इति चेन्न, आवर्तने क्रियमाण एव व्याघातात् । नह्युपाख्याविशिष्टं निरुपाख्यं वक्तुमपि शक्यते, उपाख्याविशिष्टत्वेनैवोपाख्यातत्वात्, तदेवोपाख्या हि नाम, यथाऽभिधाना[2]नभिधानयोर्जितं नैयायिकैरिति, तथापि[3] दण्डादौ सत्तापि कारणकोटौ न प्रविशतीति हृदयम् ॥ ननु च सत्ताविरहि[4] यद्यपि सत्ता स्वरूपसत्त्येव दण्डादिरपि सत्ताबहिर्भावेण कारणमस्तु स्वरूपसत्तायाः स्वरूपमात्रनिबन्धनत्वात्, प्राभाकरादिभिस्तथैवाङ्गीकाराच्चेत्यत आह-। [b] "नचे"ति । स्वरूपसत्त्वस्य प्रतिस्वं विश्रान्तत्वेनाऽननुगतत्वात् अनुगतसद्व्यवहारविलोपप्रसङ्गात्, अननुगतेनैव चाऽनुगतधीजनने गोत्वादिकमपि नस्यादित्यर्थः ॥ नन्वनुगमाभावेपि स्वरूपसत्तया सत्कारणमिति तावदायातं, तदेव च मया साधयितुमुपक्रान्तमित्यत आह-। [c] माभूदिति । कारणताया अनुगमः त्वदभ्युपगतो न स्यात् स्वरूपसत्तायास्तदनुगमकत्वेनाभ्युपेताया अननुगतत्वात, सत्ताजातेश्च खण्डितत्वादित्यर्थः ॥

मू० "किञ्च, स्वरूपसत्त्वं स्वरूपात् घटाद्यात्मनो नाधिकमसतोपि स्वरूपं स्वरूपमेव, नह्यसन् घटादिर्न घटादिः, तथा सति[5] घटादिर्न'-इत्यपि न स्यात्, असतोऽघटा-

(१) पूर्ववत् "अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः"-इति कारिकोक्तप्रकारेणैव-'अन्तर्भावितोपाख्यं चेत्कारणं तदसत्ततः, नान्तर्भावितोपाख्यं चेत्कारणं तदसत्ततः' इत्यावर्तनीयमित्यर्थः ।

(२) अभिधाने निरुपाख्यत्वव्याघातः, अनभिधाने नैयायिकाऽभिमतसोपाख्यकारणत्वसिद्धिरिति विवेकः ।

(३) 'तथापि'-इत्यस्य 'यद्यपि स्वविशिष्टं स्वं वर्तते एव' इति दूरव्यवहितेन यद्यपि शब्देनाऽन्वयः ।

(४) जात्यात्मकसत्ताविरहिणीत्यर्थः ।

(५) तथा सतीति । यथा 'घटः सन्'-इत्यत्र घटसत्त्वयोः सामानाधिकरण्योपलम्भाद्घटः सत्त्वाश्रयते, तथा 'घटोऽसन्'-इति सामानाधिकरण्योपलम्भादसन् घटोऽपि स्वीकार्य्य., अन्यथा 'घटोऽसन्'-इति सामानाधिकरण्यमेव न स्यादिति प्रगल्भादिसंमतोऽर्थः । विद्यासागरास्तु "अप्रसिद्धप्रतियोगिकनिषेधायोगादसतः प्रतिषेधप्रतियोगित्वेनाऽसन् घटादिरेष्टव्यः"-इत्याहुः । तत्र मन्ये प्रगल्भोक्तोऽर्थे सूत्रस्याऽपिशब्दस्यैवकारार्थकत्वकल्पनाप्रयुक्तगौरवाद्विद्यासागरोक्तमेवरम्यमिति ।

दित्वात् । [b]अथ सदपि सत्तामनन्तर्भाव्य कारणं, तदानीमसदपि तत्तथास्तु, सत्त्वासत्त्वयोः कारणकोट्यप्रवेशाऽविशेषात् । [c]अथ*न सत्ता कारणकोटिनिविष्टा, किन्तु कारणत्वं सत्त्वं, नियतपूर्वसत्तां हि कारणतां मन्ये*?–इति मन्यसे, [d]तर्हि मत्पक्षेपि सैव कारणतास्तु।*[e]तर्हि कारणस्य सत्तामभ्युपगतवानसीति घट्टकुट्यां(१)प्रभातम् *?–इति चेन्न, भावाऽनवबोधात्,

टी॰ घटस्य च निरूप्यमाणं घटस्वरूपसत्त्वं घट एव पर्यवस्यति, तथाच घटः=कारणमित्याऽऽयातम्, असन्नपि घटो घट एव,–इति मत्पक्षात् त्वत्पक्षे न कश्चिद्विशेष इत्याह–। [a]"किञ्च" इति । यद्यपि च स्वरूपं सदिति पारमार्थिक(२)मभिमतम्, अयमेव च त्वत्पक्षाद्विशेषः, त्वया दण्डादीनामपारमार्थिकत्वाङ्गीकारात्, तथापि पारमार्थिकत्वखण्डने हृदयम ॥ श्लोकार्द्धद्वितीयार्द्धं व्याचष्टे–। [b]"अथे"ति । सत्ताया इवाऽसत्ताया अपि कारणकोट्यप्रवेशादसत्कारणवादित्वादुभयमपि नोपालभ्याः, यतो दण्डादिः कारणमित्यावयोः समानोऽभ्युपगमः, सच सचसत्त्वेति क्रमेण विचारणीयमित्यर्थः ॥ ननु सत्ताघटितं कारणत्वं न ब्रूमः, किन्तर्हि? सत्तैव कारणत्वमिति, तथाच कारणत्वमभ्युपगच्छता त्वया सत्ताप्यङ्गीकर्त्तव्येति शङ्कते–। [c]"अथ ने"ति ॥ ममापि नियतपूर्वसत्त्वमेव कारणत्वमिति परिहरति–। [d]"तर्ही"ति ॥ ननु कारणत्वं कारणानां धर्मः, स चेत्सत्ता, तदा सन्त एव दण्डादयः कारणानि, नाऽसन्तः, इति पर्यवसितं विवादेनेत्यत(३) आह–। [e]"तर्ही"ति ॥

---

(१) शौल्किकभयाद्विशायां मार्गान्तरेण गच्छतः उपितनिशस्य घट्टकुट्यां=शुल्कशालायां, यथा प्रभातं कस्यचिद्वञ्चकस्य तथा तव सत्त्वापत्तिभयाद्भावान्तरेण वञ्चयतोपि सद्वाद आपन्न इत्यर्थः । विद्या० ।

(२) पारमार्थिकमित्यत्र 'स्वरूपम्'–इति शेषः ।

(३) इति पूर्वपक्षिणः शङ्कामनूद्य 'भावानवबोधात्' इत्यन्तं सिद्धान्त्याहेत्यर्थः वस्तुतस्तु अत्र 'इत्याह'–इत्येव पाठ उचितः, पूर्वपक्षस्यैव प्रथममुपस्थितत्वात्, अतो न क्लिष्टकल्पनं दोषः, पाठान्तरं तु लेखकप्रमादात् ।

मू० [a]सत्तामसतीमभ्युपगच्छतापि सत्ता मयाऽभ्युपगतैव, अन्यथा कासावसतीति(१)। [b]त्वमपि किं सत्तां तत्सत्तामन्तर्भाव्य कारणत्वमिच्छसि? नत्वेवं(२), पूर्ववत्कापिसत्तात्यागो वा अनवस्थायां वा पर्य्यवसानं स्यात्। [c]* असत्त्वाविशेषात् कारणनियमः कथं स्यात्*?–इति चेन्न, [d]सत्त्वाविशेषेपि तुल्यत्वात्। [e]* सत्त्वेऽस्त्यन्वयव्यतिरेकानुविधानं, तस्य, तज्जातीयस्य वा, त्वत्पक्षे त्वसत्त्वाऽविशेषाद्व्यतिरेकः, परं सोप्यनियतः, यदा कारणाऽभावस्तदा कार्य्याभावावश्यम्भावानभ्युपगमात्, नित्याऽसतः कारणस्याऽसत्त्वे एव कदाचित्कार्य्यो(३)त्पादात्, अन्वयस्तु न क्वचिदपि*?–इति चेत् [f] न, तुल्यत्वात्।

टी० भावमाविष्करोति–। [a]"सत्तामि"ति। न वयमसतीमपि सत्तां नाभ्युपेमः, किन्तर्हि? सती(४)म्, अन्यथा किमुद्दिश्याऽसत्त्वमपि मया विधेयमित्यर्थः॥ त्वयापि या सत्ता कारणत्वेनाभ्युपेयते सा स्वान्तर्भाविण्येव कारणत्वं वाच्यम्, स्वविशिष्टा च सा त्वन्मतेऽप्यसत्येव, यदि च(५)स्वात्मानं तटस्थीकृत्य सा सत्ता कारणत्वं तदा तया सत्तया तटस्थया कार-

(१) केषुचित्पुस्तकेषु 'इति'–शब्दो न दृश्यते।

(२) विद्यासागरोक्तव्याख्यानानुरोधेन नत्वेवमित्येतत्स्थाने 'नन्वेवम्'–इति पाठः, यतस्ते व्याचख्युः "अङ्गीकरोति सत्तादौ नन्विति'–इति। प्रकृतशाङ्करव्याख्यानुरोधेन तु नत्वेवमित्यंशोऽयमपन्ययोजनासौकर्य्यार्थं 'तथा सति'–इति शेषः पूरणीयः

(३) यद्यपि कार्य्योत्पादकालेपि कार्य्यस्य परमार्थतोऽसत्त्वमेवेति व्यतिरेकोऽबाधितस्तथाप्यभिप्रायमविदुषः शङ्का ज्ञातव्या।

(४) 'किं तर्हि? सतीम्'–इत्यत्रापि 'नाभ्युपेमः'–इति सम्बन्धनीयम्।

(५) तटस्थीभूतसत्ताया अपि सद्व्यवहारप्रयोजकत्वमङ्गीकृत्याह–यदिचेति॥ "सत्तैव तु नसती"ति, कारणत्वात्मिका सत्तैव तु न तटस्थीभूतसत्तान्तरवतीत्यर्थः। कारणता सती निर्वहेदित्यत्र केचित 'कारणता असती निर्वहेद'ति पदं छिन्दन्ति। तत्र"मया स्वस्य तटस्थीकरणे कारणत्वं सत्त्वं निर्वहेत्'–इत्यव्यवहितोत्तरग्रन्थेन विरोधापातादिति।

याता सती निर्वहेत्, सत्तैव तु न सती, तस्याः सत्तान्तराभावात्, भावे वा पुनरपर्य्यवसानं स्यात्, नवा स्वस्य तटस्थीकरणे कारणत्वं सत्त्वमिति निर्वहेदित्याह—। [b] "स्वमपी"ति ॥ ननु यद्यसत्कारणं तदेदं कारणमिदमकारणमिति किंकृतो नियमः? इत्याह—। [c] "असत्त्वे"ति ॥ त्वन्मतेऽपि कारणाऽकारणविभागोऽनुपपन्नः, सत्त्वाऽविशेषादित्याह—। [d] "सत्त्वे"ति ॥ ननु सतः कारणत्वे दण्डजातीये सति घटः, व्यतिरेके च तस्य घटजातीयस्य व्यतिरेकः,—इत्यन्वयव्यतिरेकौ कारणताग्राहकौ सम्भवतः, नासतः कारणत्वे ताविति शङ्कते—।"सत्त्वे" इति ॥ यथा सतोऽन्वयव्यतिरेकौ-तथैवासतोऽपि, परन्तु निरूप्यमाणौ ता(१)वप्यसन्तौ पर्य्यवस्यतः,—इत्यन्यदेतदित्याह—। [f] "न तुल्यत्वादि"ति ॥

मू० [a] अन्वयो नास्तीत्यभ्युपगच्छताप्यन्वयोपगमात् । [b] अन्वयस्यापि(२)सत्तान्तर्भावने कथितदोषापत्तेः । [c] एतेन "आशामोदकतृप्ता ये, ये चोपार्जितमोदकाः । रसवीर्य्यविपाकादि, तुल्यं तेषां प्रसज्यते"—इत्यस्यापि बाधकत्वमाशामोदकायते, [d] सत्तान्तर्भावाऽनन्तर्भावाभ्यां प्रत्यादेशात्, [e] आशामोदकादिनापि च रसवीर्य्यविपाकादिजननात् । * तदसत्कथं कार्य्यं स्यात् *?—इति चेन्न, [f] सत्तामन्तर्भाव्य कार्य्यत्वोपगमे कारणवत्कार्य्येऽपि उक्तदोषस्य, अनन्तर्भावे वाऽविशेषस्य, पूर्ववदावृत्तेः ।

टी० किञ्च । 'असतोऽन्वयो नास्ति'—इति वदता त्वयाऽन्वयो निषेध्यत्वेनाप्यभ्युपगम्यते एवेत्याह—। [a] "अन्वय"इति ॥ ननु तथापि सदन्वयो नास्ति, स च प्रयोजकः? इत्यत आह—। [b] "अन्वयस्यापी"ति। अन्तर्भावितसतश्चेदन्वयो न स संस्तुतः । नान्तर्भावितसतश्चेदन्वयो न स संस्तुतः"—इति दोषापत्तेरित्यर्थः ॥ ननु यद्यसत्कारणं तदा भोजनेऽभोजने

(१) तावपि = सतोऽप्यन्वयव्यतिरेकावित्यर्थ. ।
(२) अन्वयस्यापि कुतो सत्तापेक्षणे इत्यर्थः ।

च रसवीर्य्यादितौल्यं स्यादित्यत आह–। [c]"एतेने"ति। आशा=प्रत्याशा, मनोरथ इति यावत्। उपार्जनं=भक्षणम्। रसः=आद्यो धातुः। वीर्य्यं=बलं, चरमधातुः। विपाकः=परिणामः लौहित्यमिति यावत्। 'रसो(१) मधुरादि, रित्यादि व्याख्यानमयुक्तं, तस्य भोजनाऽजन्यत्वात्। आदिपदादिन्द्रियपाटवादिग्रहणम्॥ एतेनेत्यस्याऽतिदेश्यमाह। [d]"सत्ते"-ति। सतः कारणत्वमभिप्रेत्य बाधोयं भवताभिधीयते, तच्चा(२)न्तर्भावित-सत्त्वं चेदित्यादिना पूर्वमेव निरस्तमित्यर्थः॥ भोजनाऽभोजनयोस्तुल्यत्वापादनमिष्टापत्त्या निरस्यति–। [e]"आशामोदके"ति। भोजनेप्यसन् रसादिरभोजनेपि तथेति तौल्यमेवेत्यर्थः॥ [f]"सत्तामि"ति। अन्तर्भावित-सत्त्वं चेत्कार्य्यं स्यात्तदसत्ततः। नान्तर्भावितसत्त्वं चेत्कार्य्यं स्यात्तदसत्ततः"–इति दोषापत्तेरित्यर्थः। दृष्टं च गुञ्जापुञ्जस्थले असता हुताशनेनाऽसतः शीतापनोदस्योत्पत्तिर्वानराणाम्, असत्यैव च मत्तकाशिन्या(३)सम्भोगसुखमसदेव स्वप्ने सुप्तानामिति भावः। यद्वा, ननु प्रागसतः सत्त्वं कार्यत्वम्, इति कार्य्यसत्तावश्यमङ्गीकार्य्येत्यत आह–। "सत्तामि"ति। यथा नियतपूर्वसत्त्वं कारणत्वमित्यत्राऽसती सत्ताऽभ्युपगता, तथा कार्य्यसत्तामप्यसतीमङ्गीकृत्यैतन्मया समाधेयमित्यर्थः॥

मू० [a]तस्मात्

पूर्वसम्बन्धनियमे हेतुत्वे तुल्यएव नौ (४)।
हेतुतत्त्वबहिर्भूतसत्त्वाऽसत्त्वकथा वृथा॥ ५॥

* [b]आस्तां प्रतिबन्दिग्रहाऽऽग्रहः (५), कथं पुनरसतः

---

(१) विद्यासागराद्युक्तं व्याख्यानमाक्षिपति–रसोमधुरादिरिति।

(२) तच्च = सतः कारणत्वं च।

(३) मत्तकाशिनी = उत्तमस्त्री, "वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी"–इति कोशात्।

(४) नौ = आवयोः सदसद्वादिनोः, हेतुत्वे कार्य्याऽव्यवहितपूर्वक्षणसम्बन्धनियमे तुल्ये सति 'सतः कारणत्वं, नाऽसतः'-इति हेतुत्वाऽनुपयोगिनी सत्त्वाऽसत्त्वचिन्ता वृथेत्यर्थः।

(५) प्रतिबन्दिग्रहे = प्रतिबन्दिग्रहणे, भवतां य आग्रहः स आस्तामित्यर्थः। क्वचित्तु 'प्रतिबन्दिग्रहग्रहः' इति पाठस्तत्राप्ययमेवार्थः।

कारणत्वमवसेयम् प्राक्सत्त्वनियमस्य विशेषस्यानभ्युपगमात्, असत्त्वस्य चाऽविशेषात् *?–इति चेन्न "इदमस्मान्नियतप्राक्सदि"ति बुद्ध्या विशेषात् ।[c] * भ्रान्तै(१)वंबुद्धिगोचरेऽतिप्रसङ्गः * ?–इति चेन्न,

टी० न सत्कारणं, नाप्यसत्कारणं, किन्तु नियतपूर्ववर्त्ति कारणं, तच्च यथा सत्, तथा असदपि, इति सदेव कारणमिति त्वत्कथावत् असदेव कारणमिति मत्कथाप्याऽऽपाततो वृथा, विचारस्तु करिष्यते इत्युपसंहरति–[a]"तस्मादि"ति ॥ ननु, असत्त्वाविशेषात्कारणानियमः कथं स्यात्?,–इति मदुक्ते 'सत्त्वाविशेषेपि तुल्यत्वात्'–इति तु त्वया प्रतिबन्दिः कृता, प्रतिबन्दिश्च न दूषणम्, इत्यसतः कारणत्व प्रमापकाभावादनुपपन्नमेवेति शङ्कते–। [b] "आस्तामि"ति । यद्वा "पूर्वसम्बन्धनियमे हेतुत्वे तुल्यएव नौ"–इति साम्यमात्रं त्वयोक्तम्, तच्चानुपपन्नं, सत्त्वासत्त्वपक्षे ग्राहक(२)सत्त्वाऽसत्त्वाभ्यां विशेषादिति शङ्कते–। "आस्तामि"ति । प्राचि काले सत्त्वं कारणत्वं ग्राह्यं, तदस्मन्मतेऽस्ति, त्वन्मते तु सर्वदैवासत्त्वम्, इति प्राचि काले सत्त्वं ग्राह्यं नास्त्येव किं गृह्णीतेत्यर्थः ॥ ग्राह्यानुपपत्त्या ग्राहकाऽनुपपत्तिर्न भवत्यसत्यपि दण्डादौ घटप्राक्सत्त्वबुद्धिसम्भवात्, शुक्तौ रजतत्वबुद्धिवत्, सा बुद्धिर्दण्डचक्रादावेव न तु रासभादावपि, येन तत्रापि घटकारणत्वं व्यवह्रियेतेति परिहरति–। [c] "ने"ति ॥ रासभादावपि कदाचिदेवंबुद्धिसम्भवाच्च हि भ्रान्तिहेतवोपि केनचिन्नियम्यन्ते इति तस्यापि घटकारणत्वतद्व्यवहारयोः प्रसङ्ग इत्याह–। [d] "भ्रान्तैवमि"ति ॥

मू० "यादृश्या हि धिया त्रिचतुरकक्षाबाधाऽनवबोधविश्रान्तया वस्तुसत्त्वनिश्चयस्ते, तादृश्यैव विषयीकृतस्य

(१) भ्रान्तस्य 'रासभः' घटनियतपूर्ववृत्तिः'–इत्येवंभूतबुद्धिगोचरे रासभादौ कारणत्वप्रसङ्ग इत्यर्थः ।

(२) ग्राहकौ=कारणताग्राहकान्वयव्यतिरेकौ, सत्त्वाऽसत्त्वाभ्यामित्यर्थः, सत्त्वपक्षे ग्राहकयोरन्वयव्यतिरेकयोः सत्त्व, नाऽसत्त्वपक्षे इति विभागः ।

तत्रापि कारणतानिश्चयः (१), [b] केवलं ततः परास्वपि कक्षासु बाधात्पूर्वं भ्रान्तिसम्भवेन न तावता सत्त्वावधारणं वयं मन्यामहे—इति विशेषः, [c] परदर्शनसिद्धान्तस्य भूरिकक्षाधारविनोऽपि ततः परकक्षाबाध्यमानत्वेनाऽतथाभावोपगमात् । [d] अन्यथैकदर्शनपरिशेषः स्यात् ।

टी० कारणाकारणयोरेवं बुद्धिसम्भवेऽपि कारणे झटिति बाधानवतारोऽकारणे तु झटित्येव बाधावतारः, इत्यवतीर्णबाधाऽनवतीर्णबाधबुद्धिकृतो विशेष इत्याह—। [a] "यादृश्ये"ति ॥ ननु यद्यनवतीर्णबाधया धिया प्राक्सत्त्वं विषयीकृतं, तदा तत्पारमार्थिकमभ्युपगन्तव्यं त्वयैवेत्यत आह—। [b] 'केवलमि"ति । आपाततोऽबाधविशेषमात्रमाचक्ष्महे, पर्यन्तत(२)स्तत्रापि बाधाऽवतार एवेति न वस्तुतत्त्वव्यवस्थितिरिति भावः । यद्वापि क्रमेणापि बाधितया धियाऽबाधितया वा बाधः ? । आद्ये न (३) क्षतिः, अन्त्ये तदबाधो वस्तुतत्त्वाधीन एव त्वया वाच्य इति सिद्धं वस्तुतत्त्वम् । * न च तत्रा(४)प्यबाधितबुद्धिविषयत्वमेव शरणं *, तत्राप्येतद्विकल्पाऽवतारात् । किञ्चाऽन्यथात्वबोधनं बाधः ? अन्यथात्वप्रमापणं वा ? । आद्ये बाध्यापि(५) बुद्धिर्बाधिका स्यात्, अन्त्ये तत एव वस्तुव्यवस्थितिः, तथापि सर्वोऽयं विशेषो बुद्धिकृतो न वस्तुकृत इति भावः ॥ नन्वापाततश्चेदबाधस्तदा तावतात्र क्रमिकबाधाऽभावोऽप्यूह्यते(६) इत्यत आह—। [c] "परदर्शने"ति ।

(१) 'असति दण्डादौ' इति शेषः ।

(२) पर्यन्ततः=अन्ततो गत्वा, तत्त्वज्ञाने सतीति यावत् । तत्रापि=आपाततोऽबाधितबुद्धिविषयेऽपि । बाधावतार इत्यत्र क्रमेणेति शेषः ।

(३) न क्षतिः, बाधिकाया धियो बाधे प्रपञ्चस्याबाध्यत्वस्यैव विश्रामात् ।

(४) तत्रापि=अबाधितबुद्धावपि, द्वित्रिचतुरकक्षास्वबाधितबुद्धिगोचरत्वलक्षणमेवाऽबाधितत्वं, पर्यन्ततस्तत्रापि बाध एवेत्यर्थः ।

(५) बाध्यापि 'इदं रजतम्'—इत्याकारिका बुद्धिः शुक्तिज्ञानस्य बाधिका स्यात् अन्यथात्वबोधनस्य तत्र सत्त्वादित्यर्थः ।

(६) ऊह्यते=अनुमास्यते, तथाहि—कक्षान्तरबुद्धिविषया घटादयोऽबाध्याः, विषयत्वात्, द्वित्रिचतुरकक्षाऽबाधितबुद्धिविषयघटादिवदिति ।

शब्दनित्यत्वे मीमांसकाभिमते नैयायिकस्य त्रिचतुरकक्षाबाधाऽनवतारेपि क्रमबाध्यत्वस्वीकार इत्यर्थः, तथाच-यथा कतिपयकक्षायां बाधविरहाऽधीनोऽभ्युपगमोऽभ्युपगम्यमानो बाधेः सिद्धान्त(१)स्तथा कारणत्वाऽकारणत्वव्यवस्थितिरपि तावतैव (२), नतु सर्वप्रकाराऽबाध्यतयेति भावः ॥ ननु तथैव (३)किं नस्यादित्यत आह-। d "अन्यथे"ति । सर्वप्रकाराऽबाध्यत्वनिबन्धनत्वेत्सिद्धान्तस्तदैक एव सिद्धान्तो भवेत् सर्वेषां दर्शनानामिति सिद्धान्तभेदकृतो दर्शनभेदोपि न स्यादित्यर्थः । यद्वा त्रिचतुरकक्षाबाधवैधुर्यमात्राद्यदि पारमार्थिकत्वं मनुषे, तदा सर्वदर्शनसिद्धान्ताः पारमार्थिक एवेति पारमार्थिकत्वाऽपारमार्थिकत्ववैमत्यनिबन्धनो दर्शनभेदो न भवेदित्यर्थः । *ननु सर्वबाध्यत्वेपि दर्शनभेदोऽनुपपन्न एव*? मैवम्, मद्दर्शनस्याऽबाध्यत्वात्. तथाच-वक्ष्यामः (४) "तत्त्वप्रकाशपरमार्थचिदेव भूत्वे"तीति भावः ॥

मू० a एतेन 'असत्त्वाविशेषेपि कथं कस्यचित्पक्षस्य त्रिचतुरकक्षाधावित्वाऽधावित्वमास्ताम्'-इत्यपि निरस्तम् । b*अनेवंबुद्धिविषयतादशायां को विशेषः*?-इति चेत्, 'यदाकदापि तादृशबुद्धिविषयतैव ।

टी० ननु रासभे घटप्राक्सत्त्वज्ञानवद्रूपेऽपि चेत्सद्बाध्यमेव तदा त्रिचतुरकक्षाबाधितत्वाऽबाधितत्वलक्षणोपि विशेषो न भवत्येवेत्यत आह-। a "एतेने"ति । शुक्तौ रजतत्वज्ञानस्य, शब्दे नित्यत्वज्ञानस्य च, बाध्यत्वाऽविशेषेपि त्वयाप्येतादृशस्यार्थनियमस्याऽभ्युपगमेनेत्यर्थः, यद्वा परकीयसर्वसिद्धान्तानां बाध्यत्वे बहुकक्षाधावित्वाऽधावित्वविशेषः किं निबन्धनः? इत्यत आह-। "एतेने"ति । परसिद्धान्तस्थले रजतज्ञाने च त्वयाप्येतादृशस्य विशेषस्याऽभ्युपगमेनेत्यर्थः ॥ ननु कारणाऽकारणयो

(१) सिद्धान्त इत्यत्र मीमांसकस्येति शेषः ।
(२) तावतैव = त्रिचतुरकक्षास्वबाध्यतयैव ।
(३) तथैव = सर्वप्रकाराऽबाध्यतयैव सिद्धान्त किं न स्यादित्यर्थः ।
(४) षड्विंशतितमकारिकायां वक्ष्याम इत्यर्थः ।

कार्य्यप्राक्कालसत्त्वासत्त्वे यदि न वस्तुनी, किंतु बुद्धिमात्रकृते, तदा तादृशबुद्ध्यभावकाले कारणस्याऽकारणाद्विशेषो न भवेदित्याशङ्कते—। b"अनेनेमि"ति ॥ इदमस्मान्नियतप्राक्सदिति बहुकक्षाधाविनियतबुद्धिविषयत्वाऽत्यन्ताभावाऽनधिकरणत्वमेवाऽकारणात्कारणस्य विशेष इति परिहरति—। c"यद्यपि कदापी"ति । यद्यपि यस्यकस्यचिद्रासभेपि तादृशबुद्धिविषयत्वमिति सोप्येवं कारणं स्यात्, कारणेपि च कस्यचित्प्रमबुद्ध्यैव कारणत्वव्यवहारो, नाऽनेककक्षाधाविधिया, अन्यस्याऽनेककक्षाधाविबुद्धिविषयत्वसत्त्वेप्यन्यस्य तदज्ञानात्कारणत्वव्यवहारो न स्यादितिकारणत्वं वस्तु स्वीकर्तुमर्हति, तथापि तादृशी(१)बुद्धिः तद्व्यवस्थापिकेति तथापि दुर्घटमिति हृदयम् ॥

मू० "अन्यथा कथय कथम् अन्यदातननादृशबुद्धि विषयतयाऽन्यदा सत्त्वं स्यात् । 'तदा सत्त्वमन्यदाऽर्थे न गृह्यते'?–इति चेत्, अन्यकालिकमेव तर्हि तत् तदातनकारणत्वोपयोगीति समानम् । "तदेतत्संवृतिसत्त्व(२)मिति गीयते । 'असती सा न विशेषिका, सती सा नेष्टा,–इत्यभिसन्धानेन संवृतिरपि सती नैवेति पृच्छन्(३)प्रतिवक्तव्यः, 'विज्ञानं तावद्व्यवहारोपपादकतया द्वाभ्यामप्यनुमतं, तस्यापि जिज्ञासायां त्रिचतुरकक्षाविश्रान्तगवेषणस्य यदि सत्तोपपन्ना भविष्यति तदा सता "तेनेदमुपपादितं भविष्यति,

(१) तादृशी बुद्धिः = इदमस्मान्नियतप्राक्सदित्येवंभूता बुद्धिः, तद्व्यवस्थापिका=सति दण्डादौ कारणत्वव्यवस्थापिका,–इति तथापि दुर्घटमित्यर्थः ।

(२) संवियतेऽनयेति संवृतिरविद्या, असत्यकाशनशक्तिरिति यावत्; तथा च संवृतिसत्त्वमित्यस्याऽविद्यकं सत्त्वमिति पर्य्यवसितोऽर्थः ।

(३) 'पृच्छन्'–इत्यस्य यथाकथञ्चित् प्रतिक्षिपन्नित्यर्थः, कतिपयपुस्तके तु 'सती नैव'–इत्यस्य स्थाने 'सती न वा'–इति पाठः, तत्र तु पृच्छन्नित्यस्य यथाश्रुत एवार्थः ।

टी० [a]“अन्यथे”ति । यद्वाकदाचित्तादृशबुद्धेस्तत्त्वे तथापि तादृशबुद्धिविरहदशायां प्राक्सत्त्वस्य वस्तुनः कथं सिद्धिरित्यर्थः ॥ तादृशबुद्ध्यभावदशायामपि कारणत्वमन्यदास्थेन तादृशबुद्धिविशेषेण गृह्यते इति शङ्कते-। [b]“तदा सत्त्वमि”ति ॥ यथाऽन्यकालीन तादृशज्ञानमन्यकालीनमपि कारणत्वं व्यवस्थापयति तथाऽन्यकालीनमपि तादृशबुद्धिविषयत्वमन्यकालीनस्यापि कारणत्वं भविष्यतीति परिहरति-। [c]“अन्यकालिकमेवे”ति ॥ ननु तवैवेयं कल्पनेत्यत आह-। [d]‘तदेतदि”ति । संवृतिस्तावत्स्मती, तया स्वकीयेन सत्त्वेन स्वविषयस्याऽसत्त्वं संव्रियते इति संवृतिसत्त्वं परैरपि मेनिरे, यदाहुः-“पररूपं स्वरूपेण यया संव्रियते धिये”ति भावः ॥ “इदमस्मान्नियतप्राक्सत्त्वादिति बुद्ध्या विशेषात्”-इत्युक्तं, तत्राऽसती बुद्धिर्न विशेषिका, सती च नेष्टा, द्वैतापत्तेरिति वस्तुतत्त्वमेवाङ्गीक्रियतां किं संवृतिसत्त्वेनेत्यत आह-। “असती”ति ॥ प्रतिवचनमाह-। [f]“विज्ञानमि”ति । यद्यपि विज्ञानमपि विषयाङ्कितमतस्तदभ्युपगमे एव विषयाऽभ्युपगमः, निर्विषयस्य विज्ञानस्याऽभावाद्व्यवहारानुपपादकत्वाच्च; तथाच-व्यवहाराऽनुरोधश्चेत्तदा ज्ञानविषययोस्तुल्ययोगक्षेमत्वमेव, तथापि व्यवहारानुरोधोऽपि मया त्यज्यते एवेति हृदयम् ॥ [g]“तेने”ति । विज्ञानेनेत्यर्थः ॥

मू० अथाऽसत्ता तस्य पर्य्यवसास्यति तदाऽसत्तैव तेनेदमुपपाद्यते-इति स्वीकर्त्तव्यम्, [a]भ्रमविषयेणैव भ्रमे विशिष्टताव्यवहारः । अविचार्य्यैव तावत् [b]तस्य सदसत्त्वं विचार आरब्धव्यः । [c]अन्यथा प्रथममेव मतिकर्दमे (१) कथाऽऽरम्भणमशक्यमापद्येत, [d]स्वीकृतं च भवतापि भविष्यदादिविषये विज्ञाने विशिष्टव्य-

(१) मतिकर्दमे=विचारेऽपि विचारस्तत्रापि विचार इत्यनवस्थानात् मतिकालुष्ये सति, पङ्कमग्नहस्त्यादिवत्ततो द्रुतं निर्गमनाऽसम्भवात्कथारम्भ एव न स्यादित्यर्थः ।

वहारनिदानत्वमसतो विषयस्य, 'कारणशक्तेश्च विशेषकमसदेव कार्य्यम् ।

टी० [a]"भ्रमे"ति । यथाऽसदेव रजतं स्वविषयं ज्ञानं विशेषयति–रजतीयं ज्ञानम्' इति, तथा बुद्धिरप्यसतो विषयं विशेषयति–"इदमस्माद्विषयनप्राक्रमत्" इति बुद्धिविषयत्वमेव कारणत्वमित्यर्थः । यद्यपि भ्रमविषयोऽपि सन्नेव(१) तथा च न दृष्टान्तः, तथाप्यसत्ख्यात्यभिप्रायेणैतद् द्रष्टव्यम ॥ [b]"तस्ये"ति । ज्ञानस्येत्यर्थः । यद्यपि विषयाऽसत्त्वं चेत्तदा ज्ञानसत्तासन्देहस्येत(२) अपि न विचारप्रयोजनं, तथापि ज्ञानसत्तासन्देहाऽऽवर्जितो विषयसत्तासन्देहोऽस्त्येवेति न विचारवैयर्थ्यमिति भावः ॥ "अन्यथे"ति । यदि प्रथममेव ज्ञानसदसत्त्वं विचारणीयमित्यर्थः । यद्यपि तत्राऽपि मतिकर्दमः, न तु ममापि, ज्ञानविषययोर्द्वयोरपि सत्त्वेनैवाभ्युपगमात्, न वा त्वया सह कथारम्भणमुद्दिश्यमपि, तथापीयमेव कथा तवमते न स्यादिति हृदयम् ॥ भवतु वेदानीमेव संवृतेरसत्त्वपरिच्छेदः निर्वाहे तस्या विषयविशेषकत्वं स्यादेव, भवति हीदानीमसत्त्वेनैव परिच्छिन्नेन भाविना पुत्रेण 'मम पुत्रो भविष्यति" इति ज्ञानस्येदानींतनस्य विशिष्टत्वव्यवहार इत्याह– [d]"स्वीकृत चे"ति ॥ असदन्तरस्य विशिष्टताव्यवहारहेतुत्वमुदाहरति–। [e]"कारणशक्ते"रिति । कारणशक्तिः=कारणत्वं(३) तच्च सदेव कार्यं विशेषयति, भवति हि 'घटकारणं दण्डः'–इति विशिष्टव्यवहार इत्यर्थः ॥

---

(१) सत्ख्यात्यादिवादिमते ।

(२) ज्ञानसत्तासन्देहस्येति=ज्ञानसत्तासन्देहनिवृत्त्यर्थे विचारे क्रियमाणे, विषयस्यासत्त्वे विवर्मिच्छलतया विचारप्रयोजनं न, तथापि परमार्थतोऽसत्त्वेऽपि विषयस्य ज्ञानसत्तासन्देहावर्जित=ज्ञानसत्तासन्देहाधीनो विषयसत्तासन्देहोऽस्त्येवेति तन्निवृत्त्यर्थत्वाद्विचारस्य न वैयर्थ्यमित्यर्थः ।

(३) न्यायनयेऽतिरिक्तशक्त्यभावात् "कारणशक्तिः=कारणत्वम्"-इत्युक्तम् । "तच्चे"ति । तदिति द्वितीयैकवचनम् ।

मू० * 'नच कालान्तरसम्बन्धिनी सत्ता तस्यैकत्र, अन्यत्र नाऽन्यदापि,—इति वैधर्म्यमेतयो(१)रपीति वक्तव्यम्'। 'विशिष्टव्यवहारप्रवृत्तिसमये 'द्वयोरप्यसत्त्वाऽविशेषात्। प्रयोजनाऽनुपयुक्ते काले तस्य स्वरूपतोऽवस्थानं पाटच्चर(२)लुण्ठिते वेश्मनि यामिकजागरणवृत्तान्तमनुहरति। * "तथापि कालान्तरस्थित्या घटादिकं स्वरूपतो (३) विशेषणतश्च व्यवच्छिन्नं तद्विज्ञानेन 'स्वभावबलात् स्वविशेषणत्वेनोपादीयते, नत्वेवमत्यन्ताऽसद्भवितुमर्हति, तस्य 'स्वरूपतो विशेषणतश्च व्यवच्छिन्नतयाऽनङ्गीकारात्; 'कुत्र(४)स्वभावतो विज्ञानं सम्बन्धि निरूप्येत*। न, 'उक्तमत्राऽसतोपि हि तदेव स्वरूपं, तस्य नियतस्वरूपस्यैव नियतविशेषणस्यैवासत्त्वात्, अन्यथाऽतिप्रसङ्गात्।

टी० ननु भविष्यदादेः कार्यस्य स्वकाले सत्त्वमस्त्येव अतस्तयोर्विशेषणत्वमुचितं, ज्ञानविषययोस्तु सार्वदिकमसत्त्वमिति नाऽन्योन्यं विशेषणविशेष्यभाव इत्याशङ्क्याह—। "नचे"ति॥ असत्ताविशिष्टताव्यवहारस्त्वयाऽभ्युपगम्यते एव, तावतैव सिद्धं नः समीहितमित्याह—। "विशिष्टे"ति॥ "द्वयोरि"ति। भविष्यदादिकार्ययो (५)रित्यर्थः॥ ननु यस्याऽऽत्यन्तिकमसत्त्वं तस्य विशेषणत्वं विशेष्यत्वं वा न स्वीकुर्मः, भविष्यत्पुत्रादेः कार्यस्य च नात्यन्तिकमसत्त्वं, स्वकाले तयोः सत्त्वादित्याह—। "तथापी"ति॥

---

(१) एतयोः=दृष्टान्तदार्ष्टान्तिकयोः।

(२) पाटच्चरेण=चौरेण, वेश्मन्यपहृतसर्वस्वे सति पूर्वापरकालयोर्यामिकस्य=यामरक्षकस्य, जागरणमिन्द्रियक्रियायैव यद्वत्तद्वत्कार्यकालात्पूर्वापरकालयोः स्वरूपतोऽवस्थानमनुपयुक्तमित्यर्थः।

(३) स्वरूपतः=पृथुबुध्नोदरत्वादेः, विशेषणतः=घटत्वादेरित्यर्थः।

(४) 'कुतः' इति पाठे तु केन स्वभावेनेत्यर्थः कर्तव्यः।

(५) भविष्यत्पुत्राद्यर्थघटादिकार्ययोरित्यर्थः।

"स्वभावबलादि"ति । भविष्यदाद्याऽऽलम्बनमपि ज्ञानं शब्दलिङ्गमहिम्ना जायते इति तादृशो विशेषस्तद्विशिष्टएवेत्यर्थः ॥ [f] "स्वरूपत" इति । विषयस्वरूपमपि त्वन्मतेऽत्यन्ताऽसद्विशेषणं, संवृतिरप्यत्यन्ताऽसतीत्यर्थः॥ उपसंहरति—। [g] "कुत्र"ति। स्वभावतोऽपि ज्ञानमत्यन्तासद्विषयसम्बन्धि कथं भवेत्, तथाच त्वन्मतेऽत्यन्ताऽसतोर्ज्ञानविषययोर्न सर्वथा विशेषणविशेष्यभाव इति भावः ॥ [h] "उक्तमत्रे"ति। "नत्वसन् घटो न घटः" इत्यादिनेत्यर्थः। यथा कम्बुग्रीवादिविशिष्टो घटस्त्वया सत्वेनाऽभ्युपगम्यते तथैव मयाप्यसत्त्वेन, तादृशानङ्गीकारे तु स्यादतिप्रसङ्ग (१) इत्यर्थः ॥

मू० [a]भ्रान्तिविषयेण दत्तोत्तरत्वाच्चेत्यलमतिप्रपञ्चेन (२)।

टी० ननूक्तम्—'अत्यन्तासतो न विशेषणत्व'मत आह—। [a]"भ्रान्तौ"ति। यद्यपि घटज्ञानादीनामसत्त्वं न तावदभावप्रतियोगित्वम्, इष्टत्वात्(३); नापि केवला(४)न्वय्यत्यन्ताभावप्रतियोगित्वं, स्वसमवायिनि स्वज्ञाने च सत्त्वात्; नापि सत्तासामान्यरहितत्वं, सत्तावत्येव प्रतीयमानत्वात्; नापि विधिनिषेधव्यवहाराऽभाजनत्वं, तदुभयभाजनत्वेन त्वयाऽभ्युपगमात्; अन्यथा व्याघातात्; नापि ब्रह्मभिन्नत्वम्, इष्टत्वात्; नाप्यभावत्वं, विधिमुखप्रत्ययवेद्यत्वात्; नापि मिथ्यात्वं, तद्ध्यप्रामाणिकत्वं, तदा प्रमाणविषयत्वव्यवस्थापनयैव निरस्य; नापि(५) मिथ्यापदाभिधेयत्वम्,

(१) अतिप्रसङ्गः=घटसत्त्वस्याप्यभावप्रसङ्गः, यद्वा, 'असन्, घटो न' इत्यस्याप्यभावप्रसङ्गः, अलीकप्रतियोगिकनिषेधाऽयोगात् ।

(२) तदेवं शून्यतावादिमतमाश्रित्य दर्शितम् ।
मानमेय द्विभावानामसत्त्वं व्यक्तयुक्तिभिः ॥ २ ॥
इदानीं ज्ञानभिन्नानामसत्त्वं सम्प्रगुच्यते ।
योगाचाराङ्गीकृत्य चित्त खाण्डनसंविदः ॥ ३ ॥

(३) ध्वंसप्रागभावादिप्रतियोगित्वस्य नैयायिकानां प्रपञ्चे इष्ट वादित्यर्थः ।

(४) केवलान्वय्यत्यन्ताभावः=सार्वत्रिकः सार्वदिकोऽत्यन्ताभावः, तत्प्रतियोगित्वमित्यर्थः ।

(५) क्वचित्पुस्तके 'नापि'—इति न दृश्यते तदनुरोधेन 'यदि स्वतो मिथ्यापदाभिधेयत्वम्'—इत्यन्वयः; यथादृष्टपाठे तु यदित्यतः प्राक् तच्छब्दमध्याहृत्य तद्यदि स्वतः'—इति सम्ययोजना कर्तव्या ।

यदि स्वतः(१), तदा स्वसङ्केतेन ब्रह्मण्यपि गतत्वात्; यदीश्वरसङ्केतेन, तदा न घटादावपीति; * बाध्यत्वमसत्त्वम् * ?—इति चेन्न, बाध्यत्वस्य बाध्यत्वाऽबाध्यत्वाभ्यामनुपपत्तेः(२) ; बाधस्य च विपरीतप्रमात्वेन घटादिनिरूपितवैपरीत्यस्य सिद्धौ, घटादिसिद्धेः(३);तदसिद्धौ, बाधाऽसिद्धेः(४); *विचारासहत्वम् *?—इति चेन्न, विचारस्य निर्विषयत्वेन दुर्विचारत्वात्; सविषयत्वेपि, विषयसिद्धेः ; * विचारविषयः सिद्ध एव किंत्वसन्*?—इति चेन्न, असत्त्वस्यैव विचार्यमाणत्वात् ; *व्यावहारिकत्वमेवासत्त्वम्*?—इति चेत्, तद्यदि ज्ञानरूपव्यवहारविषयत्वं, तदेष्टापत्तिः, ब्रह्मणोप्येतादृशस्यासत्त्वस्यत्वयेष्यमाणत्वात् ; अथ व्यवहारोऽभिलापस्तद्विषयत्वं, तदा सुतरामिष्टं, ब्रह्मसाधारणं च ; *अनिर्वचनीयत्वम्*?—इतिचेत्,अनिर्वचनीयतयैव निर्वचनीयत्वात् ; घटत्वादिना निर्वचनात्, निर्वचनीयत्वस्य केवलान्वयित्वेन तदभावासिद्धेः;*सत्त्वासत्त्वाभ्यां दुर्व्यवस्थापनम्*?—इति चेत्,घटादेरुभाभ्या(५)मपि व्यवस्थितत्वात,घटादेस्सत्त्वासत्त्वयोर्द्वयोरभ्युपगमात्; किञ्च,असत्तया चेद्व्यवहारार्थक्रिययोर्यथाऽस्मदभ्युपगतयोरुपपत्तिस्तदा सत्तैव त्वयाऽसत्तेत्यभिधीयते, तथाच नास्ति परं विवादः; तथापि(६) सत्त्वेनापाततो व्यवस्थापयितुमशक्यत्वमसत्त्वमिति भावः ॥

मू० "अपरे(७)पुनश्चेतसोपि शून्यताङ्गीकारे मनःप्रत्ययमनासादयन्तः 'सर्वमिदमसदेव विश्वम्,-इत्यभिधातुं सहसैवानुत्सहमानाः मन्यन्ते-विज्ञानं तावत् 'स्वप्रकाशं, "स्वत एव सिद्धस्वरूपं, 'न खलु विज्ञाने सति

---

(१) स्वतः स्वसङ्केतेनेत्यर्थः ।

(२) बाध्यत्वस्य बाध्यत्वे ऽबाध्यत्वमेव जगतो व्यवतिष्ठेत, अबाध्यत्वे तु तत एव द्वैतापत्त्यादिरित्युभयथाप्यनुपपत्तेरित्यर्थः ।

(३) प्रतियोगिविधया घटादिसिद्धेरित्यर्थः ।

(४) 'तदसिद्धे', इत्यपि क्वचित्पाठस्तत्रापि बाधासिद्धे रित्येवार्थः ।

(५) उभाभ्यां = सत्त्वाऽसत्त्वाभ्याम् ।

(६) तथापीत्यस्य विप्रकृष्टेन "भासतो" तिप्रतीकापिमेण यद्यपिशब्देनाऽन्वयः ।

(७) यद्यपि स्वमतमेवैतत्पश्चात् पर्यवसास्यति तथापि योगाचारमतद्वाधारणयेनाऽभिधानात् 'अपरे तु'-इत्युक्तम् ।

जिज्ञासो[1]रपि कस्यचित् 'जानामि न वा'-इति संशयः, 'न जानामि'-इति वा विपर्ययः, व्यतिरेकप्रमा[2] वा, तेन जिज्ञासितस्याऽतत्त्वज्ञानव्यतिरेकप्रमाणामभावसमुदायः स्वव्यापकं जिज्ञासितस्य प्रमितत्वमानयति। अन्यथा[3] हि जिज्ञासितप्रमितत्वव्यतिरेकव्यापकं जिज्ञासितव्यतिरेकोल्लेखि ज्ञानमविघ्नतजिज्ञासस्य स्यात्। अतः सर्वजनस्वात्मसंवेदनसिद्धमेवास्य बोधस्य स्वरूपम्।

टी० तदेवं माध्यमिकमतमाश्रित्य विश्वासत्त्वमुपपाद्य योगाचारमतमाश्रित्य ज्ञानभिन्नस्याऽसत्त्वमुपपादयितुमाह-। a "अपरे पुनरि"ति ॥ b"चेतस" इति। ज्ञानस्येत्यर्थः ॥ मनःप्रत्ययः=विश्वासः। अविश्वासे तु युक्तिः,-यदि शून्यत्वं जगतो वास्तवं, तदा क्व शून्यत्वं, शून्यत्वस्यैव धर्मस्य सत्त्वात्, अथ शून्यत्वमवास्तवं, तदा पूर्णत्व[4]मेव। शून्यतायाश्च स्वत एव सिद्धिः?, परतो वा?। आद्ये स्वप्रकाशतया ज्ञानस्वरूपैव शून्यतेति; अन्त्ये शून्यतासाधकस्यैव सत्त्वाच्च शून्यता। किञ्च, किं तच्छून्यस्य धर्मः शून्यता? मिथ्या वा? अलीकं वा? असद्वा? अनिर्वचनीयं वा? विचारासहं वा? प्रपञ्चो वा? बाध्यं वा? तच्च सर्वमनुभवार्थक्रियाविरो-

---

(१) पथि गच्छतस्तृणादेः सर्वथा ज्ञानाभावदशायामजिज्ञासिते तृणादौ सत्ताया-अभावो हेतुर्दृष्टः प्रमितत्वलक्षणं साध्यं च नास्ति तद्वारणाय 'जिज्ञासो' रित्युक्तम्।

(२) योग्यानुपलब्धिजन्यप्रमाभावविषयकं ज्ञानं व्यतिरेकप्रमा,-न जानाम्येवेति। ननु विज्ञाने सत्यभावप्रमाप्रसङ्ग एव नास्ति किमिदमुच्यते "व्यतिरेकप्रमा वा न जानामि"-इति, इति चेत्सत्यं, तथापि सतोऽप्रमितस्य जिज्ञासितस्य संशयविपर्ययान्यतरगोचरत्वं, जिज्ञासितस्याऽप्रमितस्य त्रयाणामन्यतमविषयत्वमिति विभज्य योजनीयत्वान्न दोषः।

(३) अन्यथा ज्ञानस्याऽप्रमितत्वे कदाचिज्ज्ञानविषयक व्यतिरेकप्रमादिकमपि स्यादित्याह-अन्यथेति, अन्यथा = ज्ञानस्याऽप्रमितत्वे, अविघ्नतजिज्ञासस्य=जिज्ञासोः पुरुषस्य, जिज्ञासितज्ञाननिष्ठप्रमितत्वस्य यो व्यतिरेकोऽभावस्तद्व्यापकं जिज्ञासितस्य व्यतिरेकोल्लेखि ज्ञानमपि कदाचित्स्यादित्यन्वयपूर्वकोर्थः। व्यतिरेकोल्लेखि ज्ञानमित्युपलक्षणं संशयविपर्ययोरपि।

(४) पूर्णत्वं = सत्त्वम्।

धादनुपपन्नमेव ॥ [c]"स्वप्रकाशमि"ति । स्वस्य प्रकाशः=विषयीभावो यत्र तत्स्वप्रकाशं, स्वं वा प्रकाशो यस्य तत्स्वप्रकाशं, स्वस्मात् प्रकाशो यस्येति वा ॥ तदेव विवृणोति—। [d]"स्वतः एवे"ति ॥ स्वप्रकाशत्वे प्रमाणमाह—। [e]"न खल्वि"ति । देवदत्तस्य घटज्ञानोत्पत्तिक्षणे घटज्ञानज्ञान(१)वान्, जिज्ञासितघटज्ञानगोचरसंशयविपर्ययव्यतिरेकप्रमाऽनाधारत्वात् घटानुव्यवसायक्षणवत् चैत्रवद्वेति मानार्थः । अयं ज्ञातघटज्ञानः, जिज्ञासुत्वे सति तद्विषयसंशयादिरहितत्वात्—,इति व्यतिरेकी वा हेतुर्विवक्षितः । ज्ञानाभावदशायां व्यभिचारवारणाय 'जिज्ञासोरपी'ति। अतत्त्वज्ञाने(२)च व्यतिरेकप्रमा च अतत्त्वज्ञानव्यतिरेकप्रमाः; तासामित्यर्थः । यद्यपि स्वप्रकाशे जिज्ञासैव नावतरति, जिज्ञासा हि ज्ञातुमिच्छा, नहि सा ज्ञाते एव ज्ञाने सम्भवति, तथाच ज्ञानस्य स्वप्रकाशतां जिज्ञासा न सहते—इति न तया लिङ्गं विशेष्टुमर्हति, तथापि व्याप्ति(३)स्तावदीदृशीति हृदयम् ॥

मू० * [a]व्यवसायस्यानुव्यवसायनियमाच्च तत्र संशयादिः*?—इति चेन्न, [b]यत्रैवानुव्यवसाये ज्ञेयता नोपेया तत्र जिज्ञासायाम् [c]आत्मधर्म्मिकं तत्संशयमारभ्य व्यवसायविषयपर्यन्तं संशयाक्रान्तेर्दुष्परिहरत्वात्; [d]विषयिसद्भावसंशये तद्विषयेऽपि संशयस्य सम्भवात् ।

टी० ॥ संशयाद्यभावमसूहे हेतावन्यथासिद्धिमाशङ्कते—। [a]"व्यवसायस्ये"ति । अनुव्यवसायेन व्यवसायस्य प्रतीतत्वान्न तत्र संशयविपर्ययव्यतिरेकप्रमा इत्यर्थः ॥ परिहरति—। [b]"यत्रे"ति । यद्यनुव्यवसायाः प्रोच्यन्ते तदाऽनवस्था, विषयान्तरसञ्चाराभावः, अननुभवश्च; तद्विरामे(४)तु

---

(१) घटज्ञानविषयकं ज्ञानं च स्वात्मकमेव ग्राह्यं, न तु ज्ञानान्तरं, स्वप्रकाशत्वस्य साध्यत्वात्; एवमग्रेऽपि ।

(२) अतत्त्वज्ञाने=संशयविपर्ययौ ।

(३) यत्रयत्र जिज्ञासुत्वे सति संशयाद्यभाववत्त्वं तत्रतत्र प्रमितत्वमिति व्याप्तेरेव जिज्ञासाघटितत्वेनैव, तात्पर्यं, न तु लिङ्गकुक्षौ तद्विशेषणेत्यर्थः ।

(४) अनुव्यवसायधाराविरामेऽपीत्यर्थः ।

विषयपर्यन्त संशयः, इत्यन्यथा ज्ञानं स्वप्रकाशमेषितव्यमित्यर्थः ॥ ननु ज्ञानं ज्ञातं यदि, तदा न तत्र संशयो ज्ञातत्वात; अथाऽज्ञातं, तदापि न तत्र संशयोऽज्ञातत्वात्, नहि धर्म्यदर्शनेपि संशयः, तथा सति तत्र(१) धर्मिनियमो न स्यादित्यत आह—। "आत्मधर्मिकमि"ति । अनुव्यवसाया-नन्तरम्'अहं तृतीयज्ञानवान्न वा' 'अहं ज्ञानविषयतृतीयज्ञानवान्न वा' 'अहं ज्ञातघटज्ञानो(२)न वा' इत्यात्मधर्मिकसंशय(३)मुपक्रम्य विषयपर्यन्तसंशयः स्यात्, नचैतादृशी संशयधारानुभूयते, तस्मात् स्वप्रकाशमेव ज्ञानमित्यर्थः । यद्वा, 'घटज्ञानजिज्ञासावानयं चैत्रो यदि ज्ञातघटज्ञानो न स्यात् (४)प्रमिततद्विरहः स्यात्'—एवं द्वितीयतृतीयादिज्ञानपरम्पराप्रयोगेन तत्तद्विरहप्र-मामाराद्याऽर्थापत्त्या स्वप्रकाशता साधनीयेत्यर्थः । यद्यप्यनुव्यवसाये सति न तत्र जिज्ञासा, ज्ञानधारया(५) विच्छेदात् नोत्तरकालीना, (६) विषया-भावात्, तथाप्यनुपसर्ज्जन(७)विरोधितया पूर्वजिज्ञासायाः यत्र तथासाम र्थ्यमभिप्रेतम् ॥ ननु ज्ञानगोचरसंशयेन तद्विषयसंशयोऽपि—इति कथमेतदत आह—। "विपर्ये"ति । यद्यपि नायं नियमस्तथापि सम्भवमात्राभिप्रायेणैतदुक्तम्, अत एव सम्भवादित्युक्तम् ॥

(१ तत्र=संशये 'धर्मिस्मिन्धर्मिणि [illegible] न [illegible] संशय'—इति धर्मिनियमः क्वचिदपि न स्यादिति पदार्थः.

(२ [illegible] क्रमशः [illegible]—तृतीयादि [illegible] प्रथमज्ञा-नविषयक बोध्यम ।

(३ [illegible] अनुव्यवसाय [illegible] ।

(४ अत्र [illegible] कृत्वा तदा [illegible] । [illegible] तस्य ज्ञानस्य विरहो यस्य पुनः स तथा स्यात—इति योजनीयम ।

(५ अनुव्यवसायात्मकज्ञानधाराकाले इच्छाया असम्भवादित्यर्थः ।

(६ [illegible] न सम्भवति [illegible] ज्ञानस्यैव तदानीं मभावादित्यर्थः

(७ [illegible] विरोधिता यस्या जिज्ञासाया ज्ञानेन सहैतादृशी या ज्ञानात्पा [illegible] जिज्ञासा तस्याः [illegible] संशयादिसहकृतत्वेनाप्रमात्वसाधकत्वे व्यवसायविषयपर्यन्त संशयसम्भवितत्वे चेत्यर्थः । सामान्यतो विषयज्ञानस्यैव जिज्ञासायाः कारणत्वेन विषयस्य तत्र कारणत्वाकल्पनादिति भावः ।

मू० [a] एवं(१)त्रिचतुरसंवेदनकक्षाज्ञानध्रौव्यनियमाभ्युपगमेपीति । [b]स्वप्रकाशे तु मानमेयभावव्यवस्थाया अभावादेव तदाश्रया दोषा निरवकाशाः । [c]अन्यथा तु बोधस्वरूपमेव न सिद्ध्येत् । [d]यदि हि विज्ञानं परतः सिद्ध्येत् तदाऽनवस्था स्यात् । * [e]नच वाच्यमवश्यवेद्यता वित्तेर्नाभ्युपेयते, स्वार्थे व्यवहारस्तु स्वरूपसत्तया प्रसूयते इति क्वाऽनवस्था-इति* ।

टी० ननु व्यवसायवदनुव्यवसायेऽपि संशयते एव, तथाच कथं विषयपर्यन्तः संशय इत्यत आह-। [a]"एवमि"ति। क्वचिद्विरामस्यावश्याभ्युपगमनीयत्वेन विषयपर्यन्तसंशयधाराध्रौव्यादित्यर्थः ॥ ननु स्वप्रकाशनये तदेव ज्ञानं कर्म स्यात्, क्रिया च, नचैव सम्भवति, क्रियाकर्मणोर्भेदगर्भत्वात्, कथं वाऽत्यन्तमभिन्नतया विषयविषयिभावः ? इत्यत आह-। [b]"स्वप्रकाशे त्वि"ति । यदि भिन्नयोः क्रियाकर्मभावो वा विषयविषयिभावो वा क्वचिन्मयाङ्गीक्रियेतोपपन्नो वा स्यात् तदा विरोधो भवेत्, नत्वेवं, स्वप्रकाशज्ञानातिरिक्तवस्तुनो मया योगाचारनयनगरप्रवेशादेवानभ्युपगमादित्यर्थः । यद्वा, ननु ज्ञानप्रामाण्यसंशयाधीनः संशयस्तत्रापि विषयपर्यन्त इत्यत आह-।"स्वप्रकाशे त्वि"ति। यदि भेदेन विषयविषयिभावो भवेत्तदा बोधस्वरूपमेव न सिद्ध्येदित्याह-। [c]"अन्यथे"ति ॥ अस्तु वा भेदेन विषयविषयिभावस्तथापि ज्ञानं तथा नाङ्गीकर्तव्यमित्याह-। [d]"यदि ही"ति ॥ ननु ज्ञानस्यापि व्यवहारं न तदैव ज्ञानाधारं क्रमो येनानवस्था स्यादित्यत आह-। [e] ... घटादिसत्त्व विलक्षणा ज्ञानसत्तैव स्व(२)विषयव्यवहाराय पर्याप्तेति भावः । "नच वाच्यमि"ति ॥

(१) नियम ... पर्यन्त (विषयपर्यन्तं संशयाक्रान्तिः)-इति सम्बन्धः ।
(२) क्वचित्त्व ... इति नास्ति ।

मू० a"यतः तस्यां प्रमाणानुपन्यासे स्वरूपसत्तापि कुतः, यया व्यवहारोपपत्तिः; को(१)ब्रूते–'सती सा वित्तिः?'; असत्येव न कुतः। * b'सामान्यतो वित्तेस्तथात्वविधावपेक्षितसिद्धौ यत्र विशेषरूपायां प्रमाणाऽप्रवृत्तिस्तदा तत्र सत्त्वसाधनाऽसत्त्वेऽपि जिज्ञासायां सत्यां पश्चाद्व्यवहारसत्त्वैव वाऽन्यद्वा प्रमाणमस्त्येव?*,–इति चेन्न, c'तस्यापि कथं सत्त्वमित्यनवस्था वा स्यात्, d'शेषासिद्धौ सर्वाऽसिद्धिर्वा प्रसज्येतेत्यर्थोऽसिद्धिपर्यन्तस्य व्यसनस्य दुरुत्तरत्वात्। e'सेयमप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यतीति।

टी० तद्बोधकं ज्ञानमनङ्गीकृत्य ज्ञानसत्त्वं त्वया दुरुपपादमित्याह–। a"यत" इति॥ व्यवहारमात्रात्तावद्विषयज्ञानमात्रं सिद्धमेव, घटादिप्रतिनियतविषयकज्ञानजिज्ञासा तु यदि स्यात्तदा प्रतिनियतविषयकव्यवहारेण वा, प्रतिनियतविषयस्मरणादिना वा, तदप्यनुमास्यते(२) इत्याशङ्कते–। b"सामान्यत" इति। 'जानामि'–इति सामान्याकारेणाऽपेक्षितवित्तिविशेषसिद्धावपि घटज्ञानत्वादिना जिज्ञासायां वित्तिविशेषसिद्धिरिति वा(३)ऽर्थः॥ व्यवहारसामान्यसत्त्वस्य व्यवहारविशेषसत्त्वस्य च ज्ञानज्ञापकस्य सिद्धिर्ज्ञानान्तराधीना, एवं तत्सिद्धिरप्यनवस्थेत्याह–। c"तस्यापी"ति॥ माभूद्ज्ञानपरम्परायास्तदानीमेव सिद्धिः, किमेतावता, त्रिचतुरज्ञानसिद्ध्यैव तद्विषयसिद्धिरित्यत आह–। d"शेष"इति। यद्यपि सर्वाऽसिद्धिप्रसञ्जनमनुपपन्नं, यत्पदीकृत्याऽसिद्धिरापाद्या तदसिद्धौ बाधः,

(१ कोऽनुभवो ब्रूते अनुभावयति यत सत्येव वित्तिरिति, न कोऽपि, तथा चाऽनुभावकाभावात्सा वित्तिरसत्येव किं न स्यादित्यर्थः।

(२) चैत्रो घटविषयकज्ञानवान् घटविषयकव्यवहारवत्त्वात् घटविषयकस्मरणवत्त्वाद्वा–इत्यनुमानप्रकारः।

(३) उत्थानकोक्तार्थापेक्षयाऽस्यार्थस्य द्वितीयत्वमभिप्रेत्य 'वा'-शब्दः प्रयुक्त इति ध्येयम्।

तदसिद्धावाश्रयासिद्धिः, शेषासिद्धेश्चापादकत्वेनाभिमताया असिद्धिः, 'शेषस्य चरमज्ञानस्यासिद्धौ तत्पूर्वज्ञानस्यासिद्धिः'-इति विशिष्टापादने त्वद्वचनादेव तयो(१)स्तदैव सिद्धौ सुतरामापाद्यापादकयोरसिद्धिः, तथाप्यनवस्थायामेव हृदयम् ॥ "'सेयमि' ति। यस्य मते उपलम्भो न प्रत्यक्षः=न स्वसंवेद्यः, तन्मते(२)नाऽर्थदृष्टिः=ज्ञानमात्रमेव न सिद्ध्यति,-इति धर्मकीर्तिनाप्युक्तमित्यर्थः। यद्यपि प्राकट्यानुमेयज्ञानं भट्टं प्रति नैयायिकानामप्ययमुपालम्भः, तथापि स्वप्रकाशानभ्युपगमेप्युक्तदोषबलेनोपालम्भः सम एवेति भावः ॥

मू० [a]घटसत्तां हि व्यवहरता प्रामाणिकेन तत्र प्रमाणसद्भावो वाच्यः। यदि प्रमाणमनुपन्यस्य सास्तीत्येवमङ्गीक्रियते तदा वैपरीत्यमेव(३)किं न स्यात्। ततश्च घटसत्तायां प्रमाणसत्ता दर्शनीया, तथा च प्रमाणसत्तापि तत्प्रमाणसत्तामन्तरेण प्रामाणिकस्य नाङ्गीकारार्हा, [b] सर्वप्रमाणसत्तानिवृत्तेर्वस्तुसत्तानिवृत्तिनियतत्वात्(४); अन्यथा सप्तमरसादेरप्यापत्तेः-इति व्यक्तमनवस्थादौस्थ्यमस्वप्रकाशवादिनः स्यात्। [d]यदि हि विनैव प्रमाणसत्तां प्रमाणसत्तां परोऽङ्गीकारयेत्तदा घटसत्तामपि तथैवाङ्गीकारयतामिति घटेपि वृथा प्रमाणोपन्यासायासः।

टी० अनवस्थां सर्वासिद्धिं वाऽऽपादितां प्रपञ्चयति-[a]"'घटसत्तामि"ति। यद्यपिप्रमाणोपन्यासो न सत्ताङ्गीकारबीजं, किंतु प्रमाणं, तथापि

---

(१) तयोः=पूर्वज्ञानचरमज्ञानयोः, तदैव=त्वद्वचनावसरे एव, सिद्धौ सुतराम् आपाद्यापादकयोः=तदभावयोरसिद्धिरित्यर्थः।

(२) 'तन्मतेन अर्थदृष्टिः=ज्ञानमात्रमेव'-इति वा पदविभागः कर्तव्यः।

(३) वैपरीत्यमेव=घटाऽसत्त्वमेव।

(४) नियतत्वात्=व्याप्यत्वात्।

तत्र विप्रतिपन्नं प्रतीदानीं[१]मेव तत्प्रमापणीयमिति भावः ॥ [b]"सर्वप्रमाणे"ति । यद्यपि कदाचित्सर्वप्रमाणनिवृत्त्या न प्रमेयनिवृत्तिः, तथापि सार्वदिकसर्वप्रमाणनिवृत्त्यभिप्रायमेतत् । यद्यपि सर्वप्रमाणनिवृत्तिर्दुर्वहा, तथापि प्रमाणान्तरं[२]त्वयैवोपपादनीयमिति भावः ॥ [c] 'अन्यथे'ति । यदि प्रमाणनिवृत्ता न प्रमेयनिवृत्तिरित्यर्थः । यद्यपि स्वप्रकाशत्वेऽपि प्रमाणापेक्षायामनवस्थैव, स्वप्रकाशत्वस्याऽस्वप्रकाशत्वात्[३], स्वप्रकाशत्वस्य प्रमाणान्तरेण त्वयैवेदानीमुपपादनीयत्वात्; एवं तदुपपादकस्यापि प्रमाणस्य वाच्यम्, अनुपपादने च कथं तत्स्वप्रकाशं वैपरीत्यमेव कथं न स्यात्—इत्याद्यवकाशः, तथापि वैतण्डिकोऽहमिति हृदयम् ॥ ननु घटस्तावत्प्रमाणसिद्धस्तत्प्रमाणेऽपि प्रमाणाभिधानमकिञ्चित्करमित्यत आह— । [d]'यदी'ति ॥

मू० [a]अथ * नाऽघवधामलग्नवित्ति[४]तद्वित्तिधाराऽभ्युपगम्यते, किंनाम कदाचित्कुतश्चित्काचिद्वित्तिः प्रमीयते, इति सर्वा वित्तिः प्रमाणसिद्धैवेत्यभ्युपेयते* ? —इति चेन्न, [b]स्यादप्येवं यदि 'घटः'[५]—इति, 'घटं जानामि,—इत्यतोऽधिका (घटवित्तितद्वित्तिधारया

(१) इदानीं=विप्रतिपत्तिसमकालं तत्=प्रमाणं, प्रमापणीयं=प्रतिवस्त्वर्थमुपन्यसनीयम्, इत्युपन्यासोऽप्यावश्यक इत्यर्थः ।

(२) प्रमाणे प्रमाणान्तरसत्त्वं किं तत् इति त्वयोपपादनीयं ननु मदुपपादयितुं शक्यमनवस्थानादिति तदभिप्रायेणैव सर्वप्रमाणनिवृत्तिप्रतिपादनमिति तात्पर्यार्थः ।

(३) 'स्वप्रकाशत्वस्य स्वाऽप्रकाशत्वात्' —इत्यपि क्वचित पाठः । स्वप्रकाशत्वस्याऽस्वप्रकाशत्वे खाण्डनिकस्य पुनःपुनः प्रमाणैस्तत्प्रकाशनमेव हेतुमाह—स्वप्रकाशत्वस्य प्रमाणान्तरेणेत्यादिना ।

(४) वित्तितद्वित्त्योर्धारा चाऽभावव्यवधानेन लग्ना चेति विग्रहः । प्रमीयते इत्यस्यानन्तरं 'जिज्ञासायां सत्याम्' इति शेषः ।

(५) 'घट'—इति, 'घटं जानामि,—इत्यतः (घटतज्ज्ञानविषयाज्ज्ञानद्वयात्) अधिका वित्तिरस्मदादेरुत्पद्यमाना यद्यनुभूयेत (तर्हि) एवमपि स्यात्—इति सम्बन्धः । वित्तिमेव विशिनष्टि-तादृग्विषयेति, तादृशी=विच्छिद्यज्ञायमानविषयाणां यच्छतं तत्प्रचारेण=गौरवेण, मन्थरा=मन्दगामिनी । तत्र हेतुमाह—घट इति, घटश्च तद्वित्तिश्च तयोर्धारा=माला, तया । किंविशिष्टया ? इत्यत आह—विषयभावेन=गर्भभावेनाऽनुप्रविष्टयेति ।

विषयभावेनप्रविष्टया तादृ[c]ग्विषयशतभारमन्थरा) वित्तिरस्मदादेरुत्पद्यमानाऽनुभूयेत । [d]यद्यस्मदादिविलक्षणजन्मनि सा सम्भाव्यते तदापि यस्या वित्तेस्तावद्विषयगर्भिता धीर्विषयः साप्यन्यथा कयाचिदुल्लेख्येत्यत्र प्रमाणाभावश्च,—

टी० ननु वित्तीनां धारावहनवत् प्रवाहं नाभ्युपैमि येन विषयान्तरसञ्चारो न स्यात, अपि तु सर्ववित्तीनां वेदनमात्रमङ्गीकुर्मः? इत्याह—। [a]"अथे"ति । कालान्तरेऽप्यनुसन्धीयमाना या वित्तिपरम्परा सा स्वस्वविषयमन्तर्भाव्यैवानुसन्धेयेति न चैतादृशं ज्ञानमुत्पद्यमानमनुभूयते इत्याह- [b]"स्यादि"ति ॥ [c]"विषयशते"ति । यद्यपि शतमपि वित्तयो वित्तित्वेन, घटश्च विषयो घटत्वेन, भासते इति 'घटं जानामि' 'घटज्ञानवानस्मि'—इत्यनेनैवाकारेण क्रमेणापि वित्तिशतवेदनं सम्भाव्यते इति न विषयशतभारमन्थरत्वम्, नहि तावतीषु वित्तिषु प्रकारवैचित्र्यमस्ति येन तदुल्लेखधौर्व्येणानुभवविरोधः स्यात, तथापि 'कालान्तरीयस्य घटज्ञानवानहमितिज्ञानस्य कालान्तरीयचरमवित्तिरपि विषयः'—इत्यत्र न प्रमाणमिति हृदयम् ॥ ननु योगदशाया पूर्वपूर्वत्यक्ताः सर्वा वित्तीरेकवारेण प्रतिसन्धास्यतीति सर्वासां प्रामाणिकत्वमित्यत आह—। [d]'यद्यस्मदादी"ति । योगिधियां स्वातिरिक्तसकलग्रहसामर्थ्येऽपि स्वग्रहे सामर्थ्याभावाच्चैतदपीत्यर्थः ॥

मू० [a]अनिर्मोक्षापत्तिश्च । [b]नहि स्वमन्तर्भाव्य कयाचिद्धिया स प्रवाहो ग्राह्यः । तथा सति स्वप्रकाशतासिद्धेः । [c]अत एव चाऽन्योन्यविषयता निरस्ता, सविषयकाऽन्योन्यग्रहे स्वग्रहापत्तेः ।

टी० [a]"अनिर्मोक्षे"ति । योगिनामुक्तक्रमेण ज्ञानपरम्पराऽनुच्छेदे सकलविशेषगुणोच्छेदो मोक्षो न स्यादित्यर्थः ॥ ननु योगिनश्चरमा वित्तिः

स्वात्मानमपि विषयीकृत्य निवर्त्तते इति नानिर्मोक्ष इत्यत आह—।
"नही"ति । यद्यपि योगज(१)धर्माऽजन्य-जन्य-स्वविषयकमविकल्पका-
ऽजन्य-सामान्यलक्षणप्रत्यासत्यजन्य ज्ञानस्यैव स्वप्रकाशत्व नाभ्युपेमीति
न स्वप्रकाशत्वापत्तिः, तथापि परिभाषामात्रमेतदिति हृदयम् ॥ ननु
योगिज्ञानपरम्परायामन्त्योपान्त्यज्ञानयोरन्योन्यविषयतायां न स्वप्रकाशता,
न वाऽनवस्था, न वा कस्या अपि वित्तसंवेदनमित्यत आह—। "अत
एवे"ति। अन्त्यज्ञानं स्वविषय(२)मुपान्त्यज्ञानं विषयीकुर्वदात्मानमपि विष-
यीकुर्य्यादेवमुपान्त्यमन्त्य(३)विषयीकुर्वत् स्वात्मानमपि विषयीकुर्यादिति
स्वप्रकाशतापत्तिरेवेत्यर्थः । यद्यपि(४)ज्ञानग्रहे विषयग्रहध्रौव्यं, न तु याव-
द्विषयग्रहनियमः, तथाच स्वेतरविषयकज्ञानग्रहे कथं स्वप्रकाशत्वं भवेत्
तथापि संयुक्तसमवेतविशेषणतया प्रत्यासत्त्या स्वेतरग्रहवत् स्वग्रहोऽपि
स्यादेवेति भावः । यद्वा(५)ऽन्योन्यमात्रविषयकज्ञानस्थले दोषोयम् । यद्वा,

(१) अस्यां फक्किकायां योगजधर्माऽजन्यत्वादिविशेषणचतुष्टयेन क्रमशः योगि-ज्ञानेश्वरज्ञानानुमितिज्ञानसामान्यलक्षणप्रत्यासत्तिजज्ञानानि स्वप्रकाशत्वेनाऽभिमतानि व्यावर्त्यानि । तथाहि,—ज्ञानमात्रस्यैव स्वप्रकाशत्वाऽभावोक्तौ योगिज्ञानस्यापि स्वप्र-काशत्वं न स्यादिति तद्व्यावृत्त्यर्थं योगजधर्माजन्येत्युक्तम्. एवमपि योगजधर्माजन्यस्य भगवतो नित्यज्ञानस्यापि स्वप्रकाशत्वं न भवेदिति तद्ग्रहणाय जन्येति. तावतापि योगजधर्माजन्यत्वे सति जन्याया (यत्रयत्र द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं तत्रतत्र गु-णत्वम्—इत्यादिरूपस्वविषयकसविकल्पकव्याप्त्यादिजन्याया) ज्ञानं गुणः द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वात्'—इत्यादिरूपानुमितेरपि स्वप्रकाशत्वं न सिद्ध्येदिति स्वविषयकस-विकल्पकाजन्येत्युक्तम्, तथापि निरुक्तविशेषणत्रयविशिष्टस्य वित्तत्वलक्षणसामान्य-लक्षणप्रत्यासत्तिजन्यज्ञानस्याशेषवित्तिगोचरत्वेन स्वगोचरतामपि गतस्य परप्रकाशत्ववार-णाय ज्ञानं सामान्यलक्षणप्रत्यासत्त्यजन्यविशेषणेन विशेषितम् । क्वचित्पुस्तके एकं जन्यपदमत्राधिकमप्युपलभ्यते, तदबुद्धिपूर्वकत्वादिदं चिन्त्यम् ।

(२) स्वविषय, स्वात्मकविषयविशिष्टमित्यर्थः ।

(३) अन्त्यं, 'स्वात्मकविषयविशिष्टमि' ति शेषः ।

(४) उपान्त्यज्ञानादेः स्वेतरपदार्थविषयकज्ञानग्राहकत्वेन स्वप्रकाशतापत्ति-रिति शङ्कते—यद्यपीति । समाधत्ते—तथापीति । अन्योन्यविषयकत्वस्य पि ज्ञानान्तरग्राह्य-त्वेऽनवस्थानात्तत्सिद्धिप्रसङ्गेनाऽन्योन्यग्राह्यतैव वाच्या इत्यन्योन्यविषयकत्वकुक्षिनि-विष्टस्य स्वस्यापि स्वेतरार्थवत् मनःसंयुक्तात्मसमवेतज्ञानविषयतालक्षणप्रत्यासत्त्या स्वेनैव ग्रहणं स्वप्रकाशतापत्तिरेवेत्यर्थः ।

(५) पूर्वं स्वेतरार्थग्राहिणोऽप्युपान्त्यज्ञानादेः स्वेतरार्थग्राहकत्ववदगत्या स्वग्राह-कतामुपादाय स्वप्रकाशत्वमुक्तमिदानीं त्वन्योन्यग्राहकत्वस्थले एवायं दोषो न स्वेतरा-र्थग्राहकत्वस्थले इत्याह—यद्वेति ।

अन्त्योपान्त्यज्ञानयोरन्योन्यविषयत्वमित्यपि ज्ञानान्तरयाह्यमेवेति तदादाय पुनरनवस्थादोषस्थमेवेति भावः ॥

मू० "नच पुरुषान्तरेण सा[1] प्रमास्यते नतु तदभावः-इति प्रमा तेस्ति, तदर्थमपि प्रमाणान्तरसद्भावपरम्परापत्तेः । *[b]नचैवं घटसामग्रीतत्सामग्रीगवेषणेप्यनवस्था स्यात् * । वैषम्यात् । [c]यदि हि घटसामग्री तत्सामग्रीधारा कुत्रचिद्विच्छिद्येत तदा घटः सदातनः स्यात् इत्यर्थापत्त्यैव घटः सामग्रीपरम्पराविच्छेदरहित एव प्रमीयते । [d]यदि तु ज्ञानेप्येवं स्यात्,—

टी० नन्वेकस्य पुरुषस्य वि[illegible]न्तापि वित्तिपरम्परा पुरुषान्तरेण प्रमास्यते इति न शेषासिद्धा [illegible] इत्यत आह—। [a]"नचे"ति । 'पुरुषान्तरेण प्रमास्यते'-इति त्वयाऽपादनीयमतस्तदुपपादनपरम्परापुनरप्यापत्त्वा । किञ्च, पुरुषान्तरेण सा [illegible], नतु तदभावः, इत्यपि विशेषोपपादनप्रयासस्तवाधिक इत्यर्थः ॥ ननु ज्ञानसिद्ध्यन्यथानुपपत्तिरेवापर्यवसन्ना ज्ञानधारामाक्षिपेद्, अन्यथा घटकादाचित्कत्वाऽन्यथानुपपत्तिर्घटसामग्रीपरम्परामपि नाक्षिपेदित्यत्राह— । [b]"नचैवमि"ति ॥ वैषम्यमेव स्फुटयति— । [c]"यदी"ति । घटसामग्रीविच्छेदे हि घटकादाचित्कत्वमनुपपन्नं स्यात्, तथाच स्यादेव[2] न स्यादेव वा, नतु कदाचित्स्यादित्यापद्येत; ज्ञानसिद्धिस्तु स्वस्मादपि भवन्ति न तत्परम्परामाक्षिपन्तीत्यन्यथासिद्ध्यनन्यथासिद्धिकृतवैषम्यमित्यर्थः । यद्वा, घटसामग्रीपरम्पराङ्गीकारेऽनवस्थैव परं, सा चान्यथानुपपत्तिप्रमाणिकेति न सापि दोषाय,ज्ञान-

(१) सा=घरमबुद्धिः, पुरुषान्तरेण प्रमास्यते, तस्या अभावो न प्रमास्यते,-इत्यत्र तत्र प्रमाणं नास्ति, तदभावादभाव एव परिशिष्यते,-इति विद्यासागरोक्तरीत्याऽन्वय पूर्वकोऽर्थः ।

(२) कारणसामग्रीविरहिणां हि द्वयी गतिर्दृष्टा,-नित्यसत्त्वमेव वाऽऽकाशादिवत्, नित्याऽसत्त्वमेव वा खपुष्पादिवत्, घटस्यापि सामग्रीविरहित्वे तदन्यतरत्वं स्यादित्येतदाह-स्यादेवेति ।

परम्पराङ्गीकारे त्वनिर्मोक्षापत्तिरिति महद्वैषम्यमिति भावः॥ वैषम्यमेव ज्ञानपक्षे विशदयति -। [e] "यदि त्वि"ति ॥ [f] "एवं स्यादि"ति । ज्ञानसिद्ध्यान्यथानुपपत्तिरेव यदि ज्ञानस्य ज्ञानान्तरवेद्यत्वाऽऽवेदिका स्यादित्यर्थः ॥

मू० तदा स्वस्य प्रवेशात्स्वप्रकाशापत्तिः, अप्रवेशादनवस्था, [b] अवेदने शेषासिद्धा सर्वासिद्धिः,—इति व्यसनं दुरुत्तरमेव। [c] ये च मानमेयभावाश्रया दोषाः कीर्तनीयास्तेऽपि प्रसज्येरन्। [d] नच तैर्दोषैर्नास्त्येव ज्ञानमित्यास्थेयम्। [e] स्वतः सर्वसिद्धस्य दुरपह्नवत्वात्, [f] स्वप्रकाशाङ्गीकारादेव चाऽनुभवस्य सर्वदोषहाने [g] वक्ष्यमाणत्वात्। [h] प्रकाशात्मतामात्रस्यैव स्वतःसिद्धिसम्भवे जडात्मनां धर्माणां केषामपि तदन्तर्भावानुपपत्तिः।

टी० [a] "अनवस्थे"ति। तथाचाऽनिर्मोक्षापत्तिरिति भावः॥ [b] "अवेदने"इति। चरमवित्तेरवेदने इत्यर्थः॥ ज्ञानस्य ज्ञानान्तरवेद्यत्वे दोषान्तरमाह-। [c] "येचे"ति। "नाऽत्यापत्त्या प्रमामात्रात्तेऽर्थाः स्वीक्रियोचिताः। तद्वियस्तदुरीकारे स्वाश्रय कश्चिकित्सतु"[1]—इत्यादिदोषा मानमेयभावाश्रिता अत्र कीर्तनीया इत्यर्थः। यद्वा. प्रमाणखण्डनप्रकरणे दोषा[2] ये कीर्तनीयास्तेऽपि स्युरित्यर्थः॥ इदानीं स्वाभिमतां स्वप्रकाशब्रह्मसिद्धिं कटाक्षयन्नाह-। [d] "नचे"ति। मानमेयखण्डनप्रकरणोक्तदोषैर्नाऽत्यापत्त्यादयुक्तदोषैश्च विज्ञानस्वरूपमपि न सिद्ध्येत्, तथाच सर्व-

(१) इयं च पञ्चविंशकारिका, तस्या अयमर्थः,—प्रमामात्राद्घटादिसिद्ध्यङ्गीकारेऽन्यविषयकप्रमयाऽन्यस्यापि सिद्धिस्स्यात् तस्मात् अत्यापत्त्या=अतिप्रसङ्गेन, ते घटादयोऽर्थाः प्रमामात्रात् स्वीक्रियोचिताः=स्वीकर्तव्या, न. तद्धियस्तदुरीकारे=घटज्ञानाद्घटस्य पटज्ञानात्पटस्य, सिद्ध्यङ्गीकारे तु घटादपि घटस्य, पटादपि पटस्य, सिद्धिः स्याज्ज्ञानकर्तृनिविष्टत्वाद्घटादेः,—इत्याश्चर्यम् इति।

(२) ज्ञानान्तरवेद्यत्वे ज्ञानस्य ज्ञानान्तरेण कः सम्बन्धः? न संयोगोऽद्रव्यत्वात्; न समवायः द्वयोर्गुणत्वात्, नापि तादात्म्यम्, एकान्तभिन्नयोरभिन्नयोर्वा तदयोगात्, न विषयविषयिभावः, तस्य सप्तपदार्थान्तर्भावाऽनन्तर्भावाभ्यामनुपपत्तेः नचाऽसम्बद्धमेव ज्ञानं ज्ञानान्तरवेद्यम्, अतिप्रसङ्गात्,—इत्यादयो दोषाः।

शून्यतावाद एव पर्यवस्येत्, नतु "ज्ञानं तावत्स्वप्रकाशं, स्वत एव सिद्धस्वरूपम्"—इति प्रतिज्ञातोऽर्थोऽपि निर्वाहितः स्यादिति भावः[1]) ॥ "स्वत"इति । परतः सिद्धिमपेक्ष्य मानमेयभावव्यवहारक्षोदो न तु स्वतः सिद्धिमपेक्ष्येत्यर्थः ॥ तदेवाह—। "स्वप्रकाशे"ति ॥ 'वक्ष्यमाणत्वादि'ति । "तत्स्वप्रकाशपरमार्थचिदेव भूत्वा"[2]—इत्यादिनेत्यर्थः॥ननु[3])सर्वशून्यतावादादपरेषां[4] पक्षे ज्ञानमात्राभ्युपगम एव विशेषः, सच न स्यात्, यतो[5]ज्ञानाङ्गीकारे तद्धर्माणां सत्तागुणत्वादीनां तत्सिद्धिनान्तरीयकसिद्धीनामभ्युपगमादित्यत आह—। ""प्रकाशात्मने"ति । मानमेयभावाश्रया दोषाः स्वतःसिद्धत्वमात्रमपनेतुमशक्ताः, पराधीनसिद्धीनां तु ज्ञानधर्माणां निरासे शक्ता एवेति भावः । पराधीनसिद्धिकत्वमेवामीषां कथमित्यत उक्तं—'जडात्मनामि'ति ॥

सू० "अत एव धर्मो[6]पग्रहप्रवर्तिष्णुवाग्व्यवहाराऽविषयत्वं; "कालानवच्छेदमादाय च नित्यतोपचारः; "देशानवच्छेदमादाय विभुत्वव्यपदेशः; "प्रकारावच्छेदविरहनिबन्धनश्च सर्वात्मत्वाद्वैतादिव्यवहारः; "सौगतप्राभाकरादिवद्भावे[7], नैयायिकवच्चाभावेऽभावाऽनतिरेकस्वीकारादेव चाऽद्वैताव्याघातः ।

---

(१) पूर्वपक्षिणो भाव इत्यर्थः ।

(२) अयं च "आपातता यदिदमद्वयवादिनीनाम्' इत्यस्याः षड्विंशकारिकाया स्तृतीयः पादस्तदर्थस्तु तत्रैव वक्ष्यते ।

(३) योगाचारादिमतमाश्रित्य ज्ञानभिन्नस्यासत्त्वसाधनप्रपक्रान्तं तत्कथं सिद्ध्येत् यावता ज्ञानसिद्धौ तद्वृत्तिधर्माणां सत्तागुणत्वादीनामपि सिद्धिरान्तरालिकीत्याशङ्कान्वेति । (४) योगाचारादिनास्तिकानां पक्षे इत्यर्थः ।

(५) 'यत'-इति पूर्वं हेतुपदमुपादाय पुनरपि 'अभ्युपगमात्'-इति हेतुपदोपादानं तु न साधु मन्ये ।

(६) धर्मस्य उपग्रहः=स्वीकारः, तेन प्रवर्त्तितुं शीलं यस्य वाग्व्यवहारस्य तस्येत्यर्थः ।

(७) केषुचित्पुस्तकेषु "अभावं अभावं प्रति नैयायिकवच्चाऽभावानतिरेकस्वीकारात्"-इति पाठोऽपि दृश्यते, परन्त्वाऽर्थदृष्ट्या मूलं यथादृष्टमेव रम्यम ।

टी० ननु स्वप्रकाशज्ञानस्य धर्म्मा अपि यदि न स्वीक्रियन्ते तदा "स्वप्रकाशं ज्ञानम्"–इति वाग्व्यवहारोऽपि तत्र कथं स्यात्, धर्मोपग्रहेणैव तत्प्रवृत्तेरित्यत आह । a"अत एवे"ति । प्रकृत(१)वाग्व्यवहारस्तु लक्षणया कथञ्चित्समर्थनीय इत्यर्थः ॥ ननु यदि निर्धर्मकमेव तत्स्वप्रकाशं ज्ञानं, तदा "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिबोधितं तत्र नित्यत्वमपि न स्यादित्यत आह–। b"कालानवच्छेदे"ति । कालतदवच्छेदयोः परमार्थसतोरभावात् कालविशेषोपरागनिबन्धनमनित्यत्वं ब्रह्मणो नास्ति इति तद्विरुद्धं नित्यत्वं तत्रोपचरितं, यथा तवैव 'नीलं तमः'-इत्यत्र नीलविरोधिरक्तत्वाद्यभावनिबन्धनो नीलत्वोपचार इत्यर्थः ॥ ननु व्याप्नोतीति ब्रह्मेत्युच्यते, तथाच निरुक्तिबलात्, उपनिषदि विभुत्वेन श्रवणाच्च, ब्रह्मणो वैभवमवश्यमङ्गीकर्त्तव्यमिति न तन्निर्धर्मकम्, अत एव च नाऽद्वैतम् ? इत्यत आह–। c"देशे"ति । देशतदवच्छेदयोः परमार्थसतोरभावाद्देशविशेषोपरागनिबन्धनमूर्त्तत्वविरहनिबन्धनो वैभवोपचारः पूर्ववदेवेत्यर्थः ॥ तर्हि निर्धर्मके ब्रह्मणि कथं सर्वात्मकत्वव्यवहारः ? कथं चाऽद्वैतव्यवहारः ? तयोर्धर्मनिबन्धनत्वादत आह–। "प्रकारे"ति । घटादौ प्रतिनियतघटत्वादिप्रकारसंसर्गाधीनोऽसर्वात्मकत्वव्यवहार इति तद्विरहाद्ब्रह्मणि सर्वात्मकत्वव्यवहार इत्यर्थः ॥ ननु द्वैताभावोऽद्वैतं, तस्य च ब्रह्माधिकरणं, नतु तदेव ब्रह्म, अभावस्याधिकरणभिन्नत्वात्तथाच तमादाय द्वैतमेवेत्यत आह–। "सौगते"ति । सौगतैः प्राभाकरैश्चाधिकरणस्वरूपमेवाऽभावोऽभ्युपगम्यते नैयायिकैरपि 'घटाभावे पटो नास्ति' इत्यादिप्रतीतेरधिकरणस्वरूपमात्रालम्बनत्वाभ्युपगमाच्च प्रकृते(२) ब्रह्मैव द्वैताभावोऽङ्गीक्रियते ॥

मू० "भ्रमविषयनिषेधवच्च प्रतियोगिनः सर्वथैवासिद्धावपि

---

(१) ननु यदि ज्ञानं वाग्व्यवहाराऽविषयः, कथं तर्हि भवता वाचा व्यवह्रियते इत्यत आह–प्रकृतेति । लक्षणया, ज्ञानविषयतत्सम्बन्धित्वेऽये जहल्लक्षणयेत्यर्थः ।

(२) केषुचित्पुस्तकेषु "प्रकृते ब्रह्मैव"–इति पाठः, तदपेक्षया 'प्रकृत'–इति साधुः, 'प्रकृते'-इति पदान्तरस्य तत्राऽकल्पनात् ।

न काचित् क्षतिः । [b]तदेतत्तु श्रुत्या प्रमाणेनो[c]पलक्षणन्यायात् तात्पर्यतः प्रकाश्यते ; [d]तेन परमार्थतोऽभिधानाभिधेयभावविरहे तात्पर्यतः, श्रुतिस्तस्मिन्नऽविद्यादशायां पराभ्युपगमरीत्या प्रमाणमित्युच्यते ।

टी० ननु द्वैताभावश्चेदद्वैतं तदा प्रतियोगितया द्वैतमभ्युपगन्तव्यम्, तथाच कथमद्वैतं, द्वैतेनैव द्वैतादित्यतआह—। [a]"भ्रमे"ति । नहि निषेधे प्रमितप्रतियोगिकत्वं तन्त्रम्, किं तर्हि, प्रतीतप्रतियोगिकत्वं, लाघवादिति भावः । प्रमितप्रतियोगिकत्वमेव तन्त्रं निषेधे, भ्रमविषयोऽपि ज्ञानान्तरेण प्रमित एव-इत्यादिविस्तरः यद्यपि भेदप्रकाशे(१), तथापि ज्ञानान्तरमप्यप्रमेति हृदयम् ॥ ननु यदि ब्रह्मणो वाग्व्यवहाराऽविषयत्वं तदा तत्र श्रुतिरपि न प्रमाणं भवेदित्यत आह—। [b]"तदेतदि"ति । उपनि, षदां ब्रह्मणि तात्पर्य्याधीनमेव प्रामाण्य, ननु ब्रह्म पदार्थः, वाक्यार्थो वा, धर्माग्रहं विना शक्तेर्योग्यतादेश्चाऽनिरूपणात् । "नित्यं विज्ञानमानन्द ब्रह्म"—इति नित्यविज्ञानानन्दपदैरविशिष्टे स्वार्थे प्रत्येकं गृहीत शक्तिभिः संभूयोच्चारणबलात् तात्पर्य्यबलाच्चाऽविद्यादशायां ब्रह्म बोध्यते इति तत्र श्रुतीनां प्रामाण्यमित्यर्थ. ॥ [c]"उपलक्षणन्यायादि"ति । यथोत्तृणत्वादिकं काकादिपदैरवाच्यमपि बोध्यते तात्पर्य्यबलात्, यथा च "गच्छ गच्छसि चेत्कान्त । पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्"—इत्यादावपदार्थोऽपि गमनाभावः प्रतीयते(२)इति भावः॥ ननु सर्वथैवाऽवाच्ये तात्पर्य्यमपि दुर्घटमित्यत आह । [d]"तेन परमार्थत" इति । पारमार्थिकं वाच्यवाचकभावं न मन्यामहे, ननु काल्पनिकमपि (३)इति भावः ॥ ननु तात्पर्य्यमपि तत्प्रतीतिप्रयोजकत्व(४)वा मीमां-

---

(१) भेदप्रकाशे=भेदसिद्धौ अत्र 'वक्तुं शक्यते'—इति शेषः ।

(२) अत्र 'तथा'—इति शब्दोऽध्याहर्तव्यः पूर्वं यथाशब्दस्य सांनिध्यात् ।

(३) अत्रापि "न मन्यामहे"—इत्यनुवर्तनीयम ।

(४) क्वचित्पुस्तके 'तत्प्रतीतिप्रयोजनकम्'—इति पाठः, क्वचित्तु 'तत्प्रतीति प्रयोजनकत्वम्' इति ।

ननु "स्वेन प्रकाश्यते" इति स्वप्रकाशपदं कर्मव्युत्पन्नं[1]), तच्चानुपपन्नं, क्रियाकर्मभावस्य भेदघटितत्वादित्याशङ्कते—। [b]"ननु चे"ति ॥ ननु क्रियाकर्मभावस्याऽभेदे को विरोधः ? इत्यतआह—। [c]"कार्य्ये"ति । अभेदे जन्यजनकभावो विरुद्ध इत्यर्थः ॥ एतदेव कथमत आह—। [d]"पूर्वापरे"ति । विशेषः=नियमगर्भत्वं, तथाच नियतपूर्ववर्तित्वं हेतुत्वं, तन्निरूपितनियताऽनन्तर्य्यं हेतुमत्त्वं, तच्चाभेदे विरुद्धमित्यर्थः ॥ एतदेव कथमत आह । [e]"तदनवच्छिन्ने"ति । कार्य्यानवच्छिन्नो हि कालः कार्यपूर्वकालः, कार्यमेव च कारणं, तथाच स्वा(२)नवच्छिन्ने काले स्वमित्येको विरोधः, स्वकाल एव स्वाऽकाल इत्यपरः, तदवच्छिन्न(३)एव कालस्तत्प्रागभावावच्छिन्न इत्यर्थः ॥

मू० [a]क्रियायाः कर्मजन्यतानियमानङ्गीकारात्, [b]सर्वथैवानागतविषयविज्ञाने तदसम्भवात्; [c]क्वचिज्जनकतामादाय च कर्मणि कारकत्वव्यपदेशात् । [d]करण(४)व्यापारविषयत्वाद्वा परसमवेतक्रियाफलभागित्वाद्वा कर्मलक्षणाद् (विनापि क्रियाजनकत्वेन) कर्मव्यवहारोपपत्तेः । [e]किंच(५) तत् कर्मत्वं यत्स्वं प्रति विरुद्ध्येत ? । * परसमवेतक्रियाफलभागित्वम् *?—इति चेन्न, [f]अपादानस्यापि व्याप्तेः(६) । * अपादानं कर्मापि *?—इति चेन्न, 'वृक्षात्पतति पर्णम्'—इति वत् 'वृक्षं पर्णं पतति'—इत्यपि स्यात् ।

(१) कर्मव्युत्पन्न=कर्मव्युत्पत्तिसिद्धम् ।

(२) स्वशब्देन सर्वत्र प्रकृते कार्य्यं ग्राह्यम् ।

(३) 'स्वकाल एव स्वाऽकाल'—इत्यस्य विवरणं—तदवच्छिन्न इत्यादि ।

(४) क्रियाजनकत्वेन विनापि, करणव्यापारविषयत्वाद्वा परसमवेतक्रियाफलभागित्वाद्वा कर्मलक्षणात् कर्मव्यवहारोपपत्तेः—इत्यन्वयः । कर्मलक्षणात्=कर्मपदप्रवृत्तिनिमित्तात्, लक्षणं तु कर्मणः सर्वांशे न सम्भवति ।

(५) पूर्वं क्रियायाः कर्मजन्यतां क्वचिदङ्गीकृत्य पर्य्यहारीदिदानीं कर्मत्वमेव न निरूपणगोचरं इत्याह—किञ्चेति ।

(६) कर्मलक्षणस्याऽपादानव्यापकत्वादित्यर्थः (कर्मलक्षणस्याऽपादानेऽतिव्याप्तिरिति तु फलितम्) । 'अपादानस्यातिव्याप्तेरि'ति क्वाचित्कः पाठस्तु कथञ्चिल्लक्षणयोजनेऽपि दुरूहयोजनतयोपेक्षितः ।

टी० स्यादयं विरोधो यदि कर्म कारकं(१) भवेत्तदेव तु नास्तीत्याह—। "'क्रियाया' इति ॥ ननु नियतपूर्ववर्त्तित्वे सत्यपि कथमस्याऽकारणत्वमत आह—। "'सर्वथे'ति । भाविव्यक्तिविषयकज्ञानेच्छादौ व्यभिचारान्नियतपूर्ववर्तित्वमप्यस्य नास्तीत्यर्थः ॥ ननु यद्येवं, तदा पाणिनेः कारकमध्ये कर्मपरिगणनं किं निबन्धनमित्यत आह—। "'क्वचिदि'ति । 'आत्मानं जानामि' इत्यादौ कर्मणः क्रियाजनकत्वमपि सम्भवतीति तथा परिगणनमित्यर्थः ॥ ननु तथाप्यतीतादिसाधारणकर्मपदप्रवृत्तिनिमित्ताभावात्कथमनुगतः कर्मव्यवहारः ? इत्यत आह—। "'करणे'ति । अनागतादिकर्मणि करणस्य चक्षुरादे(२)र्लिङ्गादेर्वाप्रत्यासत्त्यादि-लिङ्गपरामर्शादिलक्षणव्यापारविषयत्वात्तद्व्यवहार इत्यर्थः ॥ अपि च, त्वया निरुच्यमानं कर्मलक्षणं कथञ्चिदपि विचारं न सहिष्यते इत्याह—। "'किञ्चे'ति । परपदं कर्मभिन्नपरं, तथाच परसमवेतायाः क्रियाया यत्फलं तद्भागित्व(३)मित्यर्थः ॥ 'वृक्षात्पर्णं पतति' इत्यत्र वृक्षस्याऽपादानस्य (पर्णगतपतनक्रियाया यत्फलं विभागस्तच्छालिन) कर्मत्वं स्यादित्याह—। "'अपादानस्ये'ति ॥ नन्वपादानस्य कर्मत्वमपि स्यात् को दोष इत्याह—। "'अपादानमि'ति ॥ अपादानस्य कर्मत्वे "कर्मणि द्वितीया" इत्यनुशासनबलात् 'वृक्षं पर्णं पतति' इत्यपि प्रयुज्येतेत्याह—। "'वृक्षादि'ति ॥

मू० " * विवक्षातःकारकाणि भवन्तीति तदविवक्षया नैवम् *?—इति चेन्न, वस्तुनः सतस्ताद्रूप्यस्य यदि विवक्षा स्यात्तदा तदपि(४)स्यात्। * 'अपादानस्य कर्मत्वं न विवक्ष्यते इति शाब्दिकसंप्रदायोऽयम्' ?—इति

(१) कारकं, क्रियाकारणमित्यर्थः ।

(२) चक्षुरादेर्लौकिकप्रत्यासत्त्यादिलक्षणव्यापारविषयत्वात् लिङ्गादेर्वा लिङ्गपरामर्शादिलक्षणव्यापारविषयत्वादनागतकर्मणि कर्मत्वव्यवहार इति विभागः, एकदेशान्वयस्तु शरैः शातितपत्राणीत्यादिवच्च विरुद्धः ।

(३) 'काष्ठं छिनत्ति'—इत्यत्र काष्ठेतरकुठारादिसमवेतक्रियाया यत्फलं द्वैधीभावस्तद्भागित्वं भवति काष्ठस्य कर्मण इति लक्षणसमन्वयः ।

(४) तदित्यव्ययं, प्रयोगार्थं प्रयुक्तम् स प्रयोग इत्यर्थः ।

चेत्, [b]तर्हि तत्र निवृत्त(१)सर्वकर्मव्यवहारेऽपि स्वकृतकर्मलक्षणानुरोधेन कर्मत्वमभ्युपगच्छता वस्तुमात्रं कर्मेत्याद्यपि लक्षणं सावकाशितं स्यात्। कथं च लोकोत्तर(२)प्रज्ञेन निवृत्तसर्वकर्मव्यवहारेऽपि स्वकृतकर्मत्वमस्तीत्यधिगतम् ?। *अपादानेतर'दीदृशं कर्म *?-इति चेन्न, [f]तत्रापि 'नदी वर्द्धते'-इत्यादौ तद्बु-द्धेरप्राप्तनीरभागादिप्राप्तिफलायाः सकर्मकत्वापत्तेः।

टी० ननु वृक्षस्य सत्यपि कर्मत्वेऽपादानत्वमेव विवक्षितमिति पञ्चम्येव भवति न द्वितीयापीत्याह-। [a]"विवक्षात"इति ॥ वास्तवं यदि कर्मत्वं तदा विवक्षायाः=इच्छायाः प्रयोक्तृमात्रतन्त्रत्वेन कदाचित्कर्मत्व-विवक्षया प्रयोगोऽपि स्याद्दित्याह-। [b]"वस्तुत"इति ॥ ननु भवेदेवं यदि प्रयोक्तृमात्राधीना विवक्षा स्यात्तत्वं, किंतु शाब्दिकसंप्रदायानुरुद्धा, तथाच ग्रामगमनादिवत्(३) 'वृक्षं पर्णं पतती'त्यपि न प्रयुज्यते इत्याश-ङ्कते-[c]"अपादानस्ये"ति ॥ अपादानात् सकलकर्मव्यवहारविरहाद्व्य-वहर्तव्यस्य कर्मत्वस्यापि निवृत्तिः, त्वया परं स्वलक्षणाऽनुरोधेन कर्मत्व-तवेष्यते तदा प्रमेयत्वमेव लक्षणं क्रियतां किं परसमवेतेत्यादिविशेषलक्ष-णभारेणेत्याह-। [d]"तर्ही"ति । यद्यपि नेदं(४) कर्मलक्षणं, किंतु कर्मपद-

(१) निवृत्तः सर्वेषां कर्मव्यवहारो यस्मिन्नपादाने तस्मिन्नित्यर्थः ।

(२) लोके उत्तरा=उद्गता प्रज्ञा यस्य स लोकोत्तरप्रज्ञस्तेन ।

(३) अत्र "ग्रामाद्गमनमित्यादिवत्' -इति पाठ उचितस्तथैव दृष्टान्तसङ्गति-सम्भवात्, तथाच गतिपतत्योः संयोगानुकूलव्यापारार्थकत्वाऽविशेषेऽपि यथा ग्रामं गच्छ-तीत्येतदर्थे ग्रामाद्गच्छतीति प्रयोगो न सांप्रदायिकस्तथा वृक्षात्पर्णं पततीत्यस्यार्थे वृक्षं पर्णं पततीत्यपि न प्रयुज्यते इत्यर्थः -इत्यस्मद्गुरुचरणाः श्री७मद्रामभिश्रशास्त्रीणाः । श्रीमन्तो भागवताचार्यास्तु-स्यालोपुनाकल्पायादिपाठवत् 'ग्रामगमनादिवत्" इत्यपि पाठो नायुक्तः,दृष्टान्तश्चार्थव्यतिरेकी, तथाच यथा ग्रामं गच्छतीति न प्रयुज्यते, न तथा वृक्षपर्णं पततीति प्राहुः। अहं तु 'इत्यपि न' इत्यपिशब्दस्वारस्यानुरोधेन यथाश्रुतपाठ-स्वारस्यानुरोधेन च-यथा 'ग्रामगमन' इति निर्विभक्तिकपदप्रयोगः सांप्रदायिकैर्नैव युज्यते तथा 'वृक्षं पर्णं पतति' इत्यपि नेत्यनुमन्ये। क्वचित्पुस्तके 'ग्रामगामादिवत्'-इति पाठः।

(४) इदं=परसमवेतक्रियाफलभागित्वम् ।

प्रवृत्तिनिमित्तमात्रं, (लक्षणं तु कारकाणामन्योन्यव्याप्त्यां नास्त्येव, उपचेयसाङ्कर्यात्,) तथापि पदार्थान्तरलक्षणप्रणयनप्रयासोऽपि तत्रानर्थक एव स्यादिति हृदयम् ॥ [c]"ईप्सितमि"ति । परसमवेतक्रियाफलभागीत्यर्थः ॥ [f]"तत्रापी"ति। "नदी वर्द्धते" इत्यत्र,तीरस्य जलसमवेतक्रियाफलतीरसंयोगभागिनः कर्मत्वात्(१),तथाच "नदी तीरं वर्द्धते"—इति प्रयोगः स्यादित्यर्थः ॥

मू॰ "अपादानेतरदितिस्थाने क्रियानाशकेतिकरणे[b] प्यस्य दोषस्य [c]तादवस्थ्यात्, विनाशलक्षणायां वृद्धौ तदसम्भवाच, [d]'वृक्षं त्यजति' इत्यादावकर्मत्वप्रसङ्गाच, [e]'आत्मानं जानामि' इत्यत्र परत्वाभावादव्याप्तेः । [g]* तत्राप्युपाधिभेदात्परत्वं, कर्तृत्वभोक्तृत्वाद्युपहितस्यैवात्मनो ज्ञेयत्वाभ्युपगमात् * ?—इति चेन्न, यतोऽस्तु तावद्यथाकथञ्चिदेवं, [h] तथाप्यध्यात्मविदो निरुपाधिमात्मानं जानतो ज्ञानं नात्मकर्मकं स्यात्, 'पच्यते फलं स्वयमेवेत्यादौ च कर्मकर्त्तरि का गतिः स्यात् ? ।

टी॰ ननु क्रियानाशकपरसमवेतक्रियाफलभागित्वं कर्मत्वं, नच वृक्षस्याऽपादानस्य यद्विभागलक्षणं पतनक्रियाफलं तत क्रियानाशकं, किंत्वधः संयोगस्तत्र क्रियानाशकं फलं, तद्भागिभूम्यादेस्तत्र कर्मत्वमिष्यत एवेत्याशङ्क्य परिहरति-। [a]"अपादाने"ति ॥ [b]"अस्ये"ति । 'नदी वर्द्धते'—इत्यत्रातिव्याप्तिलक्षणस्येत्यर्थः ॥ [c]"तादवस्थ्यादि"ति । तत्रापि तीरनीरसंयोगस्य क्रियानाशकत्वादित्यर्थः ॥ दोषान्तरमाह—। [d]"वृक्षमि"ति । तत्रापि वृक्षपर्णविभागस्य क्रियानाशकत्वाभावा(२)दित्यर्थः ॥ मूललक्षणेऽपादानातिव्याप्तिं समर्थ्याव्याप्तिमाह—। [e]"आत्मानमि"ति ॥ [f]"परत्वाभावादि"ति । आत्मनः कर्मभिन्नत्वाभावादित्यर्थः ॥ योग्यविशे-

(१) 'कर्मत्वम्'-इत्यपि पुस्तकान्तरे पाठः साधुरेव ।

(२) अधोदेशसंयोगस्यैव क्रियानाशकत्वेन विभागस्य तदभावादित्यर्थः ।

वगुणोपहितस्यात्मनः कर्मत्वं, केवलस्य च तद्भिन्नत्वात्परत्वमिति विशिष्टाऽविशिष्टभेदेन प्रकृतेपि लक्षणसत्त्वान्नाव्याप्तिरित्याह—। [g]"तत्रापी"ति । यथाकथञ्चिदित्यस्वरसात् । कर्मभिन्नत्वमुपाधीनां, नतूपहितस्यात्मनोपि इति तदवस्थैवाव्याप्तिः—इत्यस्वरसबीजम् ॥ अभ्युपेत्य दोषमाह—। [h]"तथापी"ति । युञ्जानस्य(१)केवल एवात्मा ज्ञाता, ज्ञेयश्च, निरञ्जनादिश्रुतिबलादित्यर्थः ॥ कर्मकर्तरि परसमवेतक्रिया नास्तीति तत्राव्याप्तिरित्याह—। [i]"पच्यते" इति ॥

मू० ॥ [a]सर्वज्ञमीश्वरं मन्यमानेन च नित्यज्ञाने(२) तस्मिन् भगवति फलनाशकत्वस्यानभ्युपगमात्तं प्रत्येतल्लक्षणाऽसिद्धेः । [b]तस्माद्व्याकरणकारैः शब्दसिद्ध्यर्थं नदी(३) वृद्ध्यादिवत्कर्म्मापि परिभाषितमित्यलं तदनुगतलक्षणगवेषणया । *करण(४)व्यापारविषयः कर्म्म*?—इति चेन्न, हस्तेन रामेण शरेण—इत्यादावतिप्रसङ्गात् । लक्षणं विनापि, क्रियाजनकत्वे सति व्यापारोद्देश्यत्वेन कर्मव्यवहारोपपत्तेः । [c]शेषं चेश्वराभिसन्धौ(५) स्वप्रकाशवादे निर्वक्ष्यामः (६) ।

---

(१) युञ्जानस्य योगिनः ।

(२) अत्र नित्यज्ञानाधारे तस्मिन्भगवति'-इत्यर्थकरणापेक्षया 'भगवति वर्त्तमाने नित्यज्ञाने'-इत्यर्थः श्रेयान् ।

(३) यथा वस्तुतो नदीत्ववृद्धित्वयोरसतोरपि पाणिनिना "यूस्त्याख्यौ नदी" "वृद्धिरादैच्"-इत्यादिसञ्ज्ञा शब्दसिद्ध्यर्था कृता न सार्वत्रिकी तथा कर्मसञ्ज्ञापीत्यर्थः।

(४) बहुषु पुस्तकेषु करणेत्यादिकर्मव्यवहारोपपत्तेरित्यन्तो ग्रन्थो नास्ति; मन्ये तद्युक्तमेव, "इत्यलं तदनुगतलक्षणगवेषणया" इत्युपसंहारानन्तरं पुनः "करणव्यापार"-इत्यादिना लक्षणान्तरोत्थापनस्याऽयुक्तत्वात् ।

(५) खण्डनकारेणेश्वराभिसन्धिर्कवल्याभिसन्ध्यादिनाम्ना चत्वारोऽभिसन्धयः प्रणायिषत, तममुर्थमुपक्रम्य भूमिकायां भूर्य्युपन्यास्यामिति तत्रैवाऽनुसन्धेयम् ।

(६) { क्रियायाः कर्मजन्यत्वाद्यव्यभावो न भाविकः । किञ्च किञ्चन नो कर्मलक्ष्म वक्तुं च शक्यते ॥ ५ ॥ तस्मात् क्रियाकर्मभावानुपपत्तिरुदाहृता । चिद्व्यक्तेः स्वप्रकाशत्वे नास्तीत्येतद्वतोदितम् ॥ ६ ॥ विषयो विषयाभिन्नो भवत्यवेति दुर्ग्रहः । परप्रकारैरेवाथ खण्ड्यतेऽत्र प्रघट्टके ॥ ७ ॥ }

* [d]ननु च्चाऽभेदे विषयविषयिभावस्यैवासङ्गतत्वं, विषयित्वं हि विषयसंबन्धिता, [e]संबन्धश्च भेदमन्तरेणाऽसम्भवदवस्थितिः, [f]संबन्धमितेः संबन्धिस्वरूप(१)भेदमितिव्यतिरेके वैपरीत्यावधारणात् * ? । मैवम् ।

टी० ईश्वरज्ञानस्य हि विश्वमेव कर्म्म, नच सा ज्ञानक्रिया फलनाश्या, नित्यत्वादिति तत्राव्याप्तिरित्याह—। [a]"सर्वज्ञमि"ति । 'फलनाशकत्वस्य'इति बहुव्रीहिः ॥ ननु कर्म्मादिप्रसिद्धिः किंनिबन्धनेत्यत आह—। [b]"तस्मादि"ति ॥ ननु धात्वर्थतावच्छेदक(२)परसमवेतक्रियाफलभागित्वं कर्मत्वं, तेन गमनस्योत्तरसंयोगो धात्वर्थतावच्छेदक(३)स्तद्भागी ग्रामादिः कर्म ; पतनस्याधः संयोगः फलं, नतु विभागः, तेन तद्भागिनोऽपादानस्य न कर्मत्वं ; त्यजेश्च पूर्वदेशविभाग एव धात्वर्थतावच्छेदक इति तद्भागिनो वृक्षस्य कर्मत्वात् 'वृक्षं पर्णं त्यजती'ति भवत्येव ; वृद्धेरवयवोपचयस्य नावच्छेदकं तादृशं फलं, येन तद्भागितया तीरादेः कर्मत्वं स्यादित्यत आह—। [c]"शेषं चे"ति । ज्ञानादिक्रियाया अपि न तादृशं फलं, ज्ञाततादेर्निराकरिष्यमाणत्वात्, संस्कारस्य चाऽनावश्यकत्वादकर्मकत्वापत्ते(४)रिति भावः ॥

ननु माभूत् स्वप्रकाशे कर्मक्रियाविरोधः विषयविषयिभावविरोधस्तु स्यादित्याह—। [d]"नान्वि"ति ॥ विरोधमूलमाह—। [e]"संबन्धश्चे"ति ॥ तत्र हेतुमाह—। [f]"संबन्धमितेरि"ति । यत्र सबन्धिनोः स्वरूपभेदप्रमा तत्रैव संबन्धप्रमा, प्रकृते च संबन्धिभेदप्रमानिवृत्त्या संबन्धप्रमा-

(१) सम्बन्धिनोः स्वरूपं=सम्बन्धिस्वरूपं, तस्य भेदमितिः=भेदप्रमा, तस्या व्यतिरेके=ऽभावे, सम्बन्धमितेर्वैपरीत्यावधारणात्=अभावनिश्चयादित्यर्थः ।

(२) धात्वर्थतावच्छेदकस्य फलेऽन्वयः ।

(३) गमनं हि पूर्वदेशपरित्यागपुरःसरमुत्तरदेशसंयोगाऽनुकूलो व्यापारस्तत्र भवत्येवोत्तरसंयोगो धात्वर्थतावच्छेदक इत्यर्थः ।

(४) ज्ञानादिक्रियाया अकर्मकत्वापत्तेरित्यर्थः ।

निवर्तते (१)तन्निवृत्तौ च प्रमेयस्य(२)निवृत्तिरिति नाभेदे विषयविषयिभावसम्बन्ध इत्यर्थः । यद्वा, भिन्नसम्बन्धिप्रमा सम्बन्धप्रमाकारणमतःकारणनिवृत्त्या कार्यनिवृत्तिरित्यर्थः ॥

मू० [a]विषयविषयिभावो हि सम्बन्धो न सम्बन्धिस्वरूपाद्भिन्नः, तथाभूतत्वेपि(३) चान्ततस्तत्सम्बन्धस्यापि स्वाश्रयात्मकत्वमभ्युपगम्यमनवस्थाभयात्, [b]तथा सति च सैव(४) यथा सम्बन्धमितिः सम्बन्धस्वरूपात्सम्बन्धिनोर्भेदमनादायैव पर्यवस्यतीत्यभ्युपगन्तव्यम् [c]स्वभावसम्बन्धस्येतरसम्बन्धमर्यादातिशायित्वात् [d]तथा विनापि सम्बन्धिभेदं विषयविषयिभावात्माऽयं सम्बन्धः पर्य्यवसास्यति, तदवगमोपि तथावगमव्यतिरेकेणैव भविष्यति को विरोधः? । * [e]नचैवं घटतज्ज्ञानयोर्यादृग्विषयविषयिभावस्ततो मात्रया(५)पि स्वप्रकाशे विषयविषयिभावाऽन्यत्वे बाध्यतैकत्र स्यात् * । अस्त्येव ह्यविद्याविद्यमाने घटतज्ज्ञाने बाध्यत्वं, परमार्थसति तु स्वप्रकाशे पारमार्थिकत्वमिति द्वयो[f]रननुगमेपि न दोषः ।

---

(१) व्यापकनिवृत्त्या व्याप्यनिवृत्तेरावश्यकत्वादिति भावः । यद्यपीदं वाक्यं साक्षाद् व्याप्यनिवृत्त्या व्यापकनिवृत्तिमभिधत्ते तथापि प्रकृते साध्यसाधनयोः समव्याप्तिकत्वाद्व्यापकनिवृत्त्या व्याप्यनिवृत्त्यभिप्रायकमेवेत्येके प्राहुः; परे तु कारणनिवृत्त्या कार्य्यनिवृत्त्यभिप्रायकोयं ग्रन्थ इत्येव व्याचक्षते ।

(२) प्रमेयस्य = सम्बन्धस्य ।

(३) तथाभूतत्वेपि = सम्बन्धिस्वरूपाद्भिन्नत्वेपि ।

(४) साऽन्तिमसम्बन्धमितिः सम्बन्धिस्वरूपाद्भेदमनादायैव पर्यवस्यतीत्यभ्युपगन्तव्यं यथा, तथा प्रथमसम्बन्धमितिरपि स्यादिति भावः ।

(५) मात्रया = लेशतोऽपि, वैलक्षण्ये विरुद्धयोरुभयोः पारमार्थिकत्वायोगादेकत्र बाध्यता स्यादित्यर्थः ।

टी० [a]"विषयविषयिभाव"इति । त्वयापि विषयविषयिभावः सम्बन्धः सम्बन्धिभिन्नो नाऽभ्युपगम्यते, अन्यथा, तस्यापि सम्बन्धस्य सम्बन्धान्तरमभ्युपेयमेवं पर्य्यवसानं न स्यादित्यर्थः ॥ भिन्नसम्बन्धिमितेः सम्बन्धमितिं प्रति न कारणत्वं, न वा व्यापकत्वं,व्यभिचारादित्याह—। [b]"तथासती"ति ॥ ननु सम्बन्धान्तरापेक्षया कथमिदं वैषम्यमत आह—। [c]"स्वभावे"ति ॥ परमते स्वरूपसम्बन्धस्य सम्बन्धिद्वयात्मकत्वमुपपाद्य तद्दृष्टान्तेन स्वमते एकसम्बन्धिमात्रात्मकत्वं स्वरूपसम्बन्धस्योपपादयति—। [d]"तथा विनापी"ति ॥ ननु सम्बन्धान्तरापेक्षया स्वरूपसम्बन्धस्य वैषम्यमस्तु, त्वया तु स्वरूपसम्बन्धापेक्षयापि वैषम्यमुच्यते, इत्येकस्याऽवास्तवत्वमत आह—। "नचे"ति । भेदे सति योयं विषयविषयिभावः स एव लोकसिद्धोपि बाध्यते, बाधस्याभिधास्यमानत्वात्; यथा सर्वलोकसिद्धः शरीरादावात्मव्यवहारो, यथा वा तमसि नीलव्यवहार इत्यर्थः ॥ [f]"अननुगमेपी"ति । लोकसिद्धविषयविषयिभावस्य भेदघटितत्वं, स्वप्रकाशविषयविषयिभावस्य चाऽभेदघटितत्वम्,—इत्यननुगमो न दोषः, भेदघटितस्य बाध्यत्वेनैकरूपतामात्रपरिशेषादननुगमस्यैवापास्तत्वात् । यद्वा, स्वरूपसम्बन्धः क्वचित्पारमार्थिकः क्वचिदपारमार्थिक इत्यननुगमेपि न दोष इष्टत्वादित्यर्थः ॥

मू० [a]अथवा, स्वात्मना सह क्रियाकर्म्मभावो विषयविषयिभावो वा स्वप्रकाशार्थं इति नाभ्युपेयमेव, [b]यथा तु भवतां सत्तासम्बन्धादितरत्र सद्व्यवहारव्यवस्था (सत्ता तु स्वयमेव सद्रूपा, नचैतावता स्वात्माश्रयता तस्याः) तथा ज्ञानमपि स्वत एव सिद्धस्वरूपम् ।

टी० ननु, सिद्धत्वेन कर्मत्वमसिद्धत्वेन च क्रियात्वं, तदुभयं चैकदा विरुद्धम्; एवं 'विषयविषयिभावः संबन्धः संबन्धिद्वयादभिन्नः'—इति

कथंचिदनवस्थादिभयेनाङ्गीकृतं (१); 'स एव संबन्धः स एव संबन्धी(२) स एव चापरः(३) संबन्धी'—इति तु सर्वथा दुर्घटं, केनानुरोधेनाभ्युपेयं ? कथं वा स्वपरविभागमात्रेण व्यवहारसमर्थनम् ? (४)। यदि लोकसिद्धो विषयविषयिभावो नाद्वैतं सहते तदा तदपि त्यज्यतामित्याशयेनाह(५)—।
a "अथवे"ति । b 'यथा तु भवतामि'ति । * न च सत्ता न सद्व्यवहारहेतुः किंतु सत्तासमवायः, स च यथा घटादौ तथा सत्तायामपि, तस्य संबन्धत्वेन द्विष्ठत्वात्, सामान्यान्यविशेषेषु सत्तैकार्थसमवायात्; तदेकार्थ(६)समवायोपि हि तत्समवाय एवेति वाच्यम् * । तर्हि सत्तासमवायः स्वरूपत एव सन्निति वक्तव्यम्, तथा च यथा सत्तायां वा तत्समवाये वा स्वरूपतः सद्व्यवहारस्तथा परोक्षज्ञानात् ज्ञानसिद्धिस्तु स्वत एवेत्यर्थः ।

मू० अथवा, यथा बहुव्रीहिसमासे तद्गुणसंविज्ञाने गुण(७)मादायैव प्रधानस्यान्यपदार्थस्य बहुव्रीहिसिद्धपदप्रतिपाद्यता तथा विज्ञानस्याऽविषयमपि स्वात्मानमादायैव स्वविषयव्यवहारप्रवर्तनं समर्थ्यताम् । सोऽयं गुरूणां सविषयकविज्ञानस्वप्रकाशतापक्षो न ब्रह्मस्वप्रकाशतापक्षः, तत्र विषयाभावात् । एतावन्मा-

(१) अत्रापि 'विरुद्धम्'—इत्यनुषञ्जनीयम् ।

(२) संबन्धी=सम्बन्धप्रतियोगी ।

(३) अपरः सम्बन्धी—सम्बन्धाऽनुयोगी ।

(४) 'समर्थनम्' इत्यन्तं पूर्वपक्षग्रन्थः 'तद्वत् इति चेत्'-इत्यध्याहृत्य 'यदि लोकसिद्धः'-इत्यादिः सिद्धान्तग्रन्थो योजनीयः ।

(५) केषुचित्पुस्तकेषु 'इत्याशयेनाहे'त्यस्य स्थाने 'इत्याशङ्क्याह' इति पाठो दृश्यते सोऽयं 'समर्थनम्' इत्यन्तपूर्वपक्षग्रन्थानवबोधेन कैश्चिदाधुनिकैः प्रकल्पित इत्यालक्ष्यते ।

(६) ननु, एकार्थसमवायस्य विशेषेषु सद्व्यवहारोपपादकत्वेपि शुद्धसमवायस्य कथं तदुपपादकत्वमित्यत आह—तदेकार्थेति ।

(७) गुणं—गौणं समस्यमानकर्णादिपदार्थम् ।

त्रेण तु स्यात्,—यथा स्वाऽविषयेपि कुटादौ बहुव्रीहि वाक्यं व्यवहारं प्रवर्तयति—इति, तथा ज्ञानमविषये-प्यात्मन्यविद्यादशाया(¹)मिति ।

टी० ननु, "ज्ञानं स्वत एव सिद्धमि" त्यनुपपन्नम् । "स्वत"—इति पञ्चम्या सिद्धिं प्रति स्वस्य हेतुत्वमभिधीयते, सिद्धिश्च द्वयी - ज्ञप्तिरुत्पत्तिर्वा न स्वस्माद्भवितुमर्हति, हेतुहेतुमद्भावस्य ज्ञाप्यज्ञापकभावस्य वा संबन्धस्य भेदघटितत्वात् । सत्ता तु सत्तया नोत्पाद्यते ज्ञाप्यते वा; किंतु विधिमुखप्रत्ययवेद्यत्वादिना सदन्तरगुणेन,(²) 'सत्ता सती'—इति गौणो व्यपदेश इति महद्वैषम्यमित्याशये (³) नाह—। "अथवे'ति । यथा लम्बकर्णादि-पदं स्वविषये शक्त्या (⁴), लक्षणया वाऽन्यपदार्थे व्यवहारं प्रवर्तयदेव स्वाविषयेपि समस्यमानपदार्थे व्यवहारं प्रवर्तयति तथा ज्ञानं स्वविषये घटादौ व्यवहारं प्रवर्तयत्स्वाविषयेपि स्वस्मिन् व्यवहारं प्रवर्तयतीति, व्यवहारस्य ज्ञानसाध्यत्वात;स्वभिन्नज्ञानसाध्यत्वस्य गौरवेणापास्तत्वादित्यर्थः॥ ननु, 'स्वविषये ज्ञानं व्यवहारं प्रवर्तयत्स्वस्मिन्नपि व्यवहारं प्रवर्तयति'—इति वेदान्तिनामनभिमतं, विषयाऽनभ्युपगमादित्यत आह—। "सोयमि" ति । गुरूणां=प्राभाकरगुरूणां, मान्यानां वा ॥ अविषये व्यवहारप्रवर्तनं गुरूणामिव वेदान्तिनामपि तुल्यमिति तन्मात्रेतद्गुणसविज्ञानबहुव्रीहिपद दृष्टान्त इत्याह—। ""एतावन्मात्रेणे"ति । कुटः=घटः, "घटः कुटनिपावस्त्री"—

---

(१) 'अविद्यादशायाम्' = इत्यतोऽनन्तरं 'व्यवहारं प्रवर्तयति' इत्यनुषञ्जनीयम्।

(२) सदन्तरगुणेन = द्रव्यगुणकर्माऽन्यतमगुणेन ।

(३) इत्याशयेनाह इति = पूर्वपक्षिण आशयं हृदि निधायाऽस्वरसेन पक्षान्तरमाहेत्यर्थः । अस्यैवार्थस्याऽनवबोधात् कैश्चिदत्र 'इत्याशङ्क्याह'-इत्येव पाठः क्लृप्तः, स चाऽसङ्गतः, बहूनामनुग्रहस्य न्याय्यत्वाद्गतिसम्भवाच्च । एवमग्रेपि ।

(४) स्वविषये ऽन्यपदार्थे शक्त्या, लक्षणया वा, व्यवहारं प्रवर्तयदिति सम्बन्धः, वैयाकरणानां मते शक्त्या व्यवहारं प्रवर्तयन्नैयायिकानां च लक्षणयेति ध्येयम् ।

इति कोशा(१)त्। "गाङ्कुटादिभ्यः" इत्यादिसूत्रस्थकुटपदं वा दृष्टान्तः। कुटादौ=कुटादिस्थले, यद्बहुव्रीहिवाक्यं तत्स्वाविषयेपि व्यवहारं प्रयोजयतीति योजना; न तु(२)सप्तम्योः सामानाधिकरण्यम्॥ ननु, स्वाविषये स्वस्मिन् ज्ञानं व्यवहारप्रवर्तकमित्यत्रापि तवाऽद्वैतवादिनो न दृष्टान्तोऽस्ति, दृष्टान्तस्य व्यवहारस्य च ब्रह्मगोचरस्याऽनभ्युपगमादित्यत आह—। [d]"अविद्ये"ति॥

मू० [a]तदेवं यद्यदन्यत्र(३)दृष्टवैधर्म्यं स्वप्रकाशे पर्य्यवसास्यति तत्सर्वमन्यथानुपपत्तिरेव स्वप्रकाशसाधकतया प्रदर्शिता स्वीकारयिष्यति। [b]तद्यथा—अन्यो ज्ञाताऽन्यश्च ज्ञेय इत्यन्यत्र दृष्टमहमिति व्यवहारान्यथानुपपत्त्या त्याज्यं; तथाऽन्यज्ज्ञानमन्यज्ज्ञेयमिति जानामीति व्यवहारान्यथानुपपत्त्या त्याज्यं; [c]सर्वतो बलवती ह्यन्यथानुपपत्तिस्तथादृष्टतामात्रबलमवलम्ब्य प्रवृत्तं तर्कशतमपि बाधते।

टी० ननु, कुटादावपि तद्गुणसंविज्ञानबहुव्रीहेरनुशासनबलाल्लक्षणया, शक्त्या वा, कुटोपि विषय एव; तथाच व्यवहारानुरोधात्स्वप्रकाशेपि कर्मक्रियाभावो विषयविषयिभावो वाऽवश्यमङ्गीकर्त्तव्यः, स चाऽभेदे सर्वथानुपपन्न इति कथं स्वप्रकाशत्वम्?। न च दृष्टान्तमात्रादिष्टसिद्धिः, इति प्रमाणं किंचिदावश्यकमत आह—। [a]"तदेवमि"ति। ज्ञानस्य ज्ञानान्तरप्रकाश्यत्वेऽनवस्था, शेषासिद्ध्या सर्वासिद्धिरनिर्मोक्षापत्तिश्चेत्यन्यथानुपपत्त्या स्वप्रकाशताऽवश्यमङ्गीकर्त्तव्या, सा च यावता विना न सिद्ध्यति तावदवश्यमङ्गीकर्त्तव्यम्; अतो विषयविषयिभावं क्रियाकर्मभावं वा कथमद्वैतेप्यर्थो-

(१) का. २। वैश्य व.। श्लो. ३२।

(२) अस्मिन्द्वितीयपर्यायके "स्वाऽविषये" "कुटादावि"ति सप्तम्योः पूर्वपर्यायके पर्यायितसामानाधिकरण्यवत्सामानाधिकरण्यं नेत्याह-नत्विति।

(३) अन्यत्र = लोके कर्मक्रियाभावो विषयविषयिभावो वा भेदे दृष्टस्ततो वैधर्म्यं ज्ञानस्य स्वप्रकाशत्वेऽभेदे कर्मक्रियाभावादिः।

पत्तिर्न साधयिष्यतीत्यर्थः ॥ ननु, यदन्यत्रादृष्टं तदप्यन्यथानुपपत्तिः साध-यतीत्यप्यदृष्टमेवेत्यत आह—। "तद्यथे"ति । ज्ञातुर्ज्ञत्वं, ज्ञानस्य च ज्ञेयत्वमन्यत्रादृष्टचरमप्यहमिति व्यवहारान्यथानुपपत्त्या, ज्ञानामीति व्यवहारान्यथानुपपत्त्या च, त्वयाऽभ्युपेयते, तथा प्रकृतेपीत्यर्थः ॥ नन्वन्यथानुपपत्तेः कथमयं महिमा? कथं वाऽन्यथानुपपत्तिरेव दृष्टेन न बाध्यते? इत्यत आह—। "सर्वत"इति । यदि तज्ज्ञानं क्रिया स्यात्तदा कर्म न स्यात्, यदि विषयः स्यात्तदा विषयि न स्यात्, यदि स्वं न विषयीकुर्यात्तदा स्वस्मिन् व्यवहारं न प्रवर्तयेत्—इत्यादितर्कशतमप्यन्यथानुपपत्तिबाध्यमेव, न तु तद्बाधकमित्यर्थः ॥

मू० "तदिदमाहुः,—"प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि"(१)इति । 'तस्मात्—

अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका ।
पिनष्टि दृष्टवैमत्यं(२)सैव सर्वबलाधिका ॥ ६ ॥
वाच्यान्यथोपपत्तिर्वा त्याज्यो वा दृष्टताऽऽग्रहः ।
नह्येकत्र समावेशश्छायाऽऽतपवदेतयोः ॥ ७ ॥ इति ।

'तदित्थं त्वदङ्गीकृतसद्विचारलक्षणोपपन्नैरेवंविधैर्विचारैः स्वप्रकाशता भवता सुप्रतिपदा; "अस्माभिस्तु संवेदनबलादेव स्वतःसिद्धरूपं विज्ञानमास्थीयते इति।

टी० ननु, तवैवं प्रौढिमात्रं न तु प्रमाणिकानामिदमनुमतमत आह—।" "तदिदमि"ति । यत्रादृष्टे प्रमाणं प्रवर्तते तददृष्टमपि (नित्यं ज्ञानम्, अशरीरी कर्ता, सुखदुःखात्यन्ताभाववानात्मा; निःस्पर्शं मूर्त्तं,यथा मनः, जातमप्यविनाशि, यथाध्वंसः, अनुत्पन्नमपि विनाशि,यथा प्रागभावः, स्वयमेव स्ववृत्ति, यथा प्रमेयत्व) प्रामाणिकैरभ्युपगम्यते इत्यर्थः । अथो-

---

(१) "अदृष्टशतभागोपि न कल्प्यो निष्प्रमाणकः"—इत्युत्तरार्द्धम् ।

(२) दृष्टवैमत्यं = प्रत्यक्षविरोधं, पिनष्टि = परिहरतीत्यर्थः ।

पत्तेरन्यथोपपत्तिमात्रं बाधकं, प्रकृते तु सा नास्त्येवेत्यर्थः ॥ उक्त मर्थं श्लोकद्वयेन संगृह्णाति—[b]"तस्मादि"ति ॥ नन्वर्थापत्त्या स्वप्रकाशतासिद्धावपि द्वैतं तदवस्थमेव, स्वप्रकाशज्ञानभिन्नाया अर्थापत्तेर्विचारस्य चैतादृशस्य त्वयाप्यभ्युपगमादित्यत आह—[c]"तदित्यमि"ति । नेयमर्थापत्तिर्न चायं विचारो मयाभ्युपेयते किंतु त्वदभ्युपगमेन त्वं बोध्यसे इति न द्वैतापत्तिरित्यर्थः ॥ तर्हि स्वप्रकाशज्ञानसिद्धिरपि कथं तवेत्यत आह—[d]"अस्माभिरि"ति । यद्यपि तदेव ज्ञानं(१)प्रकाशकं, प्रकाश्यम्, अभ्युपगन्तव्यम्, अभ्युपगमः, अभ्युपगन्तृ(२), स्वप्रकाशत्वेन परबोधनं, बोध्यश्च परः, बोधकं वचनं चेति संकलयतो महामाहसिकत्वमसंकलयतश्च द्वैतापत्तिस्तथापि प्रपञ्चबाधाया वक्तव्यतया सर्वैत्र पर्यवसास्यतीति हृदयम् । यद्यपि यत्स्वप्रकाशं ज्ञानं त्वयाभ्युपगतं तस्य सर्वोऽयं प्रपञ्चः, स्वं च विषय इत्यस्तु, तथाच तद्विषयतया न प्रपञ्चमिथ्यात्वं, नाप्यद्वैतं, प्रपञ्चस्यैव सत्त्वात्; नापि तादृशे(३)तत्र प्रमाणान्तरापेक्षा, स्वतः सिद्धत्वात्; नाप्यस्माकमपसिद्धान्तः, ईश्वरज्ञानस्य तादृशस्यास्माभिरभ्युपगमात् ; नापि ज्ञानस्य ज्ञानान्तरवेद्यतापत्तौक्तदोषः, तेनैव सर्वविषयकेण सर्वदोषनिरासात्; तथाच स्वबधाय कृत्योत्थापनमेतत्–स्वप्रकाशज्ञानसाधनम् । *तस्य प्रपञ्चो विषय इत्यत्र किं प्रमाणम्*?—इति चेन्न, प्रपञ्चविषयतायामपि तस्यैव ज्ञानस्य प्रमाणत्वात्; त्वन्मते स्वप्रकाशतायामिव । अस्माकं तु तद्द्वयमपि धर्मिग्राहकं(४)प्रमाणमस्ति, न च तज्ज्ञानविषयीकृतं(५)प्रपञ्चं खण्डनयुक्तयोऽप्यपनेतुमीशते, सुदृढप्रमाणसिद्धत्वात् । तस्मात्,—"त्वया निर्माय दत्तेऽस्मिन् स्वप्रकाशैकमन्दिरे । न्यासीकृतः प्रपञ्चोऽयं नापह्नोतुं तवार्हति । प्रकाशपाशबद्धानां प्रपञ्चानां विमोचने । प्रभवन्तु स्वयं बाध्याः

(१) तदेव ज्ञानं प्रकाशकप्रकाश्याद्यष्टविधरूपेण व्यवस्थितं विचारयतो महासाहसिकत्वमित्यन्वयः ।

(२) 'अभ्युपगन्ता चे'त्यपि क्वचित्पाठः । (३) तादृशे = स्वप्रकाशज्ञाने ।

(४ ईश्वरप्रवृत्तिज्ञानप्रयोज्या प्रवृत्तिमत्त्वादस्मदादिप्रवृत्तिवदित्याकारकमीश्वरज्ञानलक्षणधर्मिसाधकमनुमानमेवेश्वरज्ञाने प्रपञ्चविषयकत्वमपि प्रसाधयतीत्यर्थः-

(५) ईश्वरज्ञानविषयीकृतमित्यर्थः ।

कथं खण्डनयुक्तयः" तथापि प्रपञ्चखण्डनयुक्तयस्त्वया बाधितुमशक्या इति हृदयम् ॥

मू० "एवं च सति सौगतब्रह्मवादिनोरयं विशेषो यदादिमः सर्वमेवानिर्वचनीयं वर्णयति (तदुक्तं भगवता लङ्कावतारे (१)-"“बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते । अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः(२)" इति) 'विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसद्भ्यां विलक्षणं ब्रह्मवादिनः संगिरन्ते । तथाहि-नेदं सद्भवितुमर्हति, वक्ष्यमाणदूषण(३)ग्रस्तत्वात् । नाप्यसदेव, तथा सति लौकिकविचारकाणां(४) सर्वव्यवहारव्याहत्यापत्तेः । यदपि 'निर्वक्तुमसामर्थ्ये गुरव उपास्यन्तां येभ्यो निरुक्तयः शिक्ष्यन्ते'-इत्युपालम्भवचनं तत्तदा शोभेत यदि मेयस्वभावाऽनुगामिनीयमनिर्वचनीयतेति न ब्रूयुः, वक्तृदोषादिति च वदेयुः । "यस्तु वादी निरुक्त्यभिमानं धत्ते स निर्वक्तुं-नतु शक्ष्यति, वक्तव्यदोषात्(५) ।

टी० ननु, यदि विचारोऽपि त्वया नाभ्युपेयते तदा माध्यमिकमतप्रवेशात्तवापि दर्शनमदर्शनमेवेत्यत आह-। "“एवं चे"ति । आदिमः=सौगतः, भगवता=बौद्धेन (६), समन्तभद्रो भगवान्मारजिल्लोकजिज्जि-

---

(१) विद्यासागरास्तु "अलङ्कारावतारे"-इति पाठं व्याचक्षते ।

(२) देशिताः=उपदिष्टाः सन्तः । [यासादित्यर्थः ।

(३) लक्षणाधीना हि लक्ष्यव्यवस्थितिर्लक्षणानि चाऽनुपपन्नानीत्यादिदूषणगण-

(४) लौकिकविचारकाणां, लौकिकानां परीक्षकाणां चेत्यर्थः ।

(५) भेदप्रपञ्चस्य स्वतः परतो वा सिद्ध्यसम्भवरूपाद्वक्तव्यदोषात्, अद्वैतागमेन प्रतिपक्षेणाधो बाधकपाद्वा ।

(६) अत्र 'बुद्धेन'-इति पाठस्समुचितः । 'बौद्धेन'-इति पाठे तु बुद्ध एव बौद्ध इति कथञ्चिद्व्याकरणीयम् ।

न"–इति कोशात्; लङ्कावतारस्तदागमग्रन्थः ॥ [b]"बुद्ध्ये"ति। यथा बुद्ध्यतिरिक्तः पदार्थो बुद्ध्या विविच्यमानो विचारं न सहते तथा बुद्धिरपि विविच्यमाना विचाराऽसहत्वान्निरभिलप्या=अनिर्वचनीया, निःस्वभावा=असतीत्यर्थः (१) ॥ सौगतदर्शनात् स्वदर्शनं भिनत्ति–। [c]"विज्ञानव्यतिरिक्तमि"ति। 'भवितु(२)मर्हति'–इत्यधिकमपि लौकिकमनुरुध्योक्तम्। मेयस्यायं स्वभावो यदस्य निर्वचनमशक्यं न तु निर्वक्तुः(३); स च तदा स्याद्यदि कोपि शक्नुयान्निर्वक्तुं, येपि गुरव उपासनीयास्तेपि निर्वक्तुमकुशला एवेत्यर्थः ॥ त्वमपि गुरुर्भूत्वा मां शिक्षय यदि पारयसीत्याह–। [d]"यस्त्वि"ति॥

मू० *[a]नच ते दोषाः स्वकमपि घ्नन्तो जातयः कथं न स्युरिति वाच्यम्*, [b]यतो निर्वचनीयत्वं बाध्यते तै र्दोषैः स्वयमप्यनिर्वचनीयैरेव, अनिर्वचनीयैरेव च तैर्व्यवह्रियते एवेति कुतोऽस्मान् प्रति व्याघातः स्यात् [c]तज्जातित्वस्य च निरूप्य योजयितुमशक्यत्वात्। *[d]ननु"सदसत्पक्षयोर्दोषदर्शनादनिर्वचनीयता"–इति ब्रुवाणस्य किं सदसत्त्वसंशयः? किं वा सदसत्त्वपक्षबहिर्भावाभ्युपगमः? [e]आद्ये भवितव्यं तावत्सदसत्त्वयोरन्यतरेणेत्येकपक्षदोषस्याभासत्वं,[f]तच सत्त्वपक्षदोषस्यैवाऽभ्युपेयमावश्यकत्वात्।

टी० ननु(४)"वक्ष्यमाणदूषणग्रस्तत्वात्"–इत्ययमपि हेतुर्वक्ष्यमाणदूषणग्रस्त एव, तथाच स्वव्याघातकतया जात्युत्तरमेतत्; यथा(५)'नेदं

(१) बुद्धेर्निःस्वभावत्वोपवर्णनं भावार्थानत्वज्ञापनार्थम्।

(२) ननु मूले"नेदं सद्भवितुमर्हति"–इत्यत्र"नेदं सत्'–इत्येव पर्य्याप्तं किं भवितुमर्हतीत्यधिकोक्त्या, अर्थाऽव्यतिरेकात्पुनरुक्तिश्चेति तत्राह–भवितुमिति ॥ "लौकिकमि"ति, लोके धार्य्यं धारितं, ग्राह्यं गृहीतम्, इत्यादौ यथा पुनरुक्तिर्न दोषस्तद्वदिहापीति भावः।

(३) 'न तु निर्वक्तुः"–इत्यत्र 'स्वभावः'–इत्यनुषज्यते, निर्वक्ता चात्र सदोषपुरुषस्तेन न "यदि कोपि शक्नुयात्"–इत्यग्रिमग्रन्थासङ्गतिः।

(४) व्याघाऽलङ्कारग्रन्थेऽनिर्वचनीयतादूषणं यदभाणि तदनुवदति–नन्विति।

(५) जात्युत्तरमेवोदाहरति–'यथा नेदम्' इत्यादिना। इदं = धूमलक्षणं साधनं,न

साधकं, सर्वथाऽनुपलभ्यमानोपाधिशङ्कायस्तत्वात्'-इत्यादि ; तद्यदि दोषाणामपि बाध्यत्वं, तदा प्रपञ्चः कथं बाध्यतां तैरित्याशङ्कते—। [a]"नचे"ति ॥ बाध्यैरेव दोषैर्जगद्बाध्यमित्यङ्गीकृत्य प्रवृत्तं मां प्रति न स्वव्याघातदोषावकाश इत्याह—। [b]"यत"इति ॥ ननु, स्वव्याघातकं दोषं प्रयुञ्जानस्त्वं जातिवादी निरनुयोज्यानुयोगेन निग्रहस्थानेन निगृहीत इति चेत्‌-मस्माभिरित्यत आह—। [c]"तज्जातित्वस्ये"ति । वक्ष्यमाणदोषैर्जातिलक्षणमपि निर्वक्तुमशक्यमेवेति जातित्वमव्यवस्थाप्याहं निग्रहीतुमशक्य इत्यर्थः ॥ यथा, शब्दे नित्यत्वानित्यत्वयोर्द्वयोरपि दोषदर्शनादुभयकोटिकः संशयस्तथा प्रपञ्चे सत्त्वासत्त्वयोर्दोषदर्शनात्संशयो वा ? कोट्यन्तराभ्युपगमो वा ?—इति विकल्प्य सत्त्वपक्षोऽत्र्य (1) शङ्कते—। [d]"नन्वि"ति ॥ [e]"आद्ये"इति । परस्परविरहस्वभावकोटिकसंशयधर्मिणा एककोट्यात्मकत्वावश्यकत्वात् तस्यां वाऽन्यस्यां कोटौ दोषा नूनमाभासा इत्यर्थः ॥ [f]"तच्चे"ति । आभासत्वमित्यर्थः ॥

मू० [a]यदि तावत्सत्त्वपक्षस्तदा सत्त्वपक्षे दोषः [b]कथं संगच्छेत, [c]अथाऽसत्त्वपक्षस्तदा सर्वासत्त्वं तद्दोषः कथं सद्भाववान्न भवितुं प्रभवेत् । [d]द्वितीयस्तु व्याघातादेवाऽसंभवं, "परस्पर(2)विरोधे हि न प्रकारान्तरस्थितिः" इति ! *। तदेतदनाकलितपराभिसन्धेः प्रत्यवस्थानम् । यो हि सर्वमनिर्वचनीयसदसत्त्वं[3] ब्रूते स कथमनिर्वचनीयतासत्त्वव्यवस्थितौ पर्य्यनुयुज्येत, सापि हि कृत्स्नप्रपञ्चपरसर्वश

वह्निलक्षणसाध्यसाधकं, सर्वथाऽनुपलभ्यमानोपाधिशङ्कायस्तत्वादित्युक्ते भवति स्वोक्तस्यापि "सर्वथाऽनुपलभ्यमानोपाधिशङ्कायस्तत्वात"-इत्यस्य हेतोर्व्याघातः, तस्यापि धूमलक्षणसाधनवत्सर्वथाऽनुपलभ्यमानोपाधिशङ्कायस्तत्वात्; अत एव च जात्युत्तरत्वं, "स्वव्याघातकमसदुत्तरं जातिरि"ति वचनात् ।

(1) 'सत्पक्षोऽत्र्यम्'-इत्यपि क्वचित्पाठः ।

(2) कुसमाञ्जलावुदयनोक्तं व्याघातमेवोपपादयति-परस्परेति । "नैकतापि विरुद्धानामुक्तिमात्रविरोधतः"-इत्युत्तरार्द्धम् ।

(3) अनिर्वचनीये=निर्वचनानर्हे, सत्त्वासत्त्वे यस्य तदनिर्वचनीयसदसत्त्वम् ।

न्दाभिधेयमप्यनिविष्टैव।[f] परस्यैव व्यवस्थयैवं पर्य्यवस्यति—निर्वचनप्रतिक्षेपादनिर्वचनीयत्वं, विधिनिषेधयोरेकतरनिरासस्येतरपर्य्यवसायितायाः[g] स्तेनाभ्युपगमात्।[h] ततः परकीयरीत्येदमुच्यते—'अनिर्वचनीयत्वं विश्वस्य पर्य्यवस्यति' इति। 'वस्तुतस्तु, वयं सर्वप्रपञ्चसत्त्वाऽसत्त्वव्यवस्थापनविनिवृत्ताऽऽस्वतः सिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भरमवलम्ब्य चरितार्थाः सुखमास्महे।

टी० आवश्यकत्वमेवाह—।[a] "यदि तावदि"ति॥[b] "कथमि"ति पारमार्थिकत्वदुष्टत्वयोरेकत्रासम्भवादित्यर्थः॥ असत्त्वपक्षेऽपि सत्त्वपक्षदोषस्याभासत्वमुपपादयति—।[c] "अथे"ति। तद्दोषः—सत्त्वपक्षदोषः॥[d] "द्वितीय" इति। सदसत्त्वपक्षबहिर्भाव इत्यर्थः॥ मदभिमतायामनिर्वचनीयतायां विकल्प्य दोषाभिधानं प्रकारान्तरेण ([1])निर्वचनीयतायाः सत्त्वव्यवस्थित्यै त्वया कृतं, तत्र दोषाभिधानलक्षणः पर्य्यनुयोगो न मयि घटते, यतोऽनिर्वचनीयताख्यस्यापि धर्मस्याऽनिर्वचनीयत्वैव मदभिमतेत्याह—।[e] "या ही"ति॥ ननु, यद्यनिर्वचनीयता न त्वया व्यवस्थापनीया तदा कथं व्यवतिष्ठतेत्यत आह—।[f] "परस्ये"ति॥[g] "तेने"ति। परेणेत्यर्थः॥[h] "तत" इति। अनिर्वचनीयत्वं मया न साध्यते किंतु 'निर्वचनखण्डनेन पारिशेष्यादनिर्वचनीयत्वं सिद्ध्यति'—इति ब्रूमः॥ नन्वनिर्वचनीयत्वं मा साध्यतां, परिशेषसिद्धानिर्वचनीयताभ्युपगमेनापि द्वैतापत्तिस्तदवस्थेत्यत आह—।[i] "वस्तुतस्त्वि"ति। परिशेषसिद्धमप्यनिर्वचनीयत्वं मम नाभ्युपगमः, अपि तु त्वं तथा बोध्यसे इत्यर्थः। भरम्—प्रध्यवसायम्॥

मू० [a]ये तु स्वपरिकल्पितसाधनदूषणव्यवस्थया विचारमवतार्य तत्त्वं निर्णेतुमिच्छन्ति तान् प्रति ब्रूमः—न सा-

(१) प्रकारान्तरेण = सत्त्वप्रकारेणैव, निर्वाच्यत्वस्य सत्त्वव्यवस्थित्यर्थमित्यर्थः क्वचित्तु "अनिर्वचनीयतायाः, सत्त्वव्यवस्थित्यै"—इति पाठस्तत्र प्रकारान्तरेण = अनिर्वचनीयत्वप्रकारेणैवानिर्वचनीयतायाः सत्त्वव्यवस्थित्यर्थमित्यर्थः।

त्वदीयं भवतां विचारव्यवस्था, भवत्कल्पितव्यवस्थयैव व्याहतत्वात्। [b]अत एवाऽस्मदुपन्यस्यमानदूषणस्थितिविषयाः पर्य्यनुयोगा निरवकाशाः, 'त्वद्व्यवस्थयैव त्वद्व्यवस्थाया व्याहत्युपन्यासात्। *[d]नचोपन्यास एव निर्बन्धकारणम्, विचारोपन्यासस्य(१)सदसत्त्वोपगमाद्युदासीनैर्विचार्य्यमित्युपेत्यैव परं विचारप्रवर्तनायाः शक्यत्वामित्यावेदितत्वात्। 'यदि तु "विचारस्य सत्त्वमनभ्युपेत्या न विचारयितुं शक्यम्"—इत्युच्यते, तदा प्रमाणमव्यापार्य्य(२)न तदीयसत्त्वाभ्युपगमोपि शक्यतेऽतिप्रसङ्गात्;इति विचारस्यापि विचार्य-ग्रहणेऽनवस्थया विचारारम्भ एवाऽशक्यः स्यात्। *[f] नच पूर्वपूर्वसिद्धत्वाद्विचारे विचारान्तरमिदानीमगवेषणीयम्(३) *। "विचारस्य पूर्वसिद्धत्वे विचार्य्य-रूपस्वविषयव्यवस्थितत्वात् तस्य, विचार्य्यमपि पूर्वमेव विचारितमित्यनारम्भ एव विचारस्य।

टी० ननु, तर्हि सदसत्त्वविचारेऽपि किमर्थं ते प्रवृत्तिरित्यत आह—[a]"येत्वि"ति। अस्माभिस्तत्त्वदूषणमात्रेण विचारे त्वदभ्युपगतविचारमर्यादया प्रवर्तामहे इत्यर्थः॥ [b]"अत एवे"ति। यतः परपरिकल्पितसाधनदूषणव्यवस्थयैव प्रवर्तामहे नतु स्वयं साधनदूषणादिव्यवस्थामभ्युपगच्छामो येन

---

(१) विचारोपन्यासनिष्ठं ये सत्त्वाऽसत्त्वे तदुपगमाद्युदासीनैरित्यर्थः, एकदेशान्वयश्च "शरैः शातितपत्त्रोऽयम्" इति वद् बोध्यः। "विरोधोपन्यासस्य"—इति क्वाचित्कः पाठस्तु प्रामादिकः।

(२) प्रमाणमव्यापार्य्याऽप्रवर्त्त्याऽनुपन्यस्येति यावत्। तदीयसत्त्वाभ्युपगमः = विचारसत्त्वाभ्युपगमोऽपि न, शशशृङ्गादेरपि सत्त्वाभ्युपगमप्रसङ्गात्, तथाच प्रमाणं व्यापार्य्य विचारसत्त्वाङ्गीकारे प्रमाणव्यापारोऽपि कथात्मकविचारान्तरे, तस्यापि च सत्त्वाभ्युपगमो विचारान्तरे, वक्तव्य इत्यनवस्थानात्प्रथममेव प्रतिकर्द्दमे विचारारम्भणमेवाशक्यमापद्येतेत्यर्थः।

(३) "इदानीं न गवेषणीयम्"—इत्यपि पुस्तकान्तरे दृश्यमानः पाठः साधुरेव।

तदाश्रिता अद्वैतव्याघातादयो दोषाः स्युरित्यर्थः ॥ "अत" इत्यस्यातिदे-श्यमाह—। [c] "त्वद्व्यवस्थये"ति ॥ ननु, विचारे व्याघातोपन्यासस्त्वया कर्त्तव्य इति विचारस्य, व्याघातोपन्यासस्य च, सत्त्वमभ्युपगतमिति द्वैतापत्तिरेवेत्यत आह—। [d] "नचे"ति । 'प्रमाणादेरिव विचारव्याघातोपन्यासयोरपि सत्त्वमनभ्युपगम्यैव विचारे प्रवृत्तिः शक्या'—इत्युक्तत्वादित्यर्थः ॥ प्रथमं मतिकर्द्दमेन विचारप्रवृत्तिरेव न स्यात्'—इत्युक्तं स्मारयति—। [e] "यदि-त्वि"ति ॥ ननु, विचारस्यापि विचार्य्यं ग्रहणे विचाराप्रवृत्तिः स्यात्, नत्वेवं, किं तर्हि पूर्वमेव विचारः सिद्धः? (१)इत्यत आह—। [f] "नचे"ति ॥ विचारसिद्धिर्विचार्यसिद्धिनान्तरीयकी, ज्ञानस्येव विचारस्यापि सविषयकत्वात्; तथाच किं विचारेण, विचार्य्यसिद्धेस्तत्फलस्य संपन्नत्वादित्याह—। [g] "विचारस्ये"ति ॥

मू० [a] अथ*विचार्य्यविशेषस्य पूर्वमसिद्धत्वात् तदर्थं विचारारम्भः? *, [b] तर्हि विचारविशेषस्यापि तद्विषयकस्य पूर्वमसिद्धिरेवेति वृथा शुष्क(२)चर्वणम् । [c] यदि च त्वद्दर्शनरीत्याभिधीयमानमस्माभिर्बाधं बाधसे तदा स्वाभ्युपगतरीतिबाधाभिधायितैव ते स्यात् । [d] अस्माभिर्निर्वाह्यमानस्य त्वया खण्डनयुक्त्यैव बाधेऽस्माकमेव जेतृता, " ' खण्डनयुक्तयो बाधिकाः, निर्वाह्यपक्षश्च बाध्यः "—इत्यस्याऽस्मदुक्तपक्षस्य त्वयैव निर्वाहात् ।

टी० ननु, विचारलक्षणस्य विचार्य्यस्य पूर्वसिद्धत्वेपि प्रपञ्चसत्त्वासत्त्वलक्षणस्य विचार्यविशेषस्य न पूर्वसिद्धत्वमिति तदर्थमवे विचारः स्यादेवेत्याह—। [a] "अथे"ति ॥ तर्हि स विचार्य्यविशेषो यस्य विचारस्य

---

(१) पूर्वमेव विचारः सिद्धः। अनादिसिद्ध इत्यर्थः तथा च बीजाङ्कुरवेदनादिस्यायानवस्थेति भावः ।

(२) शुनः शुष्कास्थिचर्वणं यथा वृथा तथेदमित्यर्थः ।

विषयः सोऽप्यसिद्ध एव, तत्सिद्धौ विचार्यविशेषस्यापि सिद्धत्वप्रसङ्गात्' एवं 'ततः पूर्वपूर्वसिद्धत्वाद्विचारे विचारान्तरमिदानीमगवेषणी(१)यम्'– इति यदुक्तं तच्छुष्कचर्वणमित्याह–। [b]"तर्ही"ति ॥ ननु, प्रवर्त्यतां विचारः, तत्र विचारे त्वदुक्ता दोषा मया युक्त्यन्तरेण बाधनीया इत्यपर्य्यवसानं स्यादित्यत आह–। [c]"यदि चे"ति ॥ ननु, दोषा अपि हेत्वाभासादयस्त्वया खण्डिता एव, तदेव खण्डनमादाय त्वयोद्भाव्यमाना दोषा मयापि खण्डनीया, इत्यहमेव जेष्यामित्यत आह–। [d]"अस्माभिरि"ति। यद्यपि तस्यां कथायां त्वदुपन्यस्तदोषाणां परेण खण्डनयुक्त्या बाधने परस्य जेतृता, न तव, उपन्यस्तदोषस्य त्वयाऽनिर्वाहात्; तथापि परेण खण्डनयुक्तीनां बलवत्त्वं तावदङ्गीकृतमित्येतावतैव मम जेतृतेति (२)हृदयम् ॥ कथं जेतृतेत्यत आह–। [e]"खण्डने"ति ॥

मू० [a]तस्मात्त्वया निर्वाह्यमस्माभिस्तु खण्डनीयमितीदृश्यामेव परं कथायां त्वन्निर्वाह्यनिर्वाहे तव जयो नान्यथेति। [b]तदेवं भेदप्रपञ्चोऽनिर्वचनीयः, ब्रह्मैव तु परमार्थसदद्वितीयमिति स्थितम् (३)।

***[c]नन्वद्वैते किं प्रमाणम्?*। [d]प्रश्न एव तावदद्वैतमनङ्गीकुर्वतो नोपपद्यते। [e]प्रमाणं यत्राद्वैते (४)पृच्छ्यते तस्याऽप्रतीतौ कथमेवंभूतः प्रश्नः संगच्छते। नहि**

---

(१) 'न गवेषणीयमि'त्यपि क्वाचित्कः पाठः साधुरेव।

(२) यथा निर्वाह्यार्थः खण्डनयुक्तिभिर्बाध्यस्तथा खण्डनयुक्तयोऽपि ताभिरेव बाध्या इत्येतावतैव मम जेतृतेति भावः।

(३) { किमस्ति मानमद्वैते इतीष्टे प्रष्टुमेव न ।
मतत्वे वाऽमतत्वे वेत्येतत्प्रस्तूयतेऽधुना ॥ }

(४) "यत्राप्रद्वैते" इत्यपि पाठः।

प्रमाणमात्रं भवता पृच्छयते, किंनाम विषयविशेषनियतम्, तच्च(¹)तदोपपद्यते यदि तादृशं ते प्रतीतिमारोहेत्, प्रश्नस्य वाग्व्यवहारविशेषत्वात्, व्यवहारस्य च स्वज(²)नकज्ञानविषयनियतत्वात्। अन्यथा व्यवहाराणां विषयनियमप्रयोजकस्यान्यस्यासंभवेन व्यवहारविषयपारिप्लवापत्तेः ।

टी० ननु, ब्रह्माद्वैतं त्वया निर्वाह्यं, तन्मया खण्डनीयं, प्रपञ्चखण्डनमप्यन्ततस्त्वया निर्वाह्यं, तच्च प्रतिखण्डनं मया कर्त्तव्यमित्यपर्य्यवसानं तदवस्थमेवेत्याशङ्क्य कथासन्दर्भमुपसंहरति—। ""तस्मादि"ति । यद्यपि "त्वया ब्रह्माद्वैतं स्थापनीयं, मया खण्डनीयम्, इतीदृश्यामेव कथायां मया वक्तव्य, नान्यत्रे"ति परेणापि वक्तुं शक्यते,* नचैवं कथैव न(³)स्यादिति वाच्यम्*, इष्टापत्तेः; अनिष्टत्वे चास्योभयसमाधेयत्वात्(⁴)। *ब्रह्म स्वतःसिद्धमेव न तत्र साधनापेक्षा *;—इति चेति, प्रपञ्चोऽपि सर्वजनसिद्ध एव न तत्र साधनापेक्षेति तुल्यम् । * सर्वजनसिद्धत्वमपि त्वयोपपादनी(⁵)यम् *?—इति यदि, तदा स्वतःसिद्धत्वमपि त्वयोपपादनीयमिति तुल्यम् । *तर्हि वितण्डा कथैव न स्यादुभयोरपि स्थापनाप्रस-

---

(१) तदिति सामान्ये नपुंसकं, स विषयविशेषनियतप्रमाणप्रश्न इत्यर्थः । तदोपपद्यते यदि तादृशं = विषयविशेषनियतं प्रमाणं, ते प्रतीतिमारोहेत् विषयश्चाद्वैतमेवेति भावः ।

(२) स्वस्य = व्यवहारस्य जनकं ज्ञानं स्वजनकज्ञानम्, तस्य यो विषयस्तेन नियतत्वान्नियमेन तद्गोचरत्वादित्यर्थः ।

(३) कथा हि समयबन्धपूर्विका, समयबन्धश्च माध्यमिकेन अद्वैतं ब्रह्म स्थापनीयमित्येव, इदानीं खण्डने प्रवृत्तेन तेन स उपेक्षित इत्यग्रे कथैव न स्यादित्यर्थः । यद्वा, वैतण्डिकेनाप्यद्वैतव्यवस्थापने वितण्डा कथैव न स्यादित्यर्थः ।

(४) यथा माध्यमिकेन अद्वैतं ब्रह्म स्थापनीयमित्यस्ति समयबन्धस्तथा माध्यमिकेन तत्खण्डनीयम् (अर्थादद्वैतं व्यवस्थापनीयम्) इत्यपीति तदनिर्वाहे कथाऽभावप्रसङ्गस्तस्यापि तुल्य इत्यवश्यं तेनापि समाधेयत्वादिति भावः ।

(५) त्वयोपपादनीयम् = त्वयैवोपपादनीयं, (स्वकपोलकल्पितमिति यावत्) ।

द्वात् *?–इति चेत्, शक्ति(१)जिज्ञासया प्रपञ्चवादिनामप्यन्योन्यं तत्सं-
भवात्, तथापि खण्डनयुक्तयो बलवत्य इत्यत्रैव हृदयम् ॥ स्वपक्षमुपसं-
हरति–। [b] "तदेवमि"ति ॥

ननु "ब्रह्मैव परमार्थसत्"–इति त्वयोच्यते, तथाच प्रतिज्ञैवेयं
तत्र प्रमाणमुपन्यस्तुमर्हतीत्याह–। [c] "नन्वि"ति ॥ उत्तरमाह–। [d] "प्रश्न
एवे"ति । प्रश्न एव तावत् प्रमाणमिति किञ्चिद्याऽपि(२)योजयन्ति । प्रश्ना-
न्यथानुपपत्तिरेवाद्वैतसाधिकेत्यर्थः ॥ तामेवाह–। [e] "प्रमाणमि"ति । अद्वै-
तज्ञानमन्तरेण तद्विषयत(३)द्विषयप्रमाणप्रश्न एवानुपपन्न इत्यर्थः ॥ नन्वद्वै-
तमज्ञानानस्यापि तत्प्रमाणप्रश्नः स्यादित्यत आह–। [f] "प्रश्नस्ये"ति ।
'अद्वैते किं प्रमाणम्' ?–इत्ययं वाग्व्यवहारस्तावज् ज्ञानजन्यः, तथाच
तज्ज्ञानविषयविषयत्वध्रौव्यमेवास्य; अन्यथा स्वजनकज्ञानविषयाऽतिक्रमे
व्यवहाराणां व्यवहर्त्तव्यनियमो न स्यादित्यर्थः ॥

मू॰ [a] **यदि चाद्वैतं प्रश्नविषयः प्रतीतमुच्यते तदा तत्प्रतीतिस्ते प्रमा वा स्यात्? अप्रमा वा?। आद्ये यदेव तस्याः प्रमायाः करणं तदेवाद्वैते प्रमाणं तत्रापि संप्रतिपन्नमिति वृथा तस्य प्रश्नः।* [b] नच वाच्यं सामान्यतोऽद्वैतप्रमाणसिद्धौ(४)भूतायामपि विशेषतः प्रमाणप्रश्नः*, [c] यतः सामान्यसिद्धावेवाऽद्वैतसिद्धौ विशेषविचारः काकदन्तविचारवत्स्यात्; [d] सामान्यसिद्धिरेव च विशेषमप्या-**

---

(१) शक्तिजिज्ञासया = परप्रतिपादनसामर्थ्यज्ञानेच्छया, प्रपञ्चवादिनां = स्थापनावादिनां, तत्संभवात् = वितण्डाकथासम्भवादित्यर्थः । अवैतण्डिका अपि वितण्डां कुर्वते इति भावः ।

(२) अपिशब्देन 'प्रश्न एव नोपपद्यते'–इत्यन्वयस्तु प्रसिद्ध एवेति समुच्चीयते ।

(३) तद्=अद्वैतं, नियतो विषयो यस्य प्रमाणस्य तद्विषयकः प्रश्न इत्यर्थः ।

(४) अद्वैतप्रमाणसिद्धौ भूतायाम् = अद्वैतप्रमाणसिद्धौ सत्याम् ।

क्षिप्यानयन्ती विशेषमपि ते कथितवती किमत्र प्रश्नेन, [e]परिगणितेषु हि प्रमाणप्रकारेषु मध्ये यत्रैव दोषं न प्रमिणोषि तत्रैव विशेषे सामान्यस्य विश्रान्तेः । [f]यदि च परिचितचरेषु प्रमाणप्रकारेषु सर्वेष्वेव दोषं प्रमिणोषि तदा प्रमाणान्तरमाक्षिप्यापि सामान्येन विश्रमणीयमेव (१) ।

टी० नन्वेतावताऽद्वैतप्रतिपत्तिरायाता, प्रमाणानुयोगस्तदवस्थ एवेत्यत आह—। [a]"यदि चे"ति । अद्वैतमनुमाय, श्रुत्वा, दृष्ट्वा वा तवाय प्रश्नः; तथाचानुमानं, शब्दः, इन्द्रियं वा, तत्र प्रमाणमिति त्वयैव ज्ञायते किं प्रश्नेनेत्यर्थः ॥ ननु, प्रश्नान्यथानुपपत्तिः प्रमाणसामान्यसाक्षिणी भवतु प्रमाणविशेषजिज्ञासा तद्विशेषाभिधानमन्तरेण कथं निवर्त्ततामित्याशङ्क्याह—। [b]"नचे"ति ॥ अद्वैतसिद्धिरस्मदपेक्षिता, त्वया चाऽनुमता, किमत्र विशेषजिज्ञासयेत्याह—। [c]"यत"इति ॥ ननु, तथापि विशेष पृच्छतः किमुत्तरमत आह—। [d]"सामान्ये"ति । नहि निर्विशेषं सामान्यमिति भावः ॥ नन्वेतावता विशेषत्वेनैव विशेषः सिद्धो नत्वनुमानादिभावेन, तादृशी च सिद्धिरपेक्षितेत्यत आह—। [e]"परिगणितेष्वि"ति ॥ ननु परितेषु सर्वत्र दोषं पश्यत एव ममाय प्रश्नः ? इत्यत आह—। [f]"यदिचे"ति ॥

मू० "यदि च 'का प्रमाणव्यक्तिरसौ' ?–इति प्रश्नार्थः परिशिष्यते, तदा न सर्वा व्यक्तिर्विशेषतो निर्देष्टुं शक्यते–इति तदनिर्देशेपि न नः किंचिदपचीयते । [a]यदि च द्वितीयः, तदानीमद्वैतप्रतीतिमप्रमां मन्यमानस्य तव 'अप्रमाविषये किं प्रमाणम्?'–इति कथं न प्रश्नो व्याहन्यते । [c]अथ "अप्रमा सा मम मते, त्वन्मते तु प्रमैवेति तत्करणं

---

(१) निर्विशेषसामान्यायोगादिति भावः ।

प्रमाणं पृच्छ्यते ?''-इति ब्रूषे, नैतदप्युपपद्यते, तदा द्वैते ज्ञानं यदुत्पद्यते तत्करणं मया प्रमाणरूपं वक्तव्यमित्यत्र ममाऽनियमात्। यदि नाम मया सदाऽद्वैतमभ्युपेयते तावता किं तावकीनस्य तज्ज्ञानस्य करणमवश्यं प्रमाणं स्यात्? ''वस्तुतो वन्हिमत्यपि पर्वते यदि कश्चिद्वाष्पं धूमं प्रतीत्य ततो वह्निमनुमिनोत्येतावता किं वाष्पविषयं धूमज्ञानं करणं प्रमाणमेष्टव्यम्?-इति।

टी० नन्वनुमानत्वाद्वयोपि प्रमाणत्वविशेषाः सामान्यमेव, तेन तत्रापि विशेषजिज्ञासया प्रश्नः? इत्यत आह-। ''यदि चे''ति॥ 'अद्वैतप्रतीतिरप्रमा'-इति पक्षं दूषयति-। ''यदि चे''ति। यद्यपि 'अप्रमाविषये किं प्रमाणम्?' इत्याकारो न मम प्रश्नो येन व्याघातः स्यात्, नच(१)तत्प्रकारप्रश्नेपि व्याघातः, नहि यदप्रमाविषयस्तत्कदापि न प्रमाणविषयः, तथाप्यापातस्फूर्तिको व्याघात इत्यर्थः॥ त्वदभिमानमनुरुध्याऽयं प्रश्नो मम तु बाधितविषयतया सर्वत्राद्वैतज्ञानमप्रमैवेति न व्याघात इत्यत आह-। ''अथे''ति॥ विषयाऽबाधेपि क्वचि(२)त्करणं दुष्टं दृष्टं, तथाच 'अद्वैतविषयं तथापि ज्ञानं प्रमैव(३)दुष्टकरणजन्या'-इति संभावनायां कथं तत्र मया प्रमाणं वक्तव्यमित्याह-''वस्तुत''इति। अत्र, यद्यपि 'कति ते पुत्राः'?-इति प्रश्नमात्रप्रत्याशया पुत्रान् संभावयतो दार(४)परिग्रहेप्युदासीनस्य,सर्वजनप्रसिद्धपपक्षविरुद्धविषयः शशशृङ्गकूर्मरोमगगनारविन्दादि-

---

(१) अप्रमाविषये किं प्रमाणमित्याकारप्रश्नेपि न व्याघातो न हि यदप्रमाविषयस्तच कदाचित्प्रमाणविषयः, पूर्वक्षणावच्छेदेन रजतत्वेनाऽप्रमाज्ञानविषयस्यापि शुक्त्यादेः कालान्तरे शुक्तित्वेन प्रमाणज्ञानविषयत्वादित्याह-न चेति।

(२) क्वचित् = वन्हिमत्पर्वतधर्मिकवाष्पलिङ्गकवन्ह्यनुमित्यादौ संवादिभ्रमे।

(३) प्रमाऽत्राबाधितार्थगोचरं ज्ञानं, न तु प्रमाणकरणकं ग्राह्यम्।

(४) दारपरिग्रहेप्युदासीनस्य कति ते पुत्राः ?-इति प्रश्नमात्रप्रत्याशया पुत्रान्संभावयतस्ते कः प्रतिमल्लः (प्रतिभटः, वारयितेति तु फलितम्) इत्यन्वयः।

प्रमाणप्रश्नबलायातमनन्तं प्रपञ्चं साधयतः, कस्ते प्रतिमल्लः, कथं वा 'ब्रह्म नास्तीत्यत्र किं प्रमाणम्' ?–इत्यनेन प्रश्नेन ब्रह्मनास्तितैव न सिद्ध्येत् । कथायां यस्य यस्य पदार्थस्याभावस्त्वया साध्यस्तस्य तस्य प्रमाणप्रश्नबलात् तत्तत्सत्ता तदानीमेव वाद्यन्तरेण साधनीया इति दुरुत्तरं व्यसनम् वस्तुतो(१) 'ब्रह्माद्वैतं घटादिवृत्ति न वा'–इति मध्यस्थविप्रतिपत्तौ 'ब्रह्माद्वैतं घट(२)वृत्ती'ति विधिकोटिपरिग्रहे त्वया कृते तत्र प्रमाणप्रश्ने प्रमाणवचनमेवोचितं, कथासंप्रदायस्य तवाप्यभीष्टत्वात्; तद्विप्लवे पुनर्दुरुत्तरं व्यसनमेव, तथापि वक्ष्यमाण(३)प्रमाणावष्टम्भादेतदुक्तमिति हृदयम् ॥

मू॰ "अस्तु वा प्रश्नोऽयं यथातथा, श्रुतिरेवाद्वैते प्रमाणमिति ब्रूमः । श्रूयते खलु "एकमेवाद्वितीयं नेह नानास्ति किंचन" इत्यादि । "श्रुतिप्रामाण्यं सिद्धार्थप्रामाण्यं चेश्वराभिसन्धौ साधयिष्यते । सिद्धार्थानां(४)श्रुतीनामन्यपरत्वमपि यदि स्यात्तथापि पद(५)समन्वयबलेन तासु प्रतीयमानमर्थमबाधितमादायैव तासामन्यपरिभवनात्(६), "धियां स्वतःप्रामाण्यस्य बाधकैकापोद्यत्वात् ।

टी॰ एतेनैवानुशयेनाह–। "'अस्तु वे'ति ॥ नन्वनृत(७)व्याघातपुन-

---

(१) 'वस्तुत'–इत्यस्य प्रमाणवचनमेवोचितमित्यनेनान्वयः ।

(२) अत्र घटादिवृत्तीति पाठः समुचितः, प्रतिज्ञाया विप्रतिपत्त्यनुगुणत्वौचित्यादित्यनुमन्ये ।

(३) "श्रुतिरेव प्रमाणम्"–इति वक्ष्यमाणं प्रमाणप्रतिवचनमवष्टभ्यैव वचनव्यसनाभिधानमित्याशयः ।

(४) सिद्धार्थानाम् = अहेयानुपादेयार्थप्रतिपादिकानाम् ।

(५) पदानामेकमेवाद्वितीयमित्यादीनां य उपक्रमादिभिर्लिङ्गैर्ब्रह्मणि समन्वयस्तस्य स्वार्थाभिधायित्वं तद्बलेनेत्यर्थः ।

(६) अन्यस्य द्वैतावगाहिप्रत्यक्षादेः परिभवनात् तिरस्करणादित्यर्थः । अनन्यपरीभवनादित्यपि क्वचित्पाठः, तत्राद्वैतैकमात्रपरत्वादित्यर्थः ।

(७) अनृतदोषो यथा पुत्रकामेष्टा 'पुत्रकामः पुत्रेष्ट्या यजेते'ति, नेष्टौ संस्थितायां पुत्रजन्म दृश्यते । दृष्टार्थस्य वाक्यस्याऽनृतत्वाददृष्टार्थमपि वाक्यम् 'अग्निहोत्रं जुहुयात्

हृताविदोषेभ्यः श्रुतीनामेव न प्रामाण्यं, प्रामाण्ये वा सिद्धार्थश्रुतीनां न प्रामाण्यं, विधिप्रत्ययसमभिव्याहृतवाक्यस्यैव ज्ञानद्वारा व्यवहारजनकत्वेन प्रवर्तकज्ञानं प्रति सामर्थ्यावधारणात्; नच "एकमेवाद्वितीयं ब्रह्म', इत्यादिश्रुतीनां कार्यापराग(¹)स्तथाच न प्रामाण्यमित्यत आह–।[b] "श्रुती" ति ॥ ननु, यत्परः शब्दः स शब्दार्थः, न त्वासां श्रुतीनां ब्रह्माद्वैतपरत्वं, किं तर्हि, मुमुक्षुणा ब्रह्मैवैकमुपासनीयमित्यत्र तात्पर्यं, तथाचोपासनाया-मेवासां प्रमाणत्वं, नतु ब्रह्माद्वैतेपीत्यत आह–। [c] "सिद्धार्थानामि"ति। विशेषणं(²)चैतत् प्रकृतश्रुत्यपेक्षया। "एकं,ब्रह्म"इतिपदसमन्वयबलेन प्रतीयमानोर्थः स चोपासनापरत्वे प्यबाधित एव वाच्य इत्यर्थः ॥ ननु "आदित्यो यूपो यजमानः प्रस्तरः"–इत्यादौ पदसमन्वयबललभ्यसामानाधिकरण्य-श्रुतेरप्रामाण्यं यथा, तथाऽस्याः किं नेत्यत आह–। [d] "धियामि"ति। तत्र तत्र बाधकात् प्रतीयमानोर्थस्त्यज्यतेऽत्र न बाधकमित्यर्थः ॥

—

मू०* ननु,(³)नाऽद्वैतश्रुतीनामृजावर्थे(⁴)प्रामाण्यं संभवति, प्रत्यक्षादिबाधात्;ततश्चान्यत्रैव कचित्तात्पर्यं कल्प्यम०? । मैवम् । यदद्वैतश्रुतेर्बाधकं प्रत्यक्षादि मन्यसे तदात्मीये विषये घटपटादिभेदे नियत एवोत्पद्यते, 'नतु

स्वर्गकाम'इत्याद्यनृतमिति ज्ञायते। व्याहतव्याघातदोषश्च 'उदिते होतव्यमनुदिते होतव्यमि'ति विधाय 'श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति, शबलोऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोती'ति। पुनरुक्तदोषो यथा अभ्यासे दृश्यमाने 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इति।

(१) कार्य्यं परागः=क्रियोपरागः, हेयोपादेयार्थप्रतिपादकत्वमिति यावत्।

(२) ननु, 'सिद्धार्थानामि'त्येतद्विशेषणं व्यर्थं, यावता क्रियाऽभिधायिनीनामपि श्रुतीनां तात्पर्यतो ब्रह्मण्येव समनुगतत्वेनाऽबाधितार्थमात्रार्थयाऽन्यपरिभावकत्वं भवता प्रसाधनीयमित्यत आह-विशेषणं चैतत्प्रकृतश्रुत्यपेक्षयेति। प्रकृतश्रुतिस्तु–"एकमेवाऽद्वितीयमि'त्यादिरूपा।

(३) { अद्वैतश्रुतिबाधाय नाध्यक्षादि प्रकल्पते। अल्पाल्पविषयत्वेनेत्यं तत्प्रस्तावयत्यथ ॥ }

(४) ऋजावर्थे=सिद्धार्थे।

प्रत्यक्षादिकं भूतभाविवर्त्तमानसकलव्यक्तिभेदग्राहि जायमानमावयोः सम्प्रतिपन्नमस्ति, [d]तादृशेन ज्ञानेन चोत्पद्यमानेन सर्वज्ञतां तदा तव श्रद्दध्यां यदि जानासि मम चेतसि किं वर्त्तते इति । [e]यदि च प्रत्यक्षादि किंचिन्मात्रविषयं तदा तद्विषयादन्यत्रापि प्रवर्त्तमानाऽद्वैतश्रुतिस्तेन न बाधितुं शक्यते, स्वविषयमात्रे प्रमया विपरीतविषयज्ञानबाधनात्; अन्यथाऽतिप्रसङ्गात् । [f]मा हि भूद्(१)अग्नीषोमीयपश्वालम्भनविधिना सर्वभूताहिंसाश्रुतेर्वैयर्थ्यम् ।

टी० ननु, प्रकृतेपि बाधकमस्तीति शङ्कते—। [a]"नन्वि"ति ॥ [b]"अन्यत्रे"ति । ईश्वरैकत्वं वा ब्रह्मैकोपास्यत्वं वा प्रतिशरीरमेकैकात्मत्वं वा यद्बोध्यं तत्रैव च सामर्थ्यमित्यर्थः ॥ ननु, घटपटमात्रभेदविषयकं प्रत्यक्षं श्रुतिबाधकमिति नोच्यते, किंतु सामान्यलक्षणया प्रत्यासत्त्या सकलपदार्थभेदविषयकमेकं प्रत्यक्षमिष्यते, तत्कुक्षिस्थितानां(२)भेदार्भकाणां न किंचिद्रूपं श्रुतिडाकिन्या इत्यत आह—।[c]"ननु प्रत्यक्षादिकमि"ति । त्वये व्यमाणत्वमतत्त्वमित्यर्थः ॥ तादृशज्ञाने प्रमाणाभावमाह—।[d]"तादृशेने"ति ॥ ननु, घटपटादिनियतविषयमेव प्रत्यक्षं श्रुतिबाधकमस्तु किमत्याहित(३)मित्यत आह—। [e]"यदी"ति ॥ [f]"मा हि भूदि"ति । "न हिंस्यात्सर्वा भूतानि"—इत्येका श्रुतिः, "अग्नीषोमीयं पशुमालभेत" इत्यपरा, तत्र चानयाऽग्नीषोमीयपशावेवाऽहिंसाश्रुतिर्बाध्यते नत्वन्यत्रापि, विषयभेदादित्यर्थः ॥

---

(१) अतिप्रसङ्गमेव स्फुटयति–मा हि भूदिति । माभूदिति तु विद्यासागराभिमतः पाठः । विरुद्धार्थग्राहित्वमात्रेण बाधकत्वमेकविषयत्वाभावेपि चेदिष्टं तर्हि विषयत्वेन तदभावविषयत्वस्य विरोधात्पश्वालम्भनविधिना सर्वभूताऽहिंसाविधेर्वैयर्थ्यं=निर्विषयत्वमप्रामाण्यं स्यात्तन्माभूदित्यर्थः ।

(२) तत्कुक्षिस्थितानाम्=सामान्यलक्षणाप्रत्यासत्तिकुक्षिनिविष्टानाम् ।

(३) अत्याहितम् = भयम् "अत्याहितं महाभीति"रिति कोशात् । अस्यैवार्थस्याऽविज्ञानात्पायः पुस्तकेषु 'किमन्याहितमि'ति प्रकल्पितः पाठो दृश्यते ।

मू० [a]"यदा चैवं, तदा बाधिकायाः प्रत्यक्षधियो बाध्याया-इवाऽद्वैतबोधने श्रुतिर्निराबाधा सती तयोरैक्यं बोधयतीति तत् प्रत्यक्षादि कथं स्वात्मान(१)मेव बाधेत। [b]घटेन(२),पटेन तद्भेदेन च स्वविषयेण सह तस्या एव धियः श्रुत्या सर्वस्याद्वैतं गोचरयन्त्या कथं नाभेदे प्रामाण्यमासादयितव्यम्, तत्राबाध्यमानत्वात्। [c]नहि (३)तस्या धियः स्वात्मा वा, स्वात्मना सह घटपटादेर्भेदोपि वा, विषयः। [d]"घटपटौ(४)भिन्नावि'त्येवमाकारा हि सा जायते, नतु 'अहं घटात् पटाच्च भिन्ना, मत्तो वा तौ भिन्नौ'-इति। [e]स्वप्रकाशतापि स्वमात्रे साक्षिणी, नतु यतो यतः प्रकाशो भिद्यते ततस्ततस्तस्य भेदेपि। [f]अन्यथा तत्तदपि स्वप्रकाशकुक्षौ निक्षिपन्ती न कथमद्वैते एव पर्यवस्यति।

टी० ननु, समाने एव विषये बाध्यबाधकभावोऽस्तु किमेतावतेत्यत आह-।[a]"यदाचे"ति। बाध्यबाधकधियोरैक्ये बाध्यबाधकभावाऽभाव एवेत्यर्थः॥ बाधकाभिमतप्रत्यक्षस्य विषयेण सह; भेदः श्रुतिविषय इत्याह-।[b]"घटेने"ति॥ तदेवोपपादयति-। [c]"नही"ति॥ कथमेवमत आह-। [d]"घटपटावि"ति॥ मीमांसकशङ्का(५)मपनयति-। [e]"स्वप्रकाश-

---

(१) बाध्यबाधकधियोरैक्ये बाध्यायाः श्रौतधियो बाधने प्रत्यक्षेण स्वात्मन एव बाधः कृतः स्यादिति भावः।

(२) घटेनेति, सर्वस्याऽद्वैतं गोचरयन्त्या श्रुत्या घटेन, पटेन, तद्भेदेन च स्वविषयेण (घटपटौ भिन्नावित्येत्वं विधभेदग्राहिप्रत्यक्षविषयेण) सह तस्या धियः (भेदग्राहिप्रत्यक्षधियः) अभेदबोधने प्रामाण्यं कथं नासादयितव्यम्-इत्यन्वयः।

(३) नहीति, स्वविशिष्टभेदग्रहणांशतः स्ववृत्त्यापातादित्यर्थः।

(४) घटपटाविति यदाकारा बुद्धिर्जायते तदाकारत्वानैयार्थस्तद्विषय इति नियमाद्बुद्धिधर्मिकबुद्धिप्रतियोगिकभेदाकारस्याभावात्तानया तत्सर्वं भासत इत्यर्थः।

(५) बुद्धेः स्वप्रकाशत्वात्स्वभेदग्राहकत्वमुपपद्यते इति मीमांसकशङ्का।

ते"ति ॥ ननु, यतो यतः प्रकाशो भिद्यते तत्सर्वं स्वप्रकाशज्ञानविषय एवेत्यत आह-। [f] "अन्यथे"ति । स्वप्रकाशबलेन तत्सर्वं तदा भासेत यदि तदपि स्वं भवेत् तथा च स्वभिन्नत्यापि सर्वस्य स्वप्रकाशज्ञानात्मत्वे पुनरद्वैतमेव पर्यवस्येदित्यर्थः ॥

मू० *[a] नच तया धिया स्वस्य, स्वविषयस्य च स्वरूपावगाहने स्वरूपलक्षणो भेदः प्रकाशित एव स्यादिति वाच्यम् *, "पुरोवर्त्ति रजतमि"ति भ्रान्तौ पुरोवर्त्यात्मनो रजतात्मनश्च प्रकाशे भेदग्रहापत्तेः । [b] धर्मविशेषमन्तर्भाव्य स्वरूपस्य भेदत्वे धियोपि तथा स्यादिति सैव धीर्न तत्प्रकाशस्तस्मिन्सन्निकर्षाद्यपेक्षायां धियः प्राक्तदसंभवात् । [c] *आत्मवदात्मधर्म्मेपि सन्निकर्षानपेक्षा सा*?–इति चेन्न, [d] ग्रहणत्वस्मृतित्वप्रमात्वादावपि तथैव स्यादिति

टी० ननु, स्वप्रकाशज्ञानस्य स्वं विषय इति विषयाद्(१) घटपटादेः स्वस्य स्वरूपभेदः कथं न विषयो भवेदित्यत आह-। [a] "नचे"ति । स्वरूपभेदग्रहस्याऽभेदग्रहपरिपन्थित्वे भ्रमः क्वापि न स्यात्तस्य(२) ते वारोप्यारोपविषयग्रहपूर्वकत्वात्, तस्य चारोपपरिपन्थित्वादित्यर्थः ॥ ननु, स्वरूपमात्रं न स्वरूपभेदः, किंतु परस्परवैधर्म्यविशिष्टं स्वरूपं तच्च शुक्तिरजतयोर्न गृहीतमिति नारोपानुपपत्तिरित्यत आह- [b] "धर्मे"ति । तर्हि धियोपि स्वरूपमात्रं न भेदः, किंतु वैधर्म्यालिङ्गितं स्वरूपं, वैधर्म्यं च स्वस्य(३) प्रकाशत्वेपि न स्वविषयः, किंतु संयुक्त(४)समवेतसमवायेन प्रत्या

(१) घटपटादेर्विषयादित्यन्वयः ।

(२) तस्य=भ्रमस्य, आरोप्यारोपविषयग्रहपूर्वकत्वात्,=आरोप्यं रजतादिरारोपविषयोऽधिष्ठानं शुक्त्यादिस्तदुभयस्मरणग्रहणपूर्वकत्वात्, तस्य च=आरोप्यारोपविषयस्वरूपभेदग्रहणस्य च, आरोपपरिपन्थित्वात्=भ्रमपरिपन्थित्वेन त्वयाङ्गीकारादित्यर्थः ।

(३) स्वस्य=ज्ञानस्य, प्रकाशकत्वेपि न ज्ञानविषय इत्यर्थः ।

(४) मनःसंयुक्त आत्मा, तत्समवेतं ज्ञानं, तत्र समवायो ज्ञानत्वादेर्धर्म्मस्येत्यर्थः ।

सत्या मनसा तद्ग्रहो भवेत्, न च(१)स्वोत्पत्तेः पूर्वं स्वघटितसंयुक्तसमवेतसमवायः प्रत्यासत्तिः संभाव्यते इत्यर्थः ॥ ननु, यथा प्रत्यासत्तिमन्तरेण स्वग्रहस्तथा स्वधर्मग्रहः स्यात् को दोष इत्यत आह(२)— ‘‘आत्मवदि” ति ॥ “ग्रहणत्व”ति । तथाच ग्रहणत्वस्मरणत्वसंशयो न स्याच स्याच्च प्रामाण्याऽप्रामाण्यसंशय इति भावः ॥

मू० “तदेवं सा बुद्धिः श्रुत्या घटपटात्मतया व्यवस्थाप्यमाना कथमात्मनः(३) स्वस्मादेव भेदे प्रमाणीभवितुं प्रभवतीति' बाधिकायां बुद्धौ घटपटयोर्भेदे प्रमात्वाभावमासादयन्त्यां श्रुतिस्तत्र(४) तत्राप्रतिहन्त्रित्वाऽसङ्कुचितस्वतः प्रामाण्यबललब्धतत्तदर्थैक्यान्यथानुपपत्तिसहायसम्पदऽजय्या तयोरप्यभेदं बोधयन्ती न प्रतिहन्तुं शक्येति न(५) क्वचिदपि प्रतिहतप्रसरा सती सर्वाद्वैतप्रमापिकेति ।' भेदप्रमान्यथानुपपत्त्या च वैपरीत्यमशक्यम् ।

टी० ननु, तया धिया स्वस्य स्वरूपभेदोऽपि मा गृह्यतां किमनिष्टमित्यत आह—। “‘तदेवमि’’ति । घटपटभेदग्राहकं यत्प्रत्यक्षं तद्धि

---

(१) न च ज्ञानोत्पत्तेः पूर्वं ज्ञानघटितनिरुक्तप्रत्यासत्तिरित्यर्थः । अयं भावः-सन्निकर्षस्य बुद्धिजन्मार्थत्वाद्बुद्धेः प्रागेवासौ वक्तव्यो न च तत्संभवति बुद्ध्यभावे तत्समवेतधर्मसन्निकर्षासंभवादन्यथाऽन्योन्याश्रयादित्यर्थः ।

(२) इत्यत आह. ‘इति चेत’-इत्यन्तं सिद्धान्त्याहेत्यर्थः, अत आत्मवदित्यादेः पूर्वपक्षग्रन्थत्वेऽपि माऽऽपत्तिः । एवमग्रेप्येवंविधस्थले ज्ञेयम् ।

(३) आत्मनः = स्वाभिन्नघटस्य, स्वस्मात् = स्वाभिन्नघटादित्यर्थः ।

(४) बाध्यबाधकबुद्ध्योर्बाध्यबुद्धेरेव स्वविषययोरभेदबोधनेऽप्रतिहन्त्रित्वाच सङ्कुचितस्य तत्स्वतःप्रामाण्यं चेति तथोक्तम्, तस्य बलं = सामर्थ्यं, तेन लब्धमप्रतिहन्त्रितयाऽसङ्कुचितस्वतःप्रामाण्यबललब्धं,तच्च तत्तदर्थस्यैक्यं चेति तथोक्तं, तस्य याऽनुपपत्तिःसैव सहायस्तस्य संपत् तयाऽजय्या क्वचिदपि प्रतिहन्तुं न शक्येति सर्वाद्वैतप्रमापिकेत्यर्थः ।

(५) श्रुतिः क्वचिदपि प्रतिहतप्रसरा न सती सर्वाऽद्वैतप्रमापिकेति सम्बन्धः ।

श्रुत्या घटपटाभिन्नं कृतं तदा घटपटभेदग्राहकतैव तस्य न निर्वहेदित्यर्थः॥ ननु, घटपटयोर्भेदे सा धीः प्रमाणमतस्तद्भयेन श्रुतिस्तत्र कथं प्रवर्तेत तथाच घटपटौ विहायाऽन्यत्राद्वैतं सिद्ध्यति नतु तयोरपीत्यत आह—। [b]"बाधिकायामि"ति। घटपटभेदग्राहिणी या बुद्धिस्तया सह घटपटयोरभेदं गृहीतवती श्रुतिः घटपटयोरभेदमन्तरेणानुपपद्यमाना तयोरप्यभेदमानयति । किंच, पटाभिन्नबुद्ध्यभिन्नत्वाद् घटोऽपि पटाऽभिन्नः साधयितुं पार्यते एवेति तद्(१)पष्टम्भोऽपि श्रुतेः । न चास्याः परग्राह्यं प्रामाण्यं, येन तद्ग्राह्यापि द्वैतं निर्वहेदिति न किंचिदस्याः श्रुतेः परिपन्थीत्यर्थः ॥ ननु, घटपटभेदप्रमैव तद्भेदमन्तरेणानुपपद्यमाना सर्वत्र श्रुतिमपसारयिष्यतीत्यत आह—। [c]"भेदप्रमे"ति ॥

मू० [a]'तत्राद्वैतश्रुत्या सन्दिह्यमानस्य प्रमात्वस्यैवासिद्धेः' [b]'भेदधीमात्रस्य च द्विचन्द्रादिबोधवदन्यथाप्युपपत्तेः ।

टी० श्रुतिप्रामाण्यमुभयसिद्धं, प्रत्यक्षप्रामाण्यं चान्यतरमात्रसिद्धमिति परिपन्थिश्रुतिदर्शनात्तत्रापि तत्र(२)सन्देहः स्यादिति भेदप्रमान्यथानुपपत्तिर्दुर्बला न श्रुतिपरिपन्थिनीत्याह—। [a]"तत्रे"ति ॥ ननु सन्दिह्यतां प्रामाण्यं, भेदज्ञानमगृहीतप्रामाण्यमेव श्रुतिबाधकं स्यादित्यत आह—। [b]"भेदे"ति । अन्यथासिद्धिशङ्काकलङ्कितस्य न विरोधिज्ञानप्रतिबन्धकत्वमित्यर्थः । अत्र, यद्यपि (३) सर्वभूताहिंसाश्रुतिरग्नीषोमीयपश्वालम्भनबोधिकया श्रुत्या सङ्कोच्यते नतु बाध्यते, प्रत्यक्षेण तु प्रवृत्तमात्रेणाद्वैतश्रुतिर्बाध्यत एवातो न क्वाप्यस्याः प्रसरः, नहि 'घटपटौ भिन्नौ' एकमेवाद्वितीयं ब्रह्म'—इति ज्ञाने संभवतो विरोधात् । * दैवः पशुर्हिंस्यः, सर्वभूतमहिंस्यमित्यनुपपन्नम् * ?—इति चेत्तत्र सर्वपदकृतपदयोर्विषयसङ्कोचेन दैवपशु-

(१) घटपटाभेदाग्रहणमपि विषयतया श्रुतेरावश्यकमित्यर्थः ।

(२) तत्र = प्रत्यक्षे, प्रामाण्यसन्देहः स्यादित्यर्थः ।

(३) मा हि भूदग्नीषोमीयपश्वालम्भनविधिना सर्वभूताहिंसाश्रुतेर्वैयर्थ्यमित्याद्याशङ्कितमर्थमाक्षिप्य समाधत्ते—यद्यपीत्यादिना ।

भिन्नं सर्वमद्वितीयमिति सामञ्जस्यसंभवात्, इह 'घटपटभिन्नं सर्वमेकमि'ति समञ्जसे(१) क्रियमाणे महदसमञ्जसं, त्वदभ्युपगताद्वैत(२)भङ्गात्। * क्रमेण(३) तयोरप्यभेदोऽर्थापत्त्या पर्य्यवस्येत् *?—इति चेत्तर्हि न श्रुतिरद्वैते प्रमाणं, बाधविषये कुण्ठितत्वात्। किंच, तत्त(४)त्प्रत्यक्षशार्दूलमुखकुहर-संप्रविष्टं भेदमवलोक्य पलायमाना श्रुतिरियमबला प्रतीयमानं स्वार्थजातं संत्यजन्ती ब्रह्मानुचिन्तनमात्रपरैव स्यात्। किंच, "बाधव्याधभयोद्विग्नत-माऽद्वैतश्रुतिमृगी, ब्रह्मारण्येऽपि विश्वासं कथमासादयिष्यति" सर्वमभिन्न-मिति श्रुत्यर्थः स्वस्मात्सर्वमभिन्नमेवेत्येतावताप्युपपद्यते एव। 'नेह ना-नास्ति किंचन''—इत्यपि किंचन वस्तु न नानेत्येवमप्युपपद्यते। नहि किमपि वस्तु नाना, सर्वस्य वस्तुनः प्रत्येकमेकत्वात्। किंच, ब्रह्माद्वितीयमिति सकलानुमतमेव। किंच, यदि ब्रह्ममात्रावशेषं जगदिति बोध्यं, तदा "ब्रह्मै-वैकम्"—इति स्यान्न तु "एकमेव ब्रह्मे"ति। किंच, यथा 'एक एव नरप-तिरत्र, नतु नाना'इति वाक्यं द्वितीयं नरपतिमेव निषेधति नतु पुरुषान्तर-मपि नास्तीति(५)ततः प्रतीयते। किंच, तात्पर्य्याधीनं श्रुतिप्रामाण्यमतः कुत्रार्थे तात्पर्य्यमित्यनिश्चयाद् दुर्बलायाः श्रुतेरेव सर्वत्र प्रत्यक्षेण बलवता बाधः। किंच, चैत्रस्य घटपटभेदज्ञानं, मैत्रस्य कटकुट(६)भेदज्ञानं, देवद-त्तस्य नटविटभेदज्ञानम्, इति तत्तदन्यसर्वाद्वैतार्थत्वे श्रुतेर्वाक्यभेदः(७)।

---

(१) सामञ्जस्ये इति सूचितम्।

(२) घटपटयोर्भेदव्यवस्थितावच्छेदकावच्छेदेनाभ्युपगताद्वैतभङ्गादित्यर्थः।

(३) घटपटभेदविषयकबुद्धेः स्वविषयाव्यभेदव्यवस्थितौ तदन्यथानुपपत्त्या क्रमेण घटपटयोरप्यभेदो व्यवतिष्ठेतेत्यर्थः।

(४) तत्तत्प्रत्यक्ष=घटपटादिभेदावगाहिप्रत्यक्षमेव शार्दूलस्तन्मुखकुहरे=तन्मुख-विवरे, प्रविष्टं भेदं विलोक्येत्यर्थः।

(५) इति = इत्थमेव, ततः = एकमेवाऽद्वितीयमितिवाक्याद्सजातीयब्रह्मा-न्तरनिषेधः प्रतीयते—इति कथंचिद्व्याख्येयम्। वस्तुतस्त्वयं दृष्टान्तपरो ग्रन्थः, दार्ष्टान्ति-कपरस्तु कश्चिद्गलितो वा ऽध्याहर्तव्यो वेति प्रतिभाति।

(६) कुटो घटः, "घटः कुटनिपावस्त्री"ति कोशात्।

(७) वाक्यभेदस्तु एकस्यैव वाक्यस्य युगपद्विभिन्नार्थद्वयाऽभिधायकत्वम्।

किंच, अभेदज्ञानस्य 'तानेव(१)तित्तिरीन्' 'तानेव शालीन्'—इतिवदेक धर्मोपग्रहेणाप्युपपत्तिः, भेदग्रहस्तथा नान्यथोपपादयितुं शक्य इति प्रत्य क्षमेव बलीयः । किंच, सर्वमभिन्नं, घटपटौ भिन्नाविति बुद्ध्योः प्रामाण्ये संभवति क्व बाध्यबाधककल्पनापि, नहि(२)प्रमेयत्वादिनापि सर्वमभिन्नं न मन्यामहे, तथापि(३)"आपाततो यदिदमद्वयवादिनीनाम् इत्यादावेव तात्पर्य्यम् ॥

मू० [a]"'एकम्-इत्युपादाय यद् एवकारमप्युपादत्ते श्रुतिः "एकमेवेदम्"-इतिरूपा, तदैकान्तिकमैक्यं बोधयतीति भेदाभेदेनाप्यशक्यसमर्थनं-घटपटादिभेदग्राहिप्रत्यक्षादिप्रामाण्यमिति ।

टी० ननु श्रुत्याऽभेदः, प्रत्यक्षेण च भेदो बोध्यते, द्वयं च प्रमाणाम. नुरोध्यं, ततो भेदाभेद एवास्त्वित्यत आह—। "'एकमि"ति । यद्यपि ब्रह्मण एकत्वं प्रपञ्चाभावे प्रपञ्चाभेदे चोपपद्यते इति कथमियं श्रुतिरेकताऽवधारिका(४) यद्यपि च प्रपञ्चमिथ्यात्वं शङ्कराचार्याद्यनुमतं ननु प्रपञ्चब्रह्मणोरभेद इत्यभेदबोधकतया श्रुतिव्याख्याने ऽपसिद्धान्तः, यद्यपि च घटाद्यभेदे ब्रह्मणोपि जडत्वमिति स्वप्रकाशानन्दरूपत्वविरोधस्तथाप्यापाततो यदिदमित्यादौ वक्ष्यमाणेऽर्थे एव तात्पर्य्यम् ॥

मू० *"बुद्धेर्विरम्य व्यापाराभावात् कथमित्थम् *?-इतिचेन्न [b]श्रुतितो प्रागेव जातायाः सर्वविषयाया अद्वैतधियो(५)-

(१) पूर्वदृष्टसजातीयतित्तिर्यादिदर्शने यत्र तानेव तित्तिरीन् (विहगविशेषान्) पश्य, तानेव शालीन (तण्डुलानि)पश्येत्यभेदावगाहिनी प्रत्यभिज्ञा, सा तित्तिरित्वशा) लित्वलक्षणैकधर्मावग्रहपूर्विका यथा, तथा प्रकृतेप्यभे ज्ञानस्योपपत्तिरित्यर्थः ।

(२) सर्वमभिन्नमित्युक्तमुपपादयति—नहीति । प्रमेयत्वादिनाऽभेदः, घटत्वपट त्वादिना तु भेद इति भावः ।

(३) तथापीत्येतद्दूरव्यवहितेन यद्यपीत्यनेनाऽन्वेति । आपातत इति, अद्वैतप्र तिपादनमप्यापातत एवेति निर्गलितार्थः ।

(४) 'विधायिका'-इत्यपि क्वचित्पाठः ।

(५) अद्वैतधिय एवं विधविचारसोपानपरम्पराम् (क्रमिकाऽभेदविषयकप्रतिप.

समुड्डय एवंविधविचारसोपानपरम्परामारोहन्त्यो-
नानाविषयेषु तत्प्रामाण्यविषयाः क्रमेण परिनि-
तिष्ठन्तीत्युच्यमानत्वात् । * 'ननु, यदि नामप्रत्यक्ष-
विद्या तया घटपटभेदोल्लेखिन्या स्वात्मना सह घट-
पटयोर्भेदो न गोचरीक्रियते तावता कथं तस्याः स्ववि-
षयेण सहाऽद्वैते श्रुतिः प्रामाण्यमासादयितुमीष्टे'बुद्ध्य-
न्तरेण तया सार्द्धं घटपटयोरपि भेदमुल्लिखता तत्रा-

ननु 'प्रत्यक्षविरोधादापाततः श्रुतिजबुद्धिः स्वस्मादेशाभेदं विष-
याणां विषयीकृत्य क्रमेणार्थापत्त्यादिबलाद् विषयाणामन्योन्यमभेदं विष-
यीकरिष्यती'त्यनुपपन्नं शब्द(१)बुद्धिकर्मणां विरम्य व्यापाराभावादित्याह–।
a "बुद्धे"रिति ॥ श्रुतित एकदैव जातायाः सर्वाभेदबुद्धेः सर्वविषये प्रामाण्यं
प्रत्यक्षबाधेन प्रतिबन्धाज् झटिति दुर्ग्रहमिति तत्तद्विषयप्रत्यक्षबाधनिरा-
सक्रमनिबन्धनः प्रामाण्यग्रहक्रमो नतु बुद्धेर्विरम्य व्यापारतेत्याह–।b "श्रुति-
त"इति । यद्यपि बाधो(२)बुद्धिमेव प्रतिबध्नाति नतु तत्प्रामाण्यग्रहमिति
कथं न बुद्धेः श्रुतिलक्षणस्य शब्दस्य वा विरम्य व्यापारता तथापि "अत्यन्ता-
ऽसत्यपि(३)ज्ञानमर्थे शब्दः करोती"त्यभिप्रेत्यैतदुक्तम् ॥ घटपटभेदग्राहि-
प्रत्यक्षेण स्वात्मना सह घटपटयोर्भेदो न गृहीत इति तत्र श्रुतिर्लब्धपदा
तयोरप्यभेदं विषयीकरिष्यतीति यदुक्तं तत्र शङ्कते–। c "नन्वि"ति ।
घटपटभेदग्राहिप्रत्यक्षं घटपटौ न भवत इति ज्ञानान्तरेण तद्भेदोऽपि सुग्रह
एवेति तत्रापि श्रुतिर्न प्रभवतीति शङ्कार्थः ॥

[सोपानपरम्पराम्) आरोहन्त्योऽस्मद्बुद्धयो नानाविषयेषु तत्प्रामाण्यविषयाः (अभेदबुद्धिप्रा-
माण्यविषयाः) क्रमेणपरितिष्ठन्तीत्यन्वयः ।

(१) शब्द एकं बोधं जनयित्वा विरतव्यापारो न शाब्दबोधान्तरं जनयति,
तथा बुद्धिरप्येकस्मिन्नर्थे ज्ञाततां संस्कारं वा जनयित्वा न ज्ञाततान्तरं संस्कारान्तरं वा,
एवं कर्माप्येकत्र विभागमुत्पाद्य न विभागान्तरमित्यर्थः ।

(२) "घटपटौ भिन्नौ–"इत्याकारको बाधः, बुद्धिं–श्रुतिजाऽभेदबुद्धिमित्यर्थः ।

(३) अत्यन्तासत्यर्थः शशशृङ्गादिस्तत्रापि चेच्छब्दो ज्ञानं जनयति किमुत सद्भूते
वस्तुनि इति भावः ।

मू० "नहि तस्या अपि विषयमापाततः परित्यज्य यथैवापरया बुद्ध्या घटपटभेदबुद्धेर्घटाच्च पटाच्च भेदो विषयीक्रियते तस्याः स्वविषयेण सहाऽद्वैते श्रुतिः प्रामाण्यमवलम्ब्य लब्धपदा घटपटतद्भेदबुद्धिभिः सह द्वितीयाया बुद्धेरभेदे पर्य्यवस्यन्तो सर्वेषामेव तेषामभेदे विश्राम्यति । [b] एवं च सति यत्रैव गत्वा बाधबुद्धिपरम्पराविच्छेदो विषयान्तरसंचारोच्छेदभयादनवस्थाभयाच्चाभ्युपेयस्तस्यामेव बुद्धौ पदमारोप्याऽद्वैतश्रुतिः सर्वं तद्विषयविषयिप्रवाहमद्वैते स्थापयन्ती न केनापि प्रमाणेन क्वचिदपि विषये बाधितुं शक्या । तस्मात्--

[c] सुदूरधावनश्रान्ता (१) बाधबुद्धिपरम्परा ।
निवृत्ताऽद्वयाम्नायैः पार्ष्णिग्राहैर्विजीयते ॥ ८ ॥

टी० यावद्दूरं बाधबुद्धिपरम्परोदयस्तत्रापाततः क्वापि श्रुतिबोधबुद्धिपरम्परानिवृत्तौ चरमबुद्धौ पदमारोप्य तद्विषयविषयिप्रवाहाद्वैतं बोधयिष्यतीति परिहरति--। [a] "नहि तस्या अपी"ति । प्रमाण्यावलम्बनम्=अबाध्यत्वेन व्यवस्थितत्व, पदलाभः=सहकारिसाचिव्यं ; पर्य्यवसानमभेदबोधनं ; विश्रामः=स्वजनितमकलाऽद्वैतधीप्रामाण्यासादनम् ॥ ननु भवेदेवं यदि भेदबुद्धिधाराविश्रामः स्याच्च त्वेवमत आह--। [b] "एव

(१) सुदूरधावनश्रान्ता, भूरिकक्षानुसरणाऽप्रसेति यावत् । इदमत्राकूतम्-- "अरिर्मित्रमरेर्मित्रं मित्रमित्रं ततः परम् । तथाऽरिमित्रमित्रं च विजिगीषोः पुरःसराः ॥ पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम् । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः । मण्डलाद्बहिरेतेषामुदासीनो व्यवस्थितः" इति विजिगीषो राज्ञो द्वादश राजमण्डलम्, तत्र खलु यथा लोके कश्चिद्विजिगीषुर्दूरे प्रस्थितः परवाहिनी विजित्य निवृत्तो पार्ष्णिग्राहैर्विजीयते तथा बाधबुद्धिपरम्पराऽद्वैतपरम्पराजयाय दूरं प्रस्थिताऽनवस्थाना क्वचिन्निवृत्तौ पार्ष्णिग्राहैरद्वयाम्नायैर्विजीयते इति । क्वचिद् "विनिवृत्ताऽद्वयाम्नायैः"-- इति पाठः ।

रै"ति । विषयान्तरसंचारदर्शनेनाऽनिर्मोक्षप्रसङ्गभयेन च विश्रामसिद्धेरित्यर्थः ॥ ' "सुदूरे"ति मद्वयाम्नायैः=अद्वैतश्रुतिभिः । पार्ष्णिग्राहैः=पृष्ठतोवर्तिभिर्विपक्षैरित्यर्थः । यद्यपि चरमबुद्धिज्ञाने चरमत्वव्याघातः, तदज्ञाने च कुत्र श्रुतेः पादारोपणं, श्रुतिप्रवृत्त्यर्थं त्वयैव तदुपस्थापने पुनश्चरमत्वव्याघातः, तदैव तथापि सम भेदपक्षश्च; अनुपस्थापने श्रुतिप्रवृत्त्यनुत्पादनम्, तथाच "सुदूरधावनाऽश्रान्ता बाधबुद्धिपरम्पराऽविनिवृत्ताऽद्वयाम्नायैः पार्ष्णिग्राहैर्न जीयते"-- इति परेणापि पठितुमुचितं(१), तथापि स्वप्रकाशसिद्धमेव ब्रह्माद्वैतमिति भावः ॥

मू० "*नच यत्र तस्य प्रतिपत्तुर्बुद्धिधाराविश्रान्तिस्तत्र पुरुषान्तरबुद्धिर्भेदे प्रमाणं स्यात् * । तथापि पुरुषान्तरेण भिन्नतया सा(२) प्रतीयत इत्यत्र प्रमाणं त्वया वाच्यम् । नहि तदपि पुरुषान्तरेणैव, 'न च संभाव्यमानम्, श्रौतेन निश्चयेन तन्निवर्तनात्; तथाप्यनवस्थानादिति । 'अथ ब्रूषे-*यदा कियद्दूरं बुद्धिपरम्परया सा बाधिता भवत्यद्वैतश्रुति(३)स्तदा तन्न्यायाद् यापि बुद्धिःशेषं गत्वा नाऽनुव्यवसीयते तत्रापि तद्धा-

---

(१) अत्र यत्खण्डनभूषामणिकृता रघुनाथस्य शङ्का-ममतमनूद्य 'नच तस्याः परबाधबुद्धिमपेक्ष्य तस्याश्चरमत्वात् । मया तदुपस्थापने त्वया तदैव भेदो ग्राह्य -इत्यपि न, मयाऽभेदं गृहीत्वैव तदुपस्थापनात् । यथा तव भेदपक्षस्ताद्रूप्यो तथा ममाद्वैतपक्षस्यापि भेदपक्षविरोधित्वादित्यलं काव्यरचनाकृशलानां तेनैव स्वशिष्याणामीदृशानां खण्डनकथया' -इति खण्डनं, तच, खण्डनकोटेः सर्वतो बलवत्त्वेन युक्त्या विचार्यमाणस्याप्यर्थस्याप्रतिष्ठितत्वात्स्वप्रकाशसिद्धमेव ब्रह्म, न तु श्रुतियुक्तिभिस्तत्साधनापेक्षत्यत्रैव तात्पर्यात् ।

(२) सा=भ्रान्तमबुद्धिः, स्वविषयाद्भिन्नतया प्रतीयते- इत्यत्र प्रमाणं त्वया वाच्यं, नच तद् वक्तु शक्यमनवस्थानादिति भावः । क्वचित्तु "सा प्रमीयते"-इति पाठः ।

(३) अद्वैतश्रुतिर्बुद्धिपरम्परया कियद्दूरं बाधिता भवति यदा, तदा या बुद्धिः शेषं गत्वा (शेषमवशिष्टां कक्षां गत्वा) नानुव्यवसीयते (ज्ञानान्तरवेद्या न भवति) समानन्यायात्तत्राप्यद्वैतश्रुतेर्बाधो गम्यत इत्यर्थः । तन्न्यायादित्येतद्व्याचष्टे-यत्रेति, यत्र=कनपबुद्धिपरम्परायां, याऽद्वैतश्रुतिर्बाध्यते तत्तुल्यन्यायत्वाद्=भ्रान्तमबुद्धेरपि बुद्धित्वाऽविशेषादित्यर्थः ।

घोऽवगम्यते, यत्र सा बाध्यते तत्तुल्यन्यायत्वाद्भ्रान्तिमबुद्धेरपि'–इति । मैवम् । किं कियतीषु बुद्धिषु व्याप्यव्यापकौ कावप्यवलम्ब्य व्याप्तिग्रहरूपयैव धिया शेषबुद्धौ बाधं व्युत्पादयसीत्यमद्वैतश्रुतेः ? किं वा बुद्ध्यन्तरदृष्ट्याप्तिमनाथया पक्षधर्म(१)हेतुमुल्लिखन्त्या बुद्ध्यान्तिमबुद्धिविषयया ? ।

टी॰ ननु विषयान्तरासंवादादर्शनादनवस्थाभयाच्च बुद्धिधाराप्रवाहविच्छेदसिद्धावपि पुरुषान्तरबुद्ध्या तद्बुद्धिधाराविषयविषयपर्यन्तभेदग्राहिकया श्रुतेर्बाधोऽस्त्वित्यत आह–। a "नचे"ति ॥ b "तथापी"ति । पुरुषान्तरेण चरमबुद्धेर्भेदो दृश्यते–इति यदि त्वया कथायामेव प्रमापणीयं तदा तत्रैव प्रमाणे श्रुतिप्रवृत्तिः, एव(२)मत्रतत्रेति पुनरनवस्था, प्रमाणानुपदर्शने च तव पराजय एवेत्यर्थः ॥ ननु न मया तत्र प्रमाणं वाच्यं, किं तर्हि, पुरुषान्तरेणैव वाच्यमतो नानवस्थेत्यत आह–। c "नही"ति । पूर्वदोषतादवस्थ्यादिति(३) भावः ॥ ननु यद्यपि मदीयान्त्यबुद्धेः स्वविषयाद्भेदो मया न गृह्यते, यद्यपि च 'पुरुषान्तरेण गृह्यते'–इति मया प्रमापयितुं न शक्यते, तथापि सम्भाव्यते तावत्, सम्भावनापि च विरोधिन्येव विपरीतनिश्चयस्येति कथं तत्राप्यद्वयश्रुतिप्रवृत्तिरित्यत आह–। d "नचे"ति । संभावनया प्रमाणाऽप्रवृत्तावनुमानादिकमपि न प्रवर्तेतेत्यर्थः ॥ ननु तर्कादिना विपरीतशङ्कानिवृत्तावनुमानादि प्रवर्तते, ननु तस्य सत्यामेव, प्रकृते तु तथाविधतर्को नास्ति यः सम्भावना विहन्यादित्यत आह–। e "तथाप्यनवस्थानादि"ति । यद्यपीयमनवस्था तुल्यैव, संभाव-

(१) पक्षस्य यो धर्मः हेतुर्बुद्धित्वादिस्तमुल्लिखन्त्याऽनुमानरूपया धियेत्यर्थः ।

(२) एवं तत्रतत्र प्रमाणे प्रमाणान्तरप्रदर्शने त्वनवस्थेत्यर्थः ।

(३) पुरुषान्तरेणापि प्रमाणप्रदर्शने तत्प्रदर्शितप्रमाणे प्रमाणान्तरं पुनस्तत्प्रमाणं प्रमाणान्तरमप्येवं प्रदर्शनीयमिति पुनरप्यनवस्थानाद् अप्रदर्शने च तस्यैव कथकापादाया: पूर्वैस्सर्वाभेदे पर्यवसानादित्यर्थः ।

ना(१)मनुपनयत(२)स्तथापि श्रुतिविषयाऽनुपन्यासात्; तथा "व्याघाततो यदिद"मित्यादावेव तात्पर्यम् ॥ या या बुद्धिः सा सा स्वविषयाद्भिन्ना, घटपटौ भिन्नाविति बुद्धिवदिति चिवतुः कवायां बुद्धिधारायां व्याप्तव-धारणादन्तिमबुद्धावपि तद्बलात्स्वविषयभेदसिद्धौ क्व श्रुतेरवकाश इत्याशङ्कते—। "अथे"ति ॥

मू० "नाद्यः व्याप्तिबुद्धिर्यदि विषयविशेषेपि स्वातन्त्र्येण बाधात्मिकोपेयत तदा सैव विशेषबुद्धिरपि स्यादिति गतमनुमानकथया । अथानुमितिमभ्युपैषि, तदा सा नात्मानमपि धर्मीकृत्य प्रवर्त्तते इति तत्रैव दत्तपदा (३) सर्वामद्वैतश्रुतिः परम्परामालम्बते-इत्युक्तमावर्त्तते । अथ * सर्वा विवादाध्यासिता बुद्धयः स्वविषयेभ्यो भिन्ना, बुद्धित्वाद्, घटपटबुद्धिवदिति सामान्याकारेणात्मानमपि धर्मीकृत्यात्मनोपि स्वविषयाद्भेदं साधयिष्यत्यनुमा'-इति मन्यसे, मैवम्, एवमपि विषयिणो विषयद्वयाऽभेदं बाधयन्ती श्रुतिरनुमानमप्यनवकाशयति ।

टी० व्याप्तिधीरेव तत्र प्रमाणम्, तदुपजन्यादनुमानं वा प्रमाणम्-इति विकल्प्य दूषयति(४)—। "नाद्य"इति । व्याप्तिग्राहकप्रमाणस्यैव विशेषोपस्थितौ सामर्थ्यनुमानं प्रमाणमनवकाशमेव(५) स्यादित्यर्थः ।

(१) सर्वत्रापि भेदस्याऽसम्भाव्यमानत्वे ऽभेदोपि सत्याऽशक्यादभावनः स्यादिति भेदसंभावनापूर्वकस्यैव तस्य वक्तव्यत्वेन यथायथा भेदसम्भावनायामनवस्था तथातथा तदभेदबाधनापि पर्यन्ततो यत्रैवाऽभेदो न बाधनीयस्तदारभ्याऽऽमूलमभेदबोध इत्यभिप्रेत्याह-सम्भाव्येति ।

(२) "उपनयत."-इत्यपि क्वचित्पाठः ।

(३) तत्रैव दत्तपदा द्वैतश्रुतिः सर्वामद्वैतपरम्परामालम्बते-इति सम्बन्धः ।

(४) आद्यं पक्षं दूषयतीत्यर्थ. ।

(५) पक्षधर्मताबलेनाऽनुमानेनैव हि वन्ह्यादेः पर्वतीयत्वादितत्तद्विशेषसिद्धिः, व्याप्त्यैव च तत्सिद्धावनुमानं निरर्थकमेव स्यादित्यर्थः ।

अन्तिमबुद्धिः स्वविषयाद्भिन्ना बुद्धित्वादाद्यादिबुद्धिवदित्यनुमानं तदुपस्थापकमिति द्वितीयमाशङ्क्य निराकरोति-। [b] "तद्" ति। अनुमिताविव पक्षमारोप्याऽद्वैतश्रुतिः सर्वाभेदबोधिका तर्हि स्यादित्यर्थः ॥ नन्वनुमितिमपि पक्षेऽन्तर्भाव्य विषयाद्भेदः साधनीय इति तत्र श्रुतिप्रवृत्तिरनुपपन्नेत्याशङ्क्य ते- [c] "अथे" ति ॥ एतावता च विषयाद्बुद्धेर्भेदः सिद्धो न तु बुद्धेरपि विषयस्य, अप्रतिज्ञानात्, तथा च बुद्धितो विषयस्याभेदबोधने निर्व्यापारिणी श्रुतिः सर्वाभेदबोधने पर्यवस्यतीति परिहरति-। [d] "एवमपी" ति ॥

मू० " विषयिविषययोर्मिथो भेदेपि साध्ये अस्तु हेत्वनुयोगः(१) । [b] परबुद्धिस्तद्विषयांश्च प्रति निराबाधा सती श्रुतिरेकस्या बुद्धेर्विषयादपरामपरस्याश्च विषयात्परामभेदबोधाय धावन्ती सर्वाद्वैते एव पर्य्यवस्यतीति । * ' न च शक्यमनुमातुं–सर्वस्या बुद्धेर्विषयात्सर्वा बुद्धिर्भिन्नेति *, [d] मा भूदन्यबुद्धिविषयादात्मनोपि (२) बुद्धिर्भिन्नेति । * नचात्मव्यतिरिक्तादित्युक्ते निस्तारः स्यात्*, अद्वैतवादिनः सर्वाभेदमिच्छतः क्वचिदपि तदसिद्धा(३)विशेषणाऽप्रसिद्धेरिति । ' एतेन " सर्वं भिन्नम्"–इति वाक्येन, विना बाधं स्वतः प्रमाणेन, सत्प्रतिशब्दा (४) सेयमद्वैतश्रुतिरित्यप्यनवकाशां प्रत्यवस्थानं मन्तव्यं, [f] यस्मात्कस्मादपि भेदेमिथ्यातः (५)सत्यभेदोपगमेन [g] सिद्धसाधनात् ;

(१) हेत्वनुयोगः हेत्वाभासत्वमित्यर्थः । यद्वा, हेतुविषयकः पर्य्यनुयोगः (विचारः)-किं बुद्धित्वं हेतुः ? विषयत्वं वा ?-इत्यादिरूप इत्यर्थः ।

(२) अन्यबुद्धिविषयादात्मनोपि (सकाशात्) बुद्धिर्भिन्ना मा भूदिति (हेतोः) सर्वस्या बुद्धेर्विषयात्सर्वा बुद्धिर्भिन्नेति न च शक्यमनुमातुमिति सम्बन्धः ।

(३) आत्मव्यतिरिक्तस्याऽसिद्धेरित्यर्थः ।

(४) प्रतिद्वन्द्विहेतुना सत्प्रतिपक्षितत्वमर्हति–"सर्वं भिन्नम्"इति प्रतिद्वन्द्विशब्दो यस्याः श्रुतेः सा तथा ।

(५) ब्रह्म मिथ्या न–इति मिथ्याभूताद्घटपटादेः सत्यस्य ब्रह्मणो भेदोपगमेन सिद्धसाधनादित्यर्थः ।

टी० ननु 'बुद्धिविषयौ मिथो भिन्नावि'त्येव प्रतिज्ञेयमिति न तत्रापि श्रुतिव्याकोप इत्याशङ्क्य निराकरोति—। [a]"विषयी"ति । अत्र बुद्धित्वं न हेतुः, विषयभागेऽसिद्धेः, विषयत्वं न हेतुः, बुद्धिभागेऽसिद्धेः, । उभयगतं प्रमेयत्वादिकं व्यभिचारीत्यर्थः ॥ अभ्युपेत्य दूषयति—। [b]"परे"ति । स्वस्वविषयाभ्यां मिथो भेदसिद्धावपि परविषयेण सह भेदाग्रहात्तत्रैव श्रुतिप्रवृत्तिः सर्वाद्वैतपर्यवसायिनीत्यर्थः ॥ ननु सर्वा बुद्धयः सर्वबुद्धिविषयेभ्यो भिन्ना, बुद्धित्वात्; सर्वे विषयाः सर्वबुद्धिभ्यो भिन्ना, विषयत्वादिति परस्परं बुद्धिविषययोर्भेदसिद्धौ न श्रुतेरवकाश इत्यत आह— [c]"नचे"ति ॥ तत्र किं स्वव्यतिरिक्ताद्विषयाद्भिन्नेति साध्यते? विषयमात्राद्वा —इति विकल्प्य द्वितीयं दूषयति—। [d]"मा भूदि"ति ॥ आद्यं व्युदस्य सत्प्रतिपक्षं व्युदस्यति—। [e]"एतेने"ति। यद्यपि लौकिकवाक्यात् श्रुतेरेव बलवत्त्वमिति न तेन प्रतिरोधः तथापि वाक्यार्थे श्रुतितात्पर्यग्रहे सति तथा, नतु तात्पर्याग्रहदशायामपि तद्बलवत्तेति भावः ॥ [f]"यस्मादि"ति । यद्यपि मिथ्यात्[1]; इत्यलीकं, तच्च न भेदप्रतियोगि, तथापि मिथ्यासत्यभेदव्यवहारस्तथाप्यनुरुध्यते इति भावः ॥ [g]"सिद्धसाधनादि"ति । मिथ्याप्रतियोगिभेदबोधकलौकिकवाक्येन सत्यमकलाऽभेदबोधकश्रुतेः सामञ्जस्यादित्यर्थः ॥

मू० [a]सर्वस्मादिति स्वेनाप्यापत्तेः; स्वव्यतिरिक्तादिति चाद्वैतवादिन्यव्यवच्छेदकम् । तदेवम्—

[b]हृत्वाद्यभावसार्वज्ञ्ये सर्वं पञ्चगताऽऽस्थिते ।
किञ्चत्तु त्यजता दत्ता सैव द्वारऽद्वयश्रुतेः ॥ ९ ॥

अत एव च—

[c]आद्यधीवेद्यभेदायाऽप्यन्यथानुपपन्नता ।
स्वज्ञानापेक्षणादन्ते बाधते नाद्वयश्रुतिम् ॥ १० ॥

(१ "मिथ्यात"-इत्यत्र मिथ्यापदप्रतिपाद्यं यदप्यलीकमित्यर्थः । यद्यपि वेदान्तिसिद्धान्ते मिथ्याऽलीकयोर्भेदः, तथापि पारमार्थिकत्वेन मिथ्यालीकत्वं भेदाप्रतियोगित्वं चाऽभिप्रेत्येतदुक्तम् ।

[d]न च संस्काराऽऽरूढदृढान्वयव्यतिरेकान्वयव्यतिरेकान्वयप्रतिपत्त्युत्पत्तिप्रतिबन्धः शक्यशङ्कः ।

टी० ननु 'सर्वस्मात्सर्वं भिन्नमि'त्युक्ते क्व साध्यत्वमित्यत आह—। [a]"सर्वस्मादि"ति । तस्यापि([1]) सर्वपदार्थान्तर्गतत्वादित्यर्थः । यद्यपि ब्रह्मणो यतःकुतश्चिदद्वैतसाधने स्वस्मादेव तत्सिद्धौ सिद्धसाधनं, सर्वस्मादद्वैतसाधने मिथ्यात्वेऽप्यद्वैतसिद्धिप्रसङ्गः, तथापि स्वभाविक([2])मेव ब्रह्मेत्यत्र हृदयम् ॥ [b]"हेत्वादा"विति । आदिपदेन दृष्टान्तोपग्रहः । सर्वपक्षीकरणं मार्वज्ञ्यमन्तरेणानुपपन्नमित्यर्थः । आस्थिते= स्वीकृते । एतद्दोषद्वयभयेन यदि पक्षात्किंचिद्बहिर्भाव्यं तदा श्रुतिप्रवेशे तदेव द्वारं स्यात्तत्रैव सावकाशा श्रुतिः सर्वाद्वैतं बोधयिष्यतीत्यर्थः ॥ [c]"आद्ये"ति । आद्या धीः= घटपटौ भिन्नावि'ति भेदधीः, तद्विषयो यो भेदो=घटपटभेदः, तदीयान्यथानुपपन्नता=तदन्यथानुपपत्तिः, सापि शेषं गत्वा नाद्वयश्रुतिं बाधते, कुतः? स्वज्ञानापेक्षणात्([3]),तथाचानुपपत्तिज्ञाने([4])सावकाशा श्रुतिः सर्वाद्वैतपर्यवसन्ना स्यादित्यर्थः । यद्यप्यन्यथानुपपत्तिज्ञाने त्वयोपानीय दत्ते तदेव([5]) तद्ग्रहग्रह इति न श्रुतेरवकाशः, यदि सर्वं भिन्नं स्यात्तदा 'घटपटौ भिन्नावि'ति प्रत्यक्षेण गृहीतो घटपटयोरपि भेदो न स्यादित्यनुपपत्तिज्ञानेन सङ्कटाधिका श्रुतिस्तत्रापि न सावकाशा, तथापि "तत्त्वप्रकाशपरमार्थेच्छिदेव भूत्वे"त्यत्र तात्पर्यम् ॥ उत्पन्नश्रौताद्वैतधीबाधं निरस्याऽयेग्यताज्ञानात्तदुत्पत्तिप्रतिबन्धं निरस्यति—। [d]"नचे"ति । भूयोदर्शनप्रभवसंस्काराऽऽरूढोऽन्वयः=सत्त्वं, यस्य व्यतिरेकस्य=भेदस्य, तस्य यावन्वयव्यतिरेकौ, ताभ्यां योऽन्वयः=संबन्धो व्याप्तिलक्षणो—यो घटादिः स पटादेर्भिन्नो

---

(१) स्वस्यापीत्यर्थः ।

(२) स्वभाविकं = स्वतः सिद्धं, न तु तत्र साधनान्तरापेक्षेति भावः ।

(३) अयमर्थः—प्रतीयमानेऽनुपपन्नता भेदं साधयतीति वाच्यम्,अर्थानुपपत्तिदर्शनादुपपादके बुद्धिरर्थापत्तिः इति स्वीकारात्; तथा चानुपपत्तेः स्वगोचरज्ञानात्स्वभेदाप्रसाधकत्वेन तत्रैव दत्तपदा श्रुतिः सर्वाऽद्वैते पर्यवस्यतीति ।

(४) अनुपपत्तिविषयकज्ञाने इत्यर्थः

(५) अनुपपत्तिविषयकज्ञानसमकालमेव तयैव ज्ञाततयानुपपत्त्या स्वविषयकज्ञानादपि स्वस्य भेदो गृहीतः, अभेदे हि प्रत्यक्षसिद्धो घटपटयोरपि भेदो न सिद्ध्येदित्यर्थः ।

यः घटादिर्नासौ घटादिरित्येवमाकारः, तेन व्याप्तिप्रत्ययेन प्रतिपत्तेरद्वैतबुद्धेरुत्पत्तिप्रतिबन्धो न शक्यशङ्क इत्यर्थः। यद्वा, संस्काराद्रूढोऽत एव दृढान्वयो=दृढपदो, यो व्यतिरेको=भेदस्तस्यान्वयो 'भिन्नमिदमि'ति ज्ञानं, व्यतिरेकश्चाऽ'भिन्नमि'ति निश्चयस्ताभ्यामन्वयप्रतीतेः=श्रौतसंसर्गप्रतीतेरुत्पत्तिप्रतिबन्धो न शक्यशङ्क इत्यर्थः। सर्वलोकप्रसिद्धभेदप्रमा(1)बलादद्वैतश्रुत्या संसर्गबोध एव न सम्भवत्ययोग्यतानिश्चयादिति भावः। यद्यपि यत्रक्वचिदुत्पन्नं भेदप्रत्यक्षमेव सर्वाद्वैतप्रतिपादकश्रुतिबाधकमतो च श्रौतप्रतिपत्त्युत्पत्तिप्रतिबन्धः शक्यशङ्क एव, तथाप्युत्पत्तिप्रतिरोधेऽपि स्वप्रकाशप्रामाण्यावष्टम्भादिदमुक्तम् ॥

मू० यतः–

a "अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि।
अबाधात्तु प्रमामत्र स्वतःप्रामाण्यनिश्चलाम् ॥११॥
b असंसर्गाग्रहस्यापि मन्ता शंसत्यबाधिते।
अत्यन्ताऽसदसंसर्गाग्रहं संसर्गलग्नकम् ॥ १२ ॥

टी० "अङ्गुल्यग्रे करिशतं विहरति" "मम कर्णकुहरं प्रविश्य सिंहः क्रीडती" त्यादिशब्दादुत्पद्यमानस्य ज्ञानस्यानुभवसिद्धतया शाब्दज्ञाने योग्यताज्ञानस्यायोग्यताज्ञानविरहस्य वा न जनकत्वं, किंतु, ज्ञानमुत्पद्यमानं विषयबाधादप्रमाणतया, तदबाधात् प्रमाणतया, व्यवहर्तुमुचितं; प्रकृते च विषयबाधो नास्त्येवेत्याशयवानाह–। a"अत्यन्ते"ति। प्रमामत्र, करोतीत्यनुषज्यते। प्रत्यक्षादिबाधस्त्वाशङ्क्य निरस्त एवेति भावः॥ ननु अयोग्यतास्थले संसर्गज्ञानं नोत्पद्यते, व्यवहारस्त्वसंसर्गाग्रहमात्राधीन

(1) भेदज्ञानं यदि प्रमा स्यात्तदाऽयोग्यताज्ञानाच्छ्रुत्या संसर्गबोधो नोत्पद्येत, न त्वेतदस्ति भेदस्य कल्पितत्वादित्यर्थः। अत एव 'प्रमया'त्यनेन भेदप्रत्यक्षमेव श्रुतिबाधकमित्युक्तमपि साधु संगच्छते। वस्तुतस्तु, भेदप्रमैव यदि स्यात्तदा श्रुत्या संसर्गबोधो न स्यात्, नत्वेतदस्ति, भेदाऽभेदप्रमयोरुभयोरपि लोकसिद्धत्वात् तथाच यथैवाऽभेदप्रमा तथैव तत्पदा श्रुतिः सर्वाऽभेदे पर्यवसास्यति, नातस्तया संसर्गाऽबोध –इत्याद्ग्रन्थार्थकरणे यद्यपीत्यनेन 'यत्रक्वचिदि'ति, 'सर्वाऽद्वैते'ति च प्रतिपादनं साधूपपादितं स्यात्।

इत्यत आह—। [b] "असंसर्गाग्रहस्ये"ति । असंसर्गाग्रहस्य मन्ता मीमांसकः, स चात्यन्तमसत्त्वाऽसंसर्गः सत्यस्थले, तस्याऽग्रहो यत्र तत्र तु संसर्गप्रमामेव मन्यते, तथाच तन्मतेऽप्यद्वैतश्रुत्या संसर्गप्रमैव जननीया, विषयाऽबाधादित्यर्थः । सदसंसर्गाग्रहस्तत्र नास्त्येव, विषयबाधस्य निरस्तत्वादिति भावः ॥

मू० [a] अनौचित्या(१)पि तर्केण दुर्बाधैवाद्वयश्रुतिः ।
अनारोपितमूलत्वाद्बलवत्त्वादतादृशा ॥ १३ ॥
[b] प्रवृत्तेना(२)प्यनौचित्यमूलं येन न लूयते ।
तत्राऽनौचित्यसाम्राज्यं वैपरीत्यात्तु नात्र तत् ॥ १४ ॥

टी० नन्वनौचित्यऽविनिगमककल्पनालाघवकल्पनागौरवाणां तर्काणा, तर्कप्रतिरूपकाणां(३) वा, प्रमाणसहकारित्वमुभयवादिसिद्धं, तथाचाऽनौचितीतर्कस्य सकललोकसिद्धभेदतिरस्काराऽनर्हत्वलक्षणस्य प्रकृते सत्त्वाद्भेदग्राहिप्रत्यक्षमेव बलीयो, नत्वभेदविषया श्रुतिरित्यत आह—[a] "अनौचित्ये"ति । तर्कस्याहार्यारोपरूपतया तदपेक्षया श्रुतेरनारोपितमूलाया बलवत्त्वमिति तर्कोपष्टब्धप्रमाणापेक्षयापि तथेत्यर्थः । अतादृशाऽनारोपितमूलेनेत्यर्थः । केचित्तूद्भावितनिग्रहस्थानेनैवोद्भावितनिग्रहस्थानपरिहारोऽनौचितीतर्कः(४) श्रुतेर्बाधकः स्यादित्याशङ्काभाग इत्याहुः । तच्चिन्त्य-

(१) सकललोकसिद्धो भेदस्तिरस्कर्तुमनुचितः—इत्यनौचितीतर्कः, उचितस्य भाव औचिती, न औचित्यनौचितीत्यक्षरार्थः । अनौचित्यमित्यदन्तस्यापि तत्समाख्या ज्ञेया ।

(२) प्रवृत्तेनापि येन प्रमाणेनाऽनौचित्यस्य मूलं न लूयते=न खण्ड्यते, तत्रैवाऽनौचित्यस्य साम्राज्य=स्वार्थसाधनसामर्थ्यं भवति, अत्र तु तद्वैपरीत्यात्=अद्वैतश्रुत्याऽनौचित्यमूलस्य पारमार्थिकभेदनिष्ठसर्वजनसिद्धत्वस्य खण्डनात्, न तत्=अनौचित्यस्य साम्राज्यमित्यर्थः ।

(३) तर्कप्रतिरूपकाणां=तर्कसदृशानां, न तु तर्काऽऽभासानामित्यर्थः, तेषां प्रमाणविरोधित्वेन प्रमाणसहकारित्वस्याऽसम्भवात् ।

(४) पूर्वपक्षिणोद्भावितं श्रुतिबाधकत्वं निग्रहस्थानमपरिहृत्य बाधकत्वेन सद्भिमतेन श्रुत्या प्रत्यक्षबाधकत्वेन निग्रहस्थानेन प्रत्यक्षस्य परिहारः (प्रतिबन्दी) वेदान्तिकस्य, साऽनुचितेत्यनौचितीतर्क इत्यर्थः । यद्वा, येनैव घटपटादिभेदावगाहिप्रत्यक्षबाधकत्वेन निग्रहस्थानेन श्रुतिर्बाध्यते तेनैव प्रत्यक्षप्रतियोगिकविषयानुयोगिकाभेदाबाधनादभेदाऽवच्छिन्नाभेदावगाहिश्रुतिबाधोऽपि बाध्यते इत्युद्भावितनिग्रहस्थानेनैवो

म्(१) ॥ नन्वेवमनौचित्यतर्को नास्त्येव, तथाच "दोषं व्यक्तिविवेकेऽमुं कविलोकविलोचने"(२)इत्यादौ(३)यदुक्तं तदनुपपन्नं स्यादित्यतः सदसदनौचित्ययोर्विषयं विवेचयति—। "प्रवृत्तनापी"ति । अनौचित्यमूलं हि—भेदस्य सर्वत्रनिह्नुत्वं, तच्च(४)श्रुत्या पारमार्थिकमद्वैतं बोधयन्त्या मूलं व्यावहारिकभेदपरं कृतं, तथाचापारमार्थिकभेदमादाय सर्वैनाऽसिद्धव्यवहारोपपत्तौ नाऽनौचित्यमिति भावः । "अनौचित्यमूलं व्याप्यव्यापकभावः, तस्य खण्डनमद्वैतश्रुत्ये"त्यपव्याख्यानम्(५), अनौचित्यस्य व्याप्यव्यापकभावमादायाऽप्रवृत्तः, तत्प्रवृत्तौ वा तत्परत्व सर्वानौचित्यखण्डने खण्डनकारस्यापि—"विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रत"मित्यादेरनवकाशापत्तेः । "उद्भावितनिग्रहस्थानेने"त्यादिस्वोक्तविरोधाच्च(६) ॥

मू० " * ननु यद्यदेवोदाह्रियते त्वया—नेत(७)इतोऽस्य भेदो गृहीत इति ततोऽस्याद्वैताम्नायैरभेदबोधने तद्द्वारा सर्वाभेदे पर्यवसातव्यम्—इति. ततस्ततस्तस्य भेदस्तदैव गृह्यते मया, तस्मादुदाह्रियमाणतायामनुदाह्रियमाणतायां च कस्यचिदेतदव्यवस्थानमस्थाने

आविर्भावितनिग्रहस्थानपरिहारो वेदान्तिकस्यानुचितः घटपट इत्यंशे श्रुतिबाधस्यापि सम्भवात्—इत्यनौचित्यतर्कः अथवा, उद्भावित निग्रहस्थान बाधादिरूपं पतति वादिनः,तथा च स्वयं भावितत तर्कादिना बाधपरिहारोऽनुचित—इत्यनौचित्यतर्क इत्यर्थः।

(१) चिन्ताबीजं तु स्वमत दोषमनुद्धृत्यापि प्रतिबन्द्यादेर्दानस्य युक्तत्वम् ।

(२) "काव्यमीमांसिषु प्राप्तमहिमा महिमाऽहत"—इत्युत्तरार्द्धम् । अस्यार्थः—महिमाभिधकः कश्चिदालङ्कारिक काव्यमीमांसाभिज्ञेषु प्राप्तमहत्त्वः स्वीयव्यक्तिविवेकनामके ग्रन्थेऽमुं दोषमनौचित्याख्यम आदृत=पुरस्कृतवान् । किंभूतं ग्रन्थे ? कविलोकविलोचने, कविलोकानां चक्षुर्भूते, अनया कारिकया खण्डनकारेणाऽनौचित्ये सम्मतिः प्रदर्श्यते ।

(३) चतुर्थपरिच्छेदस्याऽवसाने ।

(४) तच्च मूलमिति सम्बन्धः ।

(५) केचित्त्वित्यनेन पूर्वमुक्तस्यैवेदमपव्याख्यानं द्रष्टव्यम ।

(६) नहि उद्भावितनिग्रहस्थानतत्परिहारयोर्व्याप्यव्यापकभावोऽस्ति येन तमादायानौचित्यप्रवृत्तिः स्यादिति भावः ।

(७) इतइतः=अन्यबुध्यादितः. अस्य=उदाहृतबुध्यादेः । सर्वाभेदे पर्यवसातव्यमिति यद्यदेवोदाह्रियते—इति सम्बन्धः । ततस्ततः=अन्यबुध्यादितः, तस्य=उदाहृतबुद्ध्यादेर्भेदस्तदैव=कथाकाले एव मया गृह्यते इत्यर्थः ।

इति * ? । मैवम् । [b] अन्तिमबुद्धेरद्वैतश्रुतिजबुद्ध्यादितो भेदो न त्वया प्रमित-इति मयोच्यमाने यस्तदीयस्ततो भेदः प्रमातव्यः स न तावत् प्रत्यक्षेण, तत्कालमन्तिमबुद्धेरनुपस्थितेः । 'यदि च केनचिद्धेतुना वा कयाचिदनुपपत्त्या वा तथा स्यात् तदानीमद्वैतवादिनं प्रति हेतोः साध्याऽविशिष्टतया ([1]), अनुपपत्तेश्च येन विना सा तदविशिष्टतया, ततःकथमाभासात् प्रमोदयः स्यात् ।

टी० सिंहावलोकितन्यायेन शङ्कते- [a] "नन्वि"ति । कस्यचिद्वस्तुनोऽनुदाह्रियमाणतायां श्रुतिव्यवस्थापनानवकाशः, उदाह्रियमाणतायां च भेदव्यवहारापत्तिरिति([2])प्रत्यवस्थाने खण्डनमस्थानेऽयुक्तमित्यर्थः ॥ मयोदाह्रियमाणाया अन्तिमबुद्धेः प्रत्यक्षादिना केनापि प्रमाणेन कथायां भेदः साधयितुमशक्य इति परिहरति- [b] "अन्तिमे"ति । यद्यप्यन्तिमबुद्धेरुदाहरणेऽन्तिमत्वव्याघातो, ऽनुदाहरणे श्रुत्यव्यवस्थापनं, मानसप्रत्यक्षेण ततो भेदग्रहश्च तदुदाहरणे, वाक्यजज्ञानसहकृतस्य मनसो बहिरपि प्रवृत्तेः, कविवाक्यवत्([3]),तथापि तस्य([4])प्रमाणान्तरत्वापत्तिः ; न वा तादृशप्रत्यक्ष([5])प्रमाणं, तादृश([6])मानसप्रत्यक्षेण सह भेदाग्रहात्तत्रैव श्रुतिप्रवृत्तिरिति

---

(१) हेतोः साध्याऽविशिष्टतया (साध्याऽभिन्नतया) तत आभासात्कथं प्रमोदयः स्यात्, अनुपपत्तेश्च येन (उपपादकेन) विना सा=(अनुपपत्तिर्भवति) तदविशिष्टतया तत आभासात्कथं प्रमोदयः स्यादित्यन्वयः ।

(२) इतिशब्दो हेतौ , इति हेतोः कस्यचिदपि वस्तुनः प्रत्यवस्थानं = खण्डनमयुक्तमित्यर्थः ।

(३) यथा कवीनां = क्रान्तदर्शिनां, मानसज्ञानसहकृतं वचोऽतीताऽनागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुषु प्रतिपादकत्वेन सर्वत्रैव प्रवर्तते तद्वदित्यर्थः ।

(४) मानसप्रत्यक्षस्येत्यर्थः ।

(५) बाह्यार्थगोचरमानसप्रत्यक्ष इत्यर्थः ।

(६) किञ्च, मनसाऽन्त्यबुद्ध्यादित उपान्त्यबुद्ध्यादेर्भेदग्रहेऽपि स्वप्रतियोगिको भेदो न गृहीत इति तत्रैव तद्व्यपदा श्रुतिः सर्वाऽभेदे पर्यवस्येदित्याह-तादृशेति ।

भावः ॥ ननु प्रत्यक्षाभावेऽप्यनुमानमर्थापत्तिर्वा स्यादित्यत आह—। [c] "यदि चे"ति । हेतुना—बुद्धित्वादिना । अनुपपत्त्या—प्रथमगृहीतभेदान्यथानुपपत्त्या । अनुमानपक्षे—'हेतोरि'ति ; अर्थापत्तिपक्षे—'येन विने'ति । अनुमानस्यार्थापत्तेर्वा भेदमादाय प्रवृत्तेरद्वैतवादिनं प्रति तदुपन्यासानवकाशादिति भावः ॥

मू० [a] * नच वाच्यं स्वयं मया स भेदो ज्ञायते इति नास्ति पाक्षिकोऽपि (१) मां प्रत्यसिद्ध्यादिरिति *, यतो [b] ऽस्य त्वद्वचनस्य वैयर्थ्यापत्तिः, [c] वचनस्य परार्थत्वात् । मौनमवलम्ब्यावतिष्ठमानश्च भवानऽप्रतिभातो न मुच्यते । * नच स्वयं मया प्रमितो भेदः परं प्रति वचसा केवलं बोध्यते इति वाच्यम् *, त्वद्वचसि परस्याप्रत्ययात् । विजिगीषुं परं प्रति विजिगीष्वन्तरवचनं हि तत्रार्थे तज्जिज्ञासोत्पादनद्वारेण तस्य स्वतस्तदर्थप्रमित्युत्पादनपर्य्यवसायितयोपयुक्तम्, नचाद्वैतवादिनं प्रति तथा कर्त्तुं शक्यते, तं प्रत्यन्यतरासिद्धे (२) रुक्तत्वात् । * [d] नच वाच्य मम वचनात्सन्देहेनापि श्रुत्या तत्र सन्दिग्धबाधितभावया नाभेदप्रतिपादनं ते घटते इति *, यस्मादद्वैतं मन्यमानेन भेदासिद्ध्या सर्वत्र साध्याऽविशेषादिदोषप्रतिसन्धायिना संशयस्याप्यनवकाशीकरणमेव स्यात् ।

टी० अनुमानमर्थापत्तिर्वा नाद्वैतवादिनं प्रत्युपन्यस्यते, किं तर्हि, स्वत एवान्तिमबुद्ध्या सहभेदोऽनुमीयते इति ब्रूम इत्याशङ्क्य परिहरति—

---

(१) परार्थाऽनुमानपक्षे यथाऽसिद्ध्यादिर्दोषो न स्वार्थानुमानपक्षेऽपीति भावः।

(२) अन्यथाऽनुपपत्त्या भेदसाधने उपपाद्योपपादकयो र्भेदस्याऽसिद्धेः, अनुमित्या तत्साधने च साध्यसाधनयोर्भेदस्याऽसिद्धेरित्यर्थः ।

[a] "नच वाच्यमि"ति ॥ [b]"यस्ये"ति। स्वय मया स भेदो ज्ञेय इत्यस्येत्यर्थः॥ वैयर्थ्ये हेतुमाह—। [c]"ववनस्ये"ति। परस्य चाद्वैतवादिनये ऽभावादिति भावः। यद्यपि यथाऽद्वैतवादिनं प्रत्यनुमानमनवकाशं तथा भेदवादिनं प्रति शतशः पठ्यमानाप्यद्वैतश्रुतिरनवकाशा, तेन सर्वत्र भेदग्रहात्। क्वचित्प्रत्यक्षतः, क्वचिदनुमानात्, क्वचिदागमात्, अर्थापत्तेर्वा तस्य यथायथं भेदग्रहसम्भवात्। "मया तावदद्वैतश्रुतिभिरद्वैत प्रतिपाद्यते"—इत्यपि त्वद्वचन भेदवादिनं प्रत्यनवकाशमेव। नहि यस्य तादृशश्रुत्यर्थेऽश्रद्धा, तस्य त्वद्वचसि श्रद्धा। भेदप्रतिपादकप्रत्यक्षाद्याभासीकरणमपि तं प्रत्यनन्त्र, तेन स्वनयेन सर्वसामञ्जस्यकरणात्; तथापि स्वप्रकाशे ऽद्वैते तात्पर्यम् ॥ ननु मद्वचनेन निर्णयस्तव मा भूत संशयोपि स्यादेव, तावतैव श्रुतिरनवकाशेत्यत आह—। [d]"नच वाच्यमि"ति। प्रत्यक्षादौ बाधकमाने(१) खण्डिते श्रुतिलक्षणसाधकप्रमाणे च सति बाधक(२)साधकमानाभावलक्षणाया संशययोग्यताया निरस्ताया संशय एव नास्ति, भवन्वा न स प्रमाणपरिपन्थीति भावः। यद्वा, श्रुतिपरिपन्थिना केनचित्प्रमाणाभासेनापि यदि द्वैतमुपस्थाप्येत तदा संशयः स्यात्, तन्त्व नास्त्येव, प्रत्यक्षस्य निरस्तत्वात, अनुमानादेः साध्याऽविशेषादिदोषग्रस्तत्वात्; अन्ततो भेदाभावेन तद्घटितविरोधाभावेन विरुद्धनानाकोटिकस्य संशयस्याप्यद्वैतवादिनं प्रत्यनवकाशादित्यर्थः ॥

मू० [a] तस्मात्-

एकं ब्रह्मास्त्रमादाय नान्यं गणयतः क्वचित्। आस्ते न धीरवीरस्य भङ्गःसङ्गरकेलिषु॥ १५॥ अपि च(३), प्रतीयते

(१) अत्र बाधकमानं श्रुतेर्बाधकं पाह्य, न तु संशययोग्यताबुद्धिनिविष्टं, तथा चाऽबाधिताऽद्वैतश्रुतिसद्भावे साधकमानाभावः कथमिति भावः।

(२) बाधकेन जनितं मानं बाधकमानं (बाधः) साधकेन जनितं मानं साधकमानं (सिद्धिः) तदुभयाभावलक्षणायामित्यर्थः।

(३) परकीयबुद्धिविषयस्य विशेषरूपेण साक्षात्कारसम्भवे बुद्धिविषययोर्भेदः परेण गृह्येत, भेदज्ञाने विशेषरूपेण धर्म्यादिज्ञानस्य हेतुत्वात्, तत्रैव तत्त्वीत्याह-अपिचेति।

तावदिदं सामान्यतो, यन्नाम किंचित्परश्चेतसा चिन्तयन्नस्तीति, किंचिद्वा विवक्षुरित्यादि ; तत्र परस्य बुद्धिविषयो विवक्षाविषयो वा विशेषतो विनिगमनं विना नैव प्रतीयते, ततोऽन्तिमबुद्ध्यादिभेदो न भवता शक्यग्रहः, परेण(१)तच्चिन्तनादेरपि संभवात् । स्वस्मात्स्वस्य भेदस्याभावात् । ततस्तत्र लब्धपदा कथमद्वैतश्रुतिर्विश्वाभेदे पर्य्यवस्यन्ती त्वया शक्यबाधा स्यात् । तस्मात्–

'कथं सामान्यतो(२)ज्ञाते नैव ज्ञाते विशेषतः ।
पदरोधस्त्वया कर्त्तुं शक्यः स्यादद्वयश्रुतेः ॥ १६ ॥

टी० सर्वप्रमाणापेक्षया श्रुतेर्बलवत्त्वेन तद्विषयस्य बलवत्त्वात्तद्विरोधिनोऽपि बलवत्त्वमित्युपसंहरति–। a "तस्माद्वि"ति ॥ यत्र विषये प्रत्यक्षादिना भेदो दुर्ग्रहस्तत्र श्रुतेः प्रवृत्तिमाह–। b "अपि चे"ति । परेण चिन्त्यमानस्य वस्तुनः (यतो भेदो ग्राह्यः) 'तद्वेव परेणेदानीं चिन्त्यते' इति विशिष्यानवधारणाद्भेदो दुर्ग्रह इति तदेव(३)श्रुतिविषय इत्यर्थः । यद्यप्यापाततस्ततो भेदाग्रहेऽपि यत्र क्रमेण भेदं गृहीत्वा श्रुतिरप्रमाणनीया, नहि यदेकदा न गृह्यते तन्न कदापि गृह्यते, प्रवृत्तं वा प्रमाणं पश्चात्प्रवृत्तेन बलवता प्रमाणेन नाऽपमाण्यते, परिचिन्त्यमानत्वावच्छेदेन ४) तत्रापि वा भेदः सुग्रह एव, वस्तुतस्तस्यान्यबुद्धित्वादित्यन्यदेतत्, तथापि श्रुतेरापाततस्तत्रावकाश इतिहृदयम् ॥ उक्तमर्थं संकलयति–। c "कथमि"ति ॥

(१) परेण भेदप्रमात्रा, तच्चिन्तनादेः = धर्मिप्रतियोगिचिन्तनादेरप्यावश्यकत्वात्तस्य च विशेषरूपेण ग्रहणंऽभावादिति भावः ।

(२) सामान्यतो ज्ञाते विशेषतश्च न ज्ञाते कथमद्वयश्रुतेः पदरोधः कर्त्तुं शक्यः–इत्यन्वयः । क्वचित्तु "नैव सामान्यतो ज्ञातं"–इति पाठः ।

(३) चिन्त्यमानं वस्त्वित्यर्थः ।

(४) परिचिन्तनस्य परिचिन्त्यमानाभेदे साध्ये परिचिन्त्यमानत्वावच्छेदेन तत्रापि = परकीयबुद्धिविषयेऽपि, बुद्धिभेदः सुग्रह एवेत्यर्थः ।

मू० * [a] ननु भेदमनङ्गीकुर्वतो भवतः कथं तत्तत्पदपदार्थवैचित्रीव्यवहारो न व्याहन्यते? * । [b] कथं व्याहन्यते, प्रतिवक्ष्यते हि तत् । [c] किंच, योयं त्वया व्याघात आपादनीयः सोपि कस्माच्चिदापादकात्, नचापाद्यापादक-मभिद्यमानमापत्त्यै प्रभवेदिति । तस्मात्–

[d] नानात्व([1])मवलम्ब्यापि वदत्यद्वैतवादिनि ।
असिद्धभेदाद्व्याघातः पतेदापादकात्कुतः ॥१७॥([2])

—

[e] इदमपि च विचारमर्हति, यदद्वैतश्रुतीनां बाधकमुपन्यस्यते प्रत्यक्षादि घटपटप्रभृतिभेदग्राहि तदपि कीदृश्यर्थे पर्यवस्यति? । तथाहि–प्रत्यक्षेण योसौ भेदो गृह्यते स किं स्वरूपभेदः?–१([3])किमन्योन्याभावः?–२ किं वैधर्म्यं?–३ किमन्यदेव वा?–४ । [f] यदि तावत् स्वरूपं भेदः, स नाम([4]) घटपटयोर्हि स्वरूपं यत्परस्परस्मा([5])द्भेदः तत्परस्परमनन्तर्भाव्य न संभवति, (भेदो हि

---

(१) नानात्वं व्यावहारिकं, काल्पनिकं वा; नतु पारमार्थिकम् अद्वैतवादिनं प्रति तदसिद्धेः ।

(२) { स्वरूपान्योन्यवैधर्म्यपृथक्त्वेतिचतुर्विधो ।
भेदो न घटतेऽद्वैते वदत्येतत्तु साम्प्रतम् ॥ }

(३) 'स्वरूपमेव भेद'–इति प्रभाकरमतोपन्यासः, 'अन्योन्याभाव'–इति नैयायिकैकदेशिनाम्, भट्टैकदेशिनां मतं–'वैधर्म्यमि'ति, वैशेषिकस्य–'अन्यदेवे'ति, पृथक्त्वं गुण इत्यर्थः ।

(४) बहुषु पुस्तकेषु "स न घटपटयोर्हि स्वरूपम्"–इति पाठः । तत्र स न (स पक्षो नोपपद्यते) इत्येतावत्पर्यन्तं विरामः कर्तव्यः ।

(५) यन्न तत्परस्परं च परस्परं, यत्परस्परस्माद्भेदस्तत्परस्परमनन्तर्भाव्य तद्विशिष्टो भेद एव न सम्भवति, विशेषणादिव्यतिरिक्तविशिष्टपदार्थानङ्गीकारादित्यर्थः ।

(६) किञ्चित्प्रतियोगिक एव भवतीत्यर्थः ।

भवन् कस्मादपि([१])भवति अन्यथा 'स्वरूपं भेद'-इति पारिभाषिकं([१])नाम स्यात्) यदा च घटाद्भेदः पटस्येत्येतावानेवार्थः ([२]) पटादेः स्वरूपं प्रत्यक्षेण गृह्यते तदा घटोऽपि पटात्मन्येव प्रविष्ट इति पटघटयोरैक्यात्म्यमेव भेदग्राहिणा प्रत्यक्षेणावगाहितमिति विपरीतमापद्यते।

टी० ननु यथानुमानादेः साध्यसाधनादिभेदाधीना प्रवृत्तिरित्यद्वैतवादिनं प्रति तदनवकाशस्तथा श्रुतेरपि पदपदार्थवैचित्र्यमुपजीव्यमिति तं प्रति तदनवकाशोऽपि, प्रत्युत तया व्यवहरतो व्याघात एव तव, भेदव्यवहारान्यथानुपपत्त्या भेदसिद्धिरेवान्तत इत्याशङ्कते–। [a]"नन्वि"ति॥ परिहरति– [b]"कथं व्याहन्यत"इति॥ आपाद्यापादकयोरभेदाद् व्याघातापादनं मां प्रत्यनवकाशमित्याह–। [c]"किञ्चे"ति॥ पदपदार्थनानात्वमवलम्ब्यापि श्रुतिं प्रमाणयतो मम व्याघातो नास्तीत्याह–। [d]"नानात्वमि"ति। असद्भेदादापादकाद्व्याघातः कुतः परतोऽदित्यन्वयः॥

यं भेदं विषयीकुर्वत प्रत्यक्षादि श्रुतिबाधकं स्यात् स एव नास्ति कुतो बाध इत्याह–। [e]"इदमि"ति॥ [f]"यदि तावदि"ति। घटाद्भेदः स्वरूपं पटस्य,†तत्र घटो† विशेषणम् [g] उपलक्षणं वा [h]। आद्ये, घटभेदः पट†स्वरूपं प्रत्यक्षेण गृहीतमिति घटा†भेद एव प्रत्यक्षेण गृहीत इति वैपरीत्यमित्यर्थः॥

मू०*[i] ननु यथेयं प्रतीतिरभेदोल्लेखिनया व्याख्यायते([३])तथा भेदोल्लेखित्वेऽपि दीयतामस्यां दृष्टिः, अभेदे हि 'घट' इत्येव, 'पट' इत्येव वा, बुद्धिः स्यात्, नतु 'घटाद्भिन्नः

---

(१) पारिभाषिकं=स्वसङ्केतमात्रसिद्धम्।

(२) पटाऽनुयोगिकत्वे सति घटप्रतियोगिकत्वविशिष्ट इत्यर्थः।

(३) व्याख्यायते=व्युत्पाद्यते।

\+ अत्र प्रायः पुस्तकेषु घटपटयोर्मौलिकप्रतियोग्यनुयोगिभावक्रमवैपरीत्येन व्याख्यानमुपलभ्यं प्रतियोग्यनुयोगिभावमुपेक्षित, उपन्यास्यं च यथोचितक्रमेण, उपन्यासचिन्हं च † एतत् सर्वत्र व्यवातिष्ठिपम्।

पट' *?-इति चेत्, [b]स्यादप्येष पर्य्यनुयोगो यद्यविद्याविद्यमानभावं(१) भेदं पारमार्थिकमभेदमिच्छन्तोपि प्रत्यादिशाम: । तस्मात्-

[c]'अभेदं नोल्लिखन्ती धीर्न भेदोल्लेखनक्षमा ।
तथाचाद्ये प्रमा सा स्यान्नान्त्ये स्वापेक्ष्यवैशसात् ॥१८॥

*[d]अथ 'भेदः'-इत्येतावन्मात्रं पटस्य स्वरूपं, 'घटादि'ति च तद् घटेन प्रतियोगिनाऽन्येन(२)नैव निरूप्यते *?-तदपि नोपपद्यते ।

टी० ननु घटाद्भेदः स्वरूपं पटस्येत्युक्ते घटपटयोर्भेदः प्रतीयते, तथा सति 'घटादि'ति न स्यात्, किंतु 'घटः पट'-इति सामानाधिकरण्य स्यादिति शङ्कते-। "[a]नन्वि"ति ॥ अविद्याविद्यमानं भेदमादाय तथाप्रतीतिरिति परिहरति-। [b]"स्यादि"ति ॥ ननु भेदो न पारमार्थिकः, किन्त्वभेदः,-इत्यत्र किं विनिगमकमत आह-। [c]"अभेदमि"ति । घटपटस्वरूपमनुल्लिख्य तदुभयभेदोल्लेखो न संभवति, तदुभयभेदमनुल्लिख्यापि तदुभयस्वरूपोल्लेखः संभवतीत्यभेदग्रह उपजीव्यो भेदग्रहस्येत्यभेद एव पारमार्थिक इत्यर्थः । आद्ये=अभेदे, सा धीः प्रमा, नान्त्ये=भेदे, स्वस्य=भेदग्रहस्यापेक्ष्य=उपजीव्यो ऽभेदग्रहस्तद्वैशसात्तद्विरोधादित्यर्थः । यद्यपि भेदाभेदपदाभ्यामुभयोरपि स्थितो विपरीत(३) एवोपजीव्योपजीवकभावः, स्वरूपस्यापि भेदत्वे सर्वधियां भेदोल्लेखित्वस्याऽऽवश्यकत्वे वैपरीत्यमेव, तथापि अत्युत्कटत्वादिदमुक्तम् ॥ उपलक्षणपक्षं कक्षीकृत्याशङ्कते- [d]"अथे"ति । यदि प्रतियोग्यपि भेदस्वरूपं स्यात्तदा तन्निरूपकमेव न स्यादिति भावः(४) ॥

---

(१) अविद्यया विद्यमानो भावः सत्त्वं यस्य स तथोक्तस्तम् । अविद्याविद्यमानभावं भेदं यदि प्रत्यादिशाम:-इति सम्बन्धः ।

(२) अन्येन=भेदस्वरूपाऽप्रविष्टेनोपलक्षणीभूतेनेति यावत् ।

(३) भेदोपस्थितिपूर्वक एवाऽभेदग्रहः, अभेदस्य भेदाभावरूपत्वादित्यर्थः । (४) पूर्वपक्षिणोभाव इत्यर्थः ।

मू० "निष्प्रतियोगिकस्य भेदस्य प्रमाणागोचरत्वात् । नित्यं प्रतियोगिघटिते एव तस्मिन् प्रमाणप्रसरात् । "का चेयं वाचोयुक्तिर्यदन्याऽसाकाङ्क्षं पटस्य स्वरूपमन्येन प्रतियोगिना निरूप्यमाणं ततो भेदो भवतीति ? । नहि यत्स्वरूपेणैव नीलं, तत् पीतेन निरूप्यमाणं नीलं भवति । "यदपि चोक्तं प्रतियोगिना घटेन निरूप्यमाणं पटस्य स्वरूपं भेद-इति, तत्रापि पटं(१)प्रति प्रतियोगित्वं घटस्य किं स्वरूपं ? किं वा धर्मः कश्चित् ? । यदि प्रथमः, तदा पटं प्रति प्रतियोगित्वमित्येतावानेवार्थो(२)घटस्य स्वरूपं भवदात्मन्येव पटमपि प्रक्षिपतीति कथं नाद्वैतमेव पर्यवस्यति । "तत्रापि यदि प्रतियोगित्वमात्रं घटस्यात्मा 'पटं प्रती'ति च पटापेक्षित्वमन्यदेव, तदप्यनुपपन्नम् ।

टी० नियमतो यावति(३) यन्निरूपणं पर्याप्तं तावत्तत्स्वरूपान्तर्गतमेवेति प्रतियोग्यपि भेदस्वरूपं स्यादित्याह—। ""निष्प्रतियोगिकस्ये"ति ॥ ननु संयोगादिस्वरूपं प्रतियोगिनिरूपणीयमपि न तद्घटितमूर्ति कश्चिन्यनुशयेनाह(४)—। ""का चेयमि"ति । असाकाङ्क्षम्—अन्याऽनिरूपणमित्यर्थः । यद्यपि पटः स्वरूपतः पट, प्रतियोगिना निरूप्यमाणो भेद, इति न दोषः, नीलमपि स्वरूपतो नीलं, पीतेन निरूप्यमाणं भेद

(१) पटं प्रति=पटनिरूपितं, घटस्य=घटनिष्ठ, प्रतियोगित्वं प्रतियोगिनो घटस्य स्वरूपं धर्मो वेत्यर्थः ।

(२) पटनिरूपितत्वविशिष्टप्रतियोगित्वलक्षणः संपिण्डितोऽर्थ इत्यर्थः ।

(३) यावति=प्रतियोग्यादौ, यस्य=भेदादेर्निरूपणमिति, यावति भेदादौ यस्य=प्रतियोग्यादेर्निरूपणमिति वाऽर्थः; उभयथाप्यग्रे "तावदि"त्यनेन प्रतियोग्येव ग्राह्यम् ।

(४) इति पूर्वपक्षिण अनुशयं हृदि निधाय प्रकारान्तरेण सिद्धान्त्याहेत्यर्थः ।

एव, भेदत्वेन निरूप्यमाणेऽपि तत्र पटत्वमित्यन्यदेतत्, प्रकारयोस्तु भेद एव, तथापि स्वरूपभेदे निरूपकभेद(१) एवानुपपन्न इति हृदयम् ॥ भेदस्वरूपे(२) प्रतियोगिनमन्तर्निवेश्य प्रतियोगिस्वरूपे भेदमन्तर्निवेशयति–। ''यदपी''ति । भेदवत् प्रतियोगित्वमप्यन्यसाकाङ्क्षमेवेति तदप्यन्यघटितमूर्ति स्यादित्यभेदे पर्यवसानमित्यर्थः ॥ प्रतियोगिनो(३) भेदस्य विशेषणतायां दोषमुक्तोपलक्षणताभाशङ्क्याह–। [d]''तत्रापी''ति ॥

मू० [a]अकिञ्चिदपेक्षस्य प्रतियोगित्वस्य प्रमाणाऽविषयत्वात् । [b]'पटं प्रती'त्यत्रापि च स्वरूपतदन्यविकल्पे(४) दोष एव । [c]नापि द्वितीयः । [d]योऽसौ धर्मः पटं प्रति प्रतियोगित्वं तस्यात्मनि पटोऽपि प्रविशतीति तेन(५)सह पटस्याद्वैतं स्यात्, [e]यदा च पटो घटस्य धर्मतामापन्नस्तदा घटोऽपि पटस्य धर्मतामनेनैव

(१) ''स्वरूपभेदे निरूपकभेद''–इत्यपि पाठः ।

(२) घटत्वावच्छिन्नप्रतियोगिताकभेदस्य पटरूपत्वात् भेदः=पटः, तथा च पटस्वरूपे घटमन्तर्निवेश्य घटस्वरूपे पटमन्तर्निवेशयतीत्यर्थः ।

(३) पटनिरूपितत्वविशिष्टप्रतियोगित्वस्य प्रतियोगिरूपत्वात् प्रतियोगी = प्रतियोगित्वं, तन्निष्ठविशेष्यतानिरूपितपटरूपभेदनिष्ठविशेषणतायामित्यर्थः । यद्वा, प्रतियोगित्वं प्रकृते निरूपकत्वं, तथा च निरूपकस्य पटरूपस्य भेदस्य, विशेषणतायाम् = घटप्रतियोगित्वांशे विशेषणतायामित्यर्थः ।

(४) घटनिष्ठप्रतियोगितायाः घटस्वरूपत्वे पटनिरूपितत्वं, घटेऽबाधितं, तथा सति पटनिरूपितत्वं घटस्य स्वरूपं ? धर्मो वा ?; आद्ये पटस्यापि घटस्वरूपत्वापत्तिः, द्वितीये तु पटस्यापि घटधर्मत्वप्रसङ्गात् धर्मधर्मिणोश्चाऽभेदात्पुनरद्वैतमेवेति दोष एवेत्यर्थः । तत्र

(५) तेन = प्रतियोगित्वेन, सह = सहितस्य, पटस्याऽद्वैतं स्यात् ''घटेन सहे''ति शेषः ।

न्यायेन(१)गच्छेत्। [f]नहि पट(२)प्रतियोगित्वस्य घटेन प्रतियोगिना निरूप्यमाणत्वे घटस्याऽन्या गतिरस्तीति [g]परस्परमाश्रितत्वमाश्रयत्वं च स्यात्; नच कस्यचित्प्रमाणस्य विषयो घटारूढः पटस्तत्पटारूढश्च स एव घट इति। [h]किंच, धर्मस्य तस्य धर्मिणा सममसंबन्धेऽतिप्रसङ्गः(३),संबन्धानन्त्येऽनवस्था, प्रथमतोन्ततो गत्वा वा स्वभावसंबन्धाभ्युपगमे संबन्ध्यन्तरस्यापि तत्स्वभावप्रवेशाद्भेदे एव पर्य्यवसानं स्यादिति।

टी० ॥ [a]"अकिञ्चिदि"ति। प्रतियोगित्वनिरूपणं नियमतो यावति परिसमाप्यते तावत्स्वरूपान्तर्गतमेवेत्यर्थः ॥ 'पटं प्रति प्रतियोगित्वं घटस्ये'त्यनयोक्त्या घटाभेदं पटस्याभिधाय 'पटं प्रती'ति तदेकदेशे(४)नापि तदभेदसिद्धिरित्याह–। [b]"पटं प्रती"ति ॥ [c]"नापी"ति। प्रतियोगित्वं धर्मः कश्चिदिति द्वितीयपक्ष इत्यर्थः ॥ घटप्रतियोगित्वस्य(५) घटधर्मत्वे पटस्यापि घटधर्मत्वं, प्रतियोगित्वस्य पटघटितमूर्त्तिकत्वादित्याह–। [d]"योसावि"ति। यथा घटप्रतियोगित्वे पटो धर्मस्तद्वत्पटप्रतियोगित्वेपि घटो धर्मो वाच्यः, युक्तेस्तुल्यत्वादित्याह–। [e]"यदा

---

(१) "अकिञ्चिदपेक्षस्य प्रतियोगित्वस्य प्रमाणाऽविषयत्वादि"त्यादिनोक्तेनेत्यर्थः।

(२) यथा घटनिष्ठप्रतियोगित्वस्य पटघटितमूर्तिकत्वेन पटस्य घटधर्मत्वं तथा पटनिष्ठप्रतियोगित्वस्यापि घटघटितमूर्तिकत्वेन घटस्यापि पटधर्मत्वं स्यादिति भावः।

(३) अत्यन्तासम्बद्धयोर्हिमवद्विन्ध्ययोरपि धर्मधर्मिभावप्रसङ्ग इत्यर्थः।

(४) "पटं प्रति"–इत्यनेन वाक्यैकदेशेनापि घटपटाऽभेदसिद्धिरित्याहेत्यर्थः। (५) पटनिरूपितघटनिष्ठप्रतियोगित्वस्येत्यर्थः।

चे"ति ॥ कुत एवमत आह–। [f]"नही"ति ॥ ततः किमित्यत आह–। [g]"परस्परमाश्रितत्वमि"ति ॥ अस्तूभयोरपि धर्मधर्मिभावः, एतावतापि भेद एवेत्यत आह–। [h]"किंचे"ति । घटप्रतियोगित्वस्य(¹) घट†धर्मत्वे येन संबन्धेन तद्धर्मत्वं तस्यापि तदीयत्वे संबन्धान्तराङ्गीकारेऽनवस्था, स्वरूपसंबन्धस्यैव तत्राभ्युपगमे धर्मिस्वरूपसंबन्धो धर्मो, धर्मस्वरूपसंबन्धो धर्मीत्युभयमेकमेव पर्यवस्येदित्यर्थः ॥

मू० [a]एवमन्यस्मिन्नपि धर्मविकल्पे इति । [b]तस्मात्स्वरूपभेदे प्रमाणं भवत्प्रत्यक्षमद्वैते एव प्रमाणं भवति । * [c]ननु, घटादिकमेव यदाऽन्यानपेक्षं वीक्ष्यते तदा घटादिकमित्येव प्रतीयते यदा पुनः पटादिना निरूप्यते तदा ततो(²)भेद इति प्रतीयते*? । मैवम् । [d]घटादिकमित्येवंभूतप्रतीतेस्तावद्भेदप्रतीतिर्विलक्षणा, सा च न घटादिमात्रेण स्वविषयेणाऽन्यथाकारा भवितुमर्हति, * [e]नच पटादिकमधिकं तदा प्रकाशते इति विशेषः स्यात् *, घटपटविषयप्रतीतितोऽपि वैलक्षण्यात् । [f]नहि 'घटः पटश्चे'ति 'घटात् पटो‡ भिन्न' इतिप्रतीत्योरेकार्थकत्वं कश्चित्प्रत्येति । तत्कस्य हेतोः ? पञ्चम्या प्रथमया च वैकल्पिकं निर्देशमसहमानयैव प्रतीतिकलहनिरासात् ।

टी० एवं घटत्वादिनापि धर्मेण सह घटाद्यभेदो वाच्य इत्याह–। [a]"एवमि"ति । धर्मविकल्पे=धर्मभेदे ॥ स्वरूपभेदग्राहिप्रत्यक्षमभेदविषयं पर्यवस्यतीत्युपसहरति–। [b]"तस्मादि"ति॥ यदन्याऽसाकाङ्क्षं तदन्यसाकाङ्क्षमपि भविष्यति निरूपकभेदा-

(१) पटनिरूपितघटनिष्ठप्रतियोगित्वस्येत्यर्थः ।

(२) ततः=पटादितः, भेदरूपेण प्रतीयते घट इत्यर्थः; "तत"-इत्यस्य पटादिनिरूपणादिति वाऽर्थः ।

दिति शङ्कते-। [c]"नन्वि"ति। एक एव घटोऽन्येन निरूप्यमाणो भेद इति गृह्यते, अन्यथा तु घट एवेत्यर्थः ॥ भेदप्रतीतिघटप्रतीत्योर्वैलक्षण्यं विषयवैलक्षण्यपरतन्त्रमिति तदभावात् प्रतीतिवैलक्षण्यमेव न स्यादिति परिहारमाह-। [d]"घटादिकमि"ति॥ ननु प्रतियोगिप्रवेशाऽप्रवेशकृतमेव प्रतीतिवैलक्षण्यमित्यत आह-। [e]"नचे"ति ॥ 'घटाद्भिन्नः पट'‡ इतिप्रतीति'र्घटः पटश्चे'तिप्रतीतेर्विलक्षणा प्रतियोग्यनुप्रवेशमात्रेणानुपपन्नेति ततोऽपि विषयान्तरमनुसरणीयमित्याह-। [f]"नही"ति ॥

मू० [a]"नहि घटः पटश्चेति प्रत्येतव्ये कश्चिद् घटात्पटो‡ भिन्न इति प्रत्येति । तस्माद् घटस्य न स्वरूपनिरूपणे पटप्रतीत्यपेक्षा । * [b]नच यत्प्रतीतिर्यत्प्रतीतेः कारणं स्यात् तत्र तस्याः कारणभूतायाः प्रतीतेर्योऽर्थः तस्माद् "अयमि"ति कृत्वा कार्यभूतायाः प्रतीतेरर्थः प्रतीयते*, [c]मा भून्निर्विकल्पकार्थादेवं(१) सविकल्पकार्थस्य प्रतीतिः, मा च सादृश्यादेरेवं(२)स्मर्यमाणादेः स्यात् । [d]तस्मात् 'पटो घटाद्भिन्न'‡-इत्याद्याकारेण घटादेर्भेद एव भेदावधिभूतपटादिसंघटितः स्फुटं सर्वलोकसाक्षिकः प्रतीयमानो नैकप्रतीते(३)रन्यप्रतीत्यपेक्षामात्रेण समर्थयितुं शक्योऽतिप्रसङ्गादिति । [e]अत एवान्योन्याभावं भेद-

‡ एतच्चिह्नस्थले पटाद्घट इति वक्तव्येऽपि घटात्पट इति घटपटयोः प्रतियोग्यनुयोगिभाववैपरीत्येन वचनं प्रतीत्योर्वैलक्षण्यमात्राभिप्रायकत्वादौत्सर्गिकं पूर्वापरग्रन्थसारूप्यार्थं तथैव कल्पनीयं वा ।

(१) एवं = 'गोत्वाद्गौ'रित्यादिप्रकारेण ।

(२) एवं = 'सादृश्यात्स' इत्यादिप्रकारेण ।

(३) एकप्रतीतेः(= स्वरूपप्रतीतेः) अन्यस्य प्रतियोगिनो या प्रतीतिस्तदपेक्षामात्रेणेत्यर्थः । अतिप्रसङ्गात् = 'गोत्वाद्गौः' 'सादृश्यात्स्मरामि'त्यादिप्रतीतिप्रसङ्गादित्यर्थः ।

मवगाहमानं प्रत्यक्षमद्वैतश्रुतिबाधकमित्यपि निरस्तम् । [f]अन्योन्याभावोपि यस्माद्भेद (१)एष्टव्यस्तमात्मन्येवान्तर्भावयेदुक्तयुक्तिभिः ।

टी० नन्वेक एव विषयः प्रतीतिभ्यामालम्ब्यतां को दोषः? इत्यत आह—। [a]"नही"ति । भवेदेवं, यदि पञ्चमीप्रथमयोरर्थाऽभेदो भवेत्, न त्वेवं, तनश्च प्रयोगवैलक्षण्यात् प्रतीतिवैलक्षण्यं ततश्च विषयवैलक्षण्यमित्यर्थः ॥ ननु घटस्वरूपभाने कदाचित्प्रतियोगिनः पटस्य ज्ञानं हेतुरिति ज्ञानगतहेतुत्वं पटे आरोप्य व्यपदिश्यते 'पटाद्भेद'-इति, यथा 'धूमादग्निरि'ति; तथाच न पञ्चमीनिर्देशबलाद्विषयवैलक्षण्यमत आह—। [b]"नचे"ति ॥ तर्हि 'गोत्वाद्गौः' इत्यपि प्रतीतिः, 'अवयवाद्गौः' इत्यपि च स्याज्जनकज्ञानविषयेपि पञ्चमीनिर्देशस्य त्वयेष्यमाणत्वादित्याह—। [c]"मा भूदि"ति । "मादृश्यादे"रित्यादिपदात्पदार्थलिङ्गादिग्रहः । "स्पर्शमाणादे"रित्यादिपदात्पदार्थलैङ्गिकादिसंग्रहः ॥ तस्मात्स्वरूपभेदो नास्त्येव । यदि प्रतीतिबलादाऽऽस्थीयते तदाऽन्योन्याभावः स्यादपि, यदि तत्र बाधकं न भवेदित्युपसंहरन्नाह—। [d]"तस्मादि"ति ॥ "अत एवे"ति । प्रतियोग्यधिकरणयोरभेदपर्यवसानादित्यर्थः ॥ एतदेवाह—। [f]"अन्योन्याभावोपी"ति । विश्वप्रतियोगिकान्योन्याभावस्य घटधर्मत्वे विश्वस्यापि घटधर्मत्वापत्तौ धर्मधर्मिणोरभेदपर्यवसानस्य(२) स्वरूपभेदप्रस्तावे युक्तेरुक्तत्वादित्यर्थः ॥

मू० [a]किंच, घटपटयोस्तद्वदन्ययोश्च तादात्म्यमन्योन्याभावस्य प्रतियोगि मन्तव्यं, तद्यदि सर्वथा नेष्यते, तदा तद्विशिष्टस्तदुपलक्षितो वाऽन्योन्याभावोपि

---

(१) यस्माद्भेद एष्टव्यः=यत्प्रतियोगिको भेद एष्टव्यः, तं प्रतियोगिनमात्मन्येवान्तर्भावयेत् "निष्प्रतियोगिकस्य भेदस्य प्रमाणाऽगोचरत्वादि"त्याद्युक्तयुक्तिभिरित्यर्थः ।

(२) अभेदपर्यवसानस्य युक्तेरुक्तत्वादित्यन्वयः ।

न प्रमाणेन प्रत्येतुं शक्यः । नहि शशविषाणविशि-ष्टस्तदुपलक्षितो वा कश्चित्प्रामाणिको भवितुमर्हति। तत्कस्य हेतोः ?। तस्मिँस्तद्विशिष्टरूपेऽर्थे(१)तादृशि-वोपलक्षणव्यवच्छिद्यमानात्मनि प्रमाणं निविशमानं विशेषणमपि तदीयं तदुपलक्षणमपि वा नानुल्लिखङ्क्षवितुं प्रभवति, तस्मिँ(२)श्चात्यन्तमसत्येवावलम्बने न तत्प्रामाण्यं शक्यसमर्थनम् । * [b]नच वाच्यं पटप्र-तियोगिको घटमाश्रितोऽसावभावोऽभ्युपगम्यमानो नात्यन्ताऽसत्प्रतियोगिकतादोषमावहतीति* । [c]तथा सति संसर्गाभावादन्योन्याभावस्य को विशेषः स्यात्?। [d]नहि यथा घटाभावः पटसंसर्गीति घटसं-सर्गाभावं पटे समर्थयसे तथा घटाभावः पटात्मक इति तत्तादात्म्याभावं पटस्य स्वीकरिष्यसि । तस्मा-त्तादात्म्यं संसर्गं च प्रतियोगिकोटावन्तर्भाव्याऽन्यो-न्याभावसंसर्गाभावयोर्वैलक्षण्यमभ्युपेयम्, तथा सति चात्यन्तासत्प्रतियोगिता दुर्वारा ।

टी० 'तादात्म्याभावः'—इतिव्यपदेशानुरोधेन तादात्म्य-स्यैव प्रतियोगितामभ्युपगम्य दोषमाह—। [a]"किचे"ति । घटप-टयोस्तादात्म्यमत्यन्तासदिति तत्प्रतियोगिकाभावप्रतीतौ विशे-षणत्वमुपलक्षणत्वं वा तस्यानुपपन्नमित्यन्योन्याभावप्रतीतिरेव न भवेद्, भवन्ती वा न प्रमा स्यादसद्विषयत्वादित्यर्थः ॥ ननु न

(१) तद्विशिष्टरूपेऽर्थे (=अत्यन्तासद्विशिष्टरूपेऽर्थे) तस्मिन् प्रमाणं निविशमानं तदीयं विशेषणं नाऽनुल्लिखङ्क्षवितुं प्रभवति, तादृशि चोप-लक्षणव्यवच्छिद्यमानात्मनि (अत्यन्ताऽसतोपलक्षणेन व्यवच्छिद्यमान आत्मा=स्वरूपं, यस्य तस्मिन्) प्रमाणं निविशमानं तदुपलक्षणमपि नाऽनुल्लिखङ्क्षवितुं प्रभवतीति योजना ।

(२) तस्मिन्=विशेषणीभूते उपलक्षणीभूते वा तादात्म्ये ।

तादात्म्यप्रतियोगि, किन्तु पटान्तरैव, तथाच नात्यन्तासद्विषय त्वमन्योन्याभावप्रतीतेरत आह । [b]"न च वाच्यमि"ति ॥ [c]"तथा सती"ति । एवं सति घटनिष्ठपटप्रतियोगिकाभावोऽत्यन्ताभाव एव स्यान्न तादात्म्याभाव इत्यर्थः ॥ ननु घटनिष्ठ. पटप्रतियोगिकोऽभावः संसर्गाभाव एव, अयं तु न घटनिष्ठः, किन्तु घटात्मक एवेति महान्भेदोऽत आह—। [d]"नही"ति । एवमभ्युपगमे तवापसिद्धान्त इति भावः । * ननु घटपटतादात्म्यमत्यन्तासदिति न घटतादात्म्यमपि, तथाच तदेव तादात्म्याभावप्रतियोगि स्यादिति नात्यन्ताऽसत्प्रतियोगिकता *? इति चेन्न, घटतादात्म्यस्य पटे निषेधः संसर्गाभाव एवेत्यग्रे वक्ष्यमाणत्वात् (१) । *न चेह तादात्म्यप्रतियोगितावच्छेदकमिति संसर्गाभावाद्भेदः*, घटमात्रतादात्म्यस्य प्रतियोगितावच्छेदकत्वे संसर्गाभावादविशेषात्; उभयतादात्म्यस्य तत्त्वेऽन्योन्याभावप्रतीतेरसद्विषयत्वापातात् ॥

मू० * "न च वाच्यं घटे पटत्वं नास्ति पटे च घटत्वं नास्तीत्येतावन्मात्रपर्यवसितैवान्योन्याभावस्य व्यवस्था भन्तव्येति *, यतस्तथा सति घटत्वे पटत्वे च न कश्चित्तादृशो धर्मोऽभ्युपगम्यते योऽन्योन्यस्मिन्निषेद्धुं योग्य इति तयोस्तादात्म्यापत्तौ सत्यां घटे पटत्वं, पटे घटत्वं च, निषेधात् प्रमाणं घटत्वपटत्वशून्यत्वं द्वयमप्यावेदयतीति वैधर्म्यस्य स्वरूपभेदस्य चासंभवेन किं प्रतियोगिनं, किं वालम्बनं(२), विधाय पटघटान्योन्याभावः प्रमाणपथमवतरेदिति। [h]अत एव न वैधर्म्यमपि भेदमावेदयत् प्रत्यक्षमद्वैतश्रु-

---

(१) "यदि तु तादात्म्यं नामाऽभेदाख्यो धर्मः कश्चिदिष्यते, स घटपटाद्यधिकरणतया निषिध्यते, तदा संसर्गाभाव एव स्यात्"—इति चित्रकारिकाव्याख्यानावसरे मूले वक्ष्यमाणत्वादित्यर्थः ।

(२) आलम्बनम्=अनुयोगिनम् ।

तिबाधकमुपपद्यते । वैधर्म्येपि हि घटत्वपटत्वादौ वैधर्म्यमन्यदस्तीत्यभ्युपगमे वैधर्म्ये वैधर्म्यविश्रान्त्यनवस्थयोरेकमननुभवश्च कथं प्रत्युत्तरणीयः ।

टी० "'नच वाच्यमि''ति ॥ घटत्वपटत्वयोरन्योन्यस्मिन्नभावोऽन्योन्याभावो यदि घटपटयोर्भेदः स्यात्तदा घटत्वपटत्वे परस्परं भिन्ने न स्यातां, तयो(१)स्तादृशधर्माभावात्; तदुभयाऽभेदे च घटपटयोरपि भेदो दुर्लभः, प्रतियोगितावच्छेदकाधिकरणतावच्छेदकधर्मा(२)भावादित्यर्थः । किञ्चिद्वस्तु स्वत एव विलक्षणमिति तु परिभाषामात्रमिति भावः । ननु, घटनिष्ठात्यन्ताभावप्रतियोगिधर्मवत्त्वं पटस्य, पटनिष्ठात्यन्ताभावप्रतियोगिधर्मवत्त्वं घटस्य, यद्वैधर्म्यं, तदेव भेदस्तस्मात्स्वमानं प्रत्यक्षादि अतिबाधकं स्यादित्यत आह—। "अत एवे"ति । तादृशो धर्मो घटत्वपटत्वादिकमेव वाच्यं, तत्र च तादृशधर्मान्तराभावादभेदसिद्धौ घटपटयोरप्यभेद एव पर्यवसन्न इत्यर्थः । "एवं चे"ति । वैधर्म्यविश्रान्तिरेकं दूषणम् अनवस्था चेत्यपरम् अनयोरेकतरमित्यर्थः ॥ "अननुभवश्चे"ति । नहि घटत्वे धर्मोऽनुभूयते इत्यर्थः । यद्यपि जातिव्यक्त्योरन्योन्यं धर्मधर्मिभाव(३)इति नानवस्था, न वाऽननुभवः, नाप्यन्योन्याश्रयः, परस्परमपेक्ष्याऽज्ञानादुत्पादादेश्चाभावात् ; परस्पराभेदज्ञानाय तु परस्परावगाहनत्वविज्ञानात्तज्ज्ञान(४)मिति, तथापि घटत्वपटत्वयोरेव वैधर्म्यं भेदकमिति तु दुर्वचमिति भावः ॥

(१) तयोः=घटत्वपटत्वयोः, स्तादृशधर्माभावात्=भेदकधर्माभावादित्यर्थः । तथाहि—घटत्वपटत्वयोः स्वतो व्यावृत्तत्वं घटपटादय एव स्वतो व्यावृत्ता अङ्गीकरणीयाः किं मुधा तद्वृत्तिवैधर्म्यस्य व्यावर्तकत्वकल्पनया. अथ घटत्वपटत्वे स्वगतघटत्वत्वपटत्वत्वादिरूपवैधर्म्यभेदभिन्ने, तर्हि ते अपि स्वगतवैधर्म्यान्तरभिन्ने, ते अप्येवमित्यनवस्थापात इति भावः । (२) धर्माऽभावात्, धर्मभेदाऽभावादित्यर्थः ।

(३) व्यक्तौ जातिः समवायेन, जातौ च व्यक्तिः स्वनिष्ठाधारतानिरूपिताऽऽधेयत्वसंबन्धेन, वर्तते इति परस्परं धर्मधर्मिभाव इत्यर्थः ।

(४) तज्ज्ञानम्=पारस्परिकभेदज्ञानम् ।

मू० "वैधर्म्यं च वैधर्म्येऽस्वीकारे वैधर्म्ययोरैक्यापत्त्या कथमाऽऽत्माश्रयभेदत्वेन तयोः पर्यवसानं स्यात् । किंच, ये ते वैधर्म्ये भेदौ, ते किं घटादितो भिन्ने धर्मिणि निविशेते ? किमभिन्ने ? 'परस्परविरुद्धयोरनयोः पृथग्भूतस्य(1)प्रकारस्यासंभवात् । आद्ये, येन भेदेन भिन्नत्वं वैधर्म्याश्रययोर्मन्तव्यं तत्रापि पर्यनुयोग(2) इत्यनवस्थायां पर्यवसानं स्यात् । * सन्त्वनन्ता एव भेदाः * ? इति चेन्न, क्रमेण तेषामाश्रयसंबन्धे, सावधिसत्त्वे(3) वस्तुनि तदन्वयासङ्गतिरेव । अथ जायमानं वस्तु युगपदेव ते भेदाः परिरभन्ते, तदा किंभेदविशेषिते किंभेदव्यवस्थितिरिति किं विनिगमकं ? विशेषाभावादन्योन्यकलहं तेषां कः समाधातुमीष्टे ? । चरमचरमस्वीकार्येण च भेदेन प्रथमप्रथमस्वीकृतभेदाय योगासिद्धेरग्रे धावन् पश्चाल्लुप्यमानो, विस्मरणशीलत्वात्, स भेदप्रवाहः किमालम्बेत । एवमेवंविधे विषयेऽन्यत्रापि—

(1) पृथग्भूतस्य प्रकारस्य=भेदाऽभेदादिरूपस्य प्रकारस्य, असम्भवात्=परस्पर विरुद्धत्वेन सहसम्भवाद्यसम्भवादित्यर्थः ।

(2) येन भेदेन भिन्नत्वं सोऽपि भिन्ने धर्मिणि निविशते ? किं वाऽभिन्ने ?—इति पर्यनुयोगः=प्रश्न इत्यर्थः ।

(3) अवधिः=कालमर्यादा, तेन सह वर्तमानं सत्त्वं यस्य वस्तुनस्तत्सावधिसत्त्वं वस्तु, तस्मिन्सावधिसत्त्वे वस्तुनि, कार्ये वस्तुनीति यावत्; तदन्वयाऽसङ्गतिः, तस्य=क्रमिकाऽनादिभेदप्रवाहस्य, योऽन्वयः=सम्बन्धस्तस्याऽसङ्गतिरेवेत्यर्थः; साद्यनाद्योराधाराऽऽधेयभावानभ्युपगमादिति भावः ।

[j]प्राग्लोपाविनिगम्यत्वप्रमाणाऽपगमै(१)र्भवेत् ।
अनवस्थितिमास्थातुरचिकित्स्या त्रिदोषता ॥१८॥

टी० नन्वस्तु वैधर्म्ये विश्रान्तिः किमेतावतेत्यत आह— [a]"वैधर्म्येचे"ति ॥ [b]"आत्माश्रयभेदत्वेने"ति । घटत्वपटत्वयोरैक्ये कथं स्वाश्रयादेव स्वाश्रयस्य भेदौ ते(२)स्यातामित्यर्थः ॥ [c]"ये ते"इति । ये(३)ते इति द्विवचन विकल्पानुपयुक्तमपि भेद-त्वस्फोरणाय ॥ ननु भेदाभेदाभ्यां प्रकारान्तरमपि स्यादित्यत आह—। [d]"परस्परे"ति ॥ [e]"क्रमेणे"ति । अनन्तानां यदि क्रमिकी वृत्तिस्तदा दिगन्तव्यापिनि घटादौ न वर्तेरन्; किंच, कार्यमात्रे एव न वर्तेरन्नित्यर्थः ॥ ननु, कालः, सकृच्चेत्येकः कालः, तथाच सर्वे भेदा युगपदेव वर्तन्तामित्याशङ्क्ते—। [f]"अथे"ति । यद्यपि युगपदेव वर्तमानानामप्यन्योन्यकलहः कथं स्यात्, नहि घटत्वपृथिवीत्वद्रव्यत्वसत्त्वादीनां युगपद्वृत्तौ कलहः, तथापि भेदो भिन्ने वर्ततेऽभिन्नेवेति विकल्पे किमपि नोत्तरमेतावतेति भावः ॥ [g]"चरमे"ति । यद्यपि युगपद्वृत्त्यभ्युपगमे "चरमचरमस्वीकार्य्येणे"त्यनुपपन्नं, तथापि 'भिन्ने वर्तते' इत्याश्रयणे प्रथमविशिष्टे द्वितीय(४)वृत्तिर्वाच्या, तत्र यौगपद्येऽपि प्रथमचरमभावसम्भव एवेति भावः ॥ [h]"उपयोगे"ति । भिन्नत्वप्रतीतिरेवोपयोगः । [i]"एवमि"ति । गवि गोत्वं वर्तते? अगवि वा?—इति विकल्प्य गोत्वादिकमपि निरसनीयमित्यर्थ. ॥ [j]"प्राग्लोपे"ति । अग्रिमाग्रिमभेदाङ्गीकारे तेनैवान्यथासिद्धौ पूर्वपूर्व-

---

(१) समुदायिनः समुदायिभिन्नत्वपक्षे तृतीयाविभक्त्यर्थः प्रयोज्यत्वं, तथाच प्राग्लोपादिप्रयोज्या त्रिदोषतेत्यर्थः, अभिन्नत्वपक्षे त्वऽभेदोऽर्थस्तथा च प्राग्लोपाद्यभिन्ना त्रिदोषतेत्यर्थः ।

(२) एकस्यैव धर्मस्य स्वाश्रयात्स्वाश्रयभेदकत्वे घटत्वमपि घटाद्घटस्य भेदकं स्यादिति भावः ।

(३) ननु मूले 'यो वैधर्म्यभेदः स किं भिन्ने निविशतेऽभिन्ने वा"—इत्येव वक्तव्यं किं "ये ते वैधर्म्ये भेदौ" इतिद्विवचनोपादानेनेत्यत आह—ये ते इति ।

(४) द्वितीयवृत्तिर्वाच्या, अपरेषां सर्वेषां युगपद्वृत्तिर्वाच्येत्यर्थः ।

भेदविलोपः, किंभेदभिन्नो को भेदो वर्तते? इत्यविनिगमः, बहवो भेदा एकत्र घटे वर्तन्ते इत्यत्र प्रमाणापगमः, ते एते दोषा अनवस्थायां पतन्तीत्यर्थः । *ननु भेदविशिष्ट एव भेदो वर्तते इति पक्षाभ्युपगमे क्व प्राग्लोपः, भेदप्रतीतेरेव तावद्भेदाभ्युपगमसन्तत्याऽनिर्वाहात् । अत एव नाऽविनिगम्यत्वमिति । अवश्यनिर्वाह्यभेदप्रतीत्युपपादककल्पनायां तत्प्रतीत्यैव(1)भेदानां क्रमयोगपद्ययोरन्यतरस्याऽऽक्षेपात् । "सर्वतो बलवती ह्यन्यथानुपपत्तिरि"ति त्वयोक्तत्वात् । अत एव न प्रमाणापगमो, भेदप्रतीत्यन्यथानुपपत्तेरेव प्रमाणत्वात् । अन्यथा घटकादाचित्कत्वानुरोधेन तत्रापि सामग्रीपरम्पराभ्युपगमो न स्यात् । तथाऽनवस्थापि, तद्भेदभिन्न एव तद्भेदवृत्तेः । तद्वृत्तौ तद्भेदस्योपलक्षणत्वविशेषण(2)त्वाभ्यामुपपाद्यत्वात् । न वा भिन्ने भेदेन वर्तितव्यमिति नियमः । "कुत्र वर्तते?—इतिप्रश्ने, यत्र प्रतीयते इत्युत्तरं, कुत्र प्रतीयते?—इतिप्रश्ने, यत्र वर्तते", इति वार्त्तिककारादिशाप्युपपत्तेः । विप्रपञ्चितश्चायमुद्धारो भेदप्रकाशे*? । नैवम् । भेदप्रतीतेराविद्यक भेदमादायोपपाद्यत्वात् । परमार्थे तु भेदे एते विकल्पा इति भावः । यत्तु,(3)"भेदप्रतीतिरनन्तभेदालम्बना,? एकभेदालम्बना वा?"—इत्यादिना प्राग्लोपाऽविनिगम्यत्वादीनामुपपादनं केनचित् कृतं तदनुपपन्नम्, "अनवस्थितिमास्थातु"रित्यभिधानादनवस्थापक्षे एव दोषत्रयस्याभिधानादिति ॥

मू० "यदि च क्वचिद् गत्वा स्वरूपमेवान्योन्यं व्यावर्तमानं भेद इष्यते तदा ययोः स्वरूपं "तयैतद्‌व्यं 'तयोर्निःस्वरूपतापत्तिः; "अथ * न स्वरूपमात्रं मिथो

---

(1) अवश्यनिर्वाह्यभेदप्रतीत्यैवेत्यर्थः ।

(2) व्यावर्तकत्वमन्यं गुणमुपादाय विशेषणत्वमितोपाधित्वं ग्राह्यं, तथाच न पूर्वं विशेषणपक्षोक्त आत्माश्रयाख्यो दोष इति भावः । यद्वा, त्रिविधवृत्तेर्धर्मस्य विशेषणवृत्तित्वानभ्युपगममतेनैतत् ।

(3) कारिकाया व्याख्यानान्तरं दूषयति—यत्त्वित्यादिना ।

व्यावर्तते किंनाम स्वरूपविशेषः*-इत्युच्यते, [a]तर्हि स्वरूपविशेषमात्रव्यावृत्त्या स्वरूपमात्रं तयोः (१) स्यादित्येकत्वापत्तिः ।

टी० ननु स्वरूपभेदभिन्नयोरेव वैधर्म्ये भेदो वर्ततामिति नानवस्थेत्यत आह । [b]"यदि चे"ति ॥ [c]"विशेष्यमि"ति । व्यावर्तमानमेकरूपमित्यर्थः ॥ "तयोरि"ति । ययोर्घटपटयोः स्वरूपं व्यावर्तमानं तयोर्निःस्वरूपत्वापत्तिरित्यर्थः ॥ ननु घटपटस्वरूपयोरन्योन्यव्यावृत्तावपि स्वरूपमात्रं न व्यावर्तते इति कुतो निःस्वरूपत्वापत्तिरित्याह—। [d]"अथे"ति ॥ घटपटयोः स्वरूपं न परस्परं व्यावृत्तं, किंतु स्वरूपविशेषः परस्परव्यावृत्त इति तयं रैक्यमेव पर्यवसन्नमित्याह—। [e]"तर्ही"ति । *नच विशेषव्यावृत्त्यैव तयोर्भेद इति वाच्यम्*, स्वरूपाऽव्यावृत्तौ स्वरूपविशेषस्य(२)परस्परमव्यावृत्तेः, तद्व्यावृत्तौ वा स्वरूपव्यावृत्तेरावश्यकतया पुनः सैव निःस्वरूपतेति भावः ॥

मू० [a]अथवा, वक्तव्योऽसौ स्वरूपमात्रादन्यो विशेषार्थः । [b]अथ "न स्वरूपं नाम किञ्चिदनुगतमिष्यते मया, विशेषरूपासु व्यक्तिष्वेव स्वरूपशब्दो नानार्थः सन्निविशते"-इत्यभिधत्से, [c]तर्हि गतमनेनैव न्यायेन गोत्वादिसिद्धिप्रत्याशया, [d]नच प्रतिव्यक्ति स्वरूपपदसमयग्रहोपपत्तिः । [e]यदि(३)च स्वरूपं भेदः स्यात् तदा धर्मिणि दृष्टे स्वरूपं दृष्टमिति क्वचिन्न सन्देहः

(१) तयोः = घटपटयोः स्वरूपमात्रमव्यावृत्तं स्यादित्यर्थः ।

(२) स्वरूपविशेषस्येत्यतोऽग्रे "ऽपि" शब्दो द्रष्टव्यः । तद्व्यावृत्तौ= स्वरूपविशेषव्यावृत्तौ ।

(३) यदि भेदः=घटपटादिलक्षणो विशेषः, स्वरूपं स्यात्तदा घटत्वपटत्वादिधर्मराहित्येन केवले धर्मिणि दृष्टे क्वचिदपि 'स्वरूपं दृष्टमि'ति सन्देहः=सम्भावनापि कस्यचित्पुरुषस्य न स्यात्, किन्तु विशेषदर्शने एव 'स्वरूपं दृष्टमि'ति मतिस्स्यादित्यन्वयपूर्वकोऽर्थः ।

स्यादिति, [9]यदि चाऽभिन्ने भेदो निविशेत तदा याप्येका व्यक्तिः प्रतीयते घटादिः सापि तेनैव भेदेनाऽनेका स्यादित्येकाभावे नाऽनेकमपि व्यवतिष्ठते ।

टी० यद्वा([1])ऽनेनैवाशयेनाह—। [8]"अथवे"ति । घटस्वरूपं घट एव, पटस्वरूपम्पट एव, नच ताभ्यां स्वरूपान्तरमस्ति तयोर्यद्विशेषपदवाच्यं स्यादित्यर्थः ॥ स्वरूपविशेषव्यावृत्त्या स्वरूपमात्र([2]) तयोः स्यादित्याशङ्कते । [6]"अथे"ति ॥ शङ्कितां स्वरूपपदशक्तिमुपपादयति—। [5]"व्यक्तिस्वेवे"ति ॥ 'इदं स्वरूपमिदं स्वरूपमि'त्यनुगतप्रतीत्यनुरोधाद्यद्येकं स्वरूपं न स्वीकरणीय तदा गोत्वाद्यप्येकमनुगतं न स्यादित्याह—। [4]"तर्ही"ति ॥ स्वरूपसामान्याभावे दोषान्तरमाह—। [3]"नचे"ति । शक्तिग्रहस्याप्यनुगतधर्मपुरस्कारेणैव संभवादित्यर्थः ॥ यदि घटपटादिलक्षणो विशेष एव स्वरूपं स्यान्नत्वनुगतमन्यत् तदा दूराद् घटपटाविशेषाऽनवगाहिज्ञानं स्वरूपमात्रावगाह्यपि न स्यादित्याह—। [2]"यदि चे"ति । भेदः=विशेषः । संशयविपर्ययौ न स्याताम्'ति स्वपव्याख्यानम्([3]) ॥ नन्वभिन्नयोरेव घटपटयोर्भेदो वर्तत इति द्वितीयः पक्षोऽस्त्वित्यत आह—। [1]"यदि चे"ति । यदि घटपटावभिन्नावेव भिन्नौ स्यातां तदा घटव्यक्तिरप्यभिन्ना भिन्ना स्यादित्येकं किमपि न भवेत्, तदभावाच्च तत्पर्युदासरूपमनेकमपि न स्यादित्यर्थ. ॥

---

(१) तर्हीत्यादिपङ्क्तेर्निरुक्तभावपक्षेऽथवेत्यादिग्रन्थस्याऽन्यार्थोऽभिधायितामनुसन्धायेदानीं निरुक्तभावार्थप्रतिपादकत्वमेवाथवेत्यादिग्रन्थस्येत्याह—यद्वेति ।

(२) स्वरूपमात्रं=स्वरूपसामान्यं, तयोः स्यात् 'अव्यावृत्तम्'—इति शेषः ।

(३) अपव्याख्यानत्वञ्चास्य "नच प्रतिव्यक्ति स्वरूपपदसङ्ग्रहोपपत्तिः"-इत्यस्याऽव्यवहितमौलिकप्रतिज्ञातार्थस्योपपादनपरत्वाभावाद् द्रष्टव्यम् । एतच्चापाततः, वस्तुतस्त्वत्र प्रकृतशाङ्करव्याख्याने एव क्लिष्टकल्पनं दोषः, व्याख्यानान्तरे तु स्वातन्त्र्येण दूषणान्तरपरतया सुव्याख्यानमेवेति विभावयामः ।

मू० "एतेन न भेदावच्छिन्ने नचाऽभेदावच्छिन्ने भेदो विनिविशते किंतूदासीने-इत्यपि निरस्तम्, [b]अत एव च भेदो नाम स्वरूपान्योन्याभाववैधर्म्याऽनात्मको धर्मान्तरं पृथक्त्वाऽपरनामकमित्यपि परास्तम्। [c]सोपि हि स्वाश्रये भिन्ने विनिविशेताऽभिन्ने वेत्यादियथोक्तदोषलङ्घनाऽजङ्घाल([1])एव स्यात्, [d]स्वाश्रयेण च स्वस्मिन्नभेदभयाद्यदि स एव भेदो निविशते([2]) तदात्माश्रयः, अन्यश्चेत्तस्मिन्नेवं तस्मिन्नप्यन्य इत्यनवस्था, क्वचिदपि गत्वा भेदभेदाश्रययोर्भेदस्याऽस्वीकारे च तदैक्यद्वारिका मूलपर्यन्तमेकता धावेत्।

टी० ननु भेदवृत्त्यावाश्रयावच्छेदकतया भेदाभेदौ न वाच्यौ, किं तर्हि, कुत्र भेदो वर्तते ? इति प्रश्ने, धर्मिणि भेदो वर्तते, भेदाभेदौदासीन्येन वर्तते इति वा वक्तव्यमिति न पूर्वदोष इत्यत आह–। [a]"एतेने"ति। तस्मादपि भेदप्रसङ्गेनेत्यर्थः। तस्याप्युदासीनत्वात् धर्मित्वाच्चेति भावः॥ ननु स्वरूपवैधर्म्यान्योन्याभावरूपभेदत्रयखण्डनेपि पृथक्त्वस्य सत्त्वात्तद्भेदनमित्यत आह–। [b]"अत एवे"ति॥ अतिदेशमाह–। "सोपी"ति। किंच, पृथक्त्वस्य गुणत्वात्कर्मादावभावात्तद्भेदे द्रव्याणामप्यभेदात्। किंच, पृथक्त्वस्यावधिनिरूप्यत्वाद्भेदस्य प्रतियोगिनिरूप्यत्वा-([3])दिति भावः॥ अन्योन्याभावे वैधर्म्ये च दोषान्तरमाह–। [d]"स्वाश्रयेणे"ति। यद्यपि क्वचिद्गत्वा स्वरूपभेदे पर्यवसानमदुष्टमेव, * नचाऽन्योन्याभाववैधर्म्याभ्युपगमानर्थक्यम् *, अनुभवबलेन तयोरभ्युपगमात्; मूलपर्यन्तमेकताधावनं स्वरूपभेदप्रतिबद्धमेव, तथापि स्वरूपभेदस्यापि निरस्तत्वादिति भावः॥

---

(१) अजङ्घालः = मन्दगामी, तथा च यथोक्तदोषलङ्घनेऽजङ्घालो मन्दगामी यथोक्तदोषाऽनतिक्रमीत्यर्थः।

(२) "स्वस्मिन्"–इति शेषः।

(३) अत्र–"इतीतरनिरूप्यत्वसाम्यात्पृथक्त्वेपि भेदपक्षोक्तदोषापित्तरेव"–इति शेषः कथञ्चित् प्रायः पुस्तकेषु लुप्तो द्रष्टव्यः।

"तद्(१)द्वैतश्रुतेस्तावद्बाधः प्रत्यक्षतः क्षतः ।
नानुमानादि तं(२) कर्तुं तवापि क्षमते मते ॥ २० ॥
अद्वैतागमनासीरे साधु सा धुन्वती परान् ।
सेवामेवार्जयत्यर्थापत्तिपत्तिपरम्परा ॥ २१ ॥

मू० * नन्वद्वैतश्रुतयो वर्णपदविभक्तितदर्थादिभेदानुपजीव्यार्थं प्रतिपादयन्त्यः स्वोपजीव्याभि(३)र्भेदबुद्धिभिर्न कथं बाध्यन्ताम्, उपजीवकस्योपजीव्याद् दुर्बलत्वात् * ? । मैवम् । न वयं भेदस्य सर्वथैवासत्त्वमभ्युपगच्छामः; किंनाम, पारमार्थिकं सत्त्वम् । अविद्याविद्यमानत्वं तु तदीयमिष्यते एव, तदेव च कार्य्यकारणभावोपयोगि ।

टी० प्रत्यक्षविषयाभावात् प्रत्यक्षबाधो न संभवतीत्युपसंहरति-"तदद्वैते"ति ॥ "नाऽनुमानादी"ति । अनुमानापेक्षयाऽऽगमस्य बलवत्त्वात् । अन्यथा नरशिरः कपालं शुचि, प्राण्यङ्गत्वादित्याद्यप्यवकाशमासादयेदिति भावः ॥ अर्थापत्तेः स्वपक्षानुकूलत्वमुक्तं स्मारयति-। "अद्वैते"ति । अद्वैतागमस्य नासीरे = पुरतः, सा = अर्थापत्तिः, परान् = विरोधिनः प्रमाणाभासान्, धुन्वती = निराकुर्वन्ती, सेवामानुकूल्यमर्जयति=भजते, अत एवार्थापत्तेः पत्तित्वेन(४) निरूपणमुपपन्नमित्यर्थः ॥ श्रुतिजबुद्धेः श्रौतानि नानापदानि कारणमिति नानात्वं विना कार्यकारणभावानुपपत्तिः, तमन्तरेण(५)श्रौतबुद्धेरनुत्पत्तौ कुत्र बाध्यबाधकभावचिन्तेति शङ्कते-। "नन्वि"ति ॥ नानात्वमात्रस्योपजीव्यत्व, नतु पारमार्थिकनानात्वस्य, येनोपजीव्यविरोधः स्यादिति परिहरति-। "न वयं भेदस्ये"ति ।

(१) तत् = तस्मात् । (२) तं = बाधम् ।

(३) उपजीव्यते कार्य्येणाश्रीयते यत्तदुपजीव्य (= कारणम्) उपजीवति कारणाश्रितं भवति यत्तदुपजीवकं (= कार्य्यम्) इत्यर्थः ।

(४) पत्तित्वेन, पदातित्वेनेत्यर्थः ।

(५) तमन्तरेण=कार्य्यकारणभावाऽनुपपत्तिमन्तरेण ।

यद्यप्यद्वैतस्याविद्यकत्वमस्तु, श्रुतिविषयत्वेन तत्पारमार्थिकत्वे प्रत्यक्षविषयतया भेदस्यैव पारमार्थिकत्वं किं न स्यात्, अबाधितसकललोकव्यवहारे प्रतीयमानेऽप्याविद्यकत्वस्य परिभाषामात्रत्वात्, व्यवहारविषयत्वेनैव पारमार्थिकत्वसाधनात्, व्यवहाराऽविषयस्य ब्रह्माद्वैतस्यैवापारमार्थिकत्वसंभवात्; अद्वैतानुरोधाच्छ्रुतेस्त्वयैवोपपादनीयत्वात्(१), अन्यथा त्वयैव द्वैतापत्तेः; एवं तज्जनितबुद्धेरपि(२); यदि च स्वप्रकाशबलादद्वैतं, तदा तत एव द्वैतं किं न स्यात्?; न हि स्वप्रकाशस्य न द्वैतं विषय इति प्रतिपादयितुं शक्यसि, तथाप्यहं खाण्डनिको न तु व्यवस्थापक इति भावः ॥

मू० "एतेन "एकमेवे"त्येव(३)कारव्यवच्छेद्येना"ऽद्वितीयमि"ति द्वितीयेन, "न नाने"ति नानात्वेन, "किञ्चने"त्यनेन बहुना विना नोपपद्यमानेन, व्याघातः—इत्यपि प्रत्यादिष्टम्। 'श्रुतिभिश्चाद्वैतार्थाभिः पारमार्थिकमद्वैतं प्रतिपाद्यते, नच पारमार्थिकमतिरपारमार्थिकधिया शक्यबाधा, 'माभूत्(४)शुक्तिरजतधिया परमार्थशुक्तिमतिबाधः। "यत्र त्वग्निरनुष्ण इतिबुद्धेरुष्णज्ञानोपजीवना(५)दुष्णबोधेनाऽनुष्णबुद्धिबाधस्तत्र द्वयोरप्यविद्याविद्यमानत्वाद्बाधो

(१) "उपासनीयत्वात्"—इत्यपि पाठः।

(२) अत्रापि "त्वयैवोपपादनीयत्वात्"—इत्यनुषञ्जनीयम्।

(३) "एकमेव"—इत्येवकारव्यवच्छेद्येन (विजातीयभेदेनाद्वैतस्य) व्याघातः, "अद्वितीयमि"ति (पदव्यवच्छेद्येन) द्वितीयेन व्याघातः, "न नाना—इति नानात्वेन व्याघातः, "किञ्चन"—इत्यनेन बहुना विना नोपपद्यमानेन व्याघात—इत्यपि प्रत्यादिष्टमित्यन्वयः॥

(४) अत्रेत्थमक्षरयोजना—शुक्तिरजतधिया परमार्थशुक्तिमतिबाधो मा भूद् (इत्यतः) पारमार्थिकमतिरपारमार्थिकधिया शक्यबाधा नच (भवति)।

(५) अनुष्णज्ञानस्य प्रतियोगिविधयोष्णज्ञानमुपजीव्यम्।

युक्तः । *ननु, तत्रापि तद्धनुष्णतापि पारमार्थिकयैव साध्यतामबाधनाय* ? । मैवम् ।

टी० श्रौतपदवर्णनानात्वज्ञानस्योपजीव्यत्वमाशङ्क्य श्रौतपदानामर्थभेदप्रत्ययमन्तरेणाऽप्रतिपादकत्वात् तदुपजीव्यत्वमाशङ्क्याह—। "“एतेने”ति, आविद्यकभेदाभ्युपगमेनेत्यर्थः ॥ पारमार्थिकविषयत्वेन श्रुतेरपारमार्थिकभेदविषयकप्रत्यक्षाद्यपेक्षया बलवत्त्वमाह—। "“श्रुतिश्चे”ति ॥ अत्राऽनुरूपं दृष्टान्तमाह—। “मा भूदि”ति ॥ ननु यदि पारमार्थिकबुद्धिरपारमार्थिकधियं बाधते इति वस्तुगतिस्तदोष्णताग्राहिप्रत्यक्षमनुष्णताऽनुमानं तव मते न बाधेताऽपारमार्थिकधर्मविषयकत्वादित्यत आह—। "“यत्र त्वि”ति । वस्तुगतिरियं यत् पारमार्थिकविषययैव धियाऽपारमार्थिकधीर्बाध्यते, व्यवहारस्तु वस्तुगतिमननुरुद्ध्यापि, इति व्यवहारदशायां प्रत्यक्षस्यैव बलवत्त्वाद्बाधकत्वमुच्यते इत्यर्थः ॥ ननु परमार्थसदद्वैतगोचरा श्रुतिरित्यबाध्येति यथा त्वयोच्यते तथाऽनुष्णतानुमानवादिनापि तस्याः पारमार्थिकत्वमभ्युपगम्यैव तत्रापि प्रत्यक्षबाधोऽपि निरसनीय इत्याशङ्कते—। "“नन्वि”ति ॥

मू० "अनुष्णताया जलादिदृष्टान्तसजातीयायाः शीताद्यव्यावृत्तस्वरूपाया प्रसाधनेनाविद्याविद्यमानत्वे एव विश्रामात्; तत्रै(१)वंविधरूपतानङ्गीकारे चाद्वैतस्यैव नामान्तरकरणापत्तेः; ततस्तस्यां ज्ञेयज्ञानादिभेदावश्याभ्युपेयतया(२)जगद्बाधयुक्तिकवलाऽप्रवेशा-

(१) तत्र=अनुष्णतायाम्, एवंविधरूपताऽनङ्गीकारे=जलादिदृष्टान्तसाजात्यानङ्गीकारे ।

(२) ज्ञेयज्ञानादिभेदस्याऽवश्यमभ्युपेयता ज्ञेयज्ञानादिभेदावश्याभ्युपेयता ("लुम्पेदवश्यमः कृत्ये तुम्काममनसोरपि" इति मलोपः) तयेत्यर्थः, जगद्बाधयुक्तयो दृग्दृश्यसम्बन्धखण्डनयुक्तयस्ताभिर्यत्ताद्दृश्या अनुष्णतायाः कवलनं=ग्रसनं (बाधनमिति यावत्) तस्य योऽप्रवेशस्तस्याऽसम्भवात्, जगद्बाधयुक्तिभिर्जगदन्तर्गताऽनुष्णताया अपि बाधनान्न ब्रह्मवदबाध इति भावः ।

संभवात् । [b]अद्वैते च द्वैताश्रयस्य बाधस्य वास्तवस्यानवकाशादपारमार्थिकत्वसंभावनापि दूरत एवापसरतीति । * [c]ननु(१) किमद्वैतपरमार्थताभ्युपगमेन समाहितं भवति, यत उपजीव्यबाधादद्वैते प्रमां श्रुतिर्जनयितुं न शक्नोतीति ब्रूमः *? । मैवम् [d]अद्वैतं हि पारमार्थिकमिदं पारमार्थिकेन भेदेन बाध्येत (२), नत्वविद्याविद्यमानेन, तस्मादविद्याव्यवस्थितं भेदं तद्बोधं चोपजीवन्त्या(३) [e]न परमार्थाद्वैतबुद्धेरुपजीव्यबाधः । [f]यदि श्रुतिजन्या भवन्त्यप्यद्वैतबुद्धिरविद्याविद्यमाना, तथापि तद्विषयस्तावत्परमार्थसदेवाद्वैतं, विरोधेन(४) च तस्या बाध्यता, स च नास्तीति ।

टी० जलादौ याऽनुष्णता सैव यदि वह्नौ साध्यते तदा तदितरप्रपञ्चबाध्यत्ववत्तद्बाध्यत्वमपि सुलभम्, अथ तद्विलक्षणमेवानुष्णत्वं साध्यते यत्र प्रपञ्चबाधकयुक्तयो न प्रभवन्ति तदा तदेवाऽद्वैतमिति सिद्धं नः समीहितमिति परिहरति–। [a]"अनुष्णताया"इति ॥ ननु कथमद्वैतस्यापि न जगद्बाधकयुक्तिकवलनमत आह–। [b]"अद्वैते चे"ति । बाधकयुक्त्या हि भेदगर्भाः, भेदः खण्डित इति वास्तवो बाधो नास्त्यत्रेवेति नाद्वै

(१) "यद्यपि 'नच दृष्टान्वये'त्यादिनेदमाशङ्क्य निराकृतं पूर्वं, तथाप्युपजीव्यत्वपुरस्कारेणेदानीं शङ्काऽवधेया"–इति प्रगल्भमिश्राः श्रीदर्पणे ।

(२) "विरुद्ध्येत"–इत्यपि पाठः ।

(३) उपजीवन्त्याः परमार्थाद्वैतबुद्धेरुपजीव्यबाधो नेत्यन्वयः । अत्राऽद्वैतबुद्धेरुपजीव्यस्य बाध इत्येकदेशान्वयो द्रष्टव्य, उपजीव्येन बाध इति वा ।

(४) विरोधेन=विषयापहारेण, तस्याः=अद्वैतधियो, बाध्यता, सच=विषयापहारश्च, प्रकृते नास्तीत्यर्थः ।

तस्य किञ्चिद्बाधकमित्यर्थः ॥ ननु परमार्थमतिरपरमार्थधिया न शक्यबाधेति तदा स्यात् यदि पदार्थनानात्वस्योपजीव्यस्याविरोधादुपजीविकया श्रुत्या ज्ञानं जन्येत, तदेव नास्तीत्याशङ्कते—। c"नन्वि"ति ॥ भेदो, भेदबुद्धिर्वा, नाद्वैतं प्रतिबद्धुमर्हति, अपारमार्थिकत्वादपरमार्थविषयत्वाच्चेति परिहरति—। d"तद्वैतमि"ति ॥ e"न परमार्थाद्वैतबुद्धेरुपजीव्यबाध"इति । ([1])प्रतिबन्ध इत्यर्थः ॥ ननु यद्यद्वैतबुद्धिः पारमार्थिकी, तदा तयैव द्वैतम्; अथाऽपारमार्थिकी, तदा बाध्यत्वान्नाद्वैतसिद्धिरित्याशङ्क्याह—। f"यदी"ति। इतरप्रपञ्चबुद्धेरपारमार्थिकत्वेपि विषयस्या([2])द्वैतस्य न बाध इति बुद्धेरपि न बाध्यत्वमित्यर्थः । बाधस्य विषयापहाररूपत्वाद्विषयस्य च प्रत्यक्षादिभिरप्यपहर्तुमशक्यत्वादिति भावः ॥

मू० तस्मात्—

पारमार्थिक([3])मद्वैतं ᵍप्रविश्य शरणं श्रुतिः ।
बाधना^hदुपजीव्येन बिभेति न मनागपि ॥ २३ ॥

श्रुतिरपि तदाह—"द्वितीयाद्वै भयं भवती"ति। ⁱतच्चाद्वैतं "ब्रह्मैवेदं सर्वमि"ति श्रुत्यर्थेन सहैक्यमापन्नं ब्रह्मैव स्यात्, "विज्ञानमानन्दं ब्रह्मे"ति च श्रुत्या ज्ञानानन्दात्मतया व्यवतिष्ठते। ʲतेन यदिदमद्वैतज्ञानं श्रुत्या जनितं तद्विज्ञानाद्वैतात्मन्येव निविशते। * ᵏननु कथं तस्य श्रुत्या जन्यत्वमुपपद्यते ? * ।

(१) अत्रार्थसौकर्य्यार्थं "प्रतिबन्ध"इत्यतः प्राक्"उपजीव्यबाधः"—इति प्रतीकमनुषञ्जनीयम् ।

(२) विषयस्य=अद्वैतबुद्धिविषयस्य, बुद्धेः=अद्वैतबुद्धेः । अद्वैतबुद्धेश्च ब्रह्मरूपत्वेन द्वैतापत्तिशङ्कावारणं बोध्यम् ।

(३) श्रुतिः पारमार्थिकमद्वैतं शरणं प्रविश्य उपजीव्येन बाधनात् मनागपि (=ईषदपि) न बिभेतीत्यन्वयः ।

सत्यमेवं(१) स्यात्, यदि तस्य पारमार्थिकी श्रुत्या जन्यतापि स्याद्विद्याऽव्यवस्थिता तु तज्जन्यता न पारमार्थिकेनाजन्यत्वेन विरुद्धयते; अत एव श्रुत्येदमेकं साध्यते। यत्तु, तत्र यद्येकता भेदाभावो, यदि चैकत्वसङ्ख्या, यदि वा ज्ञानात्मकत्वं, यदि वाऽन्य एवैकत्वनामा कश्चिदभेदापरपर्यायो धर्म्मस्तद्वत्त्वं बोध्यते, तच्चाद्वैतव्याघातकत्वान्न सेद्धुं शक्नोति, तदा तदपि निष्पीडन(२)मसहमानं तज्ज्ञानं श्रुतिजन्यत्वेन सहैव निवर्तताम्, यत्तु तादृशस्याद्वैतस्य धर्मस्य धर्मितया प्रमितं तन्मात्रमबाधादधिगतं परमार्थतो व्यवतिष्ठताम्।

टी० "प्रविश्ये"ति। विषयीकृत्येत्यर्थः॥ "उपजीव्येने"ति। पदपदार्थनानात्वेन तद्बोधकज्ञानेन चेत्यर्थः॥ ननु कयाचिदद्वैतं, कयाचिद्ब्रह्म, कयाचिद्विज्ञानं, कयाचिदानन्दः, श्रुत्या प्रतिपाद्यते इति श्रुतीनां विरोधे किमपि न सिद्ध्येत्; अविरोधे वा सर्वं(३)सिद्ध्येदित्यद्वैतमनुपपन्नमेवेत्यत आह—"तच्चे"ति। यद्यपि "एकमेवाऽद्वितीयं ब्रह्मे"ति प्रस्तुत तयैव श्रुत्या ब्रह्मात्मकत्वसिद्धिः, तथापि श्रुत्यन्तरोपष्टम्भस्तत्राप्युक्त(४)स्तस्यां श्रुतावद्वैतमात्रे तात्पर्यं, नतु ब्रह्मण्यपीति भावः॥ श्रुतीनां सामञ्जस्यफलमाह—। "तेने"ति॥ जन्यजनकभावस्याद्वैतपरिपन्थित्वमाशङ्कते—। "नन्वि"ति॥ अपारमार्थिको जन्यजनकभावो

(१) अत्र यदिशब्दानुरोधात् तदेति शब्दोऽध्याहर्तव्यः।

(२) तदपि निष्पीडनं=तादृशमपि न्यायाघातम्, असहमानं तज्ज्ञानम् = एकत्वादिधर्मविज्ञानम्।

(३) सर्वम् = ब्रह्मविज्ञानानन्दैतत्त्रयमद्वैतव्यतिरिक्तम्।

(४) उक्तः, मूलकारेण "ब्रह्मैवेदं सर्वम्'—इत्युक्त इत्यर्थः। तत्र हेतुः—तस्यामिति, यतस्तस्याम् = "एकमेवाऽद्वितीयमि'त्याकारकश्रुतावद्वैतमात्रे तात्पर्यं, नतु ब्रह्मणि = ब्रह्मणः सर्वात्मकत्वे,—इत्यर्थः।

नाद्वैतविरोधीत्याह-"सत्यमि"ति ॥ श्रुतिविषयस्याप्येकत्वादेर्धर्मस्याद्वैतपरिपन्थितामाशङ्क्याह-। "अत एवे"ति। यथाऽद्वैतज्ञानस्य श्रुतिजन्यत्वमपारमार्थिकत्वान्निवर्तते तथा श्रुतिबोध्यस्य ब्रह्मण एकत्वादिधर्मस्यापारमार्थिकत्वान्निवृत्तो न नः किञ्चिदनिष्टमित्यर्थः।

मू० "नहि परमार्थशुक्तौ रजततया प्रतीयते यदा, तदा बाधात्तत्र रजतत्वे व्यावर्त्तमाने धर्मिव्यक्तिरपि तद(१)पराधान्निवर्तते। सेयमद्वैतबुद्धिर्न्न तर्कशतमवताय्य प्राज्ञैरपनेया, यद् आह श्रुतिः-"नैषा (२) तर्केण मतिरापनेये"ति "तस्मात्-

धीधना ! (३)बाधनायाऽस्यास्तदा प्रज्ञां प्रयच्छथ।
क्षेप्तुं चिन्तामणिं पाणिलब्धमब्धौ यदीच्छथ ॥२४॥

सेयमद्वैतदृष्टिर्दृष्टार्थापि, यदाहुः-"स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्"।

टी० नन्वेकयैव धियाऽद्वैतं(४)विशिष्टमुपस्थापितं, तत्र विशेषणांशेऽयाथार्थ्येऽपि(५)विशेष्यांशे का प्रत्याशा इत्याशङ्क्य निदर्शनमाह-। "नही"ति। "धर्मिणि सर्वम(६)भ्रान्तं प्रकारे

(१) तदपराधात् = आरोपितधर्मबाधरूपापराधात्।

(२) एषा=अद्वैतविषया मतिः, तर्केण=श्रुतिविरोधिकुतर्केणाऽऽपनेया, आ=समन्तात्, अपनेया=ऽपलपितव्या, न; यद्वाऽऽपनेया = प्रापणीया नेत्यर्थः।

(३) धीरेव धनं येषां विदुषां तत्सम्बोधनं धीधना ! इति, अस्याः=अद्वैतबुद्धेर्बाधनाय स्वप्रज्ञां तदा प्रयच्छथ यदि पाणिलब्धं=हस्तप्राप्त चिन्तामणिं विविधार्थप्रदं समुद्रे क्षेप्तुमिच्छथेत्यर्थः।

(४) अद्वैतात्मकं ब्रह्म, विशिष्टं द्वैताभावविशिष्टमित्यर्थः "अद्वैतविशिष्टमि"ति पाठे तु 'ब्रह्म'-इत्यध्याहार्य्यम्।

(५) अपिशब्दो भिन्नक्रमः, विशेष्यांशेपीत्यर्थः।

(६) सर्वं ज्ञानमित्यर्थः।

तु विपर्यय"—इति भावः ॥ ननु श्रुतिव्युत्पादनमेतावता षण्ढस्य(१) मैथुनवदकिञ्चित्करमेव, तदुपस्थाप्यस्याद्वैतस्य त्वयैव निरसनात्; किञ्च, द्वैतमेव तदुपस्थाप्यं किं न व्युत्पादितं? धर्मत्वेन तन्निवृत्तेरप्यद्वैतवदेव संभवात्; कथं वा श्रुतेः प्रामाण्य? तज्जनितज्ञानस्याप्रमात्वपर्यवसानात्(२); तदप्रामाण्ये वा कथमद्वैतं? कथं वाद्वैतादिसकलधर्मविनाकृतस्य ब्रह्मणः सिद्धि?, स्वप्रकाशस्य(३) ब्रह्ममात्रविषयत्वात्, धर्माभावे तस्याऽतन्त्रत्वात्, ब्रह्मणि चाऽविप्रतिपत्तेः; द्वैताऽद्वैतविचारस्य गर्दभीक्षीरमथनायमानत्वात्; ब्रह्म सर्वैः स्वीक्रियते, तदेकत्वं त्वयापि नाभ्युपगम्यते, तथाच सर्वमिदमाकुलमित्यत आह—। [b]"सेयमि"ति ॥ [c]"नैषे"ति। यद्यपि श्रुतेस्तर्कासहत्वं दोष एव, अन्यथा मीमांसाव्युच्छित्त्येन, मीमांसायास्तर्कत्वात्; यदाहुः "मीमांसाख्यस्तर्कः(४) सर्ववेदसमुद्भवः। सोऽतोवेदो रुमाप्राप्तकाष्ठादिलवणात्मवत्", उक्तं च "यस्तर्केणाऽनुसंधत्ते स धर्मं वेद नेतर"-इति, तथापि श्रुतिवाक्यानुरोधेन तर्कोऽनुसरणीयो नतु तद्विरोधेनापीति भावः। श्रुत्या यदद्वैतज्ञानमुत्पन्नं तदपवर्गानुकूलमिति नापवदितव्यमित्युपसंहरति—। [d]"तस्मादि"ति ॥ ननु मुमुक्षुतादशायां मयाप्येकमेव ब्रह्म ध्येयमिति किमनेनोपदेशेनेत्यत आह—। [e]"सेयमि"ति। मोक्षान्यप्रयोजनकत्वं दृष्टार्थत्वम् ॥ [f]"स्वल्पमपी"ति। अद्वैतोपासनलक्षणस्य धर्मस्य स्वल्पमपि महतो भयाद्राजचौरव्याघ्रादिभयात्त्रायते इत्यर्थः। उत्पन्नमात्रेणाप्यद्वैतज्ञानेन विषयेष्वलंप्रत्ययवतोऽविचिकित्सस्य राजचौरादिभयं निवर्तते किं पुनर्गृहीतप्रामाण्येनेति भावः ॥

(१) षण्ढस्य=नपुंसकस्य।

(२) अद्वैतस्याप्यन्ततो बाध्यत्वेन भवताङ्गीकारात्तद्विषयकं श्रौतज्ञानमप्रमैव पर्यवस्यति।

(३) ननु स्वप्रकाशचैतन्येनैव तन्सिद्धिरित्यत आह—स्वप्रकाशस्येति। धर्माऽभावे=द्वैतादिसकलधर्माभावे, तस्य=स्वप्रकाशचैतन्यस्य, अतन्त्रत्वादसाधकत्वादित्यर्थः।

(४) यथा रुमायां लवणखनौ प्राप्तं काष्ठादिकं लवणात्मकमेव भवति तथा रुमास्थानीयवेदसमुद्भवस्तर्कोऽपि वेदरूप एवेति श्लोकार्थः।

मू० "तस्मात्-

ईश्वरा(¹)नुग्रहादेषा पुंसामद्वैतवासना ।
महाभयकृतत्राणा द्वित्राणां यदि जायते ॥ २५ ॥

तस्मात्-

'आपाततो यदिदमद्वयवादिनीनाम्(²)
अद्वैतमाकलितमर्थतया श्रुतीनाम् ।
तत्स्वप्रकाशपरमार्थचिदेव भूत्वा ।
'निष्पीडितादहह निर्वहते विचारात् ॥ २६ ॥

"तदिदमेताभिरात्ममतसिद्धसद्युक्तिलक्षणोपपन्ना-भि(³)र्युक्तिभिरुपनीयमानमद्वैतमविद्याविलासला-लमेोपि श्रद्दधातु तावद्भवान्, तदनु(⁴)चानयैवोप-निषदर्थश्रद्धयाऽध्यात्मं जिज्ञासमानः परमार्थतत्त्वं 'क्रमाद्वृत्तिव्यावृत्तचेताः 'स्वप्रकाशसाक्षिकं 'साक्षि-

(१) यस्माद् दृष्टाऽदृष्टफलाऽद्वैतदृष्टिर्दुर्लभा च तस्मादेषाऽद्वैत-वासना पुंसा यदि जायते तदीश्वरानुग्रहादेव, तथा च विद्योत्पत्ति-परिपन्थिकल्मषनाशायेश्वराराधने मुमुक्षुभिः प्रवर्तितव्यमित्याशयः । हेतुगर्भं विशेषणं -महाभयकृतत्राणेति, महतः संसारस्य भयात्कृतं त्राणं यया सा तथोक्ता । विशिष्टाधिकारिदुर्लभतां दर्शयति-द्वित्राणामिति ।

(२) अद्वयवादिनीनां श्रुतीनां यदिदमद्वैतम् आपाततोऽर्थतया-ऽऽकलितं (=विचारितम्) तत्स्वप्रकाशचिद्रूपमेव भूत्वा निष्पीडितात् (= शोधितात्) विचारान्निर्वहते (= निर्वाहं प्राप्नोति)-इत्यन्वयः ।

(३) सत्यः = समीचीना युक्तयः सद्युक्तय,स्तासां ज्ञापकं लक्षणं सद्युक्तिलक्षणं, तेनोपपन्नाभिर्युक्तिभिरित्यर्थः ।

(४) तदनु च स्वात्मनैव भवान् परमार्थतत्त्वं साक्षात्करिष्यतीत्य-न्वयः । "अध्यात्मं जिज्ञासमान"-इत्यनेनं लक्षणया ज्ञानेच्छयोपलक्षितं वेदान्तविचारात्मकं श्रवण, "क्रमादि"त्यनेन मननं, "वृत्तिव्यावृत्ते"त्य-नेन विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययसन्तानरूपं निदिध्यासनं चोच्यते; तथा च मनननिदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां सहकृ-ताच्छ्रवणाद्भवान् साक्षात्करिष्यति-इति भावः ।

करसातिशायि(१)स्वात्मनैव साक्षात्करिष्यति ।

टी० एतदेवोपसंहरति—। a"तस्मादि"ति । (२)अद्वैतानुभवजनित: संस्कार:; यद्वाऽद्वैतं प्रति भावना, अद्वैतबुभुत्सेत्यर्थ: । 'यदी'ति लोकोक्ति: ॥ ननु यद्यद्वैतज्ञानस्य श्रुतिजन्यत्वमपि निरस्तं, तदा तत्र किं प्रमाणं? कथं वा 'श्रुतिस्तत्र प्रमाणमि'त्यभिधीयते? इत्यत आह—। b"आपातत"इति । अविद्यादशायां वाच्यवाचकभावोपग्रहेणेत्यर्थ: । पारमार्थिकी चित्=परमार्थचित् ॥ c"निष्पीडितादि"ति । "ब्रह्मैवेदं सर्वमि"त्यादिश्रुत्यैकवाक्यतया परिशोधितादित्यर्थ: । 'अहहे'ति स्वकीयतादृशानुभवचमत्काराविष्कार: ॥ नन्वेतास्त्वदुक्तयो मह्यं न रोचन्ते, न वाऽद्वैतवासनाभिर्भरमथिताभि(३)रद्वैतज्ञानं जनयितुं शक्यं, न वा जनिते तस्मिन्नस्माकमादर: शरीरात्मभेदसाक्षात्कारलक्षणतत्त्वज्ञानप्रतिपन्थित्वादित्यत आह—। d"तदिदमि"ति । उद्धृतकण्टकत्वादिना(४)युक्तय: सद्युक्तय एव, नचाऽद्वैतज्ञानस्य तत्त्वज्ञानविरोधित्वं, भेदज्ञानस्य तत्त्वज्ञानत्वाभावादिति भाव: ॥ e"क्रमादि"ति । तत्र बहिरिन्द्रियविषये स्पृहालोभश्चेतसो या वृत्तिस्तद्व्यावृत्तचेता युञ्जान(५) इत्यर्थ: । मनोवृत्तय: कामादयस्तद्व्यावृत्त इति वार्थ: ॥ ननु साक्षात्कारब्रह्मणोर्विषयविषयिभावे भेद एवेत्यत आह—। f"स्वप्रकाशे"ति ॥ "यं लब्ध्वा चापरं लाभं मन्यते नाधिकं तत:"—इत्याद्युक्तमानन्दहेतुत्वं योगस्याह-। g"मानसकरसातिशायी"ति॥

---

(१) मानसिकं रसमतिशयितुं शीलं यस्य तत्तथा ।

(२) अत्र "अद्वैतवासना"-इतिप्रतीकमध्याहृत्याद्वैतानुभवेत्यादिग्रन्थो व्याख्येय: ।

(३) भरमथिताभि: = द्वैतवासनाभारेणाऽभिभूताभिरित्यर्थ: । केषुचित्पुस्तकेषु "द्वैतवासनाऽभिभरमथिताभि:"-इति पाठ,स्तत्राऽद्वैतवासनाभिरित्युपरितोऽध्याहृत्य ग्रन्थो योजनीय: ।

(४) उद्धृतकण्टकत्वं बाधसत्प्रतिपक्षादिशून्यत्वम्, आदिपदेन पक्षसपक्षसत्त्वादेपरिग्रह:, तथा चोद्धृतकण्टकत्वादिना=बाधशून्यत्वादिना रूपेणोपेता युक्तयोऽनुमानादि: रूपा: सद्युक्तय एवेत्यर्थ: ।

(५) युञ्जान:, योगीत्यर्थ: ।

मू० [a]"यथा च परिहृतचापल(१)मात्मतत्त्वामृतसरसि निमज्य रज्यति निरायासमेव मानसं तथाहमकथयं नैषधचरितस्य परमपुरुषस्तुतौ सर्गे,-इत्येषा [b]दिक्(२) ।

[c](३)अभीष्टसिद्धा(४)वपि खण्डनाना-
मखण्डि राज्ञामिव नैवमाज्ञा ।
तत्तानि कस्मान्न यथाऽभिलाषं
सैद्धान्तिकेष्यद्ध्वनि योजयध्वम् ॥ २१ ॥

तदे[d]तादृशीषु सर्वास्वपि दर्शनस्थितिषु काममस्माकीनाः खण्डनयुक्तयः प्रगल्भन्ते, [e]यासामीश्वरपरवशां विश्वव्यवस्थामनास्थाय निरसनमशक्यं [f]तासामेवावतारणार्थमयं प्रावादुकप्रवादोपन्यासः । [g]तथाहि-यदि शून्यवादानिर्वचनीयपक्षयोराश्रयणं, तदा तावदमूषां निराबाधैव सार्वपथीनता ।

टी० ॥ ननु चेनसो वृतिव्यावृतिरेवाशक्या, भोगस्पृहाया नित्यं जागरूकत्वादित्यत आह-। [a]"यथा चे"ति ॥ [b]"दिगि"ति । अनेन पातञ्जलाद्युक्तयोगाद्युपायं सूचयति ॥

नन्वेवं मुमुक्षुमात्रोपासनीयता ग्रन्थस्य स्यात्, तथाच "लोकेषु दिग्विजयकौतुकमातनुध्वमि"त्युपक्रमविरोध इत्याशङ्क्य तदपि फलमव्याचिनोति-। [c]"अभीष्टे"ति । चित्यानित्यवि-

(१) यथा च परिहृतचापलं मानसं निरायासमेव रज्यतीति सम्बन्धः ।

(२) इत्येषा दिक्, "अद्वैतसाधने",-इति शेषः ।

(३) { वादजल्पवितण्डासु कथासु त्रिविधास्वपि
प्रचारः खण्डनोक्तानां युक्तीनामत्र कथ्यते ॥ २१ ॥ }

(४) अभीष्टसिद्धावपि खण्डनानामाज्ञा राज्ञामाज्ञेव मया नाखण्डि, तत् (=तस्मात्कारणात्) तानि (=खण्डनानि) सैद्धान्तिकेष्वध्वनि (=तत्तत्सिद्धान्तावलम्बिनैयायिकादिमतेऽपि) यथाभिलाषं कस्मान्न योजयध्वमिति सम्बन्धः ।

चारेपि खण्डनयुक्तीरवतार्य्य विजयादिक फलमासादनीयमित्यर्थ. ॥ "एतादृशोऽवपी"ति । रक्षणीयमिद्धान्तास्वर्पोत्यर्थ ॥ प्राग्लभ्यमेवाह—। "यामामि"ति । 'इदमित्थमेवे'ति यदीश्वरः कश्चिदाज्ञामात्रेण विश्व व्यवस्थापयति तदा परममूर्षा निरमन नान्यथेत्यर्थ । यद्वा, ईश्वरः=ब्रह्म, तत्परवशामात । यावद् "ब्रह्मैवेद सर्वमि"ति विश्व न व्यवस्थाप्यते तावत्तामूर्षा निराम इत्यर्थः ॥ "तामामि"ति । खण्डनयुक्तीनामवतारणार्थम्=अवतारस्थल(१)ज्ञापनार्थम्, अयम्=अग्रेतन., प्रावादुकाना=माध्यमिकादीनां, प्रवादस्य=दर्शनस्योपन्यास इत्यर्थ ॥ विशेषदर्शना पन्यासमेवाह—। "तथाही"ति । दर्शनानि=शून्यत्वाऽनिर्वचनीयत्वादीनि ॥

मू० "यदि तु प्रमाणादिसत्ताभ्युपगन्तृमतावलम्बनं, तदापि लक्षणखण्डनयुक्तीनां लक्षणविशेष(२)खण्डने, 'लक्ष्यखण्डनयुक्तीनां च तद्विषयप्रमाणादिविशेषखण्डने, 'प्रत्येकं तात्पर्यम् । * 'नच सौत्रादिलक्षणखण्डनेऽपसिद्धान्तापत्तिः*, 'तादृश्याः सूत्रादिव्याख्यायाः खण्ड्यमानत्वात् । * 'न च वाक्यं लक्षणविशेषवस्तुव्यवस्थापकप्रमाणविशेषसूत्रादिव्याख्याविशेषखण्डनपरत्वेन लक्षणान्तरं, प्रमाणान्तरं, व्याख्यान्तरं च, वाच्यं प्रसज्येत भवतोपीति*, "वितण्डाकथालम्ब्य खण्डनानां वक्तव्यत्वात्, तत्र च व्यावृत्य स्वपक्षनिर्वाहं प्रति पर्य्यनुयोगानवकाशात् ।

टी० ॥ नन्वनिर्वचनीयत्वादौ खण्डनयुक्त्यवतारेपि सैद्धान्तिकाऽन्वयोजनं न जानमत आह—। "यदि त्वि"ति । प्रमाणादिमत्ताभ्युपगन्तारः— सिद्धान्तिनस्तेषामपि परस्परं कथायां

(१) अवतारस्थलत्वं च खण्डनयुक्तिप्रतिपादकत्वेन न तु खण्डनयुक्तिभिः खण्डनीयत्वेनेति बोध्यम् ।

(२) लक्षणविशेषप्रमाणविशेषादिकं पराभिमतलक्षणप्रमाणादिकम् ।

लक्षणविशेषखण्डनार्थमवतारः संभवत्येवामूषामित्यर्थः ॥ नन्वत्र न लक्षणमात्रखण्डने युक्तयः सन्ति, किंतु लक्ष्याण्यपि प्रमाणादीनि खण्डितान्येव, तथाच तद्युक्तीनां सिद्धान्तिभिरवतारणेऽपसिद्धान्तापत्तिरित्यत आह– [b]"लक्ष्ये"ति । येन प्रमाणेनैकस्तत्त्वं व्यवस्थापयति तत्खण्डनमेव लक्ष्यखण्डनं, नतु लक्ष्यस्य प्रमाणान्तरेणा(१)पि सिद्धिरनपेक्षिता येनापसिद्धान्तः स्यादित्यर्थः ॥ [c]"प्रत्येकमि"ति । कथकयोः प्रत्येकमित्यर्थः ॥ ननु लक्षणविशेषोपि मौत्र एव, तथाच तन्मात्रमतानुसारिणा तत्खण्डने कथं नापसिद्धान्त इत्यत आह–। [d]"नचेति ॥ [e]'तादृश्या" इति । यादृश्याः प्रकृते खण्डनीयं लक्षणं पर्यवस्यतीत्यर्थः ॥ [f]"नचे"ति । लक्षणसामान्यस्य, लक्ष्यस्वरूपस्य, सूत्रव्याख्यायाश्च, तन्मतानुसारिभिरवश्यं रक्षणीयत्वादिति भावः(२) ॥ [g]"वितण्डे"ति । वितण्डायाः प्रतिपक्ष(३) स्थापनाहीनत्वेन खण्डनानन्तरं तत्र लक्षणादीनां व्यवस्थापनीयत्वाभावादित्यर्थः ॥

मू० [a]एवं च सति वादिदर्शनमाश्रित्यापि खण्डनप्रयोगो निर्बाध एव, एकदेशिवत् प्रत्यवस्थातुं शक्यत्वात् । [b]वैयाक(४)रणानामिव च शब्दसिद्धिप्रश्नस्य परकीयतत्त्वज्ञानानिरूपणार्थं समानपक्षस्थित्यापि पर्यनुयोगसांव्यवहारिकतायाः संभवात्, [c]वस्तुस्थितिं कुर्वाणेन च विचारकेणाऽवश्यमेता युक्तय उद्धरणीयाः(५),

(१) प्रमाणान्तरेण=स्वाभिमतप्रमाणेन । (२) 'लक्षणान्तरादिकं वाच्यं प्रसज्येत भवतोपी'तिवादिनः पूर्वपक्षिणो भावइत्यर्थः (३) प्रतिपक्षः = वैतण्डिकस्य स्वपक्षः । (४) यथा गवादिशब्दानां सिद्धत्वसंप्रतिपत्तावपि परकीयज्ञानपरीक्षार्थं तत्साधनप्रकारनिराकरणार्थं च 'कथमयं गोशब्दःसिद्धः'?–इतिप्रश्नो दृष्टस्तथा साध्यार्थसंप्रतिपत्तावपि तत्साधनविशेषनिराकरणार्थं परकीयतत्त्वज्ञानपरीक्षार्थं च बोद्धसंव्यवहारसिद्धताया: सम्भवादिति समग्रपङ्क्त्यर्थः । (५) युक्तीनामुद्धारश्च खण्डनयुक्तिभिरेवेति वादेपि खण्डनयुक्तीनां प्रवेश इति भावः ।

अन्यथा वस्तुस्थितेरशक्यत्वादिति [d]वादेपि प्रयोगः संभवत्येव खण्डनयुक्तीनाम् । [e]जल्पस्त्वेकाकथा न संभवत्येवा[f]ऽसामयिकी(१),वितण्डाद्वयशरीरत्वात् ।

टी० ॥ दर्शनभेदेन समानलक्ष्यलक्षणयोर्वादिनोः खण्डनावसरमभिधाय दर्शनाभेदेनापि तदवतारमाह—। [a]"एवं चे"ति । स्वपक्षनिर्वाहं प्रति पर्यनुयोगानवकाशे सतीत्यर्थ ॥ अभिन्नदर्शनयोः कथायां दृष्टान्तमाह—। [b]"वैयाकरणानामिवे"ति ॥ ननु तत्रतत्रावतरन्तु नाम खण्डनयुक्तयः, स्थापनावादिना तु नासामुपेक्षैवोचिता, तथाच किमनेनावतारेणेत्यत आह—। "वस्तुस्थितिमि"ति ॥ वादे संभवमाह—। [d]"वादेपी"ति । वस्तुस्थितिमित्यत एकैवेय फक्किका(२) ॥ ननु जल्पे स्वस्वपक्षस्थापनाया आवश्यकत्वात् कथमेषां स्वपक्षव्याघातपराहतानामवतार इत्यत आह—। "जल्पस्त्वि"ति । एकेन स्थापनायां कृतायामन्येन तद्दूषणाभिधानमित्येका वितण्डा, द्वितीयेन स्थापनायां कृतायां प्रथमेन दूषणाभिधानमित्यपरा वितण्डा,ताभ्यां वितण्डाभ्यां चैको जल्पः संपद्यते, इति तत्रा(३)भिधानमात्रमित्यर्थ. ॥ ननु

(१) समयः = सङ्केत,स्तत्सिद्धा सामयिकी, तद्भिन्ना असामयिकी अपारिभाषिकीत्यर्थः । (२) "वस्तुस्थितिमि"त्यत आरभ्य "खण्डनयुक्तीनामि"त्यन्तमेकैव फक्किकेत्यर्थः ; एवं च सति व्याख्याकारस्य "वादे सम्भवमाह"—इत्यवतरणग्रन्थानन्तरं "वस्तुस्थितिमिति"—इति प्रतीकधारणं युक्तं न तु "वादेपीति", — इत्यनुमन्ये । अत एव च प्रगल्भमिश्रेण श्रीदर्पणे "वादेपि खण्डनयुक्तिसम्भवमाह — वस्तुस्थितिमिति" — इत्येवोक्तम् ।

(३) तत्र=जल्पे, अभिधानमात्रं=पृथक्कथात्वमभिधानमात्रमेव, न तु पृथक्कथात्वमित्यर्थः । यद्वा वादवितण्डयोः खण्डनयुक्तीनामवतारे प्रतिपादिते तत्समुदायरूपजल्पे पुनः पृथक्प्रतिपादनमभिधानमात्रं,—वृथा प्रलापमात्रमेवेत्यर्थः ।

स्वपक्षस्थापनाऽपरपक्षदूषणसामर्थ्ये यत्र(¹)द्वयोरपि निरूप्यं तत्र तथा जल्पः संभवत्येवेत्यत आह—। "असामयिकी"ति । समयाधीनतया कथाप्रवृत्तौ खण्डनानवतारेऽपि न क्षतिः, प्रमाणसिद्धकथाप्रभेदे खण्डनप्रागल्भ्यस्यापेक्षितत्वादिति भावः ॥

मू० "अन्यथा जल्पद्वयेनापि किमित्येका कथा न कल्प्यते, "अवोचाम(²) च जल्पविचारप्रस्तावे विस्तरेणैतदिति, 'जल्पकथयापि चाभिधाने स्वपक्षे(³)व्यावर्त्य सदोषस्यापि प्रमाणतयाभिधानं कृत्वातद्दोषोद्भावनकारीकमपि खण्डनयुक्तिमवतार्य्य बाधनीय इति जल्पेऽपि नात्यन्तमनवकाशाः खण्डनयुक्तयः ।

†कीदृश्यः पुनस्ताः ? । उच्यन्ते । तथाहि लक्षणाधीना तावल्लक्ष्यव्यवस्थिति लक्षणानि चाऽनुपपन्नानि, ज्ञानाधिकरणादिलक्षणनिरूपणद्वारेण(⁴) चक्रकाद्यापत्तेः ।

---

(१) यत्र=यस्मिन्काले, नतु यस्यां कथायामित्यर्थः; जल्पे जल्पाऽसम्भवेन "तत्र तथा जल्पः सम्भवती"त्युक्त्यनुपपत्तेः ।

(२) ननु वादस्यापि वितण्डाद्वयशरीरत्वेनाभावप्रसङ्ग इत्याशङ्क्याह—अवोचामेति, "वादस्य फलभेदेन वितण्डातो भेदो न जल्पस्य; तदभावादि"त्यादिकमवोचामेत्यर्थः । (३) स्वपक्षे सदोषस्यापि प्रमाणस्य सदोषाद्व्यावर्त्य = पृथक्कृत्य निर्दुष्टप्रमाणतयाऽभिधानं कृत्वा पुनस्तत्र दोषोद्भावनकारी पुरुषो यां काञ्चिद्युक्तिमवतार्य्य बाधनीय इत्यर्थः; "स्वपक्षे व्यावृत्य"—इतिपाठे तु जल्पकः पुरुषः स्वयं स्वपक्षे व्यावृत्त्येत्यर्थः । न तु तत्र पक्षव्यावृत्तिर्ग्राह्या ।

† नियमाल्लक्षणाधीना भवेल्लक्ष्यव्यवस्थिति. ।
प्राहुर्यं ताश्चिराचष्टे लक्षणस्यानिरुक्तितः ॥ ११ ॥
प्रमाया लक्षणस्यादौ निरुक्तिस्तत्र खण्ड्यते ।
अतिव्याप्त्यादिदोषोक्त्या प्रमामात्रानुवर्तिनी ॥ १२ ॥

(४) "ज्ञानाधिकरणादिलक्षणनिरूपणद्वारेण"—इति तु खण्डनभू-

टी० ॥ ननु जल्पः कथं तृतीयकथा समयमन्तरेणैव न संभवतीत्यत आह-। a"अन्यथे"ति । स्वपक्षद्वयस्थापनपरपक्षद्वयखण्डनशक्तिनिरूपणार्थं जल्पद्वयेन कथान्तरसम्भवादित्यर्थः ॥ b"अवोचामे"ति । ईश्वराभिमन्धाविति शेषः ॥ ननु दशरथदशाननयुद्धवत्काकोलूकयुद्धवच्च कृतविद्यकुमारद्वययुद्धमनुभवसिद्धमेव,(२) तथैव स्वपक्षरक्षणपरपक्षखण्डनफलकं कथान्तरं जल्पः किं न स्यादत(३)आह । c"जल्पकथयापी"ति । परपक्षदूषणाभिधानानन्तरं स्वपक्षे मद्धेतोरपरिस्फूर्तौ सदोषमपि प्रमाणमुपन्यस्य तद्दोषनिरासाय खण्डनावतारसम्भवात्, पुनः स्वपक्षस्थापनाव्यावृत्तेरभावादिति भावः ॥ तत्रादौ लक्षणसामान्यखण्डनयुक्तिमवतारयति-। d"लक्षणानि चे"ति । लक्षणेन हि गन्धवत्त्वादिना ज्ञाते लक्ष्ये पृथिवीस्वरूपेऽधिकरणे प्रतिबन्ध(४)बलेन व्यवहाररूपमितरभेदरूपं वा साध्यं साधनीयं तत्र लक्षणज्ञानमन्यलक्ष्यसाधारण्येन भवदप्यकिञ्चित्करमिति व्यावृत्ततया तज्ज्ञानमुपेयं, तद्यदि लक्षणव्यावृत्तिर्लक्ष्याधीना, तदाऽन्योन्याश्रयः, लक्ष्य परतन्त्रलक्षणान्तराधीनत्वे चक्रकं; लक्षणे लक्षणा_

षामणिकृद्रघुनाथविद्यासागरादिसंमतः पाठः । तदर्थन्तु किं ज्ञानम् ?-इतिप्रश्ने ज्ञानत्वयोगीति निर्वाच्यम्, पुनः किं ज्ञानत्वम् ?-इत्यनुयोगे, सुखाद्यवृत्तिरात्मविशेषगुणावृत्तिर्जातिरिति निर्वाच्यं, जातिरेव का इत्यनुयोगे च अनुवृत्तिज्ञानासाधारणं कारणमित्यभिधानीयमिति ज्ञानसिद्धौ जातिसिद्धिस्तत्सिद्धौ च तद्विशेषभूतज्ञानत्वस्य सिद्धिस्तत्सिद्धौ च ज्ञानसिद्धिरिति चक्रकम्; आदिशब्दात्तथैव ज्ञानसिद्धौ ज्ञानत्वसिद्धिस्तत्सिद्धौ च ज्ञानसिद्धिरित्यन्योन्याश्रयः; ज्ञानसिद्धौ ज्ञानसिद्धिरित्यात्माश्रयश्चेति; तथा लक्षणानि लक्ष्याधिकरणानि वाच्यानि ततश्च किमधिकरणमितिप्रश्ने इहप्रत्ययविषय इति कथनीयं, कः प्रत्ययः ?-इत्यनुयोगे च प्रत्ययत्वयोगीति वाक्यम्, किं प्रत्ययत्वमित्यनुयोगे च सुखाद्यवृत्तिरात्मविशेषगुणवृत्तिजातिविशेष इत्युत्तरं, क आत्मा ?-इति जिज्ञासायामात्मत्वाधिकरणं, पुनरधिकरणमिहप्रत्ययविषय इति चक्रकं, पूर्ववदेवान्योन्याश्रयात्माश्रयौ चेत्यादिः । (१) कृता = उपार्जिता पर्य्याप्ता वा विद्या यस्य तत्कुमारद्वयस्य तस्य च युद्धमनुभवसिद्धं यथा तथेत्यर्थः ।

(२) अतोऽजल्पस्य वितण्डातो भेदमङ्गीकृत्याहेत्यर्थः ।

(३) प्रतिबन्धः = व्याप्तिः ।

न्तरं तत्रापि लक्षणान्तरमित्यपरावृत्तावनवस्था; एवं भवदप्यकिञ्चित्करमिति । एवं जलादिसाधारण्येन ज्ञातायां पृथिव्यामितरभेदसाधनमकिञ्चित्करमिति व्यावृत्तायां तस्यां तत्साधनं वाच्यं, तद्व्यावृत्तिर्यदि प्रकृतलक्षणाधीना, तदाऽन्योन्याश्रयः; लक्षणान्तरेण चेत्तदा प्रकृतलक्षणानुपयोगः; तदपि लक्षणं व्यावृत्तायामेव तस्यामित्यधोऽधो धावन्त्यनवस्था । एवं प्रतिबन्ध(१)ज्ञानसाध्यज्ञानादावप्यूह्यम् । * ननु सर्वलक्षणखण्डनकृतः किमभिप्रेतं ? किं लक्षणसाध्यस्यार्थस्य व्यवहार एव नास्ति, सन्नपि वा निर्हेतुकः, सहेतुको वा लक्षणातिरिक्तहेतुकः, सर्वलोकसिद्धे लक्ष्यव्यवहारे लक्षणानुपयोगो वा, लक्ष्यलक्षणव्यवहाराणामनिर्वचनीयत्वं वेति तत्सर्वमनुपपन्नमनुभवविरोधात् * ?—इति चेन्न, वादिनोर्लक्ष्यलक्षणव्यवस्थाभिधाननिवर्तनस्याभिप्रेतत्वात्॥

सू० तेषु तावत् "'तत्त्वानुभूतिः प्रमा'-इत्यप्ययुक्तं, तत्त्वशब्दार्थस्य निर्वक्तुमशक्यत्वात् । तस्य भावो हि तत्त्वमुच्यते, 'प्रकृतं च तच्छब्दार्थः, न चा'त्र प्रकृतं किञ्चिदस्ति यत्तच्छब्देन परामृश्यते । "अथ* अनुभूत्या स्वसंबन्धिविषय आक्षेपाद्बुद्धिस्थः कार्यते, स तच्छब्देन परामृश्यते, वक्तृश्रोतृबुद्धिस्थतायामेव प्रकरणपदार्थविश्रामात्; तेन यस्यार्थस्य यो भावस्तत्तस्य तत्त्वमुच्यते इति *, न, 'अरजतादेरपि रजताद्यात्मनाऽनुभूतिविषयतासंभवादसत्यानुभूत्यव्यवच्छेदात् ।

(१) प्रतिबन्धः=व्याप्तिः । तत्तत्स्वरूपानुमित्युत्पादाद्व्याप्त्यनुमित्योरपि परस्परं व्याप्तिरेष्टव्या; एवं तस्या अप्यस्या, तस्या अप्यस्येत्यनवस्था; तथा साध्यस्येतरभेदादेरप्यनुमितेः प्राक् ज्ञानं न तावत्पक्षभिन्ने वक्तव्यं, केवलव्यतिरेकित्वभङ्गप्रसङ्गात्, किन्तु पक्षे पक्षैकदेशे एव वा वक्तव्यम्, तदपि पक्षे पक्षैकदेशे वा साध्यान्तरज्ञानपूर्वकमेवं तत्तदपीत्यनवस्थेत्यूह्यमित्यर्थः ।

टी० ॥ न्यायाचार्य(१)कृतलक्षणमालाग्रन्थे प्राथमिकं प्रमालक्षणं खण्डयितुमुपक्रमते—। [a]"तत्त्वानुभूतिरि"ति । प्रमाऽव्यवस्थितौ सर्वपदार्थाऽव्यवस्थितिरिति तल्लक्षणप्राथम्यं न्यायाचार्यस्य; प्रमालक्षणाऽव्यवस्थितौ सर्वपदार्थाऽव्यवस्थितिरिति तत्खण्डनप्राथम्यं खण्डनकृत: ॥ [b]"प्रकृतमि"ति । पूर्वोपक्रान्तमित्यर्थ: ॥ [c]"अत्रे"ति । आचार्यग्रन्थे प्रमालक्षणस्यैवादावभिधानमित्यर्थ: ॥ अनुभवस्य सविषयत्वनियमादनुभवपदेन विषयाक्षेपे अनुभवविषयगतधर्मानुभूति: प्रमेति सिद्ध्यतीत्याशङ्कते—। [d]"अथे"ति ॥ भ्रमेऽतिव्याप्त्या प्रत्याचष्टे—। [e]"अरजतादेरि"ति ॥

सू० [a]भवितु(१)रतत्त्वशब्दार्थत्वप्रसङ्गेन धर्म्यंशे विशिष्टे च प्रमाया अप्रमात्वापातात् । [b]अथोच्यते-* अवयवार्थचिन्तया दूषणाभिधानमिदं त्यज्यतां, यतोऽयं तत्त्वशब्द: स्वरूपमात्रवचन:*,-इति, एतदप्ययुक्तम्, [c]स्वरूपत्वस्य(३)जातेरुपाधेर्वा स्वात्मनि वृत्त्यवृत्तिभ्यामनुपपत्ते: । स्वरूपशब्दार्थस्यैकस्यासंभवेन प्रतिविषयव्यावृत्त्या लक्षणस्याऽव्यापकत्वापातात् । कथं च "तत्त्वे"तिविपर्यासादेर्निरास: ? । तथाहि-शुक्तौ यो रजतत्वप्रत्यय: सोऽपि स्वरूपबुद्धिर्भवत्येव ; नहि धर्मी(४)वा रजतत्वं वा न स्वरूपं, नापि तयो: प्रतिभासमान: संबन्धो न स्वरूपमिति युक्तम् । समवायो हि तयो: संबन्ध: प्रतिभाति, स च स्वरूपमेव ।

---

(१) न्यायाचार्य्य:=शिवादित्यमिश्र: । (२) भवितु:=भावस्य घटत्वपटत्वादेराश्रयस्य धर्मिण:, उपलक्षणं चैतद्विशिष्टस्यापि, तथाच धर्मिणो विशिष्टस्य चातत्त्वशब्दार्थत्वेन तत्प्रमायामव्याप्ति: ।

(३) स्वरूपत्वधर्माश्रयो हि स्वरूपं, तथा च स्वरूपत्वे स्वरूपत्वसत्त्वाऽसत्त्वाभ्यामात्माश्रयतत्प्रमाऽनुपग्रहयो: प्रसङ्गेन लक्षणानुपपत्तिरेवेत्यर्थ: । (४) धर्मी=शुक्ति: ।

टी० ॥ धर्मांशानुभूतेः प्रमात्वेपि धर्म्यंशविशिष्टांशप्रमानुपग्रहमाह–। [a]"धर्मितुरि"ति । धर्मिता=धर्मी ॥ ननु तत्त्वपदं स्वरूपे रूढं, तथाच धर्मधर्मितद्भूनां([1]) सर्वेषां स्वरूपतया तत्त्वपदवाच्यतया नाव्याप्तिरित्याशङ्कते–। [b]"अथे"ति ॥ स्वरूपत्वस्य स्वात्मनि वृत्त्यभ्युपगमे आत्माश्रयः, अनभ्युपगमे च तत्प्रमानुपग्रह इति प्रत्याचष्टे–। [c]"स्वरूपत्वस्ये"ति। यद्यपि स्वरूपत्वं=प्रमेयत्वं, तच्च केवलान्वयित्वात् स्ववृत्त्यपि, नचात्माश्रयः, प्रमाणतस्तथा प्रतीतेः; तदुक्तं "प्रमाणं शरणं वृत्तौ न भिन्नाभिन्नते यत([2])"–इति; तथापि "स्वरूपं प्रमेयमि"तिसहप्रयोगान्न तत् प्रमेयत्वं([3]), तत्त्वे वा प्रमाविषयानुभूतिः प्रमेतिपर्यवसाने पुनरात्माश्रयः, आकाशा([4])त्यन्ताभाववत्त्वं च न प्रमेयत्वं, तदविदुषोपि तत्प्रत्ययात्; न वाऽभिधेयत्वं तत्त्वं, भ्रमेतिव्याप्तेः; नच वस्तुत्वमेव तथा, तस्याऽर्थक्रियाकारित्वादिलक्षणस्याग्रे प्रत्याख्येयत्वात्; नच सत्तायोगित्वमेव स्वरूपत्वम्, अभावप्रमानुपग्रहप्रसङ्गादिति भाव. ॥

---

(१) प्रतियोगिताऽनुयोगिताऽन्यतरनिरूपकत्वसम्बन्धेन धर्मधर्म्युभयवत्ता तदुभयसम्बन्धस्य ज्ञेया, तथा च धर्मधर्मितत्सम्बन्धानामित्यर्थो निष्पन्नः । (२) यतो भिन्नाभिन्नते = भिन्नत्वाऽभिन्नत्वे, वस्तुनो वृत्तौ = वर्तने, शरणं = नियामके, न, तस्मात्प्रमाणमेव वृत्तौ शरणमित्यर्थः । प्रमाणबलात्स्वस्मिन्नपि स्वभिन्नेपि च स्ववृत्तिताङ्गीकर्तव्यैवेति भावः । (३) तत् = तस्य स्वरूपस्य, (स्वरूपनिष्ठमिति यावत्) प्रमेयत्वं नेत्यर्थः । यद्वा स्वरूपत्वं प्रमेयत्वं तदा स्याद्यदि स्वरूप प्रमेयं स्यात्सहप्रयोगदर्शनाच्च न स्वरूपं प्रमेयमतएव च न तत् = स्वरूपत्वं प्रमेयत्वमपीत्यर्थः । स्वरूपत्वस्य प्रमेयत्वे तु स्वरूपानुभूतिः प्रमेतिलक्षणस्य प्रमाविषयानुभूतिः प्रमेत्यर्थपर्यवसाने आत्माश्रय एवेत्यर्थः । (४) ननु स्वरूपत्वं प्रमेयत्वमेव, तच्च न प्रमाविषयत्वरूपं, किन्तु समनियतत्वादाकाशात्यन्ताभावो वा, ऽभिधेयत्वं वा, वस्तुत्वं वा, सत्तायोगित्वं वा, तत्स्वीकरिष्यते; इति नात्माश्रयो नापि च सहप्रयोगानुपपत्तिः, "प्राप्ते वसन्तसमये काकः काकः पिकः पिकः"-इतिवद्, घटादिशब्दार्थमजानतः शब्दान्तरेण घटः कलश इतिवद्वा तदुपपत्तेरितिविचिकित्सायामाह–आकाशेति । तदविदुषः=आकाशात्यन्ताभावमविदुषः, तत्प्रत्ययात्=स्वरूपत्वाभिन्नप्रमेयत्वप्रत्ययात् ।

मू० [a] *सत्यं, समवायः स्वरूपं, स एव तु शुक्तिव्यक्तौ रजतत्वस्य नास्ति ?*–इति चेत् [b] मैवम् तत्र नास्तित्वेपि स्वरूपताया अव्यावृत्तेः । नहि गेहे देवदत्तो नास्तीति स्वरूपं न स्यात् । *[c] न स्वरूपमात्रं तत्त्वमुच्यते, किंतुयद्देशकालसंबन्धि यत् स्वरूपं प्रतीतं तस्य तद्देशकालसंबन्धि स्वरूपं तत्त्वमुच्यते ?*,–इति मैवम्, [d] देशकालसंबन्धांशे प्रमाया अप्रमात्वापातात् । *तयोः स्वरूपमेव(१) तत्त्वशब्दार्थः ?*,–इति चेन्न, तत्त्वपदस्यानेकार्थत्वेन लक्षणाव्यापकतापत्तेः । [e] अथैवं ब्रूषे–* [f] यद्यथाभूतं प्रतीयते तत्तथा परमार्थतो व्यवस्थितं तत्त्वमुच्यते *? । नैतदपि युक्तम्, यद्यथाभूतं प्रतीयते तद्यदि प्रतीतिसमयमपहाय कालान्तरे तथाभूतं स्यात्तदाप्येवं तत्त्वं स्यादेवेति भाविपाकजरागः कुम्भः श्यामतादशायामपि रक्तपित्तिना रक्ततयोपलभ्यमानस्तत्त्वं स्यादिति तद्बुद्धेः प्रमात्वापातः । [i] 'यदा तदे'तिविशेषणप्रक्षेपणे च कालविशिष्टताप्रतीतेरप्रमात्वापातः । नहि कालवैशिष्ट्येपि कालान्तरसंबन्धः संभवी ।

टी० ॥ ननु शुक्तौ रजतत्वसमवायो न स्वरूपं, तत्राऽविद्यमानत्वादिति शङ्कते–। [a] "सत्यमि"ति ॥ स्वरूपत्वे च तत्र विद्यमानत्वमतन्त्रमित्याह–। [b] "मैवमि"ति ॥ ज्ञानोल्लिखितदेशकालसम्बद्धं स्वरूपमिह तत्त्वपदार्थ इति न भ्रमेऽतिव्याप्तिरित्याह–। [c] "न स्वरूपमात्रमि"ति ॥ देशकालयोर्देशकालसंबन्धाभावात् तदंशे प्रमानुपपत्तिमाह–। [d] "देशे"ति ॥ "अनेकार्थत्वेने"ति । देशस्वरूपं, कालस्वरूपं, देशकालसंबद्धं च स्वरूपं, प्रत्येकं तत्त्वमिति लक्षणाऽननुगमो दोष इत्यर्थः ॥ ज्ञानोल्लिखि-

(१) एवकारेण देशकालसम्बन्धव्यावृत्तिः,–शुद्धं स्वरूपमित्यर्थः ।

तत्प्रकारकत्वं विषयस्य तत्त्वमित्याशङ्कते—। "अथे"ति ॥ भावि-
रक्तरूपस्य घटस्य पूर्वं दोषवशाद् यत्र रक्ततया ज्ञानं तदपि
तथा सति प्रमा स्यादित्याह—। "यद्यपाभूतमि"ति ॥ ज्ञानकाले
ज्ञानोल्लिखितप्रकारकत्वं तत्त्वमित्याशङ्क्याह—। "यदे"ति । काले
कालवैशिष्ट्याभावेन तदंशप्रमाऽनुपग्रहापत्तिरिति भावः । यद्यपि
पाकरागात् पूर्वं 'घटो रक्त' इति प्रतीतिः प्रमैव, विषयाऽबा-
धात्; * तत्काले तद्बाध एव*—इति चेन्न, 'इदानीं रक्तः' इत्य-
प्रतीतेः; तथापि प्रवृत्त्यनुरोधादनुमितौ वर्तमानकालभानाव-
श्यकत्वेनाऽन्यत्रापि तत्कालभानमावश्यकम् । किञ्च, 'अयं
रक्तः'—इतिप्रतीतिः स्वविषयवर्तमानत्वविषया, अतीतानाग-
ताऽविषयत्वे सति प्रतीतित्वात्, 'घटो स्तो'तिप्रतीतिवदित्य-
नुमानाच्च 'रक्तो घटः'—इत्यादौ वर्तमानकालभानमावश्यक-
मित्यभिप्रायेणेति भवः ॥

सू० *"अन्योपाध्यवच्छिन्नः सोऽन्योपाध्यवच्छिन्नेन संभ-
नत्स्यति ? *,–इति चेत्, "तर्हि दण्ड्यपि देवदत्तः
कुण्डलिनं स्वमारोक्ष्यत्येव । * उपाधिभेदेऽप्युपधेय-
स्यैकत्वाऽनिवृत्तेर्नैवम् ? *,–इति चेत्तुल्यम् । "एतेन
कारणं(१)तत्त्वमिति निरस्तम्, "सर्वस्य तथात्वे प्रमि-
त्यभावेनात्माश्रयेण च प्रतिक्षण(२)विशिष्टविश्वाव-
श्यकारणत्वोपगमे दुरपवादार्थक्रियाकारित्वस्वरूप-

(१) अर्थक्रियां प्रति कारणमित्यर्थः, तथा चार्थक्रियाकारणानु-
भूतिः प्रमेति लक्षणस्य फलितोऽर्थः । भ्रमविषयस्याऽर्थक्रियाकारणत्वा-
भावेन न तज्ज्ञानेऽतिप्रसङ्गः । अत एव "वाचारम्भणं विकारो नामधेयं
मृत्तिकेत्येव सत्यम्"—इति श्रुतिरपि कारणस्यैव मृदादेस्तत्त्वरूपतां
कार्य्यस्य च घटादेरतत्त्वरूपतामाह । यद्वा, कारणं,–विषयविधया
स्वविषयकज्ञाने कारणमित्यर्थः; भ्रमज्ञाने विषयस्यैवासत्त्वेन ज्ञानकार-
णत्वाभावान्नातिप्रसङ्गः । (२) प्रतिक्षणविशिष्टं (=क्षणिकम्) यद्विश्वं
तत्प्रतियोगिककारणतायास्तदनुयोगिककारणताया वा वस्तुषूपगमे
खेनापवादो यस्या अर्थक्रियायास्तादृशार्थक्रियाकारित्वलक्षणं यज्ज-
गतः सत्त्वं तदङ्गीकारिणो जैनस्य चरणशरणे प्रवेश एव विडम्बना=वि-

सत्त्वलक्षणाङ्गीकारिजैनचरणशरणप्रवेशविडम्बना-
पादिदोषग्रासेन चेति ।

टी० ननु 'दिनस्य प्रहरो' 'रात्रेर्यामो' 'यामवती यामिनी'-त्यादिप्रतीतिदर्शनात् कालेपि कालवैशिष्ट्यमिति न तदंशप्रमानुपग्रह इत्याशङ्कते—। a"अन्ये"ति ॥ उपाध्यन्तरावच्छिन्नस्य कालस्योपाध्यन्तरावच्छिन्ने काले यदि वृत्तिस्तदा दोषमाह—। b"तर्ही"ति । कालोपाध्यन्तरस्य च कालोपाधिवृत्तौ किमायातं कालस्ये(१)ति दोषः ॥ c"एतेने"ति । कालप्रमाऽनुपग्रहप्रसङ्गेनेत्यर्थः । कारणत्वस्य नियतप्राक्कालवृत्तित्वरूपत्वात् काले च तदभावादिति भावः ॥ कारणतत्त्वे दोषान्तराण्यप्याह—। d"सर्वस्ये"ति । प्रमाणाभावाद्यदेव(२)न कारणं तत्प्रमायामव्याप्तिः, पारिमाण्डल्यादे(३)श्चरमध्वंसादेश्च त्वयैवाऽकारणत्वाभ्युपगमात् तत्प्रमायामव्याप्तेः, कारणत्वे कारणत्वाभ्युपगमे त्वात्माश्रयत्वात्तदंशप्रमायामव्याप्तिः, कार्यं च वस्तूनामन्यत् प्रतिक्षणभावि नास्तीति पूर्वबीजादेरेवोत्तरबीजादिकारणत्वं वाच्यं, तथा च बौद्धमतप्रवेशादपसिद्धान्तरूपविडम्बनापा[illegible]के दोष., तद्ग्रासश्चेति(४)दोषा इत्यर्थः । यदि च कारणत्वं [illegible]वच्छेदकरूपवत्त्व, [illegible] यदाकदाचि[illegible]ण(५)[illegible]सिद्धान्त इति, [illegible]

[illegible] पूर्वोक्तान्वयः । "[illegible]पातादिदोषग्रासेन च"—इत्यपि बहुषु पुस्तकेषु पाठः ।　(१) कालस्य कालाऽवृत्तित्वे किं तदुक्तं भवति ? न किञ्चिद्, इति कालप्रमाऽनुपग्रहो दोषस्तदवस्थ एवेत्यर्थः ।　(२) यदेव=कुसूलस्थबीजादिकमङ्कुरादिकं प्रति न कारणमित्यर्थः ।　(३) पारिमाण्डल्यम्=अणुपरिमाणम् । आदिपदेन महत्परिमाणस्यापि लाभः । चरमध्वंसः=यदनन्तरं कार्यान्तरं नोत्पत्स्यते तादृशप्रलयकालीनकार्यद्रव्यध्वंसः । आदिपदेनोत्पन्नविनष्टघटादेः सङ्ग्रहः ।　(४) तद्ग्रासो न पृथग्दूषणं ग्राह्यम् । इति दोषाः, एते चत्वारो दोषाः स्युरित्यर्थः ।
(५) कारणस्योपधानं=फलसम्बन्धः ।

त्वा(१)त्, कारणांश(२)प्रमानुपग्रहश्च, यदि च तदनुभवकारण-त्वमेव तत्त्व, तदाऽनुमानाद्यसंग्रह(३)इतिभावः । अत्र यद्यपि तत्त्व-मिथ्याज्ञान-विरूपादि(४)शब्दाः पामरादिप्रसिद्धार्था न व्याख्यानमपेक्षन्ते, विवेचयन्ति हि पामरा अपि—इदं तत्त्वमिदमतत्त्वमिदं स्वरूपमिदमस्वरूपमिति तदर्थप्रश्नः प्रष्टुरेव जाड्यमावेदयति, प्रसिद्ध्यनुरोधाच्च धर्मिस्वरूपे विषयतासमानाधिकरणे च धर्मे तत्त्वपदप्रयोगः, विषयताव्यधिकरणो धर्मोऽतत्त्व; तदेव हि रजतत्त्व शुक्तावतत्त्व, रजते तत्त्व, विषयतावैयधिकरण्यसामानाधिकरण्याभ्यां व्यपदिश्यते; "तत्त्वभाक्तयोर्नानात्वदर्शनाद्(५) अव्यभिचारः"-इत्यादौ तत्त्वपदस्यार्थान्तरस्यैव दर्शनाद्धर्मिस्वरूपे समानाधिकरणे(६) च धर्मे तत्त्वपद [illegible] इति तदंश(७)प्रामाण्यमिति नातिव्याप्तिर्वा धर्म्यंशप्रमायामव्याप्तिः, [illegible] स्वरूपपदस्यापि तत्रैव प्रयोग, इति न किञ्चिदनुपपन्नं, तथापि विचारकाणां न प्रसिद्धिमात्रानुरोध इति ॥

---

(१) ज्ञानलक्षणप्रत्यासत्तिजन्यशौक्तिकान्ताकरादिदेशस्थरजतज्ञाने विषयविधयारजतस्यापि कारणत्वात् । (२) कारणे कारणोपधानाभावात्कारणांशप्रमाऽनुपग्रह इत्यर्थः । यद्वा कारणे'ति भावप्रधानो निर्देशः,तथा च कारणत्वे कारणतावच्छेदकरूपवत्त्वाभावेन कारणत्वांशप्रमानुपग्रह इति पूर्ववदेव बोद्धव्यम् । (३) अतीतानागताद्यर्थविषयकानुमितौ विषयस्याऽकारणत्वेन तदसङ्ग्रह इत्यर्थः । (४) विगत रूपं यस्मात्तद्विरूपम् (अस्वरूपमिति यावत्) आदिपदेन स्वरूपस्यापि सङ्ग्रहः, एवं चाग्रे "इद स्वरूपमिदमस्वरूपमि"त्युक्तं साधु सङ्गच्छते । (५) आचार्येण "तत्त्वानुभूतिः प्रमे"तिलक्षणे प्रतिपादिते, पूर्वपक्षिणा च खाण्डनिकोक्तप्रकारेण तत्त्वपदस्य यौगिकार्थत्वमवलम्ब्याऽयथार्थानुभूतौ व्यभिचारे दर्शिते, आचार्य्य आह—"तत्त्वभाक्तयोर्नानात्वदर्शनाद् (अनेकार्थे रूढत्वदर्शनाद्) अव्यभिचारः' इति, तथा च व्युत्पत्तिसिद्धमर्थमादाय व्यभिचारोक्तिरसङ्गतैवेति भावः । (६) विषयतासमानाधिकरणे इत्यर्थः ।

(७) तदंशे, धर्म्यंशे इत्यर्थः । समुच्चित्योभयत्र रूढ्यङ्गीकारस्य फलमाह (तत्रापि प्रथमं विषयतासमानाधिकरणे धर्मे रूढ्यङ्गीकारस्य भ्रमज्ञानेऽतिव्याप्तिपरिहाररूपं फलमाह)—इति नातिव्याप्तिरिति, धर्मिमात्रे रूढ्यङ्गीकारस्य फलमाह—नवेति ।

मू० "किं([1])चेदमनुभूतित्वं नाम ?, ज्ञानत्वावान्तरजातिभेदो वा ?-१ स्मृतिव्यतिरिक्तज्ञानत्वं वा ?-२ स्मृतिलक्षणरहितज्ञानत्वं वा ?-३ [b]तदऽविदूरप्राक्कालोत्पत्तिनियताऽसाधारणकारणकबुद्धित्वं वा ?-४ । न तावदाद्यः । तथाहि-अनुभूतित्वं नाम जातिरेकाऽभ्युपगम्येति कुतः ? ।

टी० ॥ अनुभूतिपदस्य स्मृतिव्यावर्तकत्वं तदा स्याद्यद्यनुभूतित्वं स्मृतिव्यावृत्तं स्यात्तदेव तु नास्तीत्याह । "किंचे"ति ॥ [b]"तदविदूरे"ति । तस्य = ज्ञानस्याऽविदूरो ऽव्यवहितो यः प्राक्कालस्तन्नियता यदसाधारणकारणस्योत्पत्तिरित्यर्थः । अनुभवस्य यद् इन्द्रियसन्निकर्ष-लिङ्गज्ञान-शब्दज्ञान-सादृश्यज्ञानादि असाधारण कारणं तद् अव्यवहितप्राक्कालोत्पत्ति([2]), स्मृतेस्तु चिरोत्पन्न एव संस्कारोऽसाधारणं कारणं, मनःसंयोगस्तु नासाधारणमिति भावः ॥

मू० "*'अनुभवामी'तिप्रत्ययानुगमवशाद् ?* इति चेन्न, [c]माघमासीयनिशावसाने सिताऽसित सरित्संभेदस्नायिनः ([3])सत्यपि शब्दबलाद्भाविस्वकीय([4])स्वर्गसुखसंप्रत्यये 'सुखमनुभवामी'तिप्रतीत्यनुदयात्, [c]प्रत्युत शीतसंभेदसंभूतवेदनासंवेदनादेव; [d]परस्त्वयं

(१) { प्रसङ्गादनुभूतित्वं खण्ड्यतेऽत्र प्रघट्टके ।
जातितोपाधितोऽनुक्तगाऽनेकखण्डनयुक्तिभिः ॥ १४ ॥ }

(२) अव्यवहितप्राक्काले उत्पत्तिर्यस्य तत्तथा । (३) सिता श्वेतवर्णा सरिद् गङ्गा, असिता कृष्णवर्णा सरिद् यमुना, तयोर्यः सम्भेदः= सङ्गमः, तत्स्नायिनः (त्रिवेणीस्नायिन इति यावत्) । (४) क्वचित् 'स्वकीये'ति पदं न दृश्यते, परञ्चाग्रे व्याख्यायां "स्वकीयस्वर्गसुखसंप्रत्यये इत्यवक्तुतमि"त्याक्षेपदर्शनादावश्यकं तत् । संप्रत्ययः=अनुमानं, तच्च-अहं भाविस्वर्गसुखवान्भविष्यामि वेदविहितकारित्वादिन्द्रादिवद्व्यतिरेके नारकादिवच्चेति ।

संभुञ्जानस्यास्तिककामुकस्य शब्दाधीने सत्यपि भाविनरकगमनानुभवनीययातनाधिगमे(१) 'दुःखमनुभवामी'तिमतेरनुत्पत्तेः, प्रत्युता'ऽमन्दमानन्दं संविदन्(२)साम्प्रतमस्मी'तिप्रत्ययात् ।

टी० स्मृतिभिन्नेषु प्रत्यक्षानुमानोपमानशब्दप्रभवेषु 'अनुभवामी'त्यनुगतमतिसाक्षिकमनुभवत्वमिति शङ्कते—। [a]"अनुभवामी"ति ॥ माघे मिताऽमितस्नानफलत्वेनानुमीयमाने सुखे तदनुमितावनुभवत्वजातिसत्त्वे 'सुखमनुभवामी'त्यनुगतमतेरुदयप्रसङ्गान्नैवमित्याह—। [b]"माघमासीये"ति ॥ शीतदुःखस्यैव साक्षात्कारात्तत्र 'दुःखमनुभवामी'ति वैपरीत्यस्यैव दर्शनादित्याह—। [c]"प्रत्युते"ति ॥ पराङ्गनासङ्गमस्य फलं दुःखमित्यनुमितिरूपानुभवे 'दुःखमनुभवामी'त्यनुगतमतेरभावात् नैवमित्याह—। [d]"परस्त्रिय चे"ति । यद्यपि मिताऽमितस्नायिनः सुखानुभवो नास्त्येव, न वा पराङ्गनां भुञ्जानस्य दुःखानुभवः, किंतु शब्दात् सुखसाधनताऽनुभवः, दुःखसाधनतानुभवश्च, तत्र(३)'सुखमनुभवामि' 'दुःखमनुभवामी'ति वा कथमनुव्यवसायः स्यात्? व्यवसाये प्राधान्येन विषयीक्रियमाणस्यैवानुव्यवसाये ज्ञानविशेषणतयोल्लेखात्; 'सुखसाधनमनुभवामी'ति तु स्यादेव, यदि विषयान्तरसंचारो न स्यात्, तस्य(४)च "प्रत्युते"त्यादिना त्वयैवोपपादनात्; *तथानुभवभान(५)मावश्यकं,* तद्भानेपि तद्गतजातिभानस्यानावश्यकत्वाद्, अन्यथा सन्देहः क्वापि न स्यात्; तवैव वा कथं 'स्वर्गं जानामि' 'नरकं जानामी'ति वा नानुभवः, ज्ञानस्य त्वयाप्यभ्युपगमात्। *भवत्येव तत्र 'स्वर्गं जानामि'?*—इति

(१) अत्रापि पूर्ववदेवाधिगमोऽनुमानम्, तथाहि-अहं भाविनरकगमनानुभवनीययातनाकः, प्रतिषिद्धकारित्वाद्ब्रह्मघ्नादिवद्व्यतिरेके इन्द्रादिवच्चेति । (२) अमन्दम्=अनल्पम् (प्रचुरमिति यावत्) आनन्दं=सुखं, संविदन्=जानन्नस्मीत्यर्थः ।

(३) तत्र=सुखसाधनत्वानुभवे सति । (४) तस्य=विषयान्तरे बुद्धिसञ्चारस्य । (५) अनुभवत्वजातिपुरस्कारेणानुभवस्य भानमित्यर्थः ।

चेत्तर्हि 'स्वर्गमनुभवामी"ति भवत्येवेत्यवेहि । किंच, तत्रानुव्यवसायसामग्र्यां 'सुखमनुमिनोमी'त्येवानुव्यवसाये, विशेषोल्लेखतिरस्कृतत्वात् सामान्योल्लेखस्य, अन्यथा "गौरि"तिज्ञाने सत्त्व-द्रव्यत्वपृथिवीत्वादीनामनुव्यवसायोल्लेखः स्यात्, एव(¹) चैकोपकारके ग्राह्ये नोपकारा,स्ततोऽपरे दृष्टे तस्मिन्नदृष्टा ये तद्ग्रहे सकलग्रह इत्यप्यापद्येत । * तथाप्यनुमित्यादावनुभवत्वे किं प्रमाणम् ? *–इति चेत्, वह्न्याद्यनुमित्यादौ कदाचिद्वह्निमनुभवामीत्याद्यनुगतमतिरेव । निर्विकल्पके(²)एवानुभवत्वेनाभ्युपगम्यमाने कथमनुगतमतिभङ्गो न दर्शितः ?, किं "माघमासीयनिशावसाने" इत्यादिकादम्बरीगद्येन ?, तथापि प्रपञ्चान्तर्गतत्वे नैवानुभवत्वस्य खण्डितत्वादिति हृदयम् ॥

सू० "यदि तु शब्दोपदर्शितव्याप्तिजमनुमानमनुभव एव स्यात् तर्हि सुखं दुःखं चानुभवामीति तयोः प्रत्ययः स्यात् । अथ मन्यसे-*साक्षात्कारमनुभवार्थमनुरुद्ध्य तयोर्नैवमधिगमव्यवहारौ, शब्दजानुमानापेक्षौ तु विमर्शकस्य(³)स्यातामेव तौ *-इति,

टी० पूर्वग्रघट्टकेनानुव्यवसायाभावं व्यवस्थाप्य संप्रत्यनुव्यवसायमापादयति–। ""यदि त्वि"ति । तथाच नेष्टापत्तिरिति भावः । यद्वा, ननु "स्वर्गकामो माघे सितासिते स्नायादि"तिशब्देन सितासितस्नानं स्वर्गसाधनमितिमात्रं प्रतीतं, स्वसम्बन्धिता च तस्याऽऽनुमानिकी; तथाहि–सितासितस्नानं मम भाविस्वर्गजनकं, स्वर्गकामस्यैतादृशस्नानत्वादित्यनुमितेरन्तर्भावः; तथा च "सत्यपि शब्दबलाद्भाविस्वकीयस्वर्गसुखसंप्रत्यये"–इत्यस-

(१) गौरितिज्ञानेऽविषयाणां सत्त्वादीनामपि भानाङ्गीकारे गौरिति ज्ञानमेवैकमुपकारकं यस्य गोत्वलक्षणग्राह्यस्य तदुपरि न गौरितिज्ञानकृतोपकारसिद्धिः, तथा च तस्मिन्=गोत्वलक्षणे ग्राह्ये दृष्टेपि येऽपरेऽदृष्टा घटपटादयस्तेषामपि ग्रहणेन सार्वज्ञ्यप्रसङ्गः स्यादित्यर्थः । एकोपकारके ग्राह्ये नोपकारा इत्यस्य, एकं यदुपकारकं गौरिति ज्ञानं तत्र न ग्राह्योपकारकत्वसिद्धिरिति वाऽर्थः ।

(२) दोषान्तरमप्याह–निर्विकल्पके इति । (३) विमर्शकस्य=

क्तमत आह—। "यदि त्वि"ति। यत्र शब्दोपदर्शितपुरुषाभिप्राये(१) या व्याप्तिरिष्टसाधनत्वेन सह, सैव शब्दोपदर्शितव्याप्तिरित्यर्थः॥
[b]"अनुभवार्थमि"ति। अनुभवशब्दस्यार्थमित्यर्थः। यत्र सुखदुःखे साक्षात्क्रियमाणे नत्रैव तयोरनुभवामीतिप्रत्ययः सर्वसाधारणः, परीक्षकस्य तु तदनुमानयो(२)रपि तादृशः प्रत्यय इष्ट एवेति शङ्कार्थः॥

मू० [a]तर्हि साक्षात्कारिणि ज्ञानेऽनुभवप्रत्ययव्यवहारौ साक्षात्त्वनिबन्धनाविति तत्रानुभवत्वजातिकल्पनायां न प्रयोजनप्रमाणे, इत्यनुभूत्यर्थभेदाल्लक्षणाऽननुगमो दोषः। [b]अथ(३) * स्मृतिव्यावृत्तेन रूपेण यः प्रत्यक्षादिष्वनुभव इत्यनुगतावगमः स साक्षात्कारित्वादनुपपन्नः, ततश्च साक्षात्कार्यसाक्षात्कारिविशेषेषु साधारणमनुभूतित्वमन्यदेवैष्टव्यम्*—इत्युच्यते, तदपि न युक्तं, [c]पदार्थान्तरव्यावृत्तेन रूपेण यस्तदितरेष्वनुगतप्रत्ययस्तद्व्यवहारो वा तत्र तदेव(४)रूपं निमित्तं, नतु जातिः काचित्तदनुरोधात् कल्प्यते, तथा(५) सत्यनक्षपदार्थेभ्यो घटा-

विचारकस्य, तौ=अधिगमव्यवहारौ, स्यातामेवेत्यर्थः। (१) अत्र घटकत्वं विषयत्वं वा सप्तम्यर्थः तथाच पुरुषाभिप्रायघटकीभूता तद्विषयीभूता वा या व्याप्तिरिष्टसाधनत्वरूपेण साध्येन सह स्वर्गकाम्यैतादृशज्ञानत्वलक्षणस्य लिङ्गस्य सैव शब्दोपदर्शितव्याप्तिरित्यर्थो निष्पन्नः।

(२) तदनुमानयोः = सुखदुःखविषयकानुमानयोः। (३) "अनुभवोऽनुभव"—इत्यनुगतव्यवहारादिकार्य्यलिङ्गेन किञ्चित्कारणमनुमीयते, न तत्साक्षात्कारित्वमननुगमादतश्च साक्षात्कार्य्यसाक्षात्कारिसाधारणमनुगतव्यवहारकारणं कल्पनीयं, सानुभूतित्वजातिरेव परिशेषात्सिद्ध्यतीत्याशङ्कते—अथेति"—इति तु विद्यासागराः। (४) तदेव, इतरव्यावृत्तत्वमेवेत्यर्थः। (५) तथा सति=तत्कल्पने, अनक्षपदार्थेभ्यो घटादिभ्यो व्यावृत्तेनाऽनक्षभिन्नत्वादिना रूपेण पाणिविभीतकेन्द्रियादिष्वनुगताऽक्षत्वजातिकल्पनापि प्रसज्येतेत्यर्थः।

दिभ्यो व्यावृत्तेन रूपेण विभीतकादिषु साम्यावगमादक्षत्वादिजातिकल्पना प्रसज्येत ।

[†]इतोऽपि नानुभूतित्वं नाम स्मृतिव्यावृत्ता जातिः । [d]तथाहि-'घटः स एवायमि'ति तावत्प्रत्यभिज्ञा जायते, सा किं स्मृत्यनुभवरूपं ज्ञानद्वयम्?-१ एकमेव वा विज्ञानमंशे स्मृतिरंशे चानुभवः?-२ उत स्मृतिरेव?-३ आहोस्विदनुभव एव?-४ ।

टी० । [a]"तर्ही"ति । सत्यप्यनुभवत्वे व्यवहारार्थं साक्षात्त्वमवश्यापेक्षणीयं चेत् किमनुभवत्वेन? विमर्शकत्व तु साक्षात्त्वमन्तरेणाप्यनुमानादौ तद्व्यवहाराभ्युपगमेऽननुगम एवेति परिहारार्थः ॥ ननु साक्षात्त्वनिबन्धनमेव ना(१)नुभवामीति व्यवहारं ब्रूमः, किंतु स्मृतिभिन्नेषु ज्ञानेष्वनुभवव्यवहारो न विना जातिमित्याचक्ष्महे; सुखदुःखानुभवयोस्त्वनुभवामीतिव्यवहारः साक्षात्त्वैकार्थसमवायाधीन(२)इत्युक्तमिति शङ्कते-। [b]"अथे"ति ॥ तर्हि स्मृतिभिन्नज्ञानत्वमेव तत्रतत्र निमित्तमस्तु किमनुभवत्वेन? अन्यथा पाशविभीतकेन्द्रियादावप्येकमक्षत्वसामान्यमभ्युपगम्येतेत्याह-। "पदार्थान्तरे"ति ॥

सङ्करभयादप्यनुभवत्वं न जातिरिति दर्शयितुं प्रत्यभिज्ञाखण्डनमवतारयति-। [d]"तथाही"ति ॥

मू० [a]आद्ये, य एष प्रत्यभिज्ञायां प्रागवस्थाविशिष्टादिदन्ताविशिष्टस्याभेदः प्रकाशते स न स्मृतावन्तर्भावयितुं शक्यः, अननुभूतचरत्वेन संस्कारानु-

---

† प्रत्यभिज्ञात्मके ज्ञाने सङ्कीर्णत्वात्र सम्भवेत् ।
स्मृतित्वं वाऽनुभूतित्वं जातिरेतदथोच्यते ॥ १५ ॥
नृसिंहाकारवत्स्वप्रत्यभिज्ञानुभवात्मकम् ।
प्रत्यभिज्ञा नचास्त्येकं ज्ञानमित्यपि चोच्यते ॥१६॥

(१) न ब्रूमः-इति सम्बन्धः । (२) अनुभवत्वेन सह साक्षात्त्वस्य य एकस्मिन्ननुभवलक्षणेऽर्थे समवायस्तदधीन इत्युक्तं न्यायग्रन्थेष्विसर्थः ।

पनेयत्वात्(१) । [b]अत एव न तृतीयः । नाप्यनुभवेऽन्तर्भावयितुमसौ शक्यः, प्रत्यभिज्ञानकालेऽनुभवेन प्रागवस्थाया असंवेदनात्; [c]'संवेदने वा'ऽनुभव एवे' तिशेषपक्षेऽन्तर्भावः स्यात्, स चाग्रे दूष्यते । [d]अत एव न द्वितीयः । प्रागवस्थाविशिष्टाऽभिन्नत्वांशेऽनुभवत्वस्वीकारश्चेत् प्रागवस्थावैशिष्ट्यमप्यनुभवविषये एव निविष्टमिति चरमपक्षे प्रवेशः । [e]अथ * 'प्रागवस्थाविशिष्टादभिन्नः' इत्ययमर्थोऽप्यनेकांशः, तत्र 'प्रागवस्थाविशिष्टः'-इत्यत्रांशे स्मृतित्वम्, 'अभिन्नः'—इत्यंशे चानुभवत्वम् *,-इत्युच्यते ।

टी० । [a]"आद्य" इति । तत्तावैशिष्ट्यमात्रे संस्कारसामर्थ्येऽपि तद्विशिष्टाभेदग्रहे(२) तदसामर्थ्यादिन्द्रियस्यापीदन्ताविशिष्टमात्रग्रहसामर्थ्येऽपि(३)प्रतियोगिनस्तत्ताविशिष्टस्यानुपस्थितौ 'सोऽयमि'त्युभयाभेदावगाहनं न स्यादित्यर्थः ॥ अतिदेश्य(४)तत्सन्निधानसौकर्यात्स्मृतिरेवेति तृतीयं पक्षं निरस्यति—। [b]"अत एवे"ति । अभेदांशज्ञानस्य स्मृतावन्तर्भावयितुमशक्यत्वादेवेत्यर्थः ॥ [c]"संवेदने वे"ति । यदि तत्तेदन्ताविशिष्टस्यानुभवविषयत्वं, तदा 'अनुभव एवे'ति चतुर्थपक्षप्रवेश एवेत्यर्थः ॥ तन्मिश्राकारं प्रत्यभिज्ञानमिति प्राभाकरमतं निरस्यति—। [d]"अत एवे"ति । स्मृत्यंशानुभवांशाभ्यामभेदस्याऽसंस्पर्शादेवेत्यर्थः ॥ अभिन्नत्वमिदन्ताविशिष्टत्वं च द्वयमेवानुभवविषयो ननु प्राग-

---

(१) संस्कारानुपनेयत्वात्, संस्काराविषयत्वादित्यर्थः । (२) तद्विशिष्टाभेदग्रहे=तत्तावैशिष्ट्यविशिष्टेन सहेदन्ताविशिष्टस्याभेदग्रहे ।

(३) अत्र "ततः"-इति पदमध्याहृत्य ततोऽनुपस्थिताविति सम्बन्धः । प्रतियोगिनः=तत्ताविशिष्टस्येदन्ताविशिष्टेन योऽभेदस्तत्प्रतियोगिन इत्यर्थः । (४) अभेदांशज्ञानस्य स्मृतावन्तर्भावयितुमशक्यत्वलक्षणं यद्दूषणमतिदेश्यं, तत्सन्निधानस्य=तत्प्रतिपादनस्य, सुकरत्वादित्यर्थः ।

इदन्ताविशिष्टत्वमपीति नानुभवमात्रं प्रत्यभिज्ञेति शङ्कते-। c"अथे"ति ॥

मू० a"एवं तर्हि प्रागवस्थाविशिष्टः स(१), इदन्त विशिष्टो, ऽभिन्नश्चायम,-इति स्मृत्यनुभूतिभ्यामावेदितं भवति, b"प्रागवस्थाविशिष्टाश्रयतया त्वभेदः केनापि न प्रकाशित इति 'य एव प्रागवस्थाविशिष्टः, स एवायम्'—इति प्रत्यभिज्ञायाः शरीरं न स्यात् । * c'अथानुभवेन योऽसावनुभूयमानधर्म्माश्रयतयाऽभेदो बोधितः स कोट्यन्तर(२)मनालम्ब्य न पर्य्यवस्यतीति(३) केनचित्खलु कस्यचिदभेदो भवति, ततः स्मृत्यंशोपनीतमेव सन्निधानात् कोट्यन्तरं प्रागवस्थाविशिष्टरूपमालम्बते, इत्यभेदस्य प्रागवस्थाविशिष्टाश्रयतया सिद्धिरिति * । तदेतत्तुच्छतरम् । d"कोट्यन्तरमालम्बते इति किं कोट्यन्तराश्रितो भवति? (४),उत कोट्यन्तराश्रिततया ज्ञायते इति ?। नाद्यः । अभेदस्येदानीं प्रागवस्थाविशिष्टधर्म्माश्रयेणोत्पत्तौ पूर्वं प्रागवस्थाविशिष्टेदन्ताविशिष्टयोर्भेदः स्यात् । द्वितीये तु यदेव कोट्यन्तराश्रिततया इदन्तावच्छिन्नधर्म्यभेदस्य ज्ञानं तत् स्मृतौ नान्तर्भावयितुं शक्यं, नाप्यनुभवांशे, इत्युक्त एव दोषः ।

टी० ॥ विशकलितमेव प्रत्यभिज्ञानं स्यादिति परिहरति-। a"एवमि"ति ॥ तदेव विशदयति-। b"प्रागवस्थे"ति ॥ इदन्ता-

(१) स इति प्रागवस्थाविशिष्टोऽयमितीदन्ताविशिष्टोऽभिन्नश्चेति स्मृत्यनुभूतिभ्यामावेदितं भवतीत्यन्वयः । (२) कोट्यन्तरम्=तत्ताविशिष्टं प्रतियोगिनम् । (३) इतिशब्दो यस्मादित्यर्थे, यस्मात् केनचित्कस्यचिदभेदः=किञ्चिदनुयोगिकः किञ्चित्प्रतियोगिकोऽभेद इत्यर्थः ।
(४) कोट्यन्तराश्रितो भवति = कोट्यन्तराश्रिततयोत्पद्यते ।

विशिष्टधर्मिद्वयभेदोऽनुभूयमानः स्मर्यमाणतत्ताविशिष्टधर्म्मिप्रतियोगिक एव पर्यवस्यतीति न प्रत्यभिज्ञाया विशकलितत्वं, न वाऽनुभवमात्रत्वमिति शङ्कते—। "'अथे"ति ॥ प्रत्यभिज्ञानकाले तत्तेदन्ताविशिष्टाऽभेदपर्य्यवसानाभिधानं पूर्वं तयोर्भेदमाक्षिपतीति तत्तुच्छमेव; अथ, प्रत्यभिज्ञाकाले तयोरभेदो भासते एवेत्युच्यते, तत्र स्मृत्यंशानुभवांशाभ्यां प्रत्येक तज्ज्ञानमनुपपन्नमेवेत्युक्तमिति परिहरति—। "'कोऽप्यन्तरे"ति ॥

सू० "किंच, यदा च प्रभिज्ञानं "स" इत्यंशे स्मृतिः, "अयम्" इत्यंशे चानुभव, इत्येकं ज्ञानमभ्युपेयते तदा धर्मिणमादायापि स्मृत्यनुभवसङ्करो दुर्वारः । तथाहि संस्कारेण तत्तामात्रं चो(१)पनीयते ? तत्ताविशिष्टो वा धर्मी ? । आद्ये "स" इति प्रत्यभिज्ञायाः शरीरं न स्यात्, तत्तायाः केवलायाः संस्कारेणोपनीतत्वात् । नापि द्वितीयः । तथा सति 'अयमि'त्यनुभवांशेपि धर्मिप्रकाशो वक्तव्य एव, अन्यथा इदन्तामात्रप्रकाशे"ऽय(२)मि"ति तच्छरीरं न स्यात्, एवं च संस्कारस्य चेन्द्रियस्य च धर्म्मिप्रतीतिहेतोरुभयस्योपनिपाते किं विशेष्यांशे भिन्नाभ्यां ज्ञानाभ्यामुत्पत्तव्यम् ? उत कारणद्वयसम्भेदादभेदमात्रभाजा ज्ञानेन ? । प्रथमे प्रत्यभिज्ञानस्यैकज्ञानव्यक्तिताभ्युपगमव्याघातः, भेदपक्षोक्तदूषणापातश्च । द्वितीये धर्म्यंशे प्रत्यभिज्ञायां स्मृतित्वमप्यनुभवत्वमपीत्यनुभूतिस्मरणसङ्कर इति विषयव्यवस्थयापि नियमो भग्नः ।

(१) चकारो वाकारार्थे । (२) अयमित्येवंरूपेणेदन्ताविशिष्टतया धर्मिण उपस्थितिर्न स्यादित्यर्थः ।

टी० नरसिंहाकारं प्रत्यभिज्ञानमित्यत्र दोषान्तरमाह—। [a]"किञ्चे"ति। प्रत्यभिज्ञायां स्मृतित्वानुभूतित्वयोर्विषयांशावच्छेदभेदेन वृत्तिर्वाच्या, तत्र तत्तेदन्तयोर्विषययोरसाङ्कर्येण कपिसंयोगं(१)प्रति शाखामूलयोरिवावच्छेदकत्वमस्तु, तद्व्यविशिष्टस्तु धर्मी द्वाभ्यां स्मृत्यंशानुभवांशाभ्यां विषयीकर्त्तव्य, इति (२)द्वयमप्यवच्छिन्द्यादिति धर्मिविषयतया स्मृतित्वानुभूतित्वसङ्करो दुर्वारः स्यादित्यर्थः। संयोग(३)प्रतिबन्दी तु न भवति, तस्यापि खण्ड्यमानत्वादिति भावः॥ [b]"भेदपक्षोक्तदूषणापात"इति। अभेदस्योभयोरेकेना(४)प्यविषयीकरणम्–इति दूषणमित्यर्थः॥

सू० "अथोच्यते* मा भूद्विषयोपाधिभेदाद्व्यवस्थानमुपाध्यन्तरात्तु भविष्यति, तद्यथा:-संस्कारजत्वमादाय स्मृतित्वव्यवस्थितिरिन्द्रियसन्निकर्षजत्वमादाय चानुभवत्वव्यवस्थानम्, इति विरोधपरिहारोऽस्तु*। [b]न। प्रमात्वसामान्यानङ्गीकारे प्रमारूपताया विषय(५)व्यवस्थित्यैवोपगमेनोपाध्यन्तरोपन्यासेऽपि स्मृतित्वानुभूतित्वयोरेकस्मिन्नेव धर्मिण्यर्थे निवेशात् प्रमात्वाप्रमात्वयोरेकविषयतैव(६)। [c]किंच, ज्ञानविकल्पानामध्यात्मं भावाभावसंवेदनात् स्मृतित्वानु-

(१) कपिसंयोगतदभावे प्रतीति तु परमार्थः। (२) इतिहेतोः द्वयम्—धर्मी द्वयम् = स्मृतित्वमनुभूतित्वं च, अवच्छिन्द्यात् = स्वनिष्ठावच्छेद्यतानिरूपितावच्छेदकत्वेन सम्पादयेदित्यर्थः (स्मृतित्वाऽनुभूतित्वोभयावच्छिन्नो भवेदिति यावत्) तथाचैकधर्म्यवच्छेदेन सङ्कर एवेति भावः।
(३) नन्वेवं संयोगतदभावयोरप्येको वृक्षलक्षणो धर्मी संयोगतदभावाभ्यामवच्छिन्नस्तथा च संयोगतदभावयोरपि मिथः साङ्कर्यं,-संयोगवति। प्रदेशे तदभावोऽधःवर्त्ति प्रदेशे च संयोग इति स्यादित्यत आह-संयोगेति। तस्यापि = संयोगस्यापि। (४) उभयोः स्मृत्यनुभवयोर्मध्ये एकतरेणापि (स्मृत्या, अनुभवेन वा) इत्यर्थः। (५) विषयव्यवस्थित्या=विषयतयाऽत्वातथात्वव्यवस्थया, उपाध्यन्तरोपन्यासे = इन्द्रियजत्वसंस्कारजत्वरूपोपाध्युपन्यासे। (६) "प्रसज्येत"-इति शेषः।

भूतित्वयोर्द्वयोरपि प्रत्यभिज्ञायां स्वतःप्रतिभासेन विषय(1)निरूपणव्यवस्थित्यनङ्गीकारे स्मृतित्वादेरिदन्तायामपि स्मृत्यवगमप्रसङ्गात् ।

टी० ॥ ननु स्मृतित्वानुभूतित्वयोरेकज्ञानसमावेशेपि संस्कारजत्वेन्द्रियजत्वाभ्यामवच्छेदकाभ्यामविरोधो भविष्यतीत्याह—। [a]"अथोच्यते"इति ॥ [b]"न। प्रमात्वे"ति । साक्षात्त्वादिना परापरभावानुपपत्त्या(2)प्रमात्वाप्रमात्वे न जाती, किं तर्हि? विषयतथात्वातथात्वनिबन्धनावुपाधी, तद्यदि स्मृतित्वानुभूतित्वयोर्विषयावच्छेदभेदेन वृत्तिर्न स्यात्तदा तयोः प्रमात्वाप्रमात्वयोरपि तथा(3) न स्याद्, इत्येकस्मिन्नेव विषये तज्ज्ञानं प्रमा चाऽप्रमा च स्यात्; नहि स्मृतिश्च नाऽप्रमा, यथार्थानुभवश्च न प्रमेत्यर्थः ॥ "किंचे"ति । ज्ञानविकल्पानां=ज्ञानवैचित्र्याणाम्, अध्यात्मम्=आत्मन्यधिकरणे, भावाभावसंवेदनात्=सद्रूपत्वसंवेदनात्, मानसेन प्रत्यक्षेण समुत्पन्नमात्रे प्रत्यभिज्ञाने विषयव्यवस्थामनपेक्ष्यैव तत्तेदन्तासामानाधिकरण्येन स्मृतित्वानुभूतित्वयोर्ग्रहणप्रसङ्ग इत्यर्थः ॥

सू० [a]"यदि च संस्कारजत्वमेव स्मृतित्वं, तदा तस्यैव विरोधे(4)ऽभिधीयमाने स एव विरोधसामञ्जस्यायोपाधिरुपन्यस्यते-इति नान्यस्य चेतसि निविशते(5)।

[b]अथा*ऽन्यत्स्मृतित्वं नाम*, तदाप्यनुपपत्तिः ।

(१) विषयेण निरूप्यते यासा विषयनिरूपणी, (विषयाधीनेति यावत्,) सा चासौ व्यवस्थितिश्चेति तथा, तदनङ्गीकारे इत्यर्थः । स्मृतित्वादेरित्यस्य पूर्वेणैवान्वयः, स्मृतित्वादेर्विषयनिरूपणव्यवस्थित्यनङ्गीकारे-इति । इदन्तायामपि स्मृत्यवगमप्रसङ्गात्, इदन्तायां स्मृत्या, तत्तायां चानुभवेन ज्ञानप्रसङ्गादित्यर्थः । (२) यदि साक्षात्त्वपेक्षया प्रमात्वं परं, तदा साक्षात्कारिणि भ्रमेपि प्रमात्वप्रसङ्गः; अथ प्रमात्वापेक्षया साक्षात्त्वं परं, तदा प्रमात्मकपरोक्षानुमित्यादावपि साक्षात्त्वप्रसङ्ग इति साक्षात्त्वेन प्रमात्वस्य परापरभावानुपपत्तिर्द्रष्टव्या ।
(३) तथा=अवच्छेदकभेदेन वृत्तिः । (४) विरोधे=साङ्कर्ये । विरोधसामञ्जस्याय = साङ्कर्यरूपदोषपरिहाराय । (५) 'आत्माश्रयादि'तिशेषः ।

'तथाहि-संस्कारजत्वं = संस्कारादनन्तरं नियमेन भावः, नियतत्वं च नानाव्यक्तिगतमेकं रूपं ग्राहकमक्रोडीकृत्या(१)संभवीति स्मृतित्वेनैव संस्कारजत्वं वक्तव्यं, तथाच संस्कारजत्वव्यवस्थितौ स्मृतित्वमुपाधिः, स्मृतित्वव्यवस्थितौ संस्कारजत्वम्,-इत्यन्योन्याश्रयः। "तस्मात् स्मृत्यनुभवसङ्करो दुर्वार एव।

'अपिच, स्मृत्यनुभवयोर्ये कारणसामग्र्यौ, ते प्रत्यभिज्ञायां मन्तव्ये ? न वा ?। न चेत्कथमंशतोपि स्मृतित्वमनुभवत्वं च प्रत्यभिज्ञानस्य ?। एवमेव(२) तथात्वेऽतिप्रसङ्गात्-स्मृत्यनुभूत्योः 'स एव सङ्करः। प्रथमे तु पृथगेव कार्य्योत्पत्तिप्रसङ्गः, प्रत्येकं स्वस्वकार्ये समर्थत्वात् सामग्रीभेदस्य कार्यभेदहेतुत्वेनावधारितत्वात्।

टी० ॥ ननु स्मृतित्वं न संस्कारजन्यत्वादन्यत्, तथाच संस्कारातीन्द्रियत्वे तदप्यतीन्द्रियमेवेति न तत्तेदन्तासाधारणेन स्मृतित्वानुभूतित्वयोर्ग्रहणप्रसङ्ग इत्याशङ्क्याह-। "“यदि चे”ति। प्रत्यभिज्ञायां केनावच्छेदेन संस्कारजत्वं ?, केन चेन्द्रियजत्वम् ?,-इत्येव विचार्यते, तत्र च संस्कारजत्वावच्छेदेन संस्कारजत्वं व्यवस्थापयितुमशक्यमित्यर्थः ॥ ननु स्मृतित्वं जातिर्वा, ततोऽन्यद्वा ज्ञानत्वमुपाधिर्वा, तदवच्छेदेन संस्कारजत्वं स्यादित्याह-। '“अथे”ति ॥ स्मृतित्वावच्छेदेन संस्कारजत्वं, तदवच्छेदेन प्रत्यभिज्ञायां स्मृतित्वम्,-इत्यन्योन्याश्रयमाह-। c“तथाही”ति ॥ d“तस्मादि”ति। तत्तांशेऽनुभवत्वमिदन्तांशेपि स्मृतित्वमिति कुतो नरसिंहाकारत्वमित्यर्थः ॥ सामग्रीभेदेन

(१) अक्रोडीकृत्य = अविषयीकृत्य। (२) एवमेव = संस्कारजत्वादिकमनादृत्यैव, तथात्वे = स्मृतित्वाद्यङ्गीकारे, ऽतिप्रसङ्गात् = स्मृतावनुभूतित्वस्याऽनुभूतौ च स्मृतित्वस्य साङ्कर्य्यप्रसङ्गादित्यर्थः।

कार्यभेदमाह-। [e]"अपिचे"ति ॥ [f]"स एवे"ति । सामस्त्येनैव प्रत्यभिज्ञायां स्मृतित्वानुभवत्वप्रसङ्ग इत्यर्थः ॥

सू० [a]अथ* यत्र([1])ते पृथग्जायेते तत्र पृथगेव कार्य्यं, प्रत्यभिज्ञायां तु तयोर्युगपज्जातत्वेन सम्भूय जननात् कस्चित्कार्योत्पत्तिः । [b]यद्यपि घटपटादिसामग्र्योर्नैवं दृश्यते तथापि तद्विलक्षणस्वभावत्वाद् [c]अनयोरीदृशत्वमुपपद्यते; [d]नहि एकस्य([2]), यादृक्, पदार्थस्य स्वभावस्तादृगऽन्यस्यापि सर्वस्य भवति, जगद्वैचित्र्यभङ्गप्रसङ्गाद् *-इति । नैतदस्ति । [e]यत्र हि मिलितत्वं तयोस्तत्र किं परस्परसहकारित्वमनयोरेष्टव्यं ? न वा ? । न चेत्, परस्परमेलनलक्षणो विशेषोऽनुपयोगी कार्यजननं प्रति, मिथः सहकारिभावविरहेणाऽप्रयोजकत्वात्; ततश्चाविशेषात्पृथगेव कार्य्यं प्रसज्येत । अथ परस्परसहकारित्वं तयोरिष्यते, तदाऽनुभवांशेपि संस्कारस्य व्यापारः, स्मरणांशेप्यक्षस्य, इति नियामकत्वाभिमतयोस्तयोरुभयांशे साधारण्यात् स्मृत्यंशेप्यनुभूतिरनुभूत्यंशेपि स्मरणमिति सुवज्रलेपायितं प्रत्यभिज्ञाया([3])मनुभूतित्वस्मृतित्वसङ्करेणेति । [f]नाप्यनुभव एवेतिपक्षः । [g]तथा सति तत्तावच्छिन्नस्याभेदाश्रयतायां न संस्कारो, नेन्द्रियसन्निकर्षश्चेति तदविषयत्वापातः ।

---

(१) यत्र ते=कारणसामग्र्यौ पृथग् = अन्योन्यनिरपेक्षतया जायेते = उत्पद्येते तत्र पृथगेव कार्य्यं जनयतः, प्रत्यभिज्ञायां पुनस्तयोस्संस्कारसंप्रयोगयोः संभूयान्योन्यसापेक्षतया जननात् = कार्योत्पादकत्वात्कस्चितस्य = मिलितस्यैव कार्यस्य स्मृत्यनुभवोभयरूपस्योत्पत्तिरित्यर्थः । (२) एकस्य पदार्थस्य यादृक्स्वभाव इत्यन्वयः ।

(३) प्रत्यभिज्ञायाम् = प्रत्यभिज्ञैकदेशयोः स्मृत्यनुभूत्योः ।

टी० ॥ सामग्रीद्वयसमाजादेकमेव कार्यमित्याह—। [a]"अथे"ति ॥ अन्यत्रापि तथाप्रसङ्गं वारयति—। [b]"यद्यपी"ति ॥ [c]"अनयोरि"ति । स्मृत्यनुभवसामग्र्योरित्यर्थः। ऐदृशत्वम्=एककार्यजनकत्वम् ॥ ननु कथमेवमित्यत आह—। [d]"नही"ति ॥ परस्परनिरपेक्षयोः सामग्र्योः समाजे कार्यभेदः, सापेक्षयोः समाजे कार्यावैचित्र्यं, वैचित्र्ये वा सामग्र्य(¹)प्रत्यभिज्ञानं स्मृत्याकारमनुभवाकारं च भवेदित्याह—। "यत्र ही"ति ॥ नैयायिकमतमास्कन्दति—। [f]"नापी"ति ॥ [g]"तथा सती"ति । संस्कारेन्द्रियाभ्यां मिलित्वा प्रत्यभिज्ञालक्षणोऽनुभवो जन्यते, तत्र तत्तावैशिष्ट्यांशे संस्कार, इदन्तावैशिष्ट्यांशे चेन्द्रियमस्तु कारणं, तत्ताविशिष्टोपरक्ताभेदांशे नैकस्यापि सामर्थ्यं, संस्कारस्य तदगोचरत्वादिन्द्रियस्य च तेन समसन्निकर्षादित्यर्थः। अभेदो हि नात्र स्वरूपमात्रं, किं नाम तत्ताविशिष्टप्रतियोगिकान्योन्याभावात्यन्ताभाववत्त्वं, तच्च प्रतियोगिघटितमूर्तित्वेन तदसन्निकर्षा(²)दसन्निकृष्टमेवेति भाव: ॥

सू० * [a]नच संस्कारद्वारा प्रत्यासत्त्या संबद्धविशेषणतया तद्ग्रहः * । क्वचित् 'सोऽयं नवे'ति [b]तर्हि संशयो न स्यात् । * [c]दोषवशात्तत्र तत्प्रकाशो, न संबद्धविशेषणत्वाद् ? *–इति चेत्, [d]विनापि संस्कारं दोषवशात्तदापत्तेः(³)। [e]वस्तुप्रकाशिनि च दोषत्वाचोयुक्तत्वनिरुक्तेः । [f]क्वापि तस्याऽवस्तुप्रकाशित्वाद्दोषत्वे कथमक्षादेरपि तन्न स्यात्। [g]विशिष्टत्वेन तथात्वस्य प्रकृतेप्यपरिहारः ।

(१) सामग्र्यं = सामग्रीनिष्पाद्यं समस्तमपि प्रत्यभिज्ञानमित्यर्थः; "समग्रमि"ति पाठे तु राजमार्ग एव समस्तमितिपदान्तरस्य तत्राऽकल्पनात् । यद्वा समग्रमेव सामग्र्यमिति स्वार्थे ष्यञ् । (२) तदसन्निकर्षात् = तेन प्रतियोगिना सममिन्द्रियस्याऽसन्निकर्षात् ।

(३) तदापत्तेः = संशयापत्तेः ।

टी० ॥ नन्विन्द्रियेणैव संयुक्तसंयुक्तसमवेतविशेषणविशेषणतया प्रत्यासत्त्या तदुपरक्ताभेदश्च भासतां, तथाहि—इन्द्रियसंयुक्तं मनः, तत्संयुक्त आत्मा, तत्समवेतः संस्कारस्तद्विशेषणं च घटः, तद्विशेषणं च तत्ताविशिष्टाभेदः,—इतिशङ्कां निरस्यति—। [a]"मन्वे"ति ॥ अनया प्रत्यासत्त्या सर्वत्र तत्तोपरक्ताभेदस्य प्रमैव स्यान्न तु संशय इत्याह—। [b]"तर्ही"ति । पूर्वानुभूते प्रत्यासत्तेः सत्त्वान्निश्चय एव स्यादननुभूते तत्तोल्लेखानुपपत्तेरित्यर्थः ॥ ननु दोषमाहात्म्यात्संशय एवोत्पद्यते, न निश्चयः,—इत्याह—। [c]"दोषे"ति ॥ संस्कारनिरपेक्षस्य दोषस्य तथासंशयकारणत्वेऽतिप्रसङ्ग—इत्याह—। [d]"विनापी"ति ॥ दोषान्तरमाह—। [e]"वस्तुत्व"ति । 'सोऽयं नवे'तितत्तेदन्ताविशिष्टाभेदस्य वस्तुनो भानात् कथं दोषस्तत्कारणं स्यादित्यर्थः ॥ ननु प्रकृतेन दोषेण यदि वस्तु प्रकाशितमेतावतैव कथमस्याऽदोषत्वं, यावता तेन पित्तादिना दोषेण 'पीतः शङ्खः'—इत्यादाववस्त्वपि प्रकाशितं प्रकृतसंशयस्यैव वा कोऽप्यन्तरमवस्त्वेवेत्याशङ्क्याह—। [f]"क्वापी"ति । क्वाचित्काऽवस्तुप्रकाशाधीनं यदि दोषत्वं तदेन्द्रियशब्दलिङ्गादीनामपि दोषत्वं भवेदित्यर्थः ॥ ननु पित्तादिविशिष्टस्येन्द्रियादेर्दोषत्वं, नतु केवलस्य, तथाच नागृहीतविशेषणा(१) न्यायेन पित्तादिकमेव दोषो, नत्विन्द्रियादिकमपीत्याशङ्क्याह—। [g]"विशिष्टत्वेने"ति । एवं सतीन्द्रियादिविशिष्टस्यैव पित्तादेरपि भ्रमजनकत्वेन दोषत्वमिति नागृहीतविशेषणान्यायादिन्द्रियादेरेव दोषत्वमायातं, नतु पित्तादेरित्यर्थः । तथात्वस्य=दोषत्वस्य, प्रकृतेपि—इन्द्रियादावपीत्यर्थः ॥

सू० [a]"नहि विनैव कुतोपि विशेषादस्याऽवस्तुप्रकाशिता,
[b]सत्यप्यर्थे दोषादवस्तुन एव प्रकाशे संशयात्प्रेक्षा-

(१) "नाऽगृहीतविशेषणा बुद्धिर्विशेष्यमुपसङ्क्रामति"—इतिन्यायेनेत्यर्थः ।

वत्प्रवृत्त्यादेरसम्भवापत्तेः। [c]*वस्तुविषयत्वेपि दोषादनिश्चयता? *-इति चेन्न। [d]वस्तुतस्तस्या(१)सङ्कीर्णत्वात्तस्य प्रकाशे तदेव संशयैककोटौ प्रकाशितमिति कुतस्तदनिश्चयता। [e]निश्चयार्थस्य च संशयकोटावखण्डने संशये तदभावाधिकग्राहित्वेपि निश्चयत्वस्याप्रत्यूहत्वादेव, अभावनिश्चयः कोट्यन्तरं केवलमधिकं स्यात्।

टी० ॥ ननु भवेदेव यदि पित्तादिकमिन्द्रियादिसाहित्येनैव भ्रमं जनयेदित्यत आह–। [a]"नही"ति। अस्य=पित्तादेर्दोषस्य, कुतोपि विशेषादिन्द्रियादेर्विना नावस्तुप्रकाशकत्वमित्यर्थ. ॥ ननु संशये विपर्यये वा धर्मी वस्तुभूतोऽस्तु, तथापि ताभ्यां(२)न स प्रकाश्यते, किंत्वलीकमेव किंचित्प्रकाश्यते, तथा चावस्तुभानात्तत्प्रकाशकयोस्तयो(३)र्जनकः स कथं न दोषः स्यादित्याशङ्क्याह–। [b]"सत्यप्यर्थे"इति। वस्तुमात्रं संशयस्य विषय–इतिजानतां प्रेक्षावतां क्वचिदपि संशयात् प्रवृत्तिनिवृत्ती न स्यातामित्यर्थः। यद्वा, वस्तुनो=धर्मिणोऽप्यभाने कुत्र संशयः प्रवर्तयेदित्यर्थः ॥ ननु प्रवृत्त्यनुरोधात्संशयस्यास्तु वस्तुविषयता, यत्पुनरयमनिश्चयाकारस्तत्र दोष एव तन्त्र, तथाच निश्चयप्रतिबन्धकत्वमेव दोषत्वमित्याह।– "वस्तुविषयत्वेपी"ति ॥ धर्मी तावन्न सङ्कीर्णः=न स्थाणुपुरुषोभयात्मा, किंत्वेकरूप एव, तथाच वस्तुतो यद्रूपो धर्मी तत्र संशयो निश्चयरूप एवेति क्वायमनिश्चयो येन निश्चयप्रतिबन्धकतया तज्जनको दोषः स्यादित्याह–। [d]"वस्तुत" इति ॥ ननु भवेदेवं निश्चयो यदि पुरुषे धर्मिणि पुरुषत्वमात्रमुल्लिखेदपितु स्थाणुत्वं पुरुषत्वाभावं वाऽवास्तवमधिकमुल्लिखन्न निश्चय इत्यत आह–।

---

(१) तस्य = धर्मिणः। (२) ताभ्याम् = संशयविपर्ययाभ्याम्।

(३) "अवस्तुमात्रप्रकाशकयोस्तयो"रित्यपि पाठः।

[e]"निश्चयार्थत्वे"ति । निश्चयस्य योऽर्थो विषयः—पुरुषत्वविशिष्टो धर्मी, स चेद्बाधकप्रत्ययेनाखण्डितस्तदा तत्र नायमनिश्चयो,ऽधिकं तु यद्भासते तत्राप्ययं विपर्ययरूपो निश्चय एवेत्यर्थः ॥

सू० [a]*जातिः संशयत्वं, तत्प्रयोजकश्च दोषः ? *—इति चेद्, [b]"इदं तद्वा न वे'तिसंशयकोट्यर्थनिर्द्देशसमन्वयेन वाशब्दप्रतीतिव्यवहारयोरभावापत्तेः। [c]'प्रतीत्या सह वाकारार्थसंबन्धे, 'प्रत्येमि न वे'तितदापत्तेः। [d]'वाकारार्थस्य प्रतीतिगतत्वेपि निश्चयत्ववत्(१) 'स्थाणुमानय पुरुषं वे'तिस्थाणुपुरुषगतपाक्षिकलोकव्यवहारानुपपत्तेः। [e]'तस्माद् वाकारार्थस्य ज्ञानधर्मत्वे साक्षात्कारित्वादिवद्विषयानन्वयापत्तिरेवेति ।

टी० ॥ नन्वेककोटिकनिश्चयाद्विरुद्धोभयकोटिकनिश्चयोप्ययं विजातीय एवाभ्युपगन्तव्यः, तथाच संशयत्वमेव तत्र जातिरिति तदवच्छिन्नज्ञानासाधारणकारणं दोष इत्याह—। [a]"जाति रि"ति ॥ संशयकोट्योरर्थौ स्थाणुत्वपुरुषत्वे, तयोर्निर्देशः(२)= स्थाणुशब्दः पुरुषशब्दश्च, तत्समन्वित(३)एव वाशब्दः प्रतीयते व्यवह्रियते च, तेन स्थाणुत्वपुरुषत्वयोरेवाऽव्यवस्थितत्वं वाशब्दार्थः, तथाच विषयवैलक्षण्यकृतमेव निश्चयात् संशयस्य वैलक्षण्यं, नतु जातिकृतमित्याह—। [b]"इदं तद्वे"ति ॥ ननु प्रतीतिगतमेवाऽव्यवस्थितत्वं वाशब्दार्थो, नतु विषयाव्यवस्थितत्वं वाशब्दार्थ(४)इत्यत आह—। [c]"प्रतीत्ये"ति ॥ अत्रैव दोषान्तर-

(१) यथा निश्चयत्वस्य ज्ञानधर्मत्वेनार्थनिर्द्देशकशब्देन समन्वयो नास्ति तथा वाकारार्थस्याऽव्यवस्थितत्वस्य ज्ञानधर्मत्वे स्थाणुर्वा पुरुषो वेत्यर्थगतत्वेन प्रतीतिर्न स्यादिति भावः । "निश्चयवदि"ति स्वपपाठः।

(२) निर्द्दिश्यतेऽर्थोनेनेतिव्युत्पत्त्या निर्द्देशपदस्य निर्द्देशकशब्दपरतामाह—निर्द्देश इति । (३) समन्वयः = सामानाधिकरण्यम्, तथाच तत्समानाधिकृत इत्यर्थः ।

(४) "वाशब्दार्थः"—इत्ययं प्रायः पुस्तकान्तरेषु पाठो नोपलभ्यते ।

माह । "'वाकारार्थस्ये"ति । संशयाद्विषये पाक्षिको व्यवहार इति वाकारार्थः । पाक्षिकत्वम्(=अव्यवस्थितत्व) विषयगतं, न तु ज्ञानगतमित्यर्थः ॥ "'तस्मादि"ति । यद्यव्यवस्थितत्वं (वाकारार्थः) संशयगतं स्यात्तदा यथा विषये साक्षात्त्वं नानुभूयते तथा संशयविषयेप्यव्यवस्थितत्वं नानुभूयेतेत्यर्थः ॥

यद्यपि ज्ञानगतेनापि ज्ञानत्वानुभवत्वसाक्षात्त्वादिना ज्ञातोऽनुभूतः, साक्षात्कृत, इति विषयोऽप्युपरक्तो गृह्यते, इति तद्वदेव संशयगतेनापि वाकारार्थेन विषयानुरञ्जनमस्तु, तथापि 'साक्षात्कृत' इति यथा तद्विषये सर्वत्र तदुपरागस्तथा धर्म्यंशेऽपि वाशब्दार्थोपधानमिह स्यादिति भावः । अत्र प्रसङ्गतो दोषखण्डनं, संशयखण्डनं, वाकारार्थखण्डनं च कृतं; तत्र यद्यपि प्रमाऽप्रमयोर्वैलक्षण्यदर्शनात्कार्यवैलक्षण्यस्य च कारणवैलक्षण्यप्रयोज्यत्वात् प्रमाकारणविलक्षणं कारणमवश्यमप्रमायामवगन्तव्यं, तच्च नेन्द्रियादि, उभयसाधारणत्वादित्यसाधारणं पित्तादिरेव तथा वाच्यम्, तस्य चाऽननुगतस्यापि तत्तदप्रमाप्रयोजकत्वं गृहीत्वा दोषवाचोयुक्तिः; प्रमाप्रतिबन्धकत्वेनाऽप्रमात्वावच्छिन्नकार्यताप्रतियोगिक([1])कारणतावच्छेदकरूपवत्त्वेन वा दोषपदशक्तिग्रहात्; स्व([2])प्रमां प्रति कारणत्वेऽपि पित्तादेर्विषयत्वातिरिक्तेन रूपेणाप्रमां प्रत्यसाधारण्यस्य विवक्षितत्वात्; एवं 'स्थाणुत्वेन पुरुषत्वेन वा न निश्चिनोमि धर्मिणं किंतु सन्दिहानोऽस्मी'ति निश्चयविलक्षणस्य सर्वलोकसिद्धस्य संशयस्य निश्चयत्वमापाद्यापलापयितुमशक्यत्वं; कारणस्यापि समानधर्मदर्शना([3])साधारणधर्म

(१) कार्य्यतानिरूपितकारणतेत्यर्थः । (२) ननु पित्तादेर्दोषस्य स्वविषयकप्रमाजनकत्वमप्यस्ति तत्कथमप्रमाजनकतावच्छेदकरूपवत्त्वेनैव तत्सिद्धिरित्यत आह-स्वेति । (३) समानो धर्मः स्थाणुपुरुषयोरुच्चैस्तरत्वादिः, तद्दर्शनेन स्थाणुर्वा पुरुषो वेति संशयः; असाधारणो धर्मः नित्येभ्योऽनित्येभ्यो व्यावृत्तं शब्दत्वं तज्ज्ञानतोऽपि भवति शब्दो नित्यो नवेति संशयः; वादिनोर्विप्रतिपत्त्यनन्तरं मध्यस्थस्य जायमानः संशयस्तु प्रसिद्ध एवेति । समानधर्मदर्शनाद्यन्यतमस्य प्रतिस्वमनुभवादिति सम्बन्धः ।

दर्शनविप्रतिपत्तीनामन्यानमस्य प्रतिरुद्धं निश्चयकारणविलक्षणस्याऽनुभवात्कार्ये च संशये विधिकोटिप्राधान्यं निषेधकोटिप्राधान्यं वाऽनुभूयमानमवश्यं वाच्यम्, वाकारार्थश्च विरोध एव, भवति हि 'स्थाणुर्वा पुरुषो वे'तिशब्दश्रवणानन्तरं स्थाणुपुरुषविरोधज्ञानं, विरोधप्रतिसन्धायिन एवैतादृशः शब्दप्रयोग इति; तथापि प्रपञ्चखण्डनयुक्तिरत्रापि गृहीतेति भावः ॥

सू० "*नच प्रत्यासत्तौ सत्यामपि प्रत्यासत्त्यपुरस्कारान्मनसा न ग्रहणं तत्र दोषवशा([1])दित्यस्तु* । दोषे सत्यपि वस्तुनः संस्कारेण, संस्कारस्यात्मना, तस्य मनसा, तस्य च बाह्येन्द्रियेण, प्रत्यासत्त्यपेक्षणे एव तदर्थप्रकाशनियमोपपत्तेः कः प्रत्यासत्त्यपुरस्कारस्त्वन्मते स्यात् ? । 'यदि तु संस्कारप्रत्यासत्तिमनपेक्ष्य तथा सन्दिह्यते तदाऽननुभूय 'प्रस्मृत्य वा तथा सन्दिह्येत । 'वस्तुतस्तु, मनसा([2])संस्काराग्राहिणा, चक्षुरादिना चात्माऽग्राहिणा, तादृशप्रत्यासत्त्या ग्रहणानुपपत्तेः([3])नियमेन ।

टी० ॥ ननु प्रत्यासत्तौ सत्यामपि तत्तानिश्चयो न भवति,

(१) दोषवशात्प्रत्यासत्त्यपुरस्कारान्मनसा न ग्रहणमित्यन्वयः । (२) तादृशप्रत्यासत्त्या तत्तावैशिष्ट्यं मनसा गृह्यते? चक्षुरादिना वा?, न तावन्मनसा, तस्यात्मग्राहकत्वेपि संस्काराग्राहकतया तद्विशेषणतत्तावैशिष्ट्यग्राहकत्वायोगात्, नापि चक्षुरादिना, तस्यात्मग्राहकत्वाभावेन तत्समवेतसंस्कारादिग्राहकत्वस्य सुतरामसम्भवादित्याह—मनसेत्यादिना । (३) यद्यपि "ग्रहणानुपपत्तेः नियमेने"त्येव प्रायः पुस्तकेषु पाठ उपलभ्यते तथात्यत्र प्रतिज्ञान्तरस्याप्रदर्शनात्सहेतुकप्रतिज्ञाप्रदर्शनपरेणैव "ग्रहणानुपपत्तिः नियमेन" इतिपाठेन भाव्यम्, "ईदृशप्रत्यासत्त्या ग्रहणानुपपत्तिनियमादि"ति तु "नियमेने"त्येतावन्मात्रस्यैव व्याख्याकृतोऽभिप्रायप्रदर्शनं, नतु समग्रपङ्क्तेरर्थस्य, इति व्याख्याकृतोऽभिप्रायाबोधविजृम्भित एव पाठप्रमादो लोकानामित्यालक्ष्यते । यथाश्रुतपाठदुराग्रहगृहीतान्तःकरणैस्तु प्रतिज्ञावाक्यमध्याहृत्य कथञ्चिद्योजनीयो ग्रन्थ इति श्रीमन्तो गुरुचरणाः श्री ६ राममिश्रशास्त्रिणः ।

दोषेण प्रत्यासत्तेस्तिरस्कृतत्वात्; साधारणधर्मदर्शनात्सन्देह एवेत्याह-। a"“नचे”ति । वास्तवी प्रत्यासत्तिः कथं दोषेण तिरस्करणीया ?, प्रत्युत तत्ताऽऽरोपार्थं पुरस्करणीयैव, स्मृताया एव तत्तायाः ‘सोय नवे’त्यत्रारोपादित्यर्थः । यद्यपि ‘इद रजतमि’त्यारोपे शुक्तित्वेन सह सतोपि संयुक्तसमवायस्य दोषेण तिरस्कारो दृष्टः, तथापि तस्यापि खण्ड्यत्वादिति भावः ॥ उक्तमेव द्रढयति-। b"“यदि त्वि”ति॥ c“प्रस्मृत्ये”ति । विस्मृत्येत्यर्थः ॥ संस्कारद्वारा संबद्धविशेषणतया प्रत्यासत्त्या तत्ताभाने ‘सोयं नवे’तिसंशयानुपपत्तिमुक्त्वा प्रकृते संबद्धविशेषणताप्रत्यासत्तिरेव न भवतीत्याह-। d"“वस्तुतस्त्वि”ति । “नियमेन”-इत्यन्तेयं फक्किका । ईदृशप्रत्यासत्त्या ग्रहणानुपपत्तिनियमादित्यर्थः ॥

सू० a"तदिन्द्रियाग्राह्याश्रयकप्रतियोगिकेतरस्य ग्रहणे स्वग्राह्यसंबद्धविशेषणतायाः प्रत्यासत्तित्वनियमात् ।

टी० ॥ अत्र हेतुमाह-। a"“तदिन्द्रिये”ति । ‘विशेषणताप्रत्यासत्तिः सर्वत्र स्वग्राह्यसंबद्धविशेषणतारूपैव भवति नत्वन्ये’तिनियमादित्यर्थः । प्रकृते च संस्कारो नेन्द्रियग्राह्य इति तद्विशेषणतया तज्ज्ञानं न संभवतीत्यर्थः ॥ ननु नेयं व्याप्तिः यद् विशेषणता स्वग्राह्यसंबद्धविशेषणतारूपैव भवति, घ्राणरसनाभ्यां गन्धरसविशेषाभावस्य घ्राणरसनाऽग्राह्येपि द्रव्ये विशेषणतया ग्रहणाद्, अत एनां(1)विशिनष्टि-। “तदिन्द्रियाग्राह्ये”ति। प्रतियोगिग्राहकेन्द्रियाग्राह्य आश्रयो यस्य स तदिन्द्रियाग्राह्याश्रयको गन्धरसादिः, स प्रतियोगी यस्य गन्धाद्यभावस्य, तदितरत् प्रमेयं यत्र विशेषणतया गृह्यते तत्रेयं व्याप्तिरिति न व्यभिचार इत्यर्थः । यद्वा, “नियमेने”त्यग्रे योजनीयम् । तदिन्द्रियाऽग्राह्येत्यत्र नियतं तदिन्द्रियाग्राह्यत्वं विवक्षितं, नतु कादाचित्कम् । अन्यथा चक्षुषा कदाचिद्भूतलादि न गृह्यते इति तदाश्रयस्य(2) घटादेरभावो विशेषणतया गृह्यमाणोपि तदिन्द्रियाग्राह्याश्रयकप्रतियोगिकेतरो न भवतीति सहचारदर्शनस्थलाभावाद् व्याप्ति-

(१) एनां=व्याप्तिम् । (२) तद् भूतलादि आश्रयो यस्येतिव्युत्पत्त्या तदाश्रितस्येत्यर्थः ।

परिच्छेदः (१) कुत्र स्यात्?, तथाच तदिन्द्रियाऽग्राह्यत्वं तदिन्द्रियस्वरूपायोग्यत्वं विवक्षितं, तच्च नियमपदान्तर्भावेन निर्वहतीति भावः। प्रतियोगिग्राहकेन्द्रियाग्राह्येऽधिकरणे यः प्रतियोगी समारोप्य निषिध्यते स एव तदिन्द्रियाग्राह्याश्रयकः प्रतियोगी, तस्य योऽभावस्तदितरत्रायं नियमः, तेन वायौ रूपाभावस्य चाक्षुषत्वमुपपद्यते। अन्यथा(२)घटादौ रूपाभावस्य रूपग्राहकेन्द्रियग्राह्याश्रयकप्रतियोगिकत्वेन तद्ग्रहेऽपि वायुविशेषणतया न स्यात्। "वायौ रूपाभावप्रतीतिर्लिङ्गजा?",-इत्यनुपपन्नमेव, सर्वत्र तथाभावप्रसङ्गात्। यदि अन्यत्र योग्यानुपलब्धिरिन्द्रियसहकारिणी,तदा प्रकृतेऽपि समानं, वायावपि रूपानुपलम्भस्य प्रतियोगिसत्त्वविरोधित्वात्। महतो रूपसमवाये ग्रहणावश्यम्भावात्। केचित्तु "नियमेन तदिन्द्रियाग्राह्यो यस्याश्रयः(३) स्वेतरोपलम्भकव्यतिरेकोपलम्भाविषयो, यथा परमाणौ पृथिवीत्वादि, नतु वायौ रूपादि, ततश्च तत्प्रतियोगीतरग्रहणे विशेषणतया व्याप्तिः"-इत्याहुः। यद्यपि घटादौ विशेषणतया तत्ताभानम-

(१) व्याप्तिपरिच्छेदः=व्याप्तेरवधारणम्। (२) अन्यथा, यत्किञ्चिदधिकरणकसमारोपितप्रतियोगीतरप्रतियोगिकाभावस्थले स्वग्राह्यसम्बद्धविशेषणतासत्यासत्त्वे नियमाङ्गीकारे-इत्यर्थः। (३) स्वशब्दो दृष्टान्ते पृथिवीत्वादिपरो दार्ष्टान्तिके त्वभावाश्रयत्वाभिमतवस्तुपरः। यथा पार्थिवपरमाणौ पृथिवीत्वं स्वस्मात्पृथिवीत्वादितरस्य महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वलक्षणस्योपलम्भकस्य व्यतिरेकेण चाक्षुषोपलम्भाविषयः नत्वेवं वायौ रूपादि स्वस्माद्रूपादितोऽतिरिक्तस्य महत्त्वलक्षणस्योपलम्भकस्य व्यतिरेकेण चाक्षुषोपलम्भाऽविषयः, किन्तु रूपादिव्यतिरेकादेव, एवमेव यस्याऽभावस्याश्रयः स्वस्मादतिरिक्तस्योपलम्भकस्य व्यतिरेकेणोपलम्भाविषयः स्यात्तदीयप्रतियोगीतरप्रतियोगिकाभावग्रहणे एव स्वग्राह्यसम्बद्धविशेषणतया व्याप्तिरित्यर्थः। रूपाभावपृथिवीत्वाभावयोरप्याश्रयौ, वाय्वाप्यपरमाणुलक्षणौ, भवतः स्वेतरोपलम्भकस्य महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य व्यतिरेकेण चाक्षुषोपलम्भाऽविषयावतस्तयोः स्वग्राह्यसम्बद्धविशेषणतासत्त्वेऽपि सन्निकर्षान्तरेणैव भानमित्यर्थः। यद्वा, यस्य=समारोपितप्रतियोगिनः, आश्रयः=आश्रयत्वेन संमतः,-इत्यर्थः। अस्मिन्नर्थेऽग्रे "तत्प्रतियोगीतरग्रहणे"-इत्यस्य तस्मात्प्रतियोगिन इतरप्रतियोगिकस्याभावस्य ग्रहणे-इत्यर्थः।

विरुद्धमेव, तथापि संस्कारविशेषणतया नावश्यं भानमित्यर्थः ॥

सू० "अन्यथाऽप्यपरमाणवादौ पृथिवीत्वादेरन्यत्र ग्राह्यतया निरस्तस्वरूपायोग्यत्वस्याभावो दूरादिभिर्गृह्येत । "नहीन्द्रियविहारदेशेषु निष्परमाणुकत्वनियमो युक्ताभ्युपगमः । 'शब्दाभावप्रत्यक्षतावादिनये श्रोत्रेन्द्रियविशेषणता सप्तमः सन्निकर्षः, नतु तत्र संबद्धविशेषणतेत्यतोपि न व्यभिचारः ।

टी० ॥ उक्तव्याप्तौ विपक्षबाधकमाह -। "'अन्यथे"ति । यद्यप्यभावग्रहे प्रतियोगियोग्यताबदधिकरणयोग्यतापि तन्त्रमिति प्रत्यासत्तौ सत्यामपि तद्विरहादेव न परमाणौ पृथिवीत्वाभावग्रह इति, तथापि शब्दाभावप्रत्यक्षतावादिमते नैतदिति भावः ॥ ननु पृथिवीत्वाभावेन संबद्धविशेषणतापि प्रकृते नास्तीत्यत आह-। '"नही"ति ॥ "तदिन्द्रियाग्राह्याश्रयके"त्यादिविशेषणव्युदस्तमपि व्यभिचारं प्रकारान्तरेणापि व्युदस्यति-। '"शब्दाभावे"ति । व्यभिचारनिरासेऽयमपि प्रकार इत्यपेरर्थः । 'सप्तम' इति सबद्धविशेषणतापेक्षया, विशेषणतया षष्ठ एव; शब्दसाक्षात्कारानुरोधेन यथा शुद्धसमवाय, प्रत्यासत्तिरेवं शब्दाभावसाक्षात्कारानुरोधेन विशेषणताया अपि शुद्धाया: प्रत्यासत्तित्वोपगमात् । संबद्धविशेषणताया एव यत्र ग्राहकत्वं तत्परं व्याप्त्युपदर्शनमिति भावः ॥

सू० * "नचात्मसंयुक्तमनः (१) प्रति "पूर्वानुभूतार्थात्म-

(१) वस्तुत एकैव ग्राह्यासत्तिर्विवक्षावशाद्ग्राह्यासत्तिग्राहकासत्तिभेदेन द्विधा विभज्यते; तत्रात्मसंयुक्तमनः प्रति (=आत्मसंयुक्तमनसा सह निरुक्तमनसो वा) संस्कारः (=संस्कारलक्षणा, अर्थात् मनः संयुक्तात्मसमवेतसंस्कारलक्षणा) ग्राहकासत्तिः, (=अर्थग्राहकेण संस्कारेण समं, निरुक्तसंस्कारस्य वा सम्बन्धः,) तथा आत्मसंयुक्तमनः प्रति पूर्वानुभूतार्थात्मप्रत्यासत्तिरपि (=पूर्वमनुभूतौ यावर्थात्मानौ तयोः प्रत्यासत्तिरपि) संस्कारः, (=संस्कारलक्षणा, अर्थात् मनःसंयुक्तात्मसमवेतसंस्कारविषयत्वलक्षणा) ग्राह्यासक्तिः,सोऽहमितिप्रत्यभिज्ञाया संस्कारः पूर्वानुभूतात्मप्रत्यासत्तिः सोयं घट इत्यत्र तु पूर्वानुभूतार्थप्रत्यासत्तिरितिविभागः ।

प्रत्यासत्तिरेव संस्कारः इति तदतीन्द्रियत्वं न दोषाय, प्रत्यासत्तेरतीन्द्रियाया इन्द्रियार्थसन्निकर्षस्यो(१)पगमादितिस्वीकृते निस्तारः*, "तथा सति "स"-इत्यंशे चक्षुरादेः प्रत्यासत्त्यभावात्प्रत्यभिज्ञाया अचाक्षुषत्वापातात् । "अयमि"त्यंशो दृगादिना, तदंश(२)स्तु मनसा, गृह्यतां, तदेतद्भेदस्तु केनेत्युक्तमप्यावर्तते इति । "एतेन 'संस्कारः सहकारिमात्रम् इन्द्रियस्यातिप्रसङ्गनिवारकः प्रत्यभिज्ञायां, तदर्थं (३)इन्द्रियेणासन्निकृष्ट एवोल्लिख्यते विभ्रमार्थवत्, सन्निकृष्टग्राहिता चेन्द्रियस्य सन्निकर्षसहकार्य्यवश्यम्भावमात्रं, तच्चेदमंशसन्निकर्षादेव स्यात्, नतु सर्वग्राह्यसन्निकर्षसहकारिता'-इत्यपि निरस्तम्, "सोयं(४)न वे'तिसंशयाभावापातेनैवेति ।

टी० ॥ ननु मा भूच्चक्षुषस्तत्तया सह संयुक्तमनःसंयुक्तात्मसमवेतसंस्कारविशेषणताप्रत्यासत्तिरपितु यथा घटेन सह चक्षुषः संयोगस्तथा मनसस्संस्कार एव प्रत्यासत्तिरस्त्वित्यत आह—। ""नचे"ति । संस्कारोऽसंबद्धः कथं मनःप्रत्यासत्तिः स्यादित्यत उक्तम्—"आत्मसंयुक्तमनः प्रती"ति । तथाच मनःसंयुक्तात्मसमवेतः संस्कारो मनःप्रत्यासत्तिरिति ॥ संस्कारग्राहकासत्ति(५)मभिधाय ग्राह्यासत्तिमाह—। ""पूर्वानुभूते"ति ॥ एवं शङ्कायां परिहारमाह—। "तथा सती"ति । एतावतापि चक्षुषा समं प्रत्यासत्तिर्नोपपादितेति प्रत्यभिज्ञायाश्चाक्षुषत्वं न स्यात्, प्रत्युत मानसत्वं स्यात्, तथाच विरोध इत्यर्थः ॥ ननु तत्तांशे मानसत्वमिदन्तांशे च चाक्षुषत्वमस्तु को विरोधः? इत्यत आह—।

(१) इन्द्रियार्थसन्निकर्षस्य प्रत्यासत्तेरतीन्द्रियाया उपगमादित्यन्वयः । इन्द्रियार्थसन्निकर्षाभिन्नप्रत्यासत्तेरतीन्द्रियत्वोपगमादित्यर्थः । (२) तदंशः, तत्तांश इत्यर्थः । (३) तदर्थः, तच्छब्दार्थ इत्यर्थः । (४) "एतेने"त्यस्यैवातिदेशमाह—सोयमिति । (५) संस्कारेणार्थग्राहकेण मनसः सम्बन्धमित्यर्थः ।

[d]"अयमि"ति ॥ ननु यावत्प्रत्येतव्येन्द्रियसन्निकर्षो न तन्त्रं, किंतु प्रत्येतव्येन्द्रियसन्निकर्षमात्रं, स चेदंशेनैव, तदंशस्त्वसन्निकृष्ट एवभासते, तत्रातिप्रसङ्गः सहकारिणा संस्कारेण वारणीय इत्याशङ्क्याह–। [e]"एतेने"ति ॥ [f]"सोयमि"ति । उक्तसामग्रीसत्त्वे निश्चय एव स्याद्, दोषस्य खण्डितत्वादिति भावः ॥

सू० [a]'तदद्राक्षमि'त्यादिस्मृतिरपि चैवमनुभवः स्यात्, मनस(१) आत्मसंयोगसहकृतादर्थात्मसन्निकर्षात्संस्काराज्जायमानायास्तस्या इन्द्रियार्थसन्निकर्षजत्वादेव; मनसात्मसंयोगादात्मसमवायेन प्रत्यक्षीक्रियमाणैर्ज्ञानादिभिः स्मर्यमाणस्यार्थस्याविशेषादिति । [b]एतेन 'तत्त्वावच्छिन्नप्रतियोगिकान्योन्याभावविरहः स्वरूपाभेदो वाऽयं भाती'(२)त्यपि निरस्तम् । अन्योन्याभावव्यतिरेकोऽन्योन्यमेव तत्तेदन्तोपाध्यवच्छिन्नयोः स्यात्, न च तन्मिलितमेकेन सुग्रहम् । एवं स्वरूपाभेदोपि तयोरैक्यं तदनवगाहिना दुरवगममेव । [c]संस्कारोपनीते च विषये यदि ज्ञानमनुभवः स्यात् स्मृतिरपि कुतो नानुभूतिः ? । [d]अथ* न संस्काराधीनत्वमात्रेण स्मृतित्वं, किंत्वनुभवकारणासंपृक्तसंस्कारजत्वेन, ततश्चाधिकार्थाक्षसन्निकर्षापेक्षं प्रत्यभिज्ञानमनुभव एव भवति, नतु स्मृतिः ? *–इति चेन्न ।

टी० ॥ संस्कारस्य प्रत्यासत्तित्वपक्षे सहकारित्वपक्षे च दोषान्तरमाह–। [a]"तदद्राक्षमि"ति । यथा 'जानामी'त्यनुभवः संयुक्तसमवायान्मानसस्तथा 'अद्राक्षमि'तिस्मृतिरपि संस्कारलक्षणात्सन्निकर्षान्मानसोऽनुभवः स्यादित्यर्थः ॥ [b]"एतेने"ति । यथा

(१) मनःप्रतियोगिकात्मसंयोगसहकृतात्पूर्वानुभूतार्थात्मसन्निकर्षाऽभिन्नात्तद्घटकाद्वा संस्काराज्जायमानायाः स्मृतेरिन्द्रियार्थसन्निकर्षजत्वादनुभवत्वं स्यादित्यर्थः । (२) 'इदन्त्वावच्छिन्ने'–इति शेषः ।

'सोऽयं, नतु तद्विधर्मे'तितद्वैधर्म्याभावः संस्कारेन्द्रियाभ्यां प्रत्येकं मिलित्वा चोपनेतुमशक्य (¹)एवं 'सोऽयं, न तदन्योन्याभाववान्'एवं 'न स्वरूपभिन्न' इत्यत्राप्यन्योन्याभावात्यन्ताभाववत्त्वं तत्स्वरूपाभेदो वा न ताभ्यामुपनेतुं शक्यमित्यर्थः ॥ संस्कारजत्वेपि यथा प्रत्यभिज्ञाऽनुभव एवं स्मृतिरप्यनुभव एव स्यादित्याह-। "'संस्कारे"ति । एतच्चाचार्यमतेन; वार्तिककारमते तु प्रत्यभिज्ञापि स्मृतिजन्या, न संस्कार जन्येति ॥ ननु संस्कारजन्यत्वमात्रं न स्मृतित्वप्रयोजकं येन प्रत्यभिज्ञापि स्मृतिः स्यादपित्विन्द्रियसन्निकर्षाजन्यत्वे सति संस्कारजन्यत्वं, तच्च प्रत्यभिज्ञायां नास्तीति न तस्याः स्मृतित्वमित्याह—। "'अथे"ति ॥

मू० "संस्काराऽसम्पृक्तानुभवकारणजत्वेनानुभवत्वं भवति प्रत्यभिज्ञानं तु संस्कारसहितानुभवकारणजं स्मृतिरेवेति वैपरीत्यं किं न स्यात्?। "'अन्यत्र न स्मृति(²)रनुभवकारणसम्पृक्तसंस्कारजन्या'-इति तु 'नान्यत्रानुभवोपि संस्कारसम्पृक्तार्थेन्द्रियसंप्रयोगजन्य'-इतिसाम्यादेवाबाधकम् । 'तदेवं(³)विनिगमनायां प्रमाणाभावात्, स्वयंकल्पितव्यवस्थावैपरीत्येनापि कल्पनासंभवात्, प्रत्यभिज्ञानमुभयकारणसंभवात् स्मृतिश्चानुभवश्चेति मन्तव्यम् । तथाच स्मृतिव्यावृत्तमनुभवत्वं जातिरस्तीति प्रत्याशा निरवकाशा ।

(१) संस्कारेण वैधर्म्याभाववतो धर्मिणः, इन्द्रियेण च तत्तायाः, अविषयीकरणादिति भावः । (२) स्मृतिरन्यत्राऽनुभवकारणसंपृक्तसंस्कारजन्या न,-इत्यबाधकम्, अन्यत्राऽनुभवोपि संस्कारसंपृक्तार्थेन्द्रियसंप्रयोगजन्यो न,-इतिसाम्यादेवेत्यन्वयः । (३) तदेवं (संस्कारजत्वात्प्रत्यभिज्ञानं स्मृतिस्तत संप्रयोगजत्वादनुभव इत्यत्र) विनिगमनायां प्रमाणाभावात्प्रत्यभिज्ञानं स्मृतिश्चाऽनुभवश्चेति मन्तव्यमिति सम्बन्धः । ननु केवलसंस्कारजत्वं स्मृतित्वस्य, अतिरिक्तकारणजत्वं चानुभवत्वस्य प्रयोजकमिति मत्कल्पनमेव नियामकमित्याशङ्क्य प्रतिकल्पनत्वान्नैवमित्याह-स्वेति । प्रमाणाभावादुभयात्मत्वमपि नैष्टव्यमित्यत आह-उभयेति ।

नच विषयांशे स्मृतित्वानुभवत्वयोर्व्यवस्था कर्तुं शक्यते, तन्निरासस्य निवेदितत्वात् (१)। ततश्च तदेव ज्ञानं तस्मिन्नंशे स्मृतिश्चानुभवश्चेत्यापतितेति यदि न विरोधबुद्धिर्भवतस्तदा "तदधीने तत्रैवार्थे प्रमात्वाप्रमात्वापाते(२)ऽपि सा तेऽस्तु।

टी० ॥ तर्हीन्द्रियजन्यत्वेन प्रत्यभिज्ञाऽनुभवोऽपि न स्यात्, संस्काराजन्यत्वे सतीन्द्रियजन्यत्वस्यानुभवत्वप्रयोजकत्वात्, प्रत्यभिज्ञायां च तदभावाद्,-इत्यपि स्यादित्याह—। "संस्कारे-"ति ॥ नन्वनुभवसामग्रीजन्यत्वेऽपि संस्कारमात्राधीनत्वेन कुत्र स्मृतित्वं दृष्टं येन प्रत्यभिज्ञायां तदापादनीयमित्यत आह—। "अन्यत्रे"ति। तर्हि संस्कारजन्यत्वेऽपि कुत्रेन्द्रियजन्यत्वमात्रेणानुभवत्वं दृष्टं येन प्रत्यभिज्ञायां तत्कल्पनीयमित्यपि तुल्यमित्यर्थः ॥ प्रकृतमुपसंहरति—। "तदेवमि"ति। संस्कारजन्यत्वेन स्मृतित्वमिन्द्रियजन्यत्वेन चानुभवत्वं, नचात्रावच्छेदकभेदेन द्वयोर्वृत्तिस्तस्या निरस्तत्वादिति स्मृतित्वमाङ्क्ष्येदनुभवत्वं न जातिरित्यर्थः। यद्यपि प्रत्यभिज्ञानमेकं ज्ञानं साक्षात्कार्यनुभवरूपतयाऽनुव्यवसायसिद्धं, तस्य च विषयस्तत्तेदन्तावच्छिन्नान्योन्याभावात्यन्ताभावः, स च स्वरूपमेव तयोस्तद्गताऽसाधारणधर्मो वा कश्चिदित्यन्यदेव, तत्तदनुभवस्य दुरपह्नवत्वात्, तच्च संस्कारेन्द्रियाभ्यां जन्यते, अन्वयव्यतिरेकाभ्यां द्वयोरपि कारणत्वावधारणात्, अन्यथा कार्यस्याकस्मिकत्वेनाहेतुकत्वेन परप्रतिपादनार्थं(३)तवापि वाग्व्यवहारो न स्यात्, प्रतिनियतविषययोरपि संस्कारेन्द्रिययोः संभूयकारित्वं प्रत्यभिज्ञान्यथानुपपत्त्यैव, तत्र सोपपद्यतां प्रत्यभिज्ञानं, सा च तत्तेदन्ताविशिष्टाभेदस्तद्विषयोऽस्त्विति त्वयापि वक्तुमशक्यम्, अनुभवविरोधात्; क्षणभङ्गापत्तेश्च। 'योऽहमद्राक्षं सोऽहं स्मरामी'-

---

(१) "तदा धर्मिणमादायापि स्मृत्यनुभवसङ्करो दुर्वारः"—इत्यत्र निवेदितत्वात्। (२) प्रमात्वाप्रमात्वापातेऽपि सा=अविरोधबुद्धिस्तेऽस्त्वित्यर्थः। (३) परप्रतिपादनार्थम्=परप्रतिपत्तिजननार्थम्।

त्यभेदप्रतिसन्धानस्य सर्वतैर्थिक(१)सिद्धत्वात् । तत्ताऽभेदश्चे-
न्द्रियसंबद्धविशेषणतयैव भासते, घटादेश्च प्रत्यभिज्ञायमानस्य
ग्राह्यत्वेन स्वग्राह्यसंबद्धविशेषणताया एव सत्त्वात् । * तत्तांश-
मात्रे संस्कारेणापि तदवच्छिन्नाभेदांशो(२)पि विशेषणतया कथं
भासेत ? *,—इति चेन्न, संस्कारानुपनीतस्यापि विशेषणता-
भ्युपगमात् । * भूतले घटाभावस्येव(३)विशेषणतयैव तत्ताभाने
किं संस्कारेण * ?—इति चेन्न, अननुभूते प्रत्यभिज्ञाया अदर्श-
नाद् अनुभवस्यापि तत्कारणत्वसिद्धौ तस्य च चिरध्वस्तस्य
व्यापारापेक्षायां संस्कारकारणत्वकल्पनात् । अतीतापि तत्ता
विशेषणमेव, 'द्वे द्रव्ये'-इत्यत्र द्वित्व(४)मिव, तत्ता च पूर्वानुभ-
वत्वैशिष्ट्यं, तदसत्त्वकाले तज्ज्ञानं न भ्रमः । * कथम् ? *—इति
चेन्न 'सोयमि'ति 'तदभिन्नोयमि'ति प्रतीयते, नतु 'तदवच्छिन्न
(५) इदानीमि'ति प्रत्यभिज्ञाविषयो येन भ्रमः स्यात्, संस्का-
रजन्यत्वेन च न स्मृतित्वमिन्द्रियाजन्यत्वस्योपाधित्वात् । *
नचेन्द्रियजन्यत्वेन चानुभवत्वे साध्ये संस्काराजन्यत्वमुपाधिः* ।
अनुभवत्वस्य प्रत्यक्षसिद्धत्वेनोपाधिव्यतिरेकेण(६)तद्व्यतिरेकस्य
साधयितुमशक्यत्वेनोपाधेर्बाधितविपर्ययत्वेनाऽऽभासत्वात् । अ-
स्तु वा प्रत्यभिज्ञानं स्मृतिजन्यं, तथाच संस्कारजन्यत्वेन स्मृति-
त्वापादनमिन्द्रियजन्यत्वेन चानुभवत्वसाधने संस्काराऽजन्य-
त्वमुपाधिश्चानवकाशः । स्मृत्युपनीतैव तत्ता भासते भ्रमे च
रजतत्वमिति प्रत्यभिज्ञाखण्डनमनवकाश, तथापि हस्तसमाव-
रणमात्रमेतत्सर्वमिति हृदयम् ॥ "तदधीने"इति । स्मृतित्वेना-
प्रमात्व, यथार्थानुभवत्वेन प्रमात्वम्, अवच्छेदभेदं विनैव प्रत्य-
भिज्ञायां स्यादिद च तन्नानिष्टमित्यर्थः ॥

---

(१) तैर्थिकाः=शास्त्रकाराः ।
(२) "अभेदांशोपी"ति क्वचपाठः । (३) भूतले घटाभावप्रत्यक्षस्थले प्रागनधिगतस्यैव घटाभावस्य विशेषणतया भानाङ्गीकारेण संस्कारानुपनीतस्यैव तस्य विशेषणता । (४) द्वित्वं ह्यपेक्षाबुद्धिजन्यत्वेन चतुर्थक्षणादावतीतमपि द्रव्यविशेषणं यथा तद्वदित्यर्थः । (५) तदवच्छिन्नः, तत्तावच्छिन्न इत्यर्थः । (६) उपाधिव्यतिरेकेण=संस्कारजन्यत्वेन, तद्व्य-

सू० "एतेन(१)विरोधापत्त्याऽनुभवत्वस्वीकारे बाधकेन स्मृतिव्यतिरिक्तमनुभवत्वं नामानुगतं साक्षात्कारिज्ञानानुमित्यादिसाधारणमनुभवबलादेव व्यवस्थापनीयमिति प्रतीतिकलहोऽपि(२)निरस्तः । * ᵇननु चाऽनुभव एव शरणमिह, प्रत्यभिज्ञाने ह्यनुभवत्वमेवानुभूयते नतु स्मृतित्वं, तेन संस्कारजत्वपीन्द्रियार्थसन्निकर्षाधिकापेक्षयाऽनुभवत्वमेवेति विनिगमनायामपीदमेव प्रमाणम् । अन्यथा प्रत्यभिज्ञानेऽनुभवप्रत्ययो न स्यादिति प्रतीतिकलहेन प्रत्यवस्थेयमिति ? * । न, ᶜइदन्तातत्तावभासयोरनुभवस्मरणभागयोः सत्त्वेनानुभवस्यैकपक्षेऽसाधारणीकृत्य प्रमाणयितुमिहाऽशक्यत्वात् ।

टी० ॥ अनुगतप्रतीत्यभावादनुभवत्वं न जातिरित्युक्तमिदानीं जातिसाङ्कर्यादपि न तदित्याह–। ᵃ"एतेने"ति । यद्वा, प्रघट्टकनिर्व्यूढमर्थं संक्षेपतोऽनुवदति–। "एतेने"ति ॥ नन्वनुगतानुभवत्वजातौ प्रतीतिकलहः (२)प्रत्यभिज्ञायां स्मृतित्वानुभवत्वविरोधात्तदाहूतप्रमात्वविरोधाद्वा निरसनीयः, स एव नास्ति, अनुभवत्वेनैव सर्वप्रतीतिसिद्धत्वादित्याह–। ᵇ"ननु चे"ति ॥ यथेदन्तांशे 'अनुभवामी'त्यनुभवः तथा तत्तांशे 'स्मरामी'त्यनुभव इति न सकलांशानुभवत्वानुभव इत्याह–। ᶜ"इदन्ते"ति । यद्वा, तत्तांशे स्मृतित्वध्रौव्येणानुभवत्वेनानुभवोऽयं कूटसाक्षी(३)त्यर्थः ॥

तिरेकस्य=अनुभवत्वव्यतिरेकस्येत्यर्थः । (१) एतेनेत्यस्यैव विवरणं,–बाधकेनेत्यन्तम् । विरोधापत्त्या=प्रत्यभिज्ञायां स्मृतित्वानुभवत्वयोः प्रमात्वाप्रमात्वयोश्च विरुद्धधर्मयोः समावेशेन, अनुभवत्वस्वीकारे=अनुभवत्वस्य जातित्वस्वीकारे, बाधकेनेत्यर्थः ।

(२) इतिहेतोः प्रत्यभिज्ञायामनुभवत्वास्वीकारे सोऽयं घट इत्याकारकतत्तेदन्तावगाहिज्ञानेऽनुभवत्वावगाहिप्रतीत्या कलहः=विरोधो निरस्त इत्यर्थः । (३) कूटसाक्षी=मिथ्यार्थगोचरः ।

मू० [a]एतेन–स्मृत्यनुभवसङ्करप्रसङ्गेनानुभूतिपद(१)व्यवच्छेद्यं परिप्लुतं मन्तव्यम् । (२) * [b]नच वाच्यं प्रत्यभिज्ञानं व्यवच्छेद्यं मा भूत् स्मृत्यन्तरं तु भविष्यतीति *, तस्याप्यनुभूतित्वेन भवताऽवश्यं स्वीकर्त्तव्यत्वात् । [c]तथाहि–'घटस्तत्रासीदि'त्यादिस्मृतौ पूर्वकालविशिष्टो घटः स्फुरति, नचासौ(३)पूर्वमनुभूता भूतता या संस्कारेणोपनीयेत, प्रत्युत पूर्वं वर्तमानताया एवानुभूत्या ग्रहणं, [d]तस्मादिदानीं पूर्वता(४)ग्रहणसामग्रीसंभेदात् 'सोयमि'तिप्रत्यभिज्ञानवद्विशिष्टावगमोप्यसौ स्मृत्यनुभवात्मक एवाभ्युपगन्तव्यः । एतेनानुभवसामग्रीसहितः संस्कारोनुभवकारणमितिपक्षे पूर्वमाशङ्किते [e]इदमपि दूषणं द्रष्टव्यम् । तथा सति [f]स्मृत्युच्छेदापत्तेः । [g]नच तदस्ति स्मरणं यत्र सा(५)न प्रकाशते, ततश्च व्यवच्छेद्यानुपपत्तिः ।

टी० ॥ ननु 'तत्त्वानुभूतिः प्रमे'तिलक्षणखण्डनमुपक्रान्तं, तत्र किमप्रस्तुतेन प्रत्यभिज्ञाखण्डनेनेत्यत आह–। [a]''एतेने''ति । अत एव खण्डनोद्धारे यदेतस्य प्रकरणस्याऽप्रस्तुतत्वमुक्तं, तदपि

---

(१) 'तत्त्वानुभूतिः प्रमा'–इतिप्रमालक्षणकुक्षिनिविष्टानुभूतिपदेत्यर्थः ।

(२) { निराकार्य्यनुभूतीतिशब्दव्यावर्त्यता पुरा ।
प्रत्यभिज्ञात्मबोधस्य, स्मृतौ सा चात्र खण्ड्यते ॥ १७ ॥ }

(३) असौ=पूर्वकालसम्बन्धरूपा, भूतता (=तत्ता) पूर्वं नानुभूता या संस्कारेण विषयीक्रियेतेत्यर्थः । पूर्वं प्रत्यभिज्ञाखण्डनावसरे तत्तायां पूर्वदेशकालसम्बन्धरूपायां देशकालयोस्तत्कालीनवर्तमानत्वाभिप्रायेण संस्कारविषयत्वोक्तिरिदानीं तु तयोरेव देशकालयोरेतत्कालीनमतीतत्वमभिप्रेत्य संस्काराऽविषयत्वमुक्तमिति ध्येयम् । (४) पूर्वता=भूतता, तद्ग्रहणसामग्रीन्द्रियसन्निकर्षादिरूपा, तस्याः घटग्राहक संस्कारैः सह सम्भेदात्=संमिश्रणादित्यर्थः (५) सा=भूतता, तत्तेति यावत् ।

प्रत्युक्तम् ॥ [b]"नच वाच्यमि"ति । यद्यपि प्रत्यभिज्ञानमनुभूति-पदव्यवच्छेद्यत्वेन नोपक्रान्तं, न वा तद्व्यवच्छेदः सिद्धान्त्यभिमतः, शङ्क्यो वा, तथापि स्मृतीनामनुभवत्वापादनाय प्रस्तावनामात्रपरमेतत् ॥ [c]"तथाही"ति । यद्यपि पूर्वानुभवकालीना विद्यमानतैव तत्ता(१), पूर्वकालवैशिष्ट्यं वा, पूर्वानुभववैशिष्ट्यं वा, पूर्वदेशसंबन्धो वा, यत्किञ्चित्कालीनसंबन्धो(२)वा, सर्वत्र पूर्वानुभवविषयतायाः सत्त्वात्; पूर्वानुभवविषयत्वस्य तत्तात्वे य एवानुभवेन पूर्वं गृहीतस्तद्विषये एव स्मरणाभ्युपगमात् न तत्तांशेनुभवप्रसङ्गः, तथापि स्मरणस्य मानसानुभवत्वे किं बाधकमिति हृदयम् ॥ [d]"तस्मादि"ति । स्मृतावतीतताभाने संस्कारस्यासामर्थ्यादिन्द्रियमेव कारणं वाच्यम्, धर्म्यंशे च संस्कारः, इति सर्वस्मृतीनां स्मृत्यनुभवसाङ्कर्यमित्यर्थः ॥ [e]"इदमपी"ति । सर्वस्मृतिषु स्मृत्यनुभवसाङ्कर्यमित्यर्थः॥ [f]"स्मृत्युच्छेदापत्तेरि"ति । अनुभूतिपदव्यवच्छेद्यस्मृत्युच्छेदापत्तेरित्यर्थः ॥ ननु प्रमुष्टतत्तांशमेव स्मरणमनुभूतिपदव्यवच्छेद्यमस्त्वित्यत आह–। [g]"नचे"ति ॥

सू० (३)यदपि [a]कैश्चिदुच्यते–"दोषवशात्प्रमुष्टतत्तांशं स्मरणं भवती"ति, तदपि नोपपन्नं, तदीयस्मरणत्वे प्रमाणाभावात् । * [b]नचानुभवसामग्र्यभावात् पारिशेष्येण स्मृतित्वम्*, [c]इन्द्रियार्थसन्निकर्षव्यावृत्त्यानुभवसामग्र्यभावात् पारिशेष्येणानुमित्यादेरपि स्मृतित्वापत्तेः । * [d]सर्वानुभवसामग्र्यभावात् *,–इति चेत्, [e]कथं पुनस्तत्तांशशून्यरजतादिज्ञानहेतुसामग्री नानुभवसामग्रीत्यवधारितमायुष्मता ? । * [f]पञ्च-

---

(१) तत्ता=भूतता । (२) यत्किञ्चित्कालीनः, पूर्वकालीन इत्यर्थः । पूर्वकालवैशिष्ट्यमितिलक्षणे पूर्वकालसम्बन्धाधिकरणत्वमुक्तमिह तु पूर्वकालसम्बन्धमात्रमित्यपौनरुक्त्यम् ।

(३) { स्वरूपस्मरणं चान्यत्प्रमुष्टतत्ताकमप्यथ ।
तस्यापि तत्पदेनात्राऽपाकरोति च वार्य्यताम् ॥ १८ ॥ }

प्रमाणी(१)कारणसामग्र्यसंभवात् *,-इति चेन्न, ᵍचतुष्प्रमाणीजनकसामग्र्यसंभवात् पञ्चमी(२)प्रमा किं न पारिशेष्यात्स्मरणं त्वया व्यवास्थापि ? । ʰकुत्र च प्रतिपन्नं पञ्चप्रमाणीकारणसामग्र्यभावे जायमानं ज्ञानं स्मृतिर्भवतीति ?, 'घटस्तत्रासीदि'त्यादिज्ञानानामनुभवत्वोपन्यासस्य कृतत्वात् । ⁱअथ मन्यसे,-* प्रत्यक्षादिकारणसामग्र्यनुपपत्त्या रजतमात्रस्य च पूर्वमनुभूतत्वेन तद्विषयसंस्कारसंभवात् संस्कारस्यैव हेतुताङ्गीक्रियते, न त्वन्यत्कारणत्वेन कल्प्यते, इन्द्रियार्थसन्निकर्षाद्यसंभवे जायमानस्य त्वनुमानादेरननुभूतविषयत्वेन तस्मा(३)न्नोत्पत्तिसंभव इति तत्कारणं लिङ्गादिकमङ्गीक्रियते, ततः प्रमाणान्तरासहकृतसंस्कारजत्वं, तद्व्यङ्ग्यो वा जातिविशेष एव, स्मृतित्वम् *,-इति,

टी० ॥ ᵃ"कैश्चिदि"ति । 'इदं रजतमि'तिभ्रमस्थले ग्रहणस्मरणरूपज्ञानद्वयभेदाग्रहवादिभिरित्यर्थः ॥ ननु रजतेन सममिन्द्रियसन्निकर्षाभावादगत्यैव तज्ज्ञानं स्मरणमभ्युपेयमित्यत आह-। ᵇ"नचे"ति ॥ गूढाभिसन्धिराह-। ᶜ"इन्द्रियार्थे"ति । अनुभवत्वावच्छिन्नसामग्र्यभावात् तत्र स्मृतित्वम्, अनुमित्यादौ तु न तदवच्छिन्नसामग्र्यभावो लिङ्गपरामर्शादेरनुभवसामग्र्या एव सत्वादिति शङ्कते । ᵈ"सर्वे"ति ॥ गूढाभिसन्धिः पुनराह-। ᵉ"कथमि"ति ॥ नन्वर्थापत्तिमादाय प्रत्यक्षादीनि मीमांसकमते पञ्चैवानुभूतयः प्रमाणानि, प्रमुष्टतत्तांशे च स्मरणे तत्कारणव्यतिरेकादेव स्मृतित्वमिति शङ्कते-। ᶠ"पञ्चे"ति । प्रमाणपदं

---

(१) पञ्चानां प्रमाणानां समाहारः पञ्चप्रमाणी, पञ्चपूल्यादिवत् ।
(२) पञ्चमी प्रमा = अर्थापत्तिः । (३) तस्मात् = संस्कारमात्रात् ।

भावसाधनं(1), पञ्चपदं च यथादर्शनप्रमाणसङ्ख्यो(2)पलक्षणपरम्, एवमग्रेपि ॥ स्वाभिप्रायमुद्घाटयति–। g"चतुरि"ति । चतस्र एव प्रमास्त्वदभ्युपगताः(3), पञ्चमी प्रमा स्मृतिरेव भवेदित्यपि सुवचमित्यर्थः ॥ प्रमुष्टतत्तांशस्मरणस्य स्मरणान्तरदृष्टान्तेन पञ्च-प्रमाणसामग्रीविरहे जायमानत्वात् स्मृतित्वं साधनीयं, तदेव तु नास्ति, सर्वेषामेव स्मरणानामनुभवत्वस्योक्तत्वादित्याह–। h"कुत्र चे"ति ॥ ननु प्रमुष्टतत्तांशस्मरणे परिशेषात्संस्कारमात्रं कारणम्, अनुमित्यादौ तु लिङ्गपरामर्शादीनां कारणानां सत्त्वा-दपूर्वसाध्यादिसंसर्गे पूर्वाननुभूते(4)च संस्काराभावात् संस्कारा-जन्यत्वेन चानुमित्यादेरनुभवत्वस्यैव व्यवस्थापनान्न प्रतिब-न्दिरिति शङ्कते–। i"अथे"ति ॥

सू० मैवम् । a"तत्र कारणत्वं किमिति नास्त्यैव ?, येन संस्कारजत्वं व्यवस्थाप्यते । * b'तेनार्थेन सह तदा-ऽसत्त्वस्य सन्निकर्षाभावादसन्निकृष्टस्य च तस्य ज्ञानज-नकत्वेऽतिप्रसङ्गात् नेन्द्रियजत्वं तस्य ? *,-इति चेन्न, c'संस्कारस्यापि केवलस्य तज्जनने(5)ऽतिप्रसङ्ग-तादवस्थ्यात् । * d'सहचरित(6)धर्मदर्शनादिना सह-कारिणा युक्तस्य संस्कारस्य तज्जनने नास्त्यतिप्र-सङ्गः ? *,-इति चेत्, e'तेनैव सहकारिणा सहित-

(१) भावसाधनम् = प्रमितिः प्रमाणम् (= प्रमा,) इतिभावव्युत्पत्तिकम्।

(२) चार्वाकस्य मते प्रत्यक्षमेवैकं प्रमाणं, कणादबौद्धयोस्त्वनुमि-तिरपि, नैयायिकैकदेशिनामुपमितिरपि, नैयायिकानां शाब्दमपि, भाट्ट-वेदान्तिनोरनुपलब्धिरपि, पौराणिकानां साम्भविकैतिह्यके अपि, तान्त्रि-काणां चेष्टापि–इति यथाशास्त्रमुत्तरोत्तरं प्रमाणसङ्ख्या द्रष्टव्या ।

(३) 'भवेयुरि'ति शेषः । (४) 'साध्ये'इति शेषः, यद्वा 'पूर्वाननुभूते'-इति'अपूर्वसाध्यादिसंसर्गे'इत्यस्यैव विशेषणम् । (५) तज्जनने=स्मृति-जनने । अतिप्रसङ्गतादवस्थ्यात् = सादृश्यदर्शनादिविरहदशायामनुद्बुद्ध-संस्कारेभ्योपि स्मृतिप्रसङ्गात् । (६) सहचरितो धर्मः = चाकचक्यादि-रूपः समानो धर्मः ।

स्येन्द्रियस्यापि तज्ज्ञानजननेऽतिप्रसङ्गाभावात् । * ^e^अननुभूतेपि तर्हि प्रसङ्गः *,-इति चेन्न, ^g^तत्रापि तद्धर्मतानधिगते[1] तद्धर्मवत्यधिगते तस्य संस्कारवतः स्मृत्यापत्त्या समाधिसाम्यात् । * ^h^लुप्ततत्साहचर्य्यदर्शनजसंस्कारस्यापि तथा सति सहचरितरजताद्यक्षजप्रतीतिप्रसङ्गः ? *,-इति चेन्न, ^i^तत्रापि मते तादृशस्य रजतादिसंस्कारवतो रजतादिस्मृतिप्रसङ्गसाम्यात् । ^j^तस्माद्यत[2]स्ते कालव्यवधानादितः संस्कारलोपस्तदनुपनिपातस्यापि हेतुत्वोपगमेऽनतिप्रसङ्गात्[3] ।

टी० ॥ परिशेषं प्रत्याचष्टे-। "“तत्रे”ति ॥ रजतादिना सन्निकर्षाभावान्नाक्षजत्वमिति शङ्कते-। ^h^“तेने”ति ॥ यथाऽनुपपत्त्या नाक्षजत्वं, तथैव न संस्कारजत्वमपीत्याह-। “संस्कारस्यापी”ति ॥ सदृशादृष्टचिन्ताद्युद्बोधितसंस्कारः स्मृतिकारणमतो नातिप्रसङ्ग इति शङ्कते-। ^d^“सहचरिते”ति ॥ संस्कारसहकारित्वेन यदपेक्षितं तदक्षसहकार्य्येवास्तु, सन्निकर्षसंस्कारौ तु न तन्त्रमित्याह-। “तेनैवे”ति ॥ यदि संस्कारं विनेन्द्रियमात्रात् सदृशादिदर्शनसहायात् प्रमुष्टतत्तांशं स्मरणं तदातिप्रसङ्गमाह-। ^f^“अननुभूतेपी”ति ॥ यत्र रजतधर्मतया चाकचिक्य† नानुभूतं, रजतं धर्मि पुनरनुभूतमेव, तत्र चाकचिक्य†वति शुक्त्यादौ दृष्टे च रजतगोचरसंस्कारसत्त्वेपि यद्विलम्बात्[4] स्मृतिविलम्बस्त-

[1] तद्धर्मतानधिगते = चाकचक्यादौ शुक्त्यादिधर्मतयाऽनधिगते, तद्धर्मवति = चाकचक्यादिधर्मवति शुक्त्यादौ, चाधिगते सतीत्यर्थः ।

[2] यतः कालव्यवधानादितः (विपरीतसंस्कारादिरादिशब्दार्थः) ते मते संस्कारलोपः तदनुपनिपातस्य = तदभावस्येति यावत् ।

[3] विद्यासागरास्तु “नातिप्रसङ्गात्”-इति पाठं शुद्धमात्रं चाचक्षन्ति ।

† यद्यपि चाकचिक्यपदघटित एव प्रायः पुस्तकेषु पाठ उपलभ्यते तथापि वयं तु चाकचक्यपदघटितं पाठं साधु मन्यामहे ।

[4] रजताधिकरणकचाकचक्यादिविषयकज्ञानविलम्बादित्यर्थः ।

द्विलम्बादननुभूते ममापि स्मृतिविलम्बो न तु संस्कारविलम्बा-दित्याह—। [g]''तथापी''ति ॥ ननु रजतादिस्मरणमिन्द्रियजमेव चेत्तदा लुप्तसंस्कारस्या(१)पि रजतादेर्ज्ञानप्रसङ्गः; किंच, तयोर्धर्मधर्मिणोर्यत्साहचर्यं संम्बन्धस्तस्य दर्शनाद्यः संस्कारो जातः स यस्य लुप्तस्तस्यापि सहचरितं यद्रजतादि धर्मिभूतं तद्विषया त्वन्मतेऽक्षजा प्रतीतिः स्यादित्याह—। [h]''लुप्ते''ति ॥ गूढाभिसन्धेरुत्तरम्—। [i]''तथापी''ति । तादृशस्य=लुप्तसाहचर्यदर्शनजसंस्कारस्य पुंसः, केवलधर्मिगोचरसंस्कारवतः स्मृतिप्रसङ्ग इत्यर्थः ॥ अभिसन्धिमाह—। [j]''तस्मादि''ति । त्वन्मते यत्संस्कारलोपकारणं तदभावविशिष्टादिन्द्रियादेव स्मरणोपपत्तेः किं संस्कारेणेत्यर्थः।

सू० तदेवम्-

"तत्सदृक्प्रत्यभिज्ञान(२)यत्ते संस्कारबोधकम् ।
सहकारि तदेवास्तामक्षस्याऽतिप्रसक्तिनुत् ॥ २८ ॥

'तत्सदृशप्रत्यभिज्ञानं तु स्मर्त्तव्यस्मरणपूर्वकम्'-इत्येतदपि सममेव(३) । * 'तथाप्यन्यत्रार्थसन्निकर्षमन्तरेणेन्द्रियस्य ज्ञानकरणत्वं नोपलब्धचरम् ? *, इति चेन्न, 'विशिष्टरूपेण(४)भ्रमविषये मया तदुपगमात्, "सहकारिभूतदोषशक्त्या वा प्रत्यासत्तित्वेनेष्टत्वात् । 'किंच, संस्कारस्यापि प्रमाणान्तराऽसहकृतस्य नान्यत्र ज्ञानजनकत्वं दृष्टमिति तदपि कथं कल्प्यते ? ।

(१) लुप्तसंस्कारवतः पुरुषस्येत्यर्थः ।

(२) तेन = अनुभूतरजतेन सदृगिदमिति तत्सजातीयसादृश्यज्ञानं यत्ते सिद्धान्ते संस्कारोद्बोधकत्वेनाभिमतं तदेव समाश्रित्य सहकार्य्यास्तामित्यर्थः। (३) यथा तव मते तत्सदृशप्रत्यभिज्ञानं स्मर्तव्यस्मरणपूर्वकं सत्संस्कारोद्बोधकं तथा मन्मतेऽपि तत् स्मर्तव्यस्मरणपूर्वकं सदिन्द्रियसहकारि भविष्यतीति साम्यमेवेत्यर्थः। (४) अत्र तृतीयाविभक्त्यर्थोऽभेदः, तथा च रजतत्वविशिष्टशुक्त्यभिन्नो यो भ्रमविषयस्तत्र तदुपगमात् = सन्निकर्षमन्तरेणैवेन्द्रियस्य करणत्वोपगमात्। यद्वा विशिष्टरूपेणेत्यस्य लोकविलक्षणप्रकारेणेत्ययमर्थः ।

*प्रत्यभिज्ञाने एव संस्कारस्य सदृशदर्शनादि सहकारि कल्पितं(१)नत्विन्द्रियस्य ? *,-इति चेत् न, प्रत्यभिज्ञाने संस्कारेन्द्रिययोर्द्वयोरपि कारणत्वात्, सदृश(२)दर्शनादिसहकृतत्वदर्शनाविशेषात् ।

टी० ॥ "तत्सदृशमि"ति । तस्य=रजतादेः, सदृशं=शुक्त्यादि, तस्य प्रत्यभिज्ञानं=ज्ञानं,(३) तथाच सदृशाऽदृष्टचिन्तासहकृतमिन्द्रियमेव स्मृतिजनकम्, अतः स्मृतेरनुभवत्वमित्यर्थः ॥ दृष्टान्वयव्यतिरेकस्य सन्निकर्षस्याभावाद् रजतस्मरणं नाक्षजमित्याह-। "तथापी"ति ॥ "विशिष्टे"ति । भ्रमविषयरजतस्मरणमक्षजं नेन्द्रियसन्निकर्षमपेक्षते-इत्युच्यते, नत्व(४)नुभवमात्रमित्यर्थः, धर्मीन्द्रियसन्निकर्षस्य प्रत्यभिज्ञाने इव प्रकृतेपि सत्त्वादिति भावः ॥ येन दोषेण तत्रामोषस्तथया वाच्यः स एवेन्द्रियप्रत्यासत्तिरित्याह-। "सहकारी"ति ॥ विवादपदं रजतस्मरणं तथापि संस्कारमात्रजं कथं स्यात् ?, संस्कारस्य प्रमाणसाहित्यैनैव प्रत्यभिज्ञानादौ जनकत्वावधारणादित्याह-। "किंचे"ति ॥ प्रत्यभिज्ञादिदृष्टान्तानुरोधेन चेत्कल्पना तदा तत्र संस्कारस्य सदृशदर्शनादि सहकारी इत्यन्यत्रापि तथैवेति शङ्कते । "प्रत्यभिज्ञाने"इति ॥ तत्रापी(५)न्द्रियसहकारित्वमेव वक्तव्यमित्याह । "ने"ति ॥

---

(१) सदृशदर्शनादिसहकृतस्य संस्कारस्य प्रत्यभिज्ञाने एव कारणत्वं दृष्टं नेन्द्रियस्येति भावः । (२) सदृशदर्शनादित्यतः प्राक् 'तयोरि'-ति शेषः । अयमाशयः-यथा त्वया प्रत्यभिज्ञायां सदृशदर्शनस्योद्बोधकविधया संस्कारं प्रति सहकारित्वं वक्तव्यं तथा तत्रेन्द्रियं प्रत्यपि तस्य सहकारित्वं शक्यते एव मयापि वक्तुं, तद्वदेव चान्यत्रापीति । (३) ज्ञानं, तेन सदृगिदमितिसादृश्यज्ञानमित्यर्थः, क्वचित्तु ज्ञानमितिपदं नास्ति । यद्वा शङ्कितस्य प्रत्यभिज्ञानशब्देनापि मौलिकेन प्रकृते ज्ञानमात्रमेव व्याचिख्यासितं, नतु तेन सदृगिदमित्याकारकं प्रत्यभिज्ञारूपं विशिष्टज्ञानमपीति बोध्यम् । (४) अनुभवत्वावच्छिन्नोऽनुभवः सन्निकर्षं नापेक्षते इति नतूच्यते, इति सम्बन्धः । (५) तत्रापि=सदृशदर्शनादावपि । यद्वा तत्रापि=प्रत्यभिज्ञायामपि, 'सदृशदर्शनादीनामि'ति शेषः ।

सू० *[a]अत्र([1])सदृशदर्शनसहकारित्वे संस्कारसहकारित्वस्यापि प्रसङ्गः प्रत्यभिज्ञानवत् ? *,-इति चेन्न, [b]तथा सति तद्वदेव तत्तोल्लेखापत्तेः, [c]सदृशदर्शनादिसहकृतत्वेन च तत्तांशप्रसञ्जने([2])संस्कारजत्वस्योपाधित्वम् । * [d]नच सदृशदर्शनसहकारितैव तत्ताप्रयोजिकेति त्यज्यतां, न संस्कारः-इति युक्तम्*, [e]सदृशदर्शनं परित्यज्य संस्कारे सत्यप्यतथाबोधात्([3]) । * [f]तथापि सदर्थे प्राप्यकारित्वमिन्द्रियस्य दृष्टं न हातुं शक्यम् ? *,-इति चेन्न । [g]उक्तमत्र यथेन्द्रियस्य प्राप्तिसहकृतस्य ज्ञापकत्वं दृष्टं तथैव संस्कारस्यापि प्रमाणान्तरसहकृतस्य ज्ञापकत्वमुपलब्धमिति तदपि हातुं न युक्तमिति;

टी० ॥ यथा प्रत्यभिज्ञाने सदृशदर्शनमिन्द्रियसहकारि दृष्टं तथा संस्कारोपि तत्रेन्द्रियसहकार्यैवेति कथं रजतस्मृतौ संस्कारस्तिरस्कृतः ? इत्याह-। [a]"अत्रे"ति ॥ संस्कारजत्वे प्रमुष्टतत्ताकं स्मरणमेव न स्यादित्याह-। [b]"तथा सती"ति ॥ ननु संस्कारवत् सदृशदर्शनादेरपि तत्तोलेखसामर्थ्यमविशिष्टमित्यत आह-। [c]"सदृशेति । संस्कारजत्वनिवृत्त्या तत्र तत्तोल्लेखनिवृत्तिरित्यर्थः ॥ संस्कारजत्वोपाधेः पक्षवृत्तित्वमाशङ्क्याह-। [d]"नचे-"ति । विवादपदे रजतज्ञाने तत्तोल्लेखो नास्ति, तथाच तन्निवृत्त्या तद्व्याप्यस्य सदृशदर्शनजत्वस्य निवृत्तिरस्तु संस्कारजत्वं च तत्र स्यादेव, तथाच स्मरणमेव प्रमुष्टतत्ताकमिति शङ्कार्थः ॥ सदृश-

(१) अत्र=रजतादिभ्रमे, सदृशदर्शनस्येन्द्रियं प्रति सहकारित्वे संस्कारस्यापीन्द्रियं प्रति सहकारित्वप्रसङ्ग इत्यर्थः, भ्रमज्ञाने संस्कारेन्द्रिययोर्द्वयोरपि कारणत्वाविशेषादिति भावः । तथाच संस्कारजत्वाद्रजतादिभ्रमः स्मृतिरेव । यद्वा, अत्र = इन्द्रिये सदृशदर्शनस्य सहकारित्वे संस्कारेपि सहकारित्वस्य प्रसङ्ग इत्यर्थः । (२) भ्रमज्ञानं तत्तोल्लेखि, सदृशदर्शनादिसहकारिजन्यत्वाविशेषादित्यापादने इत्यर्थः ।
(३) अतथाबोधात्=स्मृत्यात्मकबोधाभावात् ।

दर्शनादिविनाकृतस्य संस्कारस्य स्मृतिजनकत्वं न दृष्टमिति तन्निवृत्त्या (१) संस्कारजत्वमपि निवर्तते इति कथं तत्स्मरणं भवेदिति परिहरति—। "“सदृशदर्शनमि”ति ॥ नन्वसन्निकृष्टरजतविषयकं प्रत्यक्षं कथं स्यादिन्द्रियस्य प्राप्यकारित्वात्तथा चागत्यैव तत् स्मरणं मन्तव्यमिति शङ्कते—। f “तथापी”ति ॥ प्राप्त्यभावाद् यथा नेन्द्रियं तत्र रजते प्रवर्तते तथा प्रमाणान्तराभावात् संस्कारोऽपि न प्रवर्तते, प्रत्यभिज्ञानादौ मानान्तरसहकृतस्यैव जनकत्वनिर्णयादिति प्रतिबन्दिमाह—। g“उक्तमि”ति ॥

सू० a"सं(२)स्कारस्यापि चेन्द्रियप्रत्यासत्तित्वस्वीकारेण तद्विरहासिद्धेः । b तत्तांशमोषकल्पनं च स्वतन्त्रसंस्कारजत्वपक्ष एव याव(३)दधिकम् । c कुतश्चायं तत्तांशमोषः ?-इति विचारमधिकरोति, d"पूर्वं वर्तमानादिकालविशेषविशिष्टस्य रजतादेरेकस्मिन्ननुभवे प्रकाशिततया तज्जन्येन संस्कारेणापि तथैवो(४)पनेतुमुचितत्वात्; प्रत्यभिज्ञायां तथैव फलदर्शनात् । * दोषवशात्तत्तांशमोषः? *,-इति चेन्न, e विषयसंबन्धस्य स्वभावत्वेन(५) संस्कारे तदलोपात् ।

टी० ॥ ननु प्रतिबन्दिरदूषणमित्यत आह—। a"“संस्कारस्यापी”ति । संस्कार एव मनसः प्रत्यासत्तिरिति मानसमेव रजतज्ञानमित्यर्थः ॥ अक्षनिरपेक्षसंस्कारजत्वे तत्तोल्लेखध्रौव्यमिति दोषान्तरमाह—। b“तत्तांशे”ति । यद्यप्यक्षापेक्षसंस्कारजत्वेऽपि प्रत्यभिज्ञायां तत्तोल्लेखो दृष्टः(६)तथापि संस्कारजत्वे तत्तांशमोष-

(१) सदृशदर्शनादिनिवृत्त्येत्यर्थः । (२) पूर्वं प्रत्यासत्त्यभावमभ्युपेत्य दूषणमवाचीदानीं तु स एवासिद्ध इत्याह-संमिति । (३) स्वतन्त्रसंस्कारजत्वपक्षे एव तत्तांशमोषकल्पनं यावत् (तावद्) अधिकमित्यन्वयः । (४) तथैव=पूर्वकालवैशिष्ट्यरजताद्युभयविषयकेणैव । (५) संस्कारे विषयसम्बन्धस्य (=तत्तारूपविषयसम्बन्धस्य) स्वभावत्वेन-इति सम्बन्धः । (६) "तथा च रजतभ्रमस्यैन्द्रियकत्वेऽपि तत्तोल्लेखेन भाव्यम्"-इति शेषः ।

कल्पनमिह त्वया कर्त्तव्यमिति कल्पनागौरवमित्यर्थः(१) ॥ कल्पयितुमपि न शक्य(२)मित्याह—। ᶜ"कुत"इति ॥ सामग्रीबलात्तथाभानध्रौव्यमित्याह—। ᵈ"पूर्वमि"ति। अनुभवे यो वर्त्तमानकालो विशेषणतया भासते स एव स्मरणे तत्तया भासते,—इति वस्तुगतिः, तथात्र विशेष्यमात्रं स्मर्यते नतु विशेषणमपि—इदं कथं स्यादित्यर्थः ॥ यदि दोषस्तत्तया सह प्रत्यासत्तिं विलुम्पति तत्राह—। ᵉ"विषये"ति । संस्कारेण सह तत्तायाः स्वभावः प्रत्यासत्तिः, सच संस्काररूपमेव, नच तल्लोपः, तल्लोपे वा विशेष्यस्मृतिरपि न स्यादित्यर्थः ॥

सू० * ᶠदोषात् स्मृतौ ᵍतथा ? *, —इति चेत्, ʰकः पुनरसौ दोषः ? । * ⁱयस्माद्भ्रान्त्युत्पत्तिः परेषा(३)म् *, —इति चेत्, ʲतर्हि 'तद्रजताविशिष्ट(४)मिदं रजतमि'त्यत्र, 'सैव रजतव्यक्तिरियमि'त्यत्र वा, 'पुनस्तदेव रजतमुपस्थितमि'तीह वा ᵏसामान्यत एव रजतस्य तदापि परामृष्टस्य भ्रान्तौ तत्तांशमोषः स्यात्, दोषस्य विद्यमानत्वात् । ˡअन्यथा 'इदं रजतमि'त्यंशेऽपि तस्मिन् ज्ञाने तत्तांशमोषो न स्यादित्यास्तामियं ᵐप्रसक्तानुप्रसक्तिः ।

टी० ॥ ननु दोषः संस्कारं न विलुम्पति, किंतु तत्तांशे स्मृतिलक्षणं कार्यं प्रतिबध्नातीत्याह—। ᶠ"दोषादि"ति ॥ ᵍ"तथे"ति ।

(१) अयंभावः,—संस्कारासहकृतेन्द्रियकज्ञाने तत्तांशमोषो दृष्टः, केवलसंस्कारजन्यस्मरणे तु न स दृष्टः, सोऽयमदृष्टोऽपि त्वया कल्प्यते इति तवैव गौरवमिति । (२) "तत्तांशमोषणम्"—इति शेषः ।

(३) परेषाम्=नैयायिकानां—भवतामित्यर्थः, विशेषणताविशेष्यसन्निकर्षेण प्रत्यभिज्ञायां तत्ताप्रत्यक्षवादिना तेनैव कथाया उपक्रान्तत्वात्, अत एवात्र व्याख्यायां भ्रान्तिशब्दस्यान्यथाख्यातित्वेनार्थप्रकाशनमपि श्लिष्टतरम् । यद्वा, परेषां नैयायिकादीनामित्यर्थः, अस्मिन्पक्षे व्याख्यायाम् "अन्यथाख्यातिजनकत्वम्"—इत्यत्रान्यथाख्यातिशब्दस्य विपरीतख्यात्यर्थकतयोपलक्षणतया वाऽख्यातिख्यातिव्यतिरिक्ताश्चतस्रः ख्यातयः सङ्गृह्यन्ते । (४) अविशिष्टम्=सदृशम् ।

लोप इत्यर्थः ॥ भवेदेवं यदि दोष एव व्यवस्थितः स्यात्, नत्वेवमित्याह—। "कः पुनरि"ति ॥ अन्यथाख्यातिजनकत्वं दोषत्वमित्याशङ्क्यते—। "यस्मादि"ति । "यदपि कैश्चिदुच्यते"—इत्यारभ्य प्राभाकरो वादी, नचासावन्यथाख्यातिं मन्यते, इत्यत उक्तम्-"परेषामि"ति ॥ "तर्ही"ति । रजतव्यक्त्यन्तरे, शुक्तौ वा, यत्रैवंप्रकारो भ्रमस्तत्रापि तत्तामोषः स्यादित्यर्थः ॥ ननु तच्छब्देन वणिग्वीथ्यादिदृष्टरजतविशेषपरामर्शे विशेषदर्शनान्नायमाकारो भ्रमस्येति कुतस्तत्तामोष आपाद्यते, इत्यत उक्तम्—। "सामान्यत एवे"ति । तदा=तच्छब्देन सामान्याकारेणैवोपस्थितं रजतं परामृश्यते नतु पुरोवर्तिविलक्षणाकारेणेत्यर्थः ॥ ननु तत्तांशे स्मृतेरप्रतिबन्धात् त्वदुदाहृतज्ञानस्थले दोष एव नास्तीत्यत आह—। "अन्यथे"ति । 'तदेवेदं रजतमि'तिज्ञानं 'तदेवेदमि'ति प्रत्यभिज्ञानं नरसिंहाकारं, 'रजतमि'त्याकारस्तु स्मरणमेव; अन्यथा रजताभेदग्रहेऽन्यथाख्यात्यापत्तेः, तथाच यदि दोषो नास्ति तदा रजतांशेऽपि तत्तामोषो न स्यादित्यर्थः ॥ "प्रसक्ते"ति । प्रमाणखण्डनमुपक्रान्तं, तत्प्रसक्तं प्रत्यभिज्ञानखण्डनं, तदनुप्रसक्तं दोषखण्डनमित्यर्थः ॥

सू० *"नच प्रत्यभिज्ञा नाम स्मरणानुभवाभ्यामन्य एव प्रकार-इति वाच्यम्*, 'अननुभवत्वेनाप्रमात्वापातात् । * 'नचैवमस्त्वित्यपि वाच्यम्*, 'अक्षणिकत्ववादिना स्थिरसिद्धौ प्रमात्वेनोपन्यस्तत्वात्; 'ईदृशप्रसिद्धलक्ष्यत्यागेन च लक्षणोपपादनेऽनियमः प्रसज्येतेति । 'तस्माज्जातिवाचिनो(१)ऽनुभवपदस्य स्मृतितो व्यवच्छेदार्थमुपादानम्-इति सर्वथानुपपन्नमिति । 'नापि स्मृत्यन्यत्वमनुभवार्थः, नापि स्मृतिलक्षणरहितत्वम्, उक्तक्रमेण स्मृत्यनुभूतिसङ्करस्य दर्शितत्वेन व्यवच्छेदकत्वानुपपत्तेः । इतोऽपि न स्मृत्यन्यत्वमनुभवार्थः, तथाहि—

(१) जातिवाचिनः = मीमांसकमतेऽनुभवत्वात्मकजातिवाचिनः ।

टी० ॥ चित्ररूपमिव प्रत्यभिज्ञानं स्मरणानुभवविलक्षणमेवेत्यपि नेत्याह—। [a]"नचे"ति ॥ "तत्त्वानुभूतिः प्रमे"तिप्रमालक्षणादननुभवत्वेनाप्रमात्वापात इत्याह—। [b]"अननुभवत्वेने"ति ॥ ननु स्मृतिवत्([1])प्रत्यभिज्ञानमपि यथार्थमात्रं नतु प्रमापीत्यत आह—। [c]"नचैवमि"ति ॥ [d]"अक्षणिकत्वादिने"ति । योऽहमन्वभूवं सोऽहं स्मरामीत्यादिप्रतिसन्धानस्यात्मादिस्थैर्यसाधनत्वेन त्वयोपन्यस्तत्वादित्यर्थः ॥ यत्रयत्रातिव्याप्ति-([2]) स्तत्तद्यदि त्याज्यमेव तदा परमार्थव्यवस्थैव ([3])न स्यादित्याह—। [e]"ईदृशेति" ॥ अनुभवत्वस्य स्मृतिव्यावृत्तजातेरनुपपत्तौ 'तत्त्वानुभूतिः प्रमे'तिलक्षणेनुभूतिपदमव्यावर्तकमेवेत्युपसंहरति—। [f]"तस्मादि"ति ॥ अनुभवत्वं जातिर्मास्तु, स्मृत्यन्यज्ञानत्वलक्षणमुपाधिरस्तु, नहि तत्रापि जातिसाङ्कर्यभयमित्यत आह—। [g]"नापी"ति । "तत्तदूक्प्रत्यभिज्ञानं यत्त संस्कारबोधकम्"—इत्यादिना सर्वासां स्मृतीनामनुभवत्वव्युत्पादनेन ज्ञानमात्रमनुभव इति([4]) प्रमालक्षणेऽनुभवपदव्यवच्छेदकत्वानुपपत्तिरित्यर्थः । यद्वा, स्मृतीनामनुभवत्वव्युत्पादनेन 'स्मृत्यन्यत्वमि'त्यत्र स्मृतिपदव्यवच्छेद्यानुपपत्तिरित्यर्थः ॥

सू० स्मृत्यन्यत्वं [a]यत्किञ्चित्स्मरणान्यता वा ?-१ सर्वस्मृतिव्यक्त्यन्यता वा ? २ स्मृतित्वरहितत्वं वा ? ३ अभिप्रेतम् । [b]प्रथमे तु स्मृत्यन्तरव्यतिरेकात्स्मृत्यन्तरमप्यनुभूतिः स्यात्, नहि यतो ([5])व्यतिरिक्ता

---

(१) यथाभूतार्थावगाहिस्मृतिवदित्यर्थः । (२) यत्रयत्र प्रत्यभिज्ञादौ, अतिव्याप्तिः—अप्रमालक्षणस्य प्रमालक्षणस्य स्वव्याप्तिरेवेति ध्येयम्, तत्तत् = प्रत्यभिज्ञादिकं, यदि त्याज्यम् = प्रमालक्षणाऽलक्ष्यत्वेन स्वीकरणीयमित्यर्थः । (३) "पदार्थव्यवस्थैव"—इति तु पुस्तकान्तरस्थः पाठः । (४) इतिशब्दो हेत्वर्थे, यस्माज्ज्ञानमात्रमनुभवस्तस्मात् "तत्त्वानुभूतिः प्रमा"-इतिप्रमालक्षणेऽनुभवार्थकाऽनुभूतिपदनिष्ठव्यवच्छेदकत्वस्यानुपपत्तिरित्यर्थः । अनुभवपदमित्यापातत:, "तत्त्वानुभूतिः प्रमे"ति पूर्वोक्तप्रमालक्षणेऽनुभवपदाभावात् । यद्वा, "यथार्थानुभवः प्रमे"तिवक्ष्यमाणलक्षणाऽभिप्रायेणानुभवपदं प्रयुक्तम् । (५) यतः स्मरणव्यक्त्यन्तरादेका स्मृतिव्यक्तिर्व्यतिरिक्ता तत्स्मरणमेव न भवति (इति) नहीत्यन्वयः ।

स्मरणव्यक्त्यन्तरादेका स्मृतिव्यक्तिस्तत् स्मरणमेव न भवति येन तदन्यत्वं न स्मृत्यन्यत्वं स्यात् । नापि द्वितीयः । मदीयादिस्मृतिव्यक्तिभ्यो हि भवता कथङ्कारं व्यतिरिक्तत्वमवधारणीयम् प्रमायाः ?, तासां भवता प्रत्येतुमशक्यत्वात् । तथाहि,-न तावत् परकीयज्ञाने परस्याऽस्मादृशोऽध्यक्षसम्भवः, नाप्यनुमानार्थापत्ती, लिङ्गानुपपद्यमानयोः सर्वत्रार्वाग्दृशा प्रत्येतुमशक्यत्वात्; नापि शब्दः, सर्वत्र तस्यासम्भवात् । उपमानाद्यसम्भवोऽपि स्फुट एव, ततः कथं सर्वाभ्यः स्मृतिव्यक्तिभ्यो व्यतिरेकोऽनिरूप्यः प्रमायाः ? इत्यबोधादसिद्धिर्लक्षणस्य ।

टी० ॥ "'यत्किञ्चिदि"ति । स्मृतिविशेषान्योन्याभाववत्त्वमित्यर्थः ॥ "'प्रथमे" इति । स्मृतिविशेषान्योन्याभाववत्त्वं स्मृतिविशेषे गतमिति सोऽप्यनुभवः स्यादित्यर्थः ॥ '"अस्मादृश" इति । अयोगिन इत्यर्थः । यद्यपि सर्वस्मृत्यनुपस्थितौ "तासां सर्वासामि"ति तवाप्यभिधानमनुपपन्नम्, उपस्थितौ वा ममापि तदुपस्थितिः स्यात्, तथापि विशिष्य प्रतियोगितावच्छेदकेन प्रकारेण(१)तदुपस्थितिरशक्येत्यर्थः ॥ "'सर्वत्रे"ति । नहि स्मृत्यन्यत्वग्रहदशायामवश्यं तादृशः शब्दो(२)स्तीत्यर्थः ॥ "'उपमाने"ति । उपमानस्य सञ्ज्ञासञ्ज्ञिसंबन्धमात्रपरिच्छेद(३)फलकत्वेन सर्वस्मृत्युपस्थापकत्वायोगात्(४) । आदिपदादैतिह्या-(५)

(१) तत्तत्स्मृतित्वेन प्रकारेणेत्यर्थः । (२) तादृशः शब्दः = तत्तच्चैत्रमैत्रादिस्मृतिवाचकः शब्दः । (३) परिच्छेदोऽवधारणम् । (४) 'स्मृतिः स्मृतिपदवाच्या'-इत्याकारकवाच्यवाचकभावसम्बन्धमात्रज्ञानरूपत्वादुपमानस्य तत्कारणीभूतं स्मृत्यात्मकसम्बन्धिज्ञानं ततः पृथगेव वक्तव्यं नच तदुपमानमिति भावः । (५) इति ह इत्येवैतिह्यं, स्वार्थे तद्धितप्रत्ययात्; इति (=एवम्) ह (= स्फुटम्) आसीदित्येतदर्थबोधकं यत्तदैतिह्यम्, यथा 'इह वटे यक्षस्तिष्ठती'ति पारम्परिकं वाक्यं, तस्यापि स्मृत्यन्यत्वग्रहदशायां नियतं प्रागसम्भव एव ।

रादेरनङ्गीकारः, सर्वस्य खण्डनस्योपक्रान्तत्वात् ॥

सू० *[a] नच वाच्यम् स्मृतित्वेन सर्वाः स्मृतिव्यक्तयः सर्वकालसर्वपुरुषसंबन्धिन्यः स्वात्मीयां(१)स्मृतिव्यक्तिं प्रत्यक्षयता प्रत्यक्षादेवावगम्यन्ते सामान्यलक्षणयेन्द्रियप्रत्यासत्त्या व्याप्तिग्रहणकाले इव व्याप्यव्यापकव्यक्तय इति*, [b]दृष्टान्तदार्ष्टान्तिकयोर्दोषग्रस्तत्वात् । [c]तथा सत्येकं प्रमेयं प्रत्यक्षयतः प्रमेयत्वसामान्यप्रत्यासत्त्या विश्वमेव प्रत्यक्षं स्यात्, [d]एवमभ्युपगच्छतश्च श्रद्दधीमहि ते सार्वज्ञ्यमिदं यदि जानासि किमस्मच्चेतसि विपरिवर्तते इति । नापि तृतीयः । स्मृतित्वरहितत्वं हि स्मृतित्वाभाववत्त्वं वा स्यात् ? १ स्मृतित्व(२)प्रतियोगिकमाश्रयस्य स्वरूपं वा ? २ तज्ज्ञानं वा ? ३ न तावदाद्यः । तथाहि, स्मृतित्वान्योन्याभावोऽपि स्मृतित्वाभावो भवत्येव, तद्वत्त्वं स्मृतिष्वप्यस्ति,

टी० ॥ ननु स्मृतित्वं यत्सामान्यं तद्विशेषणतया(३) सर्वाः स्मृतयो ग्रहीतुं मनसैव शक्याः, कथमन्यथा धूमत्वविशेषणतयाऽतीतानागतसकलधूमव्यक्तयो भासन्तां, दृश्यते हि पक्षवर्तिनो धूमादनुमितिः, सा च सामान्यलक्षणामन्तरेण न स्यादित्याह— [a]"नचे"ति ॥ सामान्यलक्षणप्रत्यासत्तेरतिप्रसञ्जक-

(१) स्वात्मीयां स्मृतिव्यक्तिं प्रत्यक्षयता स्मृतित्वेन सर्वाः स्मृतिव्यक्तयः सामान्यलक्षणया इन्द्रियप्रत्यासत्त्या प्रत्यक्षादेवावगम्यन्ते व्याप्तिग्रहणकाले व्याप्यव्यापकव्यक्तय इवेति न च वाच्यमित्यन्वयः । (२)प्राभाकरस्य मतेऽभावस्याधिकरणात्मकत्वेनानुभूतौ स्मृतित्वराहित्यं स्मृतित्वप्रतियोगिकमाश्रयस्यानुभूतेः स्वरूपमेवेत्यभिप्रेत्य पृच्छति-स्मृतित्वेति । तज्ज्ञानम् = स्मृतित्वप्रतियोगिकं यदाश्रयस्य स्वरूपं तज्ज्ञानमित्यर्थः । (३) 'तद्विशेषणतया'-इति बहुव्रीहिः, सामान्यविशेषणकतयेत्यर्थः । एवमग्रे धूमत्वविशेषणतयेत्यत्रापि बोध्यम् ।

तथा प्रमाणबाधितत्वाद् दृष्टान्तदार्ष्टान्तिकावनुपपन्नावित्याह–। [b]“दृष्टान्ते”ति ॥ अतिप्रसङ्गमेवाह–। [c]“तथा सती”ति ॥ ननु प्रमेयत्वसामान्यलक्षणप्रत्यासत्त्या विश्वं प्रत्यक्षमेवेत्यत आह–। [d]“एवमि”ति । प्रमेयत्वेन यदि विश्वमेव प्रत्यक्षं तदा सर्वस्य हृदि स्थितं परेण ज्ञायेत; *नच तदपि प्रमेयत्वेन ज्ञायत एवेति वाच्यम्*, घटत्वादिनापि ज्ञानप्रसङ्गात्, घटघटत्वतद्वैशिष्ट्यानां प्रमेयत्वलक्षणप्रत्यासत्त्या सन्निकृष्टत्वात्; *सामान्यलक्षणायाः प्रत्यासत्तेरयं महिमा–यदेव सामान्यं प्रत्यासत्तिस्तत्प्रकारकमेव ज्ञानं तया जन्यते इति प्रमेयत्वेन परहृदयगतज्ञानं, नतु घटत्वेन*,–इति चेत्तर्हि यदि घटत्वमिन्द्रियसन्निकृष्टं, परस्यापि हृदि घट एव, तदा 'घटं जानामी'त्युत्तरापत्तेः;* परमनोगतस्यापि घटस्य तत्र घटत्वेन ज्ञानसत्त्येव तन्मनोगतत्वेन तु तत्र ज्ञानं नास्ति तन्मनोगतत्वस्य सामान्यस्याप्रत्यासत्तित्वात् *,–इति चेन्न, नियामकाभावात्; नहि भासमानत्वे सत्यपि प्रकारं प्रति विशेष(¹) कश्चिदस्ति; * नचानागतपाकप्रवृत्तेर्ज्ञानसाध्यतया तत्र च प्रमाणान्तरस्य तदानीमभावाद्गत्या सामान्यलक्षणाप्रत्यासत्तिरिति वाच्य*, ज्ञानेच्छाप्रयत्नानां समानविषयतामन्तरेणापि समानप्रकारकतयैवोपपत्तेः(²);* नच

(१) अयं भावः,–परमनोगतस्य घटस्य घटत्वेन भाने जिज्ञासायां सत्यां कदाचित् तन्मनोगतत्वेनापि भानं प्रत्युत्तरणं चावश्यकम्, नहि भूतले घटत्वेन घटज्ञानवान् भूतलस्थत्वजलस्थत्वादिजिज्ञासायां तथाविधं प्रकारं न प्रतिपद्यते, प्रकृते तु शतशोऽपि जिज्ञासायां तन्मनोगतत्वं नैव प्रतिपद्यते इति घटत्वेन घटस्य भासमानत्वे तन्मनोगतत्वादिलक्षणं प्रकारान्तरं प्रत्यभासमानत्वं विशेषो न युक्त इति । (२) सामान्यलक्षणप्रत्यासत्तिवादिमते वर्तमानपाकव्यक्तिं पश्यता तद्गतपाकत्वलक्षणसामान्यलक्षणप्रत्यासत्त्याऽनागतपाकव्यक्तिरपि तत्क्षणे दृष्टैव, तथाच तत्र प्रथमत इष्टसाधनताज्ञानं, तत इच्छा, ततः प्रवृत्तिश्चोपपद्यते; स्वाप्तनिकमते तु ज्ञानेच्छाकृतीनां समानविषयतानियम एव नास्ति, समानप्रकारताया एव नियमः, तथा च वर्तमानपाकव्यक्तिदर्शनकाले तद्व्यक्तिमात्रविषयकमेव ज्ञानं, नतु पाकत्वलक्षणसामान्यलक्षणप्रत्यासत्तिबलादनागतपाकव्यक्तिविषयकमपि, कृतिश्चाशित तद्विषयिणीति ज्ञानकृत्योरसमानविषयत्वेऽपि समानपाकत्वप्रकारता न व्याहन्यते इति भावः ।

व्यभिचारशङ्कार्थं सामान्यलक्षणा, नह्यनुपस्थितधूमे वह्निवैयधिकरण्यं शङ्कितु शक्यमित्यनागत(१)धूमज्ञाने सति व्यभिचारशङ्कायाः संभवादिति वाच्यम् *, अयं धूमो वह्निजन्यो न वेति वह्निजन्यत्वसन्देहस्यैव व्यभिचारशङ्कात्वात्, तस्य चोपस्थितधूमे एव संभवात्, नहि सामानाधिकरण्यमात्र(२)कार्यकारणभाव इति भावः ॥

मू० ततश्च स्मृतेरपि [a]तथात्वापत्तेः, तदव्यवच्छेदाद्

[b]विशेषणवैयर्थ्यं च; 'विना विशेष्यमिच्छादावपि प्रसङ्गात् । * स्मृतित्वस्य संसर्गाभावस्तत्र विवक्षितः *,-इति चेन्न, तथाहि 'स्मृतित्वस्य संसर्गाभावः'-इति किमुच्यते ?, किं स्मृतित्वस्य संसर्गाभावः(३) ? उत संसर्गविशिष्टस्य स्मृतित्वस्य ? अथान्यदेव वा किञ्चिदनया वाग्भङ्ग्या विवक्षितम् ?-। आद्ये स्मृतित्वसंसर्गस्यान्योन्याभावः स्मृतावस्तीति स एव प्रसङ्गः(४), नहि स्मृतित्वसंसर्गः स्मृतिः । अत एव न द्वितीयोपि, [d]नहि संसर्गविशिष्टं यत् स्मृतित्वं तदेव स्मृतिव्यक्तिः, ततश्च संसर्गविशिष्टस्मृतित्वेन सह स्मृतिव्यक्तेरन्योन्याभावमादायोक्तदोषाऽनिवृत्तिः ।

---

(१) अनीतानागतेति त्वत्र युक्तं पाठमुत्पश्यामः, उपलक्षणं चानागतपदमतीतस्यापि ।

(२) वह्नित्वावच्छिन्ननिरूपितधूमत्वावच्छिन्ननिष्ठसामानाधिकरण्यलक्षणव्याप्त्यभिन्न एव यद्युपस्थितवह्निधूमयोः कार्य्यकारणभावः स्यात्तदा वह्निजन्यत्वसन्देहस्य व्यभिचारशङ्कात्वेपि तदर्थं सामान्यलक्षणप्रत्यासत्तिरवश्यमपेक्ष्येत न त्वेतदस्तीत्याह-'नहि सामानाधिकरण्यमात्रमि'ति, उपस्थितधूमे उपस्थितवह्निसामानाधिकरण्यस्योपस्थितवह्निधूमीयकार्य्यकारणभावसमनियतत्वात्कथञ्चिदभिन्नत्वेन 'सामानाधिकरण्यमात्रमि'त्युक्तम् । (३) "स्मृतित्वविशिष्टस्य संसर्गस्याऽभावः"-इत्यपि क्वचित्पाठः । (४) स एव प्रसङ्गः=स्मृतावनुभूतित्वप्रसङ्गो विशेषणानर्थक्यप्रसङ्गो वा ।

टी० ॥ [a]"तथात्वापत्ते"रिति । अनुभवत्वापत्तेरित्यर्थः ॥ [b]"विशेषणवैयर्थ्यं चे"ति । स्मृत्यन्यज्ञानत्वमनुभवत्वमुक्तं तत्र ज्ञाने स्मृत्यन्यत्वविशेषणस्य वैयर्थ्यं, विशेषणे सत्यपि स्मृताव-तिव्याप्तेर्दुर्वारत्वादित्यर्थः । यद्वा, प्रमालक्षणे(१)नुभवत्वस्य विशेषणस्य वैयर्थ्यं, स्मृत्यनुभवविवेकाभावादित्यर्थः ॥ ननु तत्त्वविषयत्वमेवास्तु प्रमालक्षणं किमनुभवेन विशेष्येणेत्यत आह-। [c]"विने"ति । एवं सति न केवलं स्मृतावतिव्याप्तिः, किं तर्हि ? इच्छादा(२)वप्यतिव्याप्तिरेवेत्यर्थः । यद्वा, ननु स्मृत्य-न्यज्ञानत्वमित्यत्र ज्ञानमपि विशेष्यं त्यज्यतामित्यत आह-। "विने"ति ॥[d]"नह्री"ति । संसर्गविशिष्टस्मृतित्वस्यान्योन्याभाव: सर्वस्मृतिव्यक्तिष्वनुगत इति विशेषणवैयर्थ्यं तदवस्थमेवेत्यर्थः ॥

सू० [a]एवं तत्र तत्रापि संसर्गविशेषणप्रक्षेपे दोषाऽनिवृत्तिरेव, अनवस्थायां वा पर्यवसानं विशेषणप्रक्षेपपरम्परायाः । [b]* नच वाच्यं स्मृतित्वसंसर्गस्य न संसर्गान्तरेण संबन्धित्वं किंतु स्वभाव एव, ततकुतः परम्परागवेषणं कार्यमिति *, स्मृतित्वसंसर्गस्यान्योन्याभावमादाय कृतस्य प्रसङ्गस्य परिहर्तुं तदानीं सुतरामशक्यत्वात्, [c]संसर्गान्तरविशेषणवचनस्याधिकार्थापर्य्यवसायित्वात्* । [d]किञ्च,(३)तदुभयस्वरूपातिरेकं तत्संसर्गस्यामन्यमानेन स्मृतित्वसंसर्गः स्मृ-

---

(१) "तत्त्वानुभूतिः प्रमा"-इतिप्रमालक्षणे इत्यर्थः ।

(२) इच्छादौ, यथाभूतार्थगोचरेच्छादावित्यर्थः । (३) एवं स्मृतित्वसंसर्गस्य संसर्गाभावमनुभूतावभ्युपगम्य तद्दृष्टान्तेन स्मृतावतिव्याप्तिरवादि सम्प्रति तु सोपि नानुभूतौ सिद्ध्यतीतिलक्षणस्याऽसम्भवदोषमाह-किञ्चेति, तदुभयस्वरूपातिरेकम्=स्मृतित्वस्य यः समवायात्मकः संसर्गो यश्च स्मृतित्वात्मकधर्मसहितो धर्मी (=स्मृतिः) केवलो वा,-एतदुभयस्वरूपातिरेकं, तत्संसर्गस्य=स्मृतित्वसंसर्गस्याऽमन्यमानेनेत्यर्थः । एवं च स्मृतित्वसंसर्गः स्मृति-स्मृतित्व-स्वात्मकसमवायैतत्त्रितयस्वरूपो निष्पन्नः, तथा चानुभूतौ कथं तत्त्रितयात्मकस्य संसर्गस्य निषेधः, स्मृतित्वस्य,

तित्वधर्मि(१)स्वरूपं चेत्येतयोः संसर्गात्मकत्वे व्यवस्थाप्यमानेऽनुभूतौ कथं तादृशस्य संसर्गस्य निषेधः? किमनुभूतेः स्वरूपं नास्ति? उत स्मृतित्वसंसर्गस्य?, ततः कस्य निषेधः? (२)।

टी० ॥ ननु स्मृतित्वसंसर्गस्यान्योन्याभावमादाय स्मृतिषु प्रसक्तो न भवति, यतः (३) स्मृतित्वसंसर्गस्यापि संसर्गाभाव एव स्मृतित्वरहितत्वं, तच्च न स्मृतिषु, तत्र स्मृतित्वसंसर्गस्य विद्यमानत्वादित्यत आह—। a"एवमि"ति। अपरापरसंसर्गप्रक्षेपे चरमसंसर्गस्यान्योन्याभावमादाय स्मृतौ प्रसङ्गनादवश्यमविश्रान्तौ चानवस्थैवेत्यर्थः ॥ ननु स्मृतित्वसंसर्गे संसर्गान्तरं नास्ति, किंतु स्वरूपसंबन्धेनैवाऽसौ संसृष्टः, तथाच नानवस्थेत्यत आह—। b"न च वाच्यमि"ति। स्मृतित्वसंसर्गान्योन्याभावात्संसर्गाभावस्य संसर्गान्तरविशेषणद्वारा कथञ्चिद्भेदो भवेत्तदभावे तु भेदकाभावात्तदन्योन्याभावमादाय सुतरां प्रसङ्ग इत्यर्थः ॥ तदेवाह—। "संसर्गान्तरे"ति ॥ किञ्च, स्मृतित्वराहित्यं—स्मृतित्वसंसर्गनिषेधः, स्मृतित्वसंसर्गश्च तव स्मृतित्व धर्मिस्वरूपं (४)चेत्यत्र पर्यवसन्नं, तादृशश्च स्मृतित्वसंसर्गोऽनुभवस्याप्यस्तीति न तन्निषेधस्तत्र सम्भवतीति पुनरपि विशेषणवैयर्थ्यादिकमेवेत्याह। d"किञ्चे"ति ॥

स्मृतौ स्मृतित्वसमवायस्य, अनुभूत्यात्मकधर्मिणश्चेति त्रयाणामपि यथायथं स्वरूपतः सत्त्वात्, यद्यप्यनुभूतिर्न स्मृत्यात्मकधर्मिस्वरूपा, तथापि धर्मित्वेन धर्मिविवक्षया दोषस्तदवस्थ एवेति भावः। अत एव च न स्मृतित्वसंसर्गस्य संसर्गाभावोऽप्यनुभूतौ, नहि भूतले संयोगेन घटसद्भावकाले घटसंयोगस्याभाव इत्यलमनल्पविस्तरेण। (१) स्मृतित्वधर्मिस्वरूपम्=स्मृतित्वस्य यो धर्मी (स्मृतिः) तत्स्वरूपं; यद्वा, स्मृतित्वं च धर्मी च स्मृतित्वधर्मिणौ तयोः स्वरूपं (स्मृतिस्मृतित्वोभयस्वरूपमितियावत्), विद्यासागरकृतव्याख्यानुसारिपाठे तु स्मृतित्वेतिपदं न दृश्यते, केवलं तदघटित एव "स्मृतित्वसंसर्गो धर्मिस्वरूपं चेत्येतयोः संसर्गात्मकत्वे व्यवस्थाप्यमाने"-इति पाठः। (२) 'द्वयोरपि स्वरूपेण सत्त्वात्'-इति शेषः।
(३) यतः स्मृतित्वरहितत्वं-स्मृतित्वसंसर्गस्यापि संसर्गाभाव एव-इत्यन्वयः।
(४) 'स्मृतित्वं धर्मिस्वरूपं चे'त्युपलक्षणं स्वात्मकसंसर्गस्यापि, स्मृतित्वसंसर्गस्मृतित्वधर्मिस्वरूपैतदुभयात्मकत्वस्यैव प्रक्रान्तत्वात्।

सू० [a]अर्थान्तरभूतस्य च संसर्गस्य निषेधे स्मृतावपि प्रसङ्गस्तदवस्थः, स्मृतौ तस्यार्थान्तरभूतस्य भवतानभ्युपगमात्। स्वरूपमेव तयोः (१)संबन्ध इति हि तत्र भवतोऽभ्युपगमः। [b]अथोच्यते, *अनुभूतिस्मृतित्वसंसर्गयोः स्वरूपसंभवेपि न परस्परसंबद्धबुद्धिजनकत्वं तयोः, तादृक्त्वं (२) च यत्र तयोस्तत्र संबन्धात्मकत्वं स्वरूपयोरुच्यते*,-इति, मैवम्, [c]विशेषोपसंग्राहकासिद्धौ तस्याप्यनुपपत्तेः।

टी० ॥ ननु स्मृतित्वसंसर्गो न निषिध्यते किंतु स्मृतित्वसंसर्गस्यार्थान्तरभूतः संसर्गोनुभवे निषिध्यते तथाच स्मृतित्वरहितत्वं(३)न स्मृतौ किंत्वनुभवे तदस्तीत्यत आह-। [a]"अर्थान्तरभूतस्ये"ति। त्वदभ्युपगमरीत्या स्मृतावप्यर्थान्तरभूतः स्मृतित्वसंसर्गस्य संसर्गो नास्तीति पुनरपि स्मृतौ प्रसङ्गो दुर्वार इत्यर्थः। *स्मृतौ स्मृतित्वमस्त्यनुभूतौ च तदत्यन्ताभावः?*-इति चेत्, स्मृत्यनुभवयोर्विशेषाभिधानमतन्त्रमेव, यतः स्मृतित्वस्याप्यनुभूतित्ववदुपप्लावनीयत्वात् (४); 'अत्यन्ताभाव.'-इति च यद्यात्यन्तिकोऽभावस्तदा स्मृतावपि स्मृतित्वस्यात्यन्तिक एवान्योन्याभावोऽस्तीति प्रसङ्गतादवस्थ्यं, यदि च नित्यः संसर्गाभावोऽत्यन्ताभावः,तदा संसर्गोन्योन्याभावमादाय कृतस्य प्रसङ्गस्यापरिहार एवेति भावः॥ नन्वनुभूतेः स्वरूपं स्वरूपमेव, स्मृतित्वसंसर्गस्यापि स्वरूपं स्वरूपमेव, नच तदुभयं स्वरूपं संबन्धात्मकं, परस्परोपश्लिष्टप्रत्ययजनकयोरेव स्वरूपयोः स्वसंबन्धात्मकत्वाद्, उपश्लिष्टप्रत्ययश्च स्मृत्यैव समं स्मृतित्वसंसर्गस्य नत्वनुभूत्यापीति शङ्कते-। [b]"अथोच्यते" इति॥ स्वरूपविशेषस्मृतौ स्मृतित्वसंसर्गा

---

(१) तयोः = स्मृतिव्यक्तिस्मृतित्वयोः। (२) तादृक्त्वं=परस्परसंबद्धबुद्धिजनकत्वम्। (३)स्मृतित्वरहितत्वम्=स्मृतित्वसंसर्गनिषेधः।

(४) 'अन्योन्याभावसंसर्गाभावभेदव्यवस्थितौ"-इतिकारिकाया अग्रे कियद्दूरे "गृहीतस्य ज्ञानं स्मृतिरिति च स्मृतिलक्षणे धारावाहिकज्ञानेऽतिप्रसक्तिः"-इत्यादिमूलग्रन्थेनोपप्लावनीयत्वादित्यर्थः।

सह यदुपश्लिष्टप्रत्ययजनकत्वं तदुपग्राहकमवच्छेदकं चेन्नास्ति तदा तस्यापि (=उपश्लिष्टप्रत्ययजनकत्वस्यापि) अनुपपत्तिरित्याह—। [c]"'विशेषे"ति ॥

सू० [a]"उपसङ्ग्राहकान्तरोक्तौ तत्सम्बन्धेपि प्रसङ्गेनापरापरोपसङ्ग्राहकगवेषणायामनवस्थापातात्, [b]एतावतापि(१)चानुभूतिस्वरूपे कस्य निषेधो वर्णितः स्यात् ? । * [c]"स्मृतित्वसंसर्गानुभूती संबद्धे'-इत्येवंरूपबुद्धिजनकत्वस्य * ?-इति चेन्न, [d]भ्रान्त्यात्मिकाया ईदृशबुद्धेर्जनकत्वस्य वारयितुमशक्यत्वात् । *यथार्थायाः ?*,-इति चेत्, [e]ईदृशबुद्धेर्यथार्थाया यदि सत्त्वमभ्युपैषि तदानुभूतौ स्मृतित्वप्रसङ्गः, अथ नाभ्युपैषि, किं प्रति(२)तस्या जनकत्वाभावो निरूप्यः?।

टी० ॥ यदि स्मृतौ तदुपश्लिष्टप्रत्ययजनकत्वं प्रति किंचिदवच्छेदकमनुगतं वाच्यं, तदा तेनापि संबन्धः स्वरूपमेव वाच्यं, तत्रापि तदुपग्राहकपरम्परानुसरणेऽनवस्थेत्याह—। [a]"'उपसङ्ग्राहके"ति ॥ अनुभूतौ स्मृतित्वसंसर्गो नास्तीत्यत्रान्योन्याभावमादाय कुतः प्रसङ्गस्तदवस्थ एवेत्याह—। [b]"'एतावतापी"ति । स्मृतित्वसंसर्गनिषेधस्य वर्णयितुमशक्यत्वादिति भावः ॥ ननु 'स्मृतित्वसंसर्गस्मृती संबद्धे'—इतिबुद्धिरस्ति, 'स्मृतित्वसंसर्गानुभूती संबद्धे'—इतिबुद्धिर्नास्ति, तथाचैतादृशबुद्धिजनकत्वस्यैव निषेधोऽनुभवे क्रियते, इति शङ्कते—। [c]"स्मृतित्वे"ति ॥ 'अनुभवोपि स्मृतिरेवे'तिभ्रान्त्यतः 'स्मृतित्वसंसर्गानुभूती संबद्धे'-इतिबुद्धिः संभवत्येवेति तज्जनकत्वस्यानुभवे निषेद्धुमशक्यत्वमिति परिहरति—। [d]"'भ्रान्तौ"ति ॥ 'स्मृतित्वसंसर्गानुभूती संबद्धे'—इतीदृशप्रमाजनकत्वमनुभवे यदि निषिध्यते तदा निषेध्यस्य क्वचिदपि

(१) सम्बन्धबुद्धिजनकत्वमेव स्मृतिस्मृतित्वसंसर्गयोर्न सम्भवति नियामकाभावादित्युक्तमिदानीं तदभ्युपगमेप्यनुभूतिलक्षणस्यासिद्धिरित्याह-एतावतेति । (२) किं प्रति = किं प्रतियोगिनं प्रति, तस्याः = तादृशानुभूतिनिष्ठः ।

सिद्धौ स्मृतित्वसंसर्गोऽनुभवे सिद्ध एवेत्याह–। [c]"ईदृशी"ति ॥

सू० [a]"अथात्यन्तासतीमेतादृशबुद्धिं प्रति जनकत्वाभावावधारणमनुभूतेरभ्युपैषि [b]तदा स्मृतावपि प्रसङ्गः, [c]यावत्यस्तद्बुद्धयस्तत्र जायन्ते तदधिकां तादृशबुद्धिमत्यन्तासतीं प्रत्यजनकत्वस्य स्मृतावपि संभवात् । * [d]सर्वामेव तादृशबुद्धिं प्रत्यजनकत्वमनुभूते,र्नत्वेवं स्मृतेः * ?–इति चेन्न, [e]सर्वतद्व्यक्तिप्रमित्यसम्भवात् । [f]किंच, 'सर्वामि'ति कोर्थः? किमसतीं सर्वाम् ?, उत सतीम् ?, उत सतीमसतीं चेत्युभयीं प्रत्यजनकत्वम् ?। [g]आद्ये द्वितीये च स्मृतावपि तदजनकत्वमस्त्येव, नहि (१) 'स्मृतित्वसंसर्गस्मृती संबद्धे'–इति यावत्यः स्मृतिव्यक्तिषु बुद्धय उत्पद्यन्ते ताः प्रति प्रत्येकं स्मृतिव्यक्तिषु जनकत्वमस्ति (२) ।

टी० ॥ नन्वेतादृशी बुद्धिः क्वचिदपि नास्त्यत एवानुभूतौ तादृशबुद्धिजनकत्वं निषिध्यते इति शङ्कते– [a]"अथे"ति ॥ अत्यन्तासत्यास्तादृशबुद्धेर्जनकत्वं स्मृतावपि नास्तीति स एव प्रसङ्ग इति परिहरति–। [b]"तदे"ति ॥ ननु यथाऽनुभूतौ स्मृतित्वसंसर्गज्ञानमसत् न तथा स्मृतौ, तथाच कथमत्यन्तासत्तादृशबुद्धिं प्रत्यजनकत्वं स्मृतावपीत्यत आह–। [c]"यावत्य"इति । स्मृतौ स्मृतित्वसंसर्गबुद्धयः सत्यो भवन्तु तेनैवा (३)सतीं तादृशबुद्धिं प्रत्य-

(१) असतीं सर्वां प्रत्यजनकत्वपक्षस्य (प्राथमिकस्य) स्मृतौ स्फुटत्वात्समुपेक्ष्य सतीं तादृशबुद्धिं प्रत्यजनकत्वपक्षं (द्वितीयं) व्याचष्टे–न हीति । (२) 'प्रत्येकं, भिन्नितात् (सर्वस्मात्) भिन्नमि'तिमते सर्वां निरुक्तबुद्धिं प्रति सर्वस्याः स्मृतेर्जनकत्वेऽपि नैकैकस्याः स्मृतेर्जनकत्वमिति भावः । यद्वा यावन्निरुक्तबुद्धिं प्रति तत्तद्विषयीभूतप्रत्येकस्मृतिव्यक्तेर्विषयविधया जनकत्वेऽपि तत्तद्बुद्ध्यविषयीभूतप्रत्येकस्मृतिव्यक्तेरजनकत्वमेव, नहि 'चैत्रीयस्मृतित्वसंसर्गस्मृती सम्बद्धे'–इत्याकारकबुद्धिजनकत्वं मैत्रीयस्मृतिव्यक्तेरस्तीति भावः । (३) तेनैव=स्मृतौ स्मृतित्वसंसर्गबुद्धेः सत्त्वेनैव, असतीम्=अनुभूत्यादावसतीं, तादृशबुद्धिं=स्मृतित्वसंसर्गबुद्धिमतीत्यर्थः ।

जनकत्वं स्मृतौ सुलभमित्यर्थः ॥ ननु बुद्धौ सत्त्वमसत्त्वं वा विशेषणमतन्त्रं, किन्तु सर्वाः स्मृतित्वसंसर्गोपश्लिष्टबुद्धीः प्रति जनकत्वमनुभूतौ निषेधाम इत्याह-। [d]"सर्वामि"ति ॥ सामान्यलक्षणया प्रत्यासत्त्या सर्वतादृशबुद्धिजनकत्वनिषेधः प्रतीयेत, सैव नास्तीत्याह-। [e]"सर्वतद्व्यक्ती"ति ॥ ननु सामान्यलक्षणायां त्वदनभ्युपगममात्रमतन्त्रमित्यनुशयेनाह-। [f]"किंचे"ति ॥ एकैकस्याः स्मृतिव्यक्तेः सतीमसतीं वा तादृशबुद्धिं सर्वां प्रति जनकत्वं न सम्भवतीति स्मृतिरपि न स्मृतिः स्यादित्याह-। [g]"आद्ये द्वितीये चे"ति ॥

सू० [a]"काञ्चित्सतीं प्रति च तदजनकत्वं प्रागेव दूषितं, तृतीये च नानुभूतावपि तदजनकत्वं, सत्यासत्यतादृशबुद्धेर्भावेनाभावेन च सतीमसतीं प्रत्यजनकत्वस्यासम्भवादिति। * 'स्यादेतत्, स्मृतित्वस्यान्योन्याभावमादाय याऽतिप्रसक्तिर्दर्शिता सा नोपपद्यते, भेदाभेदवादिमते स्मृतित्वभेदाभेदस्य स्मृत्या सहाऽभ्युपगमात्, ययोर्भेदाभेदस्तयोस्तत्रान्योन्याभावानभ्युपगमात्(१)* । न ।

टी० ॥ नन्वेकैकस्याः स्मृतिव्यक्तेः सर्वां प्रति जनकत्वं मास्तु काञ्चिन्मतिं सतीं प्रति तु तद(२)स्तीत्यत आह। [a]"काञ्चिदि"ति। अनुभूतौ यथार्थतादृशबुद्धिसिद्धौ स्मृतित्वापत्तिदोषस्य प्रागभिधानादित्यर्थः ॥ [b]"तृतीये"इति। जनकत्वनिरूपकतादृशबुद्धेः सत्त्वेऽनुभूतौ तदजनकत्वम्?, असत्त्वे च निरूपकाप्रसिद्ध्या तदजनकत्वमशक्यग्रहमित्यर्थः। प्रत्येकमजनकत्वमादाय स्मृतौ प्रसङ्ग(३)मस्त्येव दोषान्तरमेतत्। यद्यपि 'स्मृतित्वसंसर्गानुभूतौ न सम्बद्धे'-।इत्येवं प्रतीयमानाभावप्रतियोगिनः सम्बन्ध-

(१) अन्योन्याभावानभ्युपगमात्=आत्यन्तिकभेदाऽनभ्युपगमात्, (अभेदसहिष्णुभेदानभ्युपगमादिति यावत्) अभेदसहिष्णुर्भेदस्त्वङ्गीक्रियते एव। (२) "अनुभूतेस्तु काञ्चिदपि स्मृतित्वसंसर्गबुद्धिं सतीं प्रति जनकत्वं नास्ति"-इति शेषः। (३) प्रसङ्ग=अनुभवत्वप्रसङ्गे।

स्य निषेधे ऽनुभूतौ, ननु स्मृतावपीत्यनुभवसिद्धमेतत्, स च सम्बन्धः स्वरूपं वा सम्बन्धान्तरं वेत्यन्यदेतत्; किंच 'स्मृतित्वं स्मृतौ', 'स्मृतित्वसमवायः स्मृतौ', 'स्मृतित्वसंसर्गः स्मृता' वि'त्यादिप्रतीतिविषयीक्रियमाणः स्मृतित्वसंसर्गोऽनुभूतौ निषिध्यते; यद्वा, स्मृतिस्मृतित्वसंसर्गस्वरूपं नानुभव इति निषेधः सम्भवत्येव, तथापि विचार्यमाणमिदमपि हस्तसमावरणमेवेति भावः ॥ भट्टमतेनोपपत्तिं शङ्कते—। "'स्यादेतदि"ति । स्मृतित्वरहितत्वमि'त्यत्र स्मृतित्वाभाववत्त्वं विवक्षितं, तच्च स्मृतित्वान्योन्याभाववत्यां स्मृतावपि गतम्—इति यदुक्तं तन्नोपपद्यते, यतः स्मृतित्वस्य स्मृत्यभिन्नतया(१) तदन्योन्याभावस्य तत्राभावादिति शङ्कार्थः ॥

सू० "कथं ह्यवधार्य्यं स्मृतित्वस्य भेदाभेदः स्मृत्या, नानुभूत्या—इति?। *"अनुभूत्या सह तद्विशिष्टप्रमाया अभावात् ?*—इति चेन्न, 'किं सत्या वा? किमसत्या वा? इत्याद्युक्तविकल्पदोषात् । "*प्रागभावप्रतियोगिन्याः? *—इति चेन्न, 'अनुभूतौ तादृश्याः स्वीकारेणानुभूतेस्तथात्वापातात् । 'स्मृतिस्मृतित्वयोरन्योन्याभावाभावश्चा(२)न्योन्यात्माऽनुभूतावपि तुल्यः, नहि स्मृतित्वान्योन्याभावेऽनुभूतिः, इ'त्युक्तमावर्तते ।

———.◇:———

टी० ॥ स्मृतेरिवानुभूतेरपि धर्मः स्मृतित्व कुतो न भवति? तथाचानुभूत्यभिन्नमपि स्मृतित्वमिति तथाप्यवृत्तेस्तदन्योन्याभावस्य तत्राप्यभावादिति परिहारमाह—। "'कथं ही"ति । अनुभूतौ स्मृतित्वरहितत्वस्योपपादयितुमशक्यत्वादिति भावः ॥ नन्वनुभूतिमादाय स्मृतित्वविशिष्टप्रमा नास्तीति न स्मृतित्वमनुभूतेरपि धर्म इति न भेदाऽभेद इतिशङ्कामाह—। "'अनुभू-

(१) स्मृत्यभिन्नतया=स्मृतिभेदरहितत्वभेदवत्तया, तदन्योन्याभावस्य=स्मृतित्वात्यन्तिकभेदवत्त्वस्य, तत्र=स्मृतौ । (२) अन्योन्याभावाभावश्च=आत्यन्तिकभेदाभावश्च, अन्योन्यात्मा=अन्योन्याऽभावस्वरूप·

त्ये"ति ॥ स्मृतित्वानुभूत्योर्वैशिष्ट्यप्रमा यदि सती निषिध्यते तदा तत्सिद्धावनुभूतौ स्मृतित्वं सिद्धम्, अथासती निषिध्यते तदा स्मृतावपि न स्मृतित्ववैशिष्ट्यं, तत्राप्य(१)सत्याः प्रमाया अभावात्–इतिपरिहारमाह–। c"किं सत्या"इति । ननु सत्यसती वा प्रमेति न ब्रूमः, किन्त्वनुभूतिस्मृतित्वयोर्वैशिष्ट्यप्रमा प्रागभावप्रतियोगिनी नास्ति यथा स्मृतिस्मृतित्वयोरितिशङ्कामाह–। d"प्रागभावे"ति ॥ प्रागभावप्रतियोगिनी या तादृशी(२)प्रमा सा नास्तीति यद्यर्थस्तदा प्रागभावप्रतियोगित्वं तादृशप्रमायाः सिद्धमेवेति तदुत्पाद आवश्यक इति सिद्धमनुभूतौ स्मृतित्ववैशिष्ट्यम्, अथ तादृशी प्रमा(*)प्रागभावप्रतियोगिनी न भवतीत्यर्थः तथापि प्रमायाः सिद्धावनुभूतौ स्मृतित्वं सिद्धमेवेतिपरिहारमाह–। e"अनुभूतावि"ति ॥ दूषणान्तरमाह–। f"स्मृती"ति। स्मृतिस्मृतित्वयोरन्योन्याभावविरहो(३)भेदाभेदवादे यथाऽभ्युपगम्यते तथाऽनुभूतावपि स्मृतित्वान्योन्याभावविरहोऽस्त्येव, स्मृतित्वान्योन्याभावविरहो हि तदन्योन्याभावान्योन्याभावरूपः, सोऽनुभूतावपि समानः, नहि स्मृतित्वान्योन्याभाव एवानुभूतिरित्यर्थः ॥ g"उक्तमि"ति । यथा स्मृतित्वराहित्यं तदन्योन्याभाव(४)इत्युक्तं तथा स्मृतित्वान्योन्याभावराहित्यमपि तथैव वक्तव्यमन्योन्याभावसंसर्गाभावयोर्भेदस्य त्वयाऽद्याप्यनुपपादनादित्यर्थः ॥

सू० h"*अथ(५)मा भूद् भेदाभेदमादाय परिहारस्तथापि 'इदं तन्न भवति' 'इह तन्नास्तीतिप्रतीतिसाक्षिक एवान्योन्याभावसंसर्गाभावयोर्भेदः ? *–इति चेन्न,

(१) तत्रापि = स्मृतावपि, असत्याः = अनुभूत्याद्यवच्छेदेनासत्याः (स्मृतित्ववैशिष्ट्यप्रमायाः) अभावादित्यर्थः । (२) तादृशी प्रमा = अनुभूत्यनुयोगिकत्वविशिष्टस्मृतित्ववैशिष्ट्यप्रमा । (३) अन्योन्याभावविरहः = आत्यन्तिकभेदाभावः । (४) तदन्योन्याभावः = स्मृतित्वान्योन्याभावः; तथैव = स्मृतित्वान्योन्याभावान्योन्याभावरूपम् ।

(५) { अन्योन्याभावसंसर्गाभावयोर्भेदखण्डनम् । प्रक्रम्यते निबन्धेऽस्मिन् भङ्गार्थं भेदवादिनाम् ॥ १८ ॥ }

[b]प्रतियोगिरूपोपाध्यवैचित्र्या(१)दभावे जात्यादिभेदानभ्युपगमाज्ज्ञानयोर्भेदबुद्धिरेव प्रामाण्यमनश्नुवाना कूटसाक्षिणी(२)ति तदनादरणात् । *[c]नच स्वप्रतियोगि [d]समानकालसमानाधिकरणोऽभावोऽन्योन्याभावः, [e]तदन्योन्याभाववाँश्च तदभावः संसर्गाभावः*, [f]यथासंभवमात्माश्रयाद्य-ऽननुभव-स्वभेदाऽननुगम-तत्तदवगमानभ्युपगमानामनुत्तरणीयत्वप्रसङ्गात् ।

टी० ॥ अन्योन्याभावसंसर्गाभावयोः प्रतीतिवैलक्षण्याद् वैलक्षण्यमिति शङ्कते—। [a]"अथे"ति ॥ [b]"प्रतियोगी"ति । प्रतियोगिभेद, उपाध्यन्तरभेदो, जातिभेदो वा, यदि प्रत्येतव्यभेदको नास्ति तदा प्रतीतिवैलक्षण्यमतन्त्र(३)मित्यर्थः ॥ प्रतीतिवैलक्षण्यबलादायातमुपाधिवैलक्षण्यमाशङ्क्य निराकरोति—। [c]"नचे"ति ॥ प्रागभावप्रध्वंसाभावाभ्यामतिव्याप्तिवारणायाह—। [d]"समानकाले"ति । अत्यन्ताभावेऽतिव्याप्तिवारणायोक्तं—"समानाधिकरणे"ति, आकाशाद्यन्योन्याभावोपग्रहश्च यथाकथञ्चित्तदधिकरणविवक्षया(४), बदरसंयोगस्य स्वप्रतियोगिना बदरेण कुण्डे सामानाधिकरण्यमत उक्तम्—"अभाव"इति, प्रतियोगिपदस्य (५)निरूपकपरत्वात्; स्वाभाव(६)विरहात्मपरतायान्त्वभावपद-

(१) 'भूतले घटो नास्ति' 'भूतलं घटो न' इत्युभयत्राप्यन्योन्याभावसंसर्गाभावयोर्घटस्य प्रतियोगिन एकत्वात्तयोर्भेदो न स्यादेवमन्यत्रापीति भावः । (२) कूटसाक्षिणी = मिथ्याबुद्धिसाक्षिणी । (३) प्रतीतिवैलक्षण्यं हि प्रत्येतव्यवैलक्षण्याधीनमिति प्रतीतिवैलक्षण्यात्प्रागन्योन्याभावसंसर्गाभावरूपप्रत्येतव्यवैलक्षण्ये तदनियामकमेवेति भावः । (४) वृत्त्यनियामकसम्बन्धेन सम्बन्धित्वविवक्षयेत्यर्थः । (५) ननु बदरस्य कथं संयोगं प्रति प्रतियोगित्वं ? प्रतियोगिन उदयनाचार्य्यमतेन स्वाभावविरहात्मत्वात् बदरसंयोगस्य च बदराभावरूपत्वाभावात्, नापि च बदरसंयोगाभावो बदरमित्यत आह—प्रतियोगीति । (६) ननु बदरसंयोगस्य प्रतियोग्येव बदरं न भवति, आचार्य्यमते प्रतियोगिनः स्वाभावविरहात्मत्वाद् बदरस्य च संयोगाभावरूपत्वाभावात्, तथाच न बदरसंयोगेऽतिप्रसङ्गः इत्याह—स्वाभावेति, अतिरिच्यते = अधिकं भवति, तथाच न देयमेवाभावपदम् ।

मतिरिच्यते, यत्किञ्चित्प्रतियोगिसमानकालसमानदेशत्वमत्यन्ताभावस्यापीत्यत उक्तं–"स्वे"ति ॥ "तदन्योन्याभाववानि"ति । तद्भिन्न इत्यर्थः ॥ "यथाक्रममि"ति । अभावत्वं (१)हि भावभिन्नत्वं, तच्च भावान्योन्याभाववत्त्वमित्यन्योन्याभावेनैवान्योन्याभावनिरूपणादात्माश्रयः; अथाभावत्वं भावत्वात्यन्ताऽभाववत्त्वं, तदाऽत्यन्ताभावस्य संसर्गाभावत्वात् तस्य चान्योन्याभावाभाववत्त्वेन(२)त्वयाऽभिधानादन्योन्याभावनिरूप्यः संसर्गाभावस्तन्निरूप्यश्च पुनरन्योन्याभावः-इत्यन्योन्याश्रयः; अथाभावत्वं, भावभिन्नत्वं तच्च भाववैधर्म्यं, तच्च तदन्य(३)वृत्तिधर्मात्यन्ताभाववत्त्वं, तदन्यत्वं च तदन्योन्याभाववत्त्वमिति स्वापेक्षाऽपेक्षित्वेन(४) चक्रकम्; अथाभावत्वं भावविरोधित्वं, विरोधित्वंच धर्मो धर्मिभिन्नः, स च येन भेदेन भिन्नः सोऽन्योन्याभावो वाच्यः, स यदि स्ववृत्ति(५)स्तदात्माश्रयो,ऽन्योन्यवृत्तिस्तदान्योन्याश्रयो,ऽपरापराभ्युपगमे चानवस्था; यद्वा अन्योन्याभावस्यान्योन्याभावोस्ति? न वा? आद्ये, स यदि स्वरूपमेव, तदा स्वनिरूप्यत्वादात्माश्रयः अथापर, स्तदा तस्याप्यन्योन्याभावो यदि पूर्व एव, तदान्योन्यनिरूप्यत्वेऽन्योन्याश्रयः; अथ प्रथमान्योन्याभावादन्य एव द्वितीयान्योन्याभाव,स्तदा तस्यापि यदि प्रथम एव, तदा चक्रक; यदि प्रथमादन्यः, तदा

---

(१) 'स्वप्रतियोगिसमानकालसमानाधिकरणो ऽभाव'–इत्यन्योन्याभावलक्षणस्यमभावत्वमित्यर्थः । (२) अन्योन्याभावाभाववत्त्वेन = अन्योन्याभावभिन्नत्वेन । (३) तदन्येति, अभावान्यभाववृत्तिभावत्वरूपधर्मात्यन्ताभाववत्त्वमित्यर्थः । (४) चक्रकम्–भावभिन्नत्वमभावान्यवृत्तिधर्मात्यन्ताभाववत्त्वघटकीभूतमभावान्यत्वमभावान्यत्वं चाऽन्योन्याभावमन्योन्याभावश्च पुनर्भावभिन्नत्वमपेक्षते इति चक्रकमित्यर्थः । स्वापेक्षापेक्षित्वेन,स्वं = भावभिन्नत्वं, तदपेक्षः परम्परया (अभावान्यत्वद्वारा) अन्योन्याभावः, तदपेक्षित्वेन भावभिन्नत्वस्येत्यर्थः । यद्वा, स्वं = चक्रकघटकत्रयमध्ये द्वितीयम् (अभावान्यत्वम्) तदपेक्षोऽन्योन्याभावस्तदपेक्षित्वेन भावभिन्नत्वस्येत्यर्थः । स्वापेक्षापेक्षितत्वेनेति पाठे तु न क्लिष्टकल्पना । (५) स्ववृत्तिः = स्वात्मकेन भेदेन धर्मिणो भिन्नः ।

पञ्चषष्ठाद्यभ्युपगमे(1) यदि पराावृत्तिस्तदा चक्रकम्; अपरावृत्तौ, चानवस्था; तदुत्तरान्योन्याभावाननुभवश्च; 'स्वप्रतियोगी'त्यत्र स्वपदेन विशिष्य तत्तदन्योन्याभावाभिधानेऽननुगमः; तस्य-तस्याऽन्योन्याभावस्याऽसर्वज्ञेनावगमो नाभ्युपगम्यते(2)इत्यर्थः। यदा स्वशब्देनान्योन्याभावाभिधानं तदा तेनैव तन्निरूपणे आत्माश्रयः; प्रतियोगिपदेन च यद्यन्योन्याभावविरोध्यभिधीयते तदात्माश्रयः;–इत्याद्युन्नेयम् । यद्यपि प्रतीतिवैलक्षण्यं प्रत्येतव्यवैलक्षण्याऽविनाभूतं, तदेव चात्रोद्देश्यं, विशिष्य वैलक्षण्यानभिधानेपि न किञ्चिदनिष्टं, नहीक्षुक्षीरगुडादिमाधुर्याणां विशिष्यानभिधानमात्रेण निवृत्तिः । किन्तु, प्रतीतिविशेष एव लक्षणमुभयोः संभवति, संभवति च तादात्म्यावच्छिन्नप्रतियोगिकत्वं संसर्गावच्छिन्नप्रतियोगिकत्वमुभयोः प्रत्येकं वैचित्र्ये प्रतीतिवैचित्र्याहृतं, तथापि हस्तसमावरणमेतत्, 'संविदेव हि भगवती वस्तूपगमे नः शरणम्'–इत्यस्यापि भयोपप्लावनीयत्वात्; तथाच वक्ष्यते–"नाऽत्यापत्त्या प्रमामात्रात्ते तेऽर्थाः स्वीक्रियोचिताः"–इत्यादीति भावः ॥

मू० " * ननु 'संसर्गप्रतियोगिको निषेधः संसर्गाभावः, तादात्म्यप्रतियोगिकश्च तादात्म्याभावः–इत्युक्ते एव न भिन्नता तयोः, 'यो हि संसर्गतादात्म्यस्य निषेधः स संसर्गनिषेध एव न भवति, तादात्म्यप्रतियोगिकत्वात् * ?–इति नैवम्, "द्रव्यगुणकर्मणां समवायिकारणेषु हि तेषां प्रध्वंसाः नैवं संसर्गाभावाः स्युः, संसर्गप्रतियोगित्वे तु संसर्गस्य समवायस्वरूपतया समवाया ऽनित्यत्वप्रसङ्गात् । 'किंच,

(१) "पञ्चषष्ठाद्यभ्युपगमे"–इति तु प्रायः पुस्तकेषु प्रतीयमानः प्रामादिकः पाठो ज्ञेयः। पञ्चषाद्यभ्युपगमे–इति तु युक्तः पाठः,यदि तु यथोक्तपाठे एव श्रद्धाऽऽकूतं तदा तु पञ्चभिर्युक्तः षष्ठ आदिर्येषामित्येवं कथञ्चिद्विगृह्य । निर्वोढव्यम् । (२) नाभ्युपगम्यते,–केनापि शास्त्रकृता न स्वीक्रियते इत्यर्थः। नाऽभ्युपगम्यते इत्यस्य असर्वज्ञेन इत्यनेनान्वये तु नानुव्यवसीयते इत्यर्थः।

तर्हि संसर्गान्योन्याभावौ द्वावपि न घटादिप्रति-
योगिकाविति घटादेः कालादिवन्निरवधित्वापातः, [f]संसर्गतादात्म्ययोश्चाविशेषितयोर्निषेधे सामान्यत
एव तयोरुच्छेदः स्यात्, [g]एवं यद्यदेव प्रतियोगि
वाच्यं तत्तत्स्वरूपत एव न स्यात् ।

टी० ॥ उक्तिमसम्भवमात्रेण शङ्कते—। [a]"नन्वि"ति ॥ [b]"उक्ते एवे"ति । उक्ते सत्यवेत्यर्थः । मिश्रता = एकत्वम् ॥ [c]"यो ही"ति । स्मृतित्वसंसर्गान्योन्याभावमादाय स्मृतौ यः प्रसङ्गः कृतः स तदा भवेत् यदि स्मृतित्वसंसर्गान्योन्याभावः संसर्गाभावो भवेदपितु तादात्म्याभाव एवासौ, स्मृतित्वसंसर्गतादात्म्यप्रतियोगित्वादित्यर्थः ॥ यदि संसर्गप्रतियोगिकोऽभावः संसर्गाभावः स्यात्तदा द्रव्यादीनां समवायिकारणगतौ ध्वंसप्रागभावौ संसर्गाभावौ न स्यातामित्याह—। [d]"द्रव्ये"ति । यद्यपि समवायनित्यत्वेऽपि रूपादिनिरूपितत्वावच्छिन्नस्य समवायस्यानित्यत्वमेव, विशिष्टस्यान्यत्वात्(१); तथाच रूपसमवायो ध्वंसते एव, अत एव वायौ स्पर्शसमवाये सत्यपि रूपसमवायो नास्तीति, तथापि नित्यमपि विशेषणान्तरावच्छिन्नं ध्वंसते इत्यनुपपन्न(२)मेवेति भावः ॥ यदि च संसर्गप्रतियोगिक एवाभावः संसर्गाभावस्तदा घटादयो नाभावप्रतियोगिन इति देशभेदेन तेषामनिषेधे वैभवं, कालभेदेन तेषामनिषेधे नित्यत्वमपि, इति पदार्थवैचित्र्यं साधु त्वया व्युत्पादितमित्याह—। [e]"किंचे"ति । दोषान्तरमाह—। [f]"संसर्गे"ति । घटादीनां प्रतियोगिकोटावप्रवेशे संसर्गमात्रं तादात्म्यमात्रं च निषिध्येतेति ते(३)क्वचिदपि देशे काले वा न स्यातामित्यर्थः ॥ घटादीनामपि स्वरूपेण प्रतियोगित्वे समानमिदं

(१) 'विशिष्टं शुद्धादतिरिच्यते'—इतिमते विशिष्टसमवायस्य शुद्धसमवायादतिरिक्तत्वादित्यर्थः, तथाच रूपसमवायः=रूपनिरूपितत्वावच्छिन्नः समवायः, ध्वंसते=विनश्यत्येव । (२) अनुपपन्नमेवेति, ब्राह्मणत्वविशेषणावच्छिन्नस्य गौडादेर्दण्डादिविशेषणान्तरावच्छिन्नत्वेनाऽगौडत्वादेर्लोकेऽदर्शनादित्याशयः । (३) ते = संसर्गतादात्म्ये ।

दूष(१)णमित्याह—। g"एवमि"ति ॥

मू० a तस्यापि संसर्गं प्रति धावने च तदक्षतं, b संसर्गानवस्था, c शेषोच्छेदात्पूर्वपूर्वोच्छेदो वा स्यात् ।

टी० ॥ ननु स्यादेव यदि संसर्गः स्वरूपत एव निषिध्येत, किन्तु संसर्गस्यापि संसर्ग एव निषिध्यते, तथाच न संसर्गस्वरूपविलोप इत्यत आह—। a"तस्यापी"ति । यथा घटस्य संसर्गो निषिध्यते इति घटस्वरूपं देशतः कालतश्चाक्षतं तथा संसर्गस्य संसर्गे निषिद्धे प्रथमसंसर्गस्वरूपमक्षतं स्यात्, तथाच घटवत् तत्संसर्गोपि निरवधिः स्यादित्यर्थः ॥ दोषान्तरमाह—। b"संसर्गानवस्थे"ति । पूर्वपूर्वसंसर्गनिषेधार्थमुत्तरोत्तरसंसर्गापेक्षणे संसर्गानवस्था स्यादित्यर्थः ॥ अथ क्वचिद्गत्वा संसर्ग एव निषेध्यो नतु तस्यापि संसर्गान्तरमिति नानवस्था, तदा यः संसर्गो निषेध्यः स स्वरूपत एव न स्यात्तन्निषेधे च तत्पूर्वः, एवं तत्पूर्व, संसर्गो न भवेदिति पुनरपि संसर्गमात्रविलोप इत्याह—। c"शेषे"ति । यद्यपि संसृष्टो घटो यत्र निषिद्ध्यते स संसर्गाभावः, संसृष्टनिषेधश्च घटतत्संसर्गयोर्निषेधः, तथाच घटसंसर्गनिषेधनान्तरीयको घटनिषेधः संसर्गाभावः, तदनान्तरीयकघटनिषेधोऽन्योन्याभावः—इति वैषम्यं, तथापि संसर्गप्रतियोगिकसंसर्गाभावे संसर्गाऽऽनन्त्यापत्तिरिति भावः ॥

मू० *अथ a न प्रतियोग्यनुयोगिनो(२)स्तथात्वं विरोधः, किन्तु सहभावाभावौ,ऽतः b तन्मात्रं न स्यात्, c नतु तन्मात्रमेव न स्याद् ?*,—इति चेन्न, d अनुयोगिनि प्रतियोग्यापत्तेः । * e तथाप्रमाऽभावात्कथं तथाऽऽस्ताम् ? *—इति चेन्न ।

(१) घटादयोपि क्वचिद्देशे काले वा न स्युरित्याकारकं दूषणमित्यर्थः ।

(२) प्रतियोग्यनुयोगिनोः (=भावाभावयोः) तथात्वं (स्वरूपभूतो विरोधो) न, किन्तु सहभावाभावः=सहानवस्थानं विरोधः, अतः तन्मात्रं=सहभावमात्रं, तयोर्भावाभावयोर्न स्यात् न तु तन्मात्रमेव=स्वरूपमेव तयोर्न स्यादिति, किन्तु स्यादेवेत्यर्थः ।

टी० ॥ ननु संसर्गतादात्म्ययोरविशेषितयोर्निषेधे सामान्यत एव तयोरुच्छेदस्तदा स्याद्यदि निषेधेन सह प्रतियोग्यनुयोगिभावो(१)विरोधो भवेत्(२), किन्तु सहानवस्थानं विरोधः तथाच यत्र संसर्गस्य तादात्म्यस्य वाऽभावस्तत्र ते न स्यातामन्यत्र तु स्यातामेवेति शङ्कते—। [a]"न प्रतियोग्यनुयोगिनोरि"ति ॥ [b]"तन्मात्रमि"ति। सहभावमात्रमित्यर्थः ॥ [c]"ननु तन्मात्रमि"ति। प्रतियोगि(३)मात्रमित्यर्थः ॥ यदि प्रतियोग्यनुयोगिभावो विरोधः प्रतियोगिना सहाभावस्य नेष्टस्तदाऽनुयोगिन्यभावे प्रतियोगिनो घटादेराप(४)त्तिरित्याह—। [d]"अनुयोगिनी"ति। यद्यपि प्रतियोग्यापत्तिर्न तदुत्पत्तिः, घटाभावे घटोत्पत्तिसामग्रीविरहात्; नापि प्रतियोगिप्रमोत्पत्तिः, अभावे प्रतियोगिमत्तया प्रमाकारणाभावात; नापि प्रतियोगिनो वृत्तिरापत्तिः, अभावस्य संयोगसमवाययोरभावात्; अन्यथा(५)रूपरसावविरुद्धाविति तयोरन्योऽन्यस्मिन्नुत्पत्तिस्थितिप्रसङ्गाः स्युः, तथापि प्रतियोग्यनुयोगिभावो यदि न विरोधः तदा परस्परविरहरूपत्वं तयो(६)र्न स्यात् गोत्वाश्वत्वयोरिवेति भावः ॥ अनुयोगिनः प्रतियोगिमत्तया प्रमा नास्तीति कथमनुयोगिनि प्रतियोग्यापद्यतामित्याह—। "तथे"ति ॥

मू० [a]तथाप्रमाऽभावमूलकस्य विरोधस्य सहानवस्थानस्य नियमनभङ्गात्-प्रतियोग्यनुयोगिभावादन्यः कस्तयोर्विरोः स्यात्ध ? । * [b]तथा न प्रमीयमाणत्वमेव

(१) प्रतियोग्यनुयोगिभावो विरोधः = प्रतियोग्यभावयोः स्वरूपविरोधः, स चाभाव प्रतियोगिस्वरूपं न, प्रतियोगी चाभावस्वरूपं नेत्याकारकप्रतीतिसाक्षिकः। अनुयोगी प्रकृते सर्वत्राभावो ग्राह्यः।

(२) 'विरोधो भवेदि'त्यतोऽग्रे 'प्रतियोगिनः'-इति शेषः।

(३) 'प्रतियोग्यनुयोगिमात्रमि'ति तु युक्तः पाठः, उपलक्षणं वा प्रतियोगिपदमनुयोगिपदस्यापि। (४) घटादेरापत्तिस्तादात्म्येन ज्ञेया। (५) अन्यथा, सामग्र्यादिकमन्तरापि सामान्यतोऽविरुद्धत्वमादायाऽन्यस्मिन्नन्यदीयोत्पत्तिस्थितिप्रसक्त्यापादने—इत्यर्थः।

(६) तयोः= प्रतियोग्यनुयोगिनोः, प्रतियोगित्वनुयोगित्वयोर्वा।

स: *?-इति चेन्न, ᶜअतिप्रसङ्गात्। * ᵈनियमेन *?-इति चेन्न, जात्या नियमाभ्युपगमात्-

टी० अनुयोगिनि(१)प्रतियोगी कदाचिन्न प्रमीयते न वा कदाचिदनुयोगिसामानाधिकरण्येन प्रतियोगी प्रमीयते तत्र(२) सहभावप्रमाविरहः सहानवस्थाननियमलक्षणेन विरोधेनोपपाद्यतामनुयोगिवृत्तिताप्रमाविरहोपपादनार्थं तु प्रतियोग्यनुयोगिभावलक्षण एव विरोधोऽनुसरणीयः, सहानवस्थानलक्षणस्य तत्राकिञ्चित्करत्वात्, तस्मिन्सत्यपि तादृशप्रमायाः प्रसक्तत्वेन(३)नियमभङ्गादित्याह-। ᵃ"तथाप्रमाऽभावे"ति। नहि यस्मिन्सति यदापद्यते तदभावे तन्नियामकमिति भावः ॥ ननु प्रतियोग्यनुयोगिनोः साहित्येनाधाराधेयभावेन चाऽप्रमीयमाणत्वमेव विरोधो, नतु प्रतियोग्यनुयोगिभाव इति शङ्कते-। ᵇ"तथा ने"ति ॥ तथा न प्रमीयमाणत्वं कदाचित्पटमहारजनयोरपीति तयोरपि विरोधः स्यादित्याह-। ᶜ"अतिप्रसङ्गादि"ति ॥ ननु यज्जातीययोः कदापि तथा न प्रमीयमाणत्वं तयोर्विरोधः, पटमहारजनयोस्तु कदाचिद्विशिष्टतया प्रमीयमाणत्वमेवेति नातिप्रसङ्ग इत्याह-। ᵈ"नियमेने"ति ॥

सू० ᵃव्यक्त्योरविरोधापत्तेः। * ᵇतथा न(४) प्रमातुमनौपाधिकी योग्यता* ?,-इति चेत्, ᶜसैव मेयगता योग्यताऽनुयोगिप्रतियोगित्वादन्या का समर्थिता स्यात्?। * ᵈस्वरूपमेव ?, *-इति चेन्न,

टी० ॥ नहि ययोर्व्यक्त्योर्नित्यत्वानित्यत्वयोर्भावत्वाभा-

(१) अनुयोगिनि=अभावस्वरूपे, प्रतियोगी घटादिस्तादात्म्येन कदाचिन्न प्रमीयते-इत्यर्थः। (२) तत्र=तयोर्द्वयोः प्रतियोग्यनुयोगिभावसहानवस्थानलक्षणविरोधयोर्मध्ये। (३) द्रव्यगुणयोः सहानवस्थानलक्षणविरोधसत्त्वेऽप्याधाराधेयभावदर्शनेन 'ययोः सहानवस्थानं तयोराधाराधेयभावः'-इतिनियमभङ्गादित्यर्थः। यद्वा, प्रतियोग्यनुयोगिनोः सहानवस्थानलक्षणविरोधे सत्यपि प्रतियोगिन्यनुयोगी आपद्यतामित्यतिप्रसक्तत्वेन निरुक्तनियमभङ्गादित्यर्थः। (४) नञ्व्यत्यासेन तथाप्रमातुं स्वरूपाऽयोग्यतेति योजनीयम्।

वस्तयोर्वा व्याप्युपग्रहो नास्ति तयोर्विरोधलक्षणविरहापत्तिरित्याह–। "'व्यक्त्योरि"ति। नियमो यदि देशगर्भस्तदा विरुद्धयोरपि देशव्यक्त्योर्यदि कालगर्भस्तदा व्यक्त्योरतीतत्वानागतत्वयोर्विरोधो न स्याद्देशे देशाभावात्काले कालाभावादिति वार्थः। यद्वा, व्याप्यवच्छेदेन विरोधोपसंहारे च व्याप्योरेव विरोधः स्यान्नतु व्यक्त्योरित्यर्थः॥ ननु साहित्येनाधाराधेयभावेन च या प्रमा तां प्रति स्वरूपायोग्यत्वमेव भावाभावयोर्विरोध इति शङ्कते–। "'तथा न प्रमातुमि"ति। "अनौपाधिकी"ति, कादाचित्कीं सहकार्ययोग्यतां पटकुङ्कुमयोर्व्यवच्छिनत्ति॥ तथाप्रमातुं स्वरूपायोग्यता भावाभावयोर्नतु पटकुङ्कुमयोरिति प्रतियोग्यनुयोगिभाव एव विरोधः पर्यवसन्न इत्याह–। "'सैवे"ति। प्रमातुमयोग्यता, प्रमातुं वा योग्यता, मितिमातृगता न वक्तव्या, किन्तु मेयगता, सा च नोक्तरूपा(१)दन्येति भावः॥ ननु भावाभावयोः स्वरूपमेव विरोधो, नतु प्रतियोग्यनुयोगिभाव इति शङ्कते–। "'स्वरूपमि"ति॥

सू० "मिथः संभेदाभ्युपगन्तापि तयोः स्वरूपोपगमात्। *"तथाभूतं स्वरूपम्*–इति चेन्न, 'तस्यैव निर्वाच्यत्वापत्तेः। "कश्च गोत्वाश्वत्वाभ्यां भावाभाव(२)योरेवंविधविरोधे विशेषः स्यात्? 'सत्यां च तयोः साहित्यप्रमायां प्रकारभेदेन व्यवस्थापना किमिति कार्या? प्रमयैवाप्रमानुपगमादिति। *'अथ घटादिविशेषितयोस्तयो(३)र्निषेधौ तौ, सविशेषणौ च विधिनिषेधौ न कथञ्चिद्विशेषणमनुपसंक्रम्य स्यातान्*, –इति ब्रूषे, तदपि न

टी०॥ येनापि प्रतियोग्यनुयोगिनोः साहित्यमाधाराधेयभावो वा संभेद(४)इष्यते तेनापि तयोः स्वरूपोपगमादित्याह–।

(१) उक्तरूपात्=प्रतियोग्यनुयोगिभावात्। (२) भावाभावयोरेवंविधविरोधे गोत्वाश्वत्वाभ्यां च कः विशेषः स्यादित्यन्वयः।
(३) तयोः=संसर्गतादात्म्ययोः। (४) सम्भेदः=सम्बन्धः।

[a]"निच" इति । यद्वा, संयोगतदभावयोः संभेदानिच्छतापि तदु-भयस्वरूपोपगमात्तन्मात्रं न विरोध इत्यर्थः ॥ [b]"तथाभूतमि"ति । यथाभूतयोः स्वरूपयोः संभेदाभावस्तथाभूतं स्वरूपं विरोध इत्यर्थः ॥ किंभूतयोः स्वरूपयोः संभेदाभावः?—इत्येव दुर्वचमित्याह—। [c]"तस्यैवे"ति ॥ यदि सहानवस्थानमेव विरोधो नतु प्रतियोग्यनुयोगिभावस्तदाह—। [d]"कश्चे"ति ॥ यदि च तथा न प्रमीयमाणत्वमेव विरोधस्तदा संयोगतदभावयोरवच्छेदभेदव्यु-त्पादनमफलं, तथा(१) प्रमीयमाणत्वेनैव तथा न प्रमीयमाण-त्वस्य विरोधस्य प्रतिक्षेपादित्याह—। [e]"तस्यां चे"ति । यद्यपि तत्रावच्छेदभेदकथनमविरोधप्रतिपादनार्थं, नतु विरोधभञ्जनार्थं, तथापि फलतो न विशेष इति भावः ॥ संसर्गाभावान्योन्याभावौ यदि संसर्गान्योन्यप्रतियोगिकौ तदा घटादिनिषेधो न स्यादिति यदुक्तं तत्राशङ्कते—। [f]"अथे"ति । संसर्गमात्रं तादात्म्यमात्रं वा न प्रतियोगि, किंतु घटविशेषितमुभयं प्रतियोगि, तथाच विशि-ष्टनिषेधो विशेषणनिषेधपर्यवसन्न एवेति कथं घटादितादव-स्थ्यमिति शङ्कार्थः ॥

सू० [a]तर्हि विशिष्टस्य निषेधो विशेषणस्यापि भवतीति संसर्गान्योन्यनिषेधोऽपि संसर्गनिषेधः स्यादेवेति पुनः स प्रसङ्गो वज्रलेपायते । *[b]अन्योन्याप्रतियोगिकसंसर्गप्रतिषेधस्तथा(२) विवक्षितः, एवमन्योन्यनिषेधोऽपि संसर्गाप्रतियोगित्वेन निर्वाच्यः *?—इति चेन्न । [c]एवं तर्ह्यन्योन्यसंसर्गाभावः संसर्गान्योन्याभावश्चापरा कोटिः स्यात् ।

टी० ॥ तर्हि 'स्मृतित्वसंसर्गाभावोऽनुभूताबि'तित्वयोक्ते स्मृतित्वसंसर्गान्योन्याभावमादाय स्मृतावेव प्रसङ्गः कृतो मया, स सुतरां लग्नः, स्मृतित्वसंसर्गान्योन्याभावस्य(३) संसर्गाभावत्व-ध्रौव्यादिति परिहारमाह—। [a]"तर्ही"ति ॥ यः स्मृतित्वसंसर्गा-

(१) तथा = साहित्येन । (२) तथा = संसर्गाभावत्वेन ।
(३) स्मृतित्वसंसर्गविशिष्टान्योन्यस्य योऽभावस्तस्येत्यर्थः ।

भावः स्मृतावापादित. सान्योन्यप्रतियोगिकोऽपि भवतीति नासौ संसर्गाभाव इति न स्मृतेः प्रसङ्ग इत्याह–। "अन्योन्ये"ति ॥ यद्यन्योन्यप्रतियोगिकः संसर्गाभावो न संसर्गाभावस्तदान्योन्यसंसर्गाभावो न तादात्म्याभावो(१)नापि संसर्गाभाव इति तृतीया कोटिः स्यादित्य संसर्गान्योन्याभावोपीत्याह–। "एवमि"ति ॥

सू० किञ्च,एवं सति 'संसर्गाभावोऽन्योन्याभावो यो न भवति(२) स संसर्गाभावतया विवक्षितः,-इत्युक्तं स्यात्, तथाच संसर्गविशेषणं व्यर्थमिति संसर्गाभावमर्थमभिक्रमाकाङ्क्षता त्वयाऽन्वर्थः(३)संसर्गाभावशब्दोपि हारितः स्यात्, यतो(४)ऽन्योन्याभावो यो न भवत्यभावः स संसर्गाभाव इत्युक्तम् । किंच(५)तथापि वाचाऽन्योन्याभावनिषेधोऽभिधीयमानोऽन्योन्याभावेपि प्रसज्यते, न ह्यन्योन्याभावोऽन्योन्याभावो भवतीति शक्यं प्रमातुं, 'समानाधिकरण्यं हि प्रकारभेदे सति भवति, यथा नीलमुत्पलमित्यादि, तत"

(१) न तादात्म्याभावः संसर्गप्रतियोगिकत्वात्, नापि संसर्गाभावः अन्योन्यप्रतियोगिकत्वा दित्यर्थः । यद्यपि अन्योन्यसंसर्गाभावेऽन्योन्यं न प्रतियोगि, किन्तु प्रतियोगितावच्छेदकमेव, तथापि विशिष्टस्य निषेधो विशेषणस्यापि भवतीत्येतदभिप्रेत्यैतद्, अतो न दोषः । (२) अन्योन्याभावे यो न भवति संसर्गाभावः स संसर्गाभावतया विवक्षितः–इत्यन्वयः । (३) 'अनर्थम् –इति क्वचित्पुस्तके पाठः । (४) "यतः"–इत्यारभ्य "इत्युक्तम् –इत्यन्तः क्वचित्पाठो नास्ति, नापि च युक्तमुत्पश्यामः, तादृशपाठदुराग्रहगृहीतचेतसा तु "स संसर्गाभावः"–इत्यतः प्राग् एकमन्वर्थसंसर्गाभावपदमध्याहर्तव्यम् 'यो न भवत्यभावः'–इत्यस्य यो न भवति संसर्गाभाव इत्यर्थः कल्पनीयो वा, अन्यथा एकसंसर्गपदवैयर्थ्यस्योक्तस्याभावप्रसङ्गः । (५) ननु एक संसर्गपदं नोपादीयते एवेत्याशङ्क्याह–किञ्चेति, 'अन्योन्याभावो यो न भवत्यभावः स संसर्गाभावः' इत्युक्तावन्योन्याभावोऽप्यन्योन्याभावो न भवत्येव, उद्देश्यविधेयभावस्य प्रकारभेदनियतत्वात्, तथाचाऽन्योन्याभावभिन्नत्वात्संसर्गाभावलक्षणमन्योन्याभावे गतमित्यर्थः ।

स्तदभावादेव न तथेत्यतिप्रसङ्गः। 'अन्यश्चान्योन्याभावेष्वेव तिष्ठन्नेव कः प्रमेयो यद्गति तथा कथ्यते? [f]अभावमात्रे त्वतिप्रसङ्गात्।

टी० ॥ "अन्योन्याप्रतियोगिकः संसर्गनिषेधस्तथा विवक्षित" —इति। अन्योन्याभावान्यः संसर्गाभावः संसर्गाभाव इति पर्यवसितोऽर्थस्तत्र संसर्गपद(१)वैयर्थ्यमाह—। [a]"किञ्चे"ति॥ 'अन्योन्याभावो यो न भवति स संसर्गाभावः'—इत्यनयोरन्यान्योन्याभावस्तदुव्यवच्छेद्यो न यद्यन्योन्याभावोऽन्योन्याभाव इति वक्तुं शक्य, तदैव सम्भवति, उद्देश्यविधेयभावस्य प्रकारभेदनियतत्वादित्याह। [b]"किञ्चे"ति॥ "सामानाधिकरण्यमि"ति। भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं, प्रकृते च शब्दभेदान्न समानाधिकरण्यम्, अत एव नोद्देश्यविधेयभावोऽपीति भावः॥ [d]"तदभावादेव न तथे"ति। प्रकारभेदाभावान्न सामानाधिकरण्यमुद्देश्यविधेयभावो वेत्यर्थः॥ ननु सकलान्योन्याभाववृत्तिना केनचिद्धर्मेणावच्छिन्नस्योद्देश्यत्वं स्यादित्यत आह—। [e]"अन्य"इति। तन्मात्रवृत्तिरूपाधेरप्यनिरूपणात्॥ नन्वभावत्वेनैवोद्देश्यतास्तु को दोषः? इत्यत आह—। [f]"अभावमात्रे"इति। 'अभावोऽन्योन्याभावः'—इत्यभिधाने संसर्गाभावस्याप्यन्योन्याभावत्वापत्तिः। यद्यपि 'नीलमुत्पलमि'त्यभिधाने नीलमात्रस्य नोत्पलत्वं प्रतीयते, तथाप्युत्पलपदव्युत्पत्तिरहितं (२) प्रति तथाभिधाने तत्राप्यतिप्रसङ्ग एवेति भावः॥

सू० "व्यक्तिविशेषे च शेषेष्वन्योन्याभावेषु संसर्गाभावत्वापत्तेः। एतच्च सर्वत्र तदन्यत्वेन (३) व्यवच्छेद्यमाने द्रष्टव्यम्। तथाहि—

'नाऽतत्तन्मन्यसे (४) तावन्न तत्तदपि मंस्यसे।

(१) एकसंसर्गपदवैयर्थ्यमित्यर्थः। (२) उत्पलपदशक्तिग्रहाभाववतो बालस्य कुत्रोत्पलपदस्य शक्तिरित्युत्पत्तुमिच्छोर्नीलमुत्पलमित्यभिधाने नीलमात्रस्यैवोत्पलत्वं प्रसज्यते इत्यर्थः। (३) तदन्यत्वेन=अलक्ष्यान्यत्वेन। (४) यथा अतत् तत् (अघटो घटः) इति न, तथा तत् तत् (घटो घटः)

"सामानाधिकरण्यं हि रूपभेदमपेक्षते ॥ २९ ॥
"रूपान्तरेण निर्दिश्य तच्चे तदभिधीयते ।
ताद्रूप्येण तथापि स्यात् सैव सव्यभिचारिता ॥३०॥
"अपि चान्योन्याभावस्य संसर्गाभावोऽप्येवं व्यवच्छिन्नः स्यात् (¹), तस्याप्यन्योन्यप्रतियोगिकत्वात् ।
*"अथान्योन्याभावस्य संसर्गाभावो नामाधिको (²) नोपेयते एवयमादाय तथा स्याद् ? *—इति चेन्न ।

टी० । ननु गुणान्योन्याभावत्वादिना प्रकारेणोद्दिश्यान्योन्याभावत्वं विधीयतां, भवति हि गुणान्योन्याभावोऽन्योन्याभाव इति तत्राह—। ""व्यक्तिविशेषे" इति । तथा च द्रव्यान्योन्याभावो(³) नान्योन्याभावः स्यादित्यर्थः । एतदपि व्युत्पन्नं प्रति, अन्यथा 'घटो द्रव्यमि'त्युक्ते घटो न द्रव्यं स्यात् ॥ एवं यत्रयत्र लक्षणं तदन्यत्वेन (⁴)विशेष्यं तत्र तदन्तर्भावप्रौव्यमित्याह—। ""एतच्चे"ति ॥ उक्तमर्थं कारिकाभ्यां संगृह्णाति—। ""नातत्तदि"ति । 'अघटो घट'—इति यथोक्तिविरोधाद्दुर्घटवचनं तथा 'घटो घट'—इत्यपि प्रकारभेदाभावाद्दुर्घटवचनमेव॥

इत्यपि न, हि=यतः, सामानाधिकरण्यं रूपभेदम्=प्रकारभेदमपेक्षते इत्याद्यवार्त्तिकार्थः । नीलघटत्वादिना रूपान्तरेणोद्दिश्यतत्तत् (घटो नील घट) इतिवत्प्रकृते उक्तौ ताद्रूप्येण=अधिकवृत्तिना प्रमेयत्वादिना रूपान्तरेणोद्दिश्य प्रमेयः संसर्गाभाव इत्युक्तौ अन्योन्याभावादेः प्रमेयस्यापि संसर्गाभावत्वं स्यादित्यतिप्रसङ्ग इति द्वितीयवार्त्तिकार्थः । (१)तथ चाव्यातिरिति ध्येयम् । (२) अधिकः = अन्योन्याभावभिन्नः । तथः=अन्योन्याभावसंसर्गाभावस्याऽसङ्ग्रहः । (३) द्रव्यान्योन्याभाव इत्युपलक्षणं गुणान्योन्याभावव्यतिरिक्तान्योन्याभावानाम् । (४) यथा स्मृतिभिन्नं ज्ञानमनुभूतिरितिलक्षणे यत्किञ्चित्स्मृति भिन्नत्वं यत्किञ्चित्स्मृतेरपि, स्मृतिरन्यभाववत्यनुभूतिरित्युक्तौ स्मृतित्वान्योन्याभावमादाय पुनः स्मृतावतिप्रसङ्गः स्मृतित्वसंसर्गाभावविवक्षायां च स्मृतित्वसंसर्गान्योन्याभावमादाय पुनः स एव प्रसङ्गः स्मृतौ दत्तस्तथा अनुभूतिभिन्नं ज्ञानं स्मृतिरित्यादावपि यत्रयत्र लक्षणमलक्ष्यानुभूत्याद्यन्यत्वेन विशेष्यं तत्राऽलक्ष्यस्यानुभूत्यादेरन्तर्भावमादायातिप्रसङ्ग आवश्यक इत्यर्थः ।

दार्ष्टान्तिके युक्तिमाह— [d]"सामानाधिकरण्यमि"ति ॥ [e]"रूपान्तरेणे"ति । अधिकवृत्तिना धर्म्मान्तरेण तदुद्दिश्य विधानेऽतिव्याप्तिर्न्यूनवृत्तिना चाऽव्याप्तिरित्यर्थः ॥ किंवा'ऽन्योन्याप्रतियोगिको योऽभावः स संसर्गाभाव'—इत्यभिधानेऽन्योन्याभावस्य संसर्गाभावो न स्यादन्योन्यप्रतियोगिकत्वादित्याह—। [f]"अपि चे"ति । यद्यप्यन्योन्याभावस्य संसर्गाभावोऽन्योन्यं न प्रतियोगि, किंतु तदभावः, स चान्योन्यस्मादन्य एव, तथापि विशिष्टस्य प्रतियोगित्वे विशेषणस्याप्यन्तर्भाव इति भावः ॥ नन्वन्योन्याभावप्रतियोगिकः संसर्गाभावो यदि भवेत्तदा तदनुपग्रहो दोषः स्यात् स एव तु नास्ति, अभावस्याप्यभावान्तराङ्गीकारेऽनवस्थानातिदि शङ्कते -। [g]"अथे"ति ॥

सू० "एवं तर्ह्यन्योन्याभावस्यान्योन्याभावोपि नाधिको(¹)भ्युपगन्तव्यः स्यादित्यन्योन्याप्रतियोगित्वेन व्यवच्छेदो(²)पि संसर्गाभावस्य त्वदभिमतस्य कथं स्यात्? व्यवच्छेदस्य निषेधार्थत्वात्(³) । * [b]अथ माभूदधिकोसौ स्वरूपमेव तु तथेष्यते इति तदाद्यैव व्यवहार एव निर्द्दोषः? *,–इति चेत्, 'तर्ह्यन्योन्याभावसंसर्गव्यतिरेकेपि (⁴) तुल्यमेतत् ।

टी० ॥ अन्योन्याभावस्याभावान्तरानभ्युपगमे संसर्गाभावलक्षणे तद्व्यवच्छेदार्थमुपात्तस्यान्योन्याप्रतियोगित्वस्य विशेषणस्य फलाभावाद्वैयर्थ्यम्, अन्योन्याभावव्यवच्छेदस्यान्योन्याभावात्मकत्वात्, तस्य च त्वयाऽनभ्युपगमादिति परिहरति-। [a]"एवं तर्ही"ति ॥ नन्वन्योन्याभावव्यवच्छेदकेन संसर्गाभावलक्षणे विशेषणेनान्योन्याभावानात्मा व्यवच्छेदो न

(१) अधिकः = अन्योन्याभावभिन्नः । (२) व्यवच्छेदः, अन्योन्याभावात् व्यवच्छेदो व्यावृत्तिरन्योन्याभाव इति यावत् । (३) निषेधार्थत्वात् = अन्योन्याभावस्वरूपत्वात् । (४) संसर्गव्यतिरेके = संसर्गाभावे ।

क्रियते, किंतु व्यवच्छेद्यो व्यवच्छेदश्च स एवान्योन्याभाव इति न वैयर्थ्यमित्याशङ्कते— "अथे"ति ॥ नहि अन्योन्याभावसंसर्गाभावोऽप्यन्योन्याभावस्वरूपमेवेति तदात्मकसंसर्गाभावानुपग्रहो दोषस्तदवस्थ एव व्यवच्छेद्याभावो वा अन्योन्याभावस्यापि स्वप्रतियोगिसंसर्गाभावरूपत्वादिति परिहरति— "तर्ही"ति ॥

सू० "अपि च, 'अन्योन्यप्रतियोगिको न भवत्यभावो यः स संसर्गाभावः' इति वदताऽन्योन्यप्रतियोगिकेऽभावे निषिध्यमानेऽन्योन्यात्मकोऽसौ (1) वभावोऽभ्युपगतः स्यात्, द्वयोर्निषेधयोः सुन्दोपसुन्दतया (2) ऽन्योन्यस्यैव स्थैर्यापत्तेः; तथाच सत्यन्योन्यस्मिन्निर्विशेषणे जगदेव प्रविष्टमिति संसर्गाभावत्वेन विवक्षितस्य जगदात्मतायां सिध्यन्त्यामन्योन्याभावात्मतापि स्यादिति व्यर्थो विशेषणप्रयासो हासायेति सविशेषणेऽप्यविशेषणवत् प्रसङ्ग इति महत्कौतुकम् । * "ननु 'घटाभावो न भवति स्तम्भः'-इत्युक्ते किं स्तम्भो घटात्मा विहितो भवति (3) ? तत्कस्य हेतोः ? तद्धि तथा स्यात् यदि घटस्तदभावश्चेत्येव जगत्स्यात्, यदा तु स्तम्भादिरप्यपरा कोटिरस्ति तदा कथं स्याद् ? इत्युक्तप्रसङ्गानवकाश इति * ?।

(1) असौ = संसर्गाभावः । (2) सुन्दोपसुन्दतया = परस्परं विरोधितया, अन्योन्याभावाभावे अन्योन्यस्यैव स्थैर्यापत्तेः, अभावाभावस्य भावरूपतादित्यर्थः । सुन्दोपसुन्दौ द्वावादिदैत्यौ राजानो नर्मदातीरे तपश्चरतुः, तदुपघातार्थं जगत्स्रष्ट्रा काचिद्वराङ्गना प्रस्थापिता, तां दृष्ट्वा काममत्तौ ममेयं ममेयमिति परस्परं जघ्नतुरितीयं गाथा सुन्दोपसुन्दयोः पुराणप्रसिद्धा । (3) "नैव भवति"—इति शेषः ।

टी० ॥ 'अन्योन्याभावो न भवत्यभावो य' इतिवाक्ये नञ्द्वयश्रवणादन्योन्यं यद्भवति स संसर्गाभाव इत्यर्थपर्यवसाने जगत एवान्योन्यत्वात् संसर्गाभावत्वं प्रसक्तं, जगदन्तर्गतस्यान्योन्याभावस्यापि च संसर्गाभावत्वमिति यद्व्यवच्छेदाय विशेषणमुपात्तं तस्यैव भङ्गइ इति कौतुकमित्याह—।" "अपिचे"ति । यद्यपि 'अन्योन्यप्रतियोगिको न भवत्यभावो य' इतिवाक्याद्यत्राभावेन्योन्यप्रतियोगिकत्वं धर्मो नास्ति स संसर्गाभाव इत्यर्थः प्रतीयते, तथाच, भवत्येवान्योन्याभावव्यवच्छेदः, तस्यान्योन्यप्रतियोगिकत्वात्, सुन्दोपसुन्दन्यायस्तु समानाधिकरणयोरेव निषेधयोः, तथाचाप्रतीयमानार्थखण्डनमपि कौतुकमेव, तथापि लक्षणवाक्यस्य यद्ययमर्थ(१)स्तदैवं खण्डनमिति भावः । एवम् अन्योन्याभावो न भवत्यभावो यः स संसर्गाभाव'—इत्यत्रापि यत्राभावेन्योन्याभावत्वं नास्तीत्यर्थः, इति(२)नैतत् खण्डनमुचितं, अथ त्वन्योन्याभावो न भवतीत्यन्योन्याभावानात्मा भवतीत्यर्थस्तथाप्यन्योन्यात्मत्वपर्यवसानमेवेत्यर्थः । अत्रैव शङ्कते—। ""नन्वि"ति । 'घटाभावो न भवति स्तम्भ' इत्यत्र यथा स्तम्भस्य न घटात्मत्व तथा'अन्योन्याभावो न भवति संसर्गाभाव' इत्यत्रापि संसर्गाभावस्य नान्योन्यात्मत्वं, किंतु संसर्गाभावत्वमेव, केवलमन्योन्याभावानात्मकत्वमात्रं तत्र प्रतीयते इति शङ्कार्थः ॥

मू० "नैवम् । यथा घटतदभावाभ्यामन्या वस्त्रादिकमप्यस्ति कोटिस्तथान्योन्यतदभावाभ्यां नान्या कोटिः संभवति, निर्विशेषणान्योन्यमध्ये जगत एव प्रवेशात्; 'तदात्मनोपि(३)निषिध्यमानत्वे तन्निषेधात्मके तदात्मनि जगत्प्रवेशात् । 'न हि

(१) लक्षणवाक्यस्य यद्यप्रतीयमान एव—'अन्योन्याभावाभावरूपः संसर्गाभावः'—इत्याकारकोर्थोऽभिप्रेतः स्यात्तदैवं खण्डनं श्लिष्टतरमित्यर्थः । (२) इतिशब्दो हेतौ । (३) तद् जगद्रूपमात्मा स्वरूपं यस्यान्योन्यस्य स तदात्मा, तस्य (अन्योन्यस्य तादात्म्यस्य वा) । तन्निषेधात्मके=अन्योन्याभावनिषेधात्मके ।

(१)घटः पटात्मेत्यनेन घटस्वरूपादन्यस्तदात्मा विहितः स्यात् । [d]यदि तु तादात्म्यं नामाभेदाख्यो धर्मः कश्चिदिष्यते, स घटपटाद्यधिकरणतया निषिध्यते, तदा संसर्गाभाव एव स्यात् । तस्मान्निर्विशेषणतादात्म्यान्तर्भूतं जगदिति कोट्यन्तराभाव(२)इति ।

टी० ॥ "नैवमि"ति । यत्र प्रतियोगितदभावाभ्यां तृतीया कोटिस्तत्राभावाभावो न प्रतियोगी, इह तु न तथेत्यन्योन्याभावनिषेधोऽन्योन्यमेवेति परिहारार्थः ॥ नन्वन्योन्याभाव इति संज्ञामात्रं, न त्वस्यान्योन्यं प्रतियोगि येन तदभावनिषेधेऽन्योन्यपर्यवसानं स्यात्, किंतु तादात्म्यं तस्य प्रतियोगीति नोक्तदोष इत्यत आह—। [b]"तदात्मन"इति । तादात्म्याभावो न भवति योऽभावः स संसर्गाभाव इतिकृतेऽपि पर्यवसितनिर्विशेषिततादात्म्यसम्बन्धजगदन्तर्गततादात्म्याभावरूपत्वं संसर्गाभावस्य पतितमिति तदेव कौतुकमित्यर्थः । "तदात्मनोऽपि निषिध्यमानत्वे"इति, घटः पटात्मा न भवतीत्यनेनैव प्रकारेणान्योन्याभावस्य प्रतीयमानत्वे इत्यक्षरार्थः ॥ ननु 'तादात्म्याभावो न भवति संसर्गाभाव' इत्युक्ते तादात्म्यस्वरूपं कथं संसर्गाभावस्स्यादित्यत आह—। [c]"नही"ति । सुन्दोपसुन्दन्यायेन नञ्द्वये गते तादात्म्यं संसर्गाभाव इति पर्यवसाने निर्विशेषिततच्छब्दस्य जगत्परत्वे संसर्गाभावस्य जगदात्मत्वमेव स्यात् यथा घटः पटात्मेत्यत्र पटस्य घटात्मत्वमित्यर्थः ॥ ननु तादात्म्यनिषेधो नान्योन्याभावो येन तन्निषेधस्तदात्मा स्यात्, किंतु तादात्म्यस्य घटादिनिष्ठधर्मस्य निषेधस्तथा च तन्निषेधो जगद्धर्मो भवेन्नतु जगदिति न तदन्तर्गतान्योन्याभावात्मत्वं संसर्गाभावस्येत्यत आह—। [d]"यदि त्वि"ति ॥

---

(१) नहि घटः पटात्मा—इत्यनेन विहितस्तदात्मा (=तादात्म्यमन्योन्य वा) घटस्वरूपादन्यः स्यादित्यन्वयः ।

(२) कोट्यन्तराभावः, तादात्म्यान्तर्गतं जगदितिकोटितः कोट्यन्तरस्य सङ्कलनीयस्याभाव इत्यर्थः ।

सू० [a]अपिच, एवं तर्हि घटे निषिध्यमाने घटाभावो विधीयते, घटाभावे च निषिध्यमाने घटः-इत्यपि न स्यात्, तृतीयस्य विद्यमानत्वात्; भवन्वा 'घटाभावः स्तम्भो न भवती'त्यत्रापि घटाभावत्वाविशेषा[b]द्विशेषान्तरानिर्वचनात् घटः स्तम्भात्मेत्येवोक्तं स्यादिति [c]'त्वत्प्रसङ्गस्त्वयि निपतेत्। संसर्गान्योन्याभाववैचित्र्यमादाय हि स परिहार्य्यः स(१) एव च नाद्यापि व्यवतिष्ठते। [d]अत एव (२) 'प्रतीतिबलादेव वैधर्म्यमनयोरुपेयमि'त्यपि निरस्तम्। 'प्रतिषेधप्रतिषेध्यविरोधे प्रकारविशेषव्यवस्थानिरुक्त्यशक्तेरविशेषेणैकनिषेधेऽन्यविधिध्रौव्यं भवदन्योन्याभावनिषेधो(३)प्यन्योन्यविधये स्यात्।

टी० ॥ किंच, घटात्यन्ताभावाभावो यथा घट एव पर्यवस्यति तथा घटान्योन्याभावनिषेधोपि पर्यवस्येत्, वस्त्रादि(४) कोटिस्तृतीया यथान्योन्याभावे तथात्यन्ताभावेपीत्याह-। [a] "अपिचे"ति ॥ [b] "विशेषान्तरे"ति। अत्यन्ताभावे एवेयं रीतिर्नत्वन्योन्याभावे-इति विशेषस्त्वया निर्वक्तुमशक्य इत्यर्थः ॥ [c] "त्वत्प्रसङ्ग" इति। 'घटाभावो न भवति स्तम्भ'-इत्युक्ते स्तम्भोपि घटात्मा विहितः स्यादिति यः प्रसङ्गस्त्वया कृतः स त्वय्येवापतित इत्यर्थः॥ [d] "अत एवे"ति। कस्यचिदभावस्य प्रतिषेधः प्रतियोगिपर्यवसन्नः कस्यचिच्च प्रतिषेधः प्रतियोग्यपेक्षयान्य एव प्रतीयते इति प्रतीतिबलादन्योन्याभावसंसर्गाभावयोर्वैधर्म्यम-

---

(१) स=वैचित्र्यपदार्थः। (२) अत एव=अर्थवैचित्र्यनिरासेन प्रतीतिवैचित्र्यनिरासादेव। (३) "अन्योन्याभावनिषेधे"-इति तु युक्तं पाठं सम्भावयामः। एकनिषेधेऽन्यविधिध्रौव्यमित्यस्यैकस्य कर्तृपदस्योक्तत्वात् 'भवदि'ति तु शतृप्रत्ययान्तस्य रूपम्। यद्वा भवदन्योन्याभावनिषेधो=भवतामन्योन्यभावस्य निषेध-इत्यर्थः। (४) आदिशब्देन स्तम्भोप्युपगृहीत इत्यतो न मूलव्याख्यानयोर्वैयधिकरण्यम्।

भ्युपगम्यतामिति निरस्तमित्यर्थः ॥ ननु प्रतियोग्यभावयोर्यत्र विरोधस्तत्रैकनिषेधेऽन्यविधिरित्यस्तु, तादात्म्याभावे तु प्रतियोग्यभावयोः सामानाधिकरण्याद्विरोध एव नास्तीति नैकनिषेधेऽन्यविधिरित्यत आह । "प्रतिषेधप्रतिषेध्ये" ति । अत्यन्ताभावस्थले विरोधो, नत्वन्योन्याभावस्थलेपि,-इति तदा स्याद्यद्यनयोः प्रकारविशेषव्यवस्था स्यात्, सैव तु नास्तीत्यर्थः ॥

सू० [a]"मम चानिर्वचनीयतैव प्रतीतिव्यवहारव्यवस्थापर्यनुयोगबाणवारणाय वज्रवारबाणायमाना विजयते । [b]मम ह्येवं दर्शनं;-प्रतीतिसिद्धत्वात् अत्यन्तासद्विलक्षणं भवदपि जगत्तथा सत्त्वोपगमेपि बाध्यमानत्वा(१)दनिर्वचनीयमिति । अत एव प्रतीयमानत्वाद्वैचित्र्यमनयोर्घुष्यमाणमतिदूरनिरस्तम् । [d]उक्तप्रतियोग्यादिवैचित्र्यानुपपत्तितः प्रतीयमानस्यैव बाध्यतायाः एव कथनात् । 'तस्मात्—

अन्योन्याभावसंसर्गाभावभेदव्यवस्थितौ
सत्यां स्यात्तद्व्यवस्थेति स्वाश्रयं कश्चिकित्सतु ॥ ३१ ॥

"अभाव(२)एव यत्रे'तिसावधारणं च वक्तव्यम्?-इतिचेन्न

टी० ॥ नन्विदं प्रतीति-वैलक्षण्यमन्योन्यात्यन्ताभावयोस्त्वयाप्युपपादनीयमेवेत्यत आह । [a]"मम चे"ति । पर्यनुयोगलक्षणो बाणस्तस्यवारणाय वज्रस्य = लोहस्य, वारबाणः = कञ्चुकः (सन्नाहविशेषः) "कञ्चुको वारबाणोस्त्री" त्यमरः ॥ ननु प्रतीतिसिद्धमपि वैलक्षण्यमपह्नूयते इति साहसमाहमित्यत आह-। [b]"मम ही"ति ॥ प्रतीतिर्नापह्नूयते, किंतु 'विचारं न सहते'-इत्युच्यते इत्यर्थः ॥ "अत एवे"ति । बाध्यत्वादेवेत्यर्थः ॥ ननु बाधमनभिधाय बाध्यत्वाभिधानं सर्वत्र सुलभमित्यत आह-। [d]"उक्तप्रतियोग्यादी"ति । त्वदुक्तवैचित्र्यानुपपत्तिदर्शनं यत्कृतं

(१) बाध्यमानत्वात्सत्त्वोपगमेपि तथाऽनिर्वचनीयमित्यन्वयः।
(२) "ननु स्मृतित्वस्याभावः"-इत्यपि क्वचित्पाठः ।

तदेव बाधाभिधानमित्यर्थः ॥ उपसंहरति—[e]"तस्मादि"ति । अन्योन्याभावो यो न भवत्यभावः स संसर्गाभाव—इति संसर्गाभावस्यान्योन्याभावान्यत्वमादाय तदा व्यवस्था स्याद्य-द्यन्योन्याभावसंसर्गाभावयोर्भेदः स्यात्, स एव तु नाद्यापि सिद्धः, इति तदुभयभेदव्यवस्थयैव तदुभयव्यवस्थेत्यात्माश्रय इत्यर्थः । यद्वा प्रतीतिवैलक्षण्याद्विषयवैलक्षण्यं ततश्च प्रतीतिवैलक्षण्यमित्य-न्योन्याश्रयएवात्माश्रय इत्यर्थ. ॥ ननु 'स्मृतित्वस्याभाव एव यत्र ज्ञाने तदनुभव'—इत्युक्तं स्मृतौ न प्रसक्तो, यतस्तत्र भावोऽपि स्मृतित्वस्येत्याशङ्कते—[f]"अभाव एवे"ति ॥

मू० [a]एवकारेण किमधिकमभिधीयते ? । *भावो निषि-ध्यते ? *—इति चेन्न, तस्याभावपदेनैव लब्धत्वात्; भावनिषेधोऽभाव इत्यनर्थान्तर(१)मिदम् । * [b]भाव-सामानाधिकरण्यनिषेध एवकारार्थः ? *—इति चेत्, [c]उक्तेनैव गतार्थत्वात्, [d]अन्योन्याभावस्य(२)च स्मृतावपि सम्भवात्; न हि भावसामानाधिकरण्यं स्मृतिः । [e]स्मृतौ च भावमभावं चैकत्र मन्यमानेन [f]तस्याप्येष्टव्यत्वात्, तयोः परस्परप्रतिक्षेपरूपत्वात्, [g]न हि रूपरसयोरेकत्राभावे न(३)तत्सामानाधिक-रण्याभावः स्यात् ।

---

(१) अनर्थान्तरम्=एकार्थकम् ।

(२) स्मृतित्वभावसामानाधिकरण्यान्योन्याभावस्येत्यर्थः ।

(३) केचित्तु अत्र 'अभावेने'तिपदं छिन्दन्ति, तत्रायमर्थः-न हि रूपरसयोर्मिलितयोरेकत्र=तेजसि अभावेनान्यत्रापि पृथिव्यादौ तत्सा-मानाधिकरण्यस्याऽभावः स्यादिति, किन्तु स्यादेव पृथिव्यादौ सामाना-धिकरण्यमिति । यद्यपि दृष्टान्तेऽन्यत्र समानाधिकरणयोरन्यत्राऽसामा-नाधिकरण्यं दृष्टं नैकत्र, तथाप्यत्रैकस्यामेव स्मृतौ स्मृतित्वान्योन्या-भावस्य समवायेन स्मृतित्वाधिकरणे वृत्तित्वात्सामानाधिकरण्यं, तदा-त्म्येन स्मृतित्वस्य स्मृतौवृत्तित्वाभावाच्चासामानाधिकरण्यमिति ध्येयम् ।

टी० । 'अभाव एव यत्रे'त्यवधारणेन भावनिषेधोऽभिप्रेतः, स चाभावपदलभ्य एवेत्यवधारणवैयर्थ्यमिति परिहरति—। [a]"एवकारेणे"ति ॥ अभावपदेन भाव(¹)निषेधमात्रं लभ्यते भावसामानाधिकरण्यनिषेधस्त्वेवकारलभ्य इत्याशङ्कते—। [b]"भावसामानाधिकरण्यनिषेध" इति ॥ 'स्मृतित्वस्याभावो यत्रे'त्युक्त्यैव भावसामानाधिकरण्यनिषेधोऽपि लभ्यते एव यतस्तस्मिन्नधिकरणे भावश्चेदभावपदेन निषिद्धस्तदा भावसामानाधिकरण्यस्यापि निषेधः पर्यवसन्न एवेति परिहरति—। [c]"उक्तेनैवे"ति ॥ किंच, भावसामानाधिकरण्यनिषेधस्यान्योन्याभावरूपस्य स्मृतावपि सत्त्वादेवकारेणापि स दोषो न परास्त इत्याह—। [d]"अन्योन्ये"ति ॥ किंच, भावसामानाधिकरण्यनिषेधः = भावेन सहासामानाधिकरण्यं, तच्च यथानुभूतौ, तथा स्मृतावप्यगत्या त्वयाऽभ्युपेयं, यतो भावाभावयोः परस्परप्रतिक्षेपात्मकतया स्मृतित्वाभावे(²)स्मृतौ स्वीकृते स्मृतित्वं तत्र नेष्टव्यमन्यथा परस्परप्रतिक्षेपात्मतैव भावाभावयोर्भज्येत, तथा च स्मृतावपि भावसामानाधिकरण्यनिषेध एवकारार्थस्तुल्य एवेत्याह—। [e]"स्मृतौ चे"ति ॥ [f]"तस्यापी"ति । सामानाधिकरण्याभावस्यापीत्यर्थः ॥ ननु समानाधिकरणयोरप्यसामानाधिकरण्यमिति दुर्घटमित्यत आह—। [g]"नही"ति । पृथिव्यां समानाधिकरणयोरेव रूपरसयोरेकत्र=तेजसि, रसाभावे सति तयोः सामानाधिकरण्याभावो न स्यादेवं न, किंतु स्यादेवेत्यर्थः ॥

सू० [a]* समाविष्टयोर्भावाभावयोः परस्परप्रतिक्षेपात्मकतैव न सिद्धा(³)*?—इति चेत्, [b]तर्हि तथाविधयो(⁴)र्भावाभावपदसङ्केतो नतु रूपरसयोरिति रुचिस्ते प्रमाणम् ।* [c]रूपरसयोः परस्परप्रतिक्षेपानात्मकत्वात् [d]तदभावे तयोः सामानाधिकरण्याभाव आस्ताम् [e]अत्र

(१) भावः=स्मृतित्वसत्ता । (२) स्मृतित्वाभावे=स्मृतित्वस्यान्योन्याभावे । (३) "न सिद्ध्येत्"—इत्यपि केषुचित्पुस्तकेषु पाठः । (४) तथाविधयोः=समानाधिकरणयोः प्रतियोगितदन्योन्याभावयोः ।

तु नैवम् ?*-इति चेत्, तथात्वस्यासामानाधिकरण्य-
प्रयोजकत्वे तद्व्यतिरेकः(१)सामानाधिकरण्यप्रयो-
जकः स्यादिति रूपरसादीनामसामानाधिकरण्या-
पत्तिः, भावाभावयोरसामानाधिकरण्यानुपपत्तिश्च।

टी० ॥ ननु परस्परप्रतिक्षेपात्मकत्वे सति स्मृतित्वतदन्यो-
न्याभावयोः सामानाधिकरण्यप्रतिषेधः स्मृतौ सिद्ध्येत् पर-
स्परप्रतिक्षेपात्मकत्वमनयोर्नोचित समावेशदर्शनादिति शङ्कते-। [a]"समाविष्टयोरि"ति ॥ तर्हि प्रतियोगिना सह समाविष्टस्यापि कथमस्या(२)भावपदवाच्यत्वं स्यात्, समसंर्गाभावस्थले सर्वत्र प्रतियोग्यसमावेशस्यैव दर्शनात्,(३)संसर्गाभावान्योन्याभावयोर्वैचित्र्यस्य त्वयाद्याप्यसमर्थनात्, इति परिहरति-। [b]"तर्ही"ति ॥ ननु समानाधिकरणयोरपि रूपरसयोर्यदसामानाधिकरण्यं तत्र परस्परप्रतिक्षेपानात्मकत्वं तन्त्रं, भावाभावयोस्तु परस्परप्रति-क्षेपात्मनोः सामानाधिकरण्ये कथमसामानाधिकरण्यं भवेदिति शङ्कते-। [c]"रूपरसयोरि"ति ॥ [d]"तदभावे"इति । तदेकैकाभावे इत्यर्थः ॥ [e]"अत्र त्वि"ति । भावाभावयोरित्यर्थः ॥ [f]"तथात्व-स्ये"ति । परस्परप्रतिक्षेपानात्मकत्वस्येत्यर्थः । परस्परप्रतिक्षे-पानात्मकत्वेन यदि रूपरसयोः सामानाधिकरण्यमुपपाद्यते तदा क्वचिदपि तयोः सामानाधिकरण्यं न स्यात्, न स्याच्च भावाभाव-योर्वैयधिकरण्यमित्यर्थः । तदेवं स्मृतित्वतदन्योन्याभावयोः स्मृतावनुभवबलात् सामानाधिकरण्ये सत्येवाभावस्वरूपपर्या-लोचनबलात् सामानाधिकरण्यनिषेधोऽप्युपपादित इत्यनुभवल-क्षणं स्मृतावतिव्यापकमित्युक्तम् । *न चैकत्रैव सामानाधिकर-ण्यमसामानाधिकरण्यं च भावाभावयोरनुपपन्नमिति वाच्यम्*, यथात्वयैकत्रैव भावाभावौ स्वीक्रियेते तथा सामानाधिकरण्या-सामानाधिकरण्ये अपि स्यातामित्युक्तत्वात् । *अन्योन्याभाव-

---

(१) तद्व्यतिरेकः=परस्परप्रतिक्षेपानात्मकत्वव्यतिरेकः (परस्प-रप्रतिक्षेपात्मकत्वम्) । (२) अस्य=स्मृतित्वान्योन्याभावस्य ।

(३) ननु संसर्गाभावाद्वैलक्षण्यादन्योन्याभावस्यैव प्रतियोगिसा-मानाधिकरण्यमित्यत आह-संसर्गेति ।

स्याय(१)मेव महिमा ? *,–इति तु न युक्तम्, अभाववैचित्र्यानुपपादनादिति भावः ॥

मू० "* असामानाधिकरण्यमेव यत्रे(२)ति विवक्षितम्*?–इति चेन्न, "एवकारार्थदौस्थ्यतादवस्थ्यात्, "एतेन 'विलक्षण एवायमभावो भावसहासनानुपवेशी य एवकारसमभिव्याहारेणोच्यते'–इति निरस्तम्, तस्यापि वैलक्षण्यं प्रतियोग्याश्रयनिषेधता(३)साम्येपि सामानाधिकरण्यविरहादुन्नेयं, तच्च(४)तुल्यम् [d] अभावान्तरेण । * "सामानाधिकरण्याभावप्रत्ययेन* ?-इति चेन्न,

टी० ॥ अत्र शङ्कते–। ""असामानाधिकरण्यमेवे"ति । स्मृतौ तु सामानाधिकरण्यमपीति नाभिव्याप्तिरित्यर्थः ॥ [b]""एवकारे"ति । सामानाधिकरण्यनिषेधस्यैवकारार्थस्यात्रैवलब्धत्वा(५)त्पौनरुक्त्यमित्यर्थः । अथाभावस्य संसर्गाभावरूपत्वमेवकारलब्धमतो नान्योन्याभावमादायातिव्याप्तिरिति तु तयोर्वैचित्र्ये सति स्यादिति भावः ॥ एवकारसमभिव्याहारमहिम्ना स्मृतित्वात्यन्ताभाव एव प्रतीयते इत्याशङ्काभाववैचित्र्ये सति तथा स्यात् तदेव तु नास्तीति परिहरति–। "एतेने"ति ॥ "अभावान्तरेणे"ति । अन्योन्याभावेनेत्यर्थः ॥ ननु सामानाधि-

---

(१) अयं=नियतं प्रतियोगिसमानाधिकरण एव, न तु संसर्गाभाववत्प्रतियोग्यसमानाधिकरणोपीति । (२) 'सोनुभवः'–इति शेषः । (३) प्रतियोगी च आश्रयः (अनुयोगी) च निषेधश्च तेषां भावः प्रतियोग्याश्रयनिषेधता, तस्य साम्येपीत्यर्थः; तथाहि–अनुभूतौ स्मृतित्वान्योन्याभावात्यन्ताभावयोः स्मृतित्वनिष्ठा प्रतियोगिता अनुभूतिनिष्ठाऽनुयोगिता 'न'-इति प्रतीतिविषये निषेधता च समानैव । (४) 'तदि'ति सामान्ये नपुंसकनिर्देशः स्मृतित्वसामानाधिकरण्यविरहश्चेत्यर्थः ।

(५) असामानाधिकरण्यपदप्रतिपाद्याभिन्नैवकारार्थस्य सामानाधिकरण्यनिषेधस्याऽत्रैवलब्धत्वात् (=एवकारेण लब्धत्वात्) पौनरुक्त्यमित्यर्थः । यद्वा, अत्रैव लब्धत्वादिति पदविभागः, अत्रैव=असामानाधिकरण्यपदेनैव; सप्तमी तृतीयाविभक्त्यर्थे ज्ञेया ।

करण्याभावप्रत्ययेनैव एवकारसमभिव्याहारलभ्याभाववैलक्षण्यं सिध्यतीति शङ्कते—। [e]"सामानाधिकरण्ये"ति ॥

सू०[a]प्रत्ययविशेषकस्यार्थस्य स्मृतावपि भावात्। *[b]अन्योन्याभावव्यतिरिक्तः स्मृतित्वाभावः*,-इत्युक्तौ स्मृतित्वव्यतिरिक्तपक्षोक्त एव दोषः। तदास्तां विस्तरः। [c]नापि स्मृतित्वप्रतियोगिकमाश्रयस्य स्वरूपं तद्धीवितिपक्षः, [d]अन्योन्याभावेपि भवतामभावव्यवस्थायास्तादूप्यत्वेनोक्तप्रसङ्गस्य समानत्वात्। *अथान्यदेव किंचित्संसर्गाभावनिर्वचनं क्रियते, [e]तथाहि,-स्मृतित्वस्य यत्र संसर्गितया निषेधस्तत्र तदभावस्य संसर्गाभावत्वं, यत्र तु तदात्मत्वेन तत्र तदभावस्य न संसर्गाभावता, किंत्वन्योन्याभावत्वमेव, [f]सचे(१)ह न विवक्षितः, पूर्वक्त एव तु संसर्गाभावोऽभिधित्सितः?* इति नैतद्विचारसहं, 'संसर्गितया निषेध'—इति येयं तृतीया सा किं लक्षणे(२) वा?-१ सहयोगे वा ?-२ कारकभेदे वा करणादौ?-इनाद्यः, [g]संसर्गितया लक्षितस्यैवान्योन्याभावमादाय प्रसङ्गात्। नापि द्वितीयः, [h]तत्सहितस्यैवान्योन्यनिषेधस्य प्रत्याख्यातुमशक्यत्वात्।

टी० सामानाधिकरण्याभावप्रत्यये सामानाधिकरण्याभाव एव विशेषकः, स चोक्तरीत्या स्मृतावपि मयोपपादित इति परिहरति—। [a]"प्रत्यये"ति ॥ 'अन्योन्याभावव्यतिरिक्तः स्मृतित्वाभावः'-इत्यत्र सकलतद्व्यतिरिक्तत्व ? यत्किंचिद्व्यतिरि-

---

(१) सच=अन्योन्याभावश्च, इह=अनुभवलक्षणे। (२) संसर्गितया लक्षितं यत्स्मृतित्वं तदभावः-इत्याद्यविकल्पार्थः, संसर्गितया सहितस्य स्मृतित्वस्याऽभावः-इति द्वितीयविकल्पार्थः, संसर्गितया कृतस्य स्मृतित्वस्याऽभावः-इति तृतीयविकल्पार्थः।

त्वं वा विवक्षितम् ?–इतिविकल्पकदूषितत्व(१)मेवेत्याह–। [b]"अन्योन्ये"ति ॥ प्राभाकरमतेऽप्यनुभूतिलक्षणमनुपपन्नमित्याह–। [c]"नापी"ति । स्मृतित्वे स्मर्यमाणे ज्ञानस्वरूपं(२)ज्ञानस्वरूपज्ञानं वाऽनुभव इत्यपि नेत्यर्थः ॥ अन्योन्याभावोऽपि त्वन्मतेऽधिकरणस्वरूपं तज्ज्ञानं वेति तमादाय स्मृतौ कृतस्य प्रसङ्गस्यापरिहार इत्याह–। [d]"अन्योन्याभावेपी"ति ॥ स्मृतित्वस्य संसर्गाभावो यत्र त्वयैवानुभवलक्षणं संसर्गाभावनिरुक्त्योपस्कुरुते–। [e]"तथाही"ति ॥ [f]"सचेहे"ति । अनुभवलक्षणे स न विवक्षित इत्यर्थः ॥ [g]"संसर्गितये"ति । 'संसर्गितया लक्षितं यत् स्मृतित्वं तत्स्मृतिर्न'–इतिप्रतीतेरन्योन्याभावस्यापि तादृप्यात्तमादाय स्मृतावतिप्रसङ्गतादवस्थ्यमित्यर्थः ॥ [h]"तत्साहित्यैवे"ति । 'संसर्गितया सहितं स्मृतित्वं न स्मृतिरि'ति तदन्योन्याभावमादाय प्रसङ्गसत्त्वादित्यर्थः । * नच संसर्गितायाः स्मृतित्वस्य च निषेधो यत्रत्यर्थस्तथा च स्मृतौ स्मृतित्वसंसर्गितायाः निषेधो नास्तीति तत्साहित्याभावान्न प्रसङ्ग इति वाच्यम् *, संसर्गितान्योन्याभावस्मृतित्वान्योन्याभावयोः साहित्यस्य स्मृतावपि भावादिति भावः ॥

सू० तृतीयस्तु न संभवति, [a]अत्यन्तनिषेधस्या(३)नुत्पत्तिधर्मकत्वात्, तस्य च प्रकृतोदाहरणत्वात् । * [b]प्रकारवाचिनीयं तृतीया ? *–इति चेन्न, [c]प्रकारशब्दार्थस्याधिकस्य निर्वक्तव्यत्वापातात् । * [d]प्रकारः प्रकार एव ? *–इति चेन्न, [e]अविदितलक्ष्यस्य लक्षणमनभिधायेतरव्यवच्छेदेन तस्य दर्शयितुमशक्यत्वात्; [f]अन्यथा

(१) सकलस्मृतित्वान्योन्याभावभिन्नत्वं प्रत्येकस्मृतित्वान्योन्याभावस्यापि, तथाऽसर्वज्ञेन तदविज्ञेयत्वं च, यत्किंचित्स्मृतित्वान्योन्याभावव्यक्तिभिन्नत्वं च तदतिरिक्तयत्किञ्चित्स्मृतित्वान्योन्याभावस्यापीति पूर्वोक्तदोषदूषितत्वमेवेत्यर्थः । (२) सर्वत्राभावज्ञाने प्रतियोगिस्मरणस्य हेतुत्वात्प्रतियोगिरूपे स्मृतित्वे स्मर्यमाणे सति यदनुभूत्यात्मकानुयोगिज्ञानस्वरूपं, तस्य ज्ञानं वा, सोऽनुभव इत्यपि नेत्यर्थः ।

(३) अत्यन्तनिषेधस्य=अत्यन्ताभावस्य ।

सर्वत्र प्रष्टारं प्रति लक्षणानभिधानापातात् । 'को घटः'?-इत्यादिपृष्टे 'घट एव घटः'-इत्याद्येवोत्तरं सङ्गच्छेत । [g]"प्रकार इति पक्षो नोपपन्नः, सदोषत्वाद्'-इति वक्ता 'को दोषः' ?-इत्यनुयुक्तो 'दोष एव दोषः'-इत्यभिधायैव निर्वृत्तो(१)भवेद् इति ।

टी० ॥ [a]"'अत्यन्ते"ति । स्मृतित्वात्यन्ताभाववत्त्वं तव लक्षणत्वेनाभिमतं, तच्च नित्यमेवेति न संसर्गितया करणेन क्रियते॥ ननु संसर्गित्वेन प्रकारेण यो निषेधः स संसर्गाभावः, भवति हि 'नेह घटः संसृष्ट' इति, तादात्म्याभावे तु नायं प्रकारः, पटसंसृष्टेऽपि घटे 'नायं पटात्मा घट' इतिप्रतीतेरिति शङ्कते-। [b]"प्रकारे"ति ॥ [c]"प्रकारशब्दार्थस्ये"ति । संसर्गितां विहाय नान्यः प्रकारशब्दार्थः, संसर्गितासमभिव्याहृतायाश्च तृतीयायाः संसर्गितैव नार्थ(२)इत्यर्थः ॥ ननु प्रसिद्धार्थः प्रकारशब्दः किमत्र प्रश्नेनेत्याह-। [d]"प्रकारः प्रकार"इति ॥ प्रसिद्धेऽप्यर्थे विप्रतिपन्नं प्रति प्रसिद्धिमात्रमतन्त्रमित्याह-। [e]"अविदिते"ति । यद्वा, प्रकारस्य लक्षणप्रश्ने स्वरूपाभिधानमतन्त्रमित्याह-। "अविदिते"ति ॥ ननु स्वरूपकथनेनैव लक्षणमुक्तमित्यत आह-। [f]"अन्यथे"ति ॥ अनिष्टान्तरमाह-। [g]"प्रकार इति पक्ष"इति । यद्यपि 'प्रकारवाचिनीयं तृतीयेति न युक्तं, सदोषत्वाद्'-इत्युक्ते 'को दोषः?'-इतिपृच्छतो दोषविशेषस्वरूपाभिधानमावश्यकं, नह्यत्रापि लक्षणप्रश्नो, येन प्रकारलक्षणप्रश्नसमानन्यायता स्यात्, यद्यत्र विशिष्य दोषविशेषाभिधानं न भवेत्तदा "सदोषत्वादि"ति हेतुरेव नोपपादितः स्यात्, तथापि दोषलक्षणप्रष्टारं प्रतीदमुक्तमिति भावः ॥

सू० [a]'स्मृतित्ववत् 'स्मृतेर्लक्षणान्तरेण रहितत्वमनुभूतित्वमिति' प्रत्युक्तं वेदितव्यम् । [b]'गृहीतस्य ज्ञानं

(१) निर्वृत्तः=कृतकार्यः, "निवृत्तो भवेदि"तिपाठे तूपरतो भवेदित्यर्थः । क्वचित्तु निर्वृतोभवेदिति पाठः । स चायुक्तः । (२) नार्थः, संसर्गस्य संसर्गान्तराभावादिति भावः । 'इत्यर्थ' इति क्वचिन्नास्ति ।

स्मृतिः'-इति च स्मृतिलक्षणे धारावाहिकज्ञानेऽतिप्रसक्तिः। * 'सापेक्षज्ञानं स्मृतिः, सापेक्षता च स्वविषयनियमे समानविषयज्ञानापेक्षा ?*-इति चेन्न, [d]प्रत्यभिज्ञायास्तत्ताभागस्य स्मृतित्वापत्तेः (१)। * एवमस्तु?*-इति चेन्न, तर्हि प्रत्यभिज्ञायां स्मृत्यनुभवभागयोर्भिन्नविषयत्वव्यवस्थितौ [e]तदभेदः केन गृह्येत? -इति पूर्वदोष आवर्त्तते।* संस्कारमात्रजं ज्ञानं स्मृतिः *-इत्यपि न, सामग्रीतः (२)सर्वसम्भवेन लक्षणस्या(३) [f]ऽसम्भवात्। * [g]असाधारणतद्धेतुकधीत्वम्? *,-इति चेन्न, आत्मप्रत्यभिज्ञानेऽप्यापत्तेः(४).

टी० ॥ संस्कारासाधारणकारणत्वरहितज्ञानत्वमनुभवत्वमित्याद्यनुभवलक्षणमनुपपन्नमित्याह-। [a]"स्मृतित्ववदि"ति ॥ गृहीतग्राहिज्ञानान्यज्ञानत्वमनुभवत्वमित्यपि न भवति, स्मृतिलक्षणभागस्य(५) धारावहनातिव्याप्तेः, अत(६)एवानुभवलक्षणस्य धारावहनाव्याप्तिरित्याह-। [b]"गृहीतस्ये"ति ॥ ननु गृहीतग्राहित्वेन जनकज्ञानविषयताप्रयुक्तविषयताकत्व (७)विवक्षितं, तच्च न धारावाहिकज्ञाने, येन तत्र स्मृतिलक्षणमतिव्याप्तं स्यादित्याह। [c]"सापेक्षज्ञानमि"ति ॥ धारावहने विषयनियमो यद्यपि न पूर्व ज्ञानाधीनस्तथापि प्रत्यभिज्ञाभागे पूर्वानुभवा-

(१) प्रत्यभिज्ञायाः तत्ताभागस्य स्मृतित्वापादनं प्रत्यभिज्ञायाः सर्वांशेऽनुभवत्वमताभिप्रायेण (प्रकान्तेन) ज्ञेयम्। (२) सामग्री=देशकालात्ममनोयोगादिरूपा। (३) लक्षणस्य=मात्रपदघटितलक्षणस्य।

(४) सोऽहमित्यात्मप्रत्यभिज्ञानस्य संस्कारातिरिक्तमसाधारणकारणं नास्ति, आत्ममनोयोगस्य सर्वज्ञानसाधारणत्वादिति तस्यापि स्मृतित्वप्रसङ्ग इत्यर्थः। (५) गृहीतग्राहिज्ञानान्यज्ञानत्वमितिलक्षणे गृहीतग्राहिज्ञानपर्यन्तस्स्मृतिलक्षणभागः, तस्येत्यर्थः। क्वापि 'स्मृतित्वलक्षणं भागस्ये'ति पाठः। (६) धारावाह्यनुभवे स्मृतित्वापत्तेरेव तस्य तदन्यज्ञानत्वाभावात्तत्र निरुक्तानुभवलक्षणाव्याप्तिरपीत्याह-अत एवेति। (७) स्मृतौ स्वजनकीभूतप्रागनुभवविषयता प्रयुक्ता विषयता, सा च न धारावाह्यनुभवे, पूर्वपूर्वानुभवनिरपेक्षोत्पत्तिकत्वादुत्तरोत्तरानुभवस्येत्यर्थः।

धीन एवेति तत्रातिव्याप्तिरित्याह—। [d]"प्रत्यभिज्ञाया" इति ॥ [e]"तदभेद" इति । तत्ताविशिष्टाभेद इत्यर्थः ॥ [f]"असम्भवादि" ति । आत्ममनसोरपि तत्कारणत्वादित्यर्थः ॥ [g]"असाधारणे" ति । संस्कारासाधारणकारणकत्वमित्यर्थः ॥

मू० [a]"आत्ममनोयोगस्य साधारण्यात्; [b]कार्य्यैक्या(१)नवधारणे च कारणत्वानवधारणात्; तदैक्ये च तदेव लक्षणं स्यात् । * 'येन ज्ञानेनार्थो ज्ञाततात्मकः क्रियते तदनुभवः, येन तु ज्ञातमेव ज्ञाततात्मकत्वेन क्रियते तत्स्मरणम्' ? *—इति चेन्न, [d]"ज्ञातो' 'ज्ञास्यते(२)' चे'त्यनुमानाद्यावप्यापत्तेः ।

टी० ॥ असाधारण्यं यदि तदितराजनकत्वे सति तज्जनकत्वं तदा तत्रासिद्धं, संस्कारेण स्वध्वंसस्यापि जननात्, संस्कारेण स्वविषयाभ्यासबुद्धिसहितेन संस्कारान्तरजननाच्च; यदि च स्मृतित्वावच्छिन्नकार्यताप्रतियोगिककारणता(३)वच्छेदकरूपवत्त्व तदाऽग्रे(४)दूष्यमिति दोषान्तरमाह—। [a]"आत्मे"ति । आत्ममनसोस्तत्रापि साधारणत्वादसाधारण्यं संस्कारमात्रस्यैवेत्यर्थः । यद्यपि मनोपीन्द्रियत्वेनासाधारणम्, एवमात्मापि विषयत्वेन, तथा च न संस्कारमात्रासाधारणकारणत्व, तथापि स्वत्परिभाषामात्रमेतदिति भावः ॥ संस्कारस्य स्मृतिं प्रत्यसाधारणकारणत्वं स्मृतित्वावच्छेदेन निर्वहेत्, स्मृतित्वमेवानुगतं नाद्यापि सिद्धं, सिद्धौ च तदेव लक्षणमित्याह—। [b]"कार्य्यैक्ये" ति ॥ भाहं

(१) कार्य्यैक्यपदं लक्षणया कार्य्यैक्यनियामकीभूतकार्य्यतावच्छेदकीभूतस्मृतित्वादिधर्मपरं, तदेव=कार्य्यैक्यनियामकमेव । (२) सूत्रे 'ज्ञात'–इत्यतीतानुमानाकारः, 'ज्ञास्यते'–इति चानागतानुमानाकारः, तथा चातीतानागतानुमानस्थले विषये ज्ञातताऽऽधानमशक्यं, विषयस्य तत्राऽभावादित्यर्थः । (३) कार्यताप्रतियोगिककारणता=कार्यतानिरूपितकारणता । (४) अग्रे='तदविदूरप्राक्कालोत्पत्तिनियतासाधारणकारणकबुद्धित्वमि'तिचतुर्थविकल्पखण्डनवेलायाम्, कार्य्यैक्येत्याद्यव्यवहितोत्तरग्रन्थेनैव वा ।

स्मृत्यनुभवविभागं दूषयितुं शङ्कते-। [c]"यत्ने"ति । अनुभवेनार्थे ज्ञाततालक्षणो धर्म्म आधीयते, स च धर्मो धर्मधर्मिणोस्तादात्म्य-वादिनो भट्टस्य मते धर्म्यात्मक एव इति 'येनार्थो ज्ञाततात्मकः क्रियते' इत्युक्तं, † स्मृत्या तु ज्ञात एवार्थो ज्ञायते इति 'ज्ञाततैव ज्ञाततात्मिका क्रियते' इत्युक्तम् † ॥ अनुमानेनापि ज्ञातता ज्ञात-तात्मिका क्रियते इति स्मृतिलक्षणं तत्रातिव्याप्तमित्याह-। [d]"ज्ञात' इति। अतीतानागतस्थले ज्ञातताऽऽधानमशक्यं,वर्तमानेपि विषये 'ज्ञातो घटः'-इति ज्ञानवैशिष्ट्यमात्रग्रहो, नतु ज्ञाततावैशिष्ट्य-ग्रहः, अन्यथा कृतेष्टतादिधर्माऽऽधानप्रसङ्ग (१) इति भावः ॥

सू० [a]ततश्च [b]विषयतः स्मृतिविवेचनम्, अन्ततो वाक्ये नाप्यनुभाव्यत्वात्(२),कार्यकारणाभ्यां चानुगतरूप स्य प्रागसिद्धे,र्जातितश्च सङ्करप्रसङ्गाद्, अशक्य-मिति । 'नापि चतुर्थः, यतः कार्यगतवैलक्षण्यानवगमे क्व कारणता ? क्वाऽसाधारण्यं वा ज्ञेयम् ?-इति ।

टी० ॥ सर्वप्रकारेण स्मृतिलक्षणानुपपत्तिमुपसंहरति-। [a]"ततश्चे"ति। स्मृतिविवेचनमशक्यमिति योजना ॥ [b]"विषयत" इति । गृहीतविषयग्राहित्वम्'-इत्यादिना विषयतः स्मृतिलक्षणमेतल्लक्षणवाक्यजन्यानुभवातिव्यापकं, लक्षणवाक्येन तत्रानुभवोवश्यं जन्य:-इति 'अन्ततः'-इत्यस्य स्वरसः। कार्यद्वारा कारणद्वारा च स्मृतिलक्षणं तदा स्याद्यदि कारणतावच्छेदकं कार्यतावच्छेदकं वाऽनुगतं निर्वहेत्,तच्च न स्मृतित्वाद्येव, तस्य व्याहतत्वात्; 'न च स्मृतित्वं जातिरेवलक्षणं', प्रत्यभिज्ञायामनुभवत्वसाङ्कर्येण तन्निरासादित्यर्थः ॥ तदनेन 'स्मृतिलक्षणरहितज्ञानत्वमि'

† उक्तम्=अर्थात उक्तमित्यर्थः । (१) 'कृतो घटः'-इत्यत्र कृतता-धर्माऽऽधानप्रसङ्गः, 'इष्टो घटः'-इत्यत्र चेष्टताधर्माधानप्रसङ्ग इत्यर्थः । (२) अन्ततो वाक्येनाप्यनुभाव्यत्वाद्विषयतः स्मृतिविवेचनमशक्यम्, अनुगतरूपस्य (कार्यतावच्छेदकस्य कारणतावच्छेदकस्य) च प्रागसिद्धेः कार्यकारणाभ्यां स्मृतिविवेचनमशक्यम्, सङ्करप्रसङ्गाच्च जातितोपि स्मृतिविवेचनमशक्यमिति योजना ।

तितृतीयं कल्पं खण्डयता स्मृतिलक्षणमपि खण्डितम्, इदानीं 'तदविदूरप्राक्कालोत्पत्तिनियतासाधारणकारणबुद्धित्वमनुभवत्वम्'-इति चतुर्थं विकल्पं खण्डयति—। [c]"नापि चतुर्थ" इति। अनुभवं प्रत्यसाधारणं कारणमिन्द्रियसन्निकर्षलिङ्गपरामर्श-पदज्ञान-सादृश्यज्ञानरूपमव्यवहितप्राक्कालोत्पत्तिकं वाच्यं, तस्य च कारणता अनुभवं प्रत्यनुभवत्वजातिमन्तरेण दुर्ग्रहेत्यर्थः ॥

सू० [a]न केवलं प्रत्येक पदार्थस्य(१)तद्व्यवच्छेदकत्वस्य चानुपपत्तिर्मिलितेष्वस्मिन् लक्षणे दूषणमुच्यते;तथाहि—'तत्त्वानुभूतिः प्रमा'-इत्यनेन काकतालीयमपि(२) यथार्थज्ञानं व्याप्यते। तद्यथा,-पाणौ पञ्च वराटकान् पिधाय कश्चित् पृच्छति 'कति वराटकाः?'इति,-पृष्टश्चाऽजाकृपाणीयन्यायेन(३)ब्रवीति'पञ्च'ेति,ततः 'पञ्च'ेति ज्ञानमस्ति वक्तुः श्रोतुश्च; [b]दृश्यन्ते तावदेवंविधान्युदाहरणानि; तच्च ज्ञानं न तत्त्वपदेन व्यवच्छेत्तुं शक्यं,वस्तुतस्तस्य पञ्चसङ्ख्यावच्छिन्नत्वेनाऽतथाभूतत्वाभावात्। नाप्यनुभवशब्दव्यवच्छेद्यम्, अननुभूतचरत्वेन स्मरणलक्षणोपेक्षणात्। * [c]नच वक्तुः संशय एव निश्चायकाभावात्, एकतरकोटिव्यवहारस्तु [d]कृष्यादिप्रवृत्तिवद्-इति युक्तं*, तत्राप्याहारूपैककोटिनिश्चयाऽऽस्थानात् (१); [e]अन्यथा संशयस्य कोटिद्वयनिश्चयसमुच्चयतापत्तेः।

---

(१) पदार्थस्य=तत्त्वानुभूतिरिति लक्षणस्थतत्त्वपदयोरर्थस्य।
(२) परिणततालफलपतनकाले काकोऽपि तद्देशमाश्रयते तत्र काकयोगस्य तालफलपतनेऽन्वयव्यतिरेकविरहाद् यादृच्छिकः काकयोग इति यथा, तथा दैवादागतविज्ञानं यादृच्छिककाकतालीयसमं काकतालीयज्ञानमुच्यते इति द्रष्टव्यम्। (३) कण्डूयनार्थं स्तम्भादौ शिथिलबन्धखड्गे छागी ग्रीवां घर्षयति, यदृच्छया च ग्रीवा छिद्यते, तथाभूतोऽजाकृपाणीयन्यायः काकतालीयन्यायसमः।

टी० ॥ 'तत्त्वानुभूतिः प्रमा'-इतिलक्षणे प्रातिभे(२)ज्ञाने-तिव्याप्तिमापादयितुं भूमिमारचयति-। [a]"न केवलमि"ति । एतेन 'श्वो मे भ्राता समागमिष्यती'ति, 'शालिवाहननृपतिरिदानीं शृङ्गारसरसीतीरे देव्या लीलावत्या सह ललितमधुरं सङ्गीतक(३)मनुतिष्ठती'त्यादिप्रातिभज्ञानातिव्याप्तिरूहनीया॥ तदेवाह-। [b]"दृश्यन्त" इति ॥ [c]"नच वक्तु"रि"ति । तथाच संशयत्वेनाऽतत्त्वकोटिप्रवेशात्तत्त्वपदेनैव तादृशज्ञानव्यवच्छेद इति भावः ॥ ननु संशये क्वचिदपि नैककोटिव्यवहार इत्यत आह-। [d]"कृष्यादौ"ति । कृषौ फलं भविष्यति नवेतिसंशये 'भविष्यत्येव फलमि'त्येकतरामेव कोटिं यथा कृषीवला व्यवहरन्ती-(४)त्यर्थः । 'सहकारिसम्पत्तौ कृषेरवश्यं फलमि'ति ज्ञानमाहारः ॥ "अन्यथे"ति । एककोटिकनिश्चयस्यापि संशयत्वेऽन्योपि संशयो निश्चयसमुदायरूपः स्या(५)दित्यर्थः । यद्वा,(६)यदि संशयोपि निश्चयव्यवहारजनकः स्यात्तदा कोटिद्वयनिश्चयात्मक एव स्यादित्यर्थ. ॥

सू० * नच प्रमैव तदि(७)त्युररीकरणीयं *, [a]मध्ये(८) ऽध्यक्षादि दुरन्तर्भावत्वात् । * [b]अव्यभिचारिकर-

---

(१) तथापि=कृष्यादिप्रवृत्तावपि, आहारैककोटिकनिश्चयस्यैव व्याख्यानात्=स्वीकारात्, 'तथाचाऽसिद्धो दृष्टान्त"-इति शेषः ।

(२) प्रतिभा=स्फूर्तिः, तया परिभाव्ते, (यादृच्छिके ज्ञाने, इति यावत्)

(३) एतान्युदाहरणानि यथार्थस्थले द्रष्टव्यानि । शृङ्गारसरसीतीरे = शृङ्गारसाधनीभूतपुष्करिणीतीरे । (४) अत्र यथाशब्दानुरोधात्तथेत्यध्याहर्तव्यम् । (५) अत्रायमुद्देश्यविधेयभावो बोध्यः,-एककोटिकनिश्चयसंशययोरभिन्नत्वेऽन्योपि (अनेककोटिकसंशयोपि, अनेककोटौ) निश्चयात्मक एव स्याद्-इति. अन्यथा निश्चयस्यापि संशयत्वेऽन्योपि निश्चयः संशयः स्यादित्युक्तं भवेत् । (६) पूर्वमनेककोटिकसंशयस्यानेककोटौ निश्चयात्मकत्वं प्रसञ्जितमिदानीं तु सहकारिसंपत्तौ कृषावश्यं फलमित्याद्येककोटिकसंशयत्वेनाभिमतस्यैवानेककोटिकनिश्चयात्मकतां प्रसञ्जयति-यद्वेति । (७) तत्=काकतालीयं संवादिज्ञानम् । (८) अध्यक्षादेर्मध्ये मध्येऽध्यक्षादि,मध्येगङ्गं, पारेगङ्गम्-इत्यादिवत् । अध्यक्षं=प्रत्यक्षप्रमाणम् ।

णाजन्यत्वे सतीति विशेषणीयम्?*–इति चेत्,न,[c]तत्त्व-पदवैयर्थ्यापातात् । नच (१)[d]काकतालीयसंवादमपि ज्ञानं व्यभिचारिकरणसामग्रीजन्यमास्थातुमीशिषे (२), [e]व्यभिचारिणोपि(३) करणविशेषाद्यथार्थत्व-प्रसङ्गात्; न ह्यहेतुकमेवा[f]ऽस्य यथार्थत्वं, नियामका-भावेनातिप्रसङ्गापाताद्; अवश्यमस्याव्यभिचारित्वे अव्यभिचारिनियतमेव करणं वक्तव्यम् । *[g]किं तद्?*,–इति चेत्, [h]स्वात्मनैवात्र प्रश्ने दीयतामुत्तरं भवता, येन नियतेषु प्रमाराशिष्वेवेदं ज्ञानमन्तर्भा-व्यम् [i]प्रमासामान्यलक्षणेन वा व्यवच्छेत्तव्यम् ।

टी० ॥ "मध्ये" इति । प्रत्यक्षादिविजातीयकरणजन्य-तया प्रत्यक्षादिप्रमासु तदनन्तर्भावादित्यर्थः ॥ [d]"अव्यभिचारी"ति । प्रमालक्षणमव्यभिचारिकरणजन्यत्वेन विशेषणीयम्, इदं तु ज्ञानं व्यभिचारिलिङ्ग(४)जन्यमिति नातिव्याप्तिरित्यर्थः ॥ "तत्त्वे"ति । अव्यभिचारिकरणजन्यानुभूतिः प्रमेतिलक्षणा-देव भ्रमव्यावृत्तेरित्यर्थः ॥ प्रकृतज्ञानमव्यभिचारीत्यव्यभिचा-रिकरणजन्यमभ्युपेयमित्याह–। [d]"काकतालीये"ति ॥ अत्रा-निष्टप्रसङ्गमाह–। "व्यभिचारिणोपी"ति । यदि यथार्थज्ञानस्या-

(१) पूर्वं काकतालीयसंवादिज्ञानस्याव्यभिचारिकरणजन्यत्वम-भ्युपगम्य तत्त्वपदवैयर्थ्यमवादि अधुना तु न व्यभिचारिकरणजन्यत्वमपि तस्य, तथा च न निरुक्तविशेषणस्यावश्यकतापीत्याह=न चेति । संवादः= यथार्थज्ञानम् । (२) ईशिषे = शक्तो भवसि । (३) 'व्यभिचारि-णः'–इति पञ्चम्यन्तं करणविशेषादित्यस्य विशेषणं, तत्र 'ज्ञानस्ये'त्य-ध्याहृत्य 'यथार्थत्वप्रसङ्गादि'ति योजनीयम्, यद्वा 'व्यभिचारिणः'–इति षष्ठ्यन्तं, तत्र करणविशेषात्=दुष्टेन्द्रियलिङ्गादेः,व्यभिचारिणः=भ्रमज्ञा-नस्यापि, यथार्थत्वप्रसङ्गः–इत्यर्थः । यद्यपि प्रकृते व्यभिचारिणः करणवि-शेषादेव यथार्थं संवादिज्ञानं तथापि विसंवादिस्थलेपि तथा स्यादिति भावः । (४) अत्र लिङ्गपदं करणमात्राभिप्रायकम्, उपलक्षणं वा शब्दादेरपि ।

ऽव्यभिचारिकरणजन्यत्वं न मन्तव्यं तदा दुष्टेन्द्रियलिङ्गादेरपि प्रमोत्पद्येतेत्यर्थः ॥ "कस्ये"ति । काकतालीयसंवादिज्ञानस्येत्यर्थः ॥ अव्यभिचारिकरणमनुपलम्भबाधितमित्याशयेनाह— "किमि"ति ॥ कार्यबलादायातं ([1])नाऽनुपलम्भबाधितमित्याह । "स्वात्मनैवे"ति ॥ "प्रमासामान्ये"ति । यथार्थत्वे तद([2])शक्यमिति भावः ॥

सू० "एवं लिङ्गाभासादिभ्योपि जातं लिङ्गिज्ञानं दैवगत्या([3])स्थितलिङ्गलिङ्गिनि लिङ्गिमत्येव वा यत् स्यात् तत्तु यद्यपि लिङ्गाभासे न प्रमा, न वा तद्गति लिङ्गिस्वरूपे, तथापि विशिष्टं तथाविधं गोचरयन्त्यास्तस्या बुद्धेर्लिङ्गान्तरवति केवले वा लिङ्गिनि वन्ह्यादावप्यंशे विषये प्रामाण्यस्वीकारेणोक्तदोषापरिहारादिति। "आभासकरणजत्वा([4])त्तद्विषयस्य वस्तुभूतलिङ्ग्यादेरन्यत्वमेव*—इति चेन्न, विशेषस्या([5])न्यत्वेपि तज्जातीयमात्रवत्तावभासांशे दोषापरिहारात् । * सामान्य([6])सम्बन्धकोटिनिविष्टत्वाद्विशेषस्य, तस्य च तत्रानवस्थितस्यैव स्फुरणान्नैष दोषः

(१) अत्र 'अव्यभिचारिकरणम्'—इति शेषः । (२) तद्=व्यवच्छेद्यत्वम् । (३) दैवगत्येति, दैवगत्या स्थितौ लिङ्गलिङ्गिनौ (वास्तविकधूमवह्नी) उभौ यत्र पर्वतादौ तत्र, लिङ्गिमत्येव वा=वास्तविकैकवह्निव्यक्तिमत्येव वा यल्लिङ्गाभासादिभ्यो लिङ्गिज्ञानं स्यात्तद्यद्यपि लिङ्गाभासांशे न प्रमा, नापि तद्गति(=लिङ्गाभासविशिष्टे लिङ्गिरूपे) प्रमा, तथापि वास्तविकधूमात्मकलिङ्गविशिष्टे वास्तविकलिङ्गिनि वन्ह्यादौ केवलवन्ह्यादौ वा प्रमैवेत्यतिप्रसङ्ग इत्यर्थः । (४) आभासकरणजत्वात्, 'भ्रमज्ञानस्ये'ति शेषः । (५) अनेकव्यक्तिसाधारणस्थले विशेषस्य = भ्रमविषयलिङ्गलिङ्गिव्यक्तिविशेषस्य, अन्यत्वेपि = वस्तुभूतलिङ्ग्यादेरन्यत्वेपि । (६) धूमत्ववह्नित्वसामान्यस्य यः समवायात्मकः सम्बन्धस्तत्कोटिनिविष्टत्वाल्लिङ्गलिङ्गिव्यक्तिविशेषस्य तस्य चानवस्थितस्यैव भ्रमे भानं न भ्रमज्ञानस्य प्रामाण्यप्रसङ्ग इत्यर्थः ।

* इतिचेन्न, ʻविशेषाप्रतिभासे सामान्यतस्तन्मात्रवत्ताप्रतिभासस्याप्य(१)भ्युपेयत्वात्, देवदत्त(२)यज्ञदत्तसम्बन्धितासंशयेपि पुरुषसम्बन्धितया निश्चयवत् । ʲसम्बन्धिविशेषस्य(३)निर्लुण्ठितविशेषरूपतया च प्रवेशे व्याप्त्यादेरननुगमप्रसङ्गात् ।

टी० ॥ धूलीपटले धूमभ्रमाज्जातायां च वन्ह्यंशे यथार्थानुमितौ तत्त्वानुभूतित्व लक्षणमतिव्यापकमित्याह—। ᵃ"एवमि"ति॥ अनुमितिविषयो वह्निस्तत्र नास्तीत्ययाथार्थ्यमेव तत्रेति शङ्कते—। ᵇ"आभासे"ति ॥ तथापि वह्निमत्त्व तत्राबाधितमेवेत्याह—। ᶜ"विशेषस्ये"ति । प्रत्युतानुमितवह्नेः प्रत्यभिज्ञानाद्व्यक्तिविषयत्वेपि प्रामाण्यमेवेति भावः ॥ विशेषाभाने सामान्यमपि भासमानमन्यदेव वक्तव्यम्, अन्यथा तत्सामान्यसम्बन्धाकृष्टस्य विशेषस्यापि भानं स्यादिति शङ्कते—। ᵈ"सामान्येति ॥ विशेषभानमन्तरेणापि सामान्यभानं दृष्टं, यथा मालादौ चैत्रमैत्रादिविशेषनिर्मितत्वाज्ञानेपि पुरुषनिर्मितत्वभानमित्याह—। ᵉ"विशेषाप्रतिभासे" इति ॥ यदि च सामान्यमात्रप्रकारकं ज्ञानं नाभ्युपेयं तदाऽनिष्टमाह । ᶠ"सम्बन्धी"ति । निर्लुण्ठितत्व=केवलत्व, विशेषमात्रप्रकारप्रवृत्तं व्याप्तिज्ञानमनुमित्यौपयिकं न सम्भवतीत्यर्थः ॥

मू० ᵍसामान्यानुमानाभासे(४)च संवादिनि विशेषान्यवत्ताकल्पनानवकाशात् । * ʰसामान्यसमवाययोर-

(१) अपिशब्दो "विशेषाप्रतिभासे"—इत्यतोऽग्रे सम्बन्धनीयः—विशेषाप्रतिभासेपीति । (२) "देवदत्त"—इत्यादितः प्राक् 'मालादावि'-ति शेषः । (३) सम्बन्धिविशेषस्य=सामान्यप्रकारकज्ञानविषयीभूतसामान्यसम्बन्धस्य (=समवायस्य) यः सम्बन्धी तस्येत्यर्थः । यद्वा, व्याप्त्यात्मकसम्बन्धस्य यौ सम्बन्धिनौ व्याप्यव्यापकौ तदात्मकविशेषस्येत्यर्थः। (४) सामान्यानुमानाभासे=गोगलवद्धपटे सास्नाभ्रमेणाऽयं गौः सास्नावत्त्वादित्याकारकगोत्वानुमानाभासे विशेषाऽन्यवत्ताकल्पनाऽनवकाशात् = भ्रमविषयगोत्वान्यसत्यगोत्वविशेषस्य कल्पनानवकाशात्, गोत्वस्यैकत्वादेवेति भावः ।

प्यन्ययोरेव प्रतिभासे अन्यथाख्यातिं विहायाऽस-त्ख्यातिप्रवेशापातात् । * 'तन्नत्यधर्मान्तरस्य जात्या तादात्म्यारोपस्तत्र(१) *-इति चेन्न, "तथापि धर्मिणि जातौ च प्रमात्वतादवस्थ्यात्, 'संसर्गारोपनिमि-त्ताच्च तादात्म्यारोपानुपपत्तेः; परार्थानुमानाभासे हि प्रतिपादितपदार्थसंसर्गारोपकारणसम्भवात्, 'त-थापि तत्र तादात्म्यतयारोपकल्पने च तथाभ्रमनि यमस्य (२)निष्कारणत्वात् ।

टी० ॥ किञ्च, नानाऽयक्तिस्थले व्यक्त्यन्तरभानकल्पनेपि गोगलबद्धपटादौ सास्नादिबुद्ध्या गोत्वानुमाने कथमुक्ता ग(३)ति-रित्युदाहरणान्तरमाह—। "'सामान्यानुमानाभासे" इति ॥ तत्र-प्यन्यदेव गोत्वं भासतामित्यत आह—। '"सामान्येति । तस्यालीकतया तज्ज्ञानकल्पनायामसत्ख्यातिः स्यादित्यर्थः ॥ ननु गोनिष्ठरूपादौ गोत्वतादात्म्यारोपस्तत्रेति भ्रान्तैव सानु-मितिरिति शङ्कते—। '"तत्रत्येति ॥ तादात्म्यमात्रे तर्हि भ्रान्तिर्न त्वारोपविषययोर(४)पीति परिहरति—। ""तथापी"ति । प्रत्य-क्षभ्रमेपि धर्म्यंश इहोदाहरण द्रष्टव्यम् ॥ किञ्च, संसर्गारोपसा-मग्री कथं तादात्म्यारोपं जनयेदित्याह—। '"संसर्गे'ति । स्वार्था नुमाने क्वचित्तादात्म्यारोपसम्भवेपि परार्थानुमाने पदोपस्थापि तसमस्तरूपोपेत(५)लिङ्गप्रमात्पक्षसाध्यसंसर्ग एव भेद्दुमर्हती-

(१) तत्र=निरुक्तगोत्वानुमितिस्थले, तत्रत्यधर्मान्तरस्य = गोनि-ष्ठरूपादेः, जात्या सह तादात्म्यारोपः, तथाचारोप्यमाणरूपाद्यात्मक-गोत्वात्मकस्यगोत्वमन्यदेवेति भावः । (२) तथाभ्रमनियमस्य=संसर्गारोप-सामग्रीतः संसर्गभ्रमः, तादात्म्यारोपसामग्रीतश्च तादात्म्यभ्रमः-इत्या-कारकारोपद्वयनियमस्य, निष्कारणत्वात् = अप्रामाण्यापातादित्यर्थः । (३) उक्ता गतिः = व्यक्त्यन्तरभानकल्पनागतिः । (४) आरोपविषययोः = गोत्वरूपाद्यात्मकधर्मिप्रतियोगिनोः । (५) पक्षे सत्त्वं, सपक्षे सत्त्वं विप-क्षाद्व्यावृत्तत्वम्, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वं चेत्याकारकपञ्च-रूपोपेनेत्यर्थः ।

त्यर्थः ॥ यदि संसर्गारोपसामग्र्यपि तादात्म्यारोपं जनयेत्त-दाऽऽरोपद्वैविध्यं न स्यादित्याह—। [f]"तथापी"ति ॥

सू० [a]कस्यचित्तत्र जातसंवादजातिसंसर्गभ्रमस्य मितौ का गतिः? [b]का वा गतिः सिद्धसाधने? [c]तत्राप्यन्यत्व-कल्पनायां सिद्धत्वव्याघातात्, [d]तथात्वे च हेत्वा-भासस्यापि यथार्थग्राहितयोक्तनिमित्तस्य व्यभिचा-रेणान्यत्राप्याभासेऽन्यप्रतिभासकल्पनाया निर्निमि-त्तत्वात् । [e]सिद्धसाधनमितेरेव वाऽव्यवच्छेदात् ।

टी० ॥ इह मया गोत्वसंसर्गोऽनुमितो नूनं गौरेवायमित्य-नुव्यवसायेन संसर्गारोपत्वव्यवस्थितेरित्याह—। [a]"कस्यचिदि-"ति ॥ सिद्धसाधनेन हेत्वाभासतां गतेन लिङ्गेनानुमितिर्व्यभिचा-रिकरणजन्यापि यथार्थैव वक्तव्येति दोषान्तरमाह-। [b]"का वे"ति॥ ननु तत्राप्यन्य एव रसादिर्भासते इति क्व याथार्थ्यमित्यत आह—। [c]"तत्रापी"ति ॥ ननु सिद्धसाधने यथार्थैवानुमितिरस्तु को दोषः? इत्यत आह—। [d]"तथात्वे चे"ति । यदि सिद्धसाधने यथार्थैवा-नुमितिस्तदा धूलीपटले धूमभ्रमादपि यथार्थैवानुमितिरस्तु किं व्यक्त्यन्तरभानकल्पनया? हेत्वाभासत्वेनाविशेषादित्यर्थः ॥

अस्तु वा तत्र व्यक्त्यन्तरकल्पना, सिद्धसाधनस्थलेऽनुमितियाथा-र्थ्यमावश्यकमित्याह—। [e]"सिद्धसाधनमितेरेवे"ति। यद्यपि सिद्ध-साधनेऽनुमितिरेव नोदेति कुत्र याथार्थ्यापत्तिः?, * बाधवदनन्त-सिद्धेः सिद्ध्यन्तराप्रतिबन्धकतया प्रकृतेपि न प्रतिबन्धकत्वम्?*—इति चेन्न, तत्र प्रत्यक्षसामग्र्या अप्रतिहतत्वादिह पक्षधर्मताविघटनेन तत्प्रतिघातात् । * बाधोपि तर्हि स्वरूपसन्नेव प्रतिब-न्धकः स्यात्(१) *—इति चेन्न, इष्टत्वात् । * हेत्वाभासत्वं तस्य भज्येत, 'ज्ञायमानं सद्यदनुमितिप्रतिबन्धकं स हेत्वाभास'—इति

(१) साध्यसत्त्वासत्त्वसन्देहवति पक्षे यथा साध्यसत्त्वनिश्चय-रूपायाः सिद्धेः स्वरूपसत्या एव प्रतिबन्धकत्वं तथा बाधस्यापि पक्षे साध्याऽसत्त्वरूपस्य प्रतिबन्धकत्वं स्यादित्यर्थः ।

तल्लक्षणात्? *–इति चेन्न, तदनुमितिप्रतिबन्धकत्वमात्रस्य(१)तल्लक्षणत्वात् । * नहि अनस्यात्मनो मननं न स्यात्'?–इति चेन्न, अनातिरिक्तप्रकारेणाभिहितेन तत्र मननात्; तथापि यन्मते सिद्धान्तर न सिद्धान्तरविरोधि तन्मतमाश्रित्य खण्डनावतारः ॥

सू० 'यथार्था(२)नुभवः प्रमे'त्यप्ययलक्षणम् । यथार्थत्वं हि "तत्त्वविषयत्वं वा? अर्थसदृशता वा स्यात्? नाद्यः, पूर्वं(३)निरस्तत्वात् । नापि द्वितीयः, "व्यभिचारिणो(४)पि प्रमेयत्वादिनाऽर्थसादृश्येन प्रमात्वापातात् । * "ननु ज्ञानविषयीकृतेन रूपेण सादृश्यं विवक्षितम् । * "नच प्रमेयत्वादिरूपस्य व्यभिचारिण्यपि प्रकाशमानत्वेन तथाप्यतिप्रसङ्गः*,–इति वाच्यम् *, प्रमेयत्वाद्यंशे प्रकाशमाने विषयीभूतधर्मान्तरापेक्षया व्यभिचारिणोपि(५)प्रमात्वाभ्युपगमात्*,–इति नैतद्युक्तम् । प्रकाशमानेन रूपादिसमवायित्वेन रूपेण ज्ञानस्यासार्थदृश्यानभ्युपगमेपि तत्र तदीयप्रमात्वाङ्गीकारादिति ।

टी० ॥ यथाशब्दस्य पदार्थानतिवृत्तिपरतामादायाह–।[a]"तत्त्वविषयत्वं वे"ति ॥ [b]"व्यभिचारिणोपी"ति । यद्यपि भ्रमविषयस्यामतो रजतत्ववैशिष्ट्यादेः प्रमेयत्वं नास्तीति न सादृश्यं

(१) तत्त्वे सति अनुमितिप्रतिबन्धकत्वमात्रस्येत्यर्थः ।

(२) { तत्त्वानुभूतिरित्येतत्खण्डयित्वा तु लक्षणम् ।
यथार्थेत्यादिना चात्र खण्ड्यते लक्षणान्तरम्॥ २० ॥ }

(३) पूर्वम्='तत्त्वानुभूतिः प्रमा'–इति लक्षणस्यतत्त्वादिपदार्थखण्डनवेलायाम् । (४) व्यभिचारिणः=अर्थव्यभिचारिणो भ्रमज्ञानस्य ।

(५) व्यभिचारिणोपि (भ्रमज्ञानस्य) प्रकाशमाने प्रमेयत्वाद्यंशे प्रमात्वाभ्युपगमादित्यन्वयः । धर्मान्तरापेक्षया=भ्रमविषयीभूतरजतत्वादिधर्मापेक्षया ।

तथापि सकलात्रविषयतायाः([1])पक्षमाश्रित्य यत्किञ्चिद्([2])व्यभिचारिज्ञानार्थसादृश्यं चाश्रित्य खण्डनम् ॥ ननु ज्ञानार्थयोः प्रमेयत्वेन सादृश्येपि न अमेतिव्याप्तिर्यतो ज्ञानविषयीकृतेन रूपेणार्थसादृश्यस्य विवक्षेत्याह—। "‘नन्वि"ति ॥ 'इदं रजतं प्रमेयमि'त्यादिभ्रमे तथाप्यतिव्याप्तिरित्याशङ्क्य परिहरति—। "‘नचे"ति । विषयीक्रियमाणे प्रमेयत्वाद्यंशे प्रमात्वान्नातिव्याप्तिरित्यर्थः ॥ एवं सति 'रूपसमवायी घटः'—इत्यादिप्रमायामव्याप्तिरित्याह— "‘प्रकाशमानेने"ति ॥

सू० * "प्रकाशमानेन रूपेण विशेषणभावादर्थसादृश्यमनुभवस्य विवक्षितम्, अर्थस्य च यथा समवायाद्रूपं विशेषणीभवति तथा विषयभावात् ज्ञानस्यापि तद् विशेषणं भवत्येव ?*,-इति चेन्न, "एवं हि पुरोवर्तित्वादिना रूपेण तथाभावसम्भवा([3])त्पुरोवर्तिनीं शुक्तिं रजततयाऽवगाहमानं ज्ञानं प्रमा स्यात् । *"न च वाच्यमिष्यत एव सा प्रमापीति न व्यभिचारचोदनेयं युक्तिमतीति *, यथार्थताविशेषणवैयर्थ्यप्रसङ्गात् । "‘अनुभूतिः प्रमा'-इत्युक्ते एव हि तावन्नास्त्यतिप्रसङ्गः, सर्वस्य व्यभिचार्यनुभवस्य (अन्ततोऽन्यथाख्यातिवादिनये) धर्मिण्यपि प्रमात्वसम्भवेन "प्रमायामेवानुभवत्वस्य स्थैर्यात् ।

टी० ॥ तत्रापि रूपवत्वं विषयतया ज्ञानेप्यस्तीति नाव्या-

---

(१) यस्मिन्पक्षे सकलात्रस्य=प्रतीतिप्रतीतिविषयीभूतवस्तुमात्रस्यैव (सतो वाऽसतो वा) प्रमेयत्वम्=ईश्वरप्रमाविषयत्वम् (सतः सत्वेनैवाऽसतश्चाऽसत्वेनैव) तत्पक्षमाश्रित्य खण्डनं युक्तमित्यर्थः ।

(२) यत्किञ्चित्वम् अर्थसादृश्येऽन्वेति, तच्च तुच्छभिन्नत्वसोपाख्यत्वादिरूपं सादृश्यं व्यभिचार्यव्यभिचारिणोर्ज्ञानार्थयोः समानं, तदेव प्रमेयत्वशब्दोपलक्षितं ग्राह्यमित्यर्थः । (३) तथाभावसम्भवात्=विशेषणभावसम्भवात्, तथाहि—पुरोवर्तित्वं स्वरूपतः समवायेन वा यथा अर्थस्य शुक्त्यादेर्विशेषणं तथा विषयविधया ज्ञानस्यापीति ।

प्तिरिति शङ्कते -। [a]"प्रकाशमानेने"ति । * अमदूगतत्वादिवैशिष्ट्य' विषयतया भ्रमेप्यस्ति विशेषणमिति तत्रातिव्याप्तिः-इति न वाच्यम् *, असत्वेतस्या(१)र्थविशेषणत्वाभावादुभयविशेषणत्वाभावाद्वेति भावः ॥ "एवं ही"ति । यदि विषयतया विशेषणेन सादृश्यं विवक्षितमित्यर्थः ॥ अमत्यें लक्षणगमनादतिव्याप्तिः, प्रकृते च न तथा(२),भ्रमस्याप्यंशभेदेन प्रमात्वादित्याह-। "नच वाच्यमि"ति ॥ विशेषणवैयर्थ्यं स्फुटयति-। 'अनुभूतिरि"ति ॥ "प्रमायामेवानुभवत्वस्य स्थैर्यादि"ति । अनुभवे प्रमात्वस्य स्थैर्यादित्यर्थः ॥

सू० 'यदि त्वंशतोपि व्यभिचारिण्यां मा लक्षणं गमदिति चेतसि निधाय यथार्थत्वविशेषणं प्रयुक्तं तदा न युक्तम्, उक्तदोषात् । [b]अथोच्येत * प्रकाशमानरूपेण सर्वेण विशेषणभावाद् यस्यानुभवस्यार्थसादृश्यं सा प्रमा,'न च तावता(३)धर्मिणो धर्म्यविशेषणतया दोषः,तस्यापि तद्विषयान्तरव्यवच्छेदकत्वाद्*-इति, 'तर्हि व्यभिचारिज्ञानं धर्मिण्यपि प्रमा न स्यात्,सर्वात्मना सादृश्याभावात्; 'अव्यभिचारिणं चांशमननुरुद्धय तदीया(४)ऽप्रमितिकोटिनिक्षेपशाहसिक्याद् बिभ्यता किमव्यभिचार्यंशानुरोधेन व्यभिचार्यंशस्यापि प्रमाकोटिनिवेशनमेव नाध्यवसीयते भवता,

टी० ॥ भ्रमस्योभयरूपतया व्यभिचार्यंशव्यवच्छेदाय 'यथार्थमि'ति विशेषण यदि, तदोक्तदोष(५)बलेन न तद्व्यवच्छेद इत्याह ।-"यदि त्वि"ति ॥ यावदर्थ विशेषणं तावद्विषयतया तत्र

(१) तस्य=धर्मतो रजतत्ववैशिष्ट्यस्य, अर्थविशेषणत्वाभावात्=शुक्तिरूपार्थविशेषणत्वाभावात्, शुक्तिभ्रमोभयविशेषणत्वाभावाद्वा इत्यर्थः । (२) न तथा=नातिव्याप्तिः । (३) तावता=प्रकाशमानसमस्तरूपेण सादृश्यविवक्षणेन । (४) तदीयेति, अव्यभिचार्यंशस्याप्रमितिकोटिनिक्षेपात्मक यत्साहसिक्यं तस्मादबिभ्यता भवतेत्यर्थः । (५) उक्तदोष=भ्रमेऽतिव्याप्तिरूपो दोषः ।

ज्ञाने विशेषणं तत् प्रमा, भ्रमस्तु नैव, तत्र विषयतया ज्ञानविशेषणस्य रजतत्वादेरर्थविशेषणत्वाभावादिति शङ्कते—। [b]"अथे"ति ॥ ननु धर्मी ज्ञानविशेषणमपि न स्वविशेषणमतः सर्वथा प्रकाशमानेन रूपेण विशेषणभावाभावात्तत्राव्याप्तिरित्यत आह—। [c]"नचे"ति ॥ धर्मिणः स्वाविशेषणत्वेपि स्वगतधर्मविशेषणतया(१)नाव्याप्तिरित्यर्थः ॥ परिहरति-। [d]"तर्ही"ति । भ्रमव्यावर्तनाय यद्विशेषणं तद्भ्रमप्रमांशव्यावर्तकमपि स्यादेवेत्यर्थः ॥ भ्रमज्ञानस्य सामस्त्येनैवाप्रमात्वात्तदंशानुपग्रहो न दोषमावहतीति यदि, तत्राह—। [e]"अव्यभिचारिणि"ति । स्मृतिप्रामाण्यपक्षे ज्ञानत्वमपि प्रमालक्षणमुक्तम्, आदिपदाद्विशिष्टज्ञानत्वपरिग्रहः ॥

सू० शक्यन्ते ह्यनुभूतित्व(२)ज्ञानत्वादयः [a]तादृगभिप्रायेण लक्षणीकर्तुम् । यदि च बाध्यार्थांशो धीरबाध्यार्थांशेप्यप्रमैव तदा सौधाग्रकुम्भादिवत्(३)दूरत्वात्तुहिनद्युतिविद्युदादिपरभागाग्रहणाद् अवयविनं च तावत्परिमाणाग्रहणात् अल्पपरिमाणमुल्लिखत्प्रत्यक्षं प्रमात्वेन लोकप्रसिद्धमप्रमा स्यात् । [c]क्व च लभ्यं देशकालालोकादिव्यक्तिसहितजलादिज्ञानस्य समस्ततावदर्थप्रवृत्तिसामर्थ्योदाहरणं ? येन तत् प्रामाण्यं मन्यसे । [d]यदि चांशे बाधादबाध्येप्यंशे तद्बोधमिथ्यात्वं समर्थयसे तदा 'यदर्थजातीयं बाध्यं तद-

(१) स्वगतधर्मविशेषणत्वं धर्मिणस्तद्व्यवच्छेदकतया द्रष्टव्यम् ।
(२) अनुभूतित्वं नानुगतम्, अस्मिन्पक्षे स्मृतेरपि प्रमात्वादित्यत आह—ज्ञानत्वेति, परोक्षापरोक्षान्यतरत्वमादिशब्दार्थः । (३)तुहिनद्युतिविद्युदाद्यवयविनं चाल्पपरिमाणमुल्लिखत्प्रत्यक्षमप्रमा स्यादिति सम्बन्धः । अल्पपरिमाणग्रहणे हेतुः—तावत्परिमाणाऽग्रहणादिति, तत्रापि हेतुः—परभागाऽग्रहणादिति, तत्रापि हेतुः—दूरत्वादिति; तत्र दृष्टान्तः—सौधाग्रकुम्भादिवदिति, सौधः—प्रासादः तच्छिखरस्थकुम्भवदित्यर्थः । तुहिनद्युतिः = चन्द्रः ।

र्थजातीयमबाध्यमपि मिथ्ये'ति मन्यमाने किमुत्तरं ते स्याद्? अन्यत्र लोकप्रसिद्धप्रमोदाहरणत्यागात् ।

टी०॥ "'तादृगभिप्रायेणे"ति । व्यभिचार्य्यंशस्यापि प्रमाकोटिनिवेशनाभिप्रायानुरोधेनेत्यर्थः ॥ विनिगमनाविरहमुक्त्वा लोकविरोधमाह—'"यदा"ति । प्रकाशमानाल्पपरिमाणत्वादेश्चन्द्राद्यर्थविशेषणत्वाभावात्तत्र प्रमाणलक्षणपरिहारा(१)च्चन्द्राद्यंशेऽपि प्रमात्वं न स्यादित्यर्थः ॥ यावज्ज्ञानविषयविशेषणकार्थकत्वं(२)यथार्थत्वलक्षणं, तत्रासंभवमाह—। '"क्व च लभ्यमि"ति । यावाननुभवस्य विषयस्तावानर्थस्य विशेषणमिति तदा स्याद्यदि ज्ञानोल्लिखितसकलप्रकाराबाधः स्यात्, स च प्रवृत्तिसंवादगम्यो, न सर्वत्रप्रकारे क्वापि ज्ञाने प्रवृत्तिसंवाद, इत्यसम्भव इत्यर्थः ॥ अंशबाधमात्रेण सकलज्ञानबाध्यत्वाभ्युपगमे दोषान्तरमाह—।'"यदि चे"ति । 'प्रमाज्ञानं बाध्य, बाध्याशकत्वादि'ति वत् 'सत्यत्वेनाभिमतं रजतज्ञानं बाध्य, शुक्तिस्थलबाध्यरजतज्ञानीयविषयत्वादि'त्यपि स्यादित्यर्थः । यद्वा, 'रजतं सर्वज्ञाने बाध्य, शुक्तिज्ञाने बाध्यत्वादि'त्यपि स्यात्, विपक्षबाधकाभावस्योभयत्रापि तुल्यत्वादिति भाव ॥

सू० "अथोच्यते * प्रकाशमानेन रूपेण विशेषणतया यदर्थमात्यमनुभवस्य तत्र तस्य प्रमात्वमिति विषयविशेषनियमेनैव प्रमात्वं लक्षणीयमित्येतदर्थमेव यथार्थविशेषणोपादानम् *-इति । मैवम् । "विशेष्यांशेनुभूतिरेवं प्रमा न स्यात् । * व्यवच्छेदकत्वं 'विशेषणत्वमभिमतं, धर्म्यपि च स्वसम्बद्धान् धर्मान्विशिनष्टीति नोक्तदोष इत्युक्तमेव ?* इति चेन्न, विशिष्टे प्रमात्वाभावापत्तेः । "अपिच, एवं तर्हि रजत-

(१) क्वचित्पुस्तके 'प्रमाणलक्षणविरहात्"—इत्यपि पाठः ।

(२) यावद्देशकालसम्बन्धादि ज्ञानस्य विषयस्तावदेवार्थप्राप्तिकाले यज्ज्ञानीयार्थस्य विशेषणं तज्ज्ञानमित्यर्थः ।

त्वादिकमपि व्यवच्छिन्दत्येव शुक्तिकां, 'रजततया प्रकाशिता या शुक्तिव्यक्तिः सेयमि'ति(१)। * 'ननु साक्षाद्विशेषणत्वं विवक्षितं, रजतत्वं तु ज्ञानद्वारा शुक्तिविशेषणमिति नातिप्रसङ्गः, ? *-इति मैवम्। तर्हि 'दीर्घदण्डः पुरुषः'-इत्यादौ ह्रस्वदण्डादिभ्यो (२) वैलक्षण्ये विशेष्यस्यानुभूयमानेनुभूतेर्न प्रमात्वं स्यात्, दीर्घत्वादेर्दण्डादिद्वारा विशेषणत्वादिति। * ज्ञानरूपद्वाराऽनपेक्षतया विशेषणत्वमिष्टम् ? *-इति चेन्न,

टी० ॥ यदर्थविशेषणं, तद् यस्य ज्ञानस्य विषय,स्तज्ज्ञानं तत्रार्थे प्रमा, रजतत्वं तु शुक्तौ न विशेषणं, तेन तत्रार्थे भ्रमो, न प्रमा, पुरोवर्तित्व तु प्रमैवेति शङ्कते-। "'अथे"ति ॥ परिहरति-। 'विशेष्ये''ति। विशेष्यस्याविशेषणत्वात्तदंशे क्वापि प्रमा न स्यादित्यर्थः ॥ नन्वयं गौरित्यादौ ज्ञाने यथा गोत्वं गवि विशेषण तथा पिण्डोपि गोत्वस्येत्यवश्य वक्तव्यमन्यथा सर्वज्ञानानां प्रकारे निर्विकल्पकत्वं स्यादित्याह-। "'विशेषणत्वमि"ति(३) ॥ विशिष्टस्यापि विशेषणविशेष्योभयात्मकतया तत्रापि प्रमात्वस्योक्तरीत्या सुलभत्वादित्यनुशयेनाह-। "'अपिचे"ति ॥ ननु रजतत्वं प्रकाशे, प्रकाशश्च शुक्तौ, विशेषणम् इति परम्परा न विवक्षिता, किन्तु साक्षादेव यत्र विशेषणत्वं तद्विवक्षितमित्याह-। "'नन्वि''ति ॥

सू० [a]'साक्षात्कृत'-इत्याद्यवगमानामप्रमात्वापातात्। * [b]तज्ज्ञानप्रकाशितरूपेण विशेषणत्वम् *,-इति तु दूरं तुच्छं, [c]रूपादेः समवायेन तज्ज्ञानाविशेषकत्वात्।

---

(१) तथा च ज्ञानद्वारा रजतत्वस्य शुक्तिविशेषणत्वादतिव्याप्तिरित्यर्थः। (२) ह्रस्वः दण्डो येषां तेभ्यः पुरुषेभ्य इत्यर्थः। (३) "विशेषणत्वमि"तिप्रतीकस्थाने "व्यवच्छेदकत्वमि"ति प्रतीकमपि कैश्चिदाधुनिकैः प्रक्षिप्तम्।

"अर्थविशेषणत्वेऽयं नियमः यत् तज्ज्ञानप्रकाशितेन रूपेणेति, नतु ज्ञानेपि ?*-इति चेत् 'न. तज्ज्ञानव्यक्तेर(१)न्यत्रासंभवेनासाधारण्याद्व्यापकत्वादित्यलम् ।

"सम्यक्परिच्छित्तिः(२)प्रमा'-इत्यपि न युक्तम् । "न खलु सम्यक्त्वं तत्त्वविषयता याथार्थ्यं वा संभवति, उक्तदोषात् । * "ननु सामस्त्यं(३)सम्यक्त्वमिष्टम्, अभिधीयते हि लोके 'न मया सम्यग्दृष्टं, सामान्याकारेण तूपलब्धमि'ति, तद्धि समीचोऽर्थस्य परिच्छेदः=सम्यक्परिच्छेदः, सम्यगर्थविषयत्वाद्वा सम्यक्शब्दः परिच्छेदसमानाधिकरण एवायम् ?*-इति, मैवम् ।

टी० ॥ "साक्षात्कृत"इति । साक्षात्त्वादिशालीनां ज्ञानद्वाराऽर्थविशेषणत्वात्तत्राऽव्याप्तेरित्यर्थः ॥ ननु भ्रमे रजतत्वस्य शुक्तिसमवायितया विशेषणत्वं भासते, न च तत्(४)तथा तत्रास्तीति वैधर्म्यमित्याह-। "तज्ज्ञाने"ति ॥ तदुक्तौ हेतुमाह-। "रूपादेरि"ति । रूपं समवायितया घटे विशेषणं, न तु तादृप्येण ज्ञानेपीत्यर्थः ॥ ननु यज्ज्ञानोल्लिखितप्रकारेण यदर्थे यद्विशेषणं तज्ज्ञानं तत्रार्थे प्रमेति शङ्कते । "अर्थविशेषणत्वे"इति ॥

(१) 'तज्ज्ञानप्रकाशितरूपेणे'ति ज्ञानव्यक्तिघटितमिदं लक्षणं ततश्च घटोयमिति ज्ञानप्रकाशितरूपस्य घटत्वस्य पटोयमितिज्ञानविषयविशेषणत्वाभावेनाव्याप्त्यापत्तिरित्याशयः । असाधारण्याद्=अन्योन्य व्यावृत्तत्वात् ।

(२) { प्रमा सम्यक्परिच्छित्तिरित्यौदयनलक्षणम् ।
खण्डयन् वादिनां गर्वमखर्वं मर्दयत्यथ ॥ २१ ॥ }

भ्रमेतिव्याप्तिवारणाय 'सम्यगि'ति, यथार्थच्छायामतिव्याप्तिवारणाय 'परिच्छित्तिः-इति, परिच्छित्तिः = अवधारणम्, क्वचित्तु "सम्यक्परिच्छेदः -इति पाठः । (३) सम्यक्त्वं सामस्त्यमिष्टमित्यन्वयः ।

(४) तत् = शुक्तिसमवायितया विशेषणत्वं, तत्र = रजतत्वे ।

यत्तद्भ्यां विशेषणेन च लक्षणेऽननुगमो दोष इति परिहरति—। "'न"ति ॥ 'मितिः सम्यक्परिच्छित्तिरि'त्याचार्यलक्षणखण्डनमुपक्रमते—। "सम्यगि"ति ॥ सम्यक्परिच्छेदपदयोरसमासं(१) समासे कर्मधारयमाक्षिपति—। "न खल्वि"ति ॥ षष्ठीतत्पुरुषं शङ्कते । "नन्वि"ति ॥ सम्यक्पदस्यार्थद्वारा परिच्छेदविशेषणतया विशेषणसमासं(२)शङ्कते—। "सम्यगर्थे"ति ॥

सू० "सामस्त्यमर्थस्य किं सर्वावयवसहितत्वम्? अथवा सर्वधर्मसहितत्वं? नाद्यः, अनवयवपदार्थपरिच्छेदस्य (सावयवपदार्थपरिच्छेदस्यापि मध्यभागाद्यविषयस्य) अप्रमात्वापातात्। नापि द्वितीयः, असर्ववित्परिच्छित्तीनां सर्वासा(३)मप्रमात्वापत्तेः। अथ मन्यसे, * सम्यक्शब्दः सविशेषार्थः, यदपि लोकेऽभिधीयते 'न मया सम्यग्दृष्टं'-तस्यापि मया न विशेषतो दृष्टमित्यर्थः। तस्माद् 'विशेषसहितधर्मिपरिच्छित्तिः प्रमे'त्युक्तं भवति, विभ्रमादयो हि विशेषमपश्यतो जायन्ते इति तद्व्यावृत्त्यर्थं विशेषणमिदं, विशेषाणां(४) च सर्वेषां विशेषान्तरानभ्युपगमेपि स्वरूपमेव केषाञ्चिद्विशेषः*,-इति नैतद्युक्तं, विशेषमात्राभिधाने रजतत्वादिना विशेषेण सहैव शुक्तिव्यक्त्यादेर्भ्रमेणावगाहनात्तस्यापि प्रमात्वं स्या-

(१) सम्यक्परिच्छेदपदयोः असमासं=समासनिर्वचनमन्तराऽर्थादेव प्राप्तम्, समासे = समासान्तर्गतं, कर्मधारयमाक्षिपतीत्यर्थः। (२) विशेषणसमासं, सम्यगितिविशेषणेन जायमानं कर्मधारयसमासमित्यर्थः।
(३) यद्यपि 'अयं घट एतन्निष्ठसर्वधर्मवानि'ति ज्ञाने प्रमालक्षणं गच्छत्येवेति 'सर्वासामि'त्ययुक्तं, तथापि तादृशज्ञानभिन्नघटोऽगमित्यादिज्ञानाभिप्रायेण तथोक्तिर्द्रष्टव्या। (४) नन्वन्त्यविशेषसमायामव्याप्तिः, अनवस्थाभयेनान्त्यविशेषेषु विशेषान्तरानभ्युपगमेन सविशेषत्वाभावादित्यत आह—विशेषाणामिति।

त्, "प्रत्यर्थं व्यावृत्ताकाराणां च विशेषाणामुपादानेऽननुगमप्रसङ्गात्, "सामान्यतश्चातिप्रसङ्गा(१)दिति 'उभयथाप्यसङ्गततापत्तेः ।

टी० ॥ परिच्छेदकमनयार्थमासग्रविवक्षां दूषयति—। "मानस्त्यमर्थस्ये"ति ॥ ""असर्वविरपरिच्छित्तीनामि"ति, प्रमेयत्वादिसामान्यलक्षणप्रत्यासत्तिजमपि ज्ञानं विवक्षितम् (२) ॥ अपदार्थनामाशङ्काह—। ""यदपि लोके"इति ॥ ""विशेषणि"ति, कालपृष्ठत्वादिकं(३)नामरूत्यादिकं च ॥ ""केषाञ्चिदि"ति । अन्त्यविशेषाणामित्यर्थ । अनवस्थापत्तेरिति भावः ॥ ""विशेषमात्रे"ति । सामान्यत एव विशेषाभिधाने इत्यर्थः ॥ ""प्रत्यर्थमि"ति । यत्र यो विशेषस्तत्र तस्यैवोपलम्भ इत्यर्थः ॥ सङ्गत्यभिधानार्थमुक्तं स्मारयति—। ""सामान्य"इति ॥ सङ्गतयति—। "उभयथे"ति । सामान्यविशेषाभ्यामतिप्रसङ्गाननुगमदोषाविल्यर्थः ॥

सू० "विशेषस्य च भवतु स्वरूपमेव विशेषः तथाप्यभेदादेव विशेषसहितत्वं नास्तीत्य"याप्तेरपरिहारात् । यत्तु कश्चिदवोचत् 'विशेषशब्देन तेऽभिधीयन्ते यददर्शनेन भ्रमसंशयावकाशो, यद्दर्शने च बाधाऽबाधव्यवस्था, 'तदनभ्युपगमे तत्त्वातत्त्वविभागो न स्यात्, भवितव्यं च तेन (४) 'अन्यथा व्याघातादि'ति, तदयुक्तम्(५) । न तावदेवंविधोविशेषोऽभि-

(१) 'रजतादिभ्रमे'–इति शेषः । (२) असर्वविरपरिच्छित्तिशब्देन सामान्यलक्षणाप्रत्यासत्तिजन्यमपि ज्ञानं विवक्षितमित्यर्थः । तस्यापि यदात्मकं सामान्यं प्रत्यासत्तिस्तद्व्यतिरिक्तसर्वधर्मपुरस्कारेण वस्तुभासकत्वायोगादिति भावः । (३) कालपृष्ठत्वम् = नीलपृष्ठत्वम् । (४) तेन = तत्त्वाऽतत्त्वविभागेन । (५) "सम चानिर्वचनीयतैव प्रतीतिव्यवहारव्यवस्थापर्यनुयोगशाणवारणाय वज्रवारवाणायमाना विजयते"--इत्यादिना व्याघातस्य पुरस्तादेव निराकृतत्वान्न मन्यते व्याघात इति परिहरति–तदयुक्तमिति ।

धातुं शक्यः यदवगमस्य(१)न भ्रान्तित्वादिसम्भवः, ᵃस्वप्नदृशः सर्वविशेषोपलम्भात् । * ᵇनच व्याघातदण्डभयमात्रादसावुपपादयितुमशक्योऽप्यभ्युपगन्तव्यः इति युक्तम् * । ᶜतदुपदर्शनाशक्यत्वेन व्याघातपरिहार एव कश्चिदन्यो निर्वक्तुमशक्योऽप्यस्तीत्येव तदा किं न व्यवस्थाप्यते ? ᵍनहि परिदृश्यमानपदार्थगोचरं(२) तदस्ति किञ्चिदनुभूयमानं यत्स्वप्ने वा वाक्याभासे वा प्रतिपत्तुमशक्यम् इति प्रतिपत्त्यारूढतया येयमप्रतीयमानकल्पना ततो वरमनुपलभ्यमानस्य व्याघातपरिहारस्यैव कल्पना भद्रा ।

टी० ॥ विशेषे विशेषमाहित्याभावात्प्रमायामव्याप्तिरित्याह—। ᵃ"विशेषस्ये"ति ॥ ᵇ"तदनभ्युपगमे"इति । बाधाबाधव्यवस्थानभ्युपगमे इत्यर्थः ॥ ᶜ"अन्यथे"ति । सर्वाप्रामाण्ये तद्ग्राहकप्रमात्वाप्रमात्वयोर्व्याघातः; (३)प्रामाण्याप्रमीतौ त-

(१) अत्र निष्ठत्वं षष्ठ्यर्थः, तथाच यादृशविशेषावगमनिष्ठभ्रान्तित्वादिसम्भवो नेत्यर्थः । अयं भावः—स्वप्नदशायां शुक्तित्वादिविशेषदर्शनेऽपि स्वप्नात्मकभ्रमाऽनिवृत्तेर्न विशेषदर्शनस्य भ्रमनिवर्तकत्वमिति ।

(२) गोचरशब्दस्य नियतपुंस्त्वाद्गोचर इति युक्तं पाठं सम्भावयामः, यद्वा परिदृश्यमानाः पदार्था गोचरा विषया यस्य विशेषात्मकवस्तुनस्तदिति बहुव्रीहिः, यद्यपि विशेषस्य न मुख्यं विषयित्वं तथाप्यविद्यादेरिवौपचारिकत्वान्न दोषः । अथवा परिदृश्यमानाः पदार्थाः (विशेषरूपेण) विषया यस्य ज्ञानस्यैतादृशं ज्ञानं न किञ्चिदनुभूयमानं यत्स्वप्नादौ न स्याद्धित्यर्थः । इतीति, इतिहेतोः सर्वविशेषाणामुक्तन्यायेन स्वप्नादौ प्रतिपत्त्यारूढतयाऽप्रतीयमानत्वकल्पना अनुपलम्भबाधितत्वेन विरुद्धेति ततोऽनुपलभ्यमानस्य व्याघातपरिहारस्यैवाविरुद्धत्वेन कल्पना भद्रेत्यर्थः । (३) सर्वं चेदप्रमाणं तदा तद्ग्राहकज्ञानस्य प्रमात्वं व्याहतं, तस्यापि सर्वान्तर्गतत्वात्; तथा सर्वाप्रामाण्ये तद्ग्राहकज्ञानस्याप्रमात्वमपि व्याहतं, तत्र प्रमाणाभावात्; एवमेव सर्वाप्रामाण्ये प्रामाण्यनिषेधवाक्ये प्रामाण्याप्रामाण्यव्याघातोऽपि ज्ञेयः । तथा अप्रामाण्यमात्रपरिशेषे सर्वत्रैव घटादिज्ञानेऽप्रमात्वनिश्चयान्निष्कम्पप्रवृत्तिर्न स्यादिति

निषेधव्याघातः; प्रामाण्यनिषेधवाक्ये प्रामाण्याप्रामाण्यव्याघातः; अप्रामाण्यमात्रपरिशेषे स्वप्रवृत्तिव्याघातः, स्वप्रवृत्तौ सामर्थ्यासामर्थ्यव्याघातश्चेत्यर्थः ॥ "'स्वप्ने'' ति । निद्रादिमहिम्ना([1])विशेषसाहित्येनापि स्वप्नसम्भवादित्यर्थः ॥ ननूक्तव्याघातभयादवश्यमेतदभ्युपगन्तव्यमित्यत आह—। "'न चे''ति ॥ "'तदुपदर्शने''ति । दुर्वचस्यापि विशेषस्य व्याघातभयादभ्युपगमः—इति यदि, तदा दुर्वचेनैव केनचित्प्रकारेण व्याघातपरिहार एवाभ्युपगम्यतामलं विशेषस्वीकारेणेत्यर्थः ॥ ननु किमत्र विनिगमकमत आह—। "'नही'' ति । भ्रमविषयत्वं बाधितमिति विशेषकल्पनया व्याघातपरिहारस्वीकारादनुपलभ्यमानहेतुकव्याघातपरिहार एव श्रेयानित्यर्थः ॥

सू० "बहुशश्च व्याघातोद्भावनविभीषिकामिमामुन्मूलयिष्यामः । *' ननु न ब्रूमो विशेषेण सहोपलम्भो विशेषसहितोपलम्भः, किंनाम विशेषेण सहितस्य पदार्थस्योपलम्भः, तथाच न शुक्तौ रजतत्वं विशेषोस्ति तत्कथं रजतभ्रमेऽतिप्रसङ्गः '' इति, न उक्तदोषेणैव निरस्तात् । यदि हि विशेषस्य सामान्यतोभिधानं तदा पुरोवर्तित्वादेः([2]) सत्त्वान्न प्रसङ्गनिवारणं, विशेषेण तदभिधाने त्वननुगमः, इति । 'बाधाबाधव्यवस्थाहेतुरस्ति विशेषः'-इति पक्षं यस्तु जडतरो न जहाति स 'आप्तानाप्तवाक्याभ्यां नदीतीरे फलानि सन्तीत्येवंरूपाभ्यां प्रतिपाद्यमानेर्थे स्थितं कं विशेषमेकत्र पश्यसि यमपरत्र न

प्रवृत्तेर्व्याघातः, तथा तस्यां प्रवृत्तौ सफलत्वाफलत्वयोः (=सामर्थ्यासामर्थ्ययोः) व्याघातश्च स्यात् तयोरपि प्रमात्वाप्रमात्वनिरूपणत्वादिति फक्किकार्थः ।

([1]) "निद्रमहिम्ना"—इति तु प्रायः पुस्तकेषु प्रतीयमानः पाठः प्रामादिकः । ([2]) पुरोवर्त्तित्वम् (=इदन्त्वं) चाकचक्यादिकं च विशेषो शुक्तौ रजतभ्रमे भासते एवेत्यतिप्रसङ्ग इत्यर्थः ।

पश्यसि ?,-इति पृष्ट्वा प्रतिबोधनीयः(१), तथाप्य-(२)जातबोधस्तु जडतमः कश्चिद्यदि स्यात् स एवं प्रबोध्यः,-ये ते विशेषान्तरप्रवाहस्वीकारेऽनन्तविशेषापत्तिभयात्त्वया स्वत एव विशेषरूपा इति स्वीकृताः तेषां स्वरूपं तावत्परस्परव्यावृत्तमतोऽनुगतैकरूपाभावादव्यापकत्वं स्यादिति । * बाधव्यवस्थाहेतुत्वादेवानुगतिः ? *,-इति चेन्न, [d]क्वाचित्कबाधव्यवस्थाहेतोर्भ्रमेपि प्रकाशात् । * [e]'तत्र तस्य*,-इति चेन्न, [f]व्यावृत्तेः ।

टी० ॥ व्याघातश्च(३)सर्वविरोधखण्डनप्रस्तावे(४)निरसनीय एवेत्याह-।"“बहुश” इति ॥ विषये विशेषसाहित्यमपेक्षितं, नतु ज्ञाने, भ्रमश्च न विशेषरजतत्वादिसहितशुक्त्यादिविषयक इति नातिव्याप्तिरिति शङ्कते-। "“नन्वि”ति ॥ उक्तं दोषं विशदयति-। “यदि ही”ति । जडतरत्वम्=उक्तखण्डनाऽविवेचकत्वं, जडतमत्वम्=असकृदुक्ताग्राहकत्वम् ॥ [d]“क्वाचित्के”ति । रजते(५) बाधव्यवस्थाहेतोरेव रजतत्वस्य भ्रमेपि भानादित्यर्थः ॥ यत्र यद्बाधव्यवस्थापकं तत्र तस्य विशेषत्वमित्याह-। [e]“तत्र तस्ये”ति ॥ यस्वतत्त्वयोरननुगमादिदमलक्षणमित्याह-। [f]“व्यावृत्ते”रिति

सू० [g]बाधस्य च तद्विपरीतार्थप्रमात्वेन तदर्थाननुगमात्, [h]प्रमायाश्चाव्याप्यव्यवस्थापनादिति । [i]शङ्कान्तरा-

---

(१) आम्नानामशाक्यजप्रतिपत्तिविषयेषु न वैलक्षण्यमनुभूयते येनैकत्र प्रमाऽन्यत्र चाऽप्रमा भवेत् विशेषणविशेष्यतत्संसर्गाणामुभयत्राविशिष्टानां भानात्, किन्तु बाधादेकत्राप्रमा अन्यत्राऽबाधात्प्रमेति तत्र प्रमायामव्याप्तिरिति भावः । (२) तत्रापि वैशिष्ट्यमदसत्त्वाभ्यां विशेषोस्तीति यदि ब्रूयात्तत्राह-तथापीति । (३) “व्याघातश्च विरोधः” इति त्वयुक्तः पाठः, व्याघातस्य विरोधजनकत्वेन विरोधरूपत्वाभावात् । अथवा विरुद्ध्यतेऽर्थोऽनेनेति विरोध इति व्युत्पत्त्या कथञ्चित्तस्यार्थ उपवर्णनीयः । (४) चतुर्थपरिच्छेदान्ते आत्माश्रयादितर्कनिरसनप्रकरणे इत्यर्थः । (५) रजते=सत्यरजते ।

णि चातः पराणि याथार्थ्यविशेषणदूषणदूषिता(१)न्येवोपनिपतन्तीतीह द्विरभिधानभयान्नोक्तानि । ᵈकिंच, तर्कज्ञानमाहार्यौ च संशयविपर्ययौ परिदूश्यमाने एव विशेषे भवन्तीति तैरतिप्रसङ्गः स्यात् । * नचाहार्यौ ᵉतौ नाभ्युपगन्तव्याविति युक्तम् *, विप्रलम्भकस्य वाक्यप्रयोगमूलतया आहार्यभ्रमस्य(२)ज्ञाततत्त्वस्य च गुरोः शिष्यप्रबोधार्थं विचारं प्रवर्तयत आहार्यसंशयानां भवत एव शास्त्रेऽनुमतत्वात्, परिच्छेदशब्दश्चानुभूतिपर्यायो ᶠऽनुभूतिदूषणं नातिक्रामतीत्यलम् ।

नापि'अव्यभिचार्यनुभवः प्रमे'ति युक्तम्, अव्यभिचारिपदस्य यदि तत्त्वविषयत्वार्थत्वं तदा दूषणान्युक्तान्येवावर्तन्ते । अथैवमुच्यते-*अव्यभिचारित्वमर्थाविनाभूतत्वं*, तदा प्रष्टव्यं कोस्यार्थः ? किं यदाऽर्थस्तदैव ज्ञानम्?-१, उत यत्रार्थस्तत्रैव देशे ज्ञानम्?-२,

टी० ॥ किंच, बाधो न विपरीतप्रमामात्रमपि तु बाध्यं यत्र यत्तद्विपरीतप्रमा, तथाच यत्त्वन्तस्याननुगमादननुगतेन बाधेन बाधव्यवहाराहेतुत्वं विशेषण नानुगमकमित्याह—। ᵍ"बाधस्य चे"-ति ॥ किंच, सविशेषज्ञानं प्रमा, विशेषश्च बाधव्यवहाराहेतु, बाधश्च विपरीतप्रमैवेति च क्रकमित्याह-। ʰ"प्रमायाश्चे"ति ॥ यद्विशेष (३) सहितो धर्मी तेन रूपेणानुभवः प्रमा, साक्षाद्विशे-

(१) "याथार्थ्यविशेषणदूषितानी"ति पाठेपि याथार्थ्यविशेषणदूषणदूषितानीत्यर्थः । (२) आहार्य्यभ्रमस्य भवत एव शास्त्रेनुमतत्वादिति सम्बन्धः । (३) ननु सम्यक्परिच्छित्तिरित्येव पूर्वोक्तं प्रमालक्षणमास्ताम्, सम्यक्त्वं चाऽर्थे साक्षाद्रजतत्वादिविशेषसाहित्यं, नतु ज्ञानद्वारा, तच्च सत्यरजते एव, भ्रमविषयीभूतशुक्तौ तु ज्ञानद्वारैव, एतादृशं च सम्यक्त्वमर्थगतमपि परिच्छित्तावारोप्योच्यते-'सम्यक्परिच्छित्तिरि'ति, तथा च साक्षाद् यादृशरजतत्वादिविशेषसहितो धर्मी तेन रूपेण तस्यानुभवः प्रमा-इति प्रमालक्षणं निष्पन्नमित्याह-यद्विशेषेति ।

षसाहित्यं सम्यक्परिच्छेदो विवक्षितः, भासमान(¹)यावद्विशेषविशेषणविषयकज्ञानं वा प्रमेत्याद्यपि प्रमालक्षणं दूषितमेवेत्याह—। [c]"शङ्कान्तराणी"ति ॥ विशेषसहितधर्मिपरिच्छित्तिः प्रमेत्यत्र दूषणान्तरमाह—। [d]"किंचे"ति ॥ [e]"तावि"ति, संशयविपर्ययौ ॥ "विप्रलम्भकस्ये"त्याद्युपलक्षणम्.(²)'आरोप्य निषिध्यते'—इतिमते आहार्यारोपस्यैव निषेधधीहेतुत्वाभ्युपगमादित्यपि द्रष्टव्यम् ॥ [f]"अनुभूतिदूषणमि"ति । अनुभूतित्वस्य जातेः स्मृत्यन्यज्ञानत्वाद्युपाधेश्च खण्डितत्वादित्यर्थः । "तत्त्वविषयत्वादी"त्यादिपदाद्यथार्थत्वसम्यक्त्वादिसङ्ग्रहः ॥

मू० [a]अथ यादृगर्थस्तादृगेव ज्ञानं यत्तत्प्रमितिरिति ?–३। नाद्यः, अतीतानागतानुमित्य(³)व्यापनात् । न द्वितीयः, ज्ञानासमानदेशार्थप्रमितीनामव्यापनात्, [b]ज्ञानसमानदेशमर्थ(⁴)मन्यत्रारोपयतोऽप्यनुभवस्य प्रमात्वापत्तेः । नापि तृतीयः, ज्ञानार्थभेदवादे 'सर्वाकारेण तत्साम्यानुपपत्तेः, अभेदवादे भ्रमस्यापि तथाभ्युपगन्तव्यत्वप्रसङ्गेन विशेषणवैयर्थ्यापातात् (⁵), तैश्च(⁶)तैश्च विशेषैः सादृश्यस्य विवक्षितत्वे यथार्थताप्रस्तावोक्तदूषणान्यावर्तन्ते इति । * 'अविसंवाद्यनुभवः प्रमा' *,–इत्यपि, न युक्तम् । अविसंवा-

(१) लक्षणान्तरं शङ्कते–"भासमाने"ति, भासमाना यावन्तो रजतत्वादयो विशेषा रजतादौ विशेषणीभूतास्तद्विषयकं ज्ञानमित्यर्थः । (२) 'विप्रलम्भकस्ये'त्यविप्रलम्भकस्याप्युपलक्षणमित्यपि द्रष्टव्यमित्यर्थः, आदिशब्देन 'ज्ञाततत्त्वस्य गुरोरि'त्यज्ञाततत्त्वस्याप्युपलक्षणं ज्ञेयम् । तत्र हेतुः-'आरोप्ये'त्यादि । (३) "अनुमित्याद्यव्यापनादि"ति त्वर्थानुरोधादाधुनिकैः कैश्चित्प्रकॢप्तः पाठः । (४) ज्ञानसमानदेशमर्थम्–आत्मत्वादि, अन्यत्र–शरीरादौ । (५) 'अव्यभिचारी'तिविशेषणस्य भ्रमज्ञानवारकस्य नैरर्थक्यादित्यर्थः । (६) तैस्तैः प्रकाशमानतया प्रसिद्धैरित्यर्थः । उक्तदूषणानि–विशेषणानि–विशेषमात्राभिधानेऽतिप्रसङ्गः, तत्तद्विशेषव्यक्त्यभिधाने चाननुगम इत्यादीनि ।

दित्वं हि ज्ञानान्तरेण तथैवोल्लिख्यमानार्थत्वं वा ? -१, ज्ञानान्तरेण विपरीततयाऽप्रतीयमानार्थत्वं वा ? -२, प्रतीयमानव्याप्य(१)विषयत्वं वा ?-३, अन्यदेव वा किंचित् ?-४ ।

टी० ॥ "अथ यादृगर्थ" इति । यद्यपि नेयमव्यभिचारनिरुक्ति(२)स्तथापि विवक्षाधीनो विकल्प इति मन्तव्यम् । 'अनुमितौ'त्युपलक्षणं शाब्दज्ञानमपि तादृशं द्रष्टव्यम् ॥ "ज्ञानसमानदेशमि"ति । शरीरादावात्मत्वारोपोपि प्रमा स्यादित्यर्थः ॥ "सर्वाकारेणे"ति । यत्किञ्चिदाकारेण तु भ्रमेतिव्याप्तिरित्यर्थः । अभेदवादो वेदान्तियोगाचाराद्यनुमतः । *नाप्यव्यभिचारिणोर्थस्यानुभवः प्रमा, अर्थोऽव्यभिचारश्च यत्रार्थे ज्ञानं(३)तत्रैव योर्थ इति वाच्यम् *, एवं च धर्मिण्य(४)प्रमात्वापत्तेः । तथोल्लिख्यमानत्व--पूर्वज्ञानप्रकारेणोल्लिख्यमानत्वम् ॥

मू० न प्रथमः, धारावाहिनो भ्रमस्य प्रमात्वप्रसङ्गात् । * नच प्रमाभूतं ज्ञानान्तरं विवक्षितमिति वाच्यम् *, प्रमाया एव लक्ष्यमाणत्वात् । नापि द्वितीयः, अनुपजातबाधभ्रमव्यापनात्(५); स्वस्थदशोत्पन्नस्य शुक्लशङ्खादिज्ञानादेर्दुष्टेन्द्रियदशोत्पन्नतत्पीतिमज्ञानाद्युल्लिखितविषयवैपरीत्यस्याप्रमात्वप्रसङ्गाच्च । 'प्रमित्यानुल्लिखितार्थवैपरीत्यभावविवक्षायां तु 'प्रमा-

(१) यत्र तादात्म्येनार्थस्तत्रैव विषयतासम्बन्धेन ज्ञानमिति, यादृशोऽर्थस्तादृशमेव ज्ञानमिति वा, प्रतीयमानज्ञानव्याप्यार्थविषयकत्वमित्यर्थः । अन्यद्=अर्थक्रियाकारिवस्तुविषयत्वादि । (२) प्रागल्भमिश्रास्तु शिंशपात्वस्य वृक्षत्वाव्यभिचारित्वेन तादात्म्यं दृष्टमित्यवष्टम्भेन यादृगर्थ इति कल्पान्तरस्याभिधानाद्देषोऽव्यभिचारिपदार्थो भवत्येवेत्याहुः ।
(३) यत्रार्थे विषयतासम्बन्धेन ज्ञानं तत्रैव तादात्म्येन योर्थ इत्यर्थः ।
(४) धर्मिणि = भ्रमज्ञानीये धर्मिणि शुक्त्यादीदमंशे । (५) यत्र शुक्तौ रजतमनुभूय कोपि मृतस्तत्र तदीयभ्रमस्यानुपजातबाधत्वेन तत्रातिप्रसङ्गादित्यर्थः ।

यालक्ष्यमाणत्वादि'त्युक्तमनुषज्जति । * [d]अदुष्टकरणजज्ञानेनाबाधितत्वं विवक्षितम् *,-इति चेन्न, [e]तदेव तर्हि प्रमालक्षणमस्तु । [f]किंच, दुष्टत्वनिरूपणमन्तरेणादुष्टत्वस्य दुर्निरूपत्वात् । * ननु किमेतावता, दुष्टत्वं-[g]विपरीतज्ञान(१)प्रयोजकस्तद्धेतुगतो विशेष इति सुवचमेवेति * । न, विपरीतपदव्यवच्छेद्याऽप्रमितौ तदुपादानवैयर्थ्यात्(२), तदनुपादाने च ज्ञानजनकत्वमात्रं दुष्टत्वमित्यदुष्टकरणजं ज्ञानं नास्त्येवेति स्यात् । * विपरीतपदव्यवच्छेद्या प्रमैव *,-इति चेन्न, तस्या एव लक्ष्यमाणत्वात् ।

टी० ॥ [a]"अनुपजातबाधे"ति । यद्यपि पुरुषान्तरेण विपरीततया प्रतीयमानत्वं तत्राप्यस्ति, तथापि तत्र न संवादोक्ति(३)रिति भाव. ॥ भ्रमेण ज्ञानान्तरेण विपरीततया प्रतीयमानतया प्रमायामव्याप्तिरित्याह—। [b]"स्वस्य(४)दशे"ति ॥ ननु तत्र भ्रमेण वैपरीत्यमुल्लिखितम्, प्रमायां च तथाऽनुल्लिख्यमानत्व विवक्षितं, तच्च शङ्खज्ञानेऽस्त्येवेति नाव्याप्तिरित्यत आह—। [c]"प्रमित्ये"ति ॥ ननु प्रमित्येत्युक्तेरात्माश्रयो, ऽदुष्टकरणजन्यज्ञानाबाध्यत्वविवक्षायां न दोष इत्याह । [d]"अदुष्टे"ति ॥ "तदेवे"ति । तन्निरूपितलक्षणान्तरे गौरवं स्यादित्यर्थः ॥ [f]"किंचे"ति । प्रतियोगिनिरूप्यत्वात्तदभावस्येति भावः ॥ सामान्यत आह । [g]"विपरीते"ति ॥

---

(१) पीतः शङ्ख इत्यादिविपरीतज्ञानप्रयोजकश्चक्षुरादिगतः कामलादिविशेष एव दोष इत्यर्थः । दुष्टत्वं दुष्टवृत्त्यसाधारणो धर्मः स च दोष एवेति नायुक्तं किञ्चित् । (२) तदुपादानवैयर्थ्यात्=विपरीतपदोपादानवैयर्थ्यात् । (३) यत्र पुरुषान्तरेण विपरीततया प्रतीयमानत्वं तत्र न संवादस्यातिप्रसङ्गस्योक्तिः, किन्तु यत्र कदाचित्कस्यचिद्विपरीततया प्रतीयमानत्वं नास्ति तत्रैवेत्यर्थः । यद्वा, 'अत्रावश्यं पुरुषान्तरस्य विपरीततया प्रतीतिर्भविष्यत्येवे'त्यत्र न संवादस्य=विनिगमकप्रमाणस्योक्तिरित्यर्थः । (४) स्वस्येत्यपि मूलव्याख्यानयोः केषुचित्पुस्तकेषु पाठः ।

मू० तदीयस्वरूपस्येतरव्यावृत्तस्याव्याप्यप्रतीतेः कुतो व्यवच्छेदः प्रत्येतव्यः, इति "व्यवच्छिन्नतज्ज्ञानमन्तरेण व्यवच्छिन्नतज्ज्ञानमशक्यमित्यात्माश्रयान्योन्याश्रयावनवस्था वा।

"एकोऽनेकविशेषेषु विशेषो यत्र लक्ष्यते।
तद्विशेषान्तरान्यत्वा(१)द्दोषस्तत्रैव धावति ॥ ३२ ॥

"नापि तृतीयः, व्याप्यशब्देन व्याप्यमात्रम्? तद्विशेषो वा कश्चिदभिप्रेतः स्यात्?। आद्ये, सधूमाग्निविषयस्य स्वप्नज्ञानस्यानाप्तवाक्यजबोधस्य वा नाप्रमात्वं स्यात्। नापि द्वितीयः, स ह्यर्थक्रिया(२)वा? सामग्री वा?। उभयत्रापि "पूर्वोक्तदोषानतिवृत्तेः। "एकदा च सर्वत्र प्रमाणासम्भवेन क्रमाश्रयणे तत्तदर्थक्रियातत्तत्सामग्रीपरम्पराऽवगमनियमाभ्युपगमे एकस्मिन्नेव विषये पुरुषायुषः पर्यवसानप्रसङ्गात्, विच्छेदाभ्युपगमे त्वन्तिमावगमस्याप्रामाण्यादाऽऽप्रथममप्रमात्वापत्तेः।

टी० ॥ विशिष्याह—। "'व्यवच्छिन्न'"ति। व्यावृत्तप्रमाज्ञानाधीनं व्यावृत्तप्रमाज्ञानमित्यात्माश्रयः, अप्रमाव्यावृत्तत्वेन प्रमाज्ञानं, प्रमाव्यावृत्तत्वेन चाऽप्रमाज्ञानमित्यन्योन्याश्रयः, अप्रमाव्यावृत्तत्वेनादुष्टकरणकज्ञानत्वनिरूपणं, तेन च प्रमानिरूपणं, तेन चाप्रमानिरूपणमेवमान्तरालिकापरापरापेक्षणे चक्रकम्; अनिवृत्तौ त्वनवस्थेत्यर्थः ॥ "'एक'"इति। अनेको विशेषोनुभ-

---

(१) तद्विशेषान्तरान्यत्वात्, यथासौ विशेषान्तरेभ्योऽन्यस्तथेति तथोक्तस्तद्भावस्तत्त्वं तस्मादित्यर्थः। (२) अर्थक्रियाशब्देन सर्वत्र कार्यं विवक्षितम्। (३) आत्माश्रयादावन्योन्याश्रयमाह—यत इति। आत्माश्रयस्तु अनुभवभिन्नस्मरणान्यत्वेनानुभवस्य, स्मरणभिन्नानुभवान्यत्वेन च स्मरणस्य, लक्षणाज्ज्ञेयः। एवं गुणभिन्नद्रव्यान्यत्वेन गुणस्य लक्षणा-

त्वस्मृतित्वादयो यत्र ज्ञानादौ तत्रैको विशेषोऽनुभवो वा स्मरणं वा यत्र लक्ष्यते तत्रैवात्माश्रयादिरापतति, यतः([३])स्मरणान्यत्वेनानुभवस्यानुभवान्यत्वेन स्मरणस्य वा लक्षणात्, एवं द्रव्यान्यत्वेन गुणस्य गुणान्यत्वेन द्रव्यस्येत्यादावपीत्यर्थः ॥ 'प्रतीयमानव्याप्यविषयत्वं वा अविसंवादित्वमि'ति दूषयति–। [c]"नापी"ति ॥ [d]"पूर्वोक्ते"ति । स्वप्नादावर्थक्रियाभाविन्त्वेन भानसंभवादित्यर्थः ॥ दोषान्तरमाह–। [e]"एकदा चे"ति । वह्निज्ञानस्याविसंवादित्वं तदर्थक्रियागोचरं ज्ञानान्तरमेव, तस्याप्यविसंवादित्वं तदन्यदित्यविच्छेदेऽनवस्थेत्यर्थः ॥

सू० [a]वास्तवतदर्थक्रियात्वस्य च दुर्निरूपत्वेन व्यवहारानर्हत्वात्, तथा प्रतीतिमात्रस्याप्रमासाधारण्यात् । *[b]नन्वेवं चतुर्थः पक्षोऽस्तु, तथाहि,–अर्थक्रियाकारिविषयत्वं वाऽविसंवादित्वमिति, यथाह,–"प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिश्चाविसंवादः"–इति *। न, [c]सामान्यतो विवक्षायां भ्रान्तावपि प्रसङ्गात् । *[d]प्रतीयमानरूपेणार्थक्रियाकारित्वमर्थस्य विवक्षितम् *, इति चेन्न, [e]दुरवधारणत्वात् । * [f]तदर्थक्रियादर्शनात्तदवधारणम् *,–इति चेन्न, [g]विनाप्यर्थक्रियां तद्दर्शनसंभवात् । [h]"अर्थक्रिया प्रमितिरभिधित्सिता"–इति तु दूषितमेव, प्रमाया एव निरूप्यमाणत्वात् । * [i]अभिप्रायाविसंवादात् प्रमाणं सर्वमुच्यते*,–इति चेन्न, [j]तदा अभिप्रायाविसंवादस्य स्वप्नादिप्रत्ययेपि संभवात्,

टी० ॥ ननु स्वप्नज्ञानादौ वास्तवार्थक्रियाविषयत्वं संवादित्वं नास्तीत्यत आह–। [a]"वास्तवे"ति ॥ 'अन्यद्वे'ति पक्ष कीर्तिदिशा([१])परिष्कृत्य खण्डयति–। [b]"नन्वेवमि"ति ॥ [c]"सामा-

दावपि ज्ञेयम् । (१) कीर्तिदिशा=धर्मकीर्त्युक्तप्रकारेण ।

न्यन" इति । भ्रमेपि शुक्त्यादेरर्थक्रियाकारित्वादित्यर्थः ॥ननु तत्र शुक्तित्वेनार्थक्रियाकारित्व, नतु प्रतीयमानेन रजतत्वादिनापि, तथा च[1]विवक्षितमित्याह—। d.''प्रतीयमाने''ति ॥ e.''दुरवधारणत्वादि''ति । दृष्टाप्यर्थक्रियाऽङ्गुलीयकादिः[2] किं रजतत्वादिनाऽन्येन वा रूपेणेति दुरवधारणमित्यर्थ. ॥ अन्वयव्यतिरेकाभ्यामेव रजतत्वादिरूपेण तद[3]वधारणीयमित्याह—। f.''तदर्थे''ति ॥ अर्थक्रियादर्शनस्यापि भ्रान्तित्वसम्भवाद् दुरवधारणमित्याह—। g.''विनापी''ति । यद्वाऽर्थक्रियाकारिविषयकमपि ज्ञानं भ्रमः सम्भवतीति नायं नवाद इत्यर्थ. ॥ अर्थक्रियाकारित्वप्रमाविवक्षायामात्माश्रयादिरित्याह—। h.''अर्थक्रिये''ति ॥ i.''अभिप्राये''ति । ज्ञानोल्लिखितप्रकारावच्छेदेनेच्छाप्रवृत्ती अभिप्रायस्तदविसंवाद इत्यर्थ· ॥ j.''तदे''ति । यदा ज्ञानं तदाऽभिप्रायाविसंवादः स्वप्नज्ञानेपीत्यर्थः, भवति हि पायसज्ञानं, बुभुक्षाभोजनज्ञानं, तृप्तिज्ञानं च स्वप्नरूपमिति भाव[4] ॥

सू० "कालान्तराविसंवादस्य च दुरवधारणत्वात् । 'एतेन 'प्राप्त्यादियोग्यता संवादार्थः'-इत्यपि निरस्तम्, दुराबाध इव चायं धर्मकीर्तिः पन्था इत्यवहितेन भाव्यमिहेति । 'अबाधितानुभूतिः प्रमे'त्यपि निरस्तम् "तदानीं बाधविरहस्यातिप्रसञ्जकत्वात् कालान्तरेपि बाधविरहस्य च दुर्निरूपत्वात्; स्वतो[5]बाधविरहस्यातिप्रसञ्जकत्वात्; 'सर्वजनबाधविरहस्य च दुरवधारणत्वादिति । 'तर्कसंशयविपर्ययस्मृतिव्यतिरिक्ता प्रतीतिः प्रमा'—इत्यपि न, स्मृतिव्यतिरिक्तत्व-

(१) तथा च=प्रतीयमानरजतत्वादिना रूपेण चेत्यर्थः । (२) अङ्गुलीयकम्=मुद्रिका । (३) तद्=अर्थक्रियाकारित्वम् । (४) 'इदं पायसमि'ति पायसज्ञानम्, 'अहं बुभुक्षितो' 'ऽहं भुञ्जे'-इति बुभुक्षाभोजनयोश्चात्मनि ज्ञान, भोजनोत्तरं स्वात्मनि तृप्तिज्ञानं च स्वप्नात्मकं भवतीत्यर्थः पूर्वं पायसज्ञानं ततो बुभुक्षा ततो भोजनज्ञानं ततस्तृप्तिज्ञानं भवतीत्यर्थस्तु न साधुः । (५) स्वतः=स्वस्य प्रतिपत्तुः ।

खण्डनन्यायेन(१)निरस्तत्वादिति, [g]जातिसङ्करभि-
न्नतश्च प्रमात्वलक्षणजात्यभिसंबन्धात् प्रमेत्यपि
दुर्लक्षणम्, अस्या(२)ज्ञातस्य तद्व्यवहारजनकत्वे प्र-
मायामप्रमाभ्रमसंशयौ न स्याताम्,

टी० ॥ स्वप्नदृष्टस्य जागरावस्थायां विसंवाद एवेति कालान्तराविसंवादो विवक्षित इत्यत आह—। [a]"कालान्तरे" ति। 'कदाप्यत्र विसंवादो न भविष्यती'ति दुरवधारणं, प्रत्युत जागरावस्थादृष्टस्य स्वप्ने विसंवादानुभवादिति भावः ॥ [b]"एतेने" ति। कालान्तरप्राप्त्यादियोग्यतातत्कालप्राप्त्यादियोग्यताविकल्पखण्डनेनेत्यर्थः ॥ उत्पादविशेषः प्राप्तियोग्यता अविसंवादः—इति यदि धर्मकीर्तिः प्रमाधत्ते तदा क्षणभङ्गभङ्गप्रमोन्मूलनीयोयं पक्ष इत्याह—। [c]"दुरबाध इवे"ति ॥ [d]"तदानीमि" ति। ज्ञानकाले बाधाभावो भ्रमस्यापीत्यर्थः ॥ [e]"स्वतः"इति। शुक्तौ रजतत्वज्ञानवतो बाधनैयत्याभावाद्भ्रमातिव्याप्तिरित्यर्थः ॥ [f]"सर्वजने"ति। योग्यानुपलम्भेनाभावपरिच्छेदे सर्वजनबाधविरहस्य सुग्रहत्वेपि सर्वत्र न तथात्वमिति भावः ॥ [g]"जातिसङ्करमि"ति। साक्षात्त्वं प्रमात्वपरिहारेण साक्षात्कारिणिभ्रमे, प्रमात्वं च तत्परिहारेणानुमितौ, प्रत्यक्षप्रमायां तु साङ्कर्यमित्यर्थः ॥

सू० "दोषाभावसहकृतस्य तथात्वे चाऽजायमानभ्रमसंश-
यादिप्रमाव्यवहारे(३)ज्ञानमात्रावगमोदाहरणेपि त-
दापत्तेः। ज्ञातेनानेन लक्षणेन व्यवहारे च कथमिद-

---

(१) यत्किञ्चित्तर्कसंशयविपर्ययस्मृतिव्यतिरिक्तत्वं तद्व्यतिरिक्ततर्कविपर्ययस्मृतिव्यक्तीनामपि, सकलतर्कसंशयविपर्ययस्मृतिव्यतिरिक्तत्वमपि च प्रत्येकस्य तर्कादिव्यक्तेरस्तीत्यादिप्रकारेणेत्यर्थः। (२) अस्य=प्रमात्वस्य। (३) अजायमानो भ्रमसंशयादिर्यस्यां प्रमायां तस्याः स्वरूपतो व्यवहारे इत्यर्थः। आदिपदेन प्रमात्वग्रहः, यत्र भ्रमसंशयप्रमात्वादिव्यवहारो न जायते ज्ञानमपि चाऽवगम्यते तत्रापि तदापत्तेः प्रमात्वव्यवहारापत्तेरित्यर्थः।

(१)मेव ज्ञातव्यमिति वक्तव्यम् । न तावत्प्रत्यक्षेण मानसेन, तथा सति क्वचिज्ज्ञातायां प्रमायामप्रमाविपर्ययसंशयानवकाशादिः(२) स्यात्, [b]धर्मिवन्मनसैव निर्णीतत्वात् । [c]"चिन्हान्तरसापेक्षेण मनसा संवेदनं, चिन्हेनैव वा तेन लक्षणीभूय ज्ञापनम्'- इत्यपि प्रत्याशामात्रम्, [d]तच्चिन्हेनैव प्रमात्वजातिकल्पनाप्रतिक्षेपापत्तेः; [e]तेषां नानात्वे च कानि तानीति वक्तव्यं स्यात्, तच्चिन्हानां यथोपन्यासं सर्वेषामेव दूषितत्वात्; [f]प्रामाण्यपरतस्त्वव्युदस्तिप्रस्तावे च विस्तरेण दूषयिष्यामः । एतेन [g]"शक्तिविशेषः प्रमात्वं, [h]तद्योगः प्रमालक्षणमि'त्यपास्तम्, [i]दुरवधारणत्वात् ।

टी० ॥ ननु दोषाभावसहकृतं स्वरूपसदेव प्रमात्वं तद्व्यवहारजनकमास्तामित्यत आह ॥ [a]"दोषाभावे"ति । एव सति भ्रमसंशयभिन्नं सर्वं ज्ञानं प्रमात्वेनैव गृह्यतेत्यर्थः ॥ [b]"धर्मिवदि"ति । ज्ञानवदित्यर्थः ॥ [c]"चिन्हान्तरे"ति । यथार्थानुभवत्वादिनेत्यर्थः । तच्चिन्ह प्रत्यक्षसहकारि प्रमात्वज्ञापकं लिङ्गीभूय वाऽनुमापकमिति कल्पनार्थः ॥ चिन्हेनैवानुगमादौ सिद्धे किं प्रमात्वजात्येत्याह–। [d]"तच्चिन्हेनैवे"ति ॥ ननु चिन्हस्यैक्ये तेनानुगमः, प्रकृते तु बहून्यननुगतानि प्रमात्वचिन्हानीति नान्यथासिद्धिरित्यत आह [e]"तेषामि"ति ॥ यच्च प्रमात्वं वाच्यं तत्परतो ग्राह्यमित्यनवस्थापत्तेरित्याह–। [f]"प्रामाण्ये"ति ॥ [g]"शक्तिविशेष" इति । समर्थप्रवृत्तिजननंशक्तिरित्यर्थः ॥ [h]"तद्योग"इति । समर्थप्रवृत्तिजनकत्वमित्यर्थः ॥ [i]"दुरवधारणत्वादि"ति । अनुगतरूपापरिचये जनकत्वं दुर्ग्रहम्, अनुगतरूपप-

---

(१) इदम्=प्रमात्वजात्यात्मकं लक्षणम् । (२) प्रमायामप्रमाया यौ विपर्ययसंशयौ तयोरनवकाशादिरित्यर्थः । तथाहि,–प्रमायामियमप्रमैवेत्यप्रमाया विपर्ययः, इयमप्रमा प्रमा वेति च तत्संशय इति

रिचये वा तदेव लक्षणमित्यर्थः । यद्वा "शक्तिविशेषः"=आत्मनात्मप्रकाशनशक्तिरिति परमताभिप्रायम् ॥

मू० यत्र किञ्चित् प्रमाया लक्षणमुच्यते तदज्ञातं [a]ज्ञातमात्रं वा यदि तत्त्वव्यवहारकं तदा[b]ऽत्यापत्तिः, प्रमितं चेत्प्रमानवधारणे तस्य दुरवधारणता । * मावधारि, [c]वस्तुतस्तथा ? *-इति चे[d]न्न, 'वस्तुतो न तथैव किं न'?-इतिवादिन्यनुत्तरापत्तेः, [e]प्रमात्वनिरूपणवैयर्थ्यापाताच्च; [f]वस्तुतस्तु(१)प्रमयैव घटादितत्त्वव्यवहारोपि तच्च स्त्वित्यास्तां विस्तरप्रसङ्गः†

[g]एवं प्रमितेरनिरुक्त्या 'प्रमाकरणं प्रमाणमि'त्यप्ययुक्तम्, [h]करणार्थानिरुक्तेश्च । * ननु कारकान्तरेऽ(२) चरितार्थस्य हेतुत्वं करणत्वम्; कर्तुर्हि करणं निष्पाद्यतः कारकान्तरे चरितार्थत्वं, [i]स्वरूपतोऽनिष्पादनेपि व्यापारवत्तया निष्पादनात्, [j]तादृशस्य च तस्य करणत्वात् । एवं कर्मापि करणनिष्पादने चरितार्थम्, [k]करणव्यापारो हि कर्मविषयो भवति, [l]कर्माभावे विषयाभावात्करणव्यापार एव न निष्पद्यते, इति तन्निर्वाहे(३)तस्यापि चरितार्थत्वम् ।

---

(१) वस्तुतस्तु प्रमाया:=वास्तविकप्रमयेत्यर्थः ।

† एवं तत्त्वानुभूत्यादेर्लक्षणस्याऽनिरुक्तितः ।
प्रमैतावत्प्रबन्धेन खण्डिता मेयबाधिका ॥
प्रमाणानां तथा तस्याः करणानां सविस्तरम् ।
करणत्वाऽनिरुक्तेश्च खण्डनं क्रियतेऽधुना ॥

(२) कर्त्रादावतिव्याप्तिवारणाय कारकान्तरेति, करणस्यापि क्रियासिद्धौ चरितार्थत्वमत उक्तं-कारकेति, कारकेऽचरितार्थ इत्येव कृते कर्त्रादिकारके कर्त्रादेरचरितार्थत्वादतिप्रसङ्गः स्यादत उक्तम्-अन्तरेति, गगनपरिमाणादावतिप्रसङ्गमुद्धाराय-हेतुरिति । (३) तन्निर्वाहे—व्यापारद्वारा करणस्वरूपनिर्वाहे ।

टी० ॥ [a]"ज्ञातमात्रमि"ति । अप्रमासाधारणज्ञानविषय इत्यर्थः ॥ [b]"अत्यापत्तिरि"ति । भ्रमेपि प्रमाव्यवहारापत्तिरित्यर्थः ॥ [c]"वस्तुत" इति । प्रमितमेव प्रमालक्षणं प्रमाव्यवहारजनकं, नतु प्रमितत्वेन ज्ञातमपि, येन दुरवधारणं स्यादित्यर्थः ॥ [d]"ने"ति । 'प्रमालक्षणं न प्रमितमि'ति वादिनि 'स्वरूपतः प्रमितं तदि'ति वक्तुमशक्यत्वादित्यर्थः ॥ यदि च वास्तवं प्रमितत्वमादाय व्यवहारस्तदा प्रमात्वनिरूपणमफलमित्याह—। [e]"प्रमात्वे"ति ॥ वैयर्थ्यमेवाह—। [f]"वस्तुत" इति ॥

[g]"एवमि"ति । क्रियोपहितमध्योऽस्य क्रियानिरूपणमन्तरेणाशक्यनिरूपणत्वादित्यर्थः ॥ [h]"करणार्थे"ति । करणपदार्थोनिरुक्तेरित्यर्थः ॥ सिद्धे कुठारादौ कर्तुर्व्यापारान्वयित्वमाह—। [i]"स्वरूपत" इति ॥ ननु तथापि करणव्यापारे चरितार्थत्वं, नतु करणे, इत्यत आह—। [j]"तादृशस्ये"ति । व्यापारवत इत्यर्थः ॥ [k]"करण व्यापारो ही"ति । उद्यमननिपातनादेश्छेद्यविषत्वादित्यर्थः ॥ अन्वयव्यतिरेकाभ्यां चरितार्थत्वमेवाह—। [l]"कर्माभावे" इति ॥

मू० [a]एवमधिकरणस्यापि करणव्यापारनिर्वाहकत्वं, सम्प्रदानापादानयोश्चासार्वत्रि(१)कत्वं, करणं तु सार्वत्रिकमेवेति—[b]कारकान्तरेऽचरितार्थः सार्वत्रिको [c]हेतुः करणम् ? *,— इति मैवम् । [d]अस्तु तावदविचारितरमणीयमिदं व्याख्यानम्, अन्तरशब्दो यदि विशेषमात्र(२)वचनस्तदा न व्यवच्छेदकः, नहि विशेषमपास्य कारकमात्रं केनचिज्जन्यते यद्व्यवच्छिद्येत; नापि चान्तरशब्दोऽन्यवचनस्तथा सति(३)कस्माद-

(१) असार्वत्रिकत्वम्—असार्वत्रिकहेतुत्वं, तथाचाव्यवहितोत्तरं वक्ष्यमाणसार्वत्रिकविशेषणेन तयोरपि व्युदासः, करणस्य सार्वत्रिकक्रियाहेतुत्वात् । (२) विशेषमात्रेति, 'अनयोरन्तरं महदि'त्यादौ तस्य विशेषवचनत्वं बोध्यम् । तत्कारकवाचक इत्यर्थः, मात्रपद द्वितीयपक्षोक्तभेदवाचकत्वं व्यावर्त्यते । (३) करणान्यकर्त्रादौ कर्त्रादेरचरितार्थत्वेन तत्रातिव्याप्तिसत्त्वे तस्यैवात्माश्रयमप्याह—तथा सतीति ।

न्यदिति विशेषानिर्देशे करणादिति(¹)समभिव्याहाराल्लभ्येत; यथान्य आत्मा, शरीरमन्यदित्यादौ; तथा सति करणव्यतिरिक्तकारकाभिप्रायेण प्रयुक्तः स्यात्,

टी० ॥ [a]"एवमि"ति । कर्तृकर्मणोः स्थितिं तत्पादयद्देशकालरूपमधिकरणं कारकान्तरे चरितार्थं, स्थाल्यादिरूपमधिकरणं कर्ममात्रस्थितिद्वारेणेत्यर्थः ॥ एतावता यन्निर्व्यूढं तदाह–। [b]"कारकान्तरे"ति । सार्वत्रिकपदं सम्प्रदानापादानव्यावर्तकं, तयोर्दानक्रियाविभागादिविशेषहेतुत्वादसार्वत्रिकत्वम् ॥ अजनके गगनादा(²)वतिव्याप्तिनिरासायाह–। [c]"हेतुरि"ति ॥ कारकान्तरपदं करणपरमित्यात्माश्रयः, यथा च विषयतया करणे कर्म चरितार्थं तथा कर्तृव्यापारविषयतया करणमपि कर्तरि चरितार्थमित्यसिद्धिरित्यभिप्रेत्याह–। [d]"अस्तु तावदि"ति । सार्वत्रिकत्वं च करणस्य न व्यक्त्यभिप्रायेण, न वा करणत्वेन, तदनिरुक्तेः, एवं हेतुत्वमपीति भावः । समभिव्याहारात्=लक्ष्योपस्थापककरणपदसमभिव्याहारादित्यर्थः । 'अन्य आत्मे'त्यत्रान्यत्वं समभिव्याहृतशरीरापेक्षया, अन्यच्छरीरमि'त्यत्र च यथात्मापेक्षयेत्यर्थः ॥

सू० [a]तच्च न, करणस्यैवाद्यापि निरूप्यमाणत्वात्, [b]अतिव्याप्तेश्च । [c]नापि कर्तृकर्मणोः स्वरूपोपादानपरोऽन्तरशब्दः, ताभ्या(³)मेवातिव्याप्त्यापत्तेः। [d]नापि कर्तृकर्मणी अपेक्ष्यान्यदन्तरशब्दार्थः, [e]वैयर्थ्यापत्तात्;–कारकेऽचरितार्थ इत्येवोच्यताम् । नाप्यन–

(¹) करणादिति, लभ्येत, लक्षणसमन्वयवेलायामित्यर्थः । (२) प्रगल्भमिश्रस्तु गगनपरिमाणादावतिव्याप्तिवारणं हेतुपदस्य प्रयोजनमाहुर्मन्येऽसाधु, अणुमहत्परिमाणयोरहेतुत्वात् "पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्"–इति वचनात्, गगनस्य तु शब्दादिकं प्रति हेतुत्वमेव । (३) ताभ्याम् = कर्तृकर्मभ्याम् । अयं भावः । नहि कर्ता कर्तरि चरितार्थः कर्म च कर्मणि, तथा च कारकान्तरपदप्रतिपाद्ययोस्तयोरचरितार्थत्वात्कर्तृकर्मणोरेवातिप्रसङ्ग इति ।

धिकार्थ एवायमिति न प्रयोक्तव्योऽन्तरशब्दः, तथा सति कारकजनकं हस्तादि करणं न स्यात्; [f]व्यापारवद्धि कारणं कारक‡मुच्यते, अस्ति च स्थालीसंयोगादिव्यापारवतो वह्न्यादेस्तथात्वम्, (१)अस्ति च हस्तादेस्तज्जनकत्वम् । * न च हस्ताद्यकरणमेवाभ्युपेयम् *, व्यापारवतः कारणत्वेन तत्कारक‡त्वस्यावश्याभ्युपेयत्वात्, कर्त्रादिषु दुरन्तर्भावत्वात्, सप्तमकारकस्वीकारापत्तेः ।* नच(२)व्यवधानात्तत्राहेतुत्वमेव तेषां, किंनाम हेतुहेतुत्वमिति *, कर्तुरप्येवं प्रसङ्गात्,

टी० ॥ एवं मत्वाऽऽशय इत्याह—। [a]"तत्र ने"ति ॥ करणान्यकारकाचरितार्थत्वं कर्तृकर्मणोरपीत्यतिव्याप्तिमाह—। [b]"अतिव्याप्ते"रि"ति ॥ कर्तृकर्माचरितार्थत्वविवक्षायां ताभ्यां‡ मतिव्याप्तिमाह —। [c]"नापी"ति । * तथानेनोपाधिना कर्तृकर्मणोरपि करणत्वमिति वाच्यम् *, एवं लक्षणप्रणयनानर्थक्यप्रसङ्गादिति वक्ष्यते इति भावः ॥ ननु कर्तृकर्मान्याचरितार्थत्वमित्युक्तौ करणे चरितार्थाभ्यां ताभ्यां† नातिव्याप्तिरित्यत आह— [d]"नापी"ति ॥ [e]"वैयर्थ्यापातादि"ति । कारकाचरितार्थत्वोक्त्यैव ताभ्यां† मतिव्याप्तिनिरासादित्यर्थः ॥ हस्ते करणत्वं व्यवस्थापयति—। [f]"व्यापारवद्धी"ति ॥

मू० [a]पुंव्यापाराद्धि हस्पन्दादिस्ततः कुठारक्रियादिस्ततश्छिदेति परम्पराव्यवधानात् । * [b]सर्वैः कर्तृव्यापारपरम्परा न तस्य हेतुतां हन्ति?*,-इति चेत्, [c]तुल्यम् । तस्मात्कारणत्वेनाऽवश्याभ्युपगन्तव्यह-

---

* एतस्मिन्स्थले कारकं, प्रायः सर्वत्र करणकारकमेव ग्राह्यम् ।

(१) तथात्वम्=करणत्वम् । तज्जनकत्वम्=वह्न्यादिरूपकारकजनकत्वम् । (२) काष्ठादिव्यापारव्यवधानात्कुलालपितृवदन्यथासिद्धत्वमेव तेषां हस्तादीनामिति नच वाच्यमित्यर्थः । † ताभ्याम्=कर्तृकर्मभ्याम् ।

स्त्वाद्यव्यापकत्वादलक्षणमिदम् । [d]एतेनापि 'कारकान्तरशब्दः कर्तृकर्मव्यतिरिक्तवचनः'–इति पक्षो व्युदास्य:([1]) । * [e]कर्तृव्यापारविषयः करणम् ?*–इत्यपि न, [f]शरीरचालनाय([2])प्रयतमानस्य शरीरचलनक्रिया, क्रियाविशिष्टं वा शरीरं, प्रयत्नलक्षणकर्तृव्यापारविषयीभवतीति तस्यां क्रियायां करणं स्यात्, न चैतच्छ्रयाङ्गीकारं, भविष्यतः स्वं प्रति च कारकत्वानुपपत्तेः ।

टी० ॥ कर्त्तरि व्यवधानमाह— [a]"पुंव्यापारे"ति ॥ कर्तुः प्रथमं कारणत्वं गृहीतं, तत्मध्यादनायान्तराले व्यापारकल्पनमिति न तेनान्यथासिद्धिरित्याह–[b]"सर्वैव"ति ॥ [c]"तुल्यमि"ति । हस्तादेरपि प्रथमगृहीतं कारणत्वं व्यापारपरम्पराकल्पनमन्तरेणानुपपन्नमिति न तथाऽन्यथासिद्धिरित्यर्थः ॥ [d]"एतेने"ति । हस्तादावव्यापकत्वेनेत्यर्थः । कर्तृकर्मभ्यामन्यस्मिन् करण एव हस्तादेश्चरितार्थत्वादिति भावः ॥ [e]"कर्तृव्यापारे"ति ॥ कर्तृव्यापार=उद्यमननिपातनादिस्तद्विषयः करणमित्यर्थः ॥ कर्तृव्यापारविषयः फलमपीति तत्रातिव्याप्तिं प्रपञ्चयति–[f]"शरीरे"ति । क्रियाविशिष्टमिति मतान्तरे([3])"भविष्यत"-इति, क्रियाविशिष्टस्य च शरीरस्याभावात् कारणत्वमेवानुपपन्नं, दूरे करणत्वं, तथाभेदे जन्यजनकभाव इत्यर्थः ॥

सू० [a]न च 'साक्षात्कर्त्तृव्यापारविषय'–इति विशेषोपादानेऽस्य([4])परिहारः, साक्षाद् व्यापार्य्य([5])मनःप्र-

---

(१) 'व्युदस्य' इति त्वपपाठः । (२) 'शरीरचलनाये'ति पाठस्त्वसङ्गतः । (३) "शरीरचलनक्रिया इति मते च स्वं प्रतीति" इति शेषः । क्रियाविशिष्टं शरीरमितिमतेन 'भविष्यतः कारकत्वानुपपत्ते'रिति मूलोक्तं व्याख्याय शरीरचलनक्रियेतिमतेन 'स्वं प्रतिकारकत्वानुपपत्ते'रिति मूलोक्तं विवृणोति–तथाऽभेदे इति । (४) अस्य=अतिव्याप्तिदोषस्य । (५) साक्षात्कर्तृव्यापारविषयेत्यर्थः ।

भृतिक्रियायां प्रसक्तत्वादवस्थ्यात्, [b]अव्यापक(१)त्वाच्च। [c]अथ *तत्क्रियाहेतुस्तत्क्रियाकर्तृव्यापारस्य विषयस्तत्क्रियायां करणम् *,-इति मन्यसे, मैवम्, [d]अनीश्वरवादे अङ्कुरादीनामकरणकत्वप्रसङ्गात् ; सुषु(२)प्त्यनन्तरभाविन्याः प्रमायाः परिगणितकरणोपाधिभेदपरिसंख्यातेषु प्रमाराशिषु बहिर्भावप्रसङ्गात्; अचेतनस्यापि कर्तृत्वे चातिप्रसङ्गात्(३)। सेश्वरवादे त्वीश्वरव्यापारविषयः सर्वं कारणमिति नाऽकरणं कारणं स्यात्(४) । [e]ओमित्यभिधाने(५)चाकारणमात्रं व्यवच्छेद्यमिति 'कारणं करणमि'त्येवोच्यतां वृथा विशेषणपूरणप्रयासः ।

टी० [a]"नचे"ति । आत्मव्यापारस्य तु न साक्षाच्छरीरं विषयो मनोव्यापारव्यवहितत्वादिति भावः(६) । प्रभृतिपदं प्राणमनोवहनाड्यादिपरम्॥ [b]"अव्यापकत्वादि" ति। परम्परया व्यापारर्यै कुठारादावव्यापकत्वादिति भावः ॥ ननु मनःशरीरादिव्यापारस्य न तत्क्रियाहेतुत्वमिति कुतोऽतिव्याप्तिरिति शङ्कते-। [c]"अथे"ति ॥ क्षित्यङ्कुरादिकार्यं प्रति यत्करण तस्य कर्तृव्यापाराविषयत्वेनाकरणत्वप्रसङ्गः, यच्च सुषुप्तस्य प्रबोध-

(१) मनःप्रभृतिक्रियान्यत्वे सति साक्षात्कर्तृव्यापारविषयः करणमित्युक्तौ नोक्तदोषोऽतो दोषान्तरमाह-अव्यापकत्वादिति ।
(२) अव्याप्त्यन्तरमप्याह-सुषुप्तीति । परिगणितानि यानि करणानीन्द्रियाणि तान्येवोपाधयस्तेषां भेदेन परिसङ्ख्याताः पञ्चधा षोढेति वा ये प्रमाराशयस्तेषु बहिर्भावः प्रसज्येतावस्थन्तकारणजन्यत्वादतश्च तस्याः करणमस्ति न च तस्य कर्तृव्यापारविषयत्वमित्यव्याप्तिरित्यर्थः ।
(३) अस्मदाद्यचेतनशरीरस्यैव सुषुप्त्यव्यवहितोत्तरभाविप्रमाकरणत्वे तु तस्यैवाङ्कुरादिकरणत्वमपि प्रसज्येतेत्यर्थः । तथाच तन्मतेऽङ्कुरादिकमकर्तृकं न स्यादिति भावः। (४) कारणम् अकरणं न स्यादित्यन्वयः। (५) ओमित्यभिधाने=अस्त्वित्यभिधाने । (६) पूर्वदर्शितो भाव इत्यर्थः ।

ज्ञानकरणं तदपि न करणं स्यात्, चैतन्योपहितस्य कर्तृत्वस्य तत्रासत्त्वात् कर्तृव्यापारविषयत्वाभावादिति परिहरति—। [d]"अनीश्वरे"ति ॥ ननु(१)पाधीनामसाङ्कर्यं नः सिद्धान्तो, नतूपधेयासाङ्कर्यमपि, तथा च कर्तृकर्मादेरपि करणत्वमनेनोपाधिनाभिमतमेवेत्याशङ्क्य परिहरति —। [e]"नेमि"ति ॥

मू० [a]"अथ मन्यसे, * न धर्म्यन्तरव्यवच्छेदाय विशेषणानि, किं त्वेकस्यापि धर्मिणो रूपभेदेन करणपदाभिधेयतोपदर्शनाय*,–इति, [b]'एवं(२)तर्हि तद्रूपालिङ्गितस्य करणत्वाल्लक्षणोक्तिप्रवृत्तेन त्वया लक्ष्यमात्रमुक्तं भवेत्। * [c]'नच लक्ष्यपदप्रवृत्तिनिमित्तमेव लक्षणार्थः *, गन्धवत्त्वादेः पृथिव्याद्यलक्षणत्वापत्तेः। [d]अपि चैवं 'वस्तुमात्रं करणमि'त्यभिधायैव किं न करणपदप्रवृत्तिनिमित्तमुपादर्शि ?। * [e]'स्यादेवं यदि सर्वत्र वस्तुनि करणव्यवहारः स्याद् ?*,–इति चेत्तर्हि त्वदुक्तलक्षणमपि भवेद् यदि सर्वत्र कारणे करणव्यवहारः स्यादित्यपि पश्य; नहि कर्त्तरि कर्मणि वा कस्यचित्करणव्यवहारः। * कर्त्तरि(३)तावदस्ति लोके

(१) उपाधीनां = धर्माणामसाङ्कर्यमुपधेयस्य = धर्मिणश्च साङ्कर्यमिति शङ्कते–नन्विति। (२) एवं तर्हि लक्षणोक्तिप्रवृत्तेन त्वया एतद्रूपालिङ्गितस्य (= साक्षात्कर्तृव्यापारविषयत्वधर्मवतः) करणत्वाल्लक्ष्यमात्रमुक्तं भवेदित्यन्वयः। लक्ष्यमात्रम् = वाच्यस्वरूपमात्रम्, नतु तल्लक्षणमपीत्यर्थः। (३) लोकशास्त्रयोर्दृष्टोदाहरणानुसारेण कर्त्तरि करणव्यवहारमाशङ्कते–कर्त्तरीति, इह=तदुक्तेर्थे, प्रमाणं=प्रमाकरणम्, देवदत्तः (कर्त्ता)। "मन्त्रायुर्वेदप्रामाण्यवद्"इत्यादि गौतमीयं द्वितीयाध्यायस्यप्रथमाह्निकस्य सप्तषष्टितमं सूत्रम्। अस्यार्थः=यथा वेदैकदेशस्य पथ्याऽदृष्टार्थस्य पथ्याद्यभिधायिन आयुर्वेदस्य यथा वा विषभूताद्यनिर्मतिषेधार्थस्य मन्त्रवेदस्य प्रामाण्यं दृष्टं तथाऽदृष्टार्थस्यापि समग्रवेदराशेः प्रामाण्यमनुमातव्यं तत्कर्तुराप्तस्य यत्प्रामाण्यं–यथाभूतार्थचिख्यापयिषादि तस्योभयत्रापि समानत्वादिति। एवं देव-

'प्रमाणमिह देवदत्तः'-इति, शास्त्रेपि "मन्त्रायुर्वेद-प्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्" ?*,-इति चेन्न । किमयं(१)माणवकेऽग्निव्यवहार इव गौणो ? मुख्य एव वा ?-इति संशये यदि त्वत्परिकल्पितान्निमित्तान्मुख्यः स्यात् ततः कर्मण्यपि स्यात् [f]तत एव निमित्तादिति बाधदर्शनेन(२)पारिशेष्याद् गौणतयैव तद्व्यवस्थापनाया युक्तत्वात् ।

टी० ॥ ननु कारणमात्रस्य करणत्वेपि न कारणत्वं करणपदप्रवृत्तिनिमित्तमपि तूक्तं(३)लक्षणमेव तथेति शङ्कते-।[a]"अथे"ति ॥ लक्षणगवेषणायां प्रवृत्तिनिमित्ताभिधानं न प्रस्तुतमिति परिहरति-।[b]"एवं तर्ही"ति ॥ प्रवृत्तिनिमित्तमपि लक्षणमेव, तथा च नाप्रस्तुतत्वमित्यत आह-"नचे"ति । यदि प्रवृत्तिनिमित्तमेव लक्षणं तदा गन्धवत्त्वं न पृथिवीलक्षणं स्यात्तस्योपाधितया गुरुत्वेन पृथिवीत्वजातेरेव तत्पदप्रवृत्तिनिमित्तत्वादित्यर्थः । अथ तदपि(४)लक्षणं, तदाऽतिव्याप्तिरुक्तैवेति भावः॥ किंच, यदि प्रवृत्तिनिमित्तमात्रमलक्षणभूतमपि वक्तव्यं(५)तदा वस्तुत्वाद्येव तदस्त्वित्याह-। [d]"अपि चे"ति ॥ प्रवृत्तिनिमित्तमपि व्यवहाराऽऽयत्तं वक्तव्यं न तु यत्किञ्चिदिति शङ्कते-। [e]"स्यादेवमि"ति । "त्वदुक्तलक्षणमपी"त्यत्र"प्रवृत्तिनिमित्तमात्रमपी"ति शेषः॥ [f]"तत एवे"ति। कारणत्वादेवेत्यर्थः । आत्मा-

---

दत्तामयोः प्रमाकर्त्रोरपि प्रामाण्यस्य (=प्रमाकरणत्वस्य) लोकवेदयोः श्रवणात्कर्तुरपि करणत्वं भवत्येवेति पूर्वपक्षाभिप्रायः । (१) अयं=कर्तरि करणत्वव्यवहारः । (२) बाधदर्शनेन=कर्मणि करणत्वव्यवहारो नास्तीति बाधदर्शनेन, यद्वा कारणत्वनिमित्तात्कर्मण्यपि करणत्वव्यवहारः स्यादित्याकारकस्तर्क एव प्रकृते बाधो ग्राह्यस्तद्दर्शनेनेत्यर्थः । पारिशेष्याद् गौणतयैव, तद्व्यवस्थापनाया:=कर्तरि करणत्वव्यवहारव्यवस्थापनाया, युक्तत्वादित्यर्थः । (३) "व्यापारवद्धि कारणं कारकमि"त्युक्तलक्षणमेव, तथा=करणपदप्रवृत्तिनिमित्तम् । (४) तदपि=करणपदप्रवृत्तिनिमित्तमपि । (५) वक्तव्यं, प्रस्तुते लक्षणत्वेन वक्तव्यमित्यर्थः ।

गमनात्मार्थं ग्रामाभीत्यादौ गौण एव कर्मव्यवहारः, परसमवेत-क्रियाफलशालित्वलक्षणाभावादिति भावः ॥

मू० *अस्त्येव कर्मण्यपि [a]तेन रूपेण?*,-इति चेत्, न(१) ताव[b]दयं शक्योपदर्शनोदाहरणः शास्त्रलोकयोः; [c]क्व दृश्यते घटं पश्यतीत्यर्थे घटेन पश्यतीति ?। [d]यदि तु त्वच्चेतसि केवलं स्यात् तत्र च नादरं विधातुमुत्सहामहे। 'प्रमेयमात्रं करण'मिति वदतो वामबुद्धे-र्मनसि परिवर्तमानं प्रमेयमात्रे एव करणव्यवहारा-स्तित्वमेव(२)मनुरोद्धव्यं स्यादिति। [e] * घटेन पश्य-तीत्याद्यनभिधानवशान्न प्रयोगो, [f] न हि सर्वं लाक्ष-णिकं(३)प्रयुज्यते ?*,-इति चेन्न। माऽस्तु, [g]तदभावे कोऽन्योऽस्ति तेषु करणव्यवहारः? इति वक्तव्यः स्यात्, नचासौ शक्यदर्शन इति।

टी० ॥ [a]"तेने"ति। कारणत्वेनेत्यर्थः ॥ [b]"अयमि"ति। कारणत्वमात्रनिबन्धनः करणव्यवहार इत्यर्थः ॥ [c]"क्वे"ति। साधकतमत्वविवक्षायां घटेन पश्यतीत्यपि भवत्येवेति वाङ्-मात्रमिति भावः ॥ एतदेवाह-[d]"यदि त्वि"ति। यदृच्छया व्य-वहारोपपादकत्वं वामबुद्धित्वम् ॥ कर्मण्युक्तोपाधिना करणं भवति, तृतीया तु तत्र न भवति, तथाप्रयोगाभावादित्याह-। [e]"घटेने"ति ॥ [f]"नही"ति। यद्यपि करणपदप्रवृत्तिनिमित्तव-

(१) अनन्यथासिद्धव्यवहारात्तथात्वावगतिरयं तु व्यवहारो गौणत-याप्युपयुज्यतेऽतो न कर्मादौ करणव्यवहारं समर्थयितुमीष्टे-इत्याह-नेति। यत्र कर्मणि करणव्यवहारो दर्शयितुं शक्यते तादृशोदाहरणं लोकशास्त्रयोर्नास्तीत्यर्थः। (२) एवं (सति) प्रमेयमात्रे करणव्यव-हारास्तित्वमनुरोद्धव्यं स्यादित्यन्वयः। (३) लाक्षणिकम्-लक्षणनि-ष्पाद्यम्, प्रवृत्तिनिमित्तसिद्धमिति यावत्। अयमाशयः, यथा शशीत्यस्य चन्द्रे प्रयोगस्तथा मृगीत्यस्य लक्षणसिद्धत्वेऽपि न प्रयोग इति।

त्तायां न लाक्षणिकत्वं(१)तथापि तथाप्रयोगाविषये प्रयुज्यमानत्वमेव लाक्षणिकत्वं विवक्षितम् ॥ "तदभावे" इति । प्रयोगाभावे कर्मणि करणव्यवहारो नान्यो वक्तुं शक्यते, प्रयोगरूपव्यवहारस्तु त्वयैवानभिधानान्निरस्तस्तथा च प्रवृत्तिनिमित्तं तत्रातिप्रसक्तमेवेत्यर्थः ॥

सू० * "क्रियया अयोगव्यवच्छेदेन संबन्धि(२)करणम्*,— इत्यपि न । 'तथाहि, अयोगव्यवच्छेदो योग एव पर्यवस्येदिति संबन्धेन संबन्धीत्युक्तं स्यादिति पौनरुक्त्यम् । * 'यदा संबन्धीत्यनेन कालविशेषनियतसंबन्धिताभिधीयते ततोऽन्यस्मिन्नपि काले संबन्धिता अयोगव्यवच्छेदपदेन विवक्षिता ? *,—इति चेन्मैवम् । 'संबन्धीत्यनेन न कालविशेषनियता संबन्धिताभिहिता येन कालान्तरेऽलब्धसंबन्धिताऽभिधानाय पदान्तरमुपादीयेत । 'अथोच्यते * संबन्धीत्यस्य सामान्यतोऽभिधायिनः कालविशेषनियतसंबन्धमादायापि पर्यवसाने सार्थकत्वं भवत्येवेति कालान्तरे असंबन्धितया व्यवतिष्ठमानं कदाचिदपि करणं प्रसज्येत, तद्व्यवच्छेदाय कालान्तरे संबन्धिता पदान्तरेणाभिधीयते*इति, मैवम् । 'तर्हि तेनापि क्वचिदेव कालान्तरे यदि संबन्धिताभिधीयते तदापि तस्य सार्थकता संबन्धिपदन्यायेन(३)सामान्याभिधायिनो

---

(१) यद्यपि प्रवृत्तिनिमित्तवद्वृत्त्यसाधारणधर्मे प्रवृत्तिनिमित्त (कारणत्वे) न लक्षणत्वं तथापि घटेन पश्यतीति प्रयोगाविषये कारणत्वस्य प्रयुज्यमानत्व (प्रवृत्तिनिमित्तत्वम्) एव लक्षणत्वमापाततोऽत्र निर्दिष्टमिति पङ्क्त्यर्थः । (२) सम्बन्धि करणमित्युक्ते द्रव्यसम्बन्धिगुणेऽतिप्रसङ्गस्तन्निराकरणाय—क्रिययेति, कर्त्रादावतिप्रसङ्गवारणाय—अयोगव्यवच्छेदेनेति । (३) सम्बन्धिपदन्यायेन=प्रथमसम्बन्धिपददृष्टान्तेन ।

भवेदिति ततोपि कालान्तरेऽसंबन्धव्यवच्छेदाय विशेषणान्तरमपि निवेशनीयं स्यात् ।

टी० ॥ [a]"क्रियये"ति । प्रधानक्रियया ऽयोगव्यवच्छेदेन संबन्धि करणं, नहि कुठारादौ सव्यापारे सति न छिदा, कर्तृकर्मणोस्तु सव्यापारयोरपि सतोः कदाचिन्न क्रियेत्यर्थः ॥ [b]"तथाही"ति । द्वौ निषेधौ प्रकृतमर्थं गमयत इति भावः ॥ निषेधद्वयमनभिव्याहृत्य सार्वदिकसंबन्धो लभ्यते इति शङ्कते—। [c]"यदे"ति 'संबन्धी'ति सामान्याभिधानसामर्थ्यादेव विवक्षितार्थसिद्धिरिति परिहरति-।[d]"संबन्धी'ति ॥ सामान्यं किञ्चिद्विशेषमादायैव चरितार्थं, निषेधद्वयसमभिव्याहारस्तु नैवमिति शङ्कते-। [e]"अथे"ति ॥ 'अयोगव्यवच्छेद'इति योगसामान्यनिषेधोपि यं कञ्चन विशेषमादायेति परिहरति-। [f]"तर्ही"ति ॥

सू० [a]अथ* यदाकदाचिदपि योऽयोगस्तस्य सर्वस्य व्यवच्छेदो विवक्षितः*-इति, तर्हि संबन्धिपदे एवैषा विवक्षास्तु, कृतमधिकमुपादाय तद्विवक्षया ।*[b]निषेधव्यवच्छेदेन सार्वत्रिकत्वलाभः(१)?*-इति चेन्न, [c]निषेधव्यवच्छेदस्य विध्यनतिरेकार्थत्वेनाविशेषात् ।*[d]तद्धर्मिकं(२)संबन्धस्यासंबन्धासामानाधिकरण्यम'ऽयोगव्यवच्छेदेने'त्यनेनोच्यते?*-इति चेन्न, [e]तस्यापि संबन्धकाले तत्रासत्त्वोपगमात् ।*[f]सर्वदा?*-

---

अयमाशयः,—यथा प्राथमिकेन सम्बन्धीतिपदेन कालविशेषसम्बन्धिताभिधाने कालविशेषे सम्बन्धितया कालविशेषे चाऽसम्बन्धितया व्यवतिष्ठमाने कर्त्रादावतिप्रसङ्गवारणाय सातत्येन सम्बन्धाभिधायकमयोगव्यवच्छेदपदं प्रयुक्तं, तथा यदि तेनापि (=अयोगव्यवच्छेदपदेनापि) कालविशेषनियतैव सम्बन्धितोक्ता स्यात्तदापि तस्य सार्थकत्वं भवत्येवेति पुनरपि कालविशेषे सम्बन्धितया तद्व्यतिरिक्तकालविशेषे चासम्बन्धितया व्यवतिष्ठमाने कर्त्रादावतिप्रसङ्गः स्यादिति तद्वारणाय पुनः सततसम्बन्धाभिधायकमयोगव्यवच्छेदेनेति पदान्तरमुपादेयमेवं पुनःपुनरपोऽनवस्था स्यादिति । (१) सम्बन्धे—इति शेषः । (२) तद्धर्मिकम्=कुठारादिधर्मिकम् ।

इति चेन्न, [g]यद्येवं तर्हि करणासत्त्वकालेपि योग एव करणेन क्रियायाः? । *यावत्सत्त्वम्*(१)-इति चेत्तर्हि संबन्धीति [h]व्यर्थं, यावत्सत्त्वमयोगव्यवच्छेदेन यद्विशिष्टमुपलक्षितं वा तत्करणमित्येवास्तु, 'संबन्धीत्येव वा तथा विवक्ष्यतामित्युक्तमेव। [i]अयमेवार्थः कयापि कुसृष्ट्या(२)संबन्धिपदसार्थकतामुपपाद्य यदि विवक्षितस्तदाप्युच्यते ।

टी० ॥ 'अयोगे'ति सर्वायोगविवक्षा, अत्र तन्निषेध इति सर्वयोगलाभ इति शङ्कते-। [a]"अये"ति ॥ शङ्किता स्वाभिप्रायमिदानीं विशदयति-। [b]"निषेधे"ति ॥ स्वाशङ्कितकोटिं स्वाभिप्रायमाविष्करोति-। [c]"निषेधे"ति ॥ यत्र धर्मिणि प्रधानक्रियासंबन्धस्य तदसंबन्धसामानाधिकरण्यं नास्ति तत् करणं, कर्त्रादौ तु नैवमिति शङ्कते-। [d]"तद्धर्मिकमि"ति ॥ कर्मादेरपि प्रधानक्रियासंबन्धसत्त्वकाले तदसंबन्धसामानाधिकरण्यासत्त्वोपगमादिति परिहरति-। [e]"तस्यापी"ति ॥ कर्त्रादौ क्रियासत्त्वकालमात्रेऽयोगसामानाधिकरण्यासत्त्वं, करणे तु सर्वदेति शङ्कते-।[f]"सर्वदे"ति ॥ करणेप्यसम्भवः सार्वदिकक्रियायोगस्येत्याह-। [g]"यद्येवमि"ति ॥ [h]"व्यर्थमि"ति । तर्हि क्रियया अयोगव्यवच्छिन्नमित्येव लक्षणमित्यर्थः ॥ "संबन्धीत्येववे"ति । नित्ययोगे मत्वर्थीयविवक्षास्वित्वत्यर्थः ॥[i]"अयमि"ति। निषेधद्वयसमभिव्याहारबलाऽलभ्येप्यर्थे समभिव्याहारलभ्यत्वाभिमानरूपया कुसृष्ट्येद्दृशार्थलाभेपि दोषान्तरदुष्टमिदं लक्षणमित्यर्थः ॥

सू० [a]कृत्तिकोदयक्रियायां रोहिण्यासत्तिरप्येवं करणं स्यात्, अनन्तरभाविनश्चतुर्दशस्य नक्षत्रस्योदयं प्रति पूर्वभाविचतुर्दशसङ्ख्यनक्षत्रास्तमयस्य(१) च करणत्वं स्यात्। * नचैवमेव युक्तम् *, [b]यौगपद्येन कार-

(१) यावत्कुठारादेः करणस्य सत्त्वं तावत्तेन छिदादिक्रियायोग इत्यर्थः ।
(२) कुसृष्ट्या = कुतर्केण । (१) अस्तमयस्य अस्तंगमनस्येत्यर्थः ।

णत्वानुपपत्त्या कारकत्वस्य दूरनिरस्तत्वेन करणत्वस्य सम्भावनाऽनारोहात् । * न च तत्र संबन्ध एव नास्ति *, [c]व्याप्तेः स्वभावसंबन्धात्मिकाया दुरपन्हवत्वात् । *[d]अथ कार्यकारणभावः संबन्धो विवक्षितः *, न, सामग्र्याः करणत्वापत्तेः(१) । * ओम् ?*—इति चेत्, तत् [e]किमोमित्यभिधायैव निवृत्तो भवान्? आकलितं किलास्माभिः सामग्र्यपि करणमित्यत्र न श्रद्दधतः(२)प्रणवपूर्विकां श्रुतिमेव काञ्चित्पठित्वा श्रद्धापयिष्यति भवानस्मानिति । * [f]न सामग्री कारणं, किंतु तदेकदेशो नानाभूतः(३)प्रत्येकं तथा, सामग्री तु यदनन्तरं कार्य्यं भवत्येवेत्येतावन्मात्ररूपा ?*—इति चेन्न, [g]एतादृशस्य सामग्रीलक्षणस्य करणेपि सत्त्वात् करणस्यापि सामग्रीत्वापातात् ।

टी० ॥ तदेवाह—। [a]"कृत्तिके"ति । ज्योतिःशास्त्रादेतद्व्यवसेयम् ॥ कारणत्वव्याप्यं कारकत्वं, तद्व्याप्यं च करणत्वं, तथाच प्रकृते व्यापकनिवृत्त्या व्याप्यनिवृत्तिरावश्यकीत्याह—। [b]"यौगपद्येने"ति ॥ [c]"व्याप्तेरि"ति । कृत्तिकोदयरोहिण्यासत्त्योर्भाविचतुर्दशनक्षत्रोदयातीतचतुर्दशनक्षत्रास्तमययोश्च व्याप्तिलक्षणसंबन्धसत्त्वादित्यर्थः ॥ [d]"अथे"ति । सामान्यशब्दस्य विशेषपरतयेत्यर्थः । अभ्युपगममात्रेण नार्थतथात्वमित्याह—। [e]"किमोमि"ति ॥ विवक्षितलक्षणं(४) सामग्र्यां नागतमिति नातिव्याप्तिरित्याह—। [f]"न सामग्री"ति ॥ सामग्रीलक्षणं तदेकदेशे करणे व्यभिचारयति—। [g]"एतादृशे"ति ॥

---

(१) यद्यपि सामग्रीक्षणे क्रियायोगो नास्ति तथापि स्थूलकालमादायेदमिति बोध्यम् । (२) न श्रद्दधतोऽस्मान् (तमर्थं) भवाञ्छ्रद्धापयिष्यतीत्यन्वयः, किलशब्दो निरुक्तार्थस्याऽप्रामाणिकत्वेन हासप्रकटनार्थः । (३) नानाभूतः=कुठारदण्डादिरूपः । तथा=करणम् ।

(४) कार्य्यकारणभावसम्बन्धघटितं विवक्षितलक्षणं सामग्र्यां

मू० "क्रियाया विभागादौ विभागस्य च संयोगनाशादि प्रति तथात्वापत्तेः। यच्च(१)" प्रति सामग्र्येकदेशं नियतप्राग्भावादिकारणलक्षणमिष्यते तत्सामग्र्यामपीति कथं तदकारणता? ।* प्राक्कालमन्तर्भाव्य सामग्री, तादृश्याश्च (२) तस्याः प्राक् सत्त्वमेव नास्ति ? *-इति चेन्न, "अत एव प्राक्कालस्याकारणत्वात् कारणसामग्र्यां तदनिवेशात्(३)। 'अपिचैवं विवक्षितमपि करणं न स्यात्। नहि यावत्सत्त्वं व्यापारवतोऽपि तस्य क्रियाजनकत्वं, 'क्रियाऽकाले(४)क्षणमपि तदनुवृत्तिनिषेधे प्रमाणस्य दुरुपन्यासतया संशयेनापि लक्षणाऽसिद्धेः; प्रत्युत चिरस्थिरकरसंयोगे(५) स्पृश्ये स्पर्शप्रमाकरणस्पर्शनेन्द्रियसंयोगस्थैर्यस्य "मन्तुमुचितत्वात्।

टी० ॥ अतिव्याप्त्यन्तरमाह-। "क्रिये"ति। विभागं

नागतं सामग्र्या अकारणत्वादित्यर्थः। (१) पूर्वं सामग्र्या अकारणत्वमभ्युपगम्य दूषणमुक्तमिदानीं सामग्र्या अपि कारणत्वमभ्युपगन्तव्यं तथा च करणलक्षणं सामग्र्यामतिव्याप्तमित्याह-यच्चेति। (२) तादृश्याः=प्राक्कालघटितायाः, तस्याः=सामग्र्याः, प्राक्काले सत्त्वं नास्ति आत्माश्रयादिति भावः। न च विशिष्टकाले शुद्धस्य शुद्धकाले वा विशिष्टस्य वृत्तौ न दोषस्तत्राप्यंशत आत्माश्रयादिति हृदयम्।

(३) कालस्य कारणसामग्र्यामनिवेशे च कालाघटितकारणसामग्र्यां करणलक्षणातिव्याप्तिरेवेति भावः। (४) क्रियाऽकाले=फलीभूतच्छिदात्मकक्रियातः पूर्वं, क्षणमपि तदनुवृत्तिनिषेधे=उद्यमननिपातनादिविशिष्टकुठारादेर्व्यापारिणः सामान्यसत्तानिषेधे-इत्यर्थः। यद्वा, फलीभूतक्रियाऽकाले क्षणमप्युद्यमननिपातनादिविशिष्टकुठारादौ तदनुवृत्तिनिषेधे छिदाऽनवच्छिन्नाकारनिषेधे इत्यर्थः।

(५) चिरं स्थिरः करसंयोगो यत्र स्पृश्यद्रव्ये तत्रेत्यर्थः। तथा-चेन्द्रियसंयोगस्थैर्यमस्ति, नास्ति चान्यत्र स्यात्तत्काले स्पृश्यप्रमेति तत्करणे त्वगिन्द्रियेऽव्याप्तिरिति भावः। एवं चक्षुरादावप्यव्याप्तिर्द्रष्टव्या।

प्रति कर्मणः सामग्रीत्वापत्तिः, एवं चरमकारणे सर्वत्रेत्यर्थः ॥ [b]"प्रती"ति । सामग्र्येकदेशं प्रतीति योजना ॥ [c]"प्रागि"ति । प्राक्कालस्यापि कारणतया तद्घटितमेलनस्य (सामग्र्याः) प्राक्काले वृत्तिर्नास्तीति न सामग्री कारणमित्यर्थः ॥ [d]"अत एवे"ति । प्राक्कालावृत्तित्वादेवेत्यर्थः ॥ क्रियया ऽयोगव्यवच्छेदतया यावत्सत्त्वं सम्बन्धित्व कुठारादावपि नास्तीत्यसम्भवमाह - [e]"अपि चे"ति । उद्यमननिपातनादिविशिष्टकुठारादौ प्रथमक्षणे(२)पि छिदाऽसम्बन्धो नास्तीत्यत्र प्रमाणाभावात्सन्देह इत्यर्थः ॥ [f]"क्रियाकाले" इति । नञोत्र प्रश्लेषः(३) ॥ [g]"प्रत्युते"ति, व्याघातस्थलं द्रष्टव्यम् ॥ [h]"मन्तुमुचितत्वादि"ति । मनोऽणुत्वकल्पनानुरोधेनेत्यर्थः ॥

मू० [a]"यावत्सत्त्वं च करणमिति भाषायां सर्वस्मिन् तत्सत्त्वकाले कारणत्वमित्यर्थः, न च कारणत्वस्य नियतपूर्वकालसंबन्धात्मकस्य क्वचित्काले सत्त्वं, कालं प्रति कालान्तराभावादिति । अथ * 'क्रियया ऽयोगव्यवच्छेदेन संबन्धी'त्यस्यायमर्थो(१)-यस्मिन्सति भवत्येव क्रियेति * । कोऽस्यार्थः ? किं यस्मादनन्तरं क्रियोत्पद्यते एव ? १ उत यस्मिन्वर्त्तमाने क्रियोत्पद्यते एव ?-२ उत यस्मादनन्तरं क्रिया तिष्ठत्येव ?-३ उत यस्मिन्वर्त्तमाने क्रिया तिष्ठत्येव ?-४ । नाद्यः, सामग्र्याः(४)करणत्वप्रसङ्गात्, [b]हस्तादीनामकरणत्वप्रसङ्गात्, [c]सुखदुःखादेः प्रमेयस्यापि प्रमा-

---

(१) प्रथमक्षणे=फलीभूतक्रियापूर्वक्षणे, फलोपहितकुठारादिक्रियाऽऽद्यक्षणे वा । (२) वस्तुतस्तु नञोऽप्रश्लेषेपि 'क्रियाकाले = फलानुपहितकुठारादिक्रियाक्षणेतदनुवृत्तिनिषेधे=छिदाऽसम्बन्धनिषेधे'-इत्यर्थकरणे न दोषः । (३) यद्यपि वाच्योऽयमर्थो न, तथापि तात्पर्यगम्योऽयमर्थ इति भावः । स्वाव्यवहितोत्तरक्षणे जायमानक्रियाकारणमिति प्रथमविकल्पार्थः, अन्यस्तु स्पष्ट एव । (४) सामग्र्याः=क्रियासामग्र्याः ।

करणत्वप्रसङ्गाच्च । * नच प्रमेयमपि प्रमायाः करणं स्यादेवेति वाच्यम् *, तत्र तथाव्यवहारस्य (१)कस्यचिदप्यसिद्धेः । नापि द्वितीयः, स्पृश्येन सह स्थिरसंयोगस्य स्पर्शनेन्द्रियस्याव्यापनात्, तत्सत्त्वेपि व्यासक्तौ तेन प्रमाऽनुत्पादात् । नापि तृतीयः, सामग्र्यादेः करणत्वप्रसङ्गात्, उत्पत्तेः 'स्थिरे करणत्वप्रसङ्गाच्च । नापि चतुर्थः, 'सहस्थायिनां करणत्वप्रसङ्गात् । * अथ 'क्रियायाऽयोगव्यवच्छेदेन संबन्धित्वं करणत्वमि'त्यस्यायमर्थः व्यापारवतः फलाव्यभिचारित्वमिति * । मैवम्, 'हस्ताद्यव्यापनात् ।

टी० ॥ प्रकारान्तरेणासम्भवमाह । "'यावदि"ति । 'यावत्सत्त्व क्रियाऽयोगव्यवच्छेदेन यत्कारणं तत्सम्बन्धि तत् करणमि'ति वाक्यस्य सर्वत्र स्वसत्ताकाले यत्कारण तत्र तत्करणमित्यर्थं पर्यवस्यति, काले च कालघटितं कारणत्वमसम्भवीत्यर्थः ॥ '"हस्तादीनामि"ति । हस्ते सव्यापारे सत्यपि क्वचित्पाकानुत्पत्तेरयोगव्यवच्छेदाभावादित्यर्थः ॥ 'सुखे"ति । सुखदुःखयोरवश्यसंवेद्यतया तदनन्तरं प्रमोत्पत्तेरावश्यकत्वादित्यर्थः । आदिपदात् ज्ञानव्यक्तिविशेषग्रहः (२) । 'सामग्र्यादेरि'त्यादिपदात् कर्मशब्दादिपरिग्रहः(३) ॥ "स्थिरे" इति । स्थैर्यपक्षेघटोत्पत्तेरनन्तरमपि घटात्मकात्तदु(४)त्पत्तावतिव्याप्तिरित्यर्थः ॥ '"सहस्थायिनामि"ति । व्यापारविशिष्टकुठारादिरूपादीनामि-

(१) तथाव्यवहारस्य—प्रमाकरणत्वव्यवहारस्य । (२) अनुव्यवसायविषयीभूतव्यवसायात्मकज्ञान-व्यक्तिविशेषस्य परिग्रह इत्यर्थः ।

(३) चक्राद्येकैकक्रियानन्तरमुत्तरोत्तरं क्रिया तिष्ठत्येव, तथा धारावाहिशब्दस्थलेपि पूर्वपूर्वशब्दानन्तरमुत्तरोत्तरं शब्दस्तिष्ठत्येवेति तत्र प्राथमिककर्मशब्दयोः करणत्वं स्यादित्यर्थः, न तु तथास्ति, दण्डादीनामेव करणत्वात् । (४) एवं क्रियाऽयोगव्यवच्छेदेन सम्बन्धीति करणलक्षणे क्रियापदस्य कार्य्यवाचकतया घटस्यापि क्रियात्मकत्वं बोध्यम्, तथाच घटोत्पत्त्यनन्तरं घटरूपा क्रिया तिष्ठत्येवेति घटोत्पत्तावतिप्रसङ्गः । यद्वा, घटस्त्वाद्धटस्वरूपक्रियास्थानात ।

त्यर्थः । कारणत्वेन विशेषणे पूर्वदोषानुवृत्तिरिति भावः ॥ [f]"हस्तादौ"ति। हस्ते सव्यापारे सत्यपि कदाचित्पाकानुत्पत्तेरित्यर्थः ॥

सू० कश्चायं(1) तद्व्यापारो नाम ? किं तज्जन्यं कारणम् ?-१ उत तदाश्रयं(2) कारणं ?-२ । नाद्यः, [a]"लिङ्गपरामर्शे तदसम्भवात् । *[b]पक्षे प्रथमधूमादिदर्शनस्य व्याप्तिस्मृतिद्वारा द्वितीयलिङ्गपरामर्शं व्यापारं जनयतः करणत्वमेष्टव्यम्, [c] एवं च परमार्थतो व्याप्यस्य [d]स्वरूपेण प्रमितिर्द्वितीय(3)व्याप्तव्यपरामर्शव्यापारिकाऽनुमानमिष्यते ? * इति चेन्न, [e]अन्यतो जाताग्निधूमादिव्याप्तिस्मृतौ सत्यां पक्षगतप्रथमधूमादिदर्शनस्य तद्व्यापारकत्वासिद्धेः(4) । *[f]तत्राप्यु(5)भयकर्मजसंयोगवत् तदपि कारणम्*-इति चेन्न,

टी० ॥ [a]"लिङ्गे"ति । तृतीयलिङ्गपरामर्शाव्यवहितोत्तरक्षणे एवानुमित्युत्पत्तेरित्यर्थः ॥ ननु प्रथमलिङ्गदर्शनमेव तृतीयलिङ्गपरामर्शव्यापारकमनुमितिकरणमतो नाव्याप्तिरिति शङ्कते । [b]"पक्षे"इति । व्याप्तिग्रहकाले प्रथमलिङ्गदर्शनं महानसादौ, पक्षे तु द्वितीयमत उक्तं "पक्षे"-इति ॥ एतदेव विविच्याह । [c]"एव चे"ति ॥ [d]"स्वरूपेणे"ति ॥ व्याप्यत्वानुपधानेनेत्यर्थं । अनुमानम्=अनुमितिकरणम् ॥ यत्र प्रथमं व्याप्तिविशिष्टधूमस्य पक्षो-

(१) { व्यापारखण्डनेनापि करणत्वस्य खण्डनम् । स्यादित्यभिप्रायवादी व्यापारं स निरस्यति॥ }

(२) तत् करणमाश्रयो यस्य तत्तदाश्रयम् । तदसम्भवात् = निरूकव्यापारासम्भवात् । (३) अत्रापि सापेक्षं द्वितीयत्वं, वस्तुतस्तु तस्य तृतीयत्वमेव । (४) द्वितीयलिङ्गपरामर्शव्यापारकत्वासिद्धेरित्यर्थः । (५) तत्रापि = अदृष्टाग्निजस्मृतौ, तदपि = पक्षे धूमदर्शनमपि; प्रकान्तपाङ्करव्याख्यानुरोधेन तु-तत्रापि=द्वितीयलिङ्गपरामर्शेऽपि, तदपि = पक्षे धूमदर्शनजन्यस्मरणमपीत्यर्थः ।

सतया परामर्शस्तत्र स एवानुमितिकरणं, तस्य च निर्व्यापारतया तत्र लक्षणमव्याप्तमेवेत्याह—। "अन्यत्र" इति,—दैवादेः, न तु पक्षे धूमदर्शनात् ॥ एकस्यापि कर्मण. संयोगजनकत्वाभ्युपगमे यत्रोभयकर्मसन्निपातस्तत्र यथोभयस्यापि हेतुत्वं तथा दैवाधीनव्याप्तिस्मृतेः प्रथमधूमदर्शनजन्यव्याप्तिस्मृतेश्च मिलित्वा तृतीय(१)लिङ्गपरामर्शजनकत्वमिति प्रथमलिङ्गदर्शनस्य तद्व्यापारकस्यानुमितिकरणत्वमिति नाऽव्याप्तिरित्याशयाऽविद्वत्तया(२) शङ्कते—। "तत्रापी"ति ॥

सू० "अभावादिसापेक्षविशिष्टमतिपरिवत्प्रागुपजातवन्हिव्याप्तधूमस्मृतेः(३)प्रथममपि योसौ वन्हिव्याप्तः सोयं धूम इति परामर्शोपपत्तेः । * नित्यसापेक्षैर्वस्तु तथा, नान्यत्र(४)प्रथमं तथा ?* इति चेन्न, प्रागुक्ततत्कारणोपपत्तौ 'नान्यत्रैव'मिति नियमे प्रमाणस्याभावात्(५) । * तस्य व्यापाराभावात् नानुमित्युत्पादकत्वमेव * इति चेत्, स्यादप्येवं यदि व्यापारवतः करणत्वमित्येव सिद्धं स्यात् । * तत्र धूमादिनिर्विकल्पकस्य तद्व्यापारकस्य करणत्वम् ? * इति चेन्न ।

टी० ॥ आशयमुद्घाटयति । "अभावादी"ति । प्रतियोगिस्मृत्यैव यथाऽभावविशिष्टज्ञानं तथा दैवाधीनव्याप्तिस्मृतिलक्षणविशेषणज्ञानमहिम्ना व्याप्तिविशिष्टपर्वतीयधूमपरामर्श

(१) तृतीयत्वं वास्तविकं. पक्षे धूमदर्शनापेक्षया तु द्वितीयत्वमिति बोध्यम् । (२) आशयापिहिततयेतिपाठे तु सिद्धान्त्याशयस्याज्ञततयेत्यर्थः । (३) दैवादिना प्रागुपजाता वन्हिव्याप्तधूमस्मृतिर्यस्य पुंसस्तस्येत्यर्थः । प्रथमं = पक्षे लिङ्गदर्शनव्यतिरेकेण । (४) अन्यत्र = अनुमाने । (५) प्रथम पर्वते धूमदर्शनं विनापि व्याप्तिस्मृतिसहितधूमेन्द्रियसन्निकर्षादिसकललिङ्गपरामर्शकारणसंपत्तौ सत्यां नित्यसापेक्षताहीने प्रथमं विशिष्टलिङ्गपरामर्शो न जायते इत्यत्र प्रमाणस्योपन्यसितुमशक्यत्वादित्यर्थः ।

एव प्रथमं जायते इति न ततः पश्चादपि धूमदर्शनजं(१)वह्नित्वस्मरणं सम्भवतीत्यर्थः । अभावादयो(२)ऽपि सापेक्षाः सप्रतियोगिकास्तद्विशिष्टप्रतिपत्तिवत् ॥ नन्वभावादिसापेक्षविशिष्टप्रतिपत्तिवत् धूमत्वविशिष्टे स्मृतव्याप्तिवैशिष्ट्यभानं प्रथमधूमज्ञानं विना न सम्भवति, तत्राभावत्वप्रतियोगित्वयोः पूर्वागृहीतयोरप्यवच्छेदग्रहध्रौव्या(३)द्भानमिति वैषम्यं शङ्कते । "नित्ये"ति ॥ धूमविशेष्यकव्याप्तिविशेषणकज्ञानस्य तृतीय(४)लिङ्गपरामर्शरूपस्य प्रथममपि सम्भवान्न वैषम्यमित्याह । "प्रागि"ति ॥ ननु धूमनिर्विकल्पकं तत् सविकल्पकव्यापारकं तत्र कारणमिति शङ्कते । "तत्रे"ति ॥

सू० "नित्यसङ्कुटितार्थवह्निनापि निर्विकल्पकं सविकल्पकोत्पत्तेरविरोधेन त्वदुक्तप्रक्रियानियमे प्रमाणाभावात् । *"नित्यसङ्कुटितेष्वपि निर्विकल्पकं मंस्यते?*- इति चेन्न, कारणान्तरादेव(५)तदुपपत्तौ तत्र निर्विकल्पककल्पनायां प्रमाणाभावात्; "प्रत्युत तत्सङ्कुटनस्य स्वभावानतिरेकोपगमात् । * तथापि "यत्क्रि-

(१) पक्षे प्रथमधूमदर्शनजमित्यर्थः । (२) "अभावादय"- इत्यारभ्य 'विशिष्टप्रतिपत्ति' वदि'त्यन्तः पाठः कैश्चिदाधुनिकैरर्थसुबोधाय 'अभावादीति'-इतिप्रतीकस्थरहितोऽक्षरमेव प्रक्षिप्य प्रदत्तः, परमत्र ग्रन्थेऽनेकत्रैवंविधस्य दर्शनाद्बहूनामनुग्रहस्य व्याख्यातृत्वेन यथाश्रुतोऽपि पाठो नायुक्त इति मन्ये । (३) तत्र = दृष्टान्ते त्वभावविशिष्टाभावत्वस्य प्रागनधिगतस्यैव प्रतियोग्यादिज्ञानमाहात्म्यादनन्तरं भानं तथा प्रतियोगित्वसहितप्रतियोगित्वस्यापि प्रागनधिगतस्यैवाभावरूपावच्छेदकज्ञानमाहात्म्याद्भानमित्याह-तत्रेति । अवच्छेदेति, अवच्छेदग्रहस्य = प्रतियोग्यनुयोग्यादिरूपाभावनिरूपकज्ञानस्य, ध्रौव्याद् = आवश्यकत्वादित्यर्थः । निर्णीतोऽयमेवार्थः कुसुमाञ्जलौ "अवच्छेदग्रहध्रौव्यादध्रौव्यविध्यभावनात्"-इति कारिकायाम्, वक्ष्यते च व्याख्याकारैः समनन्तरमेव, व्याख्याता चेयमस्माभिरपि तत्रैव । (४) तृतीयत्वं वास्तविकम् ।

(५) कारणान्तरात्=प्रतियोग्यादिस्मरणात्, तदुपपत्तौ = अभावादिविशिष्टज्ञानोपपत्तावित्यर्थः ।

ञ्चित्तज्जनकं तदेव तत्रानुमितिकरणमास्ताम् ? *-इति चेन्न, [f]तथेन्द्रियादेरनुमितिकरणत्वापत्तिरित्यलमतिविस्तरेणेति। [f]शब्दश्रोत्रसन्निकर्षस्य च श्रोत्रव्यापारत्वप्रसङ्गात्, [g]तथाच श्रोत्रस्य शब्दप्रतिपत्तावकरणत्वप्रसङ्गात्, सन्निकर्षो हीन्द्रियव्यापार उच्यते इति, [h]व्यापारान्तरं च तस्य क्षणिकमसिद्धम्, [i]स्थिरे चोक्त एव दोषः । * [j]शब्द एव तद्व्यापारः किं न स्यात् ? *-इति चेन्न, तस्य कर्मत्वेन करणकोटिबहिर्भावात् ।

टी० ॥ विशेषणज्ञानान्तराभावे निर्विकल्पककल्पना, प्रकृते व्याप्तिस्मृतिरेव विशेषणज्ञानमिति किं निर्विकल्पककल्पनयेति परिहरति—। [a]"नित्यं"ति। नित्यमकुण्ठितोऽर्थोऽभावसमवायादिः ॥ अभावादिविशिष्टज्ञानेऽपि निर्विकल्पकापेक्षेति मतमालम्ब्य शङ्कते—। [b]"नित्ये"ति । उक्त(१)माचार्यैरपि,—"अवच्छेदग्रहध्रौव्यादध्रौव्ये सिद्धसाधनात्, प्राप्त्यन्तरेऽनवस्थानाम्नो चेदन्योऽपि दुर्जयः"(२)इति॥ "प्रत्युते"ति। अभावादीनामिदमेव स्वाभाव्यं यद्विशिष्टज्ञानमात्रविषयत्वमिति त्वयाऽभ्युपगमादित्यर्थः ॥ ननु परामर्शजनकतया तत्र व्याप्तिस्मृतिरेव करणं स्यादित्याह—। [d]"यत्किञ्चिदि"ति ॥ तथा सतीन्द्रियस्यापि करणत्वसम्भवादनुमितित्वप्रत्यक्षत्वसङ्करापत्तिरित्याह—। [e]"तथे-

(१) एतच्छङ्कासमाधानमुदयनाचार्यैरप्युक्तमित्यर्थः ।

(२) 'दुर्घटः"-इत्यपि पाठः । निरुक्तकारिकार्थस्तु-ननु प्रथममनुपलब्ध्या निर्विकल्पत्वेन विषयीकृत एव घटाभावादिरिन्द्रियेण घटाभाववद्भूतलमिति (घ्राणजसौरभोपनयानन्तरं सुरभिचन्दनचाक्षुषवत्) सविकल्पतया गृह्यते इत्यभावग्रहं प्रत्यनुपलब्धिरेव करणं, नत्विन्द्रियं, तस्याभावेन समं प्रत्यासत्तेरभावात्, विशेषणतायाश्च सम्बन्धान्तरगर्भत्वात् । तथाहि—विशेषणत्वं नाम केनापि सम्बन्धेन कस्मिंश्चिद्वृत्तित्वं, यथा संयोगेन भूतले घटस्य वृत्तित्वं भूतले घटस्य विशेषणता, नचाऽभावो भूतलादौ केनापि संयोगादिसम्बन्धेन वर्तते येन तस्य विशेषणता स्यादित्यत आह—"अवच्छेदे"ति । यन्मतेऽभाव-

न्द्रियादेरि"ति ॥ 'तज्जन्यं तज्जन्यकारणं व्यापार'इति यद्व्यापारलक्षणमुक्तं तत्राव्याप्तिमाह–।[f]"शब्दे"ति । तत्सन्निकर्षस्य समवायस्याजन्यत्वादित्यर्थः ॥ मास्तु सन्निकर्षो व्यापार इत्यत आह–।[g]"तथाचे"ति ॥ व्यापारान्तरमेव श्रोत्रजन्यमस्त्वित्यत आह-।[h]"व्यापारान्तरमि"ति ॥ [i]"स्थिरे" इति । इति । सन्निकर्षरूपे इत्यर्थः॥ [j]"शब्द एवे"ति । श्रोत्रजन्यत्वात् श्रोत्रजन्यशब्दसाक्षात्कारजनकत्वाच्छब्द एवात्र व्यापार इत्यर्थः ॥

सू० * "क्वचित्तयोरेकत्वेपि का क्षतिः?-इति चेन्न, [b]शब्दबुद्धौ कार्यायामुपधायकत्वेन(१)प्रविष्टस्य शब्दस्य करणव्यापारतया करणकोटावपि प्रवेशनेंशतोपि नियम्यनियामकत्वविरोधापत्तेः । * 'घटादिबुद्धौ चक्षुरादेश्चक्षुर्घटादिसंसर्गव्यापारवत्त्वेपि सममिद(२)म् !*–इति चेत्, [l]किं न(३)स्यात् । तथाच—

प्रत्यक्षं प्रति प्रतियोगिज्ञानं कारणं तन्मते ऽवच्छेदग्रहस्य (=प्रतियोगिग्रहस्य) ध्रौव्यात् (=आवश्यकत्वात्) नियमतः प्रतियोगिविशिष्टाभावज्ञानोदयेन न तस्य निर्विकल्पकत्वम्, यन्मते च प्रतियोगिज्ञानमभावप्रत्यक्षं प्रति न कारणं तन्मतेऽवच्छेदग्रहस्य (=प्रतियोगिग्रहस्य)ऽभावबुद्धिं प्रति कारणत्वेनाऽध्रौव्येपि (=अनावश्यकत्वेपि) इन्द्रियादेव तदुत्पत्तिर्भविष्यतीति सिद्धसाधनात् (=अभावबुद्धिं प्रति कारणत्वेन सिद्धस्यैवेन्द्रियस्य कारणत्वेन मयापि वाच्यत्वात्) नानुपलब्धिः करणम् । सिद्धसाधनमत्र प्रतिबन्दिस्थानापन्नं ग्राह्यम् । यदि चाभावीयविशेषणतायाः प्राप्त्यन्तरं (=सम्बन्धान्तर) वाच्यं तदा तस्यापि सम्बन्धान्तरं तस्यापि सम्बन्धान्तरमित्यनवस्थाऽऽपद्येत; तस्मान्न विशेषणतायाः स्वरूपसम्बन्धरूपायाः सम्बन्धान्तरम् । न चेदभावस्याऽधिकरणेन स्वरूपसम्बन्धस्तदाऽनुपलब्धिकरणतावादिभट्टमतेपि अन्यः प्रकारो दुर्घटः, भूतले घटाभावसम्बन्धावगाहिन्याः घटाभाववद्भूतलमिति सर्वानुभवसिद्धप्रतीतेर्वायुरूपवानित्यादिप्रतीतिवद्भ्रमत्वमापद्येतेत्यर्थः ।

(१) उपधायकत्वेन=स्वाकारसमर्पकत्वेन । (२) इदम्=दूषणम् । (३) "किं नः" इत्यपि क्वचित्पाठः ।

'बाधेऽ(१)दृष्टेन्यसाम्यात् किं दृष्टेन्यदपि बाध्यताम्।
क्व ममत्वं मुमुक्षूणामनिर्वचनवादिनाम् ॥ ३३ ॥
तथाहि मिथिलानाथो मुमुक्षुर्निर्ममः पुरा ।
आहेदं मिथिलादाहे न मे किञ्चन दह्यते ॥३४॥ इति ।
'नापि द्वितीयः, लिङ्गपरामर्शस्यानुमितावकरणत्व-
प्रसङ्गात्, निर्विकल्पकस्यापि तस्योपगमे सविकल्प-
कानाश्रयत्वात् ।

टी० ॥ "क्वचिदि"ति । निमित्तसमावेशा(२)दित्यर्थः ॥ "शब्दे"ति। एकस्यैव शब्दस्य कार्यबुद्धिविशेषकतया(३)कार्यत्वं-कारणव्यापारतया च कारणत्वं विरुद्धमित्यर्थः । शब्दप्रध्वंसग्रहे यथाकथञ्चिदुपपत्तावपि शब्दप्रागभावग्रहे नैवमपीति हृदयम् (४) ॥ ननु नियम्यनियामकत्वविरोधः, (जन्यजनकत्वविरोधः) घटादिबुद्धावपि, यतो घटबुद्धिर्जन्या घटेन्द्रियसन्निकर्षो जनक इति घटस्यैव जन्यजनककोटावन्तर्भावादित्याह - । "घटादा"-वि"ति ॥ अनेन विरोधेन सर्वं निवर्तनां नाऽद्वैतवादिनः किञ्चिदनिष्ट-मित्याह । "किन्त्वे"ति ॥ एतदेव स्पष्टयति - । "बाध"इति ॥ तदाश्रयं कारणं व्यापार इति दूषयति - "नापी"ति ॥ "लि-ङ्गे"ति । परामर्शाश्रितस्य व्यापारस्याभावादित्यर्थः ॥ लिङ्ग निर्विकल्पकमपि न करणं, परामर्शस्य तद्व्यापारत्वेनाभिमतस्य तदनाश्रितत्वादित्याह । "निर्विकल्पकस्यापी"ति ॥

(१) बाधे=खण्डनकोटौ । (२) निमित्तसमावेशात्, कर्मकर्त्रोर्यन्निमित्तं तस्यैकत्र समावेशादित्यर्थः । (३) कार्यबुद्धिविशेषकतया = शब्दबुद्धिरूपं यत्कार्यं तस्य विषयविधया व्यावर्त्तकतया, विशेषणतया तत्कुक्षिप्रविष्टतयेति भावः । (४) शब्दप्रध्वंसं प्रति प्रतियोगिविधया शब्दस्य जनकत्वाच्छब्दप्रध्वंसविशिष्टज्ञाने शब्दस्य कथञ्चिज्जनकत्वोपपादनेपि शब्दप्रागभावे प्रतियोगिविधयापि शब्दस्य जनकत्वाभावेन तद्विशिष्टज्ञानेपि न कारणतेत्यर्थः । वस्तुतस्तु शब्दप्रध्वंसज्ञाने शब्दप्रध्वंसः, तत्र च शब्दो न विशेषणं, येन विशेषणे कारणतामादाय विशिष्टेपि स्यादित्यभिप्रेत्योक्तं कथञ्चिदिति ।

मू० [a]अतद्धेत्वाश्रयस्य(१)तद्धेतुव्यापारत्वे चात्यापत्तेः । किंच, फलाव्यभिचारित्वं [b]किं तस्मिन्नेव काले फलसत्त्वनियमः १ उत तदनन्तरं फलसत्त्वनियमः २ नाद्यः, [c]कारणस्य पूर्वभावितायाः अवश्यं वक्तव्यत्वात् । न द्वितीयः, आनन्तर्य्यं यद्यव्यवहितानन्तर्य्यं विवक्षितं [d]तदा यत्किञ्चिद्व्यापारवतः करणत्वपक्षे हस्तादेरकरणत्वापातः, [e]आफलव्यापारवतस्तु तथात्वे कर्त्रादिष्वतिव्याप्तिः । * अथ व्यवहितस्याप्यानन्तर्य्यं विवक्षितं * (२), [f]तथापि यत्किञ्चिद्व्यापाराभिप्रायेन्तरायसम्भवाद्धस्ताद्यव्याप्तिः,आफलव्यापाराभिप्राये च व्यवधानासम्भवात् [g]कारकमात्रं करणमित्युक्तं स्यात् । व्यापारवतश्च तत्फलाव्यभिचारः—इति किं तद्व्यापारस्य फलाव्यभिचारित्वं ?–१ व्यापारविशिष्टस्य वा ?–२ । नाद्यः, हस्ताद्यकरणत्वापातात् । अत एव न द्वितीयः,

टी० ॥ नन्वात्मनिष्ठ एव परामर्शो निर्विकल्पकस्यानुमितिकरणस्य व्यापारः स्यादित्यत आह—। [a]"अतदि"ति । करणाश्रितस्यैव करणव्यापारत्वमुचितं, नतु तत्क्रियाकारणान्तराश्रितस्या(३)पि, तथा सति सहकारिमात्रं करणव्यापारः स्यादित्यर्थः । स चासौ हेतुश्चेति तद्धेतुः ॥ [b]"किं तस्मिन्नि"ति । यदा करणं तदा फलमित्यव्यभिचार इत्यर्थः ॥ [c]"कारणस्ये"ति । समकालयोः कार्यकारणभावाऽभावादित्यर्थः ॥ [d]"तदे"ति । नहि प्राथमिकहस्तव्यापारानन्तरमेव पाकरूपं फलमित्यर्थ. ॥ [e]"आफले"ति । कर्त्तुरपि फलपर्य्यन्तं व्यापारानुवृत्तेरित्यर्थः ॥ [f]"तथापी"ति । हस्तव्यापारे सत्यपि कदा-

(१)अनुमित्यहेत्वात्माश्रितस्याऽनुमितिहेतुनिर्विकल्पकलिङ्गपरामर्शव्यापारत्वे चेत्यर्थः । (२) तथा च न हस्तादावव्याप्तिरिति शेषः । (३) स चासौ क्रियेति तत्क्रिया, तस्याः कारणं करणं, तद्भिन्नाश्रितस्येत्यर्थः ।

चित् फलानुत्पादाद्दृष्टबाधेऽप्यव्यभिचाराभावादित्यर्थः ॥ "कारकमात्रमि"ति । आफलव्यापारानुवृत्त्या कारकमात्रस्यैव फलाव्यभिचारिव्यापारवत्त्वादित्यर्थः ॥

मू० [a]यागादेः स्वर्गाद्यकरणत्वापाताच्च, [b]अपूर्ववाक्यार्थत्ववादिनापि चरमयागस्य फलकरणत्वाभ्युपगमादिति । * [c]अथोच्यते यद्वानेव करोति तत् करणम्, यद्वानेव प्रमिमीते तत् प्रमाणम् * । मैवम्, आत्मधर्मप्रध्वंसादीनामकरणानां प्रमाणत्व(१)प्रसङ्गात् । *येन क्रियाकारणेन युक्त एव प्रमिमीते ? *-इति चेन्न, [d]सुखादिप्रमितौ तत्करणव्यापारस्यापि करणत्वप्रसङ्गात् । * ओम् ? *-इति चेन्न, अव्यापारतयाऽकारकत्वेन तद्विशेषकरणभावानुपपत्तेः ॥ * [e]व्यापारवतापि *-इति चेन्न, [f]एवं हि व्यापारवत एव करणत्वं न स्यात्, नहि व्यापारवतस्तस्य व्यापारान्तरवत्तास्ति।

टी० ॥ [a]"यागादेरि"ति । यागादेश्चिरनष्टत्वेनापूर्वविशिष्टस्य फलाव्यभिचाराभावादित्यर्थ. ॥ ननु मा भूत यागः करणं, नहि यजेतेतिलिङा यागसाधनत्वं बोध्यते किन्त्वपूर्वकार्यत्वमिति नाव्याप्तिरित्यत आह–। [b]"अपूर्वे"ति । कार्यत्वा(२)न्वयान्यथानुपपत्त्या यागसाधनत्वस्यौपादानिकस्य गुरुणापि स्वीकारात्, अन्यथा नियोज्यान्वययोग्यता न स्यादिति तन्मते यागस्याकरणत्वप्रसङ्गस्तुल्य इत्यर्थः ॥ चरम कार्यत्वोपस्थित्यनन्तर(३)मुद्योतकरः करणलक्षणं शङ्कते–। [c]"अथे"ति ॥

(१) निरुक्तप्रमाणलक्षणकरणे सुखादिध्वंसादिमानेवात्मा घटपटादिकं प्रमिमीते इति सुखादिध्वंसादेरपि घटादिप्रमां प्रत्यकरणस्य घटादिप्रमाकरणत्वप्रसङ्ग इत्यर्थः । (२) कार्यत्वस्य = कृतिसाध्यत्वस्य, नियोगे यागनिष्ठकृतिसाध्यत्वं विनाऽन्वयाऽनुपपत्त्या यागसाधनत्वस्य = यागनिष्ठेष्टसाधनत्वस्य, औपादानिकस्य=अर्थापत्तिप्रमाणगम्यस्य, गुरुणापि स्वीकाराद्; अन्यथा नियोगे नियोज्यस्य = कार्यबोद्धुर्नियोज्यनियोजकभावरूपाऽन्वययोग्यता न स्यादिति पङ्क्त्यर्थः । (३) कार्यत्वोपस्थित्यनन्तरमुद्योतकरः चरमं करणलक्षणं शङ्कते-इत्यन्वयः ।

[d]"सुखादी"ति । मनस्तत्र करणं न तु तदात्मसंयोगः, त्वल्लक्षणेन तस्यापि करणत्वप्रसंग इत्यर्थः ॥ [e]"व्यापारवतापी"ति । येन क्रियाकारणेन व्यापारवता युक्तः प्रमिमीते तत् करणमिति लक्षणमित्यर्थः ॥ [f]"एवं ही"ति । व्यापारविशिष्टस्यैव करणत्वात्तस्य व्यापारान्तराभावादकरणत्वं स्यादित्यर्थः ॥

सू०[a] *अथ व्यापारवतो व्यापारांशमपहाय करणत्वं, तत्र चास्त्येवेदं लक्षणं-यस्य करणत्वमस्ति तस्य व्यापारवत्त्वमप्यस्तीति व्यापारवत्करणमुच्यते इति* । न । [b]पटमुद्यम्य निपात्य च प्रक्षालयतः [c]स कर्म्मैव हि करणं स्यात् । [d]किंच, किं(१)तस्य करणत्वम् ? इति लक्ष्यीभूतस्यावश्यं वक्तव्यत्वात् यद्युक्तलक्षणवत्त्वमेव तत् स्यात्तदात्माश्रयापातः स्यात् । *[e]स्वरूपम्?*-इति चेत्, स्वरूपस्य प्रतिकरणं भिन्नतया एकपरित्यागेनापरत्र लक्षणं गतमित्यतिव्यापकं स्यात्, न हि चक्षुषः स्वरूपं श्रोत्रस्येति । [f]किंचैवमिन्द्रियादेः प्रमाणत्वं न स्यात्, अतद्वतोऽप्यनुमात्रादेः प्रमातृत्वात् । *[g]नासौ प्रत्यक्षम्?*-इति चेन्न, [h]नेदमपि हि प्रत्यक्षमात्रस्य लक्षणं भवता क्रियते ।

टी० ॥ व्यापारवत्ता न विशेषणं, किन्तूपलक्षणमिति शङ्कते-। [a]"अथे"ति ॥ [b]"पटमि"ति । यद्वानेव करोतीति लक्षणेन प्रक्षालनक्रियायां पटस्य करणत्वापत्तिः, पटवत एव प्रक्षालनक्रियाकर्तृत्वात् । 'उद्यम्य निपात्ये'त्यनेन पटवत्ता कर्त्तुरुक्ता ॥ [c]"स कर्म्मैवे"ति । स=पटः कर्म्म वस्तुगत्या भवति त्वल्लक्षणेन करणं स्यादित्यर्थः ॥ लक्ष्यतावच्छेदकापरिचये लक्षणमतन्त्रमित्याह-। [d]"किंचे"ति ॥ [e]"स्वरूपमि"ति । स्वरूपं यदि

(१) तस्य=तन्निष्ठं (करणनिष्ठम्) किं करणत्वमिति लक्ष्यतावच्छेदकत्वेन लक्ष्यीभूतस्यावश्यं वक्तव्यत्वादित्यर्थः ।

लक्ष्यं तदा श्रोत्रेऽतिव्याप्तिः, लक्ष्यीभूतस्वरूपातिरिक्ते गतत्वादित्यर्थः ॥ यद्वानेव प्रमिमीते इत्यत्र दोषान्तरमाह–। [f]"किंचे"ति । अनुमितिलक्षणप्रमायां प्रमातुरिन्द्रियवत्त्वनियमाभावादित्यर्थः ॥ प्रत्यक्षप्रमायामिन्द्रियवत्त्वनैयत्यमेवेति न व्यभिचार इति शङ्कते–। [g]"नामाक्षि"ति॥ प्रमामात्रे यदव्यभिचारस्तत् प्रमाणमिति भवतो विवक्षितं, नचेन्द्रियलिङ्गादौ क्वापि तथाऽस्तीति तदसङ्ग्रह एवेति परिहरति–। [h]"नेदमि"ति ॥

सू० [a] * ननु यद्यपीन्द्रियादेर्विशेषतो व्यावृत्तिस्तदापि तज्जातीयकरणमात्रतया तज्जातीयमात्रस्याव्यावृत्तिरेव (१), [b]नह्यनुमित्यादावप्यकरणजातीयवान् प्रमिमीते इति*? । न । [c]करणतया साधारणभावस्याद्यापि निर्णेतुमशक्यत्वात् । [d]*अथ यां प्रमां यद्वानेव जनयति तस्यां तत्करणम्*-इति, मैवम्, कौपीनाच्छादनादेरपि करणत्वप्रसङ्गात् । *[e]यज्जातिकाम् ? *-इति चेन्मैवम्, [f]परोक्षजातीयां प्रमां लिङ्गवानेव शब्दवानेव वा जनयतीतिनियमाभावात्तस्याऽकरणत्वप्रसङ्गात् । [g]*साक्षात्कारित्वानुमितित्वादयो जातिभेदा विवक्षिताः ?*-इति चेन्न, [h]प्रत्येकमुपादाने भागाव्याप्तेः, सम्भूयोपादाने सर्वाव्याप्तेः(२),

टी० ॥ ननु यद्यप्यानुमानिक्यां प्रमायां न चक्षुरादिनैयत्यं तथापि करणजातीयवत्ता कर्तुस्तत्राप्यस्त्येवेति शङ्कते–। [a]"नन्वि"ति ॥ एतदेव स्फुटयति–। [b]"नही"ति ॥ करणत्वासिद्धौ तज्जातीयवत्ता दुर्ग्रहेति परिहरति–। [c]"करणतये"ति ॥ प्रमाव्यक्तौ यद्वत्त्वनियमं शङ्कते–। [d]"अथेति ॥ [e]"यज्जातिकामि" ति । प्रत्यक्षत्वादिप्रमाजातीयजनने कर्तुः कौपीनवत्तानियमो नास्तीति न तत्रातिव्याप्तिरित्यर्थः ॥ एवं सति शब्दलिङ्गयोर-

(१) 'अव्यावृत्तिरेवे'त्यतोऽनन्तरं 'सर्वः करणजातीयस्य तत्र विद्यमानत्वादि'ति हेतुः पूरणीयः । (२) सर्वाऽव्याप्तिः=असम्भवः ।

करणत्वप्रसङ्गः, नहि परोक्षजातीयप्रमाजनने कर्तुस्तदुभयव्यत्वानियम इत्याह—। [f]"परोक्षे"ति ॥ परोक्षत्वं न जातिः किंतु साक्षात्त्वानुमितित्वादय इति त एव विवक्षिता इत्याह—। [g]"साक्षादि"ति ॥ 'यद्वानेव साक्षात्कारिणीं प्रमां जनयती'तिलक्षणे लिङ्गाद्यव्याप्तिः, यद्वानेव सर्वां प्रमां जनयतीतिलक्षणे सर्वाऽव्याप्तिरित्याह—। [h]"प्रत्येकमि"ति ॥

सू० [a]"अनियमेनोपादाने च लक्षणाननुगमापातादिति । *

यदभावात् कर्त्तृकर्म्मणी क्रिया न जनयतस्तत्कारणम्, तेन यदभावात्प्रमातृप्रमेये प्रमां न जनयतस्तत्प्रमाणमिति लक्षणम् ? *—इत्यपि न युक्तम् । किं प्रमातृप्रमेये सती यत्र न जनयतः ? उतासती अपि ? । [b]आद्येऽतीतानागतानुमानादिकरणाव्याप्तिः नापि द्वितीयः, प्रमातृप्रमेययोरपि प्रसङ्गात्; 'यथा हि चक्षुराद्यभावात् प्रमा न जायते तथा प्रमातृप्रमेययोरप्यभावात्, अन्यथा तयोः कारणत्वमेव न स्यात् । [d]एतेन सामान्यतोभिधानं प्रत्युक्तम्, [e]अस्मदादिकर्तृसापेक्षेश्वरकर्तृके चास्मदादिज्ञाने अस्मदादिकर्तृकरणत्वापत्तेः(१) । [f]एवं च सति प्रकारभेदेनापि प्रमाणप्रमात्रादिव्यवस्थासमर्थना कृता न स्यात्,

टी० ॥ यस्यकस्यचिदुपादानेननुगम इत्याह—। [a]"अनियमेने"ति ॥ [b]"आद्ये"इति । अतीतादिस्थले प्रमेयासत्त्वादित्यर्थः ॥ [c]"यथा ही"ति । कारणमात्रव्यतिरेकस्यैव कार्यव्यतिरेकप्रयोजकतया कारणमात्रातिव्याप्तिरित्यर्थः ॥ ननु यदभावात् प्रमातृप्रमेये प्रमां न जनयत इत्येव लक्षणं, न तु तयोः सत्त्वमसत्त्वं वा विवक्षितमित्यत आह—। [d]"एतेने"ति । कारणमात्रातिव्या-

१ अस्मदादेः कर्तुरस्मदादिज्ञाने करणत्वापत्तेरस्मदादिव्यतिरेकेणास्मदादिज्ञानस्येश्वरेणाप्यजननादित्यर्थः ।

त्स्यैवेत्यर्थः ॥ ईश्वरस्य कर्तुरस्मदादिव्यतिरेकेण प्रमानुत्पादकत्वादस्मदादीनामपि करणत्वं स्यादित्याह । ""अस्मदादी"ति ॥ एवं च प्रवृत्तिनिमित्तभेदा(१)दपि करणत्वादिव्यवस्था न स्यादेकेनैव प्रकारेण तदुपपत्तेरित्याह– f"एवं चे"ति ॥

सू० "येनैव रूपेण (कर्तृत्वादिना) तस्य प्रमायामन्वयस्तेनैव तद्व्यतिरेकस्य प्रमानुत्पत्तौ प्रयोजकत्वादिति । * चरमव्यापारवत्त्वं करणत्वम् ? *–इत्यपि न, "व्यापाराभावाल्लिङ्गपरामर्शस्याकरणत्वापातात्। * नच सविकल्पकव्यापारवतो निर्विकल्पकस्य तत्र प्रामाण्यं*, 'केवलविकल्पनीयलिङ्गविषये तदनुपपत्तेः, "संस्कारादिपर्य्यन्तानुसरणे चानुमितेस्तज्जन्यत्वे प्रमाणाभावात्, कार्य्यहेतोश्च कारकाव्यापारत्वात्। 'अपि चाज्ञातकरणत्वापातात् । '*नच लिङ्गमेव परामर्शव्यापारवत्तया करणम् इति युक्तम्*, "अनुमितानुमानादौ (२) परामर्शस्यालिङ्गजत्वेन तद्व्यापारवत्त्वानुपपत्तेः ।

टी० ॥ ननु स्वातन्त्र्यं कर्तृत्वं कर्तृनिष्ठप्रमाव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वं च करणत्वमिति कथं नोपाधिभेद इत्यत आह–। ""येनैवेति । कार्यव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वस्य सर्वकारणसाधारणत्वादिति भावः ॥ कर्त्रादि-

(१) प्रवृत्तिनिमित्तभेदात्=प्रकारभेदात् । (२) अनुमितेति, महत्वं क्वचित्प्राप्तकाष्ठाकं धर्मत्वादित्येवमनुमितेन परममहत्त्वादिना यद् आकाशादावाकाशः सर्वगतः परममहत्त्वादिति सर्वगतत्वाद्यनुमानं तत्र परममहत्त्वस्य हेतोर्न स्वविषयकपरामर्शजनकत्वं, पारिमाण्डल्यात्माऽवृत्तिपरममहत्त्वभिन्नानामेव कारणत्वसाधर्म्यात्, तथा च तत्र लिङ्गस्य परामर्शव्यापारवत्तया करणत्वमयुक्तमिति फक्किकार्थः । यद्वा, प्रत्यक्षात्मकज्ञाने एव विषयस्य कारणत्वेनाकाशीयपरममहत्त्वपरामर्शस्य चानुमित्यात्मकत्वेनाऽप्रत्यक्षत्वान्न तत्र परममहत्त्वलक्षणलिङ्गस्य विषयविधया जनकत्वमिति बोध्यम् ।

व्यापारापेक्षया चरमत्वं विवक्षितं, लिङ्गपरामर्शे व्यापारवत्त्वैव नास्ति कुत्र चरमत्वमिति तदव्याप्तिरित्याह—। [b]"व्यापाराभावादि"ति ॥ "केवले"ति । अभावसमवायादिः केवलमविकल्पकमात्रवेद्यः केवलविकल्पनीय,स्तत्र निर्विकल्पकाभावादित्यर्थः ॥ ननु संस्कार एव ध्वंसो वा परामर्शव्यापारः स्यादित्यत आह—। [d]"संस्कारे"ति । नहि तज्जन्यत्वमात्रं व्यापारलक्षणं, किंतु तज्जन्यजनकत्वपर्यन्तमित्यर्थः ॥ लिङ्गपरामर्शस्य करणत्वेनुमितेरज्ञातकरणतया प्रत्यक्षत्वापत्तिरित्याह । [e]"अपिचे"ति ॥ [f]"नच लिङ्गमेवे"ति । नत्व(१)ज्ञानमेव करणमित्यर्थः ॥ [g]"अनुमिते"ति । आकाशादौ परममहत्त्वादिना सर्वगतत्वाद्यनुमानादौ लिङ्गपरामर्शस्य लिङ्गाजन्यत्वान्न तद्व्यापारकतया लिङ्गस्य करणत्वमित्यर्थ. ॥

मू० "आप्तोक्त्यादिभिस्तत्रासीद्धूम इति प्रतीत्या तदा तत्र वन्हिरप्यासीदिति यदनुमानं तत्रासत्त्वाद्धूमस्य परामर्शव्यापारवत्तया करणताया दूरनिरस्तत्वात् । किंच, यत्किञ्चिदपेक्षया चरमव्यापारवत्त्वस्य सर्वकारकसाधारण्यात्, सर्वकारकापेक्षया चरमव्यापारवत्त्वस्य स्वापेक्षया चरमत्वानुपपत्त्या सर्वत्रासिद्धेः। * कर्त्रपेक्षया * ? इति चेन्न, 'कर्तृधर्मिमात्रापेक्षया विवक्षितत्वे कर्त्तरि प्रसङ्गतादवस्थ्यात्; व्यापारवत्कर्त्रपेक्षाभिप्राये च कर्त्तरि स एव प्रसङ्गः, [d]"एकव्यापारवत्कर्त्रपेक्षयाऽपराऽपरकर्तृव्यापारस्य चरमव्यापारत्वात्. 'यावद्व्यापारवत्कर्त्रपेक्षापक्षे तु विवक्षितमपि करणं न स्यात्. आफलसिद्धेः कर्तृव्यापाराविरामात् ।

टी० ॥ आदिपदग्राह्यमाह—। [a]"आप्ते"ति । आप्तवा-

(१) तद्=लिङ्गम् ।

कयात् स्मरणाद्वा अतीतधूमादिपरामर्शेनातीतवन्ह्याद्यनुमाने लिङ्गस्य व्यापाराभावात्(१)करणत्वमनुपपन्नमित्यर्थः ॥ [b]"स्वापेक्षये"ति । यद्यपि स्वापेक्षयापि स्वव्यापारस्य चरमत्वं सम्भवति तथापि व्यापारविशिष्टस्यैव करणत्वमिति विवक्षित्वेदमुक्तम् ॥ [c]"कर्तृ चर्मे"ति । कर्तृव्यापारस्यापि कर्म्मपेक्षया चरमत्वादित्यर्थः ॥ प्रसङ्गमेव स्फोरयति—[d]"एके"ति ॥ यावत्कर्तृव्यापारापेक्षया चरमत्वं विवक्षितमतो न कर्त्तरि प्रसङ्ग इत्यत आह । [e]"यावदि"ति । फलाव्यवहितपूर्वक्षणपर्य्यन्तं कर्तृव्यापारसत्वात्तदपेक्षया चरमत्वं करणव्यापारस्य नास्तीत्यसंभव इत्यर्थः ॥

मू० [a]व्यापारस्य विच्छेदे तद्धेतुलक्षणप्रक्षीणतापत्तेः । * यद्व्यापारानन्तरं कारकान्तरं न व्याप्रियते तच्चरमव्यापार(२)मिष्टम् ? *-इति चेन्न, [b]सेश्वरपक्षे कर्तृव्यापाराविरमात् तदाऽऽनन्तर्यासिद्धस्तत्करणत्वापातात्, [c]अनीश्वरपक्षे चाक्षयोगादिभिरेव सव्यापारे कर्मण्यपि प्रसङ्गात् । [d]छेद्यादेर्हि करणसंयोगादिव्यापारश्चरम एवेति कुतस्तद्व्यवच्छेदो, [e]हस्ताद्यव्याप्तेश्चेति । * अनन्तरफलं(३)करणम् * ?-इत्यपि न, अविशेषिताऽऽनन्तर्यस्य सर्वकारणसाधारण्यात्, [f]अव्यवहितानन्तर्य्यस्य व्यापार्यपेक्षस्य च(४)यागाद्यव्यापनात्, व्यापारापेक्षस्य च हस्ताद्यव्यापनात्;

टी० ॥ ननु कारकान्तरव्यापारमुत्पाद्य कर्तृव्यापारविच्छेदे सम्भवत्येव कर्तृव्यापारापेक्षया चरमभावी करणव्यापार इति नासम्भवदोष इत्यत आह । [a]"व्यापारस्ये"ति । तर्हि तद्व्या-

(१) लिङ्गस्यैव तथाभावेन तत्सम्बन्धिव्यापारस्याप्यभावादित्यर्थः । (२) चरमव्यापारो यस्यास्ति तच्चरमव्यापारम्, "चरमव्यापारत्वम्" -इति पाठस्तु प्रामादिकः । (३) अनन्तरम् अव्यवहितोत्तरं छिदादिरूपं फलं यस्य तदिति बहुव्रीहिः । (४) चकारो भिन्नक्रमः 'अव्यवहितानन्तर्यस्ये'त्यनन्तरं सम्बध्यते ।

परजननोपक्षीणव्यापारः कर्ता कारणमेव न स्यादन्यथासिद्धत्वादित्यर्थः ॥ [b]"सेश्वरे"ति । अन्त्यतन्तुसंयोगादिलक्षणचरमव्यापारस्यापीश्वरजन्यतया तदीयत्वं, तदनन्तरं (१)च कारकान्तरं न व्याप्रियते इतीश्वरकरणत्वापत्तिरित्यर्थः ॥ [c]"अनीश्वरे"ति । इन्द्रियसन्निकर्षलक्षणकरणव्यापारस्य कर्मसाधारणतया कर्मण्यतिव्याप्तिरित्यर्थः ॥ न केवलं ज्ञानकर्मणि, किंतु छिदादिक्रियाकर्मण्यपीत्याह—। [d]"छेद्यादेरि"ति ॥ [e]"हस्ते"ति । तद्व्यापारस्याचरमत्वादित्यर्थः ॥ [f]"अव्यवहिते"ति । अव्यवहितोत्तरक्षणवर्त्तिफलकत्वम्? अव्यवहितोत्तरक्षणवर्त्तिफलव्यापारवत्त्वं वा तद्विवक्षितम्? आद्ये—"यागादी"ति । अन्त्ये—"हस्तादी"ति ॥

मू० [a]व्यापारपरम्परापेक्षस्य सर्वकारकव्यापनात् । [b]किंच, तत्कार्य्यो यदि(२)क्रियाहेतुस्तद्व्यापार इष्टस्तदेन्द्रियकार्यो लिङ्गपरामर्शोनुमितिक्रियाहेतुरितीन्द्रियकरणिकानुमितिः प्राप्ता । * [c]अथ हेतोः सतः कार्यः क्रियाहेतुस्तद्व्यापारः, तथा सति चानुमित्यहेतोरि-

(१) यद्यपि कदाचिद ईश्वरव्यापारोपरमे एव तदानन्तर्य्यमपि स्यात्तत्वेतदहित "सेश्वरपक्षे कर्तृव्यापाराऽविरमादि"ति मूलोक्तेस्तथा च "तदनन्तरमि"त्युक्तेर्विरोधः प्रतिभाति तथापीश्वरीयसामान्यव्यापारत्वेन तदानन्तर्य्याऽसिद्धिरन्त्यतन्तुसंयोगादितत्तद्व्यापारत्वेन चानन्तर्यावधित्वमिति न विरोधः । मूलेपि च अन्त्यतन्तुसंयोगादिलक्षणचरम व्यापारस्यापीश्वरीयत्वे कर्तृव्यापाराऽविरमादिति हेतुर्बोध्यः, कारकान्तरव्यापारस्य च तदानन्तर्याऽसिद्धिरिति ध्येयम् । व्याख्यान्तराऽभिप्रेतोऽत्र मूलस्य यथाश्रुतोऽर्थस्तु-ईश्वरव्यापारः प्रयत्नरूपस्तस्य नित्यत्वात्तदनन्तरमपि कारकान्तरं न व्याप्रियते तदानन्तर्याभावात्कर्तुरीश्वरस्य करणत्वं स्यादिति (२) यदि तत्कार्यः (= कुठारादिकरणकार्य्यः) क्रियाहेतुः (=फलीभूतच्छिदादिक्रियाहेतुः,-उद्यमननिपातनादिः) तद्व्यापारः (=कुठारादिकरणव्यापारः)-इत्यन्वयः । "यदि क्रियाहेतुस्तद्व्यापारः"-इत्यस्य स्थाने "यत्क्रियाहेतुस्तद्व्यापारः" इति पाठस्तु भ्रमविजृम्भितो ज्ञेयः । यद्वा, यादृशक्रियां प्रति हेतुस्तद्व्यापारः=तादृशक्रियाजनककरणव्यापारा इति तदर्थः ।

न्द्रियस्य कुतः करणत्वं स्यात् *–इति, मैवम् । किं तद्धेतुत्वं यन्नास्त्यनुमिताविन्द्रियस्य ? । * नियतपूर्वभावित्वम् ? *–इति चेत्, अस्ति तावत्पूर्वभावित्वं, नियतत्वमपि यदि कारणतायां प्रयोजकमिच्छसि तदा भवतैव यतितव्यं [d]केनचिद्रूपेणेन्द्रियादेर्नियतत्वं प्रति, [e]अन्यथा लिङ्गेन्द्रियादेः परस्परव्यभिचारादकरणिकैव प्रमा स्यात् ।

टी० ॥ ननु हस्तस्यापि पाकाव्यवहिततेजःसंयोगादिव्यापार एवेति नाव्याप्तिरित्यत आह–। [a]"व्यापारे"ति । कर्त्तृकर्मणोरपि परम्परया तद्व्यापारकत्वादित्यर्थः ॥ अव्यवहितानन्तरफलकव्यापारवत्त्वे करणलक्षणे दोषान्तरमाह–। [b]"किंचे"ति । तज्जन्यस्तद्व्यापारः ? तज्जन्यः सँस्तज्जन्यजनको वा ? उभयथापीन्द्रियस्य परामर्शव्यापारकतयानुमितिकरणत्वापत्तिरित्यर्थः ॥ नन्विन्द्रियस्य परामर्शस्तदा व्यापारः स्याद्यदीन्द्रियमनुमितिजनकं स्यान्नचैवमित्याशङ्कते–। [c]"अथे"ति॥ [d]"केनचिदि"ति । प्रमात्वावच्छिन्नकार्यं प्रति प्रमाणत्वेन कारणतायां प्रमाणजातीयस्येन्द्रियस्यापि प्रमानियतपूर्ववर्तित्वस्य त्वयैवेष्टव्यत्वादित्यर्थः ॥ ननु प्रमामात्रं प्रति प्रमाणत्वेन न कारणता, किं नामेन्द्रियत्वलिङ्गत्वादिनेति नोक्तदोष इत्यत आह–। [e]"अन्यथे"ति । सामान्यावच्छिन्नं प्रति विशेषेण कारणता व्यभिचारान्न सम्भवतीत्यर्थः ॥

मू० [a]मनःसंयोगादेरेव तथात्वे चाप्रमासाधारण्यम् ? [b]अपिचाक्षादेरकरणत्वापातः, यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषस्यैव तद्विशेषे प्रयोजकत्वनियमदर्शनात्; ततो येन केनापि रूपेणेन्द्रियस्य प्रमायां नियतत्वमुपपाद्यते तेनैव रूपेण प्रसङ्गोपपत्तिः । * [c]अथ प्रमात्वे तत् प्रयोजकं, नानुमितित्वादौ *–इविति चेन्न, [d]निरुपाधिकत्वाविशेषेणोक्तार्थाना-

धिक्यात्; समान्यप्रयोजकत्वेन विशेषत्यागानवकाशात्; अन्यथा व्यक्तेरकरणत्वापत्तेः ।

टी० ॥ ननु तथापि नेन्द्रियस्याऽनुमितिकरणत्वं, यतः(१) प्रमात्वावच्छेदेन व्यापकस्य मनःसंयोगस्यैव करणत्वकल्पना, दित्यत आह—। a "मन" इति । प्रमात्वावच्छेदेन मनःसंयोगस्य न कारणत्व किंतु ज्ञानत्वावच्छेदेनैवेति न तस्य प्रमाणत्व, प्रमां प्रत्यसाधारणकारणस्य प्रमाणत्वौचित्यादित्यर्थः ॥ b"अपि चे" ति । इन्द्रियलिङ्गादिसाधारणरूपेण प्रमां प्रतीन्द्रियादेरकरणत्वे साक्षात्कारादिकारणतापि न स्यादिति सामान्येन प्रयोजकतायामिन्द्रियस्यापि तेन रूपेणानुमितिनियतपूर्ववर्तितयाऽनुमितिकारणत्वं स्यादेवेत्यर्थः ॥ सामान्येन रूपेण सामान्यं प्रतिकारणता न विशेषकारणताऽऽपादिकेति शङ्कते— c"अथ प्रमात्वे"इति ॥ कार्यसामान्यकारणसामान्ययोश्चेन्निरुपाधिः सम्बन्धस्तदा विशेषयोरपि स वाच्य ए-ेयुक्तमावर्तते, इति परिहरति—। d"निरुपाधिकत्वेति ॥ अत्र विपक्षे बाधकमाह—। e"अन्यथे"ति । सामान्यावच्छेदेन यत्कारणत्वं तद्यदि विशेषे न स्यात्तदा व्यक्तिः करणं न स्यादित्यर्थः ॥

सू० *अथाऽन्यत्रास्तु यद्वा तद्वा करणं, प्रमा(२)विवक्षितजातिविशेषव्यपदेशकं प्रमाणम् । a"चतस्रः खल्विमाः प्रत्यक्षादिप्रमितयो भिन्नबुद्धिव्यपदेशभाजः, नच प्रमाता प्रमेयं वा तद्भेदहेतुः, प्रमाणानि तु यथायथं चतसृष्वसाधारणानीति भिन्नबुद्धिव्यपदेशनिबन्धनानीति ?* । मैवम् । विवक्षितपदं तावल्लक्षणे भाण्डालेख्य (३) मिव, पुरुषेच्छानामनियतविषय-

(१) "यतः" "कल्पनात्" -इत्युक्तिस्त्वस्य (वक्तुः) सरलस्वभावतां सूचयति ।
(२) प्रमेति, प्रमायां विवक्षिता ये जातिविशेषाः प्रत्यक्षत्वानुमितित्वादयः तद्व्यपदेशकम्=तद्व्यपदेशहेतुरित्यर्थः । व्यपदेशहेतुरित्युपलक्षणं बुद्धिहेतुत्वस्यापि । (३) "भण्डालेख्यमिव ।"-इति तु विद्यासागरसंमतः पाठः तदर्थस्तु यथा भण्डस्य=डिम्भकस्य, आलेख्यं, "पुत्रो न पुत्री ।"-इति, विवक्षावशात्पुत्रपुत्र्युभयपक्षेपि योजयितुं शक्यं तथेत्यर्थः ।

त्वात् [d]अर्थजत्वस्य साक्षात्कारित्वं प्रतीन्द्रियजत्वा-
विशिष्टतयाऽर्थस्यापि करणत्वप्रसङ्गात् । [e]आप्तोक्तौ
कर्तुरपिशाब्दप्रमाजातिविशेषकत्वेनातिप्रसङ्गात् ।

टी० ॥ ननु करणानिरुक्तावपि प्रमाणं सुवचमेवेत्याह—। "अन्यथे"ति ॥ प्रमाजातिविशेषव्यपदेशकत्वमेव स्फुटयति—। "यतस्त्व" इति । तथाच तादृशासाधारणजातिव्यपदेशासाधारणत्व प्रमाणत्वं, भवति हि 'लैङ्गिकी प्रमा' 'शाब्दी प्रमे'ति व्यपदेश इति भावः ॥ [c]"भाण्डालेख्यमिवे"ति । यथाऽऽलेख्यं=रेखोपरेखादि(१)सर्वभाण्ड साधारणं, न भाण्डविशेषलक्षणं, तथा पुरुषाधीनविवक्षाऽपि न विशेषिकेत्यर्थः ॥ ननु विवक्षित-प्रमाजातीयत्वं साक्षात्कारित्वादिजात्यैव विवक्षितं, तथाच तत्तदसाधारणकारणत्वेन लक्षणं न भाण्डालेख्यन्यायमनुहरती-त्यत आह—। [d]"अर्थजत्वस्ये"ति । अर्थः=कर्म, तदपि साक्षात्कारिज्ञाने करणं स्यात्, तस्यापि व्यपदेशकत्वादित्यर्थः ॥ कर्मणयतिव्याप्तिमुक्त्वा कर्त्तरि आह—। [e]"आप्ते"ति । आप्तः=कर्त्ता, शाब्दीं प्रमां प्रत्यसाधारण्येन विशेषक एवेत्यर्थ. ॥

सू० [a]"ओमित्युत्तरे च पूर्वोक्तमिति । [b]"विवक्षितजातिभेदौपयिकत्वेन(२)प्रमित्यसमवायिकारणविशेषकं प्रमाणमि'त्यप्यत एव प्रत्युक्तम् । इति प्रमाकरणनिरुक्तिदूषणानि ।

---

[c]एवं (३)विशेषतोपि प्रमाणलक्षणानि प्रतिवक्तव्यानि ।

---

(१) यद्यपि तत्तद्भाण्डगतं रेखोपरेखादि तत्तद्भाण्डाऽसाधारणमेव तथापि रेखोपरेखाशब्देन तन्निर्मिता हस्त्यादेराकारा ग्राह्याः, ते च सर्वभाण्डसाधारणा एवेति भावः ।

(२) "विवक्षितजातिभेदौपयिकत्वेने"ति, "विशेषकमि"त्यनेनाऽन्वेति ।

(३) ग्रन्थेनैतावताऽखण्डि प्रमातत्करणे तथा ।
तत्प्रसङ्गवशात्प्राप्तं प्रत्यभिज्ञाद्यखण्डि च ॥
तेन मानादिकस्योक्तौ वादिनां यो दुराग्रहः ।
कथास्वावश्यकत्वस्य भञ्जितः खण्डनोक्तिभिः ॥

तथाहि,–"प्रत्यक्षमिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारी"त्याहुः(१) ।

टी ॥ मन्वाप्तेरपि प्रमाणमेव, कथमन्यथा "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादि"ति पारमर्षं सूत्रमित्यत आह–। a"ज्ञेयमि"ति । किमेतमित्यभिधायैव निर्वृतो भवानि"त्यादिना पूर्वमेव बाधकस्योक्तत्वात् । नह्यभ्युपगमाधीनमर्थतथात्वमित्यर्थः ॥ मन्वात्ममनःसंयोगः प्रमित्यसमवायिकारणं, तद्विशेषकं लिङ्गशब्दादिप्रमाणं, तथाच प्रमित्यसमवायिकारणव्यपदेशकं प्रमाणमिति लक्षणमस्त्वित्यत आह ।–b"विवक्षिते"ति । विवक्षान्तर्भावेणैव तदपि भाष्यालेख्यमिव, किन्तु, अर्थस्य=(कर्मणः)कर्तृत्वापत्तेः करणत्वप्रसञ्जकमित्यर्थः ॥

c"एवमि"ति । प्रमाणसामान्यलक्षणदूषणानि कियन्तिचिद्विशेषलक्षणेपि बोद्धव्यानीत्यर्थः यद्वा, । "एवमि"ति खण्डनीयत्वमात्रमतिदिशति, तेन "तथाहीत्य"स्य सङ्गतिः ॥

मू० "किमर्थमिदमुच्यते ? किं सजातीयविजातीयव्यवच्छिन्नतत्प्रतीत्यर्थं ?-१ उत साक्षात्कारित्वप्रतीतये तच्चिह्नोपदर्शनमिदम् ?-२ उत व्यवहारार्थम् ?-३ उत प्रत्यक्षादिशब्दप्रवृत्तिनिमित्तावधारणार्थम् ?-४ उतान्यत्किञ्चिदर्थमेव ?-५ । नाद्यः । तथाहि,-किं 'सजातीये'ति प्रत्यक्षत्वेन साजात्यमपेक्षितं ? रूपान्तरेण वा ? नाद्यः, bतस्माद्व्यवच्छेदावधेः सजातीया-

इति श्रीमदुदासीनवर्य्य श्रीहरिमुकुन्ददासशिष्येण श्रीहरिरामशिष्यशिष्येणाऽधिगतवेदवेदाङ्गादिविविधविद्येन श्रीमोहनलाल-सां० यो० वेदान्ताचार्य्येण प्रणीतायां गर्तमर्दिन्यां सामान्यतः प्रमाप्रमाणखण्डनम् ।

(खण्डनं प्रतिजानीते श्रीहर्षोऽथ विशेषतः ।
मानानां, मानभङ्गार्थं वादिनां मानमानिनाम् ॥)

(१) प्रथमाध्याये प्रथमाह्निके चतुर्थसूत्रे न्यायाचार्या गौतममहर्षय आहुरित्यर्थः ।

दव्यावृत्तत्वे(१)व्यवच्छेदकत्वानुपपत्त्या व्यावृत्तत्व-स्वीकारेणाव्यापकत्वात् । [c]नापि द्वितीयः, विजातीयपदोपादानवैयर्थ्यात् । अस्ति हि प्रमेयत्वादिना सर्वसाजात्यम् । [d]अथ प्रमाणत्वादिना विशेषेण साजात्यं विवक्षित्वेदमुच्यते, [e]तर्हि लक्ष्यस्यापि प्रमाणत्वेन साजात्यात् व्यवच्छेद्यकोटिप्रविष्टतया सङ्ग्राह्यताऽभावप्रसङ्गः ।

टी० ॥ लक्षणस्य व्यतिरेक्यनुमानत्वेन पराभिमतस्य प्रयोजनं खण्डयितुं विकल्पयति । "“किमर्थ”मि"ति । तत्प्रतीत्यर्थं = लक्ष्यप्रतीत्यर्थम् ॥ लक्ष्यलक्षणमात्रखण्डनमपीदं प्रत्यक्षस्य सर्वप्रमाणमूलत्वादिहैव(२)प्रस्तौति—। [b]“तस्मादि”ति । यतः प्रत्यक्षात्प्रत्यक्षं व्यावर्तनीयं तत्रैव लक्षणसत्त्वे व्यावृत्तेरनुपपत्तिः, असत्त्वे तदव्याप्तिलक्षणदोष इत्यर्थः ॥ रूपान्तरेण साजात्यमभिमतमिति खण्डयति—। [c]“नापी”ति । प्रमेयत्वादिना सर्वं सजातीयमेव, तथाच कस्योपग्रहाय विजातीयपदमित्यर्थः ॥ ननु “प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी”ति-सूत्रेण(३)प्रमाणसामान्यं विभक्तं, तथाच प्रमाणत्वेन सजातीयेभ्योऽनुमानादिभ्यो विजातीयेभ्यः प्रमेयसंशयादिभ्यः प्रत्यक्षमनेन लक्षणेन व्यावृत्तं बोध्यते, इति शङ्कते—। [d]“अथे”ति ॥ प्रमाणत्वेन सजातीयाद्व्यवच्छेदो यदि लक्षणफलं तदा स्वस्मादपि व्यवच्छेद एव स्यादिति परिहरति—। [e]“तर्ही”ति ॥

मू० [a] * लक्ष्यस्य यत्प्रमाणत्वादिभिः सजातीयं तद्व्यवच्छेद्यं, न च लक्ष्यस्य लक्ष्यं सजातीयं, षष्ठ्यर्थस्य भेदव्यवहितत्वात् ?*-इति चेत्, [b]एवं तर्हि लक्ष्यापेक्षया भिन्नाद्व्यवच्छेद इत्येवोच्यतां, कृतं प्रमाणत्वादिना साजात्येन प्रकृतानुपयोगिना वर्णितेन, [c]यदा च

(१) प्रत्यक्षलक्षणस्याऽव्यावृत्तत्वे इत्यर्थः । (२) इहैव=प्रत्यक्षस्थल एव । लक्ष्यलक्षणमात्रखण्डनमपि प्रस्तौतीत्यन्वयः । (३) प्रथमाध्याये प्रथमाह्निके तृतीयं गौतमीयं सूत्रम् ।

लक्ष्यादन्यत्वं परेषामवगतं तदा परस्मादन्यत्वमपि लक्ष्यस्यार्थादवगम्यते इति सिद्धमग्रत एव लक्षणप्रयोजनमिति वैयर्थ्यमेव स्यात् लक्षणाख्यानस्येति । अस्तु वा विवक्षावैचित्रीवशात्कथमपीदृशमभिधानं, तथापि [d]"न तावदनेन लक्षणेनानवगतेनैव व्यवच्छिन्नप्रतीतिसम्भवः, अतिप्रसङ्गात् । नापि ज्ञातेन, दुरवधारणत्वात् । न तावदिन्द्रियार्थसन्निकर्षोत्पत्तिः प्रत्यक्षा, [e]अप्रत्यक्षविशेषणत्वात् ।

टी० ॥ ननु स्वयमेव न स्वमज्ञानीयं, किन्त्वनुमानादिना येति नोक्तदोष इत्याह—। [a]"लक्ष्यान्ये"ति ॥ एव सति लक्ष्यभिन्नव्यवच्छेदफलकं लक्षणमित्यवोच्यता सजातीयव्यवच्छेदफलकत्वोक्तिरतन्त्रमिति परिहरन्ति—। [b]"एवमि"ति ॥ ननु तथैवास्तु, तावतापि लक्षण सफलमेवेत्यत आह—। [c]"यदा चे"ति । परेभ्यः प्रत्यक्षस्य भेदं विना परेषां प्रत्यक्षाद्भिन्नत्वमनुपपन्नमित्यर्थवशात्सिद्धमेवैतदभिन्नत्वमित्यर्थः । विवक्षा वैचित्र्य='लक्ष्यभिन्नव्यवच्छेदफलकत्वं समानाऽसमानजातीयव्यवच्छेदफलकत्वं वा लक्षणस्ये'त्यभिधानवैचित्र्यमित्यर्थः ॥ दुरवधारणत्वमेवाह—। [d]"न तावदि"ति ॥ [e]'अप्रत्यक्षे"ति । इन्द्रियस्य तत्सन्निकर्षस्य वाऽप्रत्यक्षतया प्रत्यक्षेण तद्विशिष्टप्रतीत्यनुपपत्तेरित्यर्थः ॥

सू० [a]"नापि कार्येण लिङ्गेन तदनुपपत्त्या वा तदवगमः, [b]ताभ्यां सामान्यतः कारणमात्राक्षेपेण कारणगतानुगतरूपासिद्धा(१)वेकरूपलक्षणाऽसिद्धेः । * [c]कार्यस्यैकजात्यादेकजातीयकारणसिद्धिः ? *-इति चेत्, [d]तर्हि कार्यगतैकजात्यस्य पर्वमवश्यप्रत्येतव्यत्वाङ्गीकारे तत एव सजातीयविजातीयव्यवच्छेदप्रती-

(१) कारणगतस्येन्द्रियार्थसन्निकर्षजत्वार्थजत्वादेरनुगतस्य रूपस्याऽसिद्धावित्यर्थः ।

तिरस्तु, कृतमनया पारम्पर्य्यकुसृष्ट्या(१)। * [c]नन्वेतावतापि न प्रकृतलक्षणखण्डनं भव,त्यव्याप्तेरतिव्याप्तेर्वाऽनुद्भावनात् * । नैवम्, प्रथमभावितयाऽवश्यानुष्ठेयतया वा लघोरुपायात्साध्यसिद्धौ भवन्त्यां चरमभावितयाऽवश्यानुष्ठेयत्वाभावेन च गुरावुपाये प्रवर्तमानस्य तवैवेद दोषोद्भावनं प्रदीपे प्रदीपं प्रज्वाल्य (२)तमोनाशाय यतमानस्येव पुंसः। नहि तस्य दीपान्तरस्य कश्चिद्दोषः, किन्तु तथाकारी पुरुष एव पर्यनुयोज्यः। सर्वसाधनसाधारणोऽयं दोषः यत्सम्भवदेवंविधलघूपायत्वं(३)नाम, स्वरूपासिद्धिरिव(४)सर्वप्रमाणानाम् । तस्मान्मा नाम भूदतिव्याप्त्यादिर्दोषः, सामान्यदोषादेवेदं लक्षणं दुष्टमिति ।

टी० ननु प्रत्यक्षस्येतरभिन्नत्वेन ज्ञानं लक्षणमाख्यमिति तदेव(५)लक्षणे लिङ्ग, तदन्यथानुपपत्तिर्वा लक्षणज्ञापिकेत्यत आह-। [a]"नापी"ति। यद्वा, साक्षात्कारिजातीयं ज्ञानमिन्द्रियार्थसन्निकर्षं स्वकारणमनुमापयिष्यतीत्यत आह-। "नापी"ति ॥ [b]"ताभ्यामि"ति। लिङ्गानुपपत्तिभ्यामित्यर्थः ॥

(१) साक्षात्कारिज्ञानत्वेनेन्द्रियार्थसन्निकर्षजत्वमनुमातव्यं ततश्च तस्य लक्षणत्वं वक्तव्यमिति पारम्पर्यस्य कुसृष्ट्या (=दुरुहतया)कृतमलमित्यर्थः। (२) प्रदीपं प्रज्वाल्य प्रदीपे तमोनाशाय यतमानस्य पुंस इवेत्यन्वयः। (३) सम्भवत्येवंविधो लघूपायो यस्य गुरूपायवतः स सम्भवदेवंविधलघूपायस्तस्य भावस्तत्त्वमिति विग्रहः। सत्प्रतिपक्षवदेवायं सम्भवल्लघूपायोऽपि दोषो बोध्यः। (४) स्वरूपासिद्धिः=स्वरूपतोऽसिद्धिः। सा चाऽनुमितौ स्फुटैव। 'इदं रजतमि'ति प्रत्यक्षेऽपि रजतरूपार्थस्याऽसत्त्वेन, एतद्गृहितसदृशी मदीया गौरित्युपमितेश्चात्यन्तं विसदृशयोः सादृश्यावगाहित्वेन, वह्नौ धूमोपपाद्यत्वभ्रमेण वह्न्यन्यथानुपपत्त्या धूमकल्पनारूपार्थापत्तेरपि वस्तुतोऽनुपपाद्यादनुपपादककल्पनारूपत्वेन च स्वरूपासिद्धिर्बोध्या। (५) तदेव=इतरभिन्नत्वेन ज्ञानमेव

साक्षात्त्वावच्छिन्नकार्यं प्रतीन्द्रियार्थसन्निकर्षत्वेनैव कारणतेति तदेव(१)तेनानुमेयमिति शङ्कते—। [c]"कार्यस्ये"ति ॥ तर्हि साक्षात्कारित्वमेव प्रत्यक्षलक्षणमस्तु, कृतमनुमितलक्षणेने,ति परिहरति[d] ।—"तर्ही"ति ॥ लक्षणदूषणाय प्रवृत्तस्यान्याभिधानमप्रस्तुतमिति शङ्कते—। [e]"नन्वि"ति । प्रथमभावित्वं = लक्षणात् पूर्वमेवोपस्थितत्वम् । अवश्यानुष्ठेयत्व = लक्षणज्ञानार्थमवश्यानुसरणीयत्वम् । लक्षण(२)दोष एवाय यत्सम्भवल्लघूपायत्वं त्वदकौशलस्थापनमुखेनोद्भाव्यते इति परिहारार्थः ॥

सू० [a]'एतेन द्वितीयोऽपि निरस्तः, साक्षात्कारित्वावगममन्तरेण तदवगमानुपपत्तेः; तदवगमाच्चास्य प्रतीतावन्योन्याश्रयप्रसङ्गः । [b]अस्तु वाऽन्यद्(३)पि किञ्चिदिन्द्रियजत्वे लिङ्गं तथापि तदेव(४) साक्षात्कारित्वाविनाभूततया प्रत्यक्षलक्षणमुपन्यस्यतां, सन्निहितप्रतिपत्तिकत्वात् । * 'ननु तद्(५)वश्यं व्यापकं वक्तव्यं, लिङ्गस्य तद्व्याप्यत्वेनैवोपपत्तेः?-इति चेन्न ।

टी० । 'साक्षात्त्वचिह्नोपदर्शनमि'ति पक्षं दूषयति—। [a]"एतेने"ति । साक्षात्कारित्वेनेन्द्रियार्थसन्निकर्षोत्पन्नत्वमनुमेयं, तच्च ज्ञातं सत्साक्षात्कारित्वव्यञ्जकमित्यन्योन्याश्रय इत्यर्थः । यद्यपि साक्षात्कारित्वं प्रत्यक्षमेव तथापीन्द्रियजन्यत्वव्यञ्जकमेवेति भावः ॥ तत्त्वार्थजत्वेनेन्द्रियजन्यत्वमनुमाय तेन साक्षात्त्वमनुमास्यते, इति नान्योन्याश्रय इत्यत आह —। [b]"अस्तु वे"ति ।

(१) तदेव=इन्द्रियार्थसन्निकर्षत्वावच्छिन्नकारणमेव, तेन=साक्षात्त्वावच्छिन्नकार्येण । (२) नन्वेतावतापि सम्भव दोषोऽभिहितो न लक्षणस्येत्याशङ्कायामाह-लक्षणेति । (३), अन्यद् = अर्थजत्वम् । (४) तदेव = अर्थजत्वमेव । (५) तद् = अर्थजत्वं प्रत्यक्षस्य लक्ष्यस्यावश्यं व्यापकम् = अनुगतं लक्षणं वक्तव्यं न च भवति, साक्षात्कारित्वलिङ्गस्य तस्य तद्व्याप्यत्वेन = साक्षात्कारित्वव्याप्यत्वेन साक्षात्कारित्वव्याप्येन्द्रियजत्वव्याप्यत्वेन वा तन्न्यूनदेशवृत्तित्वात् किञ्चिदिन्द्रियजत्वमेवानुगतं लक्षणमित्यर्थः ।

तथाचार्थजत्वमेव प्रत्यक्षत्वे लिङ्गमस्तु, व्याप्यव्यापकस्य सुतरां व्याप्यत्वा(१)दिति किमिन्द्रियजन्यत्वेनेत्यर्थः। सन्निहितप्रतिपत्तिकत्व = प्रथमोपस्थितत्वम्। "अर्थजत्वस्येन्द्रियजत्वेनाविनाभावो गृहीतो, न तु साक्षात्त्वेनेति न वाच्यं *, तुल्यसामग्री(२)कत्वादि"ति भावः॥ नन्विन्द्रियजत्वं सकलप्रत्यक्षव्यापकमिति तदेव साक्षात्कारित्वस्य लक्षणं, नत्विन्द्रियजत्वानुमापकं यल्लिङ्गं तल्लक्षणीभवितुमर्हति, लिङ्गस्य(३) तद्व्याप्यमात्रस्यापि सम्भवेन प्रत्यक्षस्य लक्ष्यस्याव्यापकत्वादिति शङ्कते। "नच तदवश्यमि"ति॥

मू० "यत्र लिङ्ग(४)मव्यापकत्वान्नास्ति तत्रेन्द्रियजत्वस्य प्रमाणाभावात् प्रत्येतुमशक्यत्वेन कथं ततः साक्षात्कारित्वावगमः?। यदा(५)तु क्वचित्प्रत्यक्षजातीये एव प्रमाणाभावादिन्द्रियजत्वमनवधारणीयतया साक्षात्कारित्वव्यापकत्वेनानवगतमपि लक्षणं, तदा किमपराद्धं लिङ्गान्तरेणा(६)व्यापकेन। * 'अथ यत्र तदिन्द्रियजत्वे लिङ्गं नास्ति तत्र लिङ्गान्तरात्प्रत्येतव्यम्? *। 'तथापि तदेवास्तां साक्षात्कारित्वे लिङ्गं, कृतमिन्द्रियजत्वानुमानपूर्वकं तदनुमानकल्पनया। * 'अथ तथालिङ्गद्वयं तत्प्रत्येकमव्यापकतया न लक्षणमिन्द्रियजत्वं तु तथात्वाल्लक्षणम्?*-

(१) प्रत्यक्षत्वव्याप्येन्द्रियजत्वव्याप्यार्थजत्वस्य सुतरां प्रत्यक्षत्वव्याप्यत्वादित्यर्थः। (२) सामग्री = इन्द्रियार्थसन्निकर्षादिरूपा। (३) लिङ्गस्य = अर्थजत्वस्य, तद्व्याप्यमात्रस्य = साक्षात्कारित्वव्याप्यमात्रस्य साक्षात्कारित्वव्याप्येन्द्रियजत्वव्याप्यमात्रस्य चेत्यर्थः। (४) लिङ्गम्=अर्थजत्वम्। तत्र प्रमाणाभावादिन्द्रियजत्वस्य प्रत्येतुमशक्यत्वेनेत्यन्वयः। (५) ननु यत्र प्रत्यक्षजातीयेऽर्थजत्वं लिङ्गं नास्ति तत्र साक्षात्कारित्वव्यापकत्वेनाऽनवगतमेव तत् लक्षणं संपत्स्यत इत्यत आह–यदेति। व्यापकत्वेनाऽनवगतौ हेतुः–'अनवधारणीयतये'ति। (६) लिङ्गान्तरेण = अर्थजत्वेन।

इति चेन्न, [e]साक्षात्कारित्वानुमानस्य लक्षणप्रयोजनस्योभाभ्यामेव सिद्धेः, कृतं व्यापकेन तेन(१) । [f]नापि तृतीयः । स ह्येवंरूपः, यद् इन्द्रियार्थसन्निकर्षजनितं तत् 'प्रत्यक्षमि'ति व्यवहर्त्तव्यमिति । अयमप्यर्थोऽनुपपन्नः, लक्षणस्य ज्ञातुमशक्यत्वात् । साक्षात्कारित्वात्तदवगमे साक्षात्कारित्वमेवास्तु व्यवहारनियमनिदानम्, [g]अव्यवहितप्रतिपत्तिकत्वादित्यावेदितम् ।

टी० ॥ यत्र प्रत्यक्षभागे व्याप्यैकरूपेण तेन(२) लिङ्गेन नेन्द्रियजत्वमनुमेयं तत्राव्याप्तिः स्यादिति परिहरति । [a]"यत्रे"ति ॥ तत्रापि प्रत्यक्षभागे लिङ्गान्तरेणेन्द्रियजत्वमनुमितमिति नाव्याप्तिरिति शङ्कते । [b]"अथे"ति ॥ ताभ्यां लिङ्गाभ्यामाहत्य(३) साक्षात्त्वमेवानुमीयतां किमिन्द्रियजत्वेनेति परिहरति । [c]"तथापी"ति ॥ अनुमानानुमेययोर्विनिगमकत्वमिहेति शङ्कते । [d]"अथे"ति ॥ इदानीमाशयं स्फुटयति । [e]"साक्षात्कारित्वे"ति । साक्षात्त्वप्रतीतिमात्रं लक्षणद्वयोद्देश्यं, तच्च ज्ञानमेवेत्यलमिन्द्रियजत्वानुमानेनेत्यर्थः ॥ व्यवहारसाधकव्यतिरेकिलक्षणमिति खण्डयति । [f]"नापी"ति ॥ [g]"अव्यवहिते"ति । साक्षात्त्वेनेन्द्रियजत्वानुमानं, तेन च व्यवहारानुमानमिति परम्परागौरवमित्यर्थः ॥

सू० [a]अत एव न चतुर्थः, [b]कल्पनागौरवदोषश्चाधिकः । नापि पञ्चमः, [c]तादृशस्य दर्शयितुमशक्यत्वात् । [d]एतेन 'भासमानाकारेन्द्रियसम्प्रयोगजं प्रत्यक्षम'पि निरस्तम् । [e]किञ्च, प्रमाणविशेषलक्षणमिदं प्रमाणलक्षणोपसङ्गृहीतस्य कियतः सङ्ग्राहकं कियतश्च प्रतिक्षेपकं वक्तव्यम् ? प्रमाणलक्षणेन च व्यभिचारिणी

(१) तेन=इन्द्रियजत्वरूपेण लक्षणेन । (२) तेन=अर्थजत्वेन ।
(३) आहत्य=संभूय ।

(१)निवृत्तिः प्रदर्श्यते, तथा सति यथाश्रुतमिदमलक्षणं, व्यभिचार्यपि हि भासमानस्य सत्तादेराकारस्येन्द्रियसंयोगादुत्पद्यते । [f]अथ विशेषाभिप्रायेणेदं लक्षणं वाच्यं, तथाप्यसङ्गतिः । [g]तथाहि,—किं(२)कियन्मात्रभासमानेन्द्रियसम्प्रयोगजत्वं विवक्षितम्?-१ उत यावद्भासमानेन्द्रियसम्प्रयोगजत्वम् ?-२ । आद्ये [h]व्यभिचार्यव्यवच्छेदः,

टी० ॥ [a]"अत एवे"ति । अव्यवहितप्रतिपत्तिकत्वादेवेत्यर्थः ॥ [b]"कल्पने"ति । साक्षात्कारित्वजात्यपेक्षया सखण्डस्येन्द्रियार्थसन्निकर्षजत्वस्य प्रवृत्तिनिमित्तत्वकल्पनायां गौरवमित्यर्थः ॥ [c]"तादृशस्ये"ति । तादृशस्य लक्षणफलस्य दर्शयितुमशक्यत्वादित्यर्थः । [d]"एतेने"ति । लक्षणफलानिर्देशेनेत्यर्थः । यद्वेन्द्रियसम्प्रयोगजत्वस्य दुरवधारणत्वेनेत्यर्थः । भ्रमे रजताद्याकारेण सम्प्रयोगाभावात्तद्व्यावृत्त्यर्थं 'भासमाने'ति ॥ 'इद मद्भुतमि'ति भ्रमस्यापि भासमानसत्ताकारेन्द्रियसम्प्रयोगजत्वादतिव्याप्तिमाह—। [e]"किंचे"ति ॥ ननु सत्तादिभासमानोऽप्याकारो न विशेष, स्तेन चाकारेण(२)भासमानाकारेन्द्रियसम्प्रयोगजत्व विवक्षित, मिति नातिव्याप्तिरित्याह—। [f]"अथे"ति ॥ विशेषाकारमेवादाय विकल्पयति—। [g]"तथा ही"ति ॥ [h]"व्यभिचारी"ति । इदन्त्वलक्षणं विशेषाकारमादाय तथापि भ्रमेऽतिव्याप्तेः, संशयं च वाऽस्तव प्रकारमादायातिव्याप्तेरित्यर्थः ॥

सू० [a]निर्विकल्पासङ्ग्रहश्च । नापि द्वितीयः, विकल्पासहत्वात् । तथाहि,-किं भासमानताविशिष्टस्येन्द्रियसम्प्रयोगः ?-१ उत भासमानतोपलक्षितस्य?-२ । नाद्यः,

---

(१) व्यभिचारिण इत्यतोऽग्रे "ज्ञानस्य"—इति शेषः । (२) किमिति, यत्किञ्चिद्भासमानविशेषाकारेणेन्द्रियसंयोगजन्यत्वमिति प्रथमविकल्पार्थः, यावद्भासमानविशेषाकारेणेन्द्रियसंयोगजन्यत्वमिति द्वितीयविकल्पार्थः । (३) तेन चाकारेण = विशेषाकारेण । भासमानो य आकारस्तेन चक्षुरिन्द्रियसंप्रयोगजत्वमित्यर्थः ।

[b]पूर्वं भासमानत्वाभावात् कारणस्य च पूर्वभावित्वात् । द्वितीये [d]लटोऽविवक्षितार्थत्वं वा ?-१विवक्षितार्थत्वं वा ?-२ । नाद्यः । तथाहि,-"यावद्भासमाना(१)कारेन्द्रियसंयोगजमपि भवति 'घटोयमि' ति विज्ञानं, न चात्मनि प्रत्यक्षम्, [f]आत्मनस्तदीयाविषयत्वात्, प्रमाणस्य च विषयनियतत्वात्, यत्र प्रामाण्यं तत्रैव विषये तद्विशेषस्य प्रत्यक्षत्वस्य वक्तव्यत्वात्। [g]अन्यथा पटास्तित्वे घटोऽयमि'ति प्रत्यक्षं प्रमाणयतः किमुत्तरम् ? । [h]*नन्विदमुत्तरं(२)घटविज्ञानं न पटे प्रत्यक्षं, न हि तदिन्द्रियसन्निकर्षेणोत्पन्नमिति *। [i]तत्किमात्मेन्द्रियसन्निकर्षजं घटविज्ञानमात्मनि प्रत्यक्षमेव ? ।

टी० ॥ [a]"निर्विकल्पके"ति । तत्र निष्प्रकारकतया भासमानस्याकारस्याभावादित्यर्थः । यद्वा(३) सविकल्पकोत्पत्तिकाले इव निर्विकल्पोत्पत्तिकाले प्रकारस्य भासमानत्वाभावादित्यर्थः॥ निर्विकल्पकमेवाधिकृत्याह-। [b]"पूर्वमि"ति ॥ ननु तत्रापि निर्विकल्पकेनैव(४)भासमानतावैशिष्ट्यमस्तीत्यत आह-। [c]"कारणस्ये"ति ॥ [d]"लट"इति । शानच्स्थानस्ये(५)त्यर्थः ॥ यस्य भासमानस्येन्द्रियेण सन्निकर्षाद्यज्ज्ञानं जायते तत्तत्र प्रत्यक्षमिति(६)

(१) भासमानेति, यदाकदाचिद् (अहमस्मीति स्वात्मप्रत्यक्षकाले) भासमाना यावन्त आकारा यस्यात्मनस्तेनात्मनाऽन्यक्षले मनोरूपेन्द्रियसंयोगजमित्यर्थः । (२) "नन्विदमुत्तरम् -इति पाठस्तु विद्यासागराद्यभिमतः । (३) ननु सविकल्पकज्ञाने सप्रकारतया भासमानाकारवन्निर्विकल्पकज्ञाने निष्प्रकारतयैवाकारो भासते इति न तदसङ्ग्रह इत्यस्वरसादाह-यद्वेति । (४) 'निर्विकल्पकेने'ति पद भासमानतावैशिष्ट्यपदैकदेशेन भासमानत्वेनान्वेति तथा च निर्विकल्पकेन भासमानतया सहेन्द्रियस्य वैशिष्ट्यं सम्बन्ध इत्यर्थः । (५) "लटः शतृशानचौ"-इति सूत्रोक्तः शानच् स्थाने यस्य लटस्तस्येत्यर्थः । (६) इति-एवं प्रकारेण, यत्तच्छब्दघटितविशेषोक्तौ तत्पर्य-

विशेषपर्यवसानाय सामान्योक्तावनिष्टं तावदाह-। e"यावदि"ति ॥ ननु नेदमनिष्टमित्यत आह-। f"आत्मन" इति ॥ नन्व न्यविषयस्याप्यन्यत्र प्रत्यक्षत्वं स्यादित्यत आह-। g"अन्यथे"ति॥ घटप्रत्यक्षस्यात्मप्रत्यक्षतापादनाय लक्षणस्य विशेषपरतां पूर्वपक्षिणमङ्गीकारयति-। h"नन्वि"ति ॥ एवं स्थिते स्वाभिमतमापादनमाह । i"नन्विति"ति ॥

सू० a * कथमेवं स्यात्, आत्मेन्द्रियसन्निकर्षाद् घटज्ञानस्योत्पादेऽप्यात्मनोऽनवभासमानत्वात् *-इति चेन्न, b"भासमाने"त्यत्र लटोऽविवक्षितार्थत्वपक्षमाश्रित्येद भवतोच्यते, इति स्मर्त्तव्यम् । अस्ति ह्यात्मनो भासमानत्वं कदाचित्केनचित्, अन्यथाऽप्रमेयत्वप्रसङ्गात् । * 'उक्तलक्षणकं स्वविषये प्रत्यक्षं, न त्वन्यत्रापि' ? *-इति चेन्न । स्वशब्देन यदि ज्ञानमात्रं विवक्षितं तदा dस दोषस्तदवस्थः । अथ ज्ञानव्यक्तिर्विवक्षिता तदा लक्ष्यस्वरूपस्यासाधारणतया तत्परित्यागेन लक्षणस्याऽन्यत्रापि गतत्वादतिव्याप्तिः, व्यक्त्यन्तरस्य लक्षणाश्रयस्यैकव्यक्त्यभिहितलक्ष्यीभूतासाधारणरूपत्वाभावात्(१) । * व्यक्त्यन्तरमपि लक्ष्यमेव, अलक्ष्ये च लक्षणस्य गमनादतिव्याप्तिः * ? इति चेन्न ।

टी० ॥ भासमानत्वं विशेषणमपश्यतस्तद्वेदनापादनमिति शङ्कते-। a"कथमेवमि"ति ॥ लटोऽविवक्षया भासमानत्वं विशेषणं स्वयैवापास्तमिति परिहरति । b"भासमाने"ति ।

वस्तायितुं सामान्योक्तौ=सामान्यतो यावज्ज्ञानमानाकारेन्द्रियसंप्रयोगजत्वोक्ता, वनिष्टमाहेत्यर्थः । यत्तदोरिह सत्वाद्व्यवस्थयभिधायितया विशेषवाचकत्वम् । (१) एकव्यक्त्यभिहितं यल्लक्ष्यीभूताऽसाधारणरूपत्वम्=लक्ष्यतावच्छेदकीभूतधर्मवत्त्वम्, तस्य लक्षणाश्रयेऽलक्ष्यव्यक्त्यन्तरेऽभावादित्यर्थः । यद्वा, एका या लक्ष्यीभूताऽसाधारणरूपा व्यक्तिरभिता तद्रूपताया अलक्ष्यव्यक्त्यन्तरेऽभावादिति सरल एवार्थः ।

एतदनिष्टभयेन[1]यल्लक्षणं विधेयं तत्रातिव्याप्तिरिति परिहाररहस्यम् । वस्तुतो[2]ऽन्यविषयकप्रत्यक्षस्यान्यत्र प्रामाण्यापादनमेव प्रघट्टकार्थः । आत्मप्रत्यक्षत्वस्य घटप्रत्यक्षेति[3]व्याप्तिर्घटानुमित्यादौ प्रत्यक्षलक्षणातिव्याप्तिर्वा न प्रघट्टकार्थः, उपसंहारविरोधात् ॥ ननु स्वविषयकप्रत्यक्ष[4]स्यैव तल्लक्षणं, तथा चान्यविषयकप्रत्यक्षस्यान्यत्र प्रामाण्यापादनं न सम्भवतीत्याशङ्कते– ''उक्तलक्षणकमि''ति ॥ ''न दोष'' इति । 'घटोऽयमि'ति ज्ञानमात्मनि प्रत्यक्षं स्यादित्ययं दोष इत्यर्थः ॥ एकैव व्यक्तिर्यदि लक्ष्यते तदा व्यक्त्यन्तरातिव्याप्तिरित्याह–। ''तद्''ति ॥ अतिव्याप्तिमेव स्फुटयति–। ''व्यक्त्यन्तरस्ये''ति ॥

मू° "यदेकव्यासाधारणस्वरूपं लक्ष्यत्वेन निरूप्यते भवता न तदन्यस्वरूपम्, अतः कथं 'तदपि लक्ष्यमि'त्यपिशब्देनानेकसाधारणीकृत्य समुच्चेतुं शक्यं;यदपि साधारणं रूपं तद्व्यक्त्यन्तरव्यवच्छेदकं स्वविषयपदं विशेषणं प्रक्षिपता भवतैवाऽसाधारणीकृतम् । स्वशब्दस्य ज्ञानमात्रार्थत्वे दोषस्योक्तत्वात्, 'स्व-त्वस्य चानुगतस्वरूपस्य निर्वक्तुमशक्यत्वात् । अन्यथाऽन्यव्यक्तिविषयस्यान्यत्र तथात्वापत्तेः[5] । 'नापि द्वितीयः पक्षः, विकल्पासहत्वात् । किं सम्प्रयोगापेक्षया वर्त्तमानत्वम् ?-१ अथ यत्किञ्चिदपेक्षया ?-२ । प्रथमे विशेषणत्वपक्षान्न विशेष इत्यु-

(१) एतदनिष्टभयेन = भासमानत्वस्य विशेषणत्वे पूर्वोक्तातिप्रसङ्गभयेन, यद् = भासमानत्वोपलक्षितत्वघटितं प्रत्यक्षलक्षणं वक्तव्यं तत्रात्मप्रत्यक्षत्वस्य घटप्रत्यक्षे, घटप्रत्यक्षस्य वा घटानुमित्यादावतिव्याप्तिरित्यर्थः । (२) नन्वेवं सति ''अत एवात्मविषयत्वानुरोधात् त्रिपुटीप्रत्यक्षवादिनि घटज्ञानस्य घटादौ प्रत्यक्षतया प्रामाण्यानुयोगो दुष्परिहरः''–इत्यग्रिमोपसंहारविरोधः स्यादित्यस्वरसात्तात्त्विकं सिद्धान्तमाह–वस्तुत इति । (३) घटविषयकप्रत्यक्षस्यात्मविषयकप्रत्यक्षत्वव्याप्तिरित्यर्थः । (४) स्वविषयकप्रत्यक्षस्य = स्वविषयविषयकप्रत्यक्षस्येत्यर्थः । (५) तथात्वापत्तेः = प्रामाण्यापत्तेः ।

त्कदोषापत्तिः । द्वितीये तु लटोऽविवक्षितार्थत्वमेव स्यात्, [g]व्यवच्छेद्ययोर्भासितभासिष्यमाणयो रपि तदा(१)भासमानत्वस्वीकारात् । * [h]इन्द्रियसंयोगानन्तरं भासमानत्वमपेक्षितम्, अतो विवक्षितार्थत्वम् * ?-इति चेन्न ।

टी० ॥ [a]"यदेकत्रेति । स्वपदमहिम्ना व्यक्तिविशेषमात्रोपस्थितौ 'व्यक्त्यन्तरमपि लक्ष्यमेवे'ति स्वपदभिधानमतन्त्रमेवेत्यर्थः ॥ [b]"दोषस्ये"ति । घटप्रत्यक्षस्यात्मनि प्रामाण्यापोदनलक्षणस्येत्यर्थः ॥ [c]"स्वत्वस्य चे"ति । स्वत्वमपि(२)हि स्वमेव, अन्यथा तत्प्रत्यक्षानुपपत्तेः तथा च स्वत्वे यदि तदेव स्वत्वं तदात्माश्रयः । स्वत्वान्तरं चेत्तदानवस्था, स्वत्वाद्यं च धर्मान्तरं नास्त्येवेत्यर्थः ॥ ननु मा भूत्स्वत्वमनुगतं, किमतः, इत्यत आह-। [d]"अन्यथे"ति ॥ 'भासमाने' त्यत्र लडर्थविवक्षापक्षं दूषयति-। [e]"नापी"ति ॥ [f]"प्रथमे" इति । निर्विकल्पके भासमानताविशिष्टेनेन्द्रियसंयोगजत्वाभावात् तदनुपपत्तेः इत्यर्थः ॥ [g]"व्यवच्छेद्ययोरि"ति । ज्ञानान्तरे भासितस्य भासिष्यमाणस्यात्मन इन्द्रियसंयोगजे घटोऽयमिति ज्ञानेप्यात्मप्रत्यक्षत्वापत्तिरित्यर्थः ॥ [h]"इन्द्रिये"ति । तच्च निर्विकल्पकेप्य(३)स्तीति न तदनुपपत्तिः इत्यर्थः ॥

मू० [a]आत्मनोपीन्द्रियसंयोगानन्तरं भासमानत्वमस्ति । नहि स यदा मनसा गृह्यते तदा नेन्द्रियसंयोगानन्तरम्(४) । * नेन्द्रियसंयोगमात्रं विवक्षितं, किं नाम

(१) तदा = तत्कालापेक्षया तत्कालीनेन्द्रियसंयोगापेक्षयेत्यर्थो वा । (२) स्वविषयकप्रत्यक्षस्यैव लक्षणत्वे स्वयमपि किञ्चिदाह व्याख्याकारः- स्वत्वमपीति, यथा स्वपदार्थता घटपटादीनामेवं स्वत्वमपि स्वपदार्थ एवेत्यर्थः । अन्यथा = स्वत्वस्य स्वपदार्थताऽनङ्गीकारे, स्वत्वप्रत्यक्षे स्वविषयकप्रत्यक्षत्वाभावादव्याप्तिः स्यादित्यर्थः (३) यद्यपि निर्विकल्पके न सविकल्पके इव भासमानत्वं तथापि किञ्चिद्रूपेण भासमानत्वमभिप्रेत्यैतदुक्तम् । (४) 'भासमानत्वम्,-इति शेषः । यद्वा 'अनन्तरमि'ति भावप्रधानो निर्देशः, आनन्तर्यमित्यर्थः ।

यदनन्तरं भासमानतोत्पत्तिः ? *-इति चेन्न, [c]तद्-नन्तरमपि भासमानतोत्पत्तेः । *- [d]भासमानतान्तरं तत्, नत्विदं भासमानत्वम् * ?—इति चेत् [e]न, अव्याप्तिप्रसङ्गात्, एकभासनमात्रऽव्यवस्थितत्वाल्लक्षणस्य । * अथ मन्यसे-यद्भासनं यस्य विषयस्येन्द्रियसंयोगादुत्पन्नं तत्तत्र प्रत्यक्षं प्रमाणमिति निरुक्तौ न दोषः * ?-इति, [f]नैवम् । यद्भासनं 'घटोऽयमि'ति, यस्य विषयस्यात्मन इन्द्रियेण सह सन्निकर्षादुत्पन्नं तद्भासनं तस्मिन्नात्मनि प्रमाणं स्यात् । * नात्मा तस्य विषयः, तत्कथमेवं स्यात् * ?-इति चेत्, नहि भवता तदीयविषयस्येत्युक्तं, किन्तु सामान्यतो विषयस्येति, तेनेद(१)मभिहितम् । यदि तु तदीयताविशेषणमुपादत्ते भवान् तदा यदि तच्छब्देन ज्ञानजातीयमात्रपरामर्शस्तदा स दोषस्तदवस्थः ।

टी० ॥ अविशेषितेन्द्रियसंयोगानन्तरं भासमानतया पर्वदोषानुवृत्तिरित्याह—। [a]"आत्मन" इति । ननु भासमानतोत्पत्तिप्राक्कालत्वेनेन्द्रियसन्निकर्षो विशेष्य इति शङ्कते—। [b]"नेन्द्रिये"ति ॥ विशेषकत्वेन यदभिमतं तदपि साधारणमेवेति परिहरति—। [c]"तदनन्तरमि"ति ॥ इदन्तया विशिष्यमाणं भासनं न साधारणमिति शङ्कते—। [d]"भासमाने"ति ॥ इदन्तागर्भलक्षणमेकव्यक्तिविश्रान्तमित्यव्याप्तिरिति परिहरति—। [e]"ने"ति ॥ यत्तद्विषयशब्दानां साधारण्यात् पूर्वदोषानतिवृत्तिरेवेत्याह—। [f]"नैवमि"ति ॥

मू० यदि तु ज्ञानव्यक्तिविशेषपरामर्शस्तदाऽव्यापकत्वं, प्रतिज्ञानं तच्छब्दार्थस्य भेदात् । नहि यत्त्वं तत्त्वं वा किञ्चिदनुगतं रूपमस्ति । [a]अत एवात्मविषयत्वा-

(१) इदम्=अतिव्याप्तिरूपं दूषणमित्यर्थः ।

नुयोगवत् त्रिपुटीप्रत्यक्षवादिनि पटज्ञानस्य घटादौ प्रत्यक्षतया प्रामाण्यानुयोगो द्रष्टव्यः । तदर्थं (१) 'यदिन्द्रियसन्निकर्षोत्पन्नमि'ति विशेषणप्रक्षेपे यत्तच्छब्दस्यासाधारण्यादव्याप्त्यापत्तेः । यदि तु यच्छब्दतच्छब्दार्थोऽनुगतः स्यात्, पुनरप्यन्यत्र 'घटोऽयमि'-ति ज्ञानस्य प्रत्यक्षत्वेन प्रमाणता प्रसज्येत । *[b] अथा "ऽऽत्मव्यतिरिक्ते" इति विशेषणं प्रक्षिपसि, आत्मविषयस्य प्रत्यक्षता न स्यात् । 'तच्छब्देनानुगतार्थाभिधाने व्यवच्छेदकत्वाभावाद् घटज्ञानस्य पटे प्रत्यक्षतया प्रामाण्यं प्रसज्येत । एतेन "इन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि प्रत्यक्षमि"त्यत्रापि "दोषोऽयमुक्तो द्रष्टव्यः, तादृशस्यापि ज्ञानस्य विषयान्तरे प्रत्यक्षत्वेन प्रामाण्यप्रसङ्गात् ।

टी० ॥ ननु घटप्रत्यक्षमात्मनि प्रमाणमेव, तस्य मिति मातृमेयात्मकपुटत्रयगोचरत्वा,दिति नेदमनिष्टं प्राभाकरनये, इत्यत आह- । "'अत एवे"ति । यत्तदादिसाधारणशब्दबलेन घटप्रत्यक्षस्य पटादौ प्रामाण्य तन्मतेऽपि प्रसक्तमेवेत्यर्थ. ॥ ननु यज्ज्ञानं यस्यात्मव्यतिरिक्तस्येन्द्रियेण संयोगादुत्पन्नं तज्ज्ञानं तत्र प्रत्यक्षमिति विवक्षिते न्यायमतेऽपि न दोष इत्याशङ्क्याह- । [b]"'अथे"ति । तद्(२) आत्मव्यतिरिक्ते विषये प्रत्यक्षमिति वा शङ्का ॥ उभयमतसाधारणं(१) परिहारान्तरमाह- । "'तच्छब्दे-ने"ति ॥ "'दोषोऽयमि"ति । अन्यप्रत्यक्षस्यान्यत्र प्रामाण्यापादनरूप इत्यर्थः ॥

मू० * यस्यार्थस्य सन्निकर्षाद्यदुत्पद्यते तत्तत्र प्रत्यक्षतया

(१ तदर्थम्=अन्यविषयकप्रत्यक्षस्यान्यत्र विषये प्रामाण्यानुयोगवारणार्थम् ॥ (२) तद्=यज्ज्ञानं यदिन्द्रियसंयोगादुत्पन्नं तदित्यर्थः । प्राथमिकोत्थापितशङ्कायामात्मव्यतिरिक्तत्वविशेषण लक्षणकुक्षावुपात्तमिदानीं तु लक्ष्यकुक्षाविति पूर्वस्माद्विशेषः ॥

प्रमाणम् * ?-इत्यभिधाने तु यच्छब्दतच्छब्दसाधारणासाधारणार्थाभिधाने [a]विकल्पोक्तदोषप्रसङ्गः । [b]अव्यभिचारिपदं च व्यर्थं, न हि शुक्तौ रजतज्ञानं रजतेन्द्रियसन्निकर्षादुत्पन्नम् । * [c]संस्कारलक्षणप्रत्यासत्ती रजतेप्यस्ति ? *-इति चेन्न, रजतत्ववैशिष्ट्ये पुरोवर्तिन(२)स्तदभावात् तस्मिन्नेवांशेऽप्रामाण्यं, नतु रजतत्वमात्रे, तस्यान्यत्र सत्त्वात् । [d]अथ साक्षात्कारित्वं प्रत्यक्षलक्षणमुच्यते [e]तदा साक्षात्कारिविभ्रमेपि प्रसङ्गः । * [f]अथाऽव्यभिचारित्वविशेषितं तल्लक्षणमिति वा भेदाग्रहव्यतिरिक्तविभ्रमाभावो वा( ) * ?-इति चेन्न, विकल्पासहत्वात् । किमवगतमिदं लक्षणं [g]फलहेतुः ? अनवगतं वा ? । तावच्चरमः, तदभिधानवैयर्थ्यप्रसङ्गात्; अभिधानस्य ज्ञानोत्पादोपयोगित्वात्, तस्य चानवगतस्यैव फलसाधकत्वाभ्युपगमात् । आद्ये किमन्यस्मादवगमः ? उत त्वदीयाल्लक्षणवाक्यात् ? । यद्यन्यस्मात्, कृतममुना लक्षणाभिधानप्रयासेन, अभिधानस्यास्य ज्ञानोत्पादातिरिक्तप्रयोजनाभावात्, तस्य चान्यत एव सिद्धेः । अन्त्ये किं त्वदभिधानमाप्तोपदेशतया साक्षात्कारित्वं बोधयति ? उत लिङ्गादिभावेन ? । न तावच्चरमः, [h]त्वद्वचनस्य साक्षात्कारित्वाविनाभावादेर्दर्शयितुमशक्यत्वात् । नापि प्रथमः, वादिनं प्रति

(१) प्राभाकरनैयायिकोभयमतसाधारणमित्यर्थः । (२) पुरोवर्तिनः (=पुरोवर्तिशुक्तिनिष्ठे) रजतत्ववैशिष्ट्ये तदभावात् (=संस्कारलक्षणप्रत्यासत्तेरप्यभावाद्) -इत्यन्वयः । (३) "यथा मन्यते, तथा च नातिप्रसङ्गः" -इति शेषः ।

[i]भवत आप्तत्वासिद्धेः। सिद्धौ हि प्रतिज्ञामात्रादेव साध्यसिद्धेर्हेत्वाद्यभिधानमनर्थकं सर्वत्र स्यात्।

टी० ॥ [a]"विकल्पे"ति। साधारण्येऽन्यप्रत्यक्षस्यान्यत्र प्रामाण्यम्। असाधारण्ये प्रत्यक्षान्तरानुपग्रह इत्यर्थः ॥ यत्प दतत्पदपूरणे दोषान्तरमाह—। [b]"अव्यभिचारी"ति ॥ [c]"संस्कारे"ति। अत एव नाननुभूतमारोप्यते इत्यर्थः। यदा(१)रोप्यं न तत्र संस्कारो यत्र संस्कारो न तदारोप्यमिति न संस्कारस्तत्र प्रत्यासत्तिरिति परिहारार्थः ॥ योऽप्यव्यक्तिवृत्तितया सुग्रहं साधारणं(२) च साक्षात्त्वमिति तदेव प्रत्यक्षलक्षणमिति शङ्कते—। [d]"अथे"ति ॥ विभ्रमेप्यनुव्यवसायेन साक्षात्त्वप्रतीतेस्तत्राति-व्याप्तिमाह—। [e]"तदे"ति ॥ न्यायमते प्रमान्यत्वेन विशेष्य, गुरुमते तु सर्वथायाथार्थ्यादविशिष्टमेव लक्षणमिति शङ्कते—। [f]"अथे"ति॥ [g]"फले"ति। इतरव्यवच्छेदो व्यवहारो वा यत्फलं तद्धेतुरित्यर्थः ॥ [h]"त्वद्वचनस्ये"ति। त्वद्वचनं न साक्षात्कारित्वाविनाभूतं, न वा पक्षधर्म्म, इति तेन तदनुमानमनुपपन्नमित्यर्थः। [i]"भवत" इति। लक्षणवादिन इत्यर्थः ॥

सू० [a] अथ मन्यसे, * यः साक्षात्कारित्वमन्यतो जानाति प्रत्यक्षव्यवहारनिदानतया च न जानातीति तं प्रति प्रत्यक्षव्यवहारनिदानत्वमस्य ज्ञाप्यते लक्षणवादिना, तच्चानुमानभावेनैव, नाप्तोपदेशतया, अत एव च लक्षणं केवलव्यतिरेक्यनुमानमाचक्ष्महे; तद्यथा,—श्रावणादिप्रमितयः साक्षात्कारिप्रमितयो वा प्रत्यक्षत्वेन व्यवहर्त्तव्याः, साक्षात्कारिप्रमितित्वात्, न यत् प्रत्यक्षतया व्यवह्रियते न तत् साक्षात्कारि यथाऽनुमितिः, तथा चैताः, तस्मात्तथा। एतदनुमा-

(१) यद् = रजतत्ववैशिष्ट्यम् आरोप्यं न तत्र संस्कारः, यत्र = रजते संस्कारो न तदारोप्यमिति न संस्कारस्तत्र(=रजतत्ववैशिष्ट्ये) प्रत्यासत्तिरित्यर्थः ॥ (२) साधारणम्—निखिललक्ष्यप्रत्यक्षव्यक्त्यनुगतम्।

नप्रतिपादकं च वाक्यं नाप्तवाक्यत्वेन प्रयुज्यते वादिना, किन्तु व्याप्त्यादेः प्रतिपन्नस्यैव स्मारकं पूर्वमप्रतिपन्नस्य वा जिज्ञासोत्पादनद्वारेणेदानीमेव (१)वादिनि प्रमाणोत्पादकमित्युक्तदोषानवकाशः * -इति । न । "प्रत्यक्षतया व्यवहर्त्तव्याः"-इति व्यवहारस्य किं [b]विषयभेदो विशेषः ? उत शब्दभेदः? । आद्ये, [c]यद्यसौ विषयविशिष्टव्यवहारं नाज्ञासीत्, कथं साक्षात्कारिणि तस्यस्वकर्त्तव्यतां(२)लक्षणवाक्याद्प्यवगच्छेत् । नह्यविदिताग्निरनुमानादप्यग्निसंबन्धं बोधयितुं शक्यः । अथाऽज्ञासीत्, [d]तदा ज्ञातज्ञापनवैयर्थ्यात् लक्षणरूपमनुमानं निष्प्रयोजनम् । * अथ सामान्यतो जानात्यस्ति कश्चिद्विषयः प्रत्यक्षव्यवहारस्य, विशेषतस्तु न जानाति, तं प्रतीदमुच्यते ? * । न । किं सामान्यतो निमित्तवत्तां व्यवहारमात्रस्य जानाति? उत व्यवहारविशेषस्य ?। आद्ये [e]प्रकृतानुपयोगः, व्यवहारविशेषस्य चिन्त्यमानत्वात् । द्वितीये किंकृतोऽयं व्यवहारस्य विशेषः ?-इति विकल्पितपक्षानुप्रवेशमन्तरेण न निस्तारः । एतेन सर्वस्यैव । लक्षणस्य स्वीकारः परास्तनीयः । तथाहि,—

नाऽत्याप्त्या प्रमामात्ते तेऽर्थाः स्वीक्रियोचिताः ।
[f]तद्धियस्तदुरीकारे स्वाश्रयं कश्चिकित्सतु ॥ ३५ ॥

टी० ॥ ननु लक्षणवाक्यमाप्तवाक्यत्वेन नोपयुज्यते, किन्तु

(१) इदानीमेव = अनुमानवाक्यप्रयोगकाले एव । वादिनि = प्रतिवादिनि, श्रोतरीतियावत् । प्रमाणोत्पादकम् = प्रमीयतेऽनेनेति प्रमाणं स्वाभिज्ञानं तदुत्पादकमित्यर्थः ॥ (२) स्वकर्त्तव्यताम् = स्वकृतिजनकेच्छाजनकज्ञानेन ज्ञेयताम्, ज्ञानस्य कृतिसाध्यत्वाभावात् ॥

परार्थानुमानत्वेन, तस्य(१) च पूर्वानुभूतव्याप्तिस्मारकत्वं जिज्ञासोत्पादकत्वमात्रं वा फलं, तथा च नोक्तदोष इति शङ्कते-। [a]"अथे"ति ॥ [b]"विषयभेद" इति । प्रत्यक्षत्वलक्षणो व्यवहारविषयः ? (२)प्रत्यक्षशब्दाभिधेयत्वमात्रं वा व्यवहारविशेषः ? इति विकल्पार्थः ॥ 'व्यवहर्त्तव्या' इतिप्रैषात्(३) व्यवहारविशेषं तदा स्व कर्त्तव्यतयानुमापयेद्यद्यसौ प्रतीतचरः स्यादन्यथा साध्याऽसिद्ध्या व्याप्त्यग्रह एवेत्याह-। [c]"यद्यसावि"ति ॥ सिद्धसाधनमाह-। [d]"तदे"ति ॥ विषयविशेषाङ्कितव्यवहारकर्त्तव्यत्वे साध्ये सामान्यज्ञानमतन्त्रमित्याह-। [e]"प्रकृते"ति । अत्याप्तिः=अतिप्रसङ्गः, पटप्रमातोऽपि घटप्रसिद्धिलक्षणः ॥ घटविशेषितप्रमातो घटसिद्धौ विशिष्टप्रविष्टात् घटादपि घटसिद्धिरित्यात्माश्रय इत्याह-। [f]"तद्धिय" इति ॥

मू० [a]अथान्यः स विशेषश्चेत्तद्धीत्वं कश्चिदिष्यते ।
[b]दत्तः साकारवादाय विष्टरः(४) स्पष्टमेव तत् ॥३६॥
[c]अर्थादुत्थास्नवो(५)धर्म्मा नानुमात्वादयो यथा ।
तद्धीत्वमपि तद्वत् स्या(६)दित्यर्थोऽनर्थमाविशेत्॥३७॥
[d]सोऽपि(७)वा धीविशेषः किं स्वीकार्य्यस्तद्धियं विना ? ।
एवं च सोऽपि सोऽपीति नान्तः सोपानधावने ॥ ३८ ॥
[e]समस्त(८)लोकशास्त्रैकमत्यमाश्रित्य नृत्यतोः ।

(१) तस्य = परार्थानुमानस्य ॥ (२) व्यवहारस्य ज्ञानात्मकत्वाभिवदनात्मकत्वाभ्यां द्वैविध्याद् "व्यवहर्त्तव्याः"-इत्यत्र ज्ञानात्मकं व्यवहारमादाय तस्य विषयः प्रत्यक्षत्वलक्षणो ग्राह्यः ? उत प्रत्यक्षशब्दाभिधेयतामात्रमादायेत्यर्थः ॥ (३) प्रैषः = विधिः ॥ (४) विष्टरः = आसनम् ॥ (५) उत्थास्नवः = उत्थानशीलाः । (६) तद्वत्स्यात् = अर्थादुत्थितं न स्यादित्यर्थः ॥ (७) सोऽपि धीविशेषः=घटधीविशेषः, किं तद्धियं घटधीविषयकधियम् विना स्वीकार्य्यः ? "नैव स्वीकार्य्यः"-इत्यर्थः, एवं च सोऽपि सोऽपि घटधीधीगोचरधीविशेषादिरपि स्वस्वगोचरधियं विना नैव स्वीकार्य्य इति सोपानपरम्पराधावनेऽनवस्थेत्यर्थः । (८) पूर्ववादी शङ्कते-समस्तेति । तत् = तस्मात् समस्तलोकशास्त्रयोरैकमत्यमाश्रित्य नृत्यतोः = भाषमाणयोस्तत्तद्वस्तुव्यवहारतत्सङ्कीर्णव्यवहारयोः का गतिरस्तु इत्यर्थः ।

का तदस्तु गतिस्तत्तद्वस्तुधीव्यवहारयोः ? ॥ ३९ ॥
उपपादयितुं(१)तैस्तैर्मतैरशकनीययोः ।
अनिर्वक्तव्यतावादपादसेवागतिस्तयोः ॥ ४० ॥

नापि(२)द्वितीयः । तथाहि,-अयमनुमानार्थः स्यात्, श्रावणादिप्रतिपत्तयः प्रत्यक्षशब्दाभिधेयाः, साक्षात्कारित्वादित्यादिः, सोऽपि न ।

टी० ॥ ननु घटधीत्वमित्यत्र घटो न विशेषणं येनात्माश्रयः स्यादपि तु घटेन्द्रियसन्निकर्षजे ज्ञाने घटधीत्वं नाम स कश्चिद्विशेषो येन घटसिद्धिरिति शङ्कते । ""अथान्य" इति ॥ एवं सति घटोऽपि ज्ञानाकारप्रविष्ट(३)स्यादिति वा, घटाकारकादाचित्कत्वाद्घटलक्षणविषयसिद्धिरिति वा, साकारवादाभ्युपगमः स्यादिति परिहरति-। ""दत्त" इति । तथाचापसिद्धान्त इति भावः ॥ ननु नार्थाधीनं घटधीत्वं, किन्त्वनुमितित्वादिवत्कारणान्तराधीनं, तथाच नाकारकादाचित्कत्वात् घटसिद्धिरिति न साकारवाद इत्याह-। ""अर्थादि"ति । इतिशब्दानन्तरं 'यदा, तदे'त्यध्याहार्यम् । अर्थो घटादिरनर्थं = सङ्कटं प्रविशेन्न सिद्ध्येदित्यर्थः । अर्थानधीनघटधीत्वस्यार्थं प्रत्यतन्त्र-

(१) सिद्धान्ती समाधत्ते-उपपादयितुमिति । तैस्तैर्मतैरुपपादयितुमशकनीययोस्तयोः (= तत्तद्वस्तुधीव्यवहारयोः) अनिर्वक्तव्यतावादपादसेवागतिः-इत्यन्वयः । (२) 'प्रत्यक्षतया व्यवहर्तव्याः' इत्यत्र प्रत्यक्षशब्दाभिधेयत्वमात्रं व्यवहारविशेषो ग्राह्य इति द्वितीयं पक्षं खण्डयति-नापीति । (३) यदि बाह्यार्थवादी नैयायिकादिरास्तिकः शङ्ककस्तदा तं प्रति "ज्ञानाकारप्रविष्टः स्यादि"ति प्रसञ्जनम्, यदि तु विज्ञानवादियोगाचारः शङ्ककस्तदा तं प्रति "घटलक्षणविषयसिद्धिरि"ति प्रसञ्जनमिति विभागः । तत्र घटधीत्वस्य घटधियां वृत्तित्ववत्तद्विशेषणीभूतघटेऽपि वृत्तित्वेन घटस्य घटधीरूपज्ञानरूपे प्रविष्टत्वम् । तथाच घटाकारस्य घटधीत्वस्य कादाचित्कत्वेन घटात्मकविषयनियतत्वं वक्तव्यम् (अनियतत्वे हि घटधीत्वस्य सार्वदिकत्वप्रसङ्गः) इति घटाकारकादाचित्कत्वान्यथानुपपत्त्या तदतिरिक्तस्य घटरूपविषयस्य सिद्धिरिति हृदयम् ।

स्या(१)दिति भावः । यद्यपि(२)घटप्रमातोऽन्या न घटसिद्धिः, किन्तु घटप्रमैव स्वरूपमती घटसिद्धि,स्तथापि विशेषाभावात्स, घटसिद्धिरेव किं न स्यादिति हृदयम् ॥ यद्वा, अनेनैवाशयेनाह—[d]"सोपी"ति । 'घटधीर्घटसिद्धिरि'ति तद्गोचर(३)ज्ञानान्तरनिर्वाह्यमिति तत्रतत्र प्रसङ्गेऽनवस्थेत्यर्थः ॥ न स्तुगोचरधीव्यवहारयोः सर्वेषां लोकानां शास्त्राणां च सम्प्रतिपत्तिमात्रं, विचारतस्तु तयोरुपपादनमशक्यमित्याह—।[c]"समस्तेति ॥

मू० यद्यसाक्षात्कारिण्यनुमानादौ तच्छब्दाप्रयोगमात्रात् (४)साक्षात्कारिणि तच्छब्दप्रयोगः क्रियते [a]तर्हि शशविषाणजबगडदशादिशब्दप्रयोगोपि साक्षात्कारिणि कर्त्तव्य एवाविशेषात्(५) ।* अथ जबगडदशादिशब्दाः सामान्यतोर्थवत्तया न प्रसिद्धाः, क्वचिदप्रयोगात्; शशविषाणादिशब्दा असद्विषया एवेति प्रसिद्धाः, प्रत्यक्षादिशब्दास्तु सद्विषयवत्तया सामान्यतः सिद्धाः, प्रत्यक्षमस्तीत्यादिप्रयोगदर्शनाद्;-इत्यस्तिविशेषः *, -इति, मैवम्, [b]एतेनापि विशेषेण चाक्षुषादिशब्दानामव्यवच्छेदात् तेषामपि साक्षात्कारि प्रमामात्रे प्रयोगप्रसङ्गः । * [c]साक्षात्कारित्वे सत्यपि श्रावणादौ चाक्षुषादिशब्दानामप्रयोगो, न त्वेवं प्रत्यक्षादिशब्दानामिति विशेषः * ?-इति

(१) अर्थं प्रत्यक्षत्वात्=अर्थाऽसाधकत्वात् । (२) ननु घटरूपाऽर्थानधीनत्वेपि घटधीत्वस्य घटधीरूपाऽर्थाधीनत्वमस्त्येव, घटधीरेव च घटसिद्धिः, तथाच तत्साधकत्वे कथं घटाऽसाधकत्वमित्याशङ्क्याह—यद्यपीति । (३) तद्गोचरेति, घटधीविषयकज्ञानान्तरेण ज्ञेयमित्यर्थः । एवं तत्रतत्र=घटधीगोचरज्ञानादावपि,प्रसङ्गे=ज्ञानान्तरग्राह्यत्वप्रसङ्गेऽनवस्थेत्यर्थः । (४) तच्छब्दाऽप्रयोगमात्रात्=प्रत्यक्षशब्दाप्रयोगमात्रात् । (५) अविशेषात=अनुमानाद्यवाचकत्वस्य शशविषाणादिशब्देपि तुल्यत्वात् ।

चेत् [d]"एवं तर्हि 'यत्र साक्षात्कारित्वं नास्ति तत्र प्रत्यक्षशब्दप्रयोगो नास्ति, यत्र साक्षात्कारित्वमस्ति तत्र सर्वत्रास्ती'ति यो जानीते तं प्रति लक्षणाभिधानमिति स्यात्,

टी० ॥ अनुमानाद्यवाचकत्वं यदि प्रत्यक्षवाचकत्वे तन्त्रं, तत्राह–।[a]"तर्ही"ति ॥ अथ सद्वाचकत्वे सत्यनुमानाद्यवाचकत्वं, तत्राह–।[b]"एतेनापी"ति । चाक्षुषादिशब्दानामनुमानाद्यवाचकत्वे सति सद्वाचकत्वमस्तीति तेषामपि साक्षात्कारित्वेन प्रवृत्तिनिमित्तेन प्रत्यक्षवाचकत्वं स्यादित्यर्थः ॥ चाक्षुषादिशब्दे साक्षात्त्वं न प्रवृत्तिनिमित्तं तस्मिन्सत्यपि श्रावणादिप्रतिपत्तौ तदप्रतिपत्तेरिति शङ्कते–।[c]"साक्षादि"ति ॥ एवं सत्यन्वयव्यतिरेकाभ्यामेव तत्पदाभिधेयत्वसिद्धिरिति लक्षणोपन्यासप्रयासवैफल्यमिति परिहरति । [d]"एवमि"ति ॥

सू० स च व्यवहारान्तरवदन्वयव्यतिरेकाभ्यामेव वाच्यवाचकभावमवधारितवानिति व्यर्थं लक्षणम् । [e]"एतेनानुमित्यादिव्यवच्छिन्नतया व्यवहर्त्तव्यमित्युक्तानुमानमाध्यतयाभिधीयमानमपास्तं वेदितव्यम् । * पूर्वप्रतिपन्नमेव(१)वाच्यवाचकभावं लक्षणाभिधानेन स्मार्यते?×—इति चेन्न, [f]अवगतसमयस्य(२)प्रत्यक्षशब्दादेव तत्स्मरणसम्भवात् व्यर्थता लक्षणाभिधानस्य स्यात्। 'अवगतशब्दार्थसंबन्धः शब्दादेव स्मरतु यदि लक्षणेन स्मार्यते, तदा लक्षणवाक्यगतपदकदम्बार्थस्मरणार्थमपि लक्षणमभिधानीयमविशेषाद्, एवं तल्लक्षणवाक्येपीत्यपर्यवसानं स्यात् । *[g]ननु प्रतिवादिनं

---

(१) पूर्वं प्रतिपन्नो ज्ञातो यो वाच्यवाचकभावस्त प्रत्येव पुरुषो लक्षणाभिधानेन लक्षणवादिना स्मार्य्यते इत्यर्थः । (२) अवगतो ज्ञातः समयो=वाच्यवाचकतासम्बन्धो यस्य पुंसस्तस्येत्यर्थः ।

प्रति लक्षणाभिधानं नार्थवत्, तेन वाद्याप्तभावानङ्गीकारात्, किन्तु शिष्यार्थं लक्षणमुच्यते शास्त्रे, स(१) हि शास्त्रस्य कर्त्तारमाप्तमेव मन्यते, तस्माच्छिष्यं प्रत्याप्तवचनत्वेनैव लक्षणवाक्यमर्थं प्रतिपादयिष्यति गुरुणा गीयमानं,–'यस्त्वया साक्षात्कारिशब्दार्थः प्रतीतः स एव प्रत्यक्षशब्दार्थः(२)?-इति चेन्मैवम्। यदि वादिनं प्रति न शास्त्रं किन्तु शिष्यं प्रति, तदा प्रतिज्ञामात्रादेवाप्तवचनात् शिष्यस्यार्थनिश्चयोत्पत्तेर्हेत्वाद्यभिधानमनर्थकमापन्नं शास्त्रे। अथ*भवतु (३)तत्प्रतिवादिनमपि प्रति शास्त्रे वाक्यं यत्र हेत्वाद्युपात्तं, लक्षणवाक्यं तु शिष्यमेव प्रति प्रयोजकं, प्रतिपन्नशास्त्रकाराप्तभावम्-* इति मन्यसे,

टी० ॥ "'एतेने"ति । अन्वयव्यतिरेकसिद्धत्वेनेत्यर्थः ॥ "'अवगते"ति । शब्दान्तरवदित्यर्थः ॥ ननु लक्षणाधीनं वाचकत्वस्मरणं प्रयोजकम्, नत्वन्यदित्यत आह-। "'अवगते"ति ॥ 'वादिनं प्रति भवन आप्तत्वासिद्धेरि"ति पूर्वोक्तं शङ्कते-। "'नन्वि"ति॥ शिष्यं प्रति लक्षणाभिधानप्रकारमाह -। "यस्त्वये"ति॥ "'किन्त्वि"ति । उपनिषन्न्यायेनो(४)पदेशमात्रं शास्त्रमस्तु, किं लिङ्गाद्युपदर्शनेनेत्यर्थः ॥

मू० तदप्यनुपपन्नम्, शास्त्रान्तरसाध्यत्वादस्यार्थस्य । अस्ति शास्त्रं समयस्य ग्राहकं मुनिभिः प्रणीतं नामलिङ्गानुशासनव्याकरणादि । यदि च शास्त्रान्तरसाध्योऽर्थो भवदीयशास्त्रस्य विषय, स्तर्हि प्रकृतिप्रत्य-

(१) सः = शिष्यः । (२) अन्नैकमन्यदितिपदमध्याहर्तव्यम् । (३) अथ यत्र हेत्वाद्युपात्तं तद्वाक्यं प्रतिवादिनं प्रत्यपि शास्त्रे भवत्वित्यन्वयः । (४) उपनिषन्न्यायेन=उपनिषद्दृष्टान्तेनराजाज्ञाभ्युक्तिनिरपेक्षमित्यर्थः ।

यविभागेन साधनमपि शब्दानां कुतो न व्युत्पाद्य व्यवस्थाप्यते? लिङ्गं वा शब्दानां कुतो नाभिधीयते? तदज्ञानेपि पराजयो जायते एव। अथवाऽस्तु व्याकरणादिविषयं विहाय नामव्युत्पादनं कथमपि भवच्छास्त्रविषयः, तदापि न्यूनतरत्वमस्मिन्विषये भवदीयशास्त्रस्य। बहूनि नामानि विद्यन्ते कोशान्तरवर्त्तीनि,कुतो(१)न व्युत्पादितानीति। *अथास्मिन् शास्त्रे येषांशब्दानामुपयोगस्तेषामनेन व्युत्पादनं, न सर्वेषाम्*-इत्युच्यते तथापि यथैकवाक्यगतस्य पदस्य लक्षणव्युत्पादनम् एवं तल्लक्षणवाक्यगतपदस्यापीत्यपर्यवसानमापतितं शास्त्रस्य,तत्तल्लक्षणवाक्यप्रयोगे एव तेषां तेषां पदानां शास्त्रे जातोपयोगत्वात्। *अथ नानालक्षणप्रणेतॄणां वादिनां विप्रतिपत्तेः प्रत्यक्षादिशब्दाथ एव व्युत्पाद्यते संशयनिरासाय नान्योऽसंशयत्वात् *-इति मन्यसे, तथाप्यनुपपत्तिः। अस्ति हि 'वादीनामर्थे वाच्यताद्योत्यताविवादः(२), "अस्ति च छिदुरादिपदानामर्थे कर्मकर्त्तृत्वाकर्म्मकर्तृत्वे विवादः, अस्ति च भावशब्दस्य स्वरूपसत्त्वसत्तासामान्याद्यर्थत्वे(३), अस्ति चाऽधिकरणशब्दार्थस्य पतनप्रतिबन्धकत्वसमवायित्वादौ, एवमन्यस्मिन्नपि बहौ पदार्थे जाग्रति विप्रतिपत्तयः(४) तत्तल्लक्षणानिकस्मान्नोक्तानि?।

(१) 'कुतः'-इत्यतः प्राक् 'तान्यपि'-इत्यध्याहरणीयम्। (२) निपातानां वाचकत्वं नैयायिकमते, द्योतकत्वं वैयाकरणमते ज्ञेयम्। (३) भवन्तीति भावाः-इतिव्युत्पत्त्या तत्तद्वस्तुस्वरूपसत्त्वार्थत्वं; भवनं भाव इति व्युत्पत्त्या च सत्तासामान्यार्थत्वम्। भाव इति प्रयोगश्चौरादिकस्य। (४) विप्रतिपत्तयो जाग्रतीत्यन्वयः, "जाग्रति"-इति बहुवचनान्तं क्रियापदम्।

टी० । a"अस्यार्थस्ये"ति । वाच्यवाचकत्वव्युत्पादनस्येत्यर्थः ॥ तदेवाह-। b"असतो"ति ॥ "वादीनामि"ति । वाशब्दादीनामित्यर्थः ॥ d"असतो"ति । "विदिभिदिच्छिदेः कुरच्" इति सूत्रविहितकुरच्प्रत्ययस्य कर्मकर्तरि कर्तरि मात्रे वाऽनुशासनमिति सन्देहः, प्रयोगद्वैविध्यदर्शना(१)दित्यर्थः । यद्यपि यावतां पदार्थानां तत्त्वज्ञानं निःश्रेयसहेतुस्ते एव लक्षणतः परीक्षातश्च शास्त्रे निरूपणीयाः, इति नायमुपालम्भो(२)घटते, तथापि तदप्येतावतामेवेति न नियामकमिति भावः ॥

सू० तदास्ताम् "एकत्र विस्तराभिनिवेशः । किञ्च तत्साक्षात्कारित्वम् ? ।* सविशेषार्थप्रकाशत्वम् ?(३)*-इति चेन्न । bसविशेषत्वस्योपलक्षणत्वेऽनुमानादिव्याप्तिः। 'विशेषणत्वे च यदि विशेषशृङ्खलाया "विश्रान्तिस्तदा(४)शेषविशेषस्य बोधे प्रत्यक्षलक्षणक्षीणत्वेनाऽऽमूलमप्रत्यक्षत्वापातः । यद्यविश्रान्तिस्तदा तादृशस्यैव व्याप्तिग्रहादनुमायामपि तादृशसिद्धिरिति साक्षात्कारित्वापत्तिः । */अथाननुगमात्तत्र न तदनुमा*, "तर्हि तदनुगतप्रतीत्याद्यनुपपत्तिः ।

टी० ॥ a"एकत्रे"ति । प्रत्यक्षादिलक्षणमात्रे इत्यर्थः ॥ b"सविशेषत्वस्ये"ति । सह विशेषेण रूपित्वादिना तार्णत्वाऽतार्णत्वादिना वा वर्त्तमानस्य वह्न्यादेरनुमानादिनापि प्रतीतेरतिव्याप्तिरित्यर्थः ॥ विशेषेण सहैव भानं यदि विवक्षितं,तत्राह-c"विशेषणत्वे चे"ति। अनवस्थाभयेन यस्य विशेषस्य सविशेषत्वभानं नाभ्युपेयं तत्राप्रत्यक्षतया मूलपर्यन्तमप्रत्यक्षत्वं स्यात्,

(१) छिद्यते यत्तच्छिदुरमिति व्युत्पत्त्या काष्ठादौ, छिनत्तीति व्युत्पत्त्या च पुरुषे, छिदुरपदप्रयोगदर्शनादित्यर्थः । (२) अयमुपालम्भः-"तत्त्वलक्षणानि कस्मान्नोक्तानि"-इत्युपालम्भ इत्यर्थः । (३) विशेषेण वर्तुलत्वपृथुबुध्नोदरत्वादिना सहितो योऽर्थो घटादिस्तज्ज्ञानत्वं साक्षात्कारित्वमिति शङ्कते—सविशेषेति । (४) शेषविशेषस्य=चरमविशेषस्य, यद्विषयकं विशेषान्तरं नास्ति तस्येत्यर्थः ।

विशेषसाहित्येनाऽज्ञानादित्यर्थः ॥ [d]"विश्रान्तिरि"ति । कश्चिद्विशेषो विशेषं विनाकृतोऽपि गृह्यते इत्यर्थः ॥ [e]"अविश्रान्तिरि"ति । सर्वे विशेषाः स्वविशेषसाहित्येनैव भासन्ते इत्यभ्युपगमे व्याप्तिग्राहकप्रत्यक्षे यावद्विशेषभानम् इत्यनुमाने(१)ऽपि तद्भानादनुमितेः प्रत्यक्षत्वापत्तिरित्यर्थः ॥ ननु तावतामनन्तविशेषाणां व्यापकतावच्छेदकैकरूपाभावादनुमितौ भानमनुपपन्नमिति न तत्रानिव्याप्तिरिति शङ्कते—। [f]"अथे"ति ॥ तर्हि तावतामनन्तविशेषाणामनुगतप्रतीतिव्यवहारौ न स्याताभेकरूपाभावादिति परिहरति—। [g]"तर्ही"ति ॥

सू० [a]व्यक्तेरनुमानादसिद्ध्यापत्तेश्च । [b]यथा हि व्यक्तिं विना सामान्यस्य, तथा तावन्तं विशेषं विना [c]व्यक्तेरप्यनुपपत्तावविशेषात् । [d]यदि च प्रतीत्यपर्यवसानाभावात्पक्षधर्मतया नानन्तविशेषसिद्धिरिति मन्यसे, तदा प्रतीता(२)पर्य्यवसानात्तद्बुद्धिः साक्षात्प्रकाशः स्यात् । [e]अप्रतिपद्यमानानन्तविशेषप्रकाशकल्पनाच्चैकाकिसाक्षात्त्वनामकविशेषकल्पनैवाल्पत्वाच्छ्रेयसितरा, साक्षात्कारित्वव्यवहारानुपपत्तेः (कल्पनाबीजस्य) तावता(३)ऽपि चरितार्थत्वात्, इति कृत्वा [f]तत्कल्पनापि नाऽत एव ।

टी० ॥ किंच, सामान्योपग्रंहेण व्याप्तिग्रह इत्यनुमितौ सामान्यं भासमानं व्यक्तिमादायैव यथा भासते तथा वह्निरप्य-

(१) अनुमाने=अनुमितौ । अत्रायमाशयः । व्याप्तिग्राहकप्रत्यक्षे वह्नित्वाद्यनन्तविशेषवत एव व्यापकस्य भानात् तादृशविशेषभानधारायाः अविश्रान्तेश्च त्वयैवोक्तत्वादनुमितिपर्य्यन्तमपि विशेषभानं वक्तव्यमित्यनुमितेरपि प्रत्यक्षत्वप्रसङ्ग इति । (२) प्रतीतेति, प्रतीतायाः वह्निव्यक्तेस्तावत्त्वाऽसार्वत्वाद्यनन्तविशेषं विनाऽपर्यवसानाद्=अनुपपद्यमानत्वात्तदुपपादकानामनन्तविशेषाणां बुद्धिः=कल्पनारूपार्थापत्तिः साक्षात्प्रकाशः=साक्षात्कारिज्ञानं स्यादित्यर्थः । (३) तावता=अर्थगतानुगतसाक्षात्त्वकल्पनेनैव ।

नुमितौ भासमानस्तावदनन्तविशेषमादायैव(१)भासते तत्समा-
नसंवित्संवेद्यत्वाभ्युपगमात्, अन्यथा सामान्यमादायैवानुमितिः
पर्यवस्येद्व्यक्तिभानं क्वापि न स्यादित्याह—। "व्यक्तेरि"ति ॥
एतदेवाह—। "यथा हो"ति । सामान्यस्यानुपपत्तिरिति संब-
न्धः(२) ॥ "व्यक्तेरि"ति । अनुमितौ भासमानाया वह्न्यादि-
व्यक्तेरित्यर्थः ॥ ननु व्यक्तिमनादाय सामान्यबुद्धेर्यथाऽपर्यव-
सानं न तथा तावदनन्तविशेषमनादाय वह्न्यादिव्यक्तिबुद्धे-
रपर्यवसानं, तावद्विशेषमनादायापि व्यक्तिबुद्धेर्दर्शनादित्यत
आह—। "यदि चे"ति । एवमपि प्रतीता वह्निव्यक्तिस्तावदनन्त-
विशेषमन्तरेण न पर्यवस्यतीति तदनुमित्यनन्तरभाविन्यर्थब-
लायाते ज्ञानान्तरे(३) प्रत्यक्षलक्षणातिव्याप्तिः स्यादित्यर्थः ॥
किञ्च, तावदनन्तविशेषभानमनुपलब्धिबाधितमित्यवश्यनिर्वा-
ह्यसाक्षात्त्वव्यवहारानुरोधाद्विषयगतं साक्षात्त्वसामान्यमभ्युपग-
न्तव्यं, यद्विषयीकुर्वद्ज्ञानं साक्षात्कारि व्यवह्रियते इत्याह—।
"अप्रतिपद्यमाने"ति । एकाकित्वमल्पत्वं च लाघवानुरोधा-
दुक्तम् ॥ नन्वस्तु तथा, को दोष ? इत्यत आह— "तत्कल्पना-
यो"ति ॥ "अत एवे"ति । विषयगतसाक्षात्त्वविषयकानुमिता-
वतिव्याप्तिदोषादेवेत्यर्थः ॥

मू० "विस्तरश्चात्र वक्ष्यते । विशेषश्च यदिव्यवच्छेद,
स्तदा निर्विकल्पकाऽव्याप्तिः । यदि(४) च तदित-
रविश्वव्यावृत्तस्वरूपप्रकाशः, सोऽपि तथा, तदा
दूरात्सामान्यप्रत्यक्षस्या(५)प्रत्यक्षत्वापत्तिः । तन्न,

(१) तावदनन्तविशेषमादाय=तार्णत्वाऽतार्णत्वादिलक्षणं विशेष-मादायैव भासेतेत्यर्थः । तत्र हेतुः—तत्समानेति, सामान्यग्राहकज्ञान-ग्राह्यत्वाभ्युपगमाद्विशेषस्येत्यर्थः । (२) "अनुपपत्तौ"—इत्यस्यैव विभ-क्तिविपरिणामेनानुपपत्तिरिति प्रकृतेन सम्बन्ध इत्युक्तम् । (३) अनु-पपद्यमानार्थदर्शनात्तदुपपादकीभूतार्थान्तरकल्पनारूपार्थापत्त्यात्मके ज्ञाने इत्यर्थः । (४) ननु स्वेतरविश्वव्यावृत्तं स्वरूपं विशेषः, तत्प्रका-शकं ज्ञानं प्रत्यक्षमित्युच्यते, तथा च सोऽपि=निर्विकल्पकज्ञानविषयो-ऽपि तथा=स्वेतरविश्वव्यावृत्त इति न तद्विषयके निर्विकल्पकेऽव्या-प्तिरित्यत आह—यदीति । (५) सामान्यप्रत्यक्षस्य=सामान्यतः स्था-

जगद्विलक्षणप्रकाशे संशयाद्यनुपपत्तेः । यदि च तत्रापि प्रतिपत्त्रादिव्यवच्छेदमात्रप्रकाशाद्विशेषप्रकाशत्वमेव, तदाऽनुमित्यादिव्याप्तिः । अथेन्द्रियकरणकानुभवत्वं(१), तत्र 'साक्षात्कारिधीकरणत्वस्यैवेन्द्रियत्वेनान्योन्याश्रयत्वापत्तिरि'ति केचित् । तन्न, अज्ञातप्रमाकरणत्वस्य(२) भावत्वविशेषितस्य चेन्द्रियत्वनिरुक्तेः सम्भवात् । विना कार्यगतविशेषसिद्धिं, किं प्रति करणत्वमेव ज्ञेयमिति तु बाधः साधीयान् । एतेन 'ज्ञातता काचिद्विलक्षणा, तज्जनकत्वं ज्ञानस्य साक्षात्त्वम्' इत्यपि निरस्तम्,

टी० ॥ ननु ज्ञानगतमेव साक्षात्त्वमस्तु, तदेव च लक्षणमित्यत आह । "विस्तरश्चे"ति ॥ 'सविशेषार्थप्रकाशत्वमि'त्यत्र विशेषपदं विकल्प्य दोषमाह—। "विशेषश्चे"ति । निर्विकल्पके विशेषस्यातद्व्यावृत्तेरभानात्तत्राव्याप्तिरित्यर्थः ॥ ननु व्यवच्छिन्नभानमभिमतं, न तु व्यवच्छित्तिभानमित्यत आह—। "यदि चे"ति ॥ "सोपी"ति । निर्विकल्पकविषयोऽपीत्यर्थः ॥ "तदा दूरादि"ति । यदि धर्म्मिमात्रमपि विशेषो वस्तुमात्रं वा विशेषस्तदा धर्म्मिदर्शनं विशेषदर्शनम्, अतस्तत्र संशयो न स्यादित्यर्थः ॥ ननु सकलव्यवच्छिन्नप्रकाशो न लक्षणं, किन्तु व्यवच्छिन्नप्रकाशमात्रं, तच्च दूरप्रत्यक्षेऽप्यस्तीत्याह—। "यदि चे"ति ॥ भट्टमतेऽनुपलब्धिव्यावर्तनायाह—। "भावत्वे"ति ॥

यवादेर्धर्मिणः प्रत्यक्षस्य, अप्रत्यक्षत्वापत्तिः, इतरव्यवच्छिन्नस्वरूपस्य तत्राभानात् । तद्भाने बाधकमाह—तत्रेति ।

(१) अत्र "साक्षात्त्वम्" - इति शेषः । (२) अज्ञातप्रमाकरणत्वस्य=अज्ञातत्वे सति प्रमाकरणत्वस्य ।

स्वयं खण्डनमाह—। h"विने"ति ॥ "एतेने"ति । कारणत्व-स्याशक्यग्रहत्वेनेत्यर्थः । ज्ञाततावैलक्षण्यं -यतः 'साक्षात्कृतोय-मि'ति व्यवहार इत्यर्थः ॥

सू० a"ऐकरूप्याव्यवस्थितौ कारणत्वानवधारणात् । * नच ज्ञाततावैलक्षण्यान्यथानुपपत्तेरेव bतत्सिद्धिः, cकार-णान्तरवैलक्षण्यादेव तदुपपत्तेः । नापि मेयजनितत्व, dमतिप्रसङ्गात् । eस्वमेयजन्यत्वं च स्वार्थव्यावृत्त्या-ननुगमात्, fपूर्वदोषानिवृत्तेश्च । gअथ * येन प्रमिते सति न प्रमित्सा पुनर्भवति तज्ज्ञानं साक्षात्कारि *-इति, तन्न, hप्रत्यक्षावगतेपीष्टे तनयादौ प्रमि-त्सादर्शनात् । * अथ यदनन्तरं न विजातीयप्रमि-त्सा तद्भावस्तथात्वं*, तन्न, तत्साजात्यानवगतौ तद्विजातीयत्वानवगतेः, अरिसम्पद्यनुमानादिविष-यायां प्रत्यक्षयितुमनिष्टेश्च । प्रत्यक्षावगतेपि दहने रक्ताऽशोकस्तवकसन्देहे धूमदर्शनेन वह्नेरनुमीय-मानत्वादित्यप्येके । * अज्ञायमाना 'ऽसाधारण-कारणका 'ऽनुभवत्वं,

टी० ॥ a"ऐकरूप्ये"ति । साक्षात्कारिताऽऽधायकं किं ज्ञानम्? इति नाद्यापि निरूपितमित्यर्थः ॥ b"तत्सिद्धिरि"ति । ज्ञानगतैकरूपसिद्धिरित्यर्थः ॥ ज्ञानभिन्नकारणेनापि ज्ञाततावै-लक्षण्यमन्यथोपपन्नमित्याह—। c"कारणान्तरे"ति ॥ d"अतिप्र-सङ्गादि"ति । आत्मना मेयेन सर्वज्ञानजननादित्यर्थः ॥ प्रत्य-क्षज्ञानस्य यन्मेयं (घटादि) तज्जन्यत्वं न लक्षणं, स्वपदार्था-ननुगमादित्याह—। e"स्वमेयजन्यत्वमि"ति ॥ आत्मप्रत्यक्षे भव-त्यात्मा मेय इति तज्जनितत्वं सर्वज्ञानानामित्याह—। f"पूर्वे".

करणमि'ति हि यदि कार्य्यव्यक्ति(1)मभिसन्धाय,तदा तत्पूर्वं प्रतीतानां तत्राकरणत्वं दुरवधारणं, ततस्तज्जातीये तज्जातीयव्यभिचारप्रतिसन्धानेऽवश्यं पतनीयमिति। aअथाव्यवहितार्थप्रकाशत्वं तथा, bतर्हि किमपेक्ष्याव्यवधानं? किञ्च तत? इति वाच्यम्। इन्द्रियमपेक्ष्य तत(2)अन्तःकरणं वा तद्(3) इति चेत्, तर्हीन्द्रियसन्निकृष्टप्रकाशत्वमिति कुटिलिकार्थः, स चानुपपन्नः, स्वविलोचनगोचरानुमानव्याप्तेः। ज्ञानाजन्यज्ञानत्वं तत? इति चेन्न, सविकल्पकविशेषाऽव्यापनात्।

टी० यज्जातीयवच्छेदेन नियमेन ज्ञायमानकरणकत्वं निषेध्यं तस्या(4)ऽप्रसिद्धो नियमो दुर्ग्रहः, प्रसिद्धा च तदेव लक्षणमित्याह-।a"किञ्चे"ति ॥ ज्ञायमानकरणत्वव्यवच्छेदकमन्तरेण प्रत्यक्षं दुर्ग्रहमित्याह-। b"तितार्थे"ति। यद्वा, ज्ञायमानकरणाकरणत्वनिषेधो यत्र स्यात्तत्रानुगतरूपं वक्तव्यमित्यर्थः॥ व्यक्तिविशेषे(5), ज्ञायमानकरणकत्वं निषेद्धुं न शक्यते,यतो ज्ञायमानेनैव केनचित्करणेन तज्जननसम्भवात्, अत एतज्जातीयं न ज्ञायमानकरणकमेतज्जातीयं च तथा-इत्यन्वयव्यतिरेकाभ्यां ग्राह्य(6)मित्याह-। c"ज्ञायमानमि"ति ॥ प्रत्यक्षलक्षणान्तरं शङ्कते-। d"अथे"ति। इन्द्रियसन्निकृष्टार्थप्रकाशत्वं साक्षात्त्वमित्यर्थः ॥ एतदेव प्रश्नपूर्वकं विशदयति-। e"तर्ही"ति ॥ f 'तदि'ति। व्यवधानमित्यर्थः॥ g 'कुटिलिकार्थ" इति।

(१) कार्य्यव्यक्तिम्-दैवाज्ज्ञायमानचक्षुरादिकरणकप्रत्यक्षव्यक्तिम्। तज्जातीये= प्रत्यक्षत्वावच्छिन्ने, तज्जातीयस्य=ज्ञायमानकरणत्वावच्छिन्नस्य, यो व्यभिचारस्तत्प्रतिसन्धाने इत्यर्थः।

(२) तद्=अव्यवधानम्।

(३) तद्=व्यवधानम्।

(४) तस्य=जातिरूपस्यावच्छेदकस्य। नियम-व्याप्तिः।

(५) दैवाज्ज्ञायमानकरणकप्रत्यक्षव्यक्तिविशेषे-इत्यर्थः।

(६) ग्राह्यमिति, तथाचावश्यमनुगतानतिप्रसक्तरूपग्रहणापेक्षया भाव्यमिति भावः।

वक्रगत्या पर्यवसन्नोऽर्थ इत्यर्थः ॥ h"स्वविलोचने"ति । इन्द्रियाधिष्ठानत्वेन गोलकस्येन्द्रियसन्निकृष्टत्वादित्यर्थः । स्वपदं स्पष्टार्थम् ॥ i"सविकल्पके"ति । ज्ञानपदं(१)यदि सामान्यपरं,तदा 'निर्विकल्पकानन्तरभाविसविकल्पकेऽभावात्सविकल्पके चाऽव्याप्तिः । अथ सविकल्पकपरं, तदाऽसमवायादिसविकल्पकाव्याप्तिरित्यर्थः ॥

मू०aएतेन 'विषयानन्तरज्ञानाजन्यज्ञानत्वं तदि'ति प्रत्युक्तं, सविकल्पकस्याधिकव्यवच्छेदरूपविषयत्वात्, bतदवधिज्ञानजन्यत्वात्(२)। c*स्वविषयानन्तर्गतार्थज्ञानाजन्यधीत्वं तत् । न च dप्रतियोगिकार्थप्रत्यक्षाव्याप्तिः, eप्रतियोगिनोऽपि स्वविशिष्टार्थप्रविष्टस्य तत्तया इव प्रत्यभिज्ञायां प्रत्यक्षविषयत्वोपगमात्; fअप्रतियोगित्वेन विशेषणाद्वा(३)*-इति चेन्न, gस्वपदेनैव स्वीकृतत्वात् । hकार्यस्य ज्ञानजन्यताया दुरवधारणत्वात्, तज्ज्ञानीये तज्ज्ञानीयत्वव्यभिचारतः अग्रहणं च कार्यकजात्ये पूर्ववत्पत्तिरिति । i"स्वकालावच्छिन्नार्थबोधत्वं साक्षात्त्वम्"k-इत्यपि न, स्वार्थानिर्वचनात् । कथं चानुमानादिव्यवच्छेदः? l नच व्याप्त्यादिप्रविष्टकालनियतार्थत्वं, यत्रापि(४)चन्द्रोदयसमुद्रवृद्ध्यादौ स्वका-

(१) ज्ञानपदम्=ज्ञानाऽजन्यज्ञानत्वमिति लक्षणस्थमाद्यं ज्ञानपदमित्यर्थः । सामान्यपरम्=साधारणज्ञानवाचकम् ।

(२) तस्यातद्व्यावृत्तिरूपवैशिष्ट्यावगाहिनः सामान्यसविकल्पस्य योऽवधिस्तद्वस्तु तज्ज्ञानजन्यत्वात्सविकल्पस्येत्यर्थः । यद्वा तस्य घटोऽयमित्यादिप्रत्यक्षात्मकसविकल्पविशेषस्य योऽवधिर्घटत्वादिस्तज्ज्ञानजन्यत्वाद्घटादिसविकल्पकस्येत्यर्थः ।

(३) तथाच स्वविषयानन्तर्गतार्थज्ञानाजन्याऽप्रतियोगिकधीत्वं साक्षात्त्वमिति पर्यवसितं लक्षणम् ।

(४) अयं पूर्णचन्द्रोदयः स्वकालीनसमुद्रवृद्धिमान् चन्द्रोदयत्वात् अग्रिमचन्द्रोदयवदित्यनुमानस्य स्वकालावच्छिन्नार्थबोधकत्वमस्तीत्यतिव्याप्तिरित्याशङ्क्याह-यत्रापीति आदिपदेनाऽयं घटो वर्तते इत्याद्यनुमानं ग्राह्यम् । तत्रापि=पूर्णिमाचन्द्रोदयकालीनसमुद्रवृद्ध्याद्यनुमितावपि । तादृशत्वस्य=स्वकालावच्छिन्नार्थत्वस्य ।

लार्थत्वं, तत्रापि व्याप्तिप्रविष्टैव तादृशत्वस्य प्रयोजिका ? *—इति चेन्न, कथमप्यस्तु ^i^तथापि स्वकालावच्छिन्नार्थत्वस्य सम्भवात् ।

टी० ॥ *a* "एतेने"ति । सविकल्पकाव्यापकत्वेनेत्यर्थः । लिङ्गादिज्ञानेन विषयान्तरेऽनुमित्यादिजननं निर्विकल्पकेन तु स्वविषये एव सविकल्पकजननमिति लक्षणाकर्तुरभिमानः । अतएव व्यावृत्तिस्वरूपस्य वैशिष्ट्यस्य निर्विकल्पकाविषयत्वेन तया विषयान्तरत्वादेतदनुपग्रह इत्यर्थः (१) । यद्वा, ऽव्यभिचारज्ञानजन्यदीर्घेऽप्यव्यक्ते हस्वा व्यक्तेः एवाधिको भासते इति, तदनुपग्रह इत्यर्थः ॥ एतदेवाह—। *b* "तत्रे"ति ॥ *c* "स्वविषये"ति । प्रत्यक्षं प्रत्यक्षाविषयविषयकज्ञानेन न जन्यत लिङ्गानुपधानपक्षे (२), ऽनुमित्यादिकं च तथेति तदव्याप्तेरित्यर्थः । प्रतियोगिज्ञानाभावे अभावज्ञाने भानं स्यादेवेति नाभावप्रत्यक्षे अव्याप्तिरित्याह । *d* "प्रतियोगिने"ति । प्रतियोगिज्ञानादेरवश्यमपेक्षणादित्याह । *e* "अप्रतियोगित्वेने"ति । *f* "व्यवहारेणे"ति । व्यवहारार्धस्यानुगमादित्यर्थः ॥ वैजात्यमन्तरेण जन्यजनकभावानुपपत्तिरिति पूर्वदूषणमतिदिशति । *g* "कार्ये"ति ॥ *h* "स्वकाले"ति । बोधकालावच्छिन्नस्यार्थस्य प्रकाशकत्वमित्यर्थः ॥ व्यभिचारप्रकारमाह—। *i* "तत्रे"ति । यदा धूमस्तदा वह्निरित्याकारव्याप्तिग्रहस्थानीयानां स्वकालावच्छिन्नत्वं, न तु विषयस्वभावाधीनमित्यर्थः ॥ बोधकालावच्छिन्नार्थबोधकत्वं चन्द्रोदयादिस्थले गतमेवेत्यतिव्याप्तिरित्याह—। *j* "तथापी"ति ॥

मू० *a*नच सज्जातीयत्वमेवेति विशेषः* । साजात्यस्य वैलक्षण्यस्यापरतः सिद्धौ किमनेन(४), न च तदपीति

(१) लक्षणखण्डनपरग्रन्थार्थ इत्यर्थः ।

(२) लिङ्गोपहितलैङ्गिकभानवादिमते नियमाद्वह्नयनुमितिविषयीभूतेनैव लिङ्गज्ञानेन वह्नयनुमितिर्जन्यते, अत उक्तं-लिङ्गानुपधानपक्षे इति ।

(३) स्वात्मकानुमित्यविषयीभूतलिङ्गज्ञानेन जन्यते एवेत्यर्थः ।

(४) अनेन (= जातिघटितलक्षणेन) किमित्यन्वयः । न च तदपि साजात्यमपि सम्भवतीति वक्ष्यते-"अथ ज्ञानस्य जातिभेदः कश्चित् साक्षात्त्वं, तत्रे"त्यादिना ग्रन्थेन

वक्ष्यते। *b व्याप्त्यादिकमन्तरेण? *–इति चेन्न, c तस्यैव समर्थत्वेन स्वकालकथावैयर्थ्यात्। यथा च न तदपि तथा वक्ष्यते(१)। d यत्तु कश्चिदाह–"स्वप्रकाशनिषेधात्स्वकालावच्छिन्नार्थप्रकाशत्वासंभव" इति, तदयुक्तम्, e वस्तुनो यः स्वकालस्तस्य विवक्षितत्वात्, वर्तमानप्रकाशस्तथेति निरुक्तिपर्यवसानात्(२), f वर्तमानार्थस्य च सर्वनिर्वचनीयत्वात्। तथाचोक्तं,–"सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना"। g तस्मादस्मदुक्तमेव युक्तम्। *h दोषासन्निकर्षेतराऽप्रयुक्तविषयनियमजं ज्ञानं तथा? *–इति चेन्न, i दोषवशजातसाक्षाद्बोधे तदसम्भवात्। *प्रमासाक्षात्कारस्तथा? *–इति मतं, न, साक्षात्त्वेन प्रमेतरयोरविशिष्टतया साक्षात्त्वस्य साधारणस्यैव निर्वक्तव्यत्वात्;

टी० ॥ ननु तथाऽप्यनुमितिमात्रं न तथा, यथा प्रत्यक्षं, इत्यत आह–। a "नचे"ति ॥ व्याप्त्यादिव्यतिरेकेण स्वकालावच्छिन्नार्थबोधत्वं विवक्षितमिति शङ्कते–। b 'व्याप्त्यादी'ति ॥ व्याप्त्यादिकमन्तरेण जायमानबोधत्वमेव तर्हि लक्षणमस्त्विति परिहरति–। c 'तस्यैवे'ति ॥ प्रकृतलक्षणे खण्डनान्तरमुपन्यस्य दूषयति–। d 'यत्त्वि'ति। स्वकालावच्छिन्नत्वेनार्थबोधत्वं स्वप्रकाशपक्ष(३)सम्भवति, तस्य च निषेधादित्यर्थः ॥ स्वकालावच्छेदोऽपि न प्रकारत्वेन(४) विवक्षित इत्याह–। e "वस्तुन" इति ॥ ननु

(१) वक्ष्यते "अनुमानादिव्यवच्छेदनतत्साधारणकारणाऽजनितधीः साक्षादिति चेन्ने"त्यादिग्रन्थेन। व्याप्त्यादित्वखण्डनेन वक्ष्यत इति त्वन्ये।

(२) 'स्वकालावच्छिन्नार्थप्रकाशत्वमि'ति प्रत्यक्षत्वनिरुक्तेर्'वर्तमानार्थप्रकाशस्तथा' (=प्रत्यक्षम्)–इति निरुक्तिपर्य्यवसानादित्यर्थः।

(३) स्वविशिष्टकालविशिष्टार्थप्रकाशकत्वं ज्ञानस्य कालविशेषणीभूतस्य स्वस्यापि प्रकाशकत्वमिति भावः।

(४) न प्रकारत्वेन विवक्षितः किन्तूपाधितयोपलक्षणतया वेति भावः।

वर्तमानत्वमपि दुर्वचमित्यत आह्-। f"वर्तमाने"ति ॥ यत्तु त्वयेदं मया तदेवयुक्तमित्याह्-। g "तस्मादि"ति ॥ h "षोढे"ति । षोढासन्निकर्षेतरेण व्याप्त्यादिना अप्रयुक्तो यो विषयनियमस्तज्जं ज्ञानमित्यर्थः ॥ i "दोषवशे"ति । साक्षात्कारिभ्रमे दोषस्यैव षोढासन्निकर्षेतरस्य विषयनियामकत्वेन तदव्याप्तिरित्यर्थः ॥ साक्षात्कारसामान्यस्यैव लक्षणमुपक्रान्तमित्याह-। j "ने"ति ॥

मू० a अनिष्टभ्रमबुद्धिमते (1)षोढासन्निकर्षस्य b प्रत्येकमिलितविकल्पानुपपत्तेः । (2)साक्षाद्धीः c स्वरूपधीः(?) (d स्वेन रूपेण वस्तुनो भासः ?) –इति चेन्न, अनुमानादिव्यापनात । e अनुमानादौ लिङ्गाद्यपेक्षत्वात् तदवच्छिन्नकालसम्बद्धबोधत्वं, तत्त्वध्यक्षे ? –इति चेन्न, व्यभिचारात । e यत्र(3) लिङ्गादि भाव्यादिबोधकं तत्र तत्कालताव्यभिचारात । f एतेन 'यदि न लिङ्गकालावच्छिन्नव्यापकप्रतिभासोऽनुमानं तदा कूट(4)व्याप्यानुमितस्य व्यापकस्य दैववशात्सत्यव्याप्यव्यक्त्यन्तरतः प्राप्तौ g व्याप्तिकालावच्छिन्नव्यापकप्राप्त्यतावत्यंशे प्रमात्वं प्रमाविशेषान्तर्भावासनिर्वाह्यमापद्यते'ति निरस्तम्, h भूतादिव्यापकानुमाने व्याप्यकालत्वासम्भवात् ।

टी० ॥ a "अनिष्टे"ति । अनिष्टा भ्रमबुद्धिर्यस्य मीमांसकस्य तन्मते इत्यर्थः ॥ b "प्रत्येकमि"ति । षण्णां सन्निकर्षाणां प्रत्येकमन्योन्याभावो विवक्षितो ? मिलितान्योन्याभावो वा ? । उभयथापि सन्निकर्षस्यापि कस्य

(१) मीमांसकं प्रति तु दोषान्तरमाह-षोढे"ति । षोढासन्निकर्षस्य यः प्रत्येकमिलितयोर्विकल्पस्तदनुपपत्त्यानुपपत्तेरित्यर्थः ।

(२) स्वरूपधीः साक्षाद्धीरित्यन्वयः ।

(३) उक्तं व्यभिचारमेव स्फुटयति यत्रेति ।

( ) कूटव्याप्येनासत्यव्याप्येनाऽनुमितस्येत्यर्थः ।

प्त्याद्युपहितत्वानां व्यतिरेकस्य यत्र समुच्चयः सा धीः साक्षाद्धीः ? * इति चेन्न, व्याप्त्यादिप्रत्यक्षाव्यापनात् *f* असिद्धत्वाच्च, *g* पर्वतोऽग्निमानित्येव प्रतिज्ञानात्, *h* शाब्देन च स्वाप्रतिपादनात्, साध्यादिमितेश्च(१)प्रत्यक्षत्वापादनात्। *अथाऽव्यवहितधीत्वं(२) साक्षाद्धीत्वम् ? *–इति चेन्न, व्यवधानविकल्पानुपपत्तेः(३)। *i* यदि द्रव्यविशेषान्तरस्थितिर्व्यवधिस्तदानीमप्रत्यक्षविभुधियां साक्षात्त्वापत्तिः। *j* अथ ज्ञापकज्ञानस्य पूर्वमत्ता व्यवधानं *k* तदा परत्वाद्यप्रत्यक्षतापत्तिरिति। *विशिष्टवैशिष्ट्यं व्यवधानम्*–इति चेन्न, *l* धूमविशिष्टे वह्निवैशिष्ट्य(४)मिति स्वरूपस्थितौ तथात्वे कार्य्यकारणभावविरोधः।

टी० दोषान्तरमाह–। *a* "तथापी"ति ॥ *b* "अनुपहिते"ति। अनुमित्यादौ लिङ्गशब्दसादृश्योपधानात्तद्व्यवच्छेद इत्यर्थः। अनुपहितत्वमात्रमादाय दूषयति–। *c* "विशिष्टे"ति ॥ *d* "करणे"ति। प्रत्यक्षे तु नेन्द्रियोपधानमित्यर्थः ॥ 'दण्डी पुरुषः' इत्यत्र घटकरणदण्डोपधानाद्व्याप्तिरित्याह–। *e* "परे"ति ॥ अनुमित्यादावपि व्याप्तत्वाद्युपधानमसिद्धमित्याह–। *f* "असिद्धत्वादि"ति ॥ तत्रानुमितौ तावदाह–। *g* "पर्वत"इति ॥ शाब्दज्ञाने शब्दोपधानासिद्धत्वमाह–। *h* "शब्देने"ति ॥ विकल्पानुपपत्तिमेवाह–। *i* "यदी"ति। कालाकाशाद्यनुमिनावतिव्याप्ति, स्तेषां द्रव्यान्तरान-

(१) क्वचित् "शाब्दादिमितेश्च" इति पाठः।

(२) अव्यवहितस्य धीत्वमिति षष्ठीतत्पुरुषसमासः।

(३) अव्यवहितत्वं व्यवधानाऽभाववत्त्वं तच्च व्यवधानविकल्पानुपपत्त्याऽनुपपन्नमित्याह-व्यवधानेति। क्वचित्तु "अव्यवधाने"ति पाठः, तत्र व्यवधानविकल्पद्वारकाऽव्यवधानविकल्पानामप्यनुपपत्तेरित्यर्थः।

(४) "उत्पद्यते" इति शेषः।

वस्थितत्वेनाव्यवहितत्वादित्यर्थः ॥ [j] "अथे"ति । ज्ञापकं यल्लिङ्गादि-तज्ज्ञानपूर्वसत्ता; तथाच ज्ञानाजन्यं ज्ञानमित्यर्थः ॥ [k] "नदे"ति । परत्वादिज्ञानानामवधिज्ञानजन्यत्वादव्याप्तिरित्यर्थः ॥ धूमविशिष्टे वह्निवैशिष्ट्यमिति यदि वस्तुगतिस्तदा वह्नौ धूमस्य कारणत्वापत्तिरित्याह—। [l] "धूमे"ति ॥

मू०[a]प्रतीतौ(१) धूमवैशिष्ट्यस्य धर्मिविशेषणत्वे हेतोरंशतः स्ववृत्तिः । [b]साध्यविशेषणत्वे व्याप्तिग्राहिप्रत्यक्षे व्यवधानान्न साक्षात्त्वं स्यात । [c]अथ ज्ञानस्य जातिभेदः कश्चित्साक्षात्त्वं, तत्रा(२)नुभवत्वेन परापरभावानुपपत्तिः, [d]स्मृतेरपि साक्षात्कारित्वादिति केचित् । [e]तन्न, स्मृतेस्तथात्वानभ्युपगमात् ,[f]स्वप्नस्य तावत्स्मृतित्वाऽसिद्धेः, [g]सिद्धौ(३)वा तत्र साक्षात्त्वारोपोपगमात ।[h]भावनाबलजस्य च क्वचिदालोकादिधर्मिकप्रियाद्याश्रयधर्मा(४) रोपत्वं शुक्तिरजतभ्रमवत ,[i]निमीलितनयनादेश्च स्वसंवेदन गतिरवगन्तव्येति ।

टी० ननु धूमविशिष्टो धर्मी वह्निविशिष्टत्वेन प्रतीयते इति क्व कार्यकारणविरोध इत्यत आह । [a]"प्रतीतावि"ति । तर्हि धूमविशिष्टो धर्मी वह्निमान धूमवत्त्वादित्यनुमानं स्यात्तथाच धूमविशिष्टस्य धूमवत्त्वे सत्यात्माश्रय इत्यर्थः । अथ धूमविशिष्टस्य वह्नेर्धर्मिणा वैशिष्ट्यमिति विशि-

(१) प्रतीतौ विषयसप्तम्या वर्तमानस्य (प्रतीयमानस्येति यावत)।

(२) तत्र केचिदित्यन्वयः । केचित=प्राभाकराः । अनुभवत्वापेक्षया साक्षात्त्वस्य परत्वे (व्यापकत्वे) तु सत्यनुभवेऽपि साक्षात्त्वं स्यात, तदपेक्षया साक्षात्त्वस्याऽपरत्वे (व्याप्यत्वे) तु स्मृतिरूपसाक्षात्कारिणि ज्ञानेऽप्यनुभवत्वं स्यादिति भाव ।

(३) प्रभाकरमतमाश्रित्याह-सिद्धौ वेति ।

(४) प्रियादिः कामिन्यादिराश्रयो येषां धर्मिणां गौरवर्णमुखनासिकादीनां ते-प्रियाद्याश्रयधर्माः, प्रियाद्याश्रयस्य धर्मा इति वा समासः । तथा च शुक्तिरजतवद्विपर्ययानुभवरूपत्वादभावनाबलजसाक्षात्कारस्य न स्मृतित्वम् ।

ष्टयं वैशिष्ट्यव्यधानं, तदा व्याप्तिप्रत्यक्षेऽपि धूमविशिष्टवह्निज्ञानादव्यवहितधीत्वं लक्षणमव्यापकमित्याह-। *b*"साध्ये"ति ॥ *c*"अर्थे"ति ॥ *d* "स्मृतेरपी"ति। अज्ञातकरणजत्वादित्यर्थः ॥ *e* 'तन्ने"ति । साक्षात्त्वजातिवादिना नैयायिकेन स्मृतिसाक्षात्त्वानभ्युपगमात्, ज्ञानाकरणकज्ञानत्वस्य साक्षात्त्वव्यवस्थापकस्यानुभवकरणिकायां स्मृतावभावादित्यर्थः ॥ ननु स्मृतिविपर्यासः([1])स्वप्नः, स च साक्षात्कारीति कथं न स्मृतौ साक्षात्त्वमित्यत आह-। *f*"स्वप्नस्ये"ति । स्मृतिविपर्यासो हि स्मृतिविषये विपर्यासो ननु स्मृतिर्विपर्यस्तेत्यर्थः ॥ ननु तथैव किं न स्यादत आह- *g*"सिद्धौ वे"ति । यदि स्वप्नस्य स्मृतित्वमेव, तदा न साक्षात्त्वं, रात्रौ मया कामिनीसाक्षात्कृतेत्यनुव्यवसायस्य साक्षात्त्वारोपरूपत्वादित्यर्थः ॥ ननु कामातुरकामिनीसाक्षात्कारः स्मृतिरेव विषयासन्निकर्षेण तदनुभवस्याभावादत आह । *h*' भावनाबलजस्ये"ति ॥ ननु निमीलितनयनस्य यः कामिनीसाक्षात्कारः स स्मृतिरेव धर्म्यग्रहेणारोपानुपपत्तेस्तत्र साङ्कर्यं स्यादित्यत आह-। *i* 'निमीलिते"ति॥

मू० *a*इदं([2])तु स्यात्, *b*परमाण्वादिबुद्धावनुव्यवस्यमानायां परमाणुप्रतीत्यंशे ([3]) ऽपि साक्षात्त्वमनुभूयते इत्यत्र *c*न नः सम्प्रतिपत्तिः। *d*अन्यथा लिङ्गबुद्धिलक्षणया प्रत्यासत्त्या वह्निरपि मानसप्रत्यक्ष एव, न लैङ्गिकः, इति परेण सुवचत्वात्। एवं प्रत्यभिज्ञायां पूर्वदेशकालस्थितिमस्य पश्यामीति कस्यानुभवो? यद्बलात् *e*तथाभ्युपेयम्। *f*तस्मात्प्रतीतिकलहोऽयम्। यदि च साक्षात्त्वजातिरध्यक्षमानिका, तदा प्रतीतौ कस्याश्चिदध्यक्षानध्यक्षविवादो न स्यात्। नहि घटादिप्रत्यय-

(१) स्मृतिविपर्यासः=विपर्यस्तस्मृतिरित्यर्थः।

(२) परोक्तदूषणं दूषयित्वा स्वाभिमतं दूषणमाह - इदमिति।

(३) अत्र मूलव्याख्यानयोः सारूप्यार्थं "परमाणुप्रतीत्यंशे"-इत्यस्य परमाण्वंशे इत्यर्थो बोध्यः। तथाच परमाणुज्ञानवानहमित्यनुव्यवसायस्य परमाण्वंशे परोक्षत्वात्तद्बुद्ध्यंशे चाऽपरोक्षत्वात्सङ्करः।

क्षात्वे विवदन्ते । *क्वचिदस्फुटत्वाद्विवादः ? *–इति चेन्मैवम् ।

टी० तत्किं साक्षात्त्वं जातिरेव ? तथा च तदेव लक्षणं प्रत्यक्षस्येत्यत आह–। [a]'इदमि''ति ॥ साक्षात्त्वमिव परोक्षत्वमपि जातिः स्यात्तथाच तयोः संकरोऽत्र दोष इति वक्तुं पीठमारचयति–। [b]परमाणवादी''ति । ''अनुव्यवस्यमानायामि''त्यत्र''ऽनुव्यवसीयमानायामि''ति युक्तः पाठः, साधातोर्वा गणपाठसिद्धत्वादयं प्रयोगः ॥ ननु तत्र परमाण्वंशेऽपि साक्षात्त्वमनुभूयते एवेत्यत आह–। [c]'न नः सम्प्रतिपत्तिरि' ति॥ न वसम्प्रतिपत्तिमात्रेण न वस्तुनिवृत्तिरित्यत आह–। [d]'अन्यथे''ति । यद्यप्यन्यबुद्धिनां यत्र प्रत्यासत्तिस्तथापि लक्षणाद्रक्षणाय परस्यायमभिप्राय इत्यर्थः । यद्वा, लिङ्गबुद्धिपदेन व्याप्तिस्मृतिरुक्ता, तथाच स्मृत्युपनीत(१)वह्निविशिष्टः पर्वतः प्रत्यक्षेणैव भासते इति सुवचमित्यर्थः ॥ [e]'तथाभ्युपेयमि''ति । प्रत्यभिज्ञायां तत्तांशस्य साक्षात्त्वमभ्युपेयमित्यर्थः ॥ [f]'तस्मादि''ति । प्रत्यभिज्ञायां तत्तांशे परोक्षत्वमिदन्तांशे साक्षात्त्वमिति साङ्कर्यम् । एवं(२)परमाण्वनुव्यवसायेऽपीत्यर्थः ॥ दूषणान्तरमाह–। [g]'यदि चे''ति । साक्षात्त्वसंशयः क्वापि न स्यादित्यर्थः । यद्वा, अभावज्ञाने भाट्टनैयायिकयोर्वायुत्वादिज्ञाने वा साक्षात्त्वाऽसाक्षात्त्वविवादो न स्यादित्यर्थः ॥

मू० [a]निरंशे वस्तुनि कः स्फुटत्वावभासः(३) । यद्येकार्थ-(४)समवायिभिर्भूयोभिःसहोपलम्भः, स ज्ञानत्वादिवत्साक्षात्त्वेऽपि नहीति ज्ञानादित्वे न विवादःसाक्षात्त्वे(५)

(१) व्याप्तिस्मृत्युपनीतेत्यर्थः ।

(२) सङ्कलय्याभिधानार्थं पूर्वोक्तं पुनः स्मरयति–एवमिति ।

(३) 'स्फुटावभासः'' इति तु विद्यासागरसम्मतः पाठः ।

(४) एकस्मिन् ज्ञानरूपेऽर्थेऽपरोक्षत्वेन सह समवायिनो ये ज्ञानत्वानुभवत्वप्रमात्वादयो भूयांसो धर्मास्तैस्सहोपलम्भ इत्यर्थः ।

(५) ''साक्षात्त्वे तु'' इत्यतोऽग्रे विवाद इत्यध्याहरणीयम् ।

ति विशेषो वाच्यः । [b]दर्शनकृतो हि विवादो न मात्सर्येण वाङ्मात्रेण वा, किन्तु तत्त्वाभिमानादेव । [c]प्रत्यक्षार्थधर्म्मिकायां चाऽनुमायांसाक्षात्त्वपरोक्षत्व-सङ्करो दुर्वारः । * परोक्षत्वं न जातिः किन्तु साक्षात्त्वमेव तथा (१), केवलं साक्षात्त्वाभावः परोक्षत्वम् ? *-इति चेन्न, अस्यार्थस्य विनिगन्तव्यत्वापत्तेः (२), [d]सर्वज्ञमनुमन्यमानस्य च मते दृष्टलिङ्गादेरीशस्य लिङ्गयादिकबुद्धावपरोक्षत्वेनापि विरोधः(३) । *लिङ्गादिधीजन्यत्वमनुमित्यादौ प्रयोजकम् ?- *इति चेन्न, साक्षात्त्वेऽपि तदिन्द्रियसन्निकर्षादिजन्यमिति साक्षादपि(४)मा न स्यात् । व्यञ्जकोपाधिनियता च जातिरिष्यते, न च तदत्र, [e] उक्तप्रकारबाधात् । *[f]न च व्यञ्जकनियमानभ्युपगत्या न तदत्रोपगम्यमिति वाच्यम्*,

टी० ।। [a]"निरंश" इति । अखण्डज्ञानादित्यर्थः । उपाधौ घटकाद्यनिश्चये क्वचिदस्फुटत्वमपि संभाव्यते इति भावः । गोत्वादेर्दूरत्वादिदोषादग्रहे सन्देहोऽपि स्यादान्तरे तु ज्ञाने सोऽपि नास्तीति हृदयम् ।। [b] "दर्शनकृत" इति । शास्त्रकृतोऽनुभवकृतो वा । तथाच शास्त्रकाराणां साक्षात्त्वेन वैमत्यं(५)प्रतीतिकलहो वेत्यर्थः ।। साक्षात्त्वपरोक्षत्वयोः साङ्कर्य्यं स्यानान्तरमाह-। [c] प्रत्यक्षे"ति । "परोक्षत्वसङ्कर"- इत्युपलक्षणम्, अनुमितित्वस-

(१) तथा=जातित्वेन संमतम् ।

(२) साक्षात्त्वं न जातिः किन्तु परोक्षत्वमेव केवलं परोक्षत्वाभावः साक्षात्त्वमिति वैपरीत्येनापि वक्तुं शक्यत्वादयमर्थस्तावद्विनिगमनाविरहितत्वेनास्त्वविनिगतः स च विनिगमनां प्रदर्श्य त्वया विनिगन्तव्य इत्यर्थः ।

(३) विरोधः=साङ्कर्य्यम् । तथाहि ईश्वरज्ञानीयत्वेनेश्वरज्ञानेऽपरोक्षत्वंलिङ्गादिप्रयुक्तत्वेन च परोक्षत्वमिति ।

(४) साक्षादपि=साक्षात्कारिज्ञानात्मिकापि

(५) 'स्यादि'ति शेषः । यद्वा साक्षात्कारित्वेन रूपेण साक्षात्कारिणि ज्ञाने वैमत्यं भवति स च विशेषाभावान्न स्यादित्यर्थः ।

ङ्करोऽपि द्रष्टव्यः॥ दृष्टलिङ्गस्येश्वरस्य ज्ञानं परोक्षं भवितुमर्हति नत्वपरोक्षमिति तत्र परोक्षापरोक्षत्वविरोध इत्याह-। *d* 'सर्वज्ञमि'ति। धर्मि(१)ग्राहकमानाद्यदि तत्र साक्षात्त्वं तदा तत एवानुमितित्वमपि किं न स्यात्? प्रवृत्तेरुपादानगोचरापरोक्षज्ञानजन्यत्ववदिष्टसाधनतानुमितिजन्यत्वव्याप्तत्वादिति भावः॥ *e*"उक्तप्रकारे"ति। इन्द्रियजत्वादिप्रकारेत्यर्थः॥ *f*"न चे"ति। जातौ व्यञ्जकनियमानभ्युपगमात्प्रकृतेऽपि स नाभ्युपगम्यते इति न च वाच्यमित्यर्थः॥

मू०*a*किं मया दृष्टं तथा किं वा केनचित्कथितमिति संशयानुपपत्तेः। *b*प्रागनुभूतायां स्मर्यमाणायां तद्बुद्धौ तज्जन्मते मनसा ज्ञानरूपया प्रत्यासत्त्याप्रत्यक्षीक्रियमाणायां साक्षात्त्वाऽग्रहो विना व्यञ्जकाभावं कथं स्यात्?। *c*अथ धर्मश्च साक्षात्त्वमिति स्वप्रकाशवादे निरास्यमू(२)। *d*तथाप्यबाधितसाक्षात्त्वबुद्धिव्यवहारबलादन्ततः पदार्थान्तर(३)मपि साक्षात्त्वमननुमत्य न निस्तारोऽस्ति, भ्रान्ते(४)रभ्रान्तिपूर्वकत्वात्?*- इति चेन्न, *e*तस्या(५)पि साक्षाद्ग्रहे क्वचिदपि तद्विवादो न स्यादित्यादिदोषसाम्यात्। अनुमानादिवेद्यत्वे च लिङ्गाद्यनुपपत्तिः; *f*क च व्याप्त्यादिग्रह

(१) धर्मि=ईश्वरज्ञानम्। तद्ग्राहकं मानं च=ईश्वरस्य कार्यानुकूला प्रवृत्तिर्ज्ञानसाध्या प्रवृत्तित्वादस्मत्प्रवृत्तिवदिति।

(२) ईश्वराभिसन्धेः स्वप्रकाशवादे निरास्यमिति त्वहं न सम्भावयामि, अत एव च कर्तृकर्मविरोधखण्डनवेलायामिहैव मूले उक्तं "शेषं चैश्वराभिसन्धौ स्वप्रकाशवादे निर्वक्ष्याम इति। विद्यासागरास्तु कर्मलक्षणखण्डनेन तत्खण्डितमित्येव व्याचक्षते तदनुसार्य्यपि एव केषुचित्पुस्तकेषु निरस्तमिति पाठो दृश्यते। यद्वा, विद्यासागरस्यापि मदुक्तार्थे तात्पर्यम्।

(३) पदार्थान्तरम्=द्रव्यादिसप्तपदार्थातिरिक्तपदार्थम्।

(४) ननु भ्रान्तिसिद्धसाक्षात्त्वमित्यत आह भ्रान्तेरिति।

(५) तस्य=अवश्याभ्युपगम्यस्याऽनिर्णीतस्य साक्षात्त्वस्य। साक्षाद्ग्रहे=साक्षात्कारिज्ञानेन ग्रहे इत्यर्थः।

इत्यादिदुरुत्तरपरम्परैव(१) स्यात्। *g*सप्तपदार्थी(२)-नियमसाधनानि च कथं परिपन्थीनि न स्युरिति। **h*लिङ्गादिजत्वाभावसङ्केतवती धीः साक्षात्?*-इति चेन्न, परोक्षविषयसंशयादावतिव्याप्तेः। **i*ईदृशी प्रमा तथा?*-इति चेत्, *j*प्रत्यक्षप्रमाऽव्याप्तेः। *अनुमानाद्यव्यवच्छेद्यतदसाधारणकारणाऽजनित-धीः साक्षात्?*-इति चेन्न।

टी० ॥ *a* 'किं स्ये''ति। धर्मिदर्शनमात्रादेव साक्षात्त्वदर्शनात्संशयो न स्यादुत्पन्नो वा संशयो न निवर्त्ततेत्यर्थः॥ एतदेव स्पष्टयति-। *b* "प्रागि"ति॥ "अनुगतसाक्षात्त्वकल्पनैव श्रेयसितरे"ति यदुक्तं तत्राह— *c* "अर्थधर्म' इति॥ *d* "तथापी"ति। नहि वस्त्वन्तरेण प्रतीतिव्यवहाराविर्त्यर्थः। प्रतीतिबलायातस्यापि दोषदर्शनात्त्याग एवेत्याह-। *e* 'तस्यापी''ति। "लिङ्गादी" त्यादिपदात्सङ्केता(३)दिसङ्ग्रहः। *f* "क्वचे''ति। अनिर्णीताश्रयत्वात्साक्षात्त्वस्येत्यर्थः॥ साक्षात्त्वस्य परि .गणितपदार्थानन्तर्भावे दोषमाह-। *g* 'सप्ते''ति। नियमसाधनानि परिशेषानुमानानि॥ *h* "लिङ्गादी''ति। तत्र लिङ्गशब्दसादृश्यादेवं नास्ति तज्ज्ञानं प्रत्यक्षमित्यर्थः। अपरोक्षे इष्टापत्तिमाशङ्क्य "परोक्षे"ति। *i* ईदृशी''ति॥ लिङ्गादिजत्वाभाववतीत्यर्थः॥ साक्षात्कारिज्ञानलक्षणमभिप्रेत्याह—। *j* 'प्रत्यक्षे''ति। अनुमानादि च तद्व्यवच्छेद्यं चेति कर्मधारयः। तेनानुमानादेर्व्यवच्छेद्यस्य यदसाधारणं लिङ्गादिकारणं तदजनिता धीः साक्षाद्धीरित्यर्थः॥

---

(१) प्रथमतः साक्षात्त्वे न तावदभावो दुरुत्तरोऽनुमानप्रमाण्याङ्गीकारेऽपि लिङ्गानुपपत्तिर्दुरुत्तरा, इन्द्रियार्थसन्निकर्षजन्यादिलिङ्गस्वीकारेऽपि लिङ्गलिङ्गिनोर्व्याप्तिग्रहस्थलाभावो दुरुत्तर इति दुरुत्तरदोषपरम्परैव स्यादित्यर्थः।

(२) सप्तपदार्थानां समाहारः सप्तपदार्थी तन्नियमसाधकानीत्यर्थः।

(३) सङ्केतः=अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केताधुनिकसङ्केतयोरन्यतरः सङ्केतः शक्तिरिति यावत्।

मू० [a]एवं हि प्रत्यक्षात्तत्तदपरव्यतिरिक्ता(१)धीरनुमानादिरिति वैपरीत्यमेव कुतो न स्यादित्यविनिगम्यत्वं स्यात्। [b]तेषु व्यवच्छेद्येष्वेकैकव्यादिपरिहाराय व्यवच्छेद्यहेतुत्वजनितत्वेनापि साक्षात्त्ववत्तत्रतत्रानुगतबुद्ध्यन्तरापत्तेः। *[c]व्यवहारे सति निमित्तानुसरणं,नतु निमित्तानुसारेण व्यवहारः?*-इति चेन्न, [d]निमित्तस्या(२)नत्यापत्तिद्वारस्यैव कल्प्यत्वात्। [e]तज्जनितत्वाभावो हि तेनैव रूपेणानुगतव्यवहारानुगतप्रत्ययावादध्यान्नत्वत्येनापि। [f]तथात्वे यावत्परिदृष्टव्यक्तिविशेषान्यत्वेन व्यवहारोपपत्तौ गोत्वाद्युच्छेदप्रसङ्गः। तस्मात्

[g] विधिजः प्रत्ययोऽन्योयं व्यतिरेकासमर्थनः।
[h] नैवं चेदपराद्धं ते किमन्यापोहवादिना ॥४१॥

टी० ॥ [a] एवं ही"ति। प्रकारान्तरेण तदशक्यनिर्वचनमनुमानाद्यपि प्रत्यक्षादिकारणाजन्यत्वेन निर्वच्यमित्यन्योन्याश्रय(३)इत्यर्थः॥ दोषान्तरमाह-। [b] तेष्वि"ति। इन्द्रियाद्यजन्यतयानुमित्यादिषु लिङ्गाद्यजन्यतयोपमित्यादिषु साक्षात्त्ववत्(४)तत्तदुपाधिकल्पनाप्रसङ्ग इत्यर्थः॥ ननु

(१) प्रत्यक्षं च तत्तद् (शब्दोपमानादि) अपरं च तद्व्यतिरिक्ता धीरित्यर्थः।

(२) "निमित्तस्यानत्यापत्तिद्वारस्ये"ति व्यधिकरणे षष्ठी तथा चायमर्थः-निमित्तं चेदनतिप्रसक्तमस्ति तर्ह्यतिप्रसङ्गाऽनापादकस्य तस्य द्वारस्य (कारणस्या)ऽपि कस्यचित् कल्पनाऽऽवश्यकीति। यद्वा कल्प्यत्वात्=व्यवहारहेतुत्वेन कल्पयितुमुचितत्वादित्यर्थः। केषुचित्पुस्तकेषु तु "कल्प्यमानत्वादि"ति पाठस्तदपेक्षया "कल्प्यत्वादि"ति वरः पाठः।

(३) यद्यपि मूले न प्रत्यक्षादिकारणाजन्यत्वमुक्तं किन्तु प्रत्यक्षादिव्यतिरिक्तधीत्वमेव न वाऽन्योन्याश्रयो दोष उक्तः किन्त्वविनिगम्यत्वमेव तथापि मूलस्य पर्यवसितार्थमादायेत्थं व्याख्यानं द्रष्टव्यम्।

(४) प्रत्यक्षसाक्षात्त्वमखण्डोपाधिरनुमित्यादौ त्वनुमितित्वादि नाखण्डोपाधिः किन्त्विन्द्रियाद्यजन्यत्वमात्रं सखण्डोपाधिरिति सिद्धान्तः तत्रैवं साक्षात्त्वनिरुक्तौ तत्राप्यनुमितित्वाद्यखण्डोपाधिकल्पना प्रसज्येत, साम्यादित्यर्थः।

यथा साक्षात्त्वं व्यवह्रियते तथैव नानुमानादिगत एको धर्मस्त-त्कथं कल्पनीयः स्यादित्याह—। "व्यवहारे" इति ॥ यथा साक्षा-त्त्वकल्पनानिमित्तमनुमानादिकारणाजन्यत्वमनतिप्रसक्तं तथा-नुमानादाविन्द्रियाद्यजन्यत्वमपीति निमित्तसाम्यात्कल्पना स्यादेवेत्याह—। "निमित्तस्ये"ति ॥ दोषान्तरमाह—। "तज्ज-नितत्वे"ति । लिङ्गाद्यजन्यत्वेनैव साक्षात्कारिविज्ञानेष्वनुगत-प्रत्ययः स्यान्न तु साक्षात्त्वेनापीत्यर्थः ॥ "तथात्वे" इति । यथा-कारानुगतप्रत्ययोऽपि केसरादिमद्व्यक्तिविशेषान्यत्वेनैव स्यादि-त्यर्थः । यद्यपीत एवानिष्टप्रसङ्गात्साक्षात्त्वमनुभूयमानं दुरपलापं तथापि व्यतिरेकस्य न विधिव्यवहारनिर्वाहकत्वमिति भावः ॥ एतदेवाह—। "विधिश्च" इति । व्यतिरेकेणासमर्थनं यस्ये-त्यर्थः ॥ "नैवमि"ति । तथाचाऽगोव्यावृत्त्यैव गवाकारानुगत-धीरस्तु किं गोत्वेनेत्यर्थः ॥

मू० "शब्दानुमानोपमानजप्रमितिव्यतिरिक्तत्वे सति प्र-मितित्वं प्रत्यक्षलक्षणमभिधाय यः कोऽपि न त्रपते (१) स प्रष्टव्यः, किं प्रत्येकमिदं लक्षणं? मिलितं वा ? । नाद्यः, प्रत्येकं व्यभिचारात् । द्वितीये, किं मिलितानां निषेधः ? उत निषेधानां मिलितत्वम् ?। नाद्यः, प्रत्येकमेव व्यभिचारात् । नहि प्रत्येकम-नुमित्यादौ मिलिततद्रूपसम्भवः । नापि द्वितीयः, मिलितास्वनुमित्यादिषु निषेधमेलक(२)संभवेऽपि प्रत्यक्षत्वानभ्युपगमात् । * 'न बह्वाश्रयाणामुक्तनि-षेधानां लक्षणत्वमपि त्वेकाश्रयाणाम्? *-इति चेन्न, समुदायिभेदेऽपि समुदायस्यानुमित्यादिवदेक-तोपचारबीजाविशेषाभ्युपगम इति हि वक्ष्यते(३) ।

(१) न त्रपते = न लज्जते । (२) मेलकम् = मेलनम् ।

(३) परोक्षप्रमितित्वस्यानुमित्यादिषु मिलितास्वपि भावादित्यग्रिमग्रन्थेन वक्ष्यते इत्यर्थः ।

* [g]असमुदायत्वे(१)सतीत्यपि विवक्षितम् ? *-इति चेन्न, [h]समुदायत्वविशिष्टे एवांशतः स्वात्मनि वृत्तिविरोधभयेनासमुदायत्वस्यै(२)ष्टव्यत्वेन तादृशि प्रसङ्गो दुर्वारः । * [i]ज्ञानस्यैवं विवक्षितम् ? *-इति चेन्न, [j]विशिष्टस्यापि ज्ञानस्य ज्ञानत्वादेव ।

टी० ॥ ननु प्रतीतित्वं प्रतीत्यन्तरभिन्नत्वविशिष्टं मात्रात्वव्यवहारहेतुरिति विधित्वमेवेत्याशङ्क्याह—। [a]"शब्दे"ति । प्रत्येकमिलितदोषाऽज्ञानमेव त्रपाहेतु, व्यतिरेकविशिष्टस्योपाधेर्विधित्वाभिमानो (३)वा ॥ [b]"प्रत्येकमि"ति । अनुमित्यादिप्रत्येकान्योन्याभाववत्त्वे सति प्रतीतित्वस्यानुमित्यादिप्रत्येकातिव्यापकत्वमित्यर्थः ॥ [c]"नत्री"ति अनुमित्यादिसमुदायान्योन्याभावस्य प्रत्येकगतत्वेनातिव्याप्तिरित्यर्थः ॥ [d]"मिलिते-"ति । अनुमित्यादित्रयमेलके त्रितयान्योन्याभावमेलकसत्त्वेनातिव्याप्तिरित्यर्थः ॥ [e]"न बह्वाश्रयाणामि"ति । मिलिता अप्यनुमित्यादयो बहवः प्रत्यक्षं त्वेकोपाधिक्रोडीकृतमेकम्, एकनिष्ठत्वं लक्षणस्य विवक्षितमित्यर्थः ॥ [f]"समुदायी"ति । समुदायिनोऽनुमित्यादयो यद्यपि बहवस्तथापि तत्समुदाय एक एवेत्येकाश्रयत्वादतिव्याप्तिरित्यर्थः । अनुमितिषु यथा लिङ्गादिजत्वमेकमु(४)पचारबीजमेवमनुमित्यादित्रये प्रत्यक्षभिन्नत्वमैक्यनिबन्धनमस्त्येवेति भावः ॥ [g]"असमुदायत्वे"इति । तथा च नानुमित्यादिमेलकेऽतिव्याप्ति,स्तस्य समुदायत्वादित्यर्थः ॥ [h]"समुदायत्वे"ति । एवमप्यनुमित्यादिमेलकेऽतिव्याप्तिस्तस्य समुदायत्वविशिष्टस्यासमुदायस्यात्माश्रयभयेन स्वीकार्यत्वादित्यर्थः ॥

(१) असमुदायत्वे सति = समुदायत्वानाश्रयत्वे सति ।

(२) असमुदायत्वस्य = समुदायत्वानाश्रयत्वस्य ।

(३) वस्तुतो व्यतिरेकविशिष्टस्योपाधेरप्यंशतो व्यतिरेकरूपत्वैवेत्यत उक्तमभिमान इति ।

(४) "एकतोपचारबीजमि"ति तु क्वचित् पाठः ।

"“ज्ञानस्ये”ति । अनुमित्यादिमेलकस्य ज्ञानत्वाज्ञातिव्याप्तिरित्यर्थः ॥ "“विशिष्टस्ये”ति । समुदायत्वविशिष्टानुमित्यादेरपि ज्ञानत्वादतिव्याप्तिरेवेत्यर्थः ॥

मू० "‘एके’ति च किमाश्रयव्यक्त्यभेदो विवक्षितः?-१ उताऽभिन्नजातीयता ?-२ उतैकोपाधिकता ?-३ उतैक-(१)सङ्ख्या योगिता ?-४ उत द्व्यादिसङ्ख्यायोगाभावः ? ५ । "आद्ये तद्विशिष्टस्या(२)व्यापकतादोषः, 'व्यक्त्यात्मनोऽभेदस्य व्यावृत्तत्वात् । "धर्मिणा च लक्षणस्य विशेषणेऽलक्ष्यधर्मत्वं धर्मस्य स्यात्, स्वस्यैव(३)स्वधर्मत्वानुपपत्तेः । 'आश्रयाभेदस्योपलक्षणत्वे प्रागुक्तदोषः । द्वितीये तदेवाभिन्नजातीयत्वं लक्षणमस्तु, अवश्यन्तया प्राथम्येन प्रतीयमानत्वात् । न तृतीयः, 'परोक्षप्रमितित्वस्यानुमित्यादिषु मिलितास्वपि भावात् । नापि चतुर्थः, वैशेषिकपक्षे "गुणतया तदभावात् ।

टी० ॥ एकाश्रितोनुमित्यादिनिषेधमेलको लक्षणमिति यदुक्तं तत्रैकत्वं विकल्पयति—। "“एकेति चे”ति ॥ "“आद्ये” इति । एवं सत्येकस्या एव प्रत्यक्षव्यक्तेः सङ्ग्रहे लक्षणस्य व्यक्त्यन्तराव्यापकत्वमित्यर्थः ॥ "“व्यक्त्यात्मन” इति । एकत्वस्य व्यक्तिस्वरूपाभेदस्य व्यावृत्तत्वादित्यर्थः ॥ एकलक्ष्याश्रयत्वं च लक्षणविशेषणं चेत्तदा लक्ष्यवृत्तिता लक्षणस्य न स्यादित्याह—। "“धर्मिणे”ति । एकाश्रयत्वं लक्षणे न विशेषणं येनाल-

(१) एकद्व्यादिशब्दा भावप्रधाननिर्देशत्वेनैकत्वद्वित्वादिसङ्ख्यापराः ।

(२) तद्विशिष्टस्य=आश्रयव्यक्त्यभेदघटितलक्षणस्येत्यर्थः ।

(३) एकलक्ष्याश्रयत्वमित्यत्र विशेषणविधयैकव्यक्तिरूपलक्ष्यस्यापि लक्षणे प्रवेशात्पुनस्तस्य लक्षणात्मकधर्मस्य लक्ष्यवृत्तिता न स्यात्, स्वस्य स्ववृत्तितानुपपत्तेरित्यर्थः क्वचित् “धर्मस्ये” त्यस्य स्थाने लक्षणस्येत्येव पाठः ।

स्वधर्मता स्यात् किन्तूपलक्षणमिति न स्ववृत्तितेत्याशङ्कयाह—। "आश्रये"ति। अनुमित्यादयोप्याश्रयाभेदोपलक्षिता इति प्रागुक्तातिव्याप्तिरित्यर्थः ॥ एकोपाध्यवच्छिन्नाश्रयत्वं यदि लक्षणे विशेषणं तदा परोक्षप्रमितित्वरूपैकोपाध्यवच्छिन्नानुमित्यादिमेलकातिव्याप्तिरेवेत्याह—। "परोक्षे"ति। प्रत्यक्षमात्रवृत्त्युपाधिविवक्षायां तेनैवान्यथा(१)सिद्धिरिति भावः ॥ "गुणत्वे"ति। अनुमित्यादिव्यतिरेकमेलकस्यैकत्वसङ्ख्यासामानाधिकरण्य प्रत्यक्षे गुणे न सम्भवतीत्यर्थः ॥

मू० "भावे वाऽनुमित्यादित्रयवृत्तीनां त्रयाणामप्यभावानामेकत्वसङ्ख्यासामानाधिकरण्यसम्भवात्. मिलितानां(२)मेकसमुदायापेक्षया तथात्वात्। नापि पञ्चमः, वैशेषिकमतानुसारेणानुमित्यादित्रयेपि तदभावस्य तुल्यत्वात्। अतदनुसारेण (३)प्रत्यक्षव्यक्तिष्वपि द्व्यादिसङ्ख्यायोगात्। * तथापि नैकस्यां प्रत्यक्षव्यक्तौ द्व्यादिसङ्ख्यापरिसमाप्तिः(४), द्व्यादिसङ्ख्यापरिसमाप्त्यभावश्च तदभावशब्देन विवक्षितः ?*—इति चेन्न, का हि परिसमाप्तिर्यैकस्यां व्यक्तौ नास्तीत्युच्यते?। * तत्रैव वृत्तिर्द्व्यादेः परिसमाप्तिः, सैकस्यां व्यक्तौ नास्ति?।* —इति चेन्न, एवमेकत्वस्यापि न क्वचित्परिसमाप्तिः स्यात्। नहि तस्य तत्रैव वृत्तिरन्यस्यैकत्वाभावप्रसङ्गात्। अत एकत्वसङ्ख्यावन्यामेव व्यक्तौ द्व्यादिपरिसमाप्तिरित्य-

---

(१) प्रत्यक्षणस्येति शेषः।

(२) मिलितानां त्रयाणामभावानामेकसमुदायापेक्षया तथात्वात् = एकत्वसङ्ख्यासमानाधिकरणत्वादित्यर्थः।

(३) अतदनुसारेण = वैशेषिकमताऽननुसारेण। "द्व्यादिसङ्ख्यायोगात्"—इत्यतोऽग्रे 'न तदभावः इत्यव्याप्तिरसम्भवो वा'—इति शेषः।

(४) परिसमाप्तिः = पर्याप्तिः सर्वत्र प्रकृते ग्राह्या।

विशेष एव । * एकव्यक्तिगतैकत्वसङ्ख्याव्यक्तिर्नान्यत्र ? *—इति चेन्न, सत्ताव्यक्तेरप्येवम्भावप्रसङ्गात्, "अननुगतत्वापत्तेश्च(¹)। * सत्तैकैव जातिरूपा, एकत्वं तु प्रतिव्यक्ति भिन्नं गुणपदार्थः ? *—इति चेन्नूनं वैशेषिकैर्विप्रलब्धोसि । कथमन्यथा सदेकप्रत्यययोरनुभवव्यवहारविशेषमपश्यन्नपि कानिचित्कानिचिदसम्बद्धान्यक्षराणि प्रलपसि । * सत्तैकत्वयोः परापरत्वानुपपत्तेर्नैवं(²)स्यात् *—इति चेन्न,

टी० ॥ अभ्युपेत्याह -। "“भावेवे”ति । अनुमित्यादिसमुदायस्यैकतया तत्राप्यभावमेलकसत्त्वालक्षणमतिव्यापकमेवेत्यर्थः ॥ '“वैशेषिके”ति । द्व्यादिसङ्ख्याविरहिण्यनुमित्यादावतिव्याप्तितादवस्थ्यादित्यर्थः ॥ '“अतदि”ति । सङ्ख्यायाः पदार्थान्तरत्वाभ्युपगमे इत्यर्थः । यथाऽनुमानादित्रये द्वित्वं त्रित्वं वा परिसमाप्यते तथा नैकस्यां प्रत्यक्षव्यक्तावित्यपरिसमाप्तद्वित्वादिप्रत्यक्ष(³)मेकमेवेत्याशङ्कते—। "“तथापी”ति । धीव्यवहारयोस्तन्मात्रगतत्वं तत्र परिसमाप्तिः, तच्च नैकत्वस्यापीत्याह—। ᵉ“एवमि”ति ॥ ᶠ“अत” इति । यदेकं तद्द्रव्यमपीत्यविशेषाल्लक्षणे विशेषणोपादानमनर्थकमेवेत्यर्थः ॥ ᵍ“अननुगतत्वे”ति । एवं सत्येकव्यक्तिमात्रवृत्तिता लक्षणस्य स्यादित्यर्थः ॥

मू० "साम्यात् । ᵇजातिपरापरत्वध्रौव्यमेव च क्वाप्येकस्य न्यूनवृत्तित्वे प्रमाणं स्यात् । * क्व तथा ? *—इति चेन्न,

(१) 'लक्षणस्ये'ति शेषः ।

(२) यद्येकत्वं जातिस्तर्हि सत्ताद्रव्यत्वयोरिव परापरभावो वाच्यस्तन्न सम्भवति सत्तायां सत्तावैधुर्येप्येकत्वभावेन न सत्तापरं नाप्येकत्वं परमेकत्व एकत्वाभावेपि सत्ताभावाद्द्व्यादौ च तयोः साङ्कर्यादेकत्वं गुण एवेत्यर्थः नैवं स्याद्, एकत्वं जातिर्नस्यादित्यर्थः ।

(३) अपरिसमाप्तं द्वित्वादि यत्र प्रत्यक्षे तदित्यर्थः ।

शैलेऽनलस्यानुमायामपि वव हस्तवितस्त्यादौ तदंशे इत्यनिश्चयवददोषत्वात् । * अथास्तु मा(१) वासीदेकत्वमनुगतं किमनेनात्र निरूपितेन द्वित्वादिर्यत्र न समाप्यतेऽभिहिताभावत्रयं चास्ति तत्प्रत्यक्षमिति * । मैवम्, अनुमित्यादित्रयेपि न त्रित्वं परिसमाप्तम् । एवं (२)सत्यन्यानि त्रीणि न स्युः । * अन्या सा त्रित्वव्यक्तिर्याऽन्यत्र ? *—इति चेन्न, "त्रित्वव्यक्तेः कस्याश्चिदनुमित्यादित्रये परिसमाप्त्यभावात् । * काचिदपि त्रित्वव्यक्तिर्यत्र न समाप्यते ? *--इति चेन्न, अव्यापकत्वात् । 'प्रत्यक्षत्वस्य त्रित्वव्यक्तेश्चावश्यं सामानाधिकरण्यस्य वैशेषिकमताभ्युत्थितेन भवताऽभ्युपगन्तव्यत्वात् । 'अन्यथा प्रत्यक्षव्यक्तयस्त्रिसो न स्युः । तदेव हि त्रिरित्यभिधीयते यत्र त्रित्वं परिसमाप्यते ।

टी० ॥ "मास्त्वा[दि]"ति । सत्ताया एव गुणत्वमुभयोर्वा गुणत्वं स्याद्विनिगमनाऽभावादित्यर्थः । एकस्या कस्याञ्चिद्व्यक्तौ सत्तापरिहारेणैकत्ववृत्तौ स्यादेव पराऽपरभाव इत्याह—। '"जा[ती]"ति । विशेषानिश्चयस्य प्रमाणादोषत्वमाह--। "शैले" इति ॥ "त्रित्वव्यक्ते[रि]"ति । एकस्या अपि त्रित्वव्यक्तेरपरिसमाप्तौ त्रित्वापरिसमाप्ते सत्त्वादित्यर्थः । अव्याप्ति-

---

(१) मावासीदित्यत्रमावा आसीदिति च्छेदः । नायं माङ्शब्दः किन्तुमाशब्दः' माङङ्गीकारे "माङिलुङि"ति सर्वलकारापवादभूते लुङिसति "अस्तेर्भू"रिति प्रकृतेर्भूभावेन मावाभूदित्यापद्येत । माशब्दयोगेतु न तथा माङोयोगे एव तथाविधानात् इतरथामेत्येवसूत्रयेत अतएव "कथन्तर्हिमाभवतु, माभविष्यतीति ऽनायं माङ्किन्तु माशब्दः" इतिप्रमादाधुस्तद्विदः । तथा च मावासीदित्यस्य न वासीत् स्यादित्यर्थो द्रष्टव्यः ।

(२) अनुमित्यादित्रये एव त्रित्वसमाप्त्यङ्गीकारे दोषमाह-एवमिति ।

मुपपादयति—। "'प्रत्यक्षत्वस्ये"ति । वैशेषिकमतमुपेत्य प्रतीतिबलात्प्रत्ययत्रयप्रतीतिषु गुणभूतास्वपि त्रित्वमभ्युपेयमित्यर्थः ॥ प्रतीतिमेवाह—। ''"अन्यथे"ति ॥

मू० "किञ्च, तथापि स एवातिव्यापकतादोषः । त्रित्वेनावच्छिन्नास्वनुमित्यादिव्यक्तिषु त्वदभिमतमभावत्रयमस्तीति तत्र प्रत्यक्षलक्षणं गतमित्यतिव्याप्तिरुक्ता, तद्व्यावर्तनाय भवताऽभिधीयते काचिदपि त्रित्वव्यक्तिर्यत्र न समाप्यते इति, नचैवमुक्तेऽप्यसावतिव्याप्तिर्निवर्तते तत्राप्युक्तविशेषणस्य विद्यमानत्वात् । नहि त्रित्वावच्छिन्ने तस्मिँस्त्रित्वव्यक्तिः काचिदपि समाप्यते । त्रित्वलक्षणैकोपाध्यवच्छिन्ने तस्मिँस्त्रित्वव्यक्त्यन्तरं (१)भवदप्याश्रयान्तरमादाय वर्तते, न तु तत्रैव परिसमाप्यते । "यत्र चोक्तमुपाधिभूतं त्रित्वं, तेषु यदि त्रित्वसमाप्तिर्धर्मिषु दृश्यते, तदा तद्दर्शनेन तत्र धर्मिमात्रे लक्षणाऽव्यावृत्तिः सिध्येत्, नतु त्रित्वविशिष्टे धर्मिणि । तस्मादतिव्यापकत्वं तदवस्थमेव । "अभावत्रयं च त्रित्वोपाध्यवच्छेदेन समुदिततामुपगतवति विशिष्टे धर्मिणि वर्तते, नत्वविशिष्टे. "प्रत्येकमभावत्रयावस्थानस्य तेषु वक्तुमशक्यत्वात् ।

टी० ॥ 'काचिदपि त्रित्वव्यक्तिर्यत्र न परिसमाप्यते'—इति विशेषणदानेऽप्यनुमित्यादित्रये त्रित्वावच्छिन्ने स्वविशिष्टे स्ववृ-

(१) त्रित्वावच्छिन्न—घट—पटैतस्त्रितये वर्तमानं यत्त्रित्वं तद् यद्यपि त्रित्वावच्छिन्नेपि वर्तते तथापि घटपटलक्षणमाश्रयान्तरमादायैव, नतु केवले त्रित्वावच्छिन्ने वर्तते—इत्यर्थः ।

स्तित्रयात्मप्रथमत्रित्वविशिष्टे (१)त्रित्वान्तरस्य च त्रित्वत्वेनैकीकृते परिसमाप्त्यनुपपत्तेरतिव्यापकत्वं तदवस्थमेवेति "किञ्च"इत्यादिना "ऽतिव्यापकत्वं तदवस्थमेव"इत्यन्तेन विशदयन्नाह ॥ [a]"किंचे"ति । नन्वनुमित्यादिषु परिसमाप्तमेव प्रथमत्रित्वमिति कुतोऽतिव्याप्तिरित्यत आह-। [b]"यत्र चे"ति । धर्मिमात्रेऽतिव्याप्तिर्नोक्ता, किन्तु त्रित्वावच्छिन्ने, तत्र च त्रित्वापरिसमाप्तेरेवेत्यर्थः ॥ प्रत्येकं धर्मिणि नानुमित्याद्यन्योन्याभावत्रयमिति विशिष्टे तत्सत्त्वेन प्रागपि नैवातिव्याप्तिरुक्ता, सा चाद्यापि न परिहृतेत्याह-। "अभावे"ति ॥ [d]"प्रत्येकमि"ति । अनुमितावनुमित्यन्योन्याभावाभावादित्यर्थः ॥

मू० "अथ मन्यसे-- *तादृशस्य विशिष्टस्य प्रमितित्वेनैव व्यवच्छेदः, न ह्यभावत्रयवत्त्वं (२) विशेषणमाश्रयकोटावन्तर्भाव्य तासु व्यक्तिषु प्रमितित्वं वर्तते(३) किंतु तेषां धर्म्मिणां स्वरूपमात्रे, उक्ताभावत्रयं प्रमितित्वं चेत्येतद्यत्रास्ति तत् प्रत्यक्षमिति हि ब्रूमः? *-इति, न, [h]भवतापि भिन्नधर्मावच्छिन्नस्यैव (४)धर्मिणः प्रमितित्वमभावत्रयवत्त्वं चावश्यमभ्युपगन्तव्यम् । तथाहि.--यदि प्रमितित्वस्य क्वाचित्कत्वे नियामकं नोच्यते तदा सर्वा प्रमितिः स्यात्, न वा काचिदपि ।

---

(१) अत्र "प्रथमत्रित्वस्य" इति शेषो द्रष्टव्यः ।

(२) अभावत्रयवत्त्वम्=सामानाधिकरण्यसम्बन्धेनाऽभावत्रयविशिष्टं त्रित्वमित्यर्थः । तासु=अनुमित्यादिषु ।

(३) नहि वर्तते-इति सम्बन्धः, विशेषणीभूते त्रित्वेपि प्रमितित्वप्रसङ्गादिति तत्र हेतुः पूरणीयः ।

(४) भिन्नधर्मावच्छिन्नस्य=अन्यान्यधर्मावच्छिन्नस्य । तथाहि प्रत्यक्षे यथार्थानुभवत्वाद्यवच्छेदेन प्रमितित्वं प्रत्यक्षत्वावच्छेदेनाभावत्रयवत्त्वं च वाच्यम् । तथाचाभावत्रयप्रमितित्वयोर्वैयधिकरण्याल्लक्षणाऽसिद्धिरिति भावः ।

सर्वत्र सत्ताऽसत्ता वा नियमेऽन्यानपेक्षया(१) ।
नियामकाद्धि भावानां क्वाचित्कत्वस्य सम्भवः॥४२॥

तन्नियामक(२)माश्रये विशेषणीभूतं वक्तव्यमुपलक्षणीभूतं वा ?। आद्ये (३)यदेव प्रमितित्वस्याऽऽश्रये विशेषणं तदेव यद्यभावत्रयस्यापि तदा त्रित्वावच्छिन्नेनुमित्यादा(४)वभावत्रयस्य दर्शितत्वात्तत्र प्रमितित्वेनापि त्रित्वावच्छिन्ने भवितव्यमिति प्रमितित्वान्न तद्व्यवच्छेद: ।

टी० ॥ विशिष्टे चेदतिव्याप्तिस्तदा प्रमितित्वेनैव तद्व्यवच्छेद:, नहि विशिष्टे प्रमितित्वमित्याशङ्कते—। [a]"अथे"ति । प्रमितित्वमपि यथार्थानुभवत्वादिविशिष्टे वक्तव्यमन्यथातिप्रसङ्ग इति प्रकृतेपि त्रित्वविशिष्टे प्रमितित्वं नानुपपन्नमिति परिहरति—। [b]"भवतापी"ति । यदवच्छिन्ने प्रमितित्वं तदवच्छिन्न एवाभावत्रयं चेन्न वाच्यं तदा त्वत्पक्षे लक्षणस्यासम्भव एवेत्यग्र भावाभिव्यक्ति: ॥

मू० "अथान्यावच्छिन्ने प्रमितित्वमन्यधर्मावच्छिन्ने चाऽभावत्रयसम्बन्ध,स्तदा (५)नास्ति त्वत्पक्षेपि प्रमितित्वस्यैकधर्मविशिष्टाश्रयत्वलक्षणमेकाश्रयत्वम् । विशिष्टेपि धर्मिण्याश्रितो (६)धर्म्याश्रित एवेति कृत्वा

(१) अन्यानपेक्षया नियमे (स्वीक्रियमाणे) सर्वत्रसत्ताऽसत्ता वा स्यादिति सम्बन्धः ।

(२) प्रमितित्वस्य यद्यथार्थानुभवत्वादिरूपं नियामकमवश्यं वक्तव्यं तन्नियामकमित्यर्थः ।

(३) यदि विशेषणं तदापि प्रमितित्वाश्रयविशेषणमेवाभावत्रयस्यापि नियामकतयाऽऽश्रयविशेषणभूतं स्यादिति तत्र प्रथममनुवदति आद्य इति । द्वितीयमनुवदति अथेति ।

(४) अनुमित्यादौ = अनुमित्यादिसमुदाये ।

(५) एवं सति प्रमितित्वाभावत्रयवत्त्वयोर्वैयधिकरण्यादसम्भव एव लक्षणस्येत्याह--तदेति । अभावत्रयेण सहेति शेष: ।

(६) यथा शाखावच्छिन्नसंयोगविशिष्टे वृक्षे धर्मिण्याश्रितो मूला-

प्रमितित्वस्याभावत्रयसमानाश्रयत्वेऽनुमित्यादित्रयेऽपि प्रसङ्गस्तदवस्थः । नापि द्वितीयः, उपलक्षणीभूतेन केनचिद्धर्मेण (१)योऽसावुपलक्षितो धर्मी स एव खलु त्रित्वविशिष्टः, विशेषणवतोऽपि यावद्विशेष्यवस्तुनो विशेष्यवस्त्वात्मकत्वात्, यथा दण्ड्यपि पुरुषः पुरुष एव । एवं च सत्युपलक्षितादनन्यभूते त्रित्वविशिष्टेऽप्यनुमित्यादौ प्रमितित्वमाश्रितं, नियामकेनोपलक्षणेनोपलक्ष्याभेदव्यवस्थिततया तस्याप्यवच्छिन्नत्वात् । [b]तथाचातिव्याप्तिर्वज्रलेपायिता । *[c]तथाप्युपलक्षकेण त्रित्वविशिष्टतया नोपलक्षितोऽसौ धर्मी, किन्तु स्वरूपेण *—इति चेन्न, उक्तमत्र यदेव तदुपलक्षितं तदेव विशिष्टमपि ।* तथापि विशिष्टेन रूपेण तावन्नोपलक्षितम् * ? इति चेत्, [d]सोपलक्षि, अविशिष्टेनापि तन्नोपलक्षितमेव । [e]अन्यथा प्रकृतेऽपि वैयधिकरण्यापत्तेः । तदास्तामुल्लसत्पल्लववचनविलसितेनेति । तदेवं लक्षणान्तरेऽपि प्रतिपादितोऽयं दूषणसमूहः स्वयमूहनीयः ।

टी० ॥ भावमेवाभिव्यनक्ति- । [a]"अथे"ति ॥ [b]"तथाचे"-ति । त्रित्वविशिष्टप्रमितित्वमभावत्रयवत्त्व चानुमित्यादित्रयेऽपीत्यतिव्याप्तिरेवेत्यर्थः । [c]"तथापी"ति । उपलक्षकतायां वैशिष्ट्यमपि नावच्छेदकमित्यर्थः । अवैशिष्ट्यमपि न तथेत्याह—। [d]"सोपलक्षी"ति ॥ [e]"अन्यथे"ति । प्रमितित्वस्याभावत्रयस्य च नानाधर्मावच्छेद्यत्वेन वृत्तावित्यर्थः ॥

वच्छिन्नस्तदाभावोऽपि धर्म्याश्रित एव तथाऽन्यधर्मावच्छिन्नप्रमितित्वविशिष्टे प्रत्यक्षे धर्मिण्याश्रितेऽन्यधर्मावच्छिन्नोऽभावत्रयसम्बन्धोऽपि धर्म्याश्रित एवनियामकधर्मविशिष्टयोर्भेदेऽपि प्रत्यक्षस्य धर्मिण एकत्वादित्यर्थः ।

(१) केनचिद्धर्मेण = यथार्थानुभवत्वादुष्टकारणोद्भवत्वादिना ।

मू० एतदेव परामृश्य भट्टैरिदमुदाहृतं लक्षणस्याभिधानं तु केनांशेनोपयुज्यते "अन्याभिप्रायेोक्तमपि हि तत्सामान्यतोऽप्युपपद्यमानमेवेति ([1]) अनुमानमपि ([2])किमुच्यते "करणपक्षे लिङ्गपरामर्शोऽनुमानमिति चेत् किं लिङ्गत्वं व्याप्तस्य पक्षधर्मत्वमिति चेत् संशयस्योपलक्षणत्वे तत्र दृष्ट्वापि व्यापकं तत्परामर्शेतिप्रसङ्गात् "अत एव न तस्य वर्तमानस्य "अतत्कालेप्युपलक्षणत्वात् विशेषणत्वेचानुमाय व्यापकं धर्म्मिनाशवदप्रवृत्त्यापत्तेः ([3]) * "पक्षधर्माद्धेतोः पक्षांशे विशेष्ये साध्यसिद्धिरीदृशं च वैयधिकरण्यमिष्टमेवेत्यतो नैवम् ?* इति चेन्न, ।

टी० ॥ ननु चोदनैव प्रमाणमेवेति च प्रतिज्ञाद्वयं निर्वाच्यं तत्र च पदार्थानां लक्षणमनुपपन्नमिति भट्टतात्पर्येण तु लक्षणानां समानासमानजातीयव्यवच्छेदो न फलमिति तदभिप्रायस्तथात्र प्रकृतानङ्गतमिदमत आह–। "“अन्ये”ति । "“करणपक्षे” इति । भावसाधनत्वनिवृत्त्यै([4])पक्षधर्मत्वमिति हि सन्दिग्धसाध्यधर्मा धर्मी पक्षस्तद्धर्मत्वं तत्र सन्देहस्योपलक्षणतां दूषयति–। “संशयस्ये”ति । वह्निज्ञाने वृत्तेऽपि धूमपरामर्शः करणं स्यादित्यर्थः लिङ्गपरामर्शस्तत्र करणमेवानुमित्यनुत्पादस्तु सिद्धसाधनादिति न वाच्यम् लिङ्गपरामर्शस्य चरमकारणत्वोपगमादिति भावः ननु व्यापकनिश्चयेन विरोधिना तत्र संशयस्य

---

(१) { प्रत्यक्षं खण्डितं मागन्तामभिरुपपत्तिभिः ।
सुदृढं खण्ड्यतेऽद्यानुमानं परिकराश्रितम् ॥ }

(२) अनुमान दूषयितुं पृच्छति किमिति ।

(३) धर्मीति, धर्मी पर्वतादिर्नष्टो यस्य वह्न्यादेः साध्यस्य तत्र धर्मिनाशवद्ह्रदादौ वह्न्याद्यनुमित्यनुपपत्तेरित्यर्थः ।

(४) भावसाधनत्वनिवृत्त्यै = अनुमितिरनुमानमिति भावव्युत्पत्तिकत्वनिवृत्त्यै ।

नाशाद्वा तस्योपलक्षणत्वं यत्र न वर्तमानस्तत्रोपलक्षणं भवत्येवेत्यत आह-[d]"अत एवे"ति। वर्तमानस्योपलक्षणत्वमितिशेष.॥ "अत एवे"ति। वक्ष्यमाणहेत्वतिदेशः तमेवाह-[e]"अन्तकाले" इति। [f]"(१) विशेषणत्वे" इति। सन्देहविशिष्टो धर्मी यदि पक्षस्तदा सन्देहनाशे विशिष्टस्य पक्षस्यापि नाशादनुमायां जातायामपि साध्यं कुत्र वर्ततेत्यर्थः ननु विशिष्टस्य पक्षत्वेपि तद्धर्मीद्धमात्रे विशेष्यमात्रे साध्यसिद्धिरिति तस्यावस्थानादनुमितवह्निस्तत्रैव प्रवर्तते नवान्यधर्मादन्यत्र साध्यसिद्धावतिप्रसङ्गो विशिष्टधर्मस्य विशेष्ये साधकत्वनियमाभ्युपगमादित्याशङ्कते-। "'पक्षे"ति।

मू० [a]"पक्षमादायैव वैयधिकरण्ये नियतसामानाधिकरण्यलक्षणव्याप्तिलोपापत्तेः * [b]तथापि विशेष्यमादाय सास्ति ? * इति चेन्न, 'साध्यविशेषसिद्धिरपि यत्र व्याप्तिबलायातं सामान्यं तत्र सामान्यप्रतीत्यपर्यवसानबलादेवेति सामान्यविशेषसिद्ध्यनुपयोगिनी पक्षधर्मता त्वदिष्टा केवल सिद्धसाधनपरिहारायानुमितिकारणत्वेनेष्टव्या सिद्धसाधनं च न स्वार्थानुमाने दोष इति नानुमितिमात्रहेतुनिवेशनी(२)सेति [d]मोक्षमाणैर्हि "(३)आगमेनानुमानेन ध्यानात्प्र-

(१) अथाज्ञातसतस्सन्देहस्य विशेषणत्वमाहोस्विज्ज्ञातसतः नाद्यः अज्ञातसतस्तस्य विशिष्टबुद्धिनियामकत्वेन विशिष्टबुद्धिविषयतामन्तरेण पर्वतादेः पक्षत्वानुपपत्तेरतएव नाज्ञातस्य विशेषणत्वमपीतराव्यावर्तकत्वात्-नहि स्वरूपसत्त्वमात्रेण विशेषणं सम्भवति येनाज्ञातस्यापि विशेषणत्वमङ्गीक्रियेत तदेव हि विशेषणं यद्व्यावर्त्तयतीतरस्माद्विशेष्यमज्ञातस्य च विशेष्या व्यावर्त्तकत्वादिति नाज्ञातस्य विशेषणत्वम्। नापि द्वितीयः ज्ञातस्य व्यावर्त्तकत्वेपि ज्ञानस्य स्वोत्पत्तितृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेनेति सन्देहनाशानन्तरं विशिष्टस्य पक्षस्यापि नाशाज्जातायामनुमितौ साध्यं निराश्रयं स्यादित्याह-विशेषणत्वे-इतीति-

(२) सेति-पक्षधर्मतेतीत्यर्थः।

(३) अत्रागमेत्यादिना न शब्दादिप्रमाणमभिप्रेतमपि तु श्रवणादित्रयम्। मैगलभाचार्यास्तु "आगमेनानुमानेने"त्यादिपद्येन न

(१)त्यक्षेण न च त्रिधात्मनि प्रमाणानां(२)सम्प्लवः स्वार्थमुच्यते" इति "(३)एतेन संशययोग्यतापि निरस्ता ।

टी० ॥ एवं सति लिङ्गलिङ्गिनोः सामानाधिकरण्यं व्याप्तिरिति यदुच्यते तद्भज्येतेति परिहरति ॥ ""पक्षमादाये"ति । ननु विशिष्टे सामानाधिकरण्याभावेपि विशेष्ये तदुभयसामानाधिकरण्यसत्त्वान्न व्याप्तिलोप इत्याशङ्कते—। ""तथापी"ति । एवं सति पक्षधर्मता नानुमित्यङ्गं स्याद् व्याप्तिबलादेव सामान्यं सिध्यद्विशेषमादायैव सेत्स्यतीति विशेषसिद्धावपि तदनुपयोगादिति परिहरति -। ""साध्यविशेषे"ति । स्वार्थानुमाने सिद्धसाधनस्यादोषत्वमाह—। ""मोक्षमाणैरि"ति । मुनोऽकर्मकस्य मति रूपं तथाच मुमुक्षुभिरित्यर्थः आगमावगतात्मनि मननबोधनात् सिद्धसाधनं न दोष. श्रुतिबोधितेष्टसाधनताकस्य मननस्यानुमित्साहेतुकत्वेन तत्र संशयस्यानपेक्षणात् प्रकारान्तरेण श्रवणं तदन्यप्रकारेण सशयान्मननमित्यसारं श्रवणमननयोः समानप्रकारकत्वावगमादिति भाव· ॥ ""एतेने"ति । पक्षधर्मताया अनङ्गत्वप्रदर्शनेन साधकबाधकमानाभावलक्षणसंशययोग्यताघटित पक्षत्वं निरस्तमित्यर्थः यद्वा साधकमाने सत्यपि मननप्रवृत्तिदर्शनेनेत्यर्थः ।

श्रवणादि त्रयमभिहितमपि तु "ध्यानात्प्रत्यक्षणेन चे"ति द्वितीयपादेनानुमानानन्तरं प्रत्यक्षवदागमानन्तरमनुमानभिधीयत इत्यर्थं ब्रूवते तथा चैतन्मतेप्यागमिकात्मावगमान्तरमनुमानविधानान्न पक्षतायास्सर्वत्र हेतुत्वं तत्र प्रगल्भाचार्य्यकृत स्वार्थस्सम्पगिति मन्ये तत्र सिद्धिसत्त्वेप्यनुमितिदर्शनेन न पक्षतायास्सर्वत्रकारणत्वमिति पक्षधर्म्मताहेतुत्वनिरासकप्रकृतग्रन्थोपयोगित्वात्तदर्थस्य श्रवणानन्तरं मननबोधने तु मनस्यापि साक्षात्काररूपत्वेन सिद्ध्यनन्तरमनुमितेरबोधनान्न तद्ग्रन्थस्य पक्षधर्मताहेतुत्वनिरासकत्वं सम्भवति श्रवणादि त्रितयविधानवादिमत इति । (१) प्रत्यक्षणेनेति प्रत्येकमागमाद्यन्वयि ।

(२) सङ्करः । एकधर्मिगोचरत्वमिति यावत् ।

(३) ननु तत्र साधकमानाभावरूपायाः पक्षधर्मताया असत्त्वेपि संशययोग्यत्व रूपापक्षधर्म्मतास्त्येवेति न पक्षतायामनुमितिमात्रहेतुत्वनिरास इत्यत आह-एतेनेति ।

मू० "व्याप्यत्वमिति चेत् किं वस्तुगत्या व्याप्यस्य स्वरूपेण परामर्शोऽनुमानं व्याप्यतया वा नाद्यः "अगृहीतव्याप्तिनापि धूमादिपरामर्शस्यानुमानताप्रसङ्गात् नापि द्वितीयः "व्याप्त्युल्लेखिनः प्रमाणस्यानुमानत्वप्रसङ्गात् तस्यापि (¹)व्याप्यत्वग्राहिताया अवश्यं वक्तव्यत्वात् "अत एव द्वितीयतृतीयविशेषणे अपि निरस्ते "धारावाहिनि तथात्वापत्तेः "गृहीतव्याप्तिना च युगपदुभयग्रहणे द्वावेतौ व्याप्यव्यापकाविति परामर्शस्यानुमानत्वप्रसङ्गात् * नच तदनुमानमेव*, असन्दिग्धतया पक्षत्वाभावेन तद्धर्मस्य हेतोः सिद्धसाधनव(²)दपक्षधर्मत्वात् * स्वार्थानुमाने नायं दोष ?* इति चेन्न, "प्रत्यक्षलक्षणोपपत्त्या साक्षात्त्वासाक्षात्त्व विरोधापत्तेः ।

टी० ॥ पक्षधर्मता चेदनङ्गन्तु तर्हि व्याप्यत्वमेव लिङ्गत्वमित्याह—। ""व्याप्यत्वमि"ति । वस्तुगत्या यद्व्याप्यं तस्य परामर्शो व्याप्यत्वेन वा परामर्शोऽनुमानमाद्यं दूषयति—। ""अगृहीते"ति ॥ द्वितीये त्वाह—। ""व्याप्ती"ति । व्याप्तिज्ञानमप्यनुमानं स्यादित्यर्थः तस्यापि व्याप्यत्वग्राहित्वादन्यथा व्याप्तिग्रहत्वमेव तस्य न स्यादिति भावः (³)उक्तदोषादेव द्वितीयलिङ्गपरामर्शस्तृतीयलिङ्गपरामर्शो वानुमानमिति निरस्तमित्याह—। ""अत एवे"ति ॥ दोषान्तरमाह—। ""धारे"ति । धारावाहिद्वितीय तृतीयलिङ्गपरामर्शेऽनुमानत्वापत्तेः व्याप्यत्वव्यापकत्वप्रकारकधूमवह्निसमूहालम्बनेऽनुमानत्वप्रसङ्गमाह । ""गृ-

(१) व्याप्येत्यपि क्वाचित्कः पाठः ।

(२) सिद्धसाधनस्य हेतोर्यथापक्षधर्मत्वं नास्ति सन्दिग्धसाध्यवत्पक्षाभावात्तद्वदित्यर्थः ।

(३) स्वरूपेण द्वितीयलिङ्गस्य तृतीयलिङ्गस्य वा परामर्शोऽनुमानं व्याप्यतया वा नाद्यः । धूमादिमात्र परामर्शस्याप्यनुमानत्वापत्तेर्नापि द्वितीयः । व्याप्तिग्रहणस्यापि व्याप्यत्वविषयकत्वेनानुमानत्वप्रसङ्गादिति ।

हीते"ति । व्याप्यत्वपरामर्शरूपतया समूहालम्बनप्रत्यक्षमपि यद्यनुमानमङ्गीकार्यं तदा तदनन्तरोत्पन्नव्यापकप्रत्यक्षस्येन्द्रियजत्वेन साक्षात्त्व लिङ्गजत्वेन चासाक्षात्त्वमिति विरोध. स्यादित्याह-। "प्रत्यक्षे"ति ।

मू० "* अव्यापकविषयत्वे सति ? * इति चेन्न, 'व्याप्यत्वविषयत्वाभावप्रसङ्गात् 'व्याप्यत्वं हि सप्रतियोगिकग्रहणम् तथाचैतस्य व्याप्यमिदमिति गृह्यते तथा च सति व्यापकस्यापि विशेषणस्य ग्रहणमवश्यं वक्तव्यम् अन्यथा विशिष्टग्रहणस्य वक्तुमशक्यत्वात् * विशेषतो व्यापकाविषयत्वे सति ? * इति चेन्न, अग्निधूमौ व्याप्तावित्याप्तोपदेशाद्वा पूर्वं भूयो गृहीतवह्निधूमसाहचर्य्यस्य वह्निधूमाग्रहणकाले विमर्शवशाद्वा जायमानव्याप्तिग्रहणस्य "व्याप्यपरामर्शोनुमानं स्यात् * न परामर्शः प्रत्ययमात्रं येन प्रथमग्रहणे प्रसङ्गः स्यात् किं नाम प्र(१)त्यभिज्ञानम् ? *-इति चेन्न, 'विचारादाप्तोपदेशाद्वा प्रतीत्य व्याप्तिं पुनराप्तोपदेशाद्विचारान्तराद्वा यैव मया व्याप्तिर्गृहीता सैवेयमिति प्रत्यभिजानानस्य व्याप्तिज्ञानमनुमानं स्यात् * विशेषतो व्याप्यविषयत्वे सति ? *-इति चेन्न, "अव्यापकत्वप्रसङ्गात् 'एकव्यक्तिविषयत्वस्य व्यक्त्यन्तरेऽसम्भवात् 'सामान्यतो व्यक्तिविषयत्वस्य चातिप्रसञ्जकत्वात् 'किञ्च धूमवत्त्वादेर्यदा कदाचिदग्निमत्त्वं वा प्रतीयते तदानीं वाग्निमत्त्वं पर्वतादेर्नाद्यः ॥

टी० ॥ "“अव्यापके"ति । व्यापकास्फुरणे व्याप्यत्वस्फुर-

(१) वह्निव्याप्योयमिति ।

मानुपपन्नमेवेति क्वाप्यनुमानं न स्यादित्याह-। "व्याप्यत्वविषयत्वे"ति । एतदेवोपपादयति-। "व्याप्यत्वं ही"ति । [d]"व्याप्यपरामर्श" इति । मानस इत्यर्थः साहचर्यमात्रग्रहादयं मानसो व्याप्यपरामर्शः प्राथमिक एव स न विवक्षितः किन्तु व्याप्योऽयमित्यनुसन्धानमनुमानमिति शङ्कते-। "न परामर्श" इति ॥ [f]"विचारादि"ति । अनुकूलतर्कोपगृहीतसहचारदर्शनादित्यर्थः ॥ [g]"विशेषन" इति । अयं धूमो वह्निव्याप्य इत्याकारपरामर्शोऽनुमानमित्यर्थः ॥ [h]"अव्यापकत्वे"ति । अनित्यत्वव्याप्यं कृतकत्वमित्याकारः परामर्शोऽनुमानं न स्यादित्यर्थः एतदेव स्पष्टयति-। "एके"ति । ननु व्यक्तिमात्रविषयत्वं विशेषतो व्याप्यविषयत्वमभिमतं नतु धूमैकव्यक्तिविषयत्वं येनाव्यापकता स्यादित्यत आह-। "सामान्यत" इति । प्रकारान्तरेणानुमानं खण्डयति-। [l]"किञ्चे"ति ॥

मू० "तदानीमिवा"न्यदाप्यस्यर्थिप्रवृत्तेस्तत्र प्रसङ्गात् नापि द्वितीयः 'तदानीमग्निमत्तया व्याप्तत्वानवगमात् * "तदेति धूमकालो पेक्षित ? * इति चेन्न, 'क्वचिद्देशेऽन्यदापि धूमस्यावस्थानमस्तीति कालान्तरस्यापि धूमकालत्वात् (१) * 'तद्धूमकालोपेक्षित ?-* इति चेन्न, "तच्छब्दस्य व्यक्तिविशेषवचनत्वेऽप्रतीतव्याप्तिकत्वं [h]यत्किञ्चिद्व्यक्तिवचनत्वे चो-(२)क्तदोषापत्तिः 'हेतोः पक्षधर्मतयाप्यपर्वतादिधर्मः साध्यो माभूत्तत्तु कालान्तरे किं न स्यात् 'तं कालमन्तर्भाव्य पक्षत्वे कथमुत्तरं निष्कम्पं प्रवर्तते [l]धूमकालमन्तर्भाव्य चे'दुक्तमावर्तेत "तद्धूमकालं चेद् ॥

(१) धूमकालादित्यस्यानन्तरं तथा च कालान्तरेपि वह्न्यर्थिनः प्रवृत्तिस्स्यादित्येतदध्याहार्य्यम् ।

(२) क्वचिद्देशेऽन्यदापीत्यादिपूर्वग्रन्थोक्तदोषस्यापत्तिरित्यर्थः ।

त्रिकस्य तथात्वेन विवक्षितत्वात् ?* इति चेत्किमिदं सार्वत्रिकत्वं सम्बन्धस्य सर्वासु तज्जातीयव्यक्तिषु विद्यमानतेति चेन्नेयं सर्वतज्जातीयव्यक्त्यऽपरिज्ञाने शक्यावधारणा न च सर्वास्ता व्यक्तयो विशेषतो ज्ञातुं शक्याः तत्तत्प्र(१)मितिकरणासम्भवात् इन्द्रियेण सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिग्रहणकाले सर्वास्तज्जातीयव्यक्तयो गृह्यन्ते '(२)यदनभ्युपगमे(३)षण्डकमुद्राह्यमुग्धायाः पुत्रप्रार्थनमिवेति वाचस्पतिरुपालम्भमवादीदिति चेन्मैवम् [d]सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिग्रहणकाले सर्वतज्जातीयव्यक्तिग्रहणे(४) प्रमेयत्वादिव्याप्तिग्रहणतः सार्वज्ञप्रसङ्गात् 'क्वचिदप्यज्ञानं ते न स्यादिति च सार्वज्ञ्यापादनमिति न (५)प्रतिकृत्यापि ॥

टी० ॥ तथाच परामृष्यमाणधूमकालीनांशः पक्षस्तद्धर्मश्च परामृष्यमाणो धूम इत्यंशत आत्माश्रय इत्याह—। "'अंशत"इति। [b]"'सार्वत्रिकस्ये"ति। पार्थिवत्वलोहलेख्यत्वयोश्च वज्रे व्यभिचारान्न तथात्वमित्यर्थः ॥ 'यदनभ्युपगमे" इति। यदि पक्षीयधूमेपि व्याप्तिग्रहो न वाच्यस्तदा ततोनुमितिर्न स्यादिति तदर्थं सामान्यलक्षणाप्रत्यासत्तिरभ्युपगन्तव्येत्यर्थः एवं सति यत्प्रमेयं तदभिधेयमिति व्याप्तिग्रहकाले सर्वज्ञः स्यादित्याह—। [d]"'सामान्ये"ति। ननु सार्वज्ञ्यमापादयतस्तवैव सार्वज्ञ्यमापन्नमित्यत आह—। '"क्वचिदि"ति। यद्यपि क्वचिदप्यज्ञानं न

---

(१) प्रमितिकरणेति भावप्रधानतया निर्देशस्तथा च प्रमितिकरणत्वस्यैकस्यानुगतस्यासम्भवादित्यर्थः।

(२) सर्वोपसंहारवद्व्याप्त्यनङ्गीकारे। (३) नपुंसकम्।

(४) प्रमेयत्वादिनिरूपितामभिधेयत्वादिनिष्ठामित्यर्थः।

(५) कृत्या नामाभिष्टोत्पादिका काचिद्देवता तद्वारकं देवतान्तरं प्रतिकृत्या प्रतिवन्दीति तात्पर्य्यार्थः।

स्यादित्यस्य सर्वत्र ज्ञानं स्यादित्यर्थं इति प्रतिकृत्यैव तथापि तत्सामान्यात्कारविषयत्वं यदि वस्तुत्वव्यापकं तदा प्रमेयत्ववत्-त्मदीयचित्तवर्तिविषयवृत्ति. स्यादिति भावः ॥

मू० " * प्रमेयतया सर्वं तदा ज्ञायते एव नतु रूपान्तरेण ? * इति चेन्न, यदि रूपान्तरेण तत्प्रमेयं तदा रूपान्तरवतोपि प्रमेयत्वाधारतया कथमग्रहणम् अथ न प्रमेयं नास्त्येव रूपान्तरेण तत् येन तु रूपान्तरेणास्ति तेन सर्वेण प्रमेयमिति यावद्विद्यमानाकारेण ज्ञातत्वप्रसङ्गः तथात्वस्वीकारे च ज्ञायतां प्रमेयत्वदर्शिना भवता मामकी चित्तवृत्तिः ततः अद्धास्ये '* स्यादेतत् यथा भेदोऽन्योन्याभाववैधर्म्यादिः पृथक् तथैक्यमपि वस्तूनां ततः प्रमेयत्वाद्यपि धर्मिणामेकत्वमेव ततः प्रमेयत्वेन ज्ञायमानं तत्सर्वमपि तेनैक्येन प्रतीयमानैकव्यक्त्यात्मकमेव ज्ञात भवतीति कथं तदेकत्ववेदिनस्सार्वज्ञ्यं * (१)नच वाच्यं नानात्वमपि व्यक्तीनां प्रमेयमिति तदपि धर्मितया ग्राह्यमेवेति ? *-यतस्तदपि(२) प्रमेयत्वादिना गृह्यमाणमेकमेव गृहीतं भवतीति ॥

टी० ॥ इष्टापादनमाह–। "प्रमेयतये"ति । रूपान्तरविशिष्टमपि प्रमेयमेवेति तद्रूपेणापि ग्रहणं स्यादित्याह–।"'यदी-" ति । अत्रापीष्टापादने बाधमाह–। "तथात्वे"ति । यद्यपि प्रमेयत्वप्रकारेण तदपि ज्ञायते एव यत्सामान्यं प्रत्यासत्तिस्तया तत् प्रकारकज्ञानस्यैव जननात् तथैव सामग्र्यावधारणादिति

(१) अथ व्यक्तीनामिव तद्वृत्तिनानात्वस्यापि प्रमेयस्वरूपत्वात्तद्ग्रहण धर्म्मितयावश्यंवाच्यमन्यथा सामान्यप्रत्यासत्त्यास्वाश्रयसर्वधर्मिग्राहकत्वं त्वदभ्युपगत व्याहन्येतेति नानात्वस्यापि धर्मितया गृहीतत्वेन तदवस्थं सार्वज्ञ्यमिति शङ्कामपाकुर्वन्नाह–नच वाच्यमिति ।

(२) नानात्वमपीत्यर्थः ।

घटत्वादिनापि प्रकारेण तज्ज्ञानापादनमनुपपन्नं तथापि नैव न नियामकमिति भाव प्रमेयत्वेन सर्वाभिज्ञमिव कथं न्यथा इद प्रमेयमिदमपि प्रमेयमिदमपीत्यनुसन्धानमिति तेनाकारेण ज्ञानमभिन्नविषयकमेवेति न सार्वज्ञ्यापादनमित्याह—। "स्यादेतदि"ति ॥

मू० तस्मात् "एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टा इति" तत्त्वत एतादृग्रूप्येण एकीभूता इति भावः ? — (१)तदेतदपि नोपपन्नम् नानैकमिति(२)व्याहतप्रतीत्यापत्तेः । (३)अथ रूपान्तरेण नानात्वं प्रमेयत्वादिना चैकत्वमिति व्यवस्थित्या न व्याघातः स्यात् ? — तर्हि प्रमेयत्वाधारस्य व्यक्तिभेदस्य कृत्स्नस्य ग्रहणात् सार्वज्ञ्यापत्तिस्तादवस्थ्येवेति । किं च सामान्यलक्षणया प्रत्यासत्त्या तज्जातीयविशेषग्रहणं तासु सर्वासु व्यक्तिषु सम्बन्धास्तित्वे(४)किं प्रमाणं ? सर्वव्यक्तिग्रहवत्तत्सम्बन्धग्रहेऽपि व्याप्तिग्राहकमिन्द्रियमेव प्रमाणमिति चेत् ? — तर्हि क्वचिदेवमवधारितस्य यद्व्यभिचारो दृश्यते तन्न स्यात् इन्द्रियेण तत्सम्बन्धस्य प्रमितत्वात् । भ्रान्तिस्तत्र सम्बन्धप्रतीतिः पश्चाद्बाधात् ? इति चेन्न, सामग्र्यभेदे काचिद्भ्रान्तिः

---

(१) अथ किमिदं नानात्वं धर्मिषु तादात्म्यमिति वाच्यम्—ऐकरूप्याभावः । उतानेकरूपत्वाभावः । आहोस्विद् भेदः न प्रथमः प्रमेयत्वादिनैकरूपस्य तवैव धर्मिषु स्वीकारेण तत्र तदभावरूपनानात्वस्यासम्भवात् नापि द्वितीयस्तदभावस्य सत्ताद्रूपैकत्वात्मकतया प्रतिव्यक्तिविश्रान्तत्वाभावेन सर्वव्यक्तिग्रहस्यानुपपत्तेः नापि तृतीयस्तदङ्गीकारेऽपि तद्गतः प्रमेयत्वादिना गृहीतत्वेन सर्वज्ञत्वापत्तेस्तादवस्थ्यात् नानैकत्वप्रतीत्योर्विरोधाच्चेत्याह—तदेतदपीति ।

(२) नाना—एकमिति छेदः । बहूनामेकत्वमिति तु तदर्थः ।

(३) घटपटाद्यात्मना । (४) सम्बन्धे = व्याप्तिः ।

काचिद्भ्रान्तिरिति विभागानुपपत्तेर्दोषादोषवैचित्र्यविवेचनस्य दुष्करत्वात् कार्यभेदादेव सामग्रीभेदोऽप्युन्नेय इति चेत् उन्नीयतां(१) स एव कीदृगुन्नेय इति वाच्यम् ॥

टी० ॥ एक "इति"। येन भावो धर्मो द्रव्यत्वप्रमेयत्वादिरूपेण तद्रूपत्वेन तदा लिङ्गितधर्मिणो(२)भावाः सर्वे एवैक्यमापन्ना इत्यर्थः कारिकाया उक्तार्थासमर्थकत्वं मत्वा व्याचष्टे- "एव" इति ॥ "भ्रान्ति"रिति । बहूनामेकत्वमिति व्याख्याने इत्यर्थे बहूनामेकधर्मावच्छिन्नत्वं चेदेकत्वं तत्राह—। "तर्ही"ति । सामान्य(३)विशेषणेऽपि यावद्व्यक्तिग्रहेऽपि तद्गतव्याप्तिग्रहे न प्रमाणमित्याह । "किञ्चे"ति । सर्वासु व्यक्तिषु सकलव्यक्तिविशेषणतया प्रतीतौ पार्थिवत्वलोहलेख्यत्वयोः कालिकः सम्बन्धबाधो न स्यादित्याह—। "नही"ति ॥

मू० न तावत्सार्वत्रिकसम्बन्धभावाऽभावात्मकस्तदानीं भाविनां सम्बन्धानामसत्त्वेनाकारणत्वात् सामान्यतश्च तज्जातीययोः सम्बन्धस्य प्रतीतेः पूर्वसत्त्वं भ्रान्त्यभ्रान्तिसाधारणम् क्वचिदपि सम्बन्धाभावे भ्रान्तेरनुदयात् × किमेतावता अन्य एव तर्हि कार्यभेदात्कारणभेदः कल्पयिष्यते इति चेत् ? × स किमिन्द्रियसहकारिभूतः करणान्तरमेव वा कल्पनीयमिति वाच्यम् नाद्यः इन्द्रियस्य भूतभाविसम्बन्धांशे प्रमाणत्वकल्पनायां प्रमाणाभावात् प्रत्युत व्युपर-

(१) अनुमीयताम् ।

(२) तद्रूपमालिङ्गितं येषु धर्मिषु ते तदा लिङ्गितधर्मिणः ।

(३) सामान्यं विशेषणाभूतं यस्या यावत्या व्यक्तेस्तद्ग्रहे—इत्यर्थः । यद्वा, यथा व्यक्तिव्यवच्छेदकतया सामान्यं व्यक्तेर्विशेषणं तथा व्यक्तेरपि सामान्यव्यवच्छेदकत्वात्सामान्यविशेषणत्वम् ।

तेन्द्रियव्यापारस्यापि '([1])भावयतः पूर्वप्रतीतसम्बद्धधर्मिद्वयव्याप्त्यवधारणदर्शनात् '*([2])तदापि मनोऽस्तीन्द्रियमिति चेत् ? *- ॥

टी० ॥ सम्बन्धानामपि सामग्र्यन्तर्भावे भाविनामसत्त्वात्तद्ग्रहो न स्यादित्याह—। "भाविनामि"ति । ननु यद्यपि भाविनां विशेषाणां सम्बन्धा न सन्ति तथापि सामान्ययोर्धूमत्वावच्छिन्नवह्नित्वावच्छिन्नयोः सम्बन्धप्रतीतिः पूर्वमस्त्येव स एव कारणं स्यादित्यत आह—। "सामान्यत"इति । पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तिप्रतीतिरेव स्यादित्यर्थः व्याप्तिप्रतीतिलक्षणकार्यानुरोधात्कारणं कल्पनीयमित्याह—। "किमि"ति । असम्बद्धावर्तमानग्रह प्रतीन्द्रियाणामकारणत्वादित्याह—। "इन्द्रियस्ये"ति । व्याप्तिप्रतीतिं प्रतीन्द्रियस्य व्यभिचारमाह—। "प्रत्युते"ति । भावयतश्चिन्तयत । "तदापी"ति । इन्द्रियान्तरव्यापारव्युपरमकाले इत्यर्थः ॥

मू० "अस्तु तस्मिन्कार्ये मनसः करणत्वे तु प्रमाणाभावः अवश्यं परिकल्पनीयेनान्येनैव सर्वानुपपत्त्युपशान्तेः कारणत्वमात्रं तु चक्षुरादिजज्ञानवन्मनसस्तत्र स्यात् चक्षुरादिवत्करणमन्यदेव तत्कल्पनीयमिति तत्सप्तममिन्द्रियं प्रमाणान्तरं वा प्रसज्येत अन्यथा चाक्षुषादिप्रतीतावपि चक्षुरादेः करणत्वं न स्यात् शक्यते तत्रापि वक्तुं मन एव तत्सुखादि प्रतीतिवत्करणं चक्षुरादयस्तु सहकारिमात्रं नापि द्वितीयः इन्द्रियान्तरप्रसङ्गात् प्रमाणान्तरप्रसङ्गाद्वा नापि विनाभावः([3]) एकस्य व्यतिरेकेणापरस्याव्यतिरेकः

(१) विचारयत इत्यपि पाठान्तरम् ।

(२) ननु तदानीमिन्द्रियान्तराणां व्युपरमेपि न मनोरूपेन्द्रियस्य व्युपरतत्वमस्तीत्याह–तदापीति ।

(३) एकस्य साध्यत्वेनाभिमतस्य व्यतिरेकेणाभावेनापरस्य साधनत्वेनाभिमतस्याव्यतिरेकोभ वस्तन्निषेधोऽविनाभावइत्यर्थः ।

तन्निषेधोऽविनाभाव इति द्वितीयः पक्षः एवं हि लोहलेख्यत्वव्यतिरेकश्च पार्थिवत्वव्यतिरेकश्च "क्वचिदस्तीति पार्थिवत्वलोहलेख्यत्वयोरप्यविनाभावः प्रसज्येत '* सार्वत्रिकं व्यतिरेकयौगपद्यं विवक्षितं नतु क्वाचित्कं अत एवोच्यते अविनाभावनियम? * इति चेन्न. सार्वत्रिकान्वयावधारणनिरासन्यायेन सार्वत्रिकव्यतिरेकावधारणस्याप्यशक्यत्वात् शक्यत्वे चान्वयावधारणमेवास्तु सार्वत्रिकं कृतं व्यतिरेकावधारणकुटिलिकया यत्र विपक्षे वृत्तौ हेतौ†बा(१)धकमस्ति तयोरन्वयो व्याप्तिरिति केचित्तन्न यत्तु विपक्षे वृत्तौ हेतौ † बाधकं तत्प्रमाणं वा तर्को वा स्यात् आद्ये न तावदिन्द्रियम् ।

टी० ॥ इन्द्रियसहकारितया यत्कल्पनीयं तदेव तत्रासाधारण कारणमस्तु मनस्त्वनु मित्यादिवत्साधारणमेव तत्रेत्याह—। ""अस्त्वि"ति । व्याप्तिज्ञानस्य साक्षात्कारित्वे सुप्रसमिन्द्रियमसाक्षात्कारित्वे प्रमाणान्तरमिति विकल्पे तात्पर्यं एवमग्रेऽपि एकस्य व्यतिरेकेणेति साध्यसाधनयोरन्यतरस्य व्यतिरेकेऽन्यतरव्यतिरेक इत्यर्थ. ॥ ""क्वचिदि"ति । आकाशादावित्यर्थः ॥ सार्वत्रिकमिति पार्थिवत्वलोहलेख्यत्वव्यतिरेकयौगपद्यस्य वज्रेऽभावादित्यर्थः अविनेति अविनाभावयो(२)र्व्यतिरेकयोर्नियम इत्यर्थः दुरवधारणत्वमाह—। '"सर्वत्रिके"ति । कुटिलिका प्रतिपत्तिगौरवम् ॥

मू० "तदसम्भवात् "अन्यथा व्यभिचाराव्यभिचारसंशयो न स्यात् नाप्यनुमानं अनवस्थाप्रसङ्गात् नाप्यर्थापत्तिरनुमानाव्यतिरेकात् "व्यतिरेके वा यदि लिङ्गिव्य-

† क्वचित् हेताविति पाठो नास्ति । (१) तर्कादि ।
(२) अविनाभावयोः=अविनाभाविनोरित्यर्थः ।

तिरेकेण लिङ्गस्यानुपपत्तिस्तदा तत एव लिङ्गि-सिद्धेः कृतमनुमानेन (१)अनेवम्भावे च तयोः किमायातं अस्तु कथमपि तावदर्थापत्तिर्बाधिका तथापि कीदृशश्चाभ्युपगम इति प्रष्टव्यं किं विपक्षवृत्तिबाधकाध्रीचीनो यत्र क्वचिदन्वयो व्याप्तिः उत तत्सहितः सार्वत्रिकोऽन्वय उत किं नो विशेषगवेषणेन तदध्रीचीनः सामान्यतोऽन्वयो व्याप्तिः उत सार्वत्रिकोऽन्वयः स च विपक्षबाधका-द्वगम्यते नाद्यः विकल्पानुपपत्तेः तथाहि किं विपक्षे वृत्तौ बाधकं सर्वव्याप्तिविषय उत सामान्य-विषयं(२)आद्ये यत्राप्यनुमानं प्रवर्तनीयं तत्रावश्यो-पस्थाप्यया अन्यथाभावबाधकभूतयार्थापत्त्यैव सा-ध्यसिद्धेः श्रान्तमनुमानव्यसनेन द्वितीये क्वचिद्व्य-भिचारेऽपि क्वचिदव्यभिचारमाश्रित्य बाधकस्य चार-तार्थ्यत्वम् ॥

टी० ॥ "तदा तत एव" इति । [illegible] इन्द्रियाणामसामर्थ्यादित्यत्र [illegible] । "अन्यथे"ति । अव्यभिचारस्यैव [illegible] ॥ "अनव-स्थे"ति । विपक्षबाध[illegible]नुमान[illegible]विपक्षबाधकानुमा-नान्तरानुमानौचित्यादित्यर्थः ॥ "अर्थापत्तिर्बाधिके"ति । न्याय नये इति शेषः ॥ "अनेवमि"ति । लिङ्गिव्यतिरेकेण लिङ्गस्य यदि नानुपपत्तिस्तदा व्याप्तिरपि न [illegible] तद्ग्रहार्थं विप-क्षबाधकप्रमाणानुसरणमफलमेवेत्यर्थः ॥ "यत्रापी"ति । सर्वा धूमव्यक्तिर्वह्निव्यक्तिं विनानुपपन्ना तथात्र वह्निं विना दृश्य-मानापि धूमव्यक्तिरनुपपन्नेत्यर्थापत्त्या वह्निसिद्धौ गतमनुमान-

(१) लिङ्गिव्यतिरेकेण लिङ्गानुपपत्त्यभावे चेत्यर्थः ।
(२) सामान्यतः कतिपयव्याप्यव्यापकव्यक्तिविषयमित्यर्थः ।

मित्यर्थः यद्यपि पूर्वोत्पन्ने(१)तदर्थापत्त्या व्याप्तिग्रहोऽनतु प्रत्येकानुमितिकाले(२)ऽपि तदवतारो येनानुमानवैफल्यं स्यात्तथापि तावद्विशेषोपस्थापकप्रमाणाभावे तात्पर्यं "द्वितीये" इति । साधनवत्सामान्यं साध्यवत्साऽभिन्ने वर्तते इति विपक्षस्य यद्बाधक तेन साध्यसाधनयोर्विरोधः परं निरस्तोऽनतु व्यभिचारोऽपीत्यर्थः ॥

मू० धूमवत्तामात्रमग्निमत्तामात्रव्यतिरेकीत्येवंरूपो हि सामान्यतो विपक्षः तत्र च बाधकं(३)तयोरविरोधे पर्य्यवस्यति अविरोधश्च क्वचित्साहित्याद्भवत्येवेति पार्थिवत्वलोहलेख्यत्वयोरप्येवं भूतव्याप्तत्वप्रसङ्गः नापि द्वितीयः विशेषणवैयर्थ्यात् सार्वत्रिकोऽन्वय इत्येवोच्यतां नच सोऽपि सङ्गत इत्युक्तम् नापि तृतीयः बाधकस्य सामान्यविशेषविषयत्वविकल्पोक्तयुक्त्यैव निरस्तत्वात् नापि चतुर्थः तथाहि यद्धूमवत्तदग्निमदित्यत्रेदमन्वयस्य सार्वत्रिकत्ववाच्यम् यत्सर्वासां धूमव्यक्तीनामग्निसम्बन्धित्वं तद्यदि व्याप्तिग्रहकाले गृहीतं तदा पक्षस्यापि धूमवद्व्यक्तेरग्निमत्त्वं प्राग्गृहीतं स्मर्यते एवेति गतमनुमानं 'सामान्यतोऽग्निमत्त्वं तस्यापि गृहीतमेव विशेषतस्त्वनुमीयते ?' इति चेन्न, विशेषत इति किमग्निमत्त्वस्य विशेषो व्यक्तिरूपो विवक्षित उत कालदेशादिसम्बन्धस्तस्य नाद्यः "सर्वव्यक्तीनां व्याप्तौ प्रतीतत्वेन भवतैवाङ्गीकारात् नापि द्वितीयः ।

(१) अनुमितेः पूर्वमर्थापत्त्यात्मकज्ञाने उत्पन्ने सतीत्यर्थः । "पूर्वोत्पन्नतदर्थापत्त्या"—इत्यपि क्वचित्पाठः ।

(२) प्रत्येकानुमितिकाले—प्रत्येकानुमितिपूर्वकाले, तदवतारः—अर्थापत्त्यवतारः । (३) साध्यसाधनयोः ।

टी० ॥ एतदेवाह—। "अविरोध" इति ॥ "विशेषणे"ति। विपक्षबाधकसहित इति विशेषणस्य वैयर्थ्यमित्यर्थः। "नचे"ति। तत्र ग्राहकाभावस्योक्तत्वादित्यर्थः ॥ "बाधकस्ये"ति। सामान्ययोः क्वचित् सामानाधिकरण्यमात्रमादाय विपक्षबाधकविश्रान्तेर्विशेषाणां यदि प्रत्येकं तच्चिन्ता तदार्थापत्त्यागतार्थमनुमानमित्यर्थः ॥ "यद्भवदि"ति। पक्षीयवह्निव्यक्तेः (१)पूर्वमनुभवादिदानीं स्मरणोपपत्तौ विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहरूपप्रत्यक्षग्रहसामग्रीसत्त्वात् गतमनुमानमित्यर्थः यत्र विशेषणस्य विशेष्यगततया ग्रहणं तत्रैवमुपनीतं प्रत्यक्षं नतु सामान्यतोपि ग्रहे इत्याशङ्कते—। "सामान्यतोऽग्निमत्त्वमि"ति। वह्निव्यक्तिविशेषस्य विशेष्यगततयैव पूर्वं भानात्स्यादेव प्रत्यक्षमित्याह—। "सर्वे"ति ॥

मू० "अग्निमद्रूपतया स्मृतस्य पक्षीभूतस्य धूमवद्विशेषस्य चक्षुरादिभिरेव पर्वतत्वादिदेशकालविशेषादिमत्तया परिच्छेदात् यथा प्राक् प्रत्ययाहि संस्कारसध्रीचीनैश्चक्षुरादिभिः परिछिद्यमानेदानीन्भावदेशविशेषावस्थानादेः स एवायमिति प्रत्यभिज्ञायमानताङ्गीक्रियते तथैवात्राप्यस्तु कृतमनुमानेन नाप्युपमानं बाधकं विपक्षे वक्तुं शक्यं तस्य नियतविषयत्वेन (२)तादृशे विषयेनुदयात् नापि शब्दः आप्तस्योपदेष्टुरभावे व्याप्त्यनवगमप्रसङ्गात् 'अभावस्तु कदाचित्स्यात् सोपि निरूप्यमाणेन घटते 'एवं स वाच्यो यदि वह्निव्यतिरेकेण धूमः स्यात्तदा तथोपलभ्यते नचोपलभ्यतेऽतोनुपलम्भान्नास्ति तद्व्यतिरेके-

(१) वह्नित्वेन वह्निव्यक्तेः पूर्वं महानसाद्यवच्छेदेनाऽनुभवादिदानीं च तस्यैव पक्षीयत्वेन स्मरणोपपत्तावित्याशयः।

(२) तादृश्यात्मकनियतविषयविषयकत्वेनेत्यर्थः।

णेति तच्च न तथा हि "क्वचिद्व्यभिचारादर्शनादय-
मभावः प्रवर्तते सर्वत्र व्यभिचारादर्शनाद्वा नाद्यः
पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तत्वप्रसङ्गात् ना-
पि द्वितीयः 'सर्वत्र योग्यानुपलम्भो वाऽनुपलम्भ-
मात्रं वा नाद्यः सर्वत्र योग्यानुपलम्भासम्भवात् नापि
द्वितीयः पार्थिवत्वलोहलेख्यत्वयोरपि सम्भवात् *
तत्र वज्रे एव व्यभिचार ? *-इति चेन्न, तदीयाद-
र्शनदशायां व्यभिचारानवगमात् * तदर्शनदशायां
तावदस्ति व्यभिचारो यत्र तु न कदापि व्यभिचार-
दर्शनं तत्र व्याप्तिः ? *-इति चेन्न, अन्यत्रापि व्य-
भिचारो न दृश्यते इत्यत्र नियामकादर्शनात् नापि
विपक्षे बाधकस्तर्को वाच्यः तर्कस्य व्याप्तिमूलत्वा-
ऽभ्युपगमे(१) ऽनवस्थानप्रसङ्गात् तदनभ्युपगमे मूल-
शैथिल्येन तर्काभासत्वापातात् * अथ ब्रूषे न शक्य-

टी० देशकालसम्बन्धस्य प्रत्यक्षेणैव भान प्रत्यभिज्ञावदि-
त्याह-। ""अग्नी"ति ॥ "अभावस्त्व"ति । सहाभिमतानुपल-
ब्धिरित्यर्थ. अनुपलम्भप्रमाणस्येति कर्तव्यताभूतं तर्कमाह-।
""एवमि"ति । एवमुपकरण. स वाच्य इत्यर्थः ॥ ""क्वचिदि"ति ।
क्वचित्कव्यभिचारादर्शनमात्रमनुपलम्भः सार्वत्रिकव्यभिचारादर्शनं
वेत्यर्थ. ॥ ""सर्वत्रे"ति । सर्वासु व्याप्तिषु वा एकस्यामपि व्याप्तौ
सर्वासु धूमादिव्यक्तिषु वेत्यर्थ. ॥

(१) तर्कः किं मूलक इति प्रश्ने व्याप्तिमूलक इति वाच्यं व्याप्तिः किं मूलिकेति प्रश्नेऽपि तर्कमूलिका व्याप्तिरिति प्रश्नोत्तरधारयाऽनवस्थाया दुर्वारत्वादिति नच वाच्यं प्रश्नोत्तरधारयानास्त्यनवस्थातयोः परस्परमूलकत्वेनैवानवस्थाभङ्गादिति तथाभ्युपगमेपरस्पराश्रयापत्तेः न च व्याप्तिमूलं तर्कोभिन्न इष्यत इत्यपि साम्प्रतं तत्रापि पर्य्यनुयोगे निरुक्तदोषप्रसरादिति दुरुद्धरानवस्थेति भावः ।

मू० [a]मिदं वक्तुं, तथाहि धूमाग्निव्यभिचारशङ्कायां बाधकस्तर्कोयमभिधीयते यदि धूमोऽग्निं व्यभिचरेत् अकारणः सन्नित्यः स्यात् न स्यादेव वा सचाय[b]म-(१)नुत्तरस्तर्कस्तत्र शङ्कायां व्यघातापत्तेः [c]तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा नावतरन्तीति लोकमर्यादा एवं सर्वत्रानुत्तरस्तर्को बाधकोऽभिधेय ? *–इति मैवम् [d]किमित्येवं शङ्कितव्यं य(२)द्धेतुफलभाव एव न भविष्यतीति एवं तु शङ्कितव्यं अग्निं विहायान्यस्मादपि हेतोरयमुदेष्यतीति [e]* नच वाच्यं एवं हि सति धूमस्यैकजातिमत्त्वं न स्यादिति ? *– [f]क्वचिदिन्द्रियजत्वे क्वचिदनुमानादिजत्वे विज्ञानैकजात्यवत्तदुपपत्तेः * तत्रेन्द्रियादीनामवान्तरसामान्ये साक्षात्कारित्वादौ प्रयोजकत्वं न ज्ञानतया ? *–इति चेन्न, ज्ञानत्वस्याकस्मिकत्वपरिहाराय तत्कारणस्यानुगतस्य भवतावश्यं वक्तव्यत्वात् धूमेपि वह्नि(३)विशेषे एव प्रयोजकत्वस्य तद्वच्छङ्कितुं शक्यत्वात् * न दृश्यते तावदग्निप्रयोज्ये धूमे विशेष इति च न वाच्यम् ? *–[g]तद्दर्शनस्या(४)पाततो हेत्वन्तरप्रयोज्यावान्तरजात्यदर्शनेनायोग्यतया (५)विकल्प्यत्वादप्युपपत्तेः यदा तु

(१) अपरिहार्य्यः। (२) ययोर्वह्निधूमयोः कार्य्यकारणभावः।
(३) धूमेविशेषपीत्यन्वयः। (४) विचारमन्तरेण।
(५) विशिष्टज्ञानयोग्यत्वादपि तद्दर्शनस्योपपत्तेरन्यथासिद्धं तदित्याशयः। परेतु–अयोग्यतया–अविकल्पात्वादिति पदं च्छिन्दन्ति तेषामयमाशयः यद्यप्यस्ति धूमेऽग्निप्रयोज्यो विशेषो धूमस्याग्निमन्तरेण हेत्वन्तराजन्यास्तथापि तद्गतविशेषस्य नास्तिदर्शनयोग्यत्वमिति न शक्यते वक्तुं तद्गतविशेषादर्शनस्य हेत्वन्तरप्रयोज्यतद्गतविशेषादर्शनेनैवबाधितत्वेन तद्दर्शनस्य विकल्पमन्तरेण सिद्धत्वादिति।

हेत्वन्तरप्रयोज्यो धूमस्य विशेषो द्रक्ष्यते तदाऽसौ विकल्पिष्यते इति सम्भावनाया दुर्निवारत्वात् ।

टी० "“इदं वक्तुमि”ति । अनवस्थापादकं वाक्यमित्यर्थः । तर्कद्वयाग्रहेऽपि शङ्कानिराकरणद्वारैवेति शङ्कानिरासार्थः तदवतारो न विरुद्धः ॥ "“अनुत्तर”इति । शङ्काप्रतिपादकोत्तररहित इत्यर्थः ॥ तदेवाह—। 'तदेवेति । स्वक्रिया कथादिप्रवृत्त्यात्मिका ॥ "“किमि”ति । अग्निधूमयोः कार्यकारणभावनिश्चयेऽपि हेत्वन्तरशङ्कानिरासो न प्रकृततर्कादित्यर्थः ॥ धूमत्वावच्छिन्नम्प्रति वह्नेः कारणताग्रहे हेत्वन्तरशङ्का नोदेतुमर्हतीत्यत आह—। “नन्वि”ति । हेत्वन्तरजन्यं धूममादायापि वह्निधूमे धूमत्ववृत्तावैजात्यं स्यादेवेत्याह—। "क्वचिदि"ति ॥ तृणारणिमणिप्रभववह्निवत् विशेषस्यापातताऽग्रहेऽपि न दोष. इत्याह—। "“तद्दर्शनस्ये”ति ॥

मू० "अस्त्यात्ममनोयोगोनुगतं कारणं ज्ञानोत्पत्तौ?*- इति चेन्न, 'यद्यात्ममनोयोगादुत्पद्यमानं ज्ञानं स्यादिच्छादयोऽपि ज्ञानं प्रसज्येरन् यदि त्वदृ(१)ष्टविशेषो वा(२)शक्तिभेदो वा (३)ज्ञानत्वजातिर्वा (४)ज्ञानप्रागभावो वा तत्रानुगतं कारणमुच्यते 'तदा(५) तदितरत्रापि वह्निव्यभिचारेऽपि धूमस्यै(६)कजात्य-

(१) अदृष्टस्य कार्य्यत्वावच्छिन्नम्प्रति हेतुतया सर्वकार्यसाधारणयाद्दृशेष इत्युपात्तम्—

(२) मीमांसकमते कारणेषु कार्य्यवैचित्र्यनियामकशक्तिवैचित्र्यस्वीकाराद्भेद इत्युक्तम्—

(३) ज्ञानत्वजातेर्नित्यत्वेन ज्ञानमात्रनियतपूर्ववृत्तित्वाज्जातिरित्युक्तम्—

(४) जातिरूपकारणस्य नित्यत्वेन सर्वदाकार्य्योत्पत्तिस्स्यात्सामाभूदिति ज्ञानप्रागभावइत्युक्तम् ।

(५) अदृष्टादन्यत्रापीत्यर्थः । (६) एकजातेर्भाव ऐकजात्यम्—

प्रयोजकतया शक्यते एवं शङ्कितुं "दृष्टे व्यभिचारे युक्तमदृष्टादेरैकजात्यपरिकल्पनम् ? *-इति चेन्न, अस्तु([1])दृष्टे तन्निश्चयः अत्रापि व्यभिचारो न द्रक्ष्यते इत्यत्र नियामकाभावात् एवं शङ्किष्यते शङ्किष्यमाणस्य भवतो न क्वचिदनुमानं स्यात् प्रतिवाद्यात्माद्यनुमानादिव्यतिरेकेण कथायामेव प्रवृत्त्यनुपपत्त्या स्वयं स्वीकर्त्तव्येष्वनुमानेष्वेतादृशशङ्काक्रमणात्* स एव व्याघात * इति चेन्न, धूमवद्वन्हेरपि वह्निकारणविशेषानुमानस्यैवं सति सदनुमानत्वप्रसङ्गात् सामग्रीसाम्येन प्रमाप्रमावैचित्र्यस्यानुपपत्तेः साधारणधर्मदर्शनादौ सत्यपि शङ्कायाश्चानुदये सामग्र्यां सत्यामपि कार्यानुदयात् परप्रतिपत्त्युत्पादनार्थं वचनादिरूपां प्रतिपत्तिसामग्रीमुत्पादयितुं यतमानस्य भवतोपि स्वक्रियाव्याघातस्तुल्यः व्याघातस्यैव([2]) विशेषत्वात्तद्दर्शने शङ्कासामग्र्येव नास्ति मत्पक्षे तत् कुतो व्याघात साम्यमिति चेत् ॥

टी० सिंहावलोकनन्यायेन ज्ञानमात्रप्रयोजकमाह-।"“अस्तो-”ति ॥ "“यद्यात्ममन”, इति । यद्यपीच्छादौ ज्ञानत्वापादनमयुक्तं तथापि ज्ञानमेवात्ममन संयोगो जनयतीति । गृहीत्वापादनं शक्तिभेदो मीमांसकनयेन तृणारणिमणिवृद्धेरवान्तरसाधारणेवह्न्यादावित्यर्थः ॥ ज्ञानत्वजातिरित्यभ्युपगममात्रं शङ्कासौलभ्यादाह-। '“तदे”ति ॥ तृणादौ व्यभिचारः स्फुटइति तत्र कल्पना नत्वत्रापीत्याह-। "“दृष्टे”इति ॥ अनुमित्यभावात्

(१) दृष्टे-इत्यस्मात्प्राग्व्यभिचारे = इत्यपिपूरणीयम्-

(२) व्याघातः = व्याप्यज्ञानाधीन व्यापकज्ञानलक्षणः, यच यत्रयत्र धूमस्तत्रतत्र वह्निजन्यत्वमित्येवं लक्षणः, तस्यैव विशेषत्वादित्यर्थः ।

प्रत्ययभावं शङ्कते-। "एवमि"ति । अवश्यमियं शङ्का निवर्तनीया अन्यथा तृणाद्वह्निमसकृदुपलभ्यव्याप्तिं गृहीतवतोऽयं देशस्तृणवान् वह्निमत्त्वादित्यप्यनुमानमनाभासं स्यात्तथाच शङ्कानिवर्तनीयैव तन्निवृत्तिस्त्वशक्येति भाव (१) ।

मू० "तद्धि न ताव'दाहारादिकारणाज्जायमानमेष्टव्यं 'कूटविषयस्य तस्यातिप्रसञ्जकत्वात् "*कूटभिन्नः प्रसञ्जकः प्रमितस्यैव स्यात् ?*—इति चेन्न, 'तस्य तर्कावसरे निरस्यत्वात् 'तस्मात् यदेतद्व्याघातरूपस्य विशेषस्य दर्शनं शङ्काप्रतिपक्षभूतमुच्यते तत्किं प्रमाणात् कुतश्चिदुपजायमानं वक्तव्यं तर्काद्वा यदि प्रथमः "शङ्कास्तित्वमपि तेनैव प्रमाणेन उपनेयं शङ्कायां सत्यां व्याघातात् ॥

टी० ""तद्धी"ति । व्याघातस्वरूपमित्यर्थः । ""आहारादिकारणादि"ति । आहार्य्यव्याप्यारोपरूपकारणादित्यर्थः । तथाचैतादृशव्याप्यारोपाधीनव्यापकारोपरूपव्याघातदर्शनमतिप्रसञ्जकत्वात् न व्यभिचारशङ्कानिवर्तकमिति भावः ॥ ""कूटविषयस्ये"ति । असदर्थविषयस्येत्यर्थः ॥ ""कूटभिन्न"इति । वास्तवाद्व्याप्याद्वास्तवस्यैव्यापकस्य प्रसञ्जनं व्याघात इत्यर्थः ॥ एतच्च तर्कस्वरूपमेव तच्चाग्रे दूष्यमित्याह-। ""तस्ये"ति ॥ व्याघातस्वरूपमाक्षिप्य तदाक्षेपोपसंहारव्याजेन तद्दर्शनमाक्षिपति—। ""तस्मादि"ति ॥ शङ्कायां सत्यां व्याघातइति व्याघातग्राहकप्रमाणादेव शङ्कासिद्धिरित्याह-। ""शङ्कास्तित्वमपी"ति॥

मू० यदि च शङ्कां विनापि व्याघातः तदा शङ्क्यमानयोर्व्याघातस्य साम्यं सिद्धमेव "*भवतु शङ्कायामपि तत्

(१) इति सिद्धान्तिनो भाव इत्यर्थः ।

प्रमाणं किमेतावता प्रथमोपजातशङ्कामवलम्ब्याव-स्थितस्य व्याघातरूपस्य विशेषस्य दर्शनात्तु शङ्कान्तरं नोत्पद्यत ? *-इति चेन्न, व्याघातसत्ताकाले (१)तद-वलम्बयया शङ्कयैव शङ्कयमानव्यभिचारता तस्याः शङ्काया व्युपरमे च तदवलम्बिनो व्याघातरूपस्य विशेषस्याभावात् कः शङ्कान्तरोत्पत्तेर्वारयितेति वक्तव्यं b*मा नामास्तु तदा व्याघातात्मा विशेष-स्तदवगमस्तदाहितो वा संस्कारस्तावदस्ति । विशे-षावगमतत्संस्कारौ च शङ्काविरोधिनौ नच स्वरूपेण क्वचिदस्ति विशेषस्यावस्थानं तथा? *—इति चेन्न, cयावदाश्रयभाविनो विशेषस्य पूर्वस्थितस्य यद्दर्शनं तदाहितो वा संस्कारस्तस्य कालान्तरेपि तत् प्रति-धर्मसंशयविरोधित्वेऽवयविपाकपक्षे कुम्भस्य(२)पर-माणुपाकपक्षे परम्परया तदारम्भकस्य परमाणोः पूर्वं श्यामतया ज्ञातस्य कालान्तरे सम्भावितपाक-जन्यरूपविशेषवत्तायां संशयो न स्यात् ॥

टी० व्याघातेन शङ्कानिवृत्तौ शङ्कान्तरानुत्पादे स्यादेव व्याप्तिग्रह इति शङ्कते—। a"भवत्वि"ति ॥ विशेषदर्शनस्य स्वरू-पनिवृत्तावपि तदाहितसंस्कारस्य शङ्काविरोधित्वं शङ्कते—। b"मा नामे"ति ॥ c"अयावदि"ति । यद्यपि तत्र पाकसम्भावना विशे-षदर्शनजसंस्कारावस्कन्दिकेति तत्र संशयः प्रकृते तु न तथा तथाप्युपाधिसंभावनया प्रकृते संशयः स्यादिति भावः ॥

---

(१) व्याघातविषयीभूतया-

(२) अवयविपाकपक्षे कुम्भस्य पूर्वं श्यामतया ज्ञातस्य कालान्तरे सम्भावितपाकजन्यरूपविशेषवत्तायां संशयो न स्यादित्यन्वयः । तदार-म्भकस्य=अवयवस्यारम्भकस्य ।

मू० [a]यदि च शङ्कायां व्याघातस्तदाशङ्काश्रयस्य विशेषरूपस्य व्याघातस्य दर्शनाच्छङ्कायां शङ्कान्तरं मा भूत् [b]यदि तु व्यभिचाराश्रयस्तदा व्यभिचारः स्यादेव व्याघाताश्रयस्य व्यभिचारस्यापि प्रमितत्वापत्तेः * अनादिसिद्धव्याप्तिकास्ते तर्का ? *-इति चेन्न, [c]तद्बुद्धेः प्रमितत्वासिद्धेः(१)शरीरेऽवात्मप्रत्ययस्य तादृशस्याप्यप्रमात्वोपगमात् अनादिसिद्धेश्चोभयत्राविशेषात् नापि यद्यत्र व्यभिचारश्शङ्क्येत तदा व्याघातः स्यादित्येवंरूपात्तर्काद्व्याघातावगमः(२) व्याघातप्रतिपादकस्य तर्कस्य मूलशैथिल्ये तर्काभासत्वापातात् तादृशस्यापि व्याघातोपनायकत्वे व्याघातापत्तेः साम्यं, शक्यते एव तर्काभासाद्भवतोऽपि व्याघात उपनेतुं अथ(३)तस्य तर्कस्य व्याप्तिमूलताभ्युपगमते तत्रापि व्यभिचारशङ्कायां पुनरनवस्थैव तत्रापि व्याघातोपपादने पुनरित्यमनवस्थैव ॥ [d]तस्मादस्माभिरप्यस्मिन्नर्थे न खलु दुष्पठा त्वद्गाथैवान्यथाकारमक्षराणि कियन्त्यपि

टी० ॥ व्याघातात्समानमानाधिकरणशङ्कानिवृत्तिरितिशङ्कायामेव शङ्का न स्याद्व्यभिचारे तु स्यादेवेत्याह—। [a]"यदि चे"ति ॥ ननु व्यभिचारे एव व्याघात उक्त इति तत्रैव शङ्कानिवृत्तिरपीत्यत आह—। [b]"यदि त्वि"ति ॥ [c]"तद्बुद्धे रि"ति । व्याप्तिबुद्धेरित्यर्थः ॥ शङ्कानुच्छेदं प्रतिपादयितुं प्रस्तौति—। [d]"तस्मादि"ति । शङ्का चेदनुमास्त्येव न चेच्छङ्कातस्तरां व्याघातावधिराशङ्का तर्कश्शङ्कावधिर्मत इत्यादित्वद्गाथा कियन्त्यप्यक्षरा-

(१) व्याप्तिबुद्धेः प्रमितत्वे तु व्यभिचारस्यापि प्रमितत्वापत्तिर्बोद्धव्या।

(२) तर्कस्य चाऽप्रमाणत्वान्न व्यभिचारप्रमा वयमिति भावः ।

(३) तस्येति क्वचित्पुस्तके न दृश्यते ।

यन्यथाकारं अन्यथा कृत्वा न दुष्पठेत्यन्वये सिद्धाप्रयोगत्वाभावा-(१)दन्यथैव कथमित्थं सुसिद्धाप्रयोगश्चेदिति सूत्रेण णमुल् प्रत्ययो न स्यादत इत्थं योज्यं क्रियन्त्यपदयक्षराणि तद्यथा अन्यथाकारम् अन्यथा न दुष्पठा अन्यथाकारम् अन्यथा करणं यथा स्यादिति क्रियाविशेषणं वा *

मू० [a]"व्याघातो यदि शङ्कास्ति नचेच्छङ्का ततस्तराम्
व्याघातावधिराशङ्का तर्कशङ्कावधिः कुतः"
[b]अव्यभिचारश्चैकपरित्यागव्यवच्छेदेनापरान्वयः समकालजातदृष्टनष्टेऽदृष्टः शङ्क्यत [c]इत्याहुः, स्वाभाविकः सम्बन्धो व्याप्तिरित्यपरः स प्रष्टव्यः कस्य स्वाभाविकः किं सम्बन्धिनोरुतान्यस्य न चरमः [d](२)विपरीतापत्तेः आद्ये कः स्वाभाविकशब्दार्थ इति प्रष्टव्यं किं सम्बन्धिस्वभावाश्रितः १ अथ सम्बन्धिस्वभावजन्यः २ अथ (३)सम्बन्धित्वविवक्षितस्वभावानतिरिक्तः ३ अथवा सम्बन्धिस्वभावव्याप्यः ४ अथ सम्बन्धिस्वभावादन्येन न प्रयुक्तः ५ उतान्य एव ई कश्चिद्विवक्षितः आद्ये

टी० ॥ अन्यथाकारं पठति [a]"व्याघात" इति । यदि व्याघातस्तदा तदाश्रयभूता शङ्कास्त्येव शङ्कामन्तरेण व्याघातानवतारात् नचेद्व्याघातस्तदा सुतरां शङ्काप्रतिबन्धकस्य व्याघातस्याभावाद् व्याघातावधिव्यापातो ऽवधिर्यस्याः शङ्काया सा

(१) सिद्धाप्रयोगत्वाभावाण्णमुल्प्रत्ययो न स्यादित्यन्वयः अन्यथा-एवम्-कथम्-इत्थम्-इत्येतेषूपपदेषु सत्सु कृञ्धातोर्णमुल् प्रत्ययः स्यात् स चेत्कृञ् सिद्धाप्रयोगः स्यात्, "सिद्धाऽप्रयोग"इति किम्? शिरोऽन्यथा कृत्वा भुङ्क्ते । सिद्धाऽप्रयोगो नाम उपपदाऽनतिरिक्तार्थक इति ।

(२) व्याप्यव्यापकातिरिक्तयोरपि व्याप्त्यापत्तेरित्यर्थः । वैपरीत्यापत्तेरित्यपि क्वचिद्दृश्यते पाठः ।

(३) सम्बन्धित्वविवक्षितेत्यस्य सम्बन्धित्वेन रूपेण विवक्षितयोरसम्बन्धिनोरित्यर्थः ।

कुतः शङ्काया अवधिः पर्यवसानं च कुतस्तर्कस्तर्कमूलव्याप्तावपि शङ्कातादवस्थ्यादित्यर्थः ननु व्यभिचारशङ्कायामव्यभिचारोऽप्येका कोटिरिति क्वचिदव्यभिचारप्रमायां तदधीनमनुमानं तत्रैव स्यादित्यत आह–। [b]"व्यभिचार" इति। एकस्य व्यापकस्य परित्यागो विरहस्तद्व्यवच्छेदे एवापरस्य व्याप्यस्यान्वय इत्यर्थः । न च तत्रैवानुमानं स्याद्दृष्टत्वा(१)दिति भावः ॥ नष्टपुनरुत्पत्तेर्मदालसास्थले दृष्टत्वात् मनदृष्टनष्टयोरपि नाव्यभिचारसिद्धिरित्यस्वरसादाह–। [c]"इत्याहुरि"ति। व्यावहारिकमनिर्वचनीयमव्यभिचारमादाय शङ्कते परमार्थ इति भावः ॥ [d]"विपरीते"ति। व्याप्यव्यापकत्वाभिमतान्ययोरेव सर्वत्र व्याप्तिः स्यादित्यर्थ ॥

मू० [a]"पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तत्वप्रसङ्गः न द्वितीयः [b]अतिव्याप्तेरव्याप्तेश्च [c]अत एव न तृतीयः नापि चतुर्थः [d]व्याप्त्यनिरुक्तौ व्याप्यत्वानिरुक्तेः [e]सम्बन्धस्य व्याप्यत्वे च सम्बन्धिनोर्व्यापकयोः सम्भावितसम्बन्धाधिकदेशकालतया एकसम्बन्धिदर्शनेऽपरानुमाननियामकत्वायोगान्नापि पञ्चमः [f]न प्रयुक्त इति यदि न जनितस्तदा सम्बन्धस्याकृतकत्वपक्षेऽन्येनेति विशेषणवैयर्थ्यं अकृतकस्य सम्बन्धिस्वभावेनाप्यजनितत्वात् सम्बन्धस्य कृतकत्वपक्षे स्वरूपासिद्धिरेव स्यात् सामग्र्याः सर्वसम्भवादन्ततः कालदेशादृष्टादिभिरपि तज्जन्यत्वस्यावश्यं वक्तव्यत्वात् नापि षष्ठः तस्य निर्वक्तुमशक्यत्वात् [g]एवमेव विकल्प्यायं चरमविकल्पः सर्वत्रोपन्यस्य दूष्यो न्यूनत्वशङ्काभयादिति अनौपाधिकः सम्बन्धो व्याप्तिरित्यपरः–स प्रष्टव्यः कोऽयमुपाधिर्नाम यच्छून्यत्व-

(१) "तस्य दृष्टत्वाद्" –इति क्वाचित्कः पाठस्तु प्रामादिकः ।

मनौपाधिकत्वम्- उपाधिः साध्यव्यापकत्वे सति साधनाव्यापकः अयं च ।

टी० ॥ [a]"पार्थिवत्वे"ति । लोहलेख्यत्वयोर्व्यतायाः पार्थिवत्वान्वितत्वादित्यर्थः ॥ [b]"अतिव्याप्ते रि"ति । धूमरासभसंयोगेऽतिव्याप्ती रूपरससम्बन्धे चाव्याप्तिरित्यर्थः ॥ [c]"अत एवे-"ति । भूतलघटाभावसम्बन्धयोरतिव्याप्तेर्वह्निधूमसम्बन्धे चाव्याप्तेरित्यर्थः॥ [d]'व्याप्तौ'ति । आत्माश्रय इत्यर्थः दोषान्तरमाह–। [e]"सम्बन्धस्ये"ति । सम्बन्धस्य सम्बन्धिद्वयव्याप्यत्वं स्यात्तु सम्बन्धिनोरन्यतरस्य येनैकेनापरमनुमीयेतेत्यर्थः ॥ [f]"न प्रयुक्त"इति । प्रयुक्तत्वं जन्यत्वं व्याप्यत्वं व्यापकत्वं वा आद्ये सम्बन्धिद्वयमात्रजन्यत्व क्वापि न लिङ्गमदृष्टादेरपि जनकत्वात् अजन्यसम्बन्धाव्याप्तिश्च अन्त्ययोरात्माश्रय इत्यर्थः ॥ विशिष्यानिरुक्तस्य विकल्पनीयत्वे हेतुमाह–। [g]"एवमेवे"ति । यदि वादी विकल्पितभिन्नमेव पक्षमालम्बेत तदा विकल्पे न्यूनता भवेत् सामान्योक्तौ च तदालम्बितपक्षस्य तत्रैवान्तर्भावयितुं शक्यत्वादिति भावः न्यूनत्वमिहाकौशलं

मू० "[a]"एकसाध्याविनाभावे मिथः सम्बन्धशून्ययोः साध्याभावाविनाभावी स उपाधिर्यदत्यय" इत्यस्य व्यतिरेकमुखस्य(१) यदत्ययः स उपाधिरिति योज्यमानस्य पर्यवसितोऽर्थः तद्धर्मभूता हि, व्याप्तिर्जपाकुसुमरक्ततेव स्फटिके साधनाभिमते चकास्ति इत्युपाधिरसावुच्यते तदिदमाह [b]"अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा" * स चोपाधिर्निश्चित इवा 'शङ्कितश्च यत्रेदमुच्यते [d]"यावन्नाव्यतिरेकित्वं शतांशे-

---

(१) व्यतिरेकमुखस्येति षष्ठी तृतीयार्थे ज्ञेया, तथा च व्यतिरेकमुखेन योज्यमानस्येत्यर्थः ।

नापि शङ्क्यते विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबलं"?
***-इति चेन्न, साध्यव्यापके साधनाव्यापके**

टी० ॥ [a]"एके"ति । यदत्यये यदभावः साध्याभावाविनाभावी साध्याभावव्याप्यः स उपाधिस्तथा च साध्याभावव्याप्याभावप्रतियोगी साध्यव्यापक इति यावत्--मिथः सम्बन्धशून्ययोः साधनोपाध्योर्मध्ये एकस्य साधनस्य साध्याविनाभावे ग्राह्ये(१)यदत्ययः साध्याभावाविनाभावी स उपाधिरिति भट्टाचार्यवार्तिकयोजना मिथः सम्बन्धशून्यतया साधनाव्यापकत्वमुक्तं साध्य(२)सामग्र्या उपाधित्वव्युदासाय दूषकताबीजाव्यभिचारोन्नयनप्रयोजनलाभाय च साधनाव्यापकत्वमुक्तं यो यद्व्यापकव्यभिचारी स तद्व्यभिचारीति व्यभिचारसिद्ध्यर्थमेव साध्यव्यापकत्वमुक्तं ॥ [b]"अन्ये"इति । अन्ये सोपाधयः परप्रयुक्तानामुपाधिगतानां व्याप्तीनामुपजीवका इति तैस्सोपाधिभिः पक्षनिष्ठतया दृष्टैरपि न व्यापकांशावधारणानुमितिरित्यर्थः ॥ [c]"आशङ्कितश्चे"ति । साध्यव्यापकत्वेन निश्चितस्य साधनाव्यापकत्वशङ्का साधनाव्यापकत्वेन वा निश्चितस्य साध्यव्यापकत्वशङ्का ननु भविष्यति कश्चित्तत्रोपाधिरिति शङ्कार्थः(३) ॥ [d]"यावदि"ति । विपक्षस्येति सप्तम्यर्थे षष्ठी तथा च हेतोर्विपक्षे अव्यतिरेकित्वं सद्भावो यावच्छङ्क्यते तावन्नानुमितिः तेनोपाधिसंदेहादपि तादृशी शङ्का व्याप्तिसमवस्कन्दतीत्यर्थः

---

(१) ग्राह्ये=निरूप्यमाणे सति, यदत्ययः=यादृशोपाधेरभावः ।

(२) निश्चितधूमादिसाधनवति पर्वतादौ वह्निलक्षणसाध्यव्यापकत्वमात्रमादाय साध्यसामग्र्या उपाधित्वनिरासार्थं साधनाव्यापकत्वमुक्तं, तथा साधनाव्याप्तिनिरूपकाधिकरणस्यैव हेतुसाध्ययोर्व्यभिचारनिरूपकाधिकरणत्वाद् व्यभिचारोन्नयनप्रयोजनलाभार्थं तदुक्तमित्याह–साध्येति ।

(३) यद्यपि तत्र सोपाधित्वं संदिग्धत्वेनैवासिद्धं तत्संदेहश्चोपाधेरन्य एव तथापि यद्व्यतिरेकनिश्चयो ऽनुमिति जनकस्तत्संदेहो ऽनुमितिप्रतिबन्धकस्तद्बुद्धिनिरूपकश्चोपाधिरित्युपाधेर्दोषत्वमुच्यत इति प्रगल्भाचार्याः ।

मू० [a]पक्षेतरत्वेपि प्रसङ्गात् * तद्व्यतिरिक्त इत्यपीति? *-चेन्न, [b]बाधेनोन्नीतस्य तस्याव्यापनात् [c]अन्यथा निरुपाधिसम्बन्धत्वे बाधासिद्धेः यदाह बाधेनोपाधिरुन्नीयताम् [d]अन्येन वा इति न कश्चिद्विशेषः [e]*एतदर्थमपि विशेषणीयम्-?*-इति चेन्न, [f]तथापि साधनाव्यापकत्वे सतीति तद्व्याप्त्यनवधारणे न शक्यावधारणम् एवं साध्यव्यापक इत्यपि अथ मन्यसे [g]सदृष्टव्यभिचारसाध्यत्वं साध्यव्यापकत्वं न [h]वस्तुतो व्यभिचारिसाध्यस्याप्यापाततोऽदृष्टव्यभिचारसाध्यत्वसम्भवात्तस्याप्युपाधित्वापातात् [i]न दृश्यते इति च निरूपयितुमशक्यं [j]व्याप्तिग्रहकाले च साध्यत्वाभावेन तद्व्यभिचारः कथमवधार्य्यः

टी० ॥ [a]"पक्षेतरत्वेपी"ति । सकलानुमानोच्छेदकतया स्वव्याघातकतया(१) च तस्यानुपाधित्वेन तत्रातिव्याप्तिरित्यथ: पक्षेतरत्वभिन्नत्वेन यद्युपाधिलक्षणं विशेषणीयं तदा सङ्ग्राह्यस्यापि बाधोन्नीतपक्षेतरत्वस्य सङ्ग्रहो न स्यादित्याह—। [b]"बाधेने"ति ॥ ननु बाध एव तत्र दोषो न तूपाधिरपीत्यत आह—। [c]"अन्यथे"ति । व्यभिचारे चावश्यमुपाधिर्हेतुमति च पक्षे बाधस्थले पक्ष एव व्यभिचार इति तत्रोपाधिर्ध्रौव्यमन्यथा कृतकत्वस्य हेतोरुष्णत्वानुष्णत्वोभयसहचारविरोधः स्यादित्यवच्छेदभेदोपन्यासस्योचितत्वादन्यस्य तादृशस्याभावाद्गृहीतरत्वादे-

(१) स्वव्याघातकतया—उपाधिस्वरूपव्याघातकतया, तथाहि—उपाध्यभावेन साध्याभावः साध्यते यथा पर्वतो धूमाभाववान् आर्द्रेन्धनसंयोगाभावाद् ह्रदादिवदिति, यद्वा हेतोरुपाधिव्यभिचारित्वेन साध्यव्यभिचारित्वमुन्नीयते, यथा वह्निर्धूमव्यभिचारी, आर्द्रेन्धनसंयोगव्यभिचारित्वाद् घटादिवदिति, पक्षेतरत्वस्योपाधित्वे तु निरुक्तोभयविधसाध्यकानुमानेपि तस्य सुवचत्वादुपाधेरुपाधित्वमेव हीयेतेति ।

रेव(१) तथात्वमभ्युपेयमित्यर्थः ॥ [d]"अन्येन वे"ति । व्यभिचारेणेत्यर्थः बाधोन्नीतपक्षेतरत्वान्यपक्षेतरत्वान्यत्वेनोपाधिलक्षणं विशेषणीयमित्याह–। [e]"एतदर्थमि"ति ॥ [f]"तथापी"ति । व्याप्त्योपाधिनिरूपणमुपाधिना च व्याप्तिनिरूपणमित्यन्योन्याश्रय इत्यर्थः ॥ [g]"अदृ"ष्टेति । अदृष्टव्यभिचारं साध्यं येनेत्यर्थः ॥ [h]"वस्तुत"इति । तत्र च साध्याव्यापकेप्युपाधिलक्षणमतिव्यापकमित्यर्थः ननु व्यभिचारदर्शनात्यन्ताभाववत्त्वं विवक्षितमित्यत आह–। [i]"न दृश्यत" इति । तथाच दुर्ग्रहं लक्षणमित्यर्थः । [j]"व्याप्ती"ति । तदा न सिद्धिकर्मत्वमित्यर्थः ॥

मू० [a]* साध्यं व्यापकमपेक्षितम्–?*–इति चेन्न, [b]व्याप्त्यनवगमे व्यापकार्थानवगमात् [c]* सम्भावितव्यापकभावो व्यापकोपेक्षित? *–इति चेन्न, [d]व्यापकस्यानिरुक्तौ किंरूपतया सम्भावनापि स्यात् अथ साध्यव्यापक इत्येव 'भद्रं तदानीं साध्यत्वाभावेपि साधयितुमर्हत्वस्य विवक्षितत्वात्(२) न कथं ह्यवगन्तव्यमिदमेव साधयितुमर्हमिदं नेति व्यापकत्वादिति वक्तुमशक्यत्वात् [f]नच साधनाव्यापकत्वं सर्वत्र निश्चेतुं शक्यं स श्यामो(३) मैत्रतनयत्वादित्यत्र शाकाद्याहारपरिणतिपरम्पराया मैत्रतनयेऽभावस्य दुरधिगमत्वात् [g]*यत्रोक्तलक्षणस्य निश्चायकं प्रमाणमस्ति तत्र निश्चितोपाधित्वं अन्यत्र शङ्कितोपा-

(१) तथात्वम्–अवच्छेदकत्वमित्यर्थस्तथा च हेतौ कृतकत्वे वह्नीतरत्वावच्छेदेनानुष्णत्वसामानाधिकरण्यं वह्नित्वावच्छेदेन तूष्णत्वसामानाधिकरण्यम् ।

(२) परिहारमाह–नेति–अन्वयस्तु इदमग्न्याद्येव साध्यं न धूमादीति कथमवगन्तव्यमिति ।

(३) मित्राया अय मैत्रः मैत्रश्चासौ तनयश्चेति तथा–

धित्वं(१) मैत्रतनयत्वव्याप्यशाकाद्याहारपरिणति-परम्परया(२) स्यातव्यमित्यत्र नियामकाभावात्?*-इति चेन्न, [h]मैत्रतनयत्वेनैव हेतुना तस्यापि प्रसाधने तच्छङ्काया अपिच्छेत्तुं शक्यत्वात् ॥

टी० ॥ व्यापकत्वमेव साध्यत्वं न सिद्धिकर्मत्वमित्याह—। [a]"साध्यमि"ति। अन्योन्याश्रयमाह—। [b]"व्याप्तौ"ति [c]"सम्भाविते"ति। वास्तवत्वं व्याप्तेरन्योन्याश्रयत्वापादकमित्यभिमानः। एवमप्यन्योन्याश्रय एवेत्याह—। [d]"व्यापकस्ये"ति। ज्ञप्तावन्योन्याश्रय इत्यर्थः ॥ [e]"भद्रमि"ति। तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं हि व्यापकत्वमिति नान्योन्याश्रय इत्यर्थः शाकपाकजत्वाद्युपाधावव्याप्तिमाह—। [f]"नचे"ति। निश्चितोपाधेरिदं लक्षणं नतु शङ्कितोपाधेरिति तत्राव्याप्तिर्न दोष इत्याशङ्कते। [g]"यत्रे"ति। साधनेनैवोपाधेरपि साधनात्साधनव्यापकत्वनिश्चयान्न तत्र शङ्कितोपाधित्वमपीत्याह—। [h]"मैत्रे"ति।

मू० [a]तत्रापि तत्तत्सामग्रीत्युपाधिपरम्पराभिधाने च तस्यास्तस्या अपि मैत्रतनयत्वेनैव साधनस्य कर्त्तुं शक्यत्वात् * अनवस्थैवं स्यात्? *-इति चेन्न, [b]उपाध्युपन्यासे एव च कुतोनवस्था न स्यात् साध्य [c]सामग्र्या उपाधित्वे धूमानुमानसाधारण्यात् एवं च साध्यसामग्र्युपाधित्वव्यवच्छेदार्थमपि लक्षणं विशेषणीयं [d]श्यामत्वादौ साध्ये शाकाद्याहारपरिणतिपारम्पर्यादेस्तस्मिन्साध्ये श्यामत्वादेरुपाधित्वसम्भवेन कथमुपाधिरपि साधयितुं शक्यते इति चेन्नैवम् [e]प्रत्येकं द्वयोरपि मैत्रतनयत्वादिना साधने

---

(१) श्यामत्वविशिष्टमैत्रतनयत्वं व्याप्यं यस्यास्तयेत्यर्थः। मैत्रतनयत्वविशिष्टश्यामत्वव्यापिकयेति पर्यवसितोऽर्थः।

(२) स्यातव्यमित्यस्मात्प्राक्=गौरशरीरे—इत्यपि योजनीयम्—

टी० ॥ ननु मैत्रतनयत्वेनापि शाकपाकजत्वे साध्ये साध्य-साम्यतया उपाधित्वान्न तत्र शाकपाकजत्वनिश्चय इति शङ्कि-तोपाधित्वमेवेत्यत आह ॥ [a]"तत्रापी"ति ॥[b]"उपाधी"ति । यथा हेतुना तत्तदुपाधिसाधनेऽनवस्था मम तथा तत्तदुपाध्युपन्यासे तवाप्यनवस्थैवेत्यर्थः शाकपाकजत्वादेरुपाधित्वे दोषान्तरमाह—। [c]"सामग्र्या" इति । धूमादिमदनुमानमप्येवं न स्यादित्यर्थः हेतु-नोपाधिसाधने दोषान्तरमाह—।[d] 'श्यामत्वे"ति । साध्योपाध्यो-र्द्वयोरपि मैत्रतनयत्वेन साधयितुं शक्यत्वान्न प्रत्येकस्योपाधि-त्वमित्याह—। [e]"प्रत्येकमि"ति । ननु द्वयोः प्रत्येकं यदि साधनं तदा प्रत्येकस्योपाधित्वमेव मिलितसाधने चार्थान्तरं विप्रतिप-त्तिसमये चोभयसाधनमर्थान्तरत्वापादकमेवेति तत्राहुः तत्रो-पाधि. साधनेन साधनार्हः तत्र साधनव्यापकत्वाभावोपाधित्वम-स्तीति तात्पर्यमत एवानुरूपमुदाहरति—। [f]"अन्यथे"ति । कार्य-त्वेन हेतुना सकर्तृकत्वादृष्टजत्वयोरुभयोरपि साधयितुं शक्य-त्वान्नोपाध्युपाधिसद्भाव इत्यर्थः ॥

सू० [g](१)अत एव साध्यसाधनसम्बन्धं प्रति व्यापकत्वं साध्यव्यापकत्वमित्यपि प्रत्युक्तम् [h]यत्राप्युपाधिर्नि-श्चीयते तत्राप्य(२)तीन्द्रियोपाधिविषये तदभावस्य साधनाव्याप्त्यर्थमनुमेयतायां (३) सोपाधीक्रियमा-णेन साधनेनैव सत्प्रतिपक्षस्य कर्तुं शक्यत्वात् तथा सति तत्र शङ्कितोपाधित्वमेव निर्व्यूढं स्यादपतीति

(१) उक्तं दूषणं साधनावच्छिन्नसाध्यव्यापकत्वे सति साधना-व्यापकत्वमित्युपाधिलक्षणान्तरे ऽतिदिशति-अत एवेति— (२) अती-न्द्रियउपाधिर्विषयत्वेन व्यवस्थितो यत्र हेतौ तत्रेत्यर्थः यथात्रैव च श्या-मो मैत्रतनयत्वादित्यत्र शाकपाकजत्वमतीन्द्रिय उपाधिरिति तदभाव-स्याप्ययोग्यप्रतियोगिकत्वेनातीन्द्रियत्वाद्धेतोर्मैत्रतनयसाधनाव्यापकत्व-ज्ञप्त्यर्थमनुमेयत्वमेव वाच्यं तथा हि-अयं शाकपाकजत्वाभाववान् गौरत्वाद्यन्नैवं तन्नैवमिति तथा चायं शाकपाकजन्यो मित्रातनयत्वाच्-छ्यामतनयदिति सत्प्रतिपक्षतेति समग्रपङ्क्त्यर्थः-एवमुदाहरणान्तरेऽप्यू-ह्यम् । (३) उपाध्यात्मकसाध्यसाधनीक्रियमाणेनेर्थः ।

चेत् [c](१)एवं ब्रुवाणो नियतमजैषीः परं मन्दमन्दाक्षं तथाहि स्वीकृतनिश्चितोपाधिभावे शङ्कितोपाधित्वमापतत्तदनुकूलं मन्यते कोऽन्यो जितलज्जात् नच क्वचिन्निश्चितोपाध्यनभ्युपगमे तच्छङ्काशङ्क्या [d]* यत्र प्रत्यक्षेणोपाधिनिश्चयस्तदेव तद्दर्शनस्थानं भविष्यति ? *—इति चेन्न, 'ऐन्द्रियकबाधे तज्जातीयस्यातीन्द्रियस्याप्रयोजकीक्रियमाणेन हेतुनैव साधयितुं शक्यत्वात् ॥

टी० ॥ [a]"अत एवे"ति । साध्यत्वव्यापकत्वयोरनिरूपणादेवेत्यर्थः इदानीं निश्चितोपाधावपि साधनाव्यापकत्वस्याशक्यग्रहत्वमाह—। [b]"यत्रापी"ति । साधनाव्यापकत्वसम्पत्तये साधनवति यथोपाध्यभावः साध्यस्तथा साधनेनैवोपाधिरपि साधयितुं पार्यत एवेति न साधनाव्यापकत्वनिश्चय इत्यर्थः ॥ [c]'एवं ब्रुवाण' इति । उपाधित्वनिश्चयस्य क्वचिदप्यसम्भवे तत्संशयस्याप्यसम्भवादित्यर्थः नन्वार्द्रेन्धनवत्त्वस्योपाधेः साधनवह्निमत्ययोगोलकादावभावः प्रत्यक्ष इति तस्यैव साध्यधूमव्यापकत्वे सति साधनवह्न्यव्यापकत्वान्निश्चितोपाधित्वमिति शङ्कते—। [d]"यत्रे"ति । अयोगोलकमार्द्रेन्धनवत् वह्निमत्वान्महानसवदित्यनेनात्राप्युपाधिसाधने क्व तदभावनिश्चय इति परिहरति—। [e]"ऐन्द्रियकबाधे" इति ।

मू० [a]नच यदेकत्रैकजातीयमैन्द्रियकं तदन्यत्रैन्द्रियकबाधेहेतुबलादतीन्द्रियं न प्रसाध्यते पाकदर्शनाज्जठरानलादिवत् [b]साधनाव्यापकत्वे सति साध्यव्यापक इति च न शाकाद्याहारपरिणतिपरम्परासाध्यं व्याप्नोतीत्यव्यापकतादोषः [c]नहि शाकादित्वं नाम किञ्चिदेकमस्ति यत्साध्यं व्याप्नुयात् [d]अस्तु वा कथ-

(१) हेमन्द एवं ब्रुवाणस्त्वं मन्दाक्षं=लज्जामेव नियतमजैषीः परं=परन्तु न प्रतिपक्षमित्यन्वयपूर्वकोऽर्थः ।

मपि तथापि श्यामत्वं न व्याप्नोति [e]इन्द्रनीलशिलादिश्यामलत्वस्याहाराजन्यत्वात् [f]* शरीरश्यामत्वं साध्यं तच्च व्याप्नोत्येवेदम् ? *-इति चेन्न, [g]व्याप्तावुपाधेरभिधेयत्वात् नच पुरुषश्यामत्वेन व्याप्ति[h]र्हेतुपक्षधर्मतयैव हि साध्यं पक्षधर्मः सिध्यति न व्याप्त्या [i]अन्यथा पुरुषपदस्याव्यवच्छेदकस्याविशेषणत्वापातात् ॥

टी० ॥ नन्विन्धनवत्त्वावच्छेदेनैवेन्द्रियकत्वमिति तत्साधने बाध एवेत्यत आह--। [a]"न चे"ति। यथा पाकेनानुमीयमानो वह्निर्जठरे प्रत्यक्षो न सिद्ध्यति अतीन्द्रियः साध्यते तथा प्रकृतेपि स्यादित्यर्थः साधनाव्यापकत्वं निरस्य साध्यव्यापकत्वं निरस्यति--। [b]"साधने"ति। शाकादीनामननुगमेन साध्यव्यापकत्वग्रहासम्भवात् तदेवाह--। [c]"नही"ति। शाकाद्याहारस्यानुगमेपि श्यामत्वस्य व्यभिचारान्न व्यापकतेत्याह--। [d]"अस्तु वे"ति। व्यभिचारमेवाह--। [e]"इन्द्रे"ति। विशिष्टसाध्यव्यापकत्वमभिमतं तथास्त्येवेति शङ्कते-। [f]"शरीरे"ति। ययोरेवव्याप्तिरभिमता तत्रैवोपाधिरभिमतो नतु विशेषणान्तरप्रक्षेपेणापि साध्यत्वमिति परिहरति-। [g]"व्याप्ताव"ति। ननु पुरुषश्यामत्वमेव पर्यवसितमिह साध्यं तद्व्यापकोयमुपाधिर्भवत्येवेत्यत आह-। [h]"हेत्वि"ति। यदि पुरुषश्यामत्वमेव साध्यं तदा मैत्रेयः पुरुषः श्यामः मित्रातनयत्वादित्येव प्रतिज्ञा स्यात्तत्र च पुरुषपदं व्यर्थं स्यादित्याह-। [i]"अन्यथे"ति।

सू० [a]"परम्परासम्बन्धिकज्जलादिलेपश्यामलत्वव्यवच्छेदकत्वे च संयुक्तश्यामपुरुषसमवेतश्यामत्वस्य परम्परासम्बन्धिनः कथं व्यवच्छेदः स्यादिति [b]* नच साध्यसाधनसम्बन्धाद्दृष्टव्यभिचारत्वं साध्यव्यापकत्वं मा रूपसाक्षात्कृतिकरणादेस्तैजसादिमत्वे साध्येऽभूदुद्भूतरूपादित्वादेरुपाधित्वम् * [c]साधनेनापि च

विशेषणतया निवेशयेन यदि केवलसाध्यव्यापकं व्यवच्छेद्यं तदा तस्य व्यभिचारशङ्काधानक्षमस्याप्युपाधित्वं न स्यात् [d] * अथ न किञ्चिद्व्यवच्छेद्यं तदा विशेषणत्वासिद्धिरेव नहि प्रयोजनमात्राद्विशेषणमर्थवद्भवति किंतु किञ्चिद्व्यवच्छेदादिति * शरीराजन्यत्वमिवाकर्तृकत्वे व्यक्तमसिद्धौ पर्यवस्येदिति

टी० ॥ ननु पुरुषोपमेव श्यामरूपं सिद्ध्यतु कज्जलादिगतं तु मा सैत्सीदेतदर्थमेव तद्विशेषणमित्यत आह [a]"पररूप-रे"ति । एवं व्यावर्तकानुसरणे संयुक्तपुरुषश्यामताव्यवच्छेदार्थमपि विशेषणान्तरमुपादेयं स्यादित्यर्थः श्यामरूपसमवाये साध्ये पुरुषपदस्य सुतरां वैयर्थ्यमिति भावः ननु तथापि मित्रातनयत्वावच्छिन्नश्यामलत्वं प्रति शाकाद्याहारपरिणतेर्व्यभिचारो न दृश्यते इति तदवच्छिन्नव्यापकत्वमेव साध्यव्यापकत्वमभिमतमत आह--। [b]"न चे"ति । एवं सति चक्षुस्तैजसं रूपसाक्षात्कारकरणत्वात्प्रदीपवदित्यत्र मदनुमाने शीतस्पर्शमपि केवलसाध्याव्यापकमपि साधनावच्छिन्नसाध्यव्यापकतयोद्भूतरूपवत्त्वमुपाधिः स्यादित्यर्थः मा भूदिति सम्बन्धः दोषान्तरमाह--। [c]"साधनेनापी"ति । साधनावच्छिन्नसाध्यव्यापकत्वं केवलसाध्यव्यापकोपाधौ नास्तीति तत्राव्याप्तिरित्यर्थः ननु केवलसाध्याव्यापकोपाध्युपन्यासमात्रार्थमिदं विशेषणं न तु केवलसाध्यव्यापकोपाधिव्यवच्छेदाय येनाव्याप्तिः स्यादित्याशङ्क्य निराकरोति-। [d]"अथे"ति । यदि न व्यवच्छेदकं तदा साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वेन । साधनस्य साध्यव्यभिचारित्वे साध्येऽनर्थविशेषणतया व्याप्यत्वासिद्धिः स्यादित्यर्थः ।

सू० [a]किंच आभासे केवलव्यतिरेकिणि [b]पक्षधर्मे हेतौ जीवच्छरीरं पृथिव्याद्यष्टद्रव्यातिरिक्तानेकद्रव्यवत् प्राणादिमत्त्वादित्यादौ कथमिदमुपाधिलक्षणव्यवस्थाप्यं तदाभासे व्यतिरेक्यनुमानात्मनि यत्साध्यं तदु-

पाधिना व्याप्तं वर्त्तते तस्य पराभिमतस्य [c]क्वचित्सि-द्धयापत्तेः [d]व्यतिरेकव्याप्तावुपाधिश्चेत्तर्हि व्यति-रेके यद्व्याप्यं तस्य व्याप्य उपाधिरवश्यं मन्तव्यः ॥

टी० ॥ व्यतिरेकव्याभासे साध्यव्यापकत्वाग्रहादुपाधेरनु-पाधित्वमित्याह—। [a]"किञ्चे"ति । आभासत्वाभिधानमुपाधिभ्रौ-व्यार्थं अपक्षधर्मतया चेदाभासत्वं तदा न व्याप्तिभङ्गायोपाध्य-नुसरणमित्यत आह—। [b]"पक्षधर्मे"ति । अदृष्टव्यतिरिक्तानेकचे-तनवत्त्वं साध्यं तदप्रसिद्ध्या नोपाधेः साध्यव्यापकत्वग्रह इत्यर्थः पराभिमतस्य स्थापनावाद्यभिमतस्य ॥ [c]"क्वचिदि"ति । * नच पक्षे एव तत्सिद्धिरिति वाच्यं ? *—साधनव्यापकत्वमु-पाधेस्तथापति स्यादित्यर्थः ननु व्यतिरेकिणि व्यतिरेकव्याप्ता-वेवोपाधिरिति न तत्र साध्यव्यापकत्वं सम्भवमित्यत आह—। [d]"व्यतिरेके"ति । व्यतिरेकव्याप्तौ साध्याभावस्य व्याप्यत्वा-दुपाधेस्तद्व्याप्यत्वं स्वीकार्य्यमिति नोपाधिः साध्यव्यापकः स्यादित्यर्थः । यद्यपि साध्यपदेन व्यापकमभिमतं तेन व्यतिरेक-व्याप्तावपि व्यापकव्यापकत्वमुपाधेर्व्यापकत्वं च साधनाभाव-स्येत्युपाधिस्तद्व्यापकोयथा प्रतिसन्धानाभावे कार्यकारणभा-वाभाव उपाधिः परोक्ते एककर्तृकत्वानुमाने तथापि साध्या-भावव्याप्यत्वाभिधानं कथञ्चित्समर्थनीयमिति ।

सू० [a]अन्ययोपाधेरन्वये साध्यान्वयापत्तेरिति [b]उपाधे-र्व्यतिरेकव्याप्त्यवश्यम्भावस्याभ्युपगम्यतयोपाधेर्व्या-पकं तद्व्यतिरेक उपाधिव्यतिरेकस्य व्याप्य-तया मन्तव्य इति परसाध्यापत्तिः असमव्याप्तिक-योरन्वयव्याप्तिसाध्यसाधनभाववैपरीत्येन व्यति-रेकव्याप्तेरिति * नच दोषान्तरमेव तर्हि वाच्यम् ? *—इति वाच्यम् हेतोः पक्षधर्मत्वस्थिते व्याप्तिस-त्यर्थं त्वयोपाध्युपगमध्रौव्यात् [d]भवतु वा या काचि-

द्व्याप्तिर्नाम(१) तत्सत्त्वे एवानुमितिभावात् तस्याश्चानुमितेश्च व्याप्तिरेष्टव्या ततश्चात्माश्रय[e]स्तद्भेदे चाननुगमाविनिगमौ स्यातामिति व्याप्तिपक्षधर्मते अनुमितिं[f]भावयत इति वदन्ति तत्र केयं पक्षधर्मता * पक्षाश्रितता ? *–इति चेन्न,

टी० ॥ अस्तु तत्रापि साध्यव्यापकत्वाद्व्याप्याभावाव्याप्य एवोपाधिः किमनिष्टमित्यत आह–। [a]"अन्यथे"ति। उपाधिसद्भावे यदि साध्याभावो व्यापकतया न वर्तेत तदा साध्यं स्यात् साध्याभावाभावस्य साध्यत्वात्तन्निरूपणं च पक्षादन्यत्र न वाच्यमन्यथा व्यतिरेकभङ्गप्रसङ्ग इत्यवश्यमुपाधिः साध्याभावव्याप्य एव वाच्य इत्यर्थः ॥ [b]"उपाधेरि"ति। साध्यव्यावृत्त्यर्थमुपाधिव्यावृत्तेरुपासनीयत्वेनोपाधेर्व्यतिरेकिधर्मत्वनियमादिति भावः अन्वये यद्व्यापकं तदभावो व्यतिरेके व्याप्य इति केवलान्वयिनि नास्तीत्यत उक्तम् असमव्याप्तिकयोरिति नन्वीदृशे व्यतिरेकिणि मास्तूपाधिरित्यत उक्तम्। [c]"हेतोरि"ति। व्याप्तिमभ्युपेत्य दोषमाह–। [d]"भवतु वे"ति। व्याप्त्यावच्छिन्नमित्या सह व्याप्त्यभ्युपगमे स्ववृत्तित्वमित्यर्थः ॥ [e]"तद्भेदे" इति। यद्यनुमितिव्याप्त्योरन्यैव व्याप्तिस्तदाननुगमो यदि तत्रापि स्ववृत्तिभयेनान्या तदानवस्था स्यात्तथाच का व्याप्तिरनुमानाङ्गमिति विनिगमना न स्यादित्यर्थः ॥ [f]"भावयत" इति। जनयत इत्यर्थः ॥

सू० [a]"नैयायिकादीन् प्रति प्रमेयत्वस्याहेतुत्वप्रसङ्गात् विषयविषयिभावस्य ज्ञेयज्ञानस्वरूपातिरिक्तस्यानङ्गीकारात् तयोश्च ज्ञेयाश्रितत्वायोगात् कश्चायं पक्षो नाम यद्धर्मत्वं पक्षधर्मत्वं * सिसाधयिषितसाध्यधर्मा धर्मी ? *–इति चेन्न, सिसाधयिषा हि प्रति-

(१) तत्सत्त्वे–इत्यतः पूर्वं तथापीति पूरणीयम्–तत्सत्त्वे=इत्यस्य व्याप्तिसत्त्वे=इत्यर्थः।

विपादयिषा वा स्यात् प्रतिपित्सा वा आद्ये स्वार्थानुमित्यनुदयप्रसङ्गः द्वितीये चा[b]सुरभिगन्धानुमेयकुत्सितरसविषयस्वार्थानुमित्यनुदयप्रसङ्गः नचानवधारितधर्माधर्मी पक्षः हेतुमत्तयाप्यनवधारणे ऽनुमानोदय(१)निदानभावासम्भवात् अवधारणे वानवधारितधर्म्मत्वानुपपत्तेः नचानवधारित 'हेतुविषयधर्मा धर्मी पक्षः तथाहि केनानवधारितधर्म्मा न तावदनुमानप्रयोक्त्रा स्वयमज्ञाते परं प्रत्यप्रयोगात् * प्रतिवादिना ? *-इति चेत् न प्रतिवादिविहितेप्यर्थे वादितया परस्परविद्योत्कर्षनिरूपणार्थमनुमानदर्शनात् ॥

टी० ॥ [a]"नैयायिकादी"निति । अनिरिक्तविषयविषयिभावसम्बन्धानङ्गीकर्तृमते वाच्ये घटः प्रमेयत्वादित्यादौ प्रमेयत्वस्य घटतत्प्रमास्वरूपस्य घटावृत्तित्वादपक्षधर्मता स्यादित्यर्थः कृत्तद्धितसमासेषु सम्बन्धाभिधानं भावप्रत्ययेन तुल्यमिति कात्यायनवचनादिति भाव. (२) परम्परासम्बद्धं प्रमात्वमेव यदि प्रमेयत्वं तथापि तस्य विषयघटितोपाधितया विषयावृत्तित्वमेवेति हृदयम् ॥ [b]"असुरभी"ति । मटितमांसादावसुरभिगन्धेन हेतुना कुत्सितरसानुमानमस्ति नतु प्रतिपित्साविषयेन तस्य पक्षता स्यादित्यर्थः हेतुधर्मावधारणेपि न सामान्यतोनवधारितधर्मत्वमिति पर्वतादेरपक्षत्वापत्तिरित्याह—। [c]"हेत्वि' ति । हेतुविषयः साध्यं तथा चानवधारितसाध्यधर्मेत्यर्थः ॥

सू० तथानवधारणं यत्किंचिद्धेतुविषयधर्मगोचरम् वादिप्रयोक्तृहेतुविषयगोचरं वा नाद्यः [a]अग्निमत्त्वनिश्चयदशायामपि तत्तद्धेतुविषयबहुतरापरधर्मतानवधारणात् धूमं प्रति पर्वतस्य पक्षत्वप्रसङ्गात् न द्वितीयः

(१) निदानानुभवासम्भवादित्यपि क्वाचित्कः पाठः।
(२) स्वसमवायिविषयत्वसम्बन्धेन सम्बद्धम्।

तथापि तत्प्रसङ्गात् [b]तद्धेतूनामपि वादिप्रयोज्यत्वात् [c]असाधारण विवक्षायां चाननुगमात् इतरेतराश्रय-दोषाच्च [d]पक्षधर्मत्वेन हेतुत्वनिरूपणात् व्याप्तपक्ष-धर्मत्वस्य हेतुत्वात् हेतुना च पक्षनिरूपणात् स्वार्था-नुमाने च हेतोरप्रयोज्यत्वात् पक्षत्वाभावेनानुमाना-नुदयप्रसङ्गात् [e]विरुद्धहेतौ च पक्षधर्मत्वाभावप्रस-ङ्गात् तत्र साध्यस्य तद्धेतुविषयत्वाभावात् [f]हेतो-रेव साध्यविपरीतव्याप्त्या दुष्टत्वात् [g]एतेन सन्दिग्ध-साध्यधर्मविशिष्टो धर्मी पक्षः साध्यत्वं च स्वपरा-र्थानुमानसाधारणं उत्पाद्यज्ञानत्वमिति निरस्तम् ॥

टी० ॥ "[a]"अग्निमत्त्वे"ति । अनुमित्यनन्तरमपि पर्वतादेः पक्षता स्यादुमविषयस्य प्रदेशश्यामलतादेरनवधारणादित्यर्थः पूर्वप्रसङ्गे सत्येवाह—। [b]"तद्धेतूनामि"ति ॥ [c]"असाधारणे"ति । वादिप्रयोक्तव्यधूमादिविषयस्येति कृते शब्दादेरपक्षता स्यादि-त्यर्थः ॥ [d]"पक्षे"ति । व्याप्तपक्षधर्मत्व हेतुत्वं हेतुविषयधर्मवत्त्वं च पक्षत्वमित्यन्योन्याश्रय इत्यर्थः ॥ [e]"विरुद्धे"ति । नह्यनि-त्यत्वमपि कृतकत्वविषयस्तत्प्रतीतिजन्यप्रतीति विषयत्वमेव हि तद्विषयत्वमित्यर्थः ननु विरुद्धे पक्षधर्मत्वादेवाभासत्वम-स्त्वित्यत आह—। [f]हेतोरेवे"ति । साक्षाद्धेतुदोष एव विरोधो न तु पक्षद्वारेत्यर्थ ॥ [g]"एतेने"ति । सन्देहस्य विशेषणत्वेोपलक्ष-णत्वव्युदासन्देहाधारपुरुषविकल्पादिनेत्यर्थः ॥

सू० *[a]प्रतीतिं व्याप्तिबलेन सामान्यतो व्यापकावगाह-नप्रवृत्तां विशेषमादाय पर्यवसाययितुं व्याप्यस्य सामर्थ्यं सा ? *—इति चेन्न, [b]तस्याः(१) सामान्य-विषयाया [c](२)अनुपपत्तेरसिद्धेर्व्याप्तिवत्सम्भवात्

(१) तस्याः—व्याप्तिबलेन सामान्यतो जायमानप्रतीतेः ।
(२) अनुपपत्तेरित्यतः अविशेषविनेत्यध्याहार्यम् —

अनुपपत्तित्वे व्याप्त्यनुप्रवेशात् [d]अधिकविषयाकाङ्क्षित्वे विरम्य व्यापारापत्तेः [e]मानान्तरत्वापत्तेर्वा विशेषविषयायाश्चानुपपत्तित्वेऽति[f]प्रसङ्गः [g]पक्षधर्मतया च यदि साध्यव्यक्तिभेदः सिद्ध्येत्तर्ह्यनुमाय तां प्रत्यक्षेण पश्यन् पुंशब्दात् पुरुषानुमायी प्रत्यक्षेण पुरुषद्वयदर्शने तद्विशेषासंशयी स्यात् [h]*प्राग्विशेषादर्शनात् तथा स्यात् ? *-इति चेन्न, [i]पश्चात्तद्दर्शित्वान्न संशयीतेति(१) ॥

टी० ॥ प्रकारान्तरेण पक्षधर्मतामाशङ्कते-। [a]"प्रती"तिमिति । व्याप्तिबलाद्वह्निमात्रप्रतीतिः पक्षधर्मताबलात्पर्वतीयत्वादिकमादाय पर्यवस्यतीत्येतादृश धूमसामर्थ्यं पक्षधर्मतेत्यर्थः ॥ [b]"तस्या"इति । विशेषं विनापि साध्यसामान्यविषया वह्निप्रतीतिः स्यादेव यथा व्याप्तिबुद्धिरिति नानुपपत्तिरित्यर्थः अनुपपत्तिबलेन विशेषविषयत्वाभ्युपगमेऽर्थापत्तिरेव स्यात् सा चानुमानमेवेत्याह-। "अनुपपत्तित्वे" इति । यदि च सामान्यबुद्धिरुत्पद्य विशेषविषया तत्राह-। [d]"अधिके"ति । सामान्यबुद्धिरनुपपद्यमाना विशेषबुद्धिं यदि जनयति तत्राह-। [e]"माना-

---

(१) ननु संशयस्य पक्षधर्मत्वाभावेपि सिषाधयिषाविरहसहकृतसिद्ध्यभावो यत्र सपक्षतद्वृत्तिधर्मः पक्षतेति विशेषसाक्षात्कारकाले सिषाधयिषा विरहसहकृतसिद्धिसत्त्वान्न पक्षतेति चेन्न एतल्लक्षणस्य यत्र स इति पदघटितत्त्वेनाननुगतत्वात्-यावज्जीवं ममानुमितिस्स्यादित्यनुमित्सायांसत्यामनुमित्यव्यवहितोत्तरक्षणेऽनुमितिप्रसङ्गाच्च अथानुमातुस्सिषाधयिष विरहस्सिद्ध्यंशे विशेषणमाहोस्वित्पुरुषान्तरस्य नाद्यः । विशेषरूपेण दुर्गन्धानुमितिस्थले सिषाधयिषायामसत्यामप्यनुमितिदर्शनात्-न हि तत्र सामान्यरूपेण सिद्धिसत्त्वे विशेषरूपेण दुर्गन्धमनुमिनुयामितीच्छोत्पद्यत इति नानुमात्रिच्छाविरहो विशेषणं स्यान्नामतदानुमात्रिच्छाविरहो विशेषणमुत्पद्येत कदाचिद्यदि दुर्गन्धानुमित्सासत्त्वेऽप्यनुमितिर्नहि तत्रानुमातुर्दुर्गन्धानुमित्साभवति जात्वपीति न तादृशेच्छाविरहो विशेषणमित्यनवद्यम् । नापि द्वितीयः । सिद्धिसत्त्वेपि पुरुषान्तरेच्छामादायानुमितिप्रसङ्गादित्येतल्लक्षणमप्यनुपपन्नम् ।

न्तरत्वे"ति ॥ [f]"अतिप्रसङ्ग"इति । अपरापरविशेषधीप्रसङ्ग इत्यर्थः दोषान्तरमाह—। [g]"दशधर्मतया चे"ति । वह्न्यनुमानान-न्तरं प्रत्यासीदतो नानावह्निदर्शने किमियं वह्निव्यक्तिरनुमितेयं वेति वह्निसंशयो न स्यात् किंच शब्दविशेषेण गृहे पुरुषानुमा-नानन्तरं चैत्रोऽनुमितो मैत्रो वेति संशयो न स्यादित्यर्थः नन्वनु-मितस्यापि विशेषस्य साक्षात्काराभावात्संशयः स्यादेवेत्याह—। [h]"प्रागि"ति । विशेषसाक्षात्कारकालेपि संशयदर्शनान्नैवमित्या-ह—। [i]"पश्चादि"ति ॥

मू० (१)उपमानमपि(२)किमुच्यते सादृश्यज्ञानमुपमान-मित्येके(३) तन्न "स्मृतावपि प्रसङ्गात् अनुभव इत्य-

---

(१) { प्रत्यक्षमनुमानं च विदोषवं युक्तितः पुरा । अधुना दूष्यते सम्यगुपमानं सविस्तरम् ॥ }

(२) उपमान दूषयितुं पृच्छति—किमिति—

(३) सादृश्यज्ञानमुपमानमिति वदन्प्रष्टव्यो वादी किं सादृश्य स्मरणमुपमानं किं वा सादृश्यानुभवः । नाद्यस्सादृश्यस्मरणध्वंस त-त्प्रत्यक्षयोरपि सादृश्यस्मरणजन्यत्वेनोपमितित्वापत्तेः । द्वितीयश्चे-त्किं सादृश्यप्रत्यक्षमुपमानम्-उत सादृश्यानुमितिः-आहोस्वित्सादृश्यो-पमितिः—सादृश्यबोधो वा-तत्राद्ये कीदृशं तद्यदुपमानत्वेनाभिमतम्— चक्षुरादीन्द्रियसंसर्गिणि गवये गोसादृश्यप्रत्यक्षमिति चेत्—किं चक्षुराद-सन्निकृष्टे गवये गोसादृश्यं गवि च गवयसादृश्यं भिन्नमभिन्नं वा-भिन्न-मिति चेत्-न तत्सादृश्यम्भवितुमर्हति भूयसामवयवानां समानसंसर्ग एव सादृश्यं स चेद्गोगवययोर्भिन्नस्तयोः कथं सादृश्यं भवेदिति सादृश्य-स्वरूपत्वे समान एव वक्तव्यस्तामानश्चेत्कथं तद्विषयं ज्ञानमुत्पद्यमानं भिन्नं भवेदिति यद्गोगवययोस्सादृश्य प्रत्यक्षं तदेकमेव वाच्यं तथा च गोसादृश्यसादृश्यप्रत्यक्षानन्तरं गवयोपमितिवद्गोरप्युपमितिस्स्यात्तर्हि सादृ-श्यसादृश्यप्रत्यक्षानन्तरं गवयोमितिवद्गोरप्युपमिति कस्यचिदभिमतायेन गवोपमितिरपि स्वीक्रियेत् सादृश्यप्रत्यक्षस्योपमितिकरणत्वाङ्गीकारे च गवयोपमितिवद्गवोपमितिरप्यावश्यकीति न गवये चक्षुरादिसन्निकृष्टे गोसा-दृश्यप्रत्यक्षमुपमानम्-नापि सादृश्यानुमितिरुपमानम्-सा च गो सदृशो-ऽयम् इत्याकारैव वाच्या न सोपमानं भवितुमर्हति—तद्ध्वंसप्रत्यक्षयोर-प्युपमितित्वप्रसङ्गात्—किन्तु गवयमपश्यतोपि पुरुषस्य गोसादृश्यानुमिति-

भिधाने च सदृशाविमाविती न्द्रियजेपि प्रसङ्गात् [b]सो-
ऽपि गवयो गवा सदृशो गवयत्वात् गवयान्तरवदित्य-
नुमानस्यापि [c]तथात्वापत्तेः [d]एवमाप्तोक्तिजेपि कि-
ञ्चोपमितिलक्षणमिदं उपमितिकरणलक्षणं वा स्या-
न्नाद्यः [e]सादृश्यस्योपमेयतापत्तेः [f]* सदृशे चोपमे-
यव्यवहारोस्ति चन्द्रोपमेयं मुखमित्यादि सदृशमिति
[g]सा ? *-इति चेन्न, [h]अक्षादिकरणासम्भवे तदुदाहर-
णासिद्धेः नापि द्वितीयः [i]सादृश्यज्ञानस्य सर्वस्यास-
म्भवत्प्रमाणान्तरव्यापारफलजनकताया दर्शयितुम-
शक्यत्वात् [j]नच सादृश्यमनुगतमेकमस्ति [k]मुखसादृ-
श्यस्य हस्तसादृश्यस्य च परस्परभेदेनैवोपलम्भात् ।

टी० ॥ [a]"स्मृतावि"ति । सादृश्यस्मृतावित्यर्थः सादृश्य
गोचरः परोक्षानुभवश्चेद्विवक्षितस्तत्राह—। [b]"सोपी"ति ॥ [c]"त-
थात्वे"ति । उपमानत्वापत्तेरित्यर्थः ॥ [d]"एवमि"ति । गोस-
दृशो गवय इत्यादिशब्दजन्यानुभवस्याप्युपमानत्वप्रसङ्ग इत्यर्थः ।
[e]"सादृश्यस्ये"ति । सदृशो धर्मी लोक उपमेयो न सादृश्यमि-
त्यर्थः तदेवाह—। [f]"सदृश" इति ॥ [g]"सेनी"ति । उपमितिरि-
त्यर्थः ॥ [h]"अक्षादी"ति । प्रत्यक्षेण या सदृशमितिः प्रमा सा

सम्भवेन तदनन्तरमप्युपमितिस्स्यान्नैतद्भवितुमर्हति गोसादृश्यानुमि-
तेर्व्याप्तिग्रहपूर्वकत्वेनेति तदनन्तरमेव गो सदृशो गवय इतिज्ञानसम्भ-
वात्कृतमनुमित्यात्मकेनोपमानेन-। नाप्युपमितिरुपमानम्-तथात्वेना-
त्मकोपमितिप्रतिकरणत्वे च स्वाश्रयः । उभयोरन्योन्यप्रतिकरणत्वे
ऽन्योन्याश्रयः । करणभूतोपमितेरप्युपमित्यात्मककरणत्वाङ्गीकारे तस्या-
प्युपमित्यन्तरं वक्तव्यमित्यनवस्थाप्रसज्येत नच करणभूतोपमितेर्न करण-
मुपमित्यन्तरमिष्यत इत्यपि [illegible]शक्यं वक्तुं तथा सत्युपमितेरुपमिति
करणत्वव्याघातादिति नोपमितिरप्युपमानम्-नापि बोधकस्य शक्तिग्र-
हकृतपदज्ञानजन्यतया गोसदृशो गवयपदवाच्य इतिशक्तिग्रहकाल एव
गवयबोधसम्भवादिति वैयर्थ्यं सादृश्यबोधस्योपमिति करणत्वेनेति न
तद्बोधोप्युपमानमित्यभिप्रेत्याह—नचेति—

तावतोपमितिस्तत्र साक्षात्त्वानुभवात् एवमनुमितिशाब्दज्ञानयोरपि वाच्यम् तदतिरिक्ता च मितिर्नास्त्येव योपमितिः स्यादित्यर्थः ॥ [i]"सादृश्यज्ञानस्ये"ति । सादृश्यज्ञानं तदा पृथक् प्रमाणं स्याद्यदि फलप्रमाणव्यापारापेक्षया विलक्षणोऽस्य व्यापारः स्यादेवं तत्फलापेक्षया विजातीयं फलं स्यादथवा प्रमाणान्तरासङ्कीर्णो विषयः स्यात् नचैवमित्यर्थः सादृश्यज्ञानमुपमानं सादृश्यभेदेनाननुगतं स्यादित्याह–। [j]"नचे"ति ॥ [k]मुखेति आह्लादकत्वकोमलत्वारुणत्वादीनां भेदादित्यर्थः

सू० [a]नच सादृश्यरूपत्वमनुगतं तेष्वपीत्यदोषः [b]तथापि सादृश्येन सह सादृश्ये ऽनेकस्थत्वादौ सादृश्यरूपत्वाश्रिते सादृश्यरूपत्वस्याश्रयणाभ्युपगमे परस्पराश्रयभावोऽनभ्युपगमे चाननुगमः [d]तयोः सादृश्यानभ्युपगमेऽन्यत्रापि तथात्वापत्तिः [e]किञ्च वैधर्म्यप्रतिपत्तेरपि प्रमाणान्तरत्वमेवं स्यादविशेषात् एवमेवाभ्युपगमे च परिगणितप्रमाणाधिक्यप्रसङ्गो वा सादृश्यबुद्धेरपि वा परिगणितेष्वेवान्तर्भावः स्यादिति [f]अप्रतीयमानस्य प्रतीयमानेन सह सादृश्यप्रमितिरुपमानमित्यपि न आप्तवाक्यादपि तथा प्रतीतेः *यत्र [g]तद्व्यापारो नास्ति ? *–इति चेन्न,

टी०॥ नानासादृश्यगतं सादृश्यत्वमपि धर्मोऽनुगतो नास्तीत्याह–।[a]"नचे"ति ॥ [b]"तथापी"ति । सादृश्येषु यदेकं सादृश्यत्वमनुगतं वाच्यं तत्रापि सादृश्यत्वेन सहानेकवृत्तित्वादिना सादृश्यमस्त्येवेति सादृश्ये सादृश्यत्वं तत्र च सादृश्यत्वे सादृश्यमित्यन्योन्याश्रय इत्यर्थः ॥ अनेन भयेन यद्येकं सादृश्यत्वं नाभ्युपेयं तदाननुगम इत्याह– । [c]"अनभ्युपगमेचे"ति । अथ सादृश्यसादृश्यत्वयोर्न सादृश्यं तदा सादृश्यबुद्धेरविशेषात् मुखचन्द्रयोरपि सादृश्यं न स्यादित्याह–। [d]"तयोरि"ति ॥ [e]"किचे"ति । धिक्कुरभमतिदीर्घग्रीवं प्रलम्बोष्ठं कठोरकण्टका-

शिनमपसदं पशूनामिति पश्वन्तरवैधर्म्यज्ञानवतोऽप्ययममी करभशब्दवाच्य इति प्रमितिरस्ति तत्कारणं प्रमाणान्तरं स्यादित्यर्थः शावरमुपमानं शङ्कते–। [f]"अप्रतीयमानस्ये"ति । या गौरेतत्सदृशीति परोक्षधर्मिकसादृश्यज्ञानमुपमानमित्यपि नेत्यर्थः ॥ [g]"तद्व्यापार"इति । शब्दव्यापार इत्यर्थः ।

सू० "स चायं चाभिन्नादितिवत् स चायं च सदृशाविति पूर्वप्रतीतस्य प्रतीयमानेन सहैन्द्रियकसादृश्यप्रतीतावपि प्रसङ्गात् [b]* इन्द्रियासम्पृक्तस्य?*–इति चेन्न, प्रत्यक्षतो गोगवयसादृश्यं प्रतीत्य सापि च गौर्गवयः सदृशो गोत्वादियमिवेत्यनुमितावपि प्रसङ्गात् * अलिङ्गजापि ? *–इति चेत्, नत्वेवं प्रत्यक्षानुमानशब्दानुत्पत्त्वे सतीत्युक्तं स्यात् तथाच [c]विशेषणमेव समर्थमित्यप्रतीयमानस्येत्यादि व्यर्थम् । * नोपादेयमेव पदान्तरम् ? *–इति चेन्न, [d]अर्थापत्तेरवश्यम्भावात् (१) [e]तेन सार्द्धमेतत्सादृश्यस्यानेन सार्द्धं तत्सादृश्यव्यतिरेकेणानुपपद्यमानत्वात् [f]अन्यथा वैधर्म्यप्रत्ययेोत्पत्तिविषयं प्रमायां प्रमाणान्तरमापद्येत तस्मादयं ह्रस्व इति प्रतीतेरस्मात्स दीर्घ इति वा अन्यथा कतमा प्रमा स्यादर्थापत्तिं प्रमाणान्तरमनिच्छतापि इयमर्थापत्तिरनुमानेवान्तर्भाव्या पृथक्प्रमाणीकर्त्तव्या वा ॥

टी० ॥ [a]"स चायं चे"ति । यद्यपि तत्र तत्तेदन्ताविशिष्टस्य धर्मिण एकत्वमिति भवति विशेष्यसन्निकर्षात्तादृशं प्रत्यक्षं प्रकृते विशेष्यभेदाच्च तादृशप्रत्यक्षमसम्भवस्तथापि विशेष्यसन्निकर्षमात्रं प्रत्यक्षे तन्त्रं नतु यावद्विशेष्यसन्निकर्षोऽपि अन्यथा आरूतविपरीतप्रत्यभिज्ञानं न स्यादिति भावः इन्द्रियव्यापारं विना

(१) किमुपमानेनेतिशेषः ।

यदुमत्रिकृष्टे सादृश्यज्ञानं तदुपमानमितिशङ्कते—। [b]"इन्द्रिये"-ति ॥ [c]"विशेषणमेवे"ति । प्रत्यक्षाद्यजन्यत्वे सत्यप्रतीयमान-स्य प्रतीयमानेन सादृश्यप्रमितिरुपमितिरित्यत्र विशेषणमात्र-स्यैव लक्षणत्वमुचितमित्यर्थः ॥ [d]"अर्थापत्ते"रिति । अर्थापत्त्यैव प्रकृतफलसिद्धेः किमुपमानेनेत्यर्थः तामेव दर्शयति—। [e]"तेने"ति । अन्यथा तद्विधर्मायमिति प्रतीत्यनन्तरमेव नद्विधर्मा स इत्यपि प्रमाणान्तरफलं स्यादित्याह—। [f]"अन्यथे"ति ।

मू० [a]एतेनाप्रतीतगवयगवान्तर(१)सादृश्यस्य(२)दृष्टान्ता-भावेनानुमानासम्भवात् गवयेनानेन सदृशी सा गौ-रिति मितिरुपमितिरित्यपि व्युदस्तम् [b]तयैतत् सादृ-श्यास्यैतेन तत्सादृश्यं विनानुपपत्त्यैव सिद्धेः [c]अनव-गतसङ्गतिसञ्ज्ञासमभिव्याहृतवाक्यार्थस्य सञ्ज्ञ्यनु-साधनमुपमानमित्यपि न [d](३)प्रस्मृतसङ्गतेरेवम्भूतो-यमित्यव्यापनात् * अस्मृतसङ्गतीत्यभिधेय(४)म्?*-इति चेन्न, [e]अनुभूतस्मृतकालान्तरप्रस्मृतसङ्गतेरव्या-पनात् * अस्मर्यमाणा ? *-इति चेन्न, कदाचिदस्म-र्यमाणताया(५)स्तत्रापि सम्भवात् सर्वदा अस्मर्य-माणतायाः क्वचिदप्यसम्भवात्* उपमितिप्राक्काले?*-इति चेत्, स्यादप्येतद्यद्युपमितिर्लक्षिता स्यात् तद-र्थमेव तु(६)क्रन्दनमिदं भवतः किञ्च [f]सर्वैरनवगतसङ्ग-तित्वस्य प्रकृतेप्यसिद्धेः केनाप्यनवगतसङ्गतित्वस्य वाक्यजेपि सम्भवात् उपमात्रेति च [g]पूर्ववन्निरस्तं यस्याः प्रमितेर्येन प्रमात्रेति चाभिधानेनुगतरूपाभा-

(१) सामान्यस्येति पुस्तकान्तरपाठः । (२) अदृष्टान्तानु-मानासम्भवादिति तु पुस्तकान्तरपाठः । (३) विस्मृतेत्यर्थः ।

(४) अनवगतस्थानेऽस्मृतसङ्गतीत्यभिधेयमित्यर्थः, तथा च तत्रा-नवगतत्वाभावेप्यस्मृतत्वसत्त्वेनातो न दोषः । (५) कदाचिदस्म-र्यमाणतायाः, अर्थात् कदाचित्स्मर्यमाणताया इत्यर्थः ।(६)आक्रोशः।

वाह्यवृत्तौ पतनेन लक्षणाननुगत्यापत्तेः ॥

टी० ॥ ननु येन गवान्तरगवयान्तरसादृश्यं न प्रतीतमस्ति तस्य सा गौरेतत्सदृशी गोत्वादित्यनुमानं न सम्भवति दृष्टान्ताभावादतः सैवोपमितिरित्यपि निरस्तमर्थापत्तित एव तत्फलसिद्धेरित्याह—। [a]"एते ने"ति । अतिदेश्यमाह—। [b]"तये"ति । आचार्यलक्षणं दूषयति—। [c]"अनवगते"ति। अनवगता सङ्गतिर्यस्याः सञ्ज्ञायाः सा तथा तत्समभिव्याहृत यद्वाक्यं गोसदृशो गवय इति रूपं तदर्थस्य सन्निकर्षात् गवये प्रत्यक्षे यदनुसन्धानमयमसौ गवयपदवाच्य इति सैवोपमितिः प्रत्यक्षाद्यगम्यत्वादित्यर्थः ॥ [d]"अस्मृते"ति । तत्रानवगतत्वाभावादित्यर्थः ॥ [e]"अननुभूते"ति । तत्रास्मृतत्वाभावादित्यर्थः ॥ दोषान्तरमाह—। [f]"सर्वैरि"ति ॥ [g]"पूर्ववदिति । उपमितिनिरूप्यत्वात्तस्येत्यर्थः ॥

सू० [a]"सञ्ज्ञेत्यपि व्याकुलं गोसदृशो गवयः प्रायः कानने महति दृश्यते इति श्रुतवाक्यस्य काननपदाविदितसङ्गतेः गवयपदविदितसङ्गतेश्च सञ्ज्ञासञ्ज्ञिसंबन्धप्रतिपत्तिफलाया(१)मीदृशप्रतिपत्तौ गतत्वेनातिव्यापकत्वात् [b]विनापि वा(२)प्रायः शब्दमभिहितस्य(३)तस्यानुसन्धाने प्रसङ्गः तत्र काननसञ्ज्ञासञ्ज्ञिसंबन्धावधारणे(४)ऽप्यन्यत्रेव पदान्तरसम्बन्धोत्थाया अन्यथानुपपत्तेः प्रमाणत्वान्न तूपमानस्य [d]उपमेयसञ्ज्ञासमभिव्याहृतेति विशेषणे च [e]पूर्व एव निरासः वाक्यार्थेत्यपि [f]तादृगेव [g]प्रतिपत्तिकालास्मृतातिदेशवाक्यगतकाननादिपदार्थस्य तथाविधप्रत्ययाव्यापनात् ॥

(१) इदं, काननं, गवयाधारत्वादित्यनुमित्यात्मकप्रतिपत्तावित्यर्थः ।
(२) प्रायः पदस्य व्याप्तिसूचकतयानुमितिर्लभ्यते इति ज्ञेयम्— (३)काननसञ्ज्ञासञ्ज्ञिसम्बन्धस्य सन्निकृष्टगवयपदवाच्यत्वान्यथानुपपत्त्याऽनुसन्धानमित्यर्थः।
(४) गोसदृशो गवय इत्यत्रेवेत्यर्थः ।

टी० ॥ प्रकारान्तरेणातिव्याप्तिमाह—। [a]"सङ्केत्यपी"ति । प्राय: पदं बाहुल्यवाचि व्याप्तिपरतां वाक्यस्य व्यनक्ति तथा-चेदं काननं गवयाधारत्वादित्यनुमितौ लक्षणमिदं गतमित्यर्थः । यत्रापि प्राय: पदं नास्ति तत्रापि यथेह प्रभिन्नकमलोदरे मधूनि मधुकर: पिबतीति प्रसिद्धपदसामानाधिकरण्यान्मधुकरसञ्ज्ञा-सञ्ज्ञिसंबन्धपरिच्छेदवत्काननसञ्ज्ञापरिच्छेदे गतत्वादतिव्या-प्तिरित्याह—। [b]"विनापी"ति । स्वयाप्युपमानादस्य भेदा-ङ्गीकारादित्यर्थः ॥ [c]"अन्यत्रैवे"ति । गोसदृशो गवय इत्यत्र यथा सङ्गतिग्रहस्तथात्रापि प्रसिद्धपदसामानाधिकरण्यानुपपत्त्या सङ्गतिग्रहेतिव्याप्तिरित्यर्थः ननूपमेयसञ्ज्ञाया अनवगतसङ्ग-तित्वं विवक्षितं प्रकृते च काननसञ्ज्ञाया अनवगतसङ्गतित्वं का-ननं च नोपमेयमित्यत आह—। [d]"उपमेये"ति ॥ [e]"पूर्व एवे"ति । उपमेयत्वस्योपमितिगर्भतयाद्यापि तदनिरुक्तेरित्यर्थः ॥ [f]"तादृ-गेवे"ति । आकुलमेवेत्यर्थः ॥ तदेवाह—। [g]"प्रतिपत्ती"ति । गव-याव्युत्पन्नं प्रति काननान्तर्भावेन प्रवृत्तमतिदेशवाक्यं कानन-पदबहिर्भावेन स्मर्यमाणं यत्र गवयसञ्ज्ञाप्रतिपत्तिफलकं तत्रा-व्याप्तिः समग्रवाक्यार्थानुसन्धानाभावादित्यर्थः ।

सू० [a]वाक्यार्थैकदेशस्यापि(१) वाक्यार्थत्वेन विवक्षितत्वे सदृशो गवय इत्यादिस्मारिणोपि प्रत्यये प्रसङ्गात् [b]*प्रतीत्युत्पत्तिं प्रति प्रयोजकीभूतं यावत्तावद्वाक्यं विवक्षितम् ?*—इति चेन्न, [c]अन्तर्भावितवनाधिकरणा-तादृशप्रतीतिं प्रति तस्यापि प्रयोजकत्वात्(२) [d]उप-मितिं(३)प्रतीति तु पूर्वन्निरस्तमिति [e]*यावत्सञ्ज्ञा-सञ्ज्ञिसम्बन्धबुद्ध्यौपयिकं तावद्विवक्षितम् ?*—इति चेन्न, [f]लक्षणसहचरितसञ्ज्ञोपदेशार्थानुसन्धानेपि प्रसङ्गात् ॥

(१) वाक्यत्वेनेति पाठ: पुस्तकान्तरे लभ्यते—
(२) तदननुसन्धानस्थलोपमितावव्याप्तिरिति शेषः ।
(३) यावत्प्रयोजकविविक्षितं वनपदन्त्वधिकमेवेत्याशयः ।

टी० ॥ वाक्यैकदेशार्थानुसन्धानस्यापि यद्युपमानत्वं तदा गोपदमस्मृत्वा सदृशो गवय इति मात्रं यत्रानुसन्धत्ते तत्राति-व्याप्तं करणलक्षणमित्याह—। [a]"वाक्ये"ति । सदृशो गवय इति मात्रमनुसन्धानं न प्रतीतिहेतुरिति नातिव्याप्तिरिति शङ्कते—। [b]"प्रती"ति । तर्हि काननान्तर्भावेनापि यदतिदेशवाक्यं तत्रापि काननाधिकरणगवयस्य गवयपदवाच्यत्वबुद्धौ काननपदमपि प्रयोजकमेवेति तदननुसन्धानस्थलोपमितावव्याप्तिरेवेति परि-हरति—। [c]"अन्तर्भावित्ते"ति । ननु तथाप्युपमितिं प्रति गोस-दृशो गवय इत्येव प्रयोजकं काननपदं त्वधिकमेवेति न प्रयो-जकमित्यत आह—। [d]"उपमितिं प्रती"ति । उपमितिरेव स-ञ्ज्ञासञ्ज्ञिसम्बन्धबुद्धित्वेनाभिधेयेति नात्माश्रय इति शङ्कते—। [e]"यावदि"ति । गन्धवती पृथिवीतिवाक्यात् सञ्ज्ञासञ्ज्ञिसम्बन्ध-परिच्छेदानन्तरं यत्र पुनः प्रत्यक्षेण तदर्थानुसन्धानं तत्राति-व्याप्तिरिति परिहरति—। [f]"लक्षणे"ति । उपदेशः कथनं ।

मू० [a]"किंच यदा तर्कानुसन्धानविरहिणः सत्यप्येवंविधा-नुसन्धाने सादृश्यमेव गवयपदप्रवृत्तिनिमित्तमिति मितिः फलमुत्पद्यते तदा तस्याप्रमाकरणस्याप्युप-मानत्वं चापद्येत [b]प्रमाफलकमिति विशेषणप्रक्षेपे चा-नुसंहितरूपव्यवहार्यतानुमित्युत्पादेनाप्येतादृशानुस-न्धानमुपमानं स्यात् * अव्याप्त([1])विषयप्रमाफल-कमिति विशेषणीयम् ? *—इति चेन्न, [c]वस्तुगत्या ([2])ऽव्याप्तत्वस्योपमेयेऽप्यभावात् [d]व्याप्ततयानवग-म्यमानस्येति च कृते यत् प्रति तल्लिङ्गं तेन सह व्या-प्तत्वावगतमुपमितिकरणमपि न व्याप्नुया[e]दुपमे-

(१) पृथिवीत्वस्य पृथिवीव्यवहारव्याप्तत्वात्तज्ज्ञानमनुमानं भवति अव्याप्तविषयकं यत्प्रमाविषयकमिति विशेषणे तु न तत्रातिव्याप्तिरि-त्यभिप्रायेणाह—अव्याप्तेति । (२) गोसदृशो गवय इतिवाक्यानुसन्धा-नस्योपमेयरूपगवयोपि विषयस्तथापि केनचित्पदार्थत्वादिना व्याप्त-त्वात्तज्ज्ञानमप्युपमानं न स्यादतोऽसम्भव इत्याह—वस्तुगत्येति ।

येन सह व्याप्तत्वानवगतत्वोक्तावप्यनुमाने प्रसङ्ग-स्तदवस्थः ॥

टी० ॥ व्युत्पत्तिग्रहाय गोसादृश्यं सखण्डत्वेन गुरु गवयत्वं तु जातिरूपतया लघु गवयपदप्रवृत्तिनिमित्तमिति तर्कोपगृहीत-गवयसादृश्यानुसन्धानस्य गवयत्वेन प्रवृत्तिनिमित्तेन गवयपदवा-च्योपमितिप्रमाकरणस्य तावदुपमानत्वमपेक्षितं तत्र तर्कानुसन्धा-नविरहिणो यत्र सादृश्यस्यैव गवयपदप्रवृत्तिनिमित्तताज्ञानं तत्र तत्करणफलयोरुपमानत्वोपमितित्वातिव्याप्तिरित्याह—। ᵃ"किञ्च" ति। इयमप्रमेति प्रमाफलत्वेन करणं विशेषमित्याह—। ᵇ"प्रमे"ति। लक्षणवाक्यानुसन्धानानन्तरमियं पृथिवीति व्यवहर्तव्या पृथि-वीत्वात् यन्नैवं तन्नैवमिति व्यवहर्तव्यत्वानुमित्यौपयिकेऽति-प्रसङ्ग इत्यर्थः ॥ ᶜ"वस्तुगत्ये"ति । उपमेयमपि केनचिद्व्याप्त-मित्यसम्भविलक्षणं भवेदित्यर्थः ॥ ᵈ"व्याप्तये"ति। उपमिति-करणस्य स्वव्यापकेन सह क्वचिदनुसन्धाने यत्रोपमितिस्तत्राव्या-प्तिरित्यर्थः ॥ ᵉ"उपमेयेन सहे"ति । व्यवहार्यतानुमानेप्युपमे-येन सह व्याप्यत्वानवगतिरेवेति तत्रातिव्याप्तिरेवेत्यर्थः ॥

मू० ᵃ*अनुमेयेन सहेति कृते च तदनपायाद्व्याप्तिस्तदव-स्थैव सञ्ज्ञासञ्ज्ञिसम्बन्धप्रमितिकरणम् ?*—इति चेन्न, ᵇतथात्वासिद्धेः अर्थापत्त्यादितस्तत्सिद्धेर्वक्ष्य-माणत्वात् अननुमितिजनकं ᶜ*तादृक्प्रतिसन्धान-मुपमानम् ? *—इति चेन्न, ᵈतज्जातीयस्यानुमिति-जनकत्वात् ᵉव्यक्त्यपेक्षया चाजनकत्वस्य(१)सामा-न्याकारपर्य्यवसायिनो नित्यं व्यक्तावसम्भवितया-ननुगमेन चायुक्तत्वादिति ᶠकिंच गोसादृश्यं विहाय

---

(१) व्यक्त्यपेक्षया चाऽजनकत्वस्याऽयुक्तत्वादित्यन्वयः, तत्र हेतु-द्वयमाह—सामान्याकारेत्यादिना, 'सामान्याकारपर्य्यवसायिनः'—इत्यतो-ऽग्रे 'जन्यजनकभावस्य सतः'—इति शेषः पूरणीयः । 'व्यक्त्यपेक्षया चाज-नकत्वस्ये'ति स्थाने क्वचित् 'व्यक्त्यपेक्षया च जनकत्वस्य'—इत्यपि पाठः ।

गवयशब्दार्थताप्रतीतिः कल्पनालाघवाख्यं तर्कमपास्य न स्यादिति तदुपन्यासस्थितौ किमानुमानिक्येव तत्र गवयपदवाच्यताप्रमितिरियं नेष्यते सम्भवति हि प्रयोगः ॥

टी० ॥ अनुमेयव्याप्त्यविषयत्वं यदि विवक्षितं तदा स्वव्यापकेनानुमेयेन सहोपमितिकरणस्य कदाचिद्व्याप्यत्वग्रहेऽप्युपमितिदर्शनादव्याप्तिरित्याह—। [a]"अनुमेयेने"ति ॥ [b]"तथात्वे"ति। सज्ञासज्ञिसम्बन्धपरिच्छेदकरणमर्थापत्तिरनुमानं वा नतूपमानमधिकं प्रमाणमित्यर्थः ॥ [c]"तादृगि"ति। अनधिगतसङ्केतसज्ञासमभिव्याहृतवाक्यार्थस्य सज्ञिन्यनुसन्धानमित्यर्थः तथाच न व्यवहार्यतानुमितिकरणेऽतिव्याप्तिरित्यर्थः ॥ कदाचित्तेनाप्यनुमितिजनने तज्जातीयस्यानुमितिजनकत्वादसम्भव इत्याह—। [d]"तज्जातीयस्ये"ति। या करणव्यक्तिस्तादृशी नानुमितिं जनयति सैवोपमानमिति न युक्तं सामान्यपुरस्कारेण गृहीतस्य जन्यजनकभावस्य व्यक्तावावश्यकत्वेनासम्भवादननुगमाच्चेत्याह—। [e]"व्यक्तौ"ति। कल्पनालाघवतर्को य उपमाने कल्पनीयप्रमाणाभावे सहकारीष्यते स क्लृप्तप्रमाणभावस्यानुमानस्यैव किं नेष्यते इत्याह—। [f]"किंचे"ति ॥

मू० [a] विमतिपदं गवयशब्दप्रवृत्तिनिमित्तं तथात्वे तर्केणाविषयीक्रियमाणविपर्ययकत्वात् न यदेवं न तदेवं यथा गोत्वं(१)तथा चेदं ततस्तथेति [b]न ह्यस्ति सम्भवो मूलशैथिल्यादिदोषविरहिततर्कनिवेदितविपर्ययस्यार्थो नच तर्थेति अथवा गवयपदमसम्भवत्प्रवृत्तिनिमित्तान्तरमनुपपद्यमानाप्रोक्तगोसदृशसामानाधिकरण्यमर्थाद्गवयत्वप्रवृत्तिनिमित्तकतामाक्षिपतीत्य-

---

(१) यथा गोत्वमिति, गोत्वस्य गवयाऽवृत्तित्वात्कथञ्चिद्वृत्तित्वकल्पनायां कल्पनागौरवेण विषयीक्रियमाणविपर्ययकत्वान्न तद्गवयपदप्रवृत्तिनिमित्तमित्यर्थः। तथा चेदमिति, इदं गवयत्वं तथा—प्रवृत्तिनिमित्तत्वे तर्केणाऽविषयीक्रियमाणविपर्ययकमित्यर्थः।

र्थापत्तिरेवाच प्रमाणमस्तु सा च त्वया व्यतिरेकी-
कृत्य परेण पृथगेवाभ्यां प्रमाणमीयेति ।

टी० ॥ तर्कोपकार्यमनुमानमाह—। [a]"निमित्तपदमि"ति ।
गवयत्वमित्यर्थः । तथात्वे प्रवृत्तिनिमित्तत्वे तर्केण गौरवेणावि-
षयीक्रियमाणो विपर्ययोऽप्रवृत्तिनिमित्तत्वं यस्य तत्तया सादृ-
श्यत्वादित्यर्थः गवयत्वस्यानुगततया तस्य प्रवृत्तिनिमित्तत्वे
सादृश्यस्य न प्रवृत्तिनिमित्तत्वं कल्पनागौरवतर्केण प्रतिहतत्वा-
दिति भावः ॥ [b]"नह्री"ति । यद्यपि गौरवादितर्के विशिष्टव्या-
प्त्युपग्रहो नास्ति येन विपर्ययपर्यवसानं भवेत्तथापि लाघव-
मेवास्य विपर्यय इति भावः वस्तुतो गवयपदं सप्रवृत्तिनिमित्तं
पदत्वादिति सामान्यतो दृष्टमेव सादृश्यप्रवृत्तिनिमित्ततावाधक-
सहकृतं पक्षधर्मताबलाद्गवयत्वस्य प्रवृत्तिनिमित्तत्वं विषयीक-
रोति यथा पृथिव्यादिवृत्तितावाधकसहकृतस्येच्छादिकं क्वचिदा-
श्रिता गुणत्वादित्यनुमानस्यैवाष्टद्रव्यान्यद्रव्यवृत्तित्वपरिच्छेद-
कत्वमिति भावः ॥

मू० (१)शब्दोपि (२)क उच्यते(३)आप्तवाक्यं हि शब्दः
प्रमाणमिति न युक्तं विकल्पानुपपत्तेः तथाहि को-
यमाप्तो नाम * यथादृष्टवादी ? *-इति चेन्न, [a]भ्रा-
न्तिप्रतिपन्नकादिवाक्येपि प्रसङ्गात् [b]प्रमाणदृष्टेति
विशेषणे च तथाभूतस्यान्यथावादव्यापनात् [c]यथा-
प्रमाणेति करणे चांशे तथाभूतवादिवाक्यस्यायथा-
र्थस्यापि व्यापनात् [d]यावद्यथा प्रमाणदृष्टनिरुक्तौ
च प्रायेणातथाभूतत्वादेव लक्ष्याणां लक्षव्याप्तेः
तर्हि यावत् प्रमितं तावदभिधीयते [e]यथाप्रमित-

(१) { पाराकृत्य प्रमाणानि प्रत्यक्षादीन्यतः परम् ।
आगमस्याप्रमाणत्वं साध्यते तर्कबृंहितम् ॥ }

(२) आगमं दूषयितुं पृच्छति-क इति ॥ (३) किमाप्तवाक्यं
शब्दः प्रमाणमुतनिर्दोषस्य वाक्यमाहोस्विद्यथार्थवाक्यमिति विकल्प-
प्रथमं निराकरोति-आप्तवाक्यमिति-

स्यैव वस्तुर्वाक्यमिति व्याकारे च (१) युधिष्ठिरवाक्यस्याप्यनेवम्भूतत्वेनाव्याप्त्यापत्तेः तत्र विषये इति विशेषरूपस्य विषयस्यासाधारण्येनाव्यापकत्वापातात्* अथ [f]निर्दोषस्य वाक्यं तथा * इति चेन्न,(२) [g]सदोषस्य नास्ति घट इत्यभिधित्सतोऽस्ति घट इति दैवान्निर्गतयथार्थवाक्याव्याप्तेः [h]*तत्प्रमाणं तु न भवत्येव ? *-इति चेन्न,

टी० [a]"भ्रान्ती"ति । भ्रान्तेरपि युधिष्ठिरवाक्यया प्रतिपक्षं यो वदति तद्वाक्ये इत्यर्थः ॥ [b]"प्रमाणे"ति । प्रमाणदृष्टरजतस्य भ्रान्तेन शुक्त्यात्मतया यदभिधानं तदपि प्रमाणं स्यादित्यर्थः ॥ [c]"यथे"ति । इमे रङ्गरजते इति वाक्यस्य रजतांशे तथा प्रमाणदृष्टाभिधाने रङ्गांशे अयथार्थस्य प्रमाणत्वं स्यादित्यर्थः ॥ यावद्यथाप्रमाणेन दृष्टं तावतस्तादृग्रूपेणाभिधानमित्यव्यापकं नहि तार्णत्वादिदर्शनाद्वह्निर्महानसेऽस्तीति नाभिधीयत इत्याह—। [d]"यावदि"ति ॥ [e]"यथाप्रमितस्यैवे"ति । भ्रान्तेः पुरुषधर्मत्वादिति भावः ॥ [f]"निर्दोषस्ये'ति । भ्रमप्रमादविप्रलिप्साकरणापाटवरहितस्येत्यर्थः ॥ भ्रान्तप्रतारकवाक्याव्यापकत्वमाह—। [g]"सदोषस्ये"ति । दैवादिति निर्देशेन करणापाटवं विवक्षितं ॥ [h]"तदि"ति । प्रमाया गुणजन्यतया दोषवत्प्रणीतवाक्यस्य प्रमां प्रत्यजनकत्वादित्यर्थः ॥

मू० [a]"पूर्वमुक्तोत्तरत्वात् प्रवृत्तिसामर्थ्येन प्रमाण्यासम्भवात् [b]आपाततः सन्देहेऽप्यदोषात् सामान्यतो निर्दोषत्वस्य च(३)भीमाग्रजेऽप्यभावात् विशेषतस्तथात्वस्यासाधारण्यपर्यवसायित्वात् * यथार्थवाक्यं शब्दप्रमाणमित्यत्र को दोषइति चेत् ? *-[c](४)पूर्वोक्त-

(१) अश्वत्थामा हतो नरो वा कुञ्जरो वेत्याकारकस्य—
(२) द्वितीयमपाकरोतिनेति—(३) युधिष्ठिर इत्यर्थः ।
(४) तृतीयं दूषयति पूर्वोक्तेति—

याथार्थ्यदूषणानि तावत्प्रथमः यथार्थमिति विशेषणस्य व्यवच्छेदकत्वाव्यवच्छेदकत्वयोः पूर्ववद्दोषश्च [d]द्वितीयः वाक्यत्वानिरुक्तिश्च तृतीयः तथाहि किमिदं वाक्यं नाम * एकार्थावच्छिन्नपदसमुदायो वाक्यम् ?*-इति चेत्, एकत्वविषयत्वावच्छिन्नत्वानां वाच्यानि दूषणानि तावत्सन्तु(१)पदपदार्थं तु चिन्तयामः सुप्तिङन्तं पदमित्येके वर्णा विभक्त्यन्ताः पदमित्यन्ये तत्र नाद्यः [e]प्रत्येकं मिलितस्य वाऽव्यापकत्वात् ॥

टी० ॥ [a]"पूर्वमि"ति । आभासकरणजन्यस्यापि संवादिज्ञानस्य प्रमात्वेन प्रमाखण्डनप्रस्तावेभिधानादित्यर्थः ॥ [b]"आपातत" इति । प्रवृत्तिसंवादात्प्रागित्यर्थः ॥ [c]"पूर्वोक्ते"ति । यथार्थानुभवः प्रमेति लक्षणप्रस्तावोक्तदूषणानि तद्यथा वाक्यार्थयोः सादृश्यं प्रमेयत्वादिनाप्रमाणशब्देप्यस्ति तेन यथार्थज्ञानजनकं वाक्यमिति वक्तव्यम् तत्र यत्किञ्चित्सादृश्यं भ्रान्तावपीति तज्जनकवाक्यातिव्याप्तिः प्रकाशमानरूपेणेत्यभिमते रूपवान् घट इत्यादौ प्रकाशमानरूपवत्त्वादिरूपेण ज्ञानस्य सादृश्याभावादसम्भव इत्यर्थः ॥ [d]"द्वितीय" इति । यथार्थपदस्यायथार्थवाक्यार्थव्यवच्छेदकत्वे यस्य वाक्यस्यांशे यथार्थ्यमंशे चायाथार्थ्यं तत्रापि प्रमाणं न स्यादित्यव्याप्तिरव्यवच्छेदकत्वे च विशेषणवैयर्थ्यमित्यर्थः ॥ [e]"प्रत्येकमि"ति । सुबन्तं यदि पदं तदा तिङन्तं न भवेत् तिङन्तत्वं च सुबन्ताव्यापकं मिलितं चासम्भवतीत्यर्थः ॥

मू० [a]"पृथक्प्रवृत्तिनिमित्ततायां च वाक्यलक्षणाव्यापकत्वात् नापि द्वितीयः विभक्त्यर्थस्यानुगतस्याभावात् विभक्तिरित्यनेन सुप्तिङोः प्राक्दिशो विभक्तिरि-

(१) पदेत्याकारकपदस्य योर्थस्तमित्यर्थः ।

त्यनेन च तसिलादेः पृथक् पृथगेव विभक्तिसञ्ज्ञाविधानात् शब्दसाम्येन लक्षणायोगात् किञ्च वर्णा इति [b]बहुत्वस्य विवक्षितत्वेहमित्यादेरपदत्वप्रसङ्गः अविवक्षितत्वे देवदत्त इत्यन्ताकारस्य पदत्वापातः तस्य विभक्त्यन्तत्वात् * सार्थकस्तथा ? *–इति चेत्, भवतीत्यादौ [c]शबकारादीनां पदत्वप्रसङ्गः शपः सार्थकत्वात् [d]*यत्र विहिता विभक्तिस्तद् ? *–इति चेन्न, शबकारं परित्यज्य पदत्वप्रसङ्गात् * तन्मध्यपतित्वाच्छबकारोपि गृह्यते ? *–इति चेत्, तर्हि यत्र विभक्तिर्विधीयते तत्र तद्विभक्तिमध्यपतितं च पदमिति वा विवक्षितं यत्र विभक्तिर्विधीयते तत्तद्विभक्तिमध्यवर्तिसहितं पदमिति वा आद्ये शबकारस्यापि [e]पृथगेवपदत्वप्रसङ्गः लक्षणस्य चाव्यापकत्वात् ॥

टी० ॥ [a]"पृथगि"ति । सुबन्तत्वतिङन्तत्वरूपप्रवृत्तिनिमित्तभेदान्नानार्थमेव यदि पदपदं वाच्यं तदा पदसमुदायो वाक्यमित्यत्रानुगमः स्यादित्यर्थः ॥ [b]"बहुत्वस्ये"ति । अर्थानां वर्णानां वा बहुत्वं यदि विवक्षितं तदाहमित्यादीनामपदत्वं स्यात् वर्णमात्रबहुत्वविवक्षा चेत्तदा ब्रह्मविष्णुशिववाचकानामकारोकारमकाराणां पदत्वं न स्यादित्यर्थः ॥ [c]"शबकारादीनामि"ति । प्रत्ययत्वेन तस्य सार्थकत्वं स्यादित्यर्थः ॥ [d]"यत्रे"ति । शबकारात्तु न विभक्तिविधानमित्यर्थः ॥ मध्यपतितमात्रस्य पदत्वं मध्यपतितसहितस्य वेति विकल्पार्थः॥ [e]"पृथगि"ति । तन्मात्रस्य पदत्वप्रसङ्ग इत्यर्थः ॥

मू० द्वितीये देवदत्त इत्यस्यापदत्वप्रसङ्गः मध्यवर्त्तिनोऽभावेन मध्यवर्त्तिसहितविशेषणाभावात् * क्वचिन्मध्यवर्त्तिसहितस्य क्वचित्केवलस्येति यथासम्भवम् ? *–इति चेन्न, एकानुगतरूपानभिधाने लक्षणा-

स्याव्यापकतापत्तेर्दुर्निवारत्वात् किंच [a]देवदत्त-स्त्वित्यपि पदं स्यात् * अथ अपशब्दोयं पदत्वे सति रुत्वादेर्विधानस्यावश्यम्भावित्वात् ? *-इति चेन्न, [b]यत एवायमपशब्दः अत एव भवतो दोषः प्रसज्यते अपशब्देपि पदलक्षणं गतमिति तस्मात् पाणिनिना-चार्येण शब्दसिद्ध्यर्थं पद [c]सञ्ज्ञेयं रुत्वादिविध्यनु-रोधेनापशब्ददशायामन्यैव कृता नदीसञ्ज्ञावन्न लौकिकपदव्यवहारसिद्ध्यर्थं साधुशब्दविशेषे ततश्च तत्वान्यदेव लक्षणं वाच्यम् अन्यथा(१)दाक्षीनन्द-नोदीरितनदीसञ्ज्ञाप्रत्यभिज्ञायां पाथः प्रार्थयमानः (२)काननस्थलीमलीकाभिमानी भवानीहेत * अथो-च्यते विभक्त्यन्तमेव [d]सर्वलक्षणप्रवृत्त्या निष्पन्नं व्या-वहारिकं पदमिति पदलक्षणमस्तु * मैवं, [e]सर्वलक्ष-णावृत्तेः सर्वत्रा[f]सम्भवात् * सम्भवत्सर्वलक्षणप्रवृत्त्या ? *-इति चेन्न, सम्भवत्वं तत्काले कालान्तरे वा विव-क्षितं आद्ये देवदत्तर्वित्यपि पदं स्यात् रुत्वविधान-काले विसर्गस्याविहितत्वात् ॥

टी० ॥ [a]"देवदत्तस्त्वित्यपी"ति । प्रथमान्तमिति शेषः ॥ [b]"यत एवे"ति । अलघये लक्षणगमनस्य तथा निर्वाहादित्यर्थः ॥ [c]"इयमि"ति । सुप्तिङन्तं पदमिति सूत्रकृत्संज्ञेत्यर्थः ॥ [d]"सर्व-लक्षणे"ति । व्याकरणानुशिष्टशबादिलक्षणप्रवृत्त्येत्यर्थः ॥ [e]"स-र्वे"ति । शबादीनां श्यनादिस्थलेऽभावादित्यर्थः ॥ [f]"असम्भ-वादि"ति । दिवादित्वेन शबस्तत्रासम्भवादित्यर्थः देवदत्तर्विति प्रथमान्तदेवदत्तशब्दः सकाररुत्वविशिष्टः पदं स्यादित्यर्थः ॥

(१) पाणिन्युदीरितेत्यर्थः ।

(२) काननस्थलीमीहेतेति सम्बन्धः ।

मू० देवदत्त इत्यपि पदं न स्यादित्यादिपदपूर्वकात्सभा-
विनोय(१)त्वपलोपादेरकरणात् * शब्दान्तरसन्निधि-
व्यतिरेकेण यद्वाविलक्षणं तद्विवक्षितम् ? *-इति
चेन्न, [a]जीविकाकृत्य व्याचष्टे इत्यर्थे जीविकां कृत्वा
व्याचष्टे इति प्रयुज्यमानं वाक्यं स्यात् एकारार्था-
वच्छिन्नपदसमुदायत्वस्य तत्रापि गतत्वात्कृत्वेत्य-
नेन सम्बद्धस्य जीविकामित्यस्योक्तपदलक्षणेन स-
ङ्गृहीतत्वात् * [b]यदुपाधिका यल्लक्षणप्रवृत्तिः तदुपा-
धिसम्पत्तौ तेन निष्पन्नं तथा ? *-इति चेन्न, [c]यत्र
नास्त्युपाधिसम्पत्तिः तत्र केवले तस्यां सत्यामि-
त्यस्याभावात् अपदत्वापत्तेः * [d]यस्यामवस्थायां
यस्य लक्षणस्योपनिपातस्तत्सर्वसम्पत्तौ विभक्त्यन्तं
पदम् ? *-इति चेन्न, यस्यामवस्थायामित्यवस्थानां
भिन्नभिन्नाकारेण परामर्शे लक्षणस्याननुगमाद्व्या-
पकतादोषः [e]अवस्थानामैक्यं व्यविवक्षितम् [f]असं-
भावितं च ॥

टी० ॥ [a]"जीविकाकृत्ये"ति । जीविकोपनिषदा वौपम्ये
(२)इत्यनेन गतिसंज्ञायां गतिसमासस्य नित्यत्वेन साधुत्वा-
त्तत्पदद्वयात्मकं वाक्यं स्यात् नह्यत्र क्त्वास्थाने ल्यपो भावि-
त्वमित्यर्थः ॥ ननु ल्यपस्य भावित्वं न विवक्षितं किन्तु नि-
ष्पन्नत्वमित्यत आह–। [b]"यदुपाधिकेति । यत्र नोपाधिमत्त्वं
तत्र विशेषणाभावात् पदत्वं न स्यादित्याह–। [c]"यत्रे"ति ।
यच्छब्दार्थाननुगममाह–। [d]"यस्यामि"ति । ननु यस्यामित्येकी-
कृत्य सकलावस्थाभिधानान्नाननुगम इत्यत्राह–। [e]"अवस्थाना-

(१) भो भगो अघोअपूर्वस्य योऽशि–लोपः शाकल्यस्येति सूत्राभ्यां
प्राप्तस्य यत्वपलोपादेरित्यर्थः । (२) जीविकोपनिषदावौपम्ये वक्ष्यमाणे जीविकोप-
निषदौ गतिसंज्ञौ स्त इति गतिसंज्ञायां "कुगतिप्रादयः" इति सामा-
र्थ्येन नित्यं समस्यन्ते इति समासे च जाते समासेऽनञ्पूर्वे क्त्वो ल्यप् ।

नि''ति । अविवक्षितमेकत्र सर्वावस्थानामसम्भवात् ॥ [f]''असम्भावितमि''ति । बहूनामेकत्वासम्भवादित्यर्थः ॥

मू० [a]सर्वदा सर्वावस्थाविषये लक्षणप्रसङ्गादिति [b]स च भवतीति भवत्यस्तीति पटः पटाविति पटं पट इति चेत्यतिव्याप्तिः [c]एतेनापौरुषेयं वाक्यं तदित्यपि निरस्तं (१)का पुन(२)रर्थापत्तिरपि [d] *अन्यथानुपपत्तिः ? *-इति चेन्न, [e]यतोऽन्यत्वं तत्सिद्धेरग्रे तद्सिद्धेः ॥

टी० ॥ ननु विवक्षायां को दोष इत्यत आह-। [a]''सर्वदे''ति । ननु कीदृशः प्रसङ्ग इत्यत आह–। [b]''स चे''ति । एकरूपत्वं यद्यवस्थैक्यं विवक्षितं तदा भवतीत्याख्यातस्य सम्बोधनस्य सप्तम्यन्तस्य च साधारणानि शक्तिपदादिलक्षणानि स्युः एकार्थत्वं चेत्तदा भवत्यस्तीत्यत्र समानलक्षणत्वप्रसङ्गः समानविभक्तिकत्वं चेत्तदा पटः पटावित्यत्र प्रसङ्गः एकप्रातिपदिकत्वं चेत्तदा पटं पट इत्यत्र प्रसङ्गः(३)समानलक्षणत्वाभावात्तद्घटितलक्षणविरहादव्याप्तिरूपः प्रसङ्ग इत्यर्थः मीमांसकमते वाक्यलक्षणं दूषयति-। [c]''एतेने''ति। वाक्यलक्षणदोषेण तद्घटकपदलक्षणदोषेण चेत्यर्थः नच शक्तत्वं पदत्वं शक्तेः पदार्थान्तरस्य सङ्केतस्य वा स्वत्सगोत्रकलहनिरस्तत्वात् अत एव तत्सङ्केतवद्वर्णत्वं पदत्वं नापि शाब्दानुभवाजन्यशाब्दानुभवजनकपदार्थोपस्थितिजनकतावच्छेदकरूपवत्वं पदत्वं प्रथमं जनकत्वस्य दुर्ग्रहत्वमिति भावः ॥ [d]''अन्यथे''ति । जीविगृहासत्वस्य बहिः सत्वमन्तरेणानुपपत्तिरर्थापत्तिरित्यर्थः ॥ [e]''यत''इति । बहिः सत्वादन्येन प्रका-

---

(१) { व्यवस्थाप्यामप्रमाणत्वं शब्दस्य खरयुक्तिभिः । उत्तमं क्रियते सम्यगर्थापत्तेरखण्डितम् ॥ }

(२) अर्थापत्तिरथ-अर्थस्य आपत्तिर्यस्मादिति विग्रहेण प्रमाणमिव ग्राह्यं नत्वर्थस्य आपत्तिरिति विगृह्यार्थापत्त्याख्यप्रमा प्रमाणखण्डनस्य प्रस्तुतत्वादिति भावः । (३) मूलेऽतिव्याप्तिशब्देन लक्षणव्याप्त्यभावरूपाऽव्याप्तिरेव ग्राह्येत्याह-अव्याप्तिरूपः प्रसङ्ग इति ।

रेण जीविगृहासत्त्वमनुपपन्नमिति ज्ञानेऽपि प्रथमत एव फलसिद्धेस्तस्यार्थापत्तेः प्रमाणस्य फलासिद्धेरित्यर्थः । अन्यत्वप्रतियोगिनो बहिः सत्त्वस्याग्रत एव ज्ञानं चेत्किमर्थापत्त्येति फलितोऽर्थः अज्ञातताया एवार्थापत्तेः करणत्वेऽर्थापत्त्याभासानुपपत्तिरिति भावः ॥

मू० *[a]सिद्धेनानुपपत्तिः?*-इति चेन्न, [b]विशेषणाव्यवच्छेद्याप्रतीतौ तद्वैयर्थ्येन [c]तदनुपादाने सर्वथानुपपत्त्यर्थतायां फलविरोधात् [d]केनाप्यनुपपत्त्यर्थत्वे साध्यसिद्ध्यपर्यवसानात्*(१)प्रमाणयोर्विरोधानुपपत्तिः? *-इति चेन्न,

टी० ॥ ननु देवदत्तीयबहिः सत्त्वज्ञानमर्थापत्तिफलं बहिःसत्त्वसामान्यप्रतियोगिकान्यथानुपपत्तिश्च करणं सामान्यं च सिद्धमेवेति शङ्कते—[a]"सिद्धेने"ति । सिद्धमादायानुपपत्तिर्ज्ञानं करणमित्यर्थः सिद्धे बहिःसत्त्वसामान्येऽनुपपत्तिर्नास्तीत्यत्र्ये सिद्धेनेत्यसिद्धदेवदत्तीयबहिःसत्त्वव्यवच्छेदार्थं विशेषणं तद्यदि व्यवच्छेद्यं प्रसिद्धं तदा पूर्वदोषः अथ न प्रसिद्धं तदा विशेषणवैयर्थ्यमिति परिहरति—।[b]"विशेषणे"ति । नन्वनुपपत्तिमात्रं करणं सत्त्वान्यथानुपपत्तिर्येन प्रतियोग्यनिरूपणं दोषः स्यादित्यत आह—।[c]"तदनुपादाने"इति । यदि जीविगृहासत्त्वस्य सर्वथैवानुपपत्तिस्तदोपपादककल्पनानवकाश इत्यर्थः ॥ ननु सर्वथानुपपत्तिर्न विवक्षिता किन्तु केनचिद्विनानुपपत्तिस्तथा च नोपपादककल्पनानवकाश इत्यत आह—।[d]"केनापी"ति । एवं सति देवदत्तीयबहिःसत्त्वसिद्धिर्न पर्यवस्येत्तेन विनानुपपत्तेरज्ञानादित्यर्थः ॥ ननु जीवी क्वचिदस्तीति सामान्यतो दृष्टस्य गेहमपि क्वचित्त्वेन विषयीकुर्वती जीवी देवदत्तो गृहे नास्तीति प्रत्यक्षेण

(१) अन्योन्यं विरुद्धयोर्गृहासत्त्वबहिःसत्त्वयोः प्रमाणयोर्यदवच्छिन्नानवच्छिन्नयोर्नास्ति विरोधो भिन्नविषयत्वादवच्छिन्नयोरनवच्छिन्नयोरप्येकत्रास्ति विरोधः समानविषयत्वादिति प्रतीतिनयमेनाविरोधव्यवस्थापनं तदर्थापत्तिरिति पूर्वपक्षिणोऽभिप्रायः ।

विरोधज्ञानाद्बहिः सत्त्वकल्पनार्थापत्तिफलमिति शङ्कते—। [e]"प्रमाणयोरि"ति ॥

मू० [a](१)असिद्धत्वात् * प्रमाणत्वे(२)नाभिमन्यमानयोः ? *-इति चेन्न, [b]अभिमतेर्भ्रमार्थत्वेतिप्रसङ्गात् ज्ञानार्थत्वे(३)प्युक्तदोषानिवृत्तिरेव अनिर्णीयमानप्रामाण्याप्रामाण्ययोरित्यत्रापि तथैव [c]तथाहि सत्प्रतिपक्षेपि तस्य तदुपपादकप्रमाफलकत्वापत्तेः* [d]तत्र विरोधे व्याहत्यैकाप्रामाण्यनिश्चयो यत्र तु नैवं तद्विवक्षितम्?*-इति चेन्न, एवं [e]सत्प्रतिपक्षवदन्यत्रापि विरोधार्थत्वे(४)नैवाभासत्वाविशेषात्* [f]तर्कयोर्विरोधोपेक्षित * इति चेन्न,

टी० ॥ परिहरति ।[a]"असिद्धत्वादि"ति । वस्तुगत्या प्रमाणयो(५)र्विरोध एव नास्ति किं कारण भवेदित्यर्थः । उक्तदोषोतिप्रसङ्ग एव ॥ [b]"तथैवे"ति । अतिप्रसङ्ग एवेत्यर्थः उक्तमतिप्रसङ्गं स्फुटयति—।[c]"तथाही"ति । सत्प्रतिपक्षस्थलेपि प्रमाणत्वाभिमतयोरविरोधाय किञ्चित्कल्प्यं स्यान्न च तथोपेयत इत्यर्थः ॥ नन्वेकधर्मिकविरुद्धार्थोपस्थापकयोः सत प्रतिपक्षयोरन्यतरदप्रमाणमिति यथा निश्चयो न तथाऽर्थापत्तौ तत्र विषयसङ्कोचेन सामान्यतो दृष्टस्यापि प्रामाण्यसम्भवान्न व्याघात इति शङ्कते—। [d]"तत्रे"ति । विरोधे इति सति सप्तमी व्याहतिरेकधर्मिकविरु-

---

(१) असिद्धत्वादित्यतः प्राग्वस्तुगत्या प्रमाणयोर्विरोधस्येत्यपि पूरणीयम्—अयम्भावः । न हि वस्तुगत्यास्ति प्रमाणयोर्गृहाबहिःसत्त्वयोः कश्चिद्विरोधो येन विषयप्रतिनियतोऽविरोधः प्रसाध्येत न हि विरुद्धयोरविरोधस्सम्भवति विरुद्धे चेत्तयोर्तां गृहाबहिःसत्त्वेन तयोरविध उपपन्नो भवेन्नहि विरुद्धयोर्घट तदभावविषयकयोर्बोधयोरविरोधस्सम्पद्यते तस्मान्न विरुद्धे गृहाबहिःसत्त्वे इत्यवश्यमभ्युपगन्तव्यमिति नाविरोधापादनमर्थापत्तिः । (२) विरोधिप्रमाणत्वेनेत्यर्थः । (३) ज्ञानं चात्र यथार्थं ग्राह्यम् । (४) "विरुद्धार्थत्वेन"—इत्यपि क्वचित्पाठः। (५) एकविषयप्रमाणयोरित्यर्थः ।

द्वार्थोपस्थापकता तथाभासत्वमित्यर्थः यथा तत्राभासत्वादेव न विरोधबलात्कल्पनान्तरं तथार्थापत्तावपि कल्पनान्तरमनवकाशमेवेति परिहरन्ति—।"सत्प्रतिपक्षवदि"ति ॥ ननु यद्येकविषयप्रमाणयोर्न विरोधस्तदा तर्कयोरेव विरोधः कथं स्यादित्याह-। "तर्कयोरि"ति । ज्योतिःशास्त्राच्चिरजीवित्वे गृहीते जीविदेवदत्तो यदि क्वचिन्न स्यात्तर्हि जीवी न स्यात् यदि जीवी देवदत्तो बहिर्न स्यात्तदा गेहनिष्ठात्यन्ताभावप्रतियोगीतस्यादित्यनयोः क्वचित्त्वेनगृहसत्त्वविषयकगृहासत्त्वविषयकयोर्विरोधः कथमित्यर्थः ॥

मू० "मिथोविरोधे तर्कयोरप्याभासत्वात् * "विशेषप्रवृत्तप्रमाणार्थप्रतिक्षेपविषयत्वसंशयोऽविशेषप्रवृत्ततद्विपरीतार्थप्रमाणस्य स(१)? *—इति चेन्न, "विशेषविषयप्रमाणबोधितवैपरीत्ये सति तद्विरुद्धार्थांशे संशयस्य दुर्बलस्यानवकाशत्वेनाविशेषप्रवृत्तप्रमाणविषयतां तदीयां(२)गोचरयितुमप्यसामर्थ्यादेव * "अविशेषप्रवृत्तप्रमाणस्य तद्विपरीतार्थविशेषविषयप्रमाणदर्शने तदितरविशेषविषयप्रमाफलकं तथा ? *-इति चेन्न,

टी०॥ "'मिथ"इति। यथा प्रमाणयोर्न विरोधस्तथा तर्कयोरपि प्रकृते मिथोविरोधेन द्वयोस्तर्काभासत्वादित्यर्थः। "(३) विशेषे"ति । गेहे नास्तीति प्रत्यक्षानन्तरं जीवी क्वचिदस्तीति पूर्वप्रवृत्तसामान्यतोदृष्टस्य प्रमाणस्य गृहसत्त्वमपि विषयो न वेति संशय एव विरोधोऽभिमतः सच बहिरस्तीति प्रमाफलक इति शङ्कार्थः विशेषप्रवृत्तं प्रमाणं गेहासत्त्वग्राहि प्रत्यक्षं तदर्थो गेहासत्त्वं तत्प्रतिक्षेपो गृहसत्त्वं तद्विषयसंशयस्य विरोधः कस्ये(४)त्य-

(१) स=विरोध इत्यर्थः। (२) तदीयाम्=विरुद्धार्थांशीयाम्। (३) पुनरपि प्रमाणसमवस्थयशङ्कते-विशेषेणेति- (४) कस्येति, किं निष्ठतया विषयस्यसंशय इत्यपेक्षायामित्यर्थः। यद्वा, किं प्रतियोगिकः स विरोध इत्यर्थः।

पेक्षायामविशेषप्रवृत्ततद्विपरीतार्थग्राहिप्रमाणस्येति योजना ॥ "विशेषे"ति । गेहेनास्तीति विशेषदर्शनानन्तरं सामान्यतो दृष्टस्य गृहसत्त्वविषयः संशय एव नावतरति दूरे तेन बहिः सत्त्वप्रमाजननमिति परिहारार्थं, गृहे सत्त्वग्राहिणः सामान्यतोदृष्टस्य विपरीतार्थोपस्थापकं गृहासत्त्वग्राहिप्रत्यक्षमिति, ज्ञानमेव देवदत्तीयबहिः सत्त्वप्रमाफलकमिति शङ्कते—। "अविशेषप्रवृत्ते"ति ।

मू० "अविशेषप्रवृत्तस्य प्रमाणस्य तद्विपरीतार्थ विशेषविषयस्य च प्रमाणस्य विषययोस्तद्विपरीतत्वविशेषणप्रतीत्यङ्गीकारलब्धायां परस्परविरुद्धत्वप्रतीतौ धर्मिणोर्विरुद्धधर्माध्यासस्य भेदस्य विरोधविवेचनस्फुटतद्गर्भप्रवेशतया तत्सहज्ञेयस्य तन्नान्तरीयकस्य वान्यत्रैवान्यत एव प्राप्तेः ॥

टी० ॥ प्रमाणयोर्विपरीतार्थत्वज्ञानं तदुभयविषयसत्त्वासत्त्वविरोधगर्भं विरोधश्च सत्त्वासत्त्वयोरैकधर्म्यसमावेश इति विरोधसहज्ञेय एव धर्मिभेदः सत्त्वासत्त्वे भिन्नधर्मिके विरुद्धत्वादित्यनुमानसाध्यो वेति मार्थापत्तेरवकाश इति परिहरति—। "अविशेषे"ति । यद्यपि सत्त्वासत्त्वयोर्धर्मिभेदमात्रसिद्धिरेवं स्यात्तु सत्त्वस्य बहिर्धर्मिकत्वसिद्धिरपि तथाप्यसत्त्वस्य गृहधर्मिकत्वे प्रमीयमाणे धर्मिभेदकल्पना सत्त्वस्य बहिर्धर्मिकत्वपर्यवसन्नैवेति भावः । विरोधविवेचनमेकधर्म्यसमावेशप्रतिसन्धानं तद्गर्भप्रवेशो धर्मिभेदस्य तत्प्रतिसन्धानविषयत्वं तन्नान्तरीयकत्वं विरुद्धत्वस्य भिन्नधर्मिकत्वव्याप्यत्व विरुद्धधर्माध्यासस्यैव भेदत्वे तत्सहज्ञेयत्वं भेदहेतुत्वे तु तन्नान्तरीयकत्वमुक्तमयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यस्तत्वमित्याचार्याः ॥

मू० किंच(१)अविशेषप्रवृत्तस्यैव तस्य किं विशेषविषय-

(१) जीवति देवदत्त इत्यविशेष प्रवृत्तप्रमाणस्य बहिर्भावविशेषरूपविशेषविषयत्वं प्रमीयत इति प्रथमविकल्पार्थः ।

त्वम् १ ([1])अथ सामान्यतः प्रवृत्तस्य नान्तरीयकतया प्रागेव विशेषविषयस्य विशेषविषयत्वेनाज्ञातस्य विशेषविषयत्वम्-२ ([2])अथ सामान्यस्य तद्विषयस्य विशेषः ३ ([3])उत तद्विषयीकृतविशेषगतं किमपि धर्मान्तरमिदानीं प्रतीयते ४ ([4])नाद्यः 'अर्थापत्तेर्भ्रमकरणत्वापत्तेः न द्वितीयः तद्'नुव्यवसायोत्पत्तेस्तद्विषयाप्रतीत्यसंभवात् ([5])न तृतीयः "सामान्यस्यानन्तर्भाविताश्रयस्य प्रत्येतुमशक्यत्वात् प्रागेव तत्सिद्धेः ।

टी० ॥ "'किं चे"ति । क्वचिदस्तीति सामान्यतो दृष्टस्य सामान्यमात्रविषयस्य वह्नि. सत्त्वविषयत्वज्ञानमर्थापत्तिफलमिति प्रथमविकल्पार्थः । सामान्यविषयत्वेन विशेषविषयतया नियतस्य सामान्यतो दृष्टस्य विशेषविषयत्वज्ञानमर्थापत्तिफलमिति द्वितीयविकल्पार्थ । सामान्यविषयत्वेनाविशेषाद्विशेषद्वयं([6])विषयस्यापि प्रमाणस्य वह्निः सत्त्वमात्रविशेषविषयत्वज्ञानं फलमिति तृतीयविकल्पार्थः । प्रथमतो ज्ञायमानस्यैव वह्निः सत्त्वादिलक्षणविशेषस्य प्रतीयमानविरोधिव्यतिरिक्तत्वादिधर्मज्ञानं फल-

---

(१) प्रमाणस्य सामान्यतः प्रवृत्तत्वं तदपर्यवसानेनार्थापत्तेः प्रागेव विशेषविषयस्य सतो विशेषविशेषत्वेनाज्ञातस्य विशेषविषयत्वमिदानीं प्रतीयत इति द्वितीयार्थः । (२) जीवन्निदेवत्तादिति प्रमाणविषयस्य सत्त्वमात्रस्य वहिर्देशत्वादिविशेष इदानीं प्रतीयत इति तृतीयार्थः । (३) सामान्यप्रमाणविषयीकृते विशेषे किमपि धर्मान्तरमिदानीं प्रतीयत इति तुरीयार्थः ।

(४) पूर्वन्तु विकल्पद्वयं प्रमाणाश्रयपरं प्रमेयाश्रयविकल्पक्रमेण निराकरोति—नेति—इति विद्यासागराः । विद्यासागराचार्याणामयमाशयः । नाद्य इत्यादिमूलेन न मूलोक्तप्रथमविकल्पस्य निरासः नापि न द्वितीय इत्यादि मूलेन मौलद्वितीयविकल्पनिरासोऽपि तु नाद्य इत्यादिना मूलेन न द्वितीय इत्यादिना मूलेन च तृतीय चतुर्थयोः । न तृतीयः । नापि चतुर्थः । इत्यादिना द्वितीयप्रथमयोर्निरास इति—

(५) तथानुव्यवसायेन तत्सिद्धौ निरर्थार्थापत्तिरिति भावः ।

(६) विशेषद्वयं तु वह्निः सत्त्वं गृहसत्त्वं च ।

मिति चतुर्थविकल्पार्थः ॥ [b]"अर्थापत्ते रि"ति । सामान्यमात्रविषयस्य विशेषविषयत्वज्ञानं भ्रम इत्यर्थापत्ते र्भ्रमकरणत्वापत्तिरित्यर्थः ॥ [c]"अनुव्यवसाये"ति । विशेषविषयं सामान्यतोदृष्टमनुव्यवसीयमानं विशेषविषयत्वेनाप्यनुव्यवसीयत एवेत्यनुव्यवसायेनैव फलसिद्धावर्थापत्ते रनुवादकत्वापत्तिरित्यर्थः ॥ [d]"सामान्यत्वे"ति । अभिमतविशेषस्यापि सामान्यविषयप्रमाणादेव सिद्धेरनुवादकत्वापत्तिरेवार्थापत्ते रित्यर्थः ॥

सू० नापि चतुर्थः "तद्भिप्रतीयमानविरोधिव्यतिरिक्तत्वमन्यद्वा स्यात् नान्त्यः [b]तत्प्रतीतौ सामर्थ्यानुपदर्शनेनानियमप्रसङ्गात् न प्रथमः [c]अनुगताननुगतजातिव्यक्तिचाक्षुषाचाक्षुषादिव्यक्तिगन्धादितादात्म्यवादिनये तदुभयप्रमातादात्म्यविषयताव्युदासं विना विरोधासिद्ध्यां तद्धर्मनिकाबलस्यैवासिद्धेः [d]तदुभयप्रतीतौ च तदवधारणे प्रागेव तत्प्रतीत्यार्थापत्त्यनुवादतापत्तेः ॥

टी० ॥ "तद्भि"ति । सामान्यतो दृष्टस्य कृत्स्नकत्वेन गृह बहिः सत्त्वविषयस्य(१) गृहसत्त्वांशे प्रतीयमानो विरोधी गृहासत्त्वलक्षणः प्रत्यक्षेण तद्व्यतिरिक्तत्वं बहिः सत्त्वांशस्येत्यर्थः. ॥ [b]"तत्प्रतीताव"ति । अन्यत्वेनोक्तधर्मस्य विशेषापरिचयात्तत्र सामर्थ्यानुपदर्शनादित्यर्थः ॥ [c]"अनुगताननुगते"ति । गृहासत्त्वविरोधि गृहसत्त्वं तदा स्याद्यदि सत्त्वासत्त्वे विरुद्धे स्यातां तदेव तु नास्ति यतो द्वयोरपि धर्मयोर्भेदस्यार्थापत्तिवादिनो मतेऽधिकरणतादात्म्यं तथा च विरोधासिद्धौ प्रतीयमानविरोधि व्यतिरिक्तत्वमेवानुपपन्नं किमर्थापत्त्या विषयीक्रियेतेत्यर्थः. विरुद्धतादात्म्यप्रतिपादनायानुगताननुगतेत्यादि प्रमायास्तादात्म्यविषयता प्रमातादात्म्यविषयता तस्या व्युदासं विनेत्यर्थः ननु सत्त्वासत्त्वयोः प्रमायास्तदुभयाधिकरणतादात्म्यविषयताव्युदासेनास्तु विरोध एवानयोरित्यत आह—। [d]"तदुभये"ति । एव

(१) गृहे बहिश्चेत्युभयत्रापि यत्सत्त्वं तद्विषयस्येत्यर्थः ।

सति सत्त्वासत्त्वयोर्विरोधज्ञानसङ्गेय एव धर्मिभेद इति पूर्वोक्तन्यायेनार्थापत्तिफलस्य पूर्वमेव सिद्धावर्थापत्तेरनुवादकत्वेन भट्टमते अगृहीतग्राहित्वं प्रामाण्यं न स्यादित्यर्थः ।

सू० "(१)योग्यानुपलम्भोऽभावप्रमाकरण(२)मित्यप्ययुक्तम्(३) प्रमाणाभावस्य तथात्वे, 'विभ्रमानुदयप्रसङ्गात् उपलम्भाभावमात्रस्य तथात्वे शङ्खधवलिमप्रतिसन्धानवतः पीतभ्रमानुदयप्रसङ्गात् "* कालभेदात्तत्राविरोध?*-इति चेन्न, 'तथापि संसृष्टयोरन्योन्याभावाग्रहणप्रसङ्गात् ॥

टी० ॥ भट्टस्य योग्यानुपलब्धिं प्रमाणं खण्डयति—। "योग्ये"ति । अनुपलब्धिरूपं कथमभावस्तत्रोपलब्धिः प्रमा वा विवक्षिता ज्ञानमात्रं वा आद्ये आह—। "भ्रमे"ति । प्रमाया अभावो यद्यनुपलब्धिस्तदा शुक्तौ रजतत्वाभावप्रमैव स्यान्न तु रजतभ्रम इत्यर्थः· नन्वेवं रजतप्रमाया अभावेनानुपलब्धित्वादित्यर्थः· दोषादभावप्रमाप्रतिबन्ध इति न वाच्यं दोषस्य विकल्पपनिरस्तत्वात अन्त्ये आह—। "उपलम्भे"ति । श्वेतः शङ्ख इति ज्ञानतः पित्तदूषितनेत्रस्य पीतभ्रम एव सति न स्यात्पीतानुपलम्भात् पीताभावप्रमाप्रसङ्गादित्यर्थः ननु धवलिमप्रतिसन्धानं स्वकाले विरोधितया पीतिमज्ञानं प्रतिबध्नातु तदुत्तरक्षणे तु पीतिमोपलम्भसत्त्वात् न पीताभावप्रमा येन पीतभ्रमानुदय इति शङ्कते-। "काले"ति । यद्यपि पीतभ्रमात्पूर्वं पीतोपलम्भ उपलम्भबाधित इतिशङ्कयमनुपपन्ना तथाप्यभ्युपेत्य परिह-

(१) { अर्थापत्तिं तिरस्कृत्य विदारणीं क्रियतेऽधुना ।
योग्योपलम्भविरहः प्रमाणं भट्टसम्मतम् ॥ }

(२) योग्यत्वे सत्यनुपलम्भोऽभावरूपप्रमाकरणमित्यर्थः । योग्यत्वं चात्र प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपम्-। प्राञ्चस्तु—योग्यत्वं च प्रतियोगिनि तत्तदिन्द्रियसन्निकर्षातिरिक्तप्रतियोगिप्रमापकयावदिन्द्रियसमवधानादि दृष्टसामग्रीसम्पत्तिस्तस्यां सत्यां प्रतियोग्यनुपलम्भस्तदभावप्रमां कुर्वन्नभावप्रमाणमुच्यत इति वदन्ति—

(३) अनुपलम्भ इत्यत्र प्रमाणभूतोपलम्भाभावस्य विवक्षितत्वे-इत्यर्थः ।

रति—। "ᵃतथापी"ति । संसृष्टयोरिन्द्रियसन्निकृष्टयोर्घटपटयोरन्योन्याभावग्रहो न स्यात्तदुभयोपलम्भेन योग्यानुपलम्भस्याभावप्रमाकरणस्याभावादित्यर्थः ॥

सू० ᵃतादात्म्यस्य स्वरूपमात्रानतिरेकात् ᵇअभावस्फुरणे च तत्प्रतिभानस्य ध्रौव्यात् ᶜकिंच योग्यता हि *तत्तदविनाभूतान्यप्रतियोगिप्रमापकसाकल्यमिष्यते ᵈतथा सति यत्र भावोपलम्भस्तत्राप्यभावप्रमा स्यात् ᵉनहि तत्र हेतुव्यतिरेकेणैव वा ᶠसत्येव वा तत्र भावप्रमोत्पद्यते तत्तदविनाभूतविरहसहितः स तथा?*—इति चेन्न,

टी० ॥ ननु घटपटतादात्म्यं तत्र प्रतियोगि नतु घटपटावेव तत्रानुपलब्धमेवेत्यत आह—। "ᵃतादात्म्यस्ये"ति। तदुभयतादात्म्यस्यालीकत्वेन तदुभयस्वरूपमेव तादात्म्यं वाच्यमित्यर्थः तादात्म्यस्वरूपेण तथाप्यनुपलम्भ एवेत्याशङ्क्याह—। ᵇअभावस्फुरणे"इति । घटपटात्मा न भवतीत्यत्र तादात्म्यज्ञानस्यापि सम्भवादित्यर्थः यद्वा सर्वत्राभावज्ञाने प्रतियोगिज्ञानध्रौव्यादनुपलब्धिस्तत्करणं क्वापि नास्तीत्यर्थः ॥ "ᶜकिं चे"ति। स प्रतियोगी तदविनाभूत इन्द्रियसन्निकर्षादिस्तदितरद्यत्प्रतियोगिप्रमापकं तत्साकल्यमित्यर्थः । ᵈतथा सती"ति। घटप्रमा यत्र तत्रापि तत्पूर्वं घटतद्व्याप्यतद्भिन्नयावद्घटप्रमापकसाकल्यं घटानुपलब्धिश्चास्तीति घटाभावप्रमैव स्यादित्यर्थः तदानीं तत्प्रमापकसाकल्ये हेतुमाह—। "ᵉनही"ति । अनुपलब्धिसत्त्वे हेतुमाह—। ᶠसत्येवे"ति । नहि सतीविद्यमानेव प्रमा जायते येन घट प्रमोत्पत्तेः प्राक्तत्प्रागभावरूपाप्यनुपलब्धिर्न स्यादित्यर्थः ॥ ᵍ"तत्तदि"ति । प्रतियोगितद्व्याप्ययोरप्यभावोयोग्यानुपलम्भसहकारी प्रकृते च स नास्तीति नाभाव प्रमेति शङ्कार्थः सोनुपलम्भः ।

सू० ᵃतदविनाभूतव्यतिरेकस्य तद्व्यतिरेकेणैवान्यथासिद्धसन्निधेरपि हेतुताङ्गीकारे प्रमाणाभावात् ᵇअत एवा-

लोकस्याध्यक्षणे आलोकान्तरवत्ताऽवयवेनावयविना वा ऽऽलोकेनान्यथा सिद्धसन्निधिरहेतुरित्यालोकाभावग्रहे सा नापेक्षते अर्थाक्षयोगस्तु नार्थं व्याप्तौ-शत ऐक्यात्।

टी० ॥ [a]"तदविनाभूते"ति। प्रतियोग्यन्वयव्यतिरेकगर्भत्वात्तद्व्याप्यान्वयव्यतिरेकयोर्दण्डत्ववदन्यथासिद्धस्तद्व्याप्यविरह इति परिहारार्थः॥ [b]"अत एवे"ति। आलोकावयवावयविनोः प्रत्यक्षतायामन्योन्य सहकारिता यथारभ्यारम्भकभावसिद्धसन्निधितयाऽन्यथासिद्धतया नेष्यते तथा प्रकृतेपीत्यर्थः॥ ननु यथा प्रतियोग्यभावव्यापकस्तद्व्याप्याभाव इत्यन्यथा सिद्धस्तथेन्द्रियसन्निकर्षव्यापको घटादिरयं इति साक्षात्कारे सोप्यन्यथासिद्धः स्यादित्यत आह-। [c]"अर्थाक्षयोग"इति। अर्थासन्निकर्षस्यार्थघटितस्वरूपत्वादैक्यादिह व्याप्तिरेव नास्तीति न प्रतिबन्दिरित्यर्थः यत्र घटः प्रतियोगी नास्ति तत्र तत्प्रमापकसाकल्यमपि नास्ति घटेन्द्रियसन्निकर्षस्यैव तत्प्रमापकस्याभावात् * नच प्रतियोगितद्व्याप्यभिन्नत्वेन विशेषणात्तदसत्त्वं न दोषायेति वाच्यं * तत्सन्निकर्षस्यतद्घटितत्वेनाभेदेन तदव्याप्यत्वादिति स्वतन्त्रमेवैतद्दूषणमिति वयं।

मू० * [a]तद्विरहसहितः स तथा? *-इति चेन्न, [b]इन्द्रियसन्निकर्षस्य हि प्रतियोग्युपलम्भे तावद्धेतुताङ्गीक्रियते तत्र किं सन्निकर्षव्यतिरेके कार्यानुदयोदाहरणमेष्टव्यं न वा न यदि तदा सन्निकर्षस्य हेतुतैव कुतो मन्तव्या अन्यथैव कार्योत्पत्त्युपपत्तेः एष्टव्यं चेत्तर्हि [c]तत्रैवोदाहरणे व्यवधायकेनेन्द्रियसन्निकर्षशून्ये परमार्थतश्चाभाववत्युक्तकारणसम्पत्तेरभावप्रमा स्यात् *[d]तत्र व्यवधायकाभावः प्रतियोग्युपलम्भको नास्ति? *-इति चेन्न, [e]सन्निकर्षव्यतिरेकस्य प्रमाव्यतिरेकप्रयोजकत्वावधारणोदाहरणमेव तर्हि तत्र स्यात् व्य-

वधायकस्य सन्निकर्षविरोधेनैव प्रमाविरोधित्वमिति चेत्तर्हि व्यवधायकाभावः सन्निकर्षोत्पत्तौ कारणं न त्वभावप्रमाविशेषोत्पत्ताविति स्थिते [f]स प्रसङ्गस्त-द्वस्थ एव ।

टी० ॥ [a]"तद्विरहे"ति । प्रतियोगिविरहः प्रतियोग्युपलम्भकयावत्समवधानं चाभावप्रमाकरणमतो न प्रतियोगिप्रमास्थले तदभावप्रमाप्रसङ्ग इत्यर्थः प्रतियोगिविरहसहकृतापी त्वदुक्तसामग्री क्वचिन्नाभावग्राहिकेति व्यभिचारमुपदर्शयितुं पीठमारचयति—। [b]"इन्द्रिये"ति । व्याभिचारमाह-। [c]"तत्रैवोदाहरण"इति । यत्र कुड्यादिव्यवहितो घटाभावो न गृह्यते तत्र घटतद्व्याप्यभिन्नघटोपलम्भकसाकल्यं घटाभावश्चास्तीति घटाभाव प्रमा स्यादित्यर्थः कुड्यादेर्व्यवधायकस्याभावः प्रतियोगिप्रमापकः प्रकृते स नास्तीति शङ्कते—। [d]"तत्रे"ति तर्हि व्यवधायकाभावादेव तत्र कार्याभावो ननु सन्निकर्षाभावप्रयुक्त इति तत्सन्निकर्षस्य कारणतैव न स्यादिति परिहरति—। [e]"सन्निकर्षे"ति ॥ [f]"स प्रसङ्ग" इति । व्यवहिताभावग्रहप्रसङ्ग इत्यर्थः ।

मू० * [a]नच सन्निकर्षाभावादेव तदानीमुक्तकारणासम्पत्तिः * प्रतियोगिसन्निकर्षस्याभावप्रमोत्पादकत्वे नित्यं तदनुत्पत्त्यापत्तेः [b]अत एव नाव्यवधानमधिकं कारणमेष्टव्यं [c]इन्द्रियसन्निकर्षे एव तदुपपत्तेः [d]नचाश्रयसाक्षात्कारोपि प्राङ्नास्तिताग्रहादौ व्यभिचारात् * [e]ननु व्यवधायकसद्भावे यत्र परमार्थतोस्त्यभावस्तत्रोक्तकारणादभावावधारणमस्त्येव को विरोधः न तावद्भावयोगिन्यपि तावता तद्विरहप्रमा प्रसज्येत(१) * ।

टी० ॥ प्रतियोगिव्याप्यत्वेन व्युदस्तस्यापि प्रतियोगिसन्निकर्षस्य कारणत्वमाशङ्काह-। [a]"नचे"ति । अभावेन सह

(१) प्रसज्येतेत्यस्यानन्तरभावविरहस्य तत्राभावादितिपूरणीयम् ।

सन्निकर्षो न शङ्कितः भट्टै(१)स्तदनङ्गीकारात् ॥ [b]"अत एवे" ति । पूर्वं व्यवधायकाभावत्वेन कारणत्वं शङ्कितमिदानीमव्यवधानत्वेनेत्यपौनरुक्त्यं यद्वाऽभावेन ग्राह्येण सहेन्द्रियाव्यवधानमभावग्रहकारणं व्यवहितस्थले तदभावाभावग्रहप्रसङ्गं इत्यत आह-। "अत एवे"ति । तथाचार्थेन्द्रियसन्निकर्षः कारणमित्युक्तं स्यात्तथाचेन्द्रियवेद्यतैवाभावस्य नतु भट्टाभिमतानुपलम्भः कारणमित्याह-। [c]"इन्द्रिये"ति । तदुपपत्तेरव्यवधानस्य (२)कारणत्वोपपत्तेः ॥ [d]"नचे"ति । कारणमित्यनुषज्यते आश्रयसाक्षात्कारस्याभावप्रमाहेतुत्वे गृहाद्बहिर्गतेन गृहे चैत्राभावो न गृह्येत तदानीं गृहस्यासाक्षात्कारादित्यर्थः ननु यत्र व्यवधानं तत्राप्युक्तसामग्रीबलादभावो गृह्यते एव प्रतियोगिमति यद्यभावज्ञानं भवेत्तदा दोषः स्यात्तत्र चाभाव एव वास्तवो नास्तीति शङ्कते-। [e]"नन्वि"ति ।

मू० [a]"तर्हि प्रतियोग्यभावसहितोनुपलम्भ एवाभावप्रमाणमस्तु जहि हि योग्यताविशेषणनिवेशव्यसनं [b]योग्यता विशेषणाप्रक्षेपणेनुपलम्भमात्रतो वस्तुगत्या प्रतियोग्यभाववत्यपि नाभावनिश्चयः कदाचित्तु संशयो जायते तत्कथं तथाङ्गीक्रियते इति चे त्तर्हि व्यवधानेप्येवमेवेति योग्यताविशेषणप्रक्षेपेपि तुल्यम् [d]अपिच मेयस्य वास्तवं सत्त्वं प्रमाणकोटावनिवेशार्हमेव मेयवस्तुसत्त्वासत्त्वनिर्धारणार्थमेव हि प्रमाणाप्रमाणविवेचनं विचारकाणाम् [e]अन्यथानुमाने व्याप्तावुपाधिनिरासायासोऽव्यर्थः स्यात् व्याप्तिपक्षधर्मताज्ञानमात्रस्यैव कारणत्वा-

(१) भट्टैस्तदनङ्गीकारात् (अभावेन समं सन्निकर्षस्याऽनङ्गीकारात्) अभावेन सह सन्निकर्षो न शङ्कितः (किन्तु प्रतियोगिनैव)-इत्यन्वयः ।

(२) प्रासङ्गिकमेवार्थमनुसृत्य तदुपपत्तेरित्यस्यार्थमाह-अव्यवधानस्येति ।

ङ्गीकारेण सौस्थ्यात् [f]प्राङ्नास्तिताप्रमितौ च यद्यभावप्रमाणतां मन्यसे तर्हि सा (१)न स्यात्तत्रेदानीं जायमानाभावप्रमोत्पत्तावभाववास्तवसत्ताविरहस्येदानींक्वचित्सम्भवात् ।

टी० । अभ्युपेत्य परिहरति-। [a]"तर्ही"ति । व्यवधानेऽभावप्रमा स्यादित्येतदर्थमेव (२)हि योग्यताविशेषणं सा चेदभ्युपगतैव किं विशेषणेनेत्यर्थः योग्यताविशेषणमन्तरेणान्धकारे घटाभाववति गृहे घटाभावप्रमास्यात्तु घटसद्सत्त्वसंशय इत्याशङ्कते-। [b]"योग्यते"ति । तर्हि व्यवधानेपि घटाभावप्रमायां घटसद्सत्त्वसंशयो न भवेदिति योग्यताविशेषणदानेपि सामग्रीसत्त्वे फलानुदयदोष (३)प्रसक्त इति परिहरति-। [c]"तर्ही"ति । प्रमाणप्रवृत्तेः प्राक् प्रमेयसत्त्वनिर्णये प्रमाणफलमेवेत्याह-। [d]"अपि चे"ति । यत्र वास्तवी व्याप्तिस्तत्र पक्षधर्मताज्ञानमनुमितिजनकमिति व्याप्तिज्ञानार्थमुपाधिनिरासप्रयासवैफल्यमित्याह-। [e]"अन्यथे"ति । प्राङ् नास्तितास्थले यद्यनुपलब्धिः करणं तदा गृहोपलम्भकाले चैत्राभाववतो गृहस्य क्रमेण चैत्रवत्त्वे सति नाभावः सहकारीत्याह । [f]"प्रागि"ति । तद्गृहं तदा चैत्राभाववच्चैत्रवत्तया योग्यतायां सत्यामप्यसमयं मानत्वादित्यनुमानमाशङ्क्य यद्युपनिबन्ध (४) ।

मू० [a]फलविषयकालिकाभावोपलक्षिताश्रयादेः कारणकोटिनिवेशे विशेषाभावात् तदु[b]पलक्षितत्वस्यैव विशेषणस्य विशेषत्वेऽतिप्रसङ्गात् (५)* [d]तथापि सामान्यतो विशेषाभावोसिद्ध ? *-इति, चेन्न [e]तस्य सत्त्वे निर्वचनापातात् ।

(१) सा=प्राङ् नास्तिता प्रमितिः । (२) इत्येतदर्थम्=इत्येतत्प्रसङ्गवारणार्थम् । (३) फलानुदयदोषः, संशयाभावानुदयदोष इत्यर्थः । (४) यदि पदस्य मूले उपनिबन्ध इत्यर्थः । (५) अयमाशयः-आश्रयनिष्ठ यदिदमभावोपलक्षितत्वविशेषणं साङ्कर्यविशेषणविशिष्टत्वमस्याश्रये विशेषणमुपलक्षणं वा ? विशेषणत्वे साङ्कर्यविशेषणविशिष्टत्वस्यापि विशे-

टी० ॥ ननु फलेनानुपलब्धिजन्यज्ञानेन प्राक्काल एव विषयीक्रियते तत्र चासीदेवाभाव इति तदुपलक्षिताश्रयोपि कारणकोटिप्रविष्ट इत्याशङ्क्याह—।[a]"फले"ति। तथा सति प्रतियोगिमत्यभावप्रमा नभवत्यन्यत्र भवतीति विशेषो न स्यादित्यर्थः; आश्रयस्याभावोपलक्षितत्वं यद्विशेषणं तदेव विशेषः स्यादित्याशङ्कते -। [b]"उपलक्षितत्वे"ति। एवमप्यतिप्रसङ्ग एवेति परिहरति-।'अतिप्रसङ्गादि'ति । विशेषस्य विशिष्यानिर्वचनेपि सामान्यतः कश्चिद्विशेषो व्यवहारानुरोधात्स्वीकार्य इत्याशङ्कते-। [d]"तथापी"ति । कोऽसौ विशेष इति वादिप्रश्ने तन्निर्वचनमावश्यकमन्यथा सर्वत्रसामान्येनैवोत्तरं स्यादिति परिहरति—।"तस्ये"ति । व्याख्यानमिदमस्माकं यथा पितुर्वचस्तथा व्याख्यानगुणदोषाभ्यां संबन्धो नहिपतुर्न मे ॥

इति श्रीमहामहोपाध्याय शङ्करमिश्रकृतखण्डनव्याख्याने ऽनुपलब्धिखण्डनव्याख्यानं समाप्तम् ॥

—:o:—

सू० ([१])[a]कश्चायमसिद्धो नाम तथाहि [b]व्याप्तिपक्षधर्मत्वाभ्यामप्रमितोसिद्ध इत्यलक्षणं [c]हेत्वाभासान्तराणामपि ह्यसिद्धप्रवेश एवं सति स्यात् [d]व्याप्तिं पक्षधर्मतां [e]तत्प्रमितिं वा न विरुधतां हेतुदोषत्वासम्भवात् ननु नेद([२])मीदृशं तथाहि ।

षणत्वेन पुनस्तादृशविशेषणविशिष्टत्वस्यापि तथात्वेनाऽनवस्था; उपलक्षणत्वे तु प्रतियोगिमत्यपि देशे तदभावप्रमा प्रसज्येतेत्यतिप्रसङ्गसतदवस्थ इति ।

(१) { एतावताप्रबन्धेन मानषट्कं निराकृतम् । आभासखण्डनं कर्त्तुमारभते ततः परम् । }

(२) इदम्=उक्तलक्षणम्, ईदृशं न=हेत्वाभासान्तराणामप्यसिद्धे प्रवेशकरं न,—इत्यर्थः ।

टी० ॥ या सूक्तिर्भवनाथवक्त्रकमलादुद्गत्वरी तत्कृतं सौभाग्यं प्रतिपद्य शुद्धमतिभिः श्लाघापदं लम्भिता स्वस्ता सज्जनमानसे त्रिजगतामापुष्पवन्तोदयं(१)ग्रन्थग्रन्थिविमोचनाय रचनावाणामियं शाङ्करी ॥ १ ॥ प्रमाणानां सामान्यलक्षणानि विशेषलक्षणानि च विस्तरेण निराकृत्य तन्निरूप्यत्वात्तदाभासानां तदनन्तरं तन्निराकरणाय प्रस्तौति—।[a]"क्रमायमि"ति। यद्यपि भेदस्थापनायां हेत्वाभासखण्डनिकस्य स्वकथाय कृत्योत्थानमिव तथापि हेत्वाभासानामखण्डने तैरेव द्वैतापत्तिरिति तल्लक्षणमपि खण्ड्यते—।[b]"व्याप्ती"ति। व्याप्तेरप्रमायां व्याप्यत्वासिद्धिः पक्षधर्मताया अप्रमायामाश्रयासिद्धिः स्वरूपासिद्धिश्च तदेतत्त्रितयसाधारणं लक्षणं अप्रमा च विषयाभावाद्विषये सत्यपि तदग्रहाद्वा तथाच यत्र व्याप्तिस्वरूपं नास्ति सदपि वा न प्रतीयते यत्र पक्षस्वरूपं नास्ति तद्विशेषणं सन्देहः सिषाधयिषा वा नास्ति तत्सत्त्वेऽपि हेतुर्वा नास्ति सर्वस्योपग्राहकमेतदिति भावः विरुद्धव्यभिचारिबाधितेषु व्याप्त्यभावात्सत्प्रतिपक्षे च तदनिश्चयात्सर्वत्र लक्षणमिदमतिव्यापकमित्याह—।[c]"हेत्वाभासान्तराणामि"ति। अतिव्याप्तिं दूढयति—।[d]"व्याप्तिमि"ति। व्याप्तिपक्षधर्मतयोः सत्त्वेऽपि(२)तदज्ञानदशायामज्ञानस्वरूपासिद्धिं सङ्गृहीतुमाह—।[e]"तत्प्रमितिमि"ति।

सू० "केचिद्दोषा व्याप्तिपक्षधर्मतातत्प्रमितिविरहात्मानः केचित्तु व्याप्त्यादिभङ्गे लिङ्गभूताः प्रतिबन्धकतयानुमित्युत्पत्तिं निरुन्धानाश्च केचिद्दोषभूयं भजन्ते तत्र [b]प्रथमे तावदसिद्धमध्यमध्यासते तद्यथा व्याप्यत्वासिद्धः सोपाधिरूपः [c]अनौपाधिकसंबन्धिता हि व्याप्तिः सोपाधिता चानुपाधिताविरहरूपैव [d]एवमधिकरणासिद्धिरप्यसिद्धावेवान्तर्भविष्णुः पक्षपदोपात्तस्याश्रयस्य व्यतिरेकरूपा हि सा [e]सिद्धसा-

(१) आपुष्पवन्तोदयम्=सूर्यचन्द्रोदयपर्यन्तम्, "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ"–इत्यमरात्। (२) अत्र 'हेतौ'–इति शेषः।

धनमपि तथैव सिषाधयिषितधर्मविशिष्टो हि पक्ष उच्यते यत्र सिद्धं न तत्र सिषाधयिषास्ति ततो विशेषणाभावायत्तो विशिष्टपक्षरूपस्य तत्राभावः* [f]न च वाच्यं यथा सव्यभिचारत्वाद्भग्नव्याप्तिकमिति पृथगेव सव्यभिचारस्य दोषत्वं तथा सिद्धत्वात्तत्र सिषाधयिषा नास्तीति सिद्धत्वस्यापि पृथगेव दोषत्वं प्राप्नोति* लिङ्गद्वारेणासिद्धिपर्यवसायित्वात् ॥

टी० ॥ व्याप्तिपक्षधर्मताप्रमितिविरहस्वरूपत्वमसिद्धत्वमिति लक्षणं सङ्ग्रहीतुं त्रिधा हेत्वाभासान् विभजते-। [a]"केचिद्"ति। अज्ञायमानस्यापि व्याप्तिपक्षधर्मताप्रमितिविरहस्य दोषत्वं बाधवत् (१)ज्ञायमानं यद्यदनुमितिप्रतिबन्धकं स हेत्वाभास इति न लक्षणं गौरवात् किन्त्वनुमितिप्रतिबन्धकत्वमात्रं तल्लक्षणमिति भावः दोषभूयं दोषत्वं-। [b]"प्रथमे" इति। ये व्याप्तिपक्षधर्मतातत्प्रमितिविरहात्मान इत्यर्थः ननु सोपाधित्वमसिद्धत्व भवति नतु त(२)द्व्याप्तिविरहस्वरूपमित्यत आह-। [c]"अनौपाधिके"ति। आश्रयासिद्धेः पक्षधर्मताविघटनात्मकत्वनिर्वाहाय पीठमारचयति-। [d]"एवमि"ति। ननु गगनारविन्दं सुरभीत्यत्राश्रयव्यतिरेकरूपतास्तु सिद्धसाधनं तु न तथेत्यत आह-। [e]"सिद्धे"ति। पक्षताघटकसिषाधयिषाविरहात्तात्र्याश्रयविरहरूपतैवेत्यर्थः ननु व्यभिचारवत् सिद्धसाधनस्यासिद्धत्वेऽज्ञायकत्वमेव नतु तदात्मकत्वमित्याशङ्क्य निराकरोति। [f]"न चे"ति ॥

मू० [a]अन्यथा व्याप्त्यादिविरहपर्यवसिततामात्रेण सव्यभिचारत्वादीनामप्यसिद्धावेवान्तर्भावः स्यादिति

(१) बाधः पक्षे साध्याभाववत्त्वानिश्चयो ग्राह्यः नतु पक्षे साध्याभावः साध्याभाववत्पक्षो वा, निश्चयस्य च तस्याऽज्ञातस्यैवाऽनुमितिप्रतिबन्धकत्वम्। (२) तद्=असिद्धत्वम्।

[b]यतः सिषाधयिषाभावो न प्रतिपन्नः सिद्धत्वाल्लि-
ङ्गाद्गम्यते किंनामेच्छाभावस्य तस्य [c]यथादर्शनं प्रत्य-
क्षादेरेवाधिगमः [d]इच्छैव तु तत्र यन्नास्ति तत्र सिद्ध-
त्वं प्रयोजकमित्येतावन्मात्रेण सिद्धत्वमुपन्यस्यते सि-
द्धसाधने मत्विच्छाभावमनुमातुं लिङ्गतयेति (१)एवं
स्वरूपासिद्धिरपि पक्षधर्मताविरहरूपैव ये तु व्या-
प्तिपक्षधर्मताविरहलिङ्गभूतास्ते ऽसिद्धतः पृथगेव
हेत्वाभासाः [e]तद्यथा विरुद्धः साध्यविपरीतव्याप्तः
तत्र साध्यव्यतिरेकव्याप्तता हेतो र्न साध्यव्याप्त-
ताभावः [f]किं नाम साध्यव्यतिरेकेण सहानौपाधिकः
संबन्धोन्य(२)एवासौ ।

टी० ॥ असिद्धज्ञापकस्याप्यसिद्ध्यन्तर्भावे दशह-
माह-। [a]"अन्यथे"ति । सिद्धसाधनस्याश्रयासिद्धिघटकत्वं न
तु तद्ज्ञापकत्वमिति व्यभिचारादिवैलक्षण्येन परिहरति-। [b]"यत"
इति ॥ "यथादर्शनमि"ति । न्यायमते प्रत्यक्ष एवेच्छाभावो
भट्टमते त्वनुपलब्धिगम्य इत्यर्थः ॥ प्रत्यक्षादेरित्यादिपदेना-
नुपलब्धिसङ्ग्रहः किं तर्हि सिद्धसाधनोपन्यासेन इच्छाविरह
एवोपन्यस्यतामित्यत आह-। [d]"इच्छैव त्वि"ति । स्फुटत्वादि-
च्छाप्रयोजकस्य सिद्धसाधनस्योद्भावनमित्यर्थः ॥ विरुद्धे व्या-
प्तिभङ्गलिङ्गत्वमुपपादयति-। "तद्यथे"ति साध्यविपरीतव्याप्तोयं
न साध्यव्याप्तः नहि तदभावव्याप्तस्य तद्व्याप्तत्वसम्भव
इति विरुद्धस्य व्याप्तिभङ्गलिङ्गत्वं ननु व्याप्तिभङ्गत्वमेवेत्य-
र्थः ॥ "किंनामे"ति । साध्यव्यतिरेकसामानाधिकरण्यमात्रस्या-
नैकान्तिकसाधारण्यादिति भावः ॥

(१) शब्दोऽनित्यश्चाक्षुषत्वादिति स्वरूपासिद्धस्यापि पक्षवृत्ति-
स्वरूपपक्षधर्म्मताविरहरूपेत्याह-एवमिति-भागासिद्ध्यादेरप्यत्रान्तर्भा-
वो यथा यथमूहनीय इति—(२) अन्यः, साध्यव्याप्तताऽभावादन्यः ।

मू० [a]इत्थमेव पक्षधर्मताविरहात्मापि नायं [b]किंनाम ततः साध्यव्यतिरेकेण सह निरुपाधिकसंबन्धत्वात्साध्यव्याप्तिरस्य नास्तीत्यनुमीयते तथा सति साध्यव्याप्तिव्यतिरेके लिङ्गं सद् विरुद्धः पृथगेव हेत्वाभासो भवति एवमनैकान्तिकोपि न व्याप्तिव्यतिरेकरूपः किन्तु तल्लिङ्गमेव तथाहि [c]हेतोरन्वयस्य व्यतिरेकस्य वा व्यभिचारो न साध्यसाधनव्याप्तिविरहात्मा [d]किंनाम व्यभिचारो हेतोः साध्यव्याप्तिविरहं विना न सम्भवतीति लिङ्गभावेन व्याप्तिभङ्गं बोधयते [e]यदि हि निरुपाधिः साध्येन संबन्धोस्य भवेत् कथं व्यभिचरितुं शक्नुयात्तस्माद्व्याप्तिविरहलिङ्गं व्यभिचारः नतु व्याप्तिविरहः [f]पक्षधर्मताविरहरूपता त्वनैकान्तिकस्यासम्भावितैव [g]सत्प्रतिपक्षतायां चानवगम्यमानविशेषप्रतिपक्षप्रतिरुद्धतया यत्साध्यनिश्चयाजनकत्वं हेतोः स प्रतिबन्धकसद्भावे कार्याजनकत्वमितरकारणसाधारणो वस्तुभावः ।

टी० ॥ [a]"इत्थमि"ति । विरुद्धे पक्षतद्धर्मयोरभङ्गादित्यर्थः ॥ [b]"किं नामे"ति । अयं न साध्यव्याप्यः तदभावव्याप्यत्वादित्यसिद्धलिङ्गत्वमेवास्येत्यर्थः किन्तु लिङ्गमेव व्याप्तिविरहस्येति शेषः ॥ [c]"हेतोरि"ति । कात्स्न्येन संबन्धस्य व्याप्तेः यद्यपि व्यभिचारो भङ्ग एव तथाप्यनौपाधिकत्वं व्याप्तिरित्याशयेनोक्तं तदेवाह—। [d]"किं नामे"ति । यत्र व्यभिचारस्तत्रोपाधेरवश्यकतयानौपाधिकत्वं नास्तीति व्याप्तिभङ्गलिङ्गतैव व्यभिचारस्येत्यर्थः ॥ [e]"यदि ही"ति । साध्यात्यन्ताभावासामानाधिकरण्यस्य साध्यात्यन्ताभावसामानाधिकरण्यरूपव्यभिचारासम्भव इत्यर्थः ॥ [f]"पक्षधर्मते"ति । शब्दोऽनित्यः सत्त्वादित्यादीनां पक्षधर्मतायाः सत्त्वादित्यर्थः ॥ [g]"सत्प्रतिपक्षताया-

नि"ति । यद्यपि विरुद्धयोर्हेत्वोरेकत्र व्याप्तिभङ्ग आवश्यकस्त-
थापि(१)तदनवगमदशायामन्योन्यप्रतिबन्धादेव(२)नान्योन्यस्यानु-
मितिजनकत्वमिति न तत्र व्याप्तिविरहरूपता न वा तदुन्नाय-
कतया दोषत्वमित्यर्थः ।

सू० [a]तस्य व्याप्तिपक्षधर्मताविरहरूपता [b]संभावितैव
[c]बाधस्तु साधनवति पक्षे साध्याभावबोधनात्मा भ-
वन्नपि न व्याप्तिविरहावगमरूपः सामान्यतोनौ-
पाधिकसंबन्धरूपा हि व्याप्तिः साधनवति च पक्षे
साध्यविरहो न सोपाधिता [d]साध्याविरोधिस्वभा-
वत्वा[e]त्तस्याः [f]नाप्यसौ सामान्यतः साध्यसाधनसं-
बन्धस्य विरहरूपः ॥

टी० ॥ [a]"तस्ये"ति । सत्प्रतिपक्षहेतोरित्यर्थः ॥ [b]"संभावितैवे"ति । तस्यां दशायामिति शेषः ॥ [c]"बाधस्त्वि"ति । जलह्रदो वह्निमान् धूमवत्त्वादित्यत्र स्वरूपासिद्धिसाङ्कर्यमभिप्रेत्याह— । [d]"साधनवती"ति वह्निरनुष्णः कृतकत्वादित्यादावित्यर्थः सर्वोपसंहारेण व्याप्तिग्रहो नतु विशेष्यवह्नावेव येन व्याप्तिभङ्गो दूषणं भवेत् यत्कृतक तदनुष्णमिति व्याप्तेर्व्यतिरेकस्याग्रहाद् वह्नौ साध्याभावप्रमादशायां व्याप्तिभङ्गग्रहे बाधस्यैवोपजीव्यत्वं न तु व्याप्तिविरहस्य तदा दोषत्वं बाध एव व्याप्तिविरहमन्तरेण न सम्भवतीति तस्य व्याप्तिभङ्गोन्नायकत्वमत एवान्यस्योपाधेरलाभे पक्षेतरत्वमेव तत्रोपाधिः सोपाधित्वमेव च व्याप्तिभङ्ग इत्यर्थः पक्षताविघटनमपि बाधोदोषस्य बाधकप्रमाणसद्भावे सन्देहसिषाधयिषयोरनुदयादिति भावः ॥ [e]"साध्याविरोधी"ति । तस्याः सोपाधितायाः साध्याविरोधिरूपत्वात् साध्याभावरूपता उपाधेः साध्यव्यापकतया साध्यविरोधित्वादित्यर्थः नतु सामान्यतोपि व्याप्तिविशेषे वह्नौ हेतोः साध्या-

(१) तदनवगमदशायाम्=विरुद्धत्वानवगमदशायाम् ।

(२) नान्योन्यस्यानुमिति जनकत्वम्=नान्योन्यस्य निश्चयाकारानुमिति जनकत्वम् ।

भावसामानाधिकरण्यग्रहाद्भ्रमैवेत्यत आह—। f"आदी"ति । यत्कृतकं तदनुष्णमिति दृष्टान्ते घटादावविनाभावग्रहस्याप्रत्यूहत्वादित्यर्थः ॥

मू० a"बाधे सत्यपि सामान्येन साध्यसाधनयोः संबन्धस्य दृष्टान्तावगतस्यानपलापात् बाधस्य किञ्चिद्विशेषविषयत्वात् b"सामान्याकारपरिगृहीतस्य संबन्धस्य विशेषान्तरमादाय पर्यवसानाविरोधात् c"तस्माद्विशेषबाधे न सामान्यतः संबन्धस्य सोपधितानुमीयते d"निरुपाधित्वे बाधानुपपत्तेः यथाह बाधाद्वोपाधिरुन्नीयते ऽन्यथा वेति न कश्चिद्विशेष इति e"अन्यस्तु सत्प्रतिपक्षवद्बाधस्यापि प्रतिबन्धकत्वमेव तेन बाधे सति प्रतिबद्धत्वान्निश्चयं न करोति हेतुरिति व्याप्तिपक्षधर्मतादोषमनालोच्यान्यथैव बाधस्य दोषत्वमित्याह ।

टी० ॥ एतदेवाह । a"बाधे सत्यपी"ति ॥ b"सामान्याकारे"ति । यद्यत्कृतकं तत्तदनुष्णमिति यद्यपि बाधायां भग्नं तथापि यत्कृतकं तदनुष्णमिति सामानाधिकरण्यमात्रमभग्नमेवेत्यर्थः अतो बाधस्य व्याप्तिभङ्गलिङ्गत्वं न तु व्याप्तिभङ्गत्वेनापि दुष्टत्वमित्युपसंहरति—। c"तस्मादि"ति । अत्रैव विपक्षे बाधकमाह—। d"निरुपाधित्वमि"ति । हेतोः साध्यतदभावोभयसामानाधिकरण्यं नावच्छेदभेदं विनेत्यवच्छेदककल्पनायामन्यस्यावच्छेदकस्याभावात्पक्षेतरत्वमेवावच्छेदकं साध्यसामानाधिकरण्यावच्छेदक एवोपाधिरिति बाधेतस्यावश्यकत्वमन्यत्र तु स्वदुक्तव्याघातादिदोषान्न पक्षेतरत्वस्योपाधित्वमित्यर्थः मतान्तरमाह—। e"अन्यस्त्वि"ति । साध्याभावप्रमा स्वरूपसत्येव साध्यधीप्रतिबन्धिकेति सत्प्रतिपक्षवत्प्रतिबन्धकतयैव दोषत्वं न व्याप्तिपक्षधर्मताविरहरूपतया न वा तदुन्नायकतयेत्यर्थः ॥

सू० "तस्माद्व्याप्तिपक्षधर्मताप्रमितित्वानां यत्र साक्षादेव विरहस्योद्भावनं तत्रासिद्धः यत्र तु व्याप्त्यादिविरहलिङ्गोपन्यासः सत्प्रतिपक्षोपन्यासो वा तत्रान्यो हेत्वाभासः* [b]ननु सोपाधित्वादयोऽपि यतोऽवगम्यन्ते तत्कृतः पृथग्दूषणं न भवति अनैकान्तिकत्वादिवत् ?*—मैवम्, [c]अनैकान्तिकत्वादेर्व्याप्तिविरहबोधने लिङ्गभावनियमात् पृथगुपन्यासः सोपाधित्वादेस्तु प्रत्यक्षादपि प्रतीतेर्नतु लिङ्गभावनियतं तत्र प्रतिपादकं किञ्चिदस्ति [d]* नच वाच्यं

टी० ॥ उपसंहरति—। [a]"तस्मादि"ति। यद्यप्युद्भावनगर्भं नासिद्धत्वं तथापि तत्रास्तीति कृत्वोक्तम् ननु यदि व्याप्त्यादिभङ्गलिङ्गानामप्यनैकान्तिकादीनां हेत्वाभासत्वं तदा सोपाधित्वापक्षधर्मतयोर्ज्ञापकान्तरमप्यस्ति नहि प्रत्यक्षादाप्तोपदेशाल्लिङ्गान्तराद्वा न सोपाधित्वादिग्रहीतुं शक्यते इति हेत्वाभासाधिक्यं प्रसक्तमिति शङ्कते—। [b]"नन्वि"ति। यथानैकान्तिकत्वं विरुद्धत्वं बाधितत्वं वा व्याप्तिभङ्गत्वनियतं तथानान्यत्सोपाधित्वादिनियतं येन हेत्वाभासान्तरं भवेत् सोपाधित्वग्राहकतामात्रेण प्रत्यक्षादीनां हेत्वाभासत्वं सम्भाव्येतापि यदि ज्ञायमानं सत्तथा स्यादिति परिहरति—। [c]"अनैकान्तिकत्वादे"रिति। नन्वतीन्द्रियस्थले किञ्चिच्चिह्नं लिङ्गभावेनैव सोपाधित्वोन्नायकमिति तद्धेत्वाभासान्तरं भवेन्नच तदपि चिह्नादि सोपाधित्वं नावश्यं सर्वत्र गमयतीति न हेत्वाभासान्तरं तदानैकान्तिकत्वादिकमपि सर्वत्र व्याप्तिभङ्गे लिङ्गमिति क्वचिदनैकान्तिकत्वेन क्वचिद्विरुद्धत्वादिनापि तदुन्नयनादित्यत आह—। [d]"नच वाच्यमि"ति। यथानैकान्तिकत्वं विरुद्धत्वादिकं वा व्याप्तिविरहव्याप्यतावच्छेदकं न तथा तच्चिह्नादीनामनुगतमेकमवच्छेदकं येन तत्पृथक् स्यादित्यर्थः ॥

मू० यत्र लिङ्गा (१)त्सोपाधितादेः प्रतीतिरतीन्द्रियप्रभृतिविषये तत्र लिङ्गं पृथगेव दूषणतयाभिधीयतां नह्यनैकान्तिकत्वादिकमपि सार्वत्रिकं व्याप्तिविरहलिङ्गमिति हेत्वाभासाधिक्यमापन्नमिति * अनैकान्तिकत्वादिवत्तेषां लिङ्गानामैकरूप्येण निर्देष्टुमशक्यत्वात् पृथक् पृथगेवाभिधानमशक्यमपरिसङ्ख्येयत्वादिति "वक्ष्यामश्चाग्रे हेतुं तदनभिधानस्य *"नन्वनुचितमुच्यते व्याप्त्यादिविरहलिङ्गतयानैकान्तिकत्वादीनां पृथग्दूषणत्वमिति * (२) यतो व्याप्तिपक्षधर्मतोपेतलिङ्गप्रमितिस्तद्वैकल्पान्न भवेत् (३) यतश्च सा न भवति तदेव तस्यां दूषणं वक्तुं युक्तमिदमनुमित्युत्पत्तिकारणमिह नास्तीति ॥

टी०॥ ननु सोपाधित्वलिङ्गत्वमेव तेषामनुगतमस्तु अन्यथा ऽनैकान्तिकादीनामपि तन्न स्यादित्यत आह-। "'वक्ष्यामश्चे" ति । यद्यपि सोपाधित्वं व्याप्तिविरहान्नान्यत्तद्ज्ञापकत्वं चानैकान्तिकादिनां व्यवस्थापितमेव आदिपदग्राह्यापक्षधर्मत्वस्य च सिषाधयिषाया विरहस्य । प्रत्यक्षत्वमेवोपपादितमिति शङ्कयमस्थान एव तथापि सोपाधित्वं प्रमाणान्तरेणापि ग्रहीतुं शक्यमिति तस्य पृथक्त्वमाशङ्कितं नन्वनैकान्तिकत्वादीनामनुमितिदोषत्वं नास्ति तथाच हेत्वाभासत्वमपि न अनुमिति

(१) सोपाधितादेरित्यत्रादिना स्वरूपासिद्धयादेस्स्वीकारः । सोपाधित्वादिकमसिद्धेः पृथग्दूषणं भवतुमर्हति हेतुदोषज्ञापकत्वादनैकान्तिकत्वादिवदन्यथा ऽनैकान्तिकत्वादेरपि पृथग्दोषत्वं न स्यादित्यर्थः।
(२) व्याप्त्यादिभङ्गलिङ्गभूतानैकत्वादिदोषाणामनुमित्यनुत्पादप्रयोजकत्वात्कथमनुचितं पृथग्दूषणत्वमित्यत, आह-यत इति। (३) यस्तु लिङ्ग प्रमित्यभावस्यैवानुमित्यनुत्पादे प्रयोजकत्वमेतावता किंस्यादित्यत आह-यतश्चेति-

सामग्रीवैकल्यस्यैव तद्दोषत्वात्तु सामग्रीवैकल्यबोधकस्यानुमितिदोषत्वमतिप्रसङ्गादिति शङ्कते । b"नन्विति ॥

मू० * (१)नच व्याप्तिपक्षधर्मते विहायान्यत्तदुत्पत्तिकारणमस्ति "व्यतिरेकोपदर्शनयोग्यं * (२)तस्मादनुमितिदोषप्रतीतिकारणत्वमनैकान्तिकत्वादीनां नतु साक्षाद्दोषत्वं b दोषप्रतिपादकतयापि च दोषत्वं साक्षाद्दोषमनुपजीव्याशक्याभिधानमिति प्रधानदोषस्यैव दोषतयोद्भावनं युक्तं न सव्यभिचारत्वादीनामिति सत्यमेतत् ᶜसाक्षाद्दोषत्वं प्रतिबन्धकस्य व्याप्त्यादिविरहस्य वा विरुद्धादीनां तु तत्प्रमापकतया यद्यपि दोषपक्षनिक्षेपस्तथापि विरुद्धत्वादयो यद्दोषप्रतिपादकतयोक्तास्तदुद्भावनलाघवानुरोधाद्व्याप्त्यादिविरहे तत्रोद्भाव्यमाने न हेतुर्गन्तुं शक्यते ॥

टी० ॥ "व्यतिरेके"ति । अनुमितिकारणान्तरस्य कालादेर्व्यतिरेकोपदर्शनयोग्यमित्यर्थः ॥ ननु दोषप्रतिपादकतयैव दोषत्वमस्तु परम्परया ऽनुमितिदोषत्वमप्रमाणादित्यत आह— । b"दोषेति । एवं सति साक्षाद्दोषस्याविरुद्धस्याभिधानान्तरमेव तद्दूषकत्वापत्त्यानैकान्तिकाद्युद्भावनप्रसङ्ग इत्यर्थः ॥ परिह—

(१) व्याप्तिपक्षधर्मतावदनैकान्तिकत्वाद्यभावोऽपि कारणमनुमितेरतोऽन्यस्य त्वभाववदनैकान्तिकत्वाद्यभावाभावोऽनैकान्तिकत्वादिरपि दूषणमित्यत आह-न चेति-अनैकान्तिकत्वाद्यभावस्य त्वयोऽपि व्यतिरेको न दर्शयितुं शक्यते व्याप्तत्वपक्षधर्मत्वप्रमितौ सत्य मनुमित्यनुत्पत्त्यदर्शनाद् व्यतिरेककारणत्वमशक्यमित्यर्थः । इति विद्यासागराः । व्याप्तिपक्षधर्मता ग्रहसत्वेऽनुमिति सत्वं व्याप्तिपक्षधर्मताग्रहाभावे ऽनुमित्यभाव इत्यन्वयव्यतिरेकदर्शनात्तयोः कारणत्वमावश्यकमनैकान्तिकत्वाद्यभावसत्वेऽपि व्याप्तिपक्षधर्मताग्रहासत्वेनानुमित्यनुत्पादादिनैकान्तिकत्वादेर्न कारणत्वमिति पूर्वपक्षिणोऽभिप्रायः । (२) व्याप्त्यादिविरहस्यापि दोषत्वेऽनैकान्त्याद्युद्भावनमनुचितमिति प्रतिपादयितुमनुमितिदोषप्रत्यायकत्वमेवेति फलितमुपसंहरति—तस्मादिति—

रति—। "'साक्षादि"ति । असिद्धेरुद्भावने कथमसिद्धिरिति तद्व्यवस्थापनाय पुनरनैकान्तिकाद्युद्भावनमावश्यकं तेन प्रथममनैकान्तिकाद्येवोद्भाव्यं तच्च स्वव्यापकमसिद्धत्वं स्वत एवाक्षिपतीति लाघवादनैकान्तिकत्वमेवोद्भाव्यमित्यर्थः । न चैवं सत्यसिद्धोद्भावनमनवकाशम् अनेकान्तिकाद्युद्भावननैरपेक्षेण यत्रासिद्धत्वज्ञानं तत्र तदुद्भावनस्य सावकाशत्वादिति भावः * नच निर्वाच्यासिद्धिरनुद्भाव्य निरनुयोज्यानैकान्तिकाद्युद्भावनमप्राप्तकालमिति वाच्यम् * कथासम्प्रदायस्य तादृशत्वेनाप्राप्तकालत्वाभावाद् अनैकान्तिकाद्युन्नीतासिद्धत्वज्ञानादेवानुमिति प्रतिबन्धस्य सम्भवात् । अनैकान्तिकत्वादीनामप्यसाधकताप्रयोजकलिङ्गत्वात् तथा चोद्भावयद्वयस्यानैकान्तिकाद्युद्भावनादेव सिद्धेरित्याशयात् ॥

सू० अनैकान्तिकत्वादौ तूद्भाविते व्याप्त्यादिविरहोऽर्थाद्गम्यते व्याप्त्यादिविरहव्यतिरेकेणानैकान्तिकत्वादेरनुपपन्नत्वात् यथा तस्माद्दीर्घोयमित्युक्ते सोस्माद्ध्रस्व इत्यर्थाद्गम्यते नतु तत्र प्रतिपाद्यान्तरापेक्षा तथेहापि निरग्नौ धूमोऽस्तीति प्रतिपादितेग्निनासौ न व्याप्त इत्यर्थाद्गम्यते नहि सम्भवत्यग्निना च व्याप्तोऽनग्नौ चास्तीति अत एवानन्त्यादतीन्द्रियोपाध्यादिलिङ्गानां येषां पूर्वमनभिधानं समर्थितं तेषामनभिधानेयमपि हेतुः तान्युपाधिलिङ्गानि नार्थवशादुपाधिमनपेक्षाणि गमयन्ति येन तेषां व्याप्तिर्नावधारिता तं प्रति तत्प्रतिपादनमन्तरेणाप्रतिपादकत्वस्यापि सम्भवात् अनैकान्तिकत्वाद्यवगतौ तु व्याप्त्यादिविरहबोधनाय न प्रतिपादनीयान्तरापेक्षा कस्यचित् सचेतसः सम्भवतीति पूर्वपक्षसंक्षेपः एवमसिद्धलक्षणे व्यवस्थिते बाधोयमभिधीयते,

टी० ॥ नन्वनैकान्तिकाद्युद्भावनानन्तरमसिद्ध्युद्भावनमस्तु तथाच न लाघवमित्यत आह–। [a]"अनैकान्तिकत्वादावि"ति । तद्व्युत्पादनमप्यभिधीयते अर्थपौनरुक्त्यापत्तेः अत्रानुरूपं दृष्टान्तमाह–। [b]"यथे"ति । वन्ध्यामश्वात्रेति । यदुक्तं तत्र किञ्चिदाह–। [c]"अत एवे"ति ॥ [d]"अनपेक्षाणी"ति । उपाधिलिङ्गत्वेनाप्रतिसंहितानीत्यर्थः तत्प्रतिसन्धानं च न व्याप्यतावच्छेदकग्रहसम्भवेति भावः एतदेवाह–। [e]"यते"ति । अनैकान्तिकत्वादीनामसिद्धिव्याप्यतावच्छेदकरूपत्वस्योभयसिद्धत्वादिति तदुद्भावनमुपपन्नमित्याह–। [f]"अनैकान्तिकत्वादौ"ति ॥

मू० [a]"एतेन कीदृशमसिद्धलक्षणं व्यवस्थापितमायुष्मता भवति व्याप्तत्वपक्षधर्मताभ्यामप्रमितोऽसिद्ध इति तावद्विरुद्धादिषु लक्षणं किं नास्ति किं वास्ति यदि नास्ति तदा व्याप्तिपक्षधर्मताभ्यां प्रमिता विरुद्धत्वादयः प्राप्नुवन्ति अथास्ति तदा तेऽप्यसिद्धभेदाः प्राप्ताः अथैतस्मिँल्लक्षणे सत्यपि ते नासिद्धान्तर्भूताः [b]तर्हि लक्षणमिदमतिव्यापकमापन्नम् * [c]अथ यत्र व्याप्तिपक्षधर्मत्वाप्रमितत्वं साक्षादुद्भाव्यते तदसिद्धमित्युच्यते * [d]तर्हि लक्षणान्तरमिदमुक्तं स्यात् [e]न चेदमपि युक्तं यत्र(१)व्याप्तिविरहमात्रमुद्भाव्यते तत्र व्याप्तिपक्षधर्मताप्रमितत्वानां हानं मिलितं नोद्भाव्यते इति नासावसिद्धः स्यात् [f]एवं सर्वत्रासिद्धविशेषमुदाहृत्य प्रसङ्गो विधातव्यः ॥

टी० ॥ हेत्वाभासानां व्युत्पादनेनापि नासिद्धलक्षणस्यातिव्याप्तिः परिहृतेत्याह–। [a]"एतेने"ति ॥ [b]"तर्ही"ति । लक्ष्यादन्यत्रानैकान्तिकादिषु लक्षणगमनादित्यर्थः नन्वनैकान्ति-

(१) स श्यामो मित्रातनयादित्यादावुपाध्युद्भावनेन व्याप्तिविरहमात्रं प्रतिपाद्यते नासावसिद्धः स्यादितिसम्बन्धः ।

कादिषु व्याप्त्यादिभङ्गस्य साक्षादुद्भवनं नास्ति साक्षादुद्भाव्यव्याप्तिपक्षधर्मताप्रमितिविरहत्वस्यासिद्धिलक्षणत्वेनाभिप्रेतत्वादिति शङ्कते—। "अथे"ति । तथाचोद्भावनगर्भं लक्षणान्तरं प्रणयतस्तत्र प्रतिज्ञाहानिरिति परिहरति—। [d]"तर्ही"ति । ननु प्रतिज्ञाहानिः पुरुषदोषो न तु लक्षणान्तरदोष इत्यत आह—। "न चेदमपी"ति , व्याप्तिपक्षधर्मताप्रमितिविरहाणां मिलितानामुद्भवनं लक्षणत्वेन विवक्षितं प्रत्येकोद्भावनं वा आद्यं परिहरति—। [e]"यत्रे"ति—। [f]"एवमि"ति । यत्रापक्षधर्मत्वोद्भावनमात्रं तत्रापि मिलितानुद्भावनादव्याप्तिर्यत्र वा प्रमितिविरहोद्भावनमात्रं लक्षणागमनादव्याप्तिरिति भावः ॥

मू० "अथ प्रत्येकमिदं लक्षणं व्याप्त्यप्रमिततया साक्षादुद्भाव्योऽसिद्धः पक्षधर्मतया ऽप्रमिततया चेति तर्ह्यन्योन्योदाहरणाव्याप्तिरित्यव्यापकत्वमुभयोः *[c]अथोभयोरप्यसिद्धविशेषलक्षणत्वादन्योन्यविषयाव्यापकता न दोषायेति मन्यसे ?*—न, 'सामान्यलक्षणे निर्वक्तुमशक्ये कथमिदं विशेषलक्षणमपि घटेत* [d]अथानुमितेरसाधारणहेतुव्यतिरेकोद्भावनं सामान्यलक्षणमस्तु ? * मैवम्, 'सत्प्रतिपक्षोद्भावनं तथेत्यतिव्याप्तेः । 'भावरूपतया हेतुविशेषणे च निरुपाधित्वव्यतिरेकोद्भावनाव्याप्तेः "स्वरूपासिद्धिः सर्वप्रमाणसाधारणो दोष इति तदुद्भवनाव्याप्तेश्च * [h]अथोच्यते व्याप्तत्वपक्षधर्मत्वाभ्यां प्रमितत्वस्य व्यतिरेको यत्र साक्षादुपन्यस्यते सोऽसिद्ध इति ?*—इदमप्यलक्षणं अव्यापकत्वात् ॥

टी० ॥ द्वितीयमाशङ्क्य दूषयति—। [a]"अथे"ति । तथा च सुतरामव्याप्तिरित्यर्थः ॥ ननु तिसृणामसिद्धीनां विशेषलक्षणा-

न्यस्तानि तथाप्यन्योन्यानुपग्रहो गुण एव न दोष इति शङ्कते—। [b]"अथे"ति । सामान्यलक्षणज्ञानमन्तरेण विशेषलक्षणजिज्ञासानुदयात्सामान्यलक्षणमेव प्रथममुचितमिति परिहरति—। [c]"सामान्ये"ति । अन्वनुमित्यसाधारणकारणविरहोद्भावनं यत्र सोऽसिद्ध इति सामान्यलक्षणमित्याह—। [d]"अथे"ति । अनुमितेरसाधारणो हेतुर्व्याप्तत्वं पक्षधर्मत्वं तत्प्रमितिश्च तद्विरहोद्भावनमित्यर्थः ॥ असत्प्रतिपक्षितत्वमप्यनुमितेरसाधारणो हेतुरिति तद्विरहोद्भावनेऽतिव्याप्तिरित्याह—। "[e]"सत्प्रतिपक्षे"ति । अनुमित्यसाधारणभावभूतहेतुविरहोद्भावनं विवक्षितमसत्प्रतिपक्षितत्वं च न भावभूतमतो नातिव्याप्तिरिति यदि तदा सिद्धसाधिते च स्यानुमित्यसाधारणहेतोर्यत्रविरह उद्भाव्यते तत्र व्याप्यत्वासिद्धावव्याप्तिरिति शङ्कोत्तराभ्यामाह—। [f]"साधे"ति ॥ [g]"स्वरूपासिद्धिरि"ति । यद्यप्यनुमित्यसाधारणदोषोद्भावनं न लक्षणं येनाव्याप्तिः स्यात् तथाप्यनुमित्यसाधारणहेतुव्यतिरेकोद्भावनमपि तत्रैव पर्यवस्यतीति तथोक्तम् । [h]"अथे"ति । अनैकान्तिकादौ साक्षादनुमित्यसाधारणहेतुव्यतिरेकोद्भावनं नास्ति किन्त्वनैकान्तिकत्वादिद्वारेति न तत्रातिव्याप्तिरिति भावः । अत्र प्रमितिव्यतिरेकः पूर्वस्माद्भेद इत्यन्ये ।

मू० [a]यत्र व्याप्त्यादिव्यतिरेक उपन्यस्यते [b]तत्र वस्तुगत्या व्याप्तत्वप्रमितेर्व्यतिरेकोऽस्तु नाम नतूपन्यस्यतेऽपि प्रयोजनाभावात्, व्याप्तिव्यतिरेकदर्शनादेवानुमानाङ्गवैकल्पात्मनो दोषस्योद्भावनपर्यवसानात्तस्मादत्र प्रमितत्वव्यतिरेकोद्भावनं नास्तीत्यव्यापकत्वं दोषः * [c]ननु विशेषणाद्यभावोऽपि वस्तुनो विशिष्टाभाव एवेति नोक्तदोषः * न [d]यदि विशेषणाद्यधिकोऽविशिष्टस्तदा तदभावभेदोऽपि स्यात् * अथ नाधिकस्तदा विशेषणाभावान्नान्यस्य विशिष्टाभावतेति * विशेष्याभावस्यापि तथात्वे पृथक् पृथगेव विशि-

ष्टाभावार्थस्तयोरित्यननुगम एव स्वार्थानुमित्यसिद्धाऽव्याप्तिश्चानुद्भावनादिति।

टी० ॥ व्याप्यत्वपक्षधर्मत्वप्रकारकप्रमाव्यतिरेकोद्भावनं केवलव्याप्यत्वव्यतिरेकोद्भावने केवलपक्षधर्मत्वव्यतिरेकोद्भावने वा नास्तीत्यव्याप्तिरित्याह—। [a]"यत्रे"ति। यद्यपि प्रमितत्वव्यतिरेकस्तत्रास्ति तथापि तदुद्भावनं तत्परः शब्दप्रयोगो वा नास्तीत्याह—। [b]"तत्र वस्तुगत्ये"ति ॥ ननु यत्रापि व्याप्तिविरहोद्भावनमात्रं तत्रापि व्याप्यत्वपक्षधर्मत्वप्रकारकप्रमाव्यतिरेकोद्भावनमस्त्येव विशेषणाभावेपि विशिष्टाभावसत्त्वादिति शङ्कते—। [c]"नन्वि"ति। विशिष्टं यद्यदि विशेषणादितो भिन्नं तदा प्रतियोगिभेदात्तदभावभेद इति विशेषणाभावोपन्यासेपि न विशिष्टाभावोपन्यास इत्यव्याप्तितादवस्थ्यम् अथ विशेषणविशेष्याभ्यामभिन्नं विशिष्टं तदा विशेषणाभावो यदि विशिष्टाभावस्तदा विशेष्याभावेऽव्याप्तिरित्यननुगमः उभयाभावाभिधानेपि प्रत्येकाभावाव्याप्तिरिति स एव दोष इति परिहरति—। [d]"यदी"ति ॥

मू० * [a]अथ ब्रूषे यत्र व्याप्तित्वपक्षधर्मत्वप्रमितेर्व्यतिरेकः साक्षाच्छब्दोपन्यासस्तदसिद्धं शब्दोपन्यासत्वस्यानुपन्यस्तेपि सम्भवान्नास्त्यव्यापकतेति * नैतदपि युक्तं, तथाहि [b]शब्दोपन्यासत्वं किं शब्दस्वरूपनिर्देश्यत्वमात्रमुत शब्दप्रमापणत्वं आद्येऽनैकान्तिकादावपि व्याप्तिशून्यत्वं शब्दप्रतिपन्नं भवत्येव द्वितीयेपि यदि साक्षादिति प्रत्यक्षेणेत्यर्थस्तदा प्रत्यक्षेण प्रमाणीयत्वं व्याप्तिपक्षधर्मताप्रमितिविरहस्य प्रत्यक्षप्रतियोगिकाभावप्रत्यक्षतावादिमते विरुद्धादावप्यस्तीत्यतिव्याप्तिः अन्यमते न क्वचिदपीति सर्वाव्याप्तिः * [c]अथ व्याप्तिपक्षधर्मताविरहस्यापि प्रत्यक्षप्रमाणीयता विवक्षिता * सा न युक्ता, [d]उक्तलक्ष-

णवाक्यस्य व्याप्तिपक्षधर्मताविरहानभिधायित्वात् [c]तद्विरहेपि तात्पर्याभ्युपगमे प्रत्येकसमुदितलक्षणताविकल्पेनाव्यापकतापातात् ॥

टी० ॥ पूर्वदोषे सत्येव स्वार्थानुमित्यसिद्धत्वमात्रमङ्गप्रहाय शङ्कते—। [a]"अथ ब्रूषे" इति । साक्षादित्यनैकान्तिकादावतिव्याप्तिवारणाय शक्योपन्यासेति स्वार्थानुमानासिद्ध्याप्तिवारणाय उपन्यासयोग्यतायास्तत्रापि सत्वात् अत्र शक्योद्भावनत्वं विरुद्धादावव्यापकम् उद्भावनार्हतायास्तत्राक्षतेः व्याप्तिपक्षधर्मताप्रमितिविरहस्य प्रत्यक्षप्रमाणीयत्वं नैयायिकमते विरुद्धादावव्यापकं भट्टमते चासंभव एव लक्षणदोष इत्याह—।[b]"शक्योपन्यासत्वमि"ति । भट्टमतेऽसम्भववारणाय शङ्कते—। [c]"अथे"ति। व्याप्तिपक्षधर्मताविरहस्य तन्मतेपि प्रत्यक्षत्वा(१)दित्यर्थः ॥ व्याप्तिपक्षधर्मताप्रमितिविरहान्तर्भावेण लक्षणे प्रमितिविरहान्तर्भावावश्यकतया तदवस्थ एवासम्भवो दोष इत्याह—। [d]"उक्तलक्षणे"ति । ननु व्याप्तिपक्षधर्मताप्रमितिविरह इत्यत्र द्वन्द्वमनाश्रयणाद्व्याप्त्यादिविरहोपि तात्पर्यविषय एवेत्यत आह—। [e]"तद्विरहेपी"ति । व्याप्तिविरहादीनां यदि प्रत्येकं लक्षणत्वं तदा तदितरत्राव्याप्तिरथ तावतां विरहाणां मिलितमुद्भावनीयत्वेन विवक्षितं तदा प्रत्येकोद्भावनाव्याप्तिरित्यर्थः ॥

सू० (२) [a]अतीन्द्रियपक्षादिविरहे च विषये [b]तदभावादव्यापकतापत्तेः [c]एतेन यदि लिङ्गानपेक्षत्वे साक्षादर्थः सोपि निरस्तः * [d]अथोच्यते यत्र व्याप्तत्वपक्षधर्म-

(१) ज्ञानस्य प्रत्यक्षत्वे तत्प्रतियोगिकाभावस्यापि प्रत्यक्षत्वं बोद्धव्यं, यद्वा ज्ञानाभावस्याधिकरणप्रत्यक्षात्मरूपत्वात्प्रत्यक्षत्वम् । (२) अतीन्द्रियपक्षेतिभावप्रधानतया निर्देशः। अतीन्द्रियपक्षत्वाद्यभाव इत्यर्थः । आदिनातीन्द्रियव्याप्तिपरिग्रहः। अत्र विद्यासागराः । अनित्याः परमाणवः सर्वगतत्वादिति यदा मीमांसकेन प्रयुज्यते तदा ऽतीन्द्रियपक्षधर्मत्वविरहस्तथा वन्ध्यासुतश्चतुर्वेदाभिज्ञः ब्राह्मणप्रसूतत्वादित्यतीन्द्रियव्याप्तिविरह एतदुक्तं भवति अतीन्द्रियपक्षहेत्वोः प्रत्यक्षप्रमाणीयत्वाभावात्तद्धर्म्म पक्षधर्म्मत्वव्याप्तिव्यतिरेके प्रत्यक्षप्रमाणीयत्वाभावाद्व्याप्तत्वपक्षधर्म्मत्वप्रमितेर्व्यतिरेकः प्रत्यक्षेण शक्योपन्यास इतीत्यभिदधते ।

त्वप्रमितेर्व्यतिरेकः प्रतिपादनीयान्तरानपेक्षतया तत्प्रमापकस्य लिङ्गस्योपन्यासमन्तरेण शक्योद्भावनस्तदसिद्धमिति ? * -॥

टी० ॥ सर्वसाधारण दोषान्तरमाह-। a"अतीन्द्रिये"ति ॥ b"तदभावादि"ति । प्रत्यक्षेण प्रमाणीयत्वाभावादित्यर्थः ॥ c"एतेने"ति । विरुद्धाद्यतिव्यापकत्वेन 'प्रत्येकमिलितविकल्पेने'त्यर्थः ॥ भट्टमते प्रमितिविरहस्यानुपलब्धिगम्यतया लिङ्गानपेक्षत्वमन्येषां च प्रत्यक्षवेद्यतया च लिङ्गानपेक्षत्वं तुल्यमिति भावः॥ उक्तातिव्याप्तिपरिहाराय विशेषणान्तरं शङ्कते-। d'अथे"ति । यत्र व्याप्यत्वपक्षधर्मत्वप्रमितेर्व्यतिरेको लिङ्गस्योपन्यासव्यतिरेकेण शक्योद्भावनस्तत्र हेतुस्तत्प्रमापकस्य प्रतिपादनीयान्तरानपेक्षनयेति नचैवमतिव्याप्तिर्विरुद्धादौ विरुद्धत्वव्यभिचारत्वादिलिङ्गोपन्यासाभावाद्व्याप्तिरतीन्द्रियपक्षधर्मत्वादिविरहे([1]), तत्र([2]) पक्षादिविरहस्यैव लिङ्गान्तरापेक्षया तदवगमे सति व्याप्त्यादिव्यतिरेकावगमकलिङ्गानुपन्यासादित्यर्थः ([3])यद्वा यत्र व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेकः प्रतिपादनीया-

([1]) काञ्चनमयः पार्थिवपरमाणुर्गन्धवान् पार्थिवत्वात् पुष्पादिवदित्याद्यतीन्द्रियपरमाण्वादिपक्षकानुमाने पार्थिवत्वादिहेतौ काञ्चनमयत्वविशिष्टपार्थिवपरमाण्वात्मकपक्षधर्मत्वस्यात्यतीन्द्रियत्वेनाऽसिद्धधर्मिकत्वादियत्किञ्चिल्लिङ्गगम्यत्वमेव वाच्यम् तथा च निरुक्तलक्षणाव्याप्तिरिति पूर्वपक्षग्रन्थाभिप्रायः । (२) न तत्र पक्षधर्मत्वव्यतिरेकस्य यत्किञ्चिदसिद्धधर्मिकत्वादिलिङ्गगम्यत्वं किन्तु पक्षतावच्छेदकीभूतकाञ्चनमयत्वविशिष्टपार्थिवपरमाण्वात्मकपक्षविरहस्यैव पार्थिवत्वादियत्किञ्चिल्लिङ्गगम्यत्वं तथाच पार्थिवपरमाणुः काञ्चनमयत्वाभाववान् पार्थिवत्वाद् घटवदिति प्रथमतः काञ्चनमयत्वाभावविशिष्टं परमाण्वात्मकपक्षविरहमनुमाय हेतोस्तद्धर्मकत्वव्यतिरेकोऽर्थादेवाऽवगम्यते इत्यर्थमाप्ते तस्मिन्हेत्वन्तरं पुनर्नाभिधेयम् अपपौनरुक्त्यापातात् तथाच न लक्षणाऽव्याप्तिरित्याह-तन्नेति । (३) नन्वतीन्द्रियपरमाण्वादिपक्षकनिरुक्तानुमितिस्थलीयपक्षविरहपक्षधर्मत्वविरहयोरुभयोरप्यतीन्द्रियत्वाऽविशेषेण पक्षविरहस्यैव लिङ्गगम्यत्वं न पक्षधर्मत्वविरहस्येत्यत्र न किञ्चिद्विनिगमकमित्यस्वरसात्पक्षधर्मत्वादिव्यतिरेके लिङ्गान्तरोपन्यासव्यतिरेकेणेत्यस्यान्वयमपहाय पक्षधर्मत्वादिव्यतिरेकावगमकलिङ्गे तदाह-यद्वेति ।

न्तरानपेक्षतया प्रमाप्रमापकं लिङ्गं तदुपन्यासव्यतिरिकेणेति संबन्धः विरुद्धा(१)दौ प्रतिपाद्यान्तरानपेक्षविरुद्धत्वाद्युद्भावना-व्याप्तिर्वान्तीन्द्रियपक्षधर्मताविरहादावव्याप्तिस्तल्लिङ्गस्य प्रतिपाद्यान्तरापेक्षत्वाद्य न तस्य व्याप्तिर्नावधारिता तं प्रति तस्याः प्रतिपादनीयत्वादित्यर्थः ॥

मू० [a]नैतदप्युपपन्नमतिव्यापकत्वात् [b]तथा हि विरुद्धादावपि शक्यते तावद्विपक्षवृत्तिदण्डभूततर्काभावात् सोपाधितावगन्तुं यदाह [c]"यत्रानुकूलस्तर्को नास्ति सोऽप्रयोजक इति [d]तस्मात्तेषामप्येवंलक्षणयोगित्वादसिद्धत्वप्रसङ्गः * [e]नच तादृशतर्काविषयत्वमपि प्रतिपादनीयान्तरानपेक्षतया व्याप्तिपक्षधर्मताप्रमितिविरहप्रमापकलिङ्गभूतमेवेति वाच्यं ? *— [f]तथा सति विरुद्धत्वादिवत्तस्य हेत्वाभासान्तरत्वप्रसङ्गात् ॥

टी० ॥ नेदं लक्षणमतिव्याप्तत्वादिति परिहरति—। [a]"ने"ति । विरुद्धादौ प्रतिपादनीयान्तरानपेक्षविरुद्धत्वादिलिङ्गोपन्यासेन व्याप्त्यादिप्रमितिव्यतिरेकस्य शक्योद्भावनत्वे कथमतिव्याप्तिरित्यत आह । [b]"तथा ही"ति । अनित्यः शब्दो कृतकत्वादनित्यः शब्दः प्रमेयत्वादित्यादिविरुद्धादौ विपक्षबाधकतर्काभावादपि व्याप्तिविरहस्य शक्यावगमत्वादतिव्याप्तिरित्यर्थः ॥ विपक्षबाधकतर्काभावो विरुद्धत्वादिवद्व्याप्तिव्यतिरेकगमक इत्यत्रोदयनसंवादमाह—। [c]"यत्रे"ति । अनुकूलतर्कः पक्षे स एव प्रतिकूलो विपक्षे स यत्र हेतुत्वाभिमते नास्ति सोऽप्रयोजको व्याप्तिरहित इत्यर्थः उक्तलक्षणसङ्गृहीतत्वाद्विरुद्धादेरसिद्धान्तर्भावः स्यादित्युपसंहरति—। [d]"तस्मादि"ति । विपक्षबाधकतर्कागोचरत्वं प्रतिपादनीयान्तरानपेक्षव्याप्तिपक्षधर्मताप्रमिति व्यतिरेकलिङ्गमुपन्यस्यते इति नातिव्याप्तिरित्यत आह—। [e]"नचे"ति । कुतो न वाच्यमित्यत आह—। [f]"तथे"ति ॥

मू० * [a]अथोच्यते [b]तथोपन्यस्यमानं तदसिद्धं भवतु [c]सा-

(१) आदिपदेन मानान्तरपक्षधर्मत्वाभावादिः संग्राह्यः ।

शक्यत्वात् [g]नच तथा शक्योद्भावनत्वमप्युद्भाव्यते ऽसिद्धे येन प्रकारभेदव्यवस्थितिरनेन भवेत् ॥

टी० ॥ स्वारस्यमाह–। "[a]"प्रमाणे"ति । इन्द्रियादौ प्रमाकरणत्वेन प्रमाणत्वं तद्विषयत्वेन च प्रमेयत्वं व्यवह्रियते तद्वदित्यर्थः ॥ खण्डनवादिनं प्रति प्रमाणप्रमेयवदिति कथं सिद्धवद्दृष्टान्तमुदाहरसीति दूषयति–[b]"तदपी"ति । किंच प्रकारासङ्करमात्रमिति ब्रुवतासिद्धव्यवहारोचितप्रकारो वक्तव्यः स च वक्तुमशक्य इत्यभिप्रेत्याह–। [c]"वक्तव्यं ही"ति । यत्र च व्याप्त्वपक्षधर्मत्वप्रमितेर्व्यतिरेको लिङ्गस्योपन्यासव्यतिरेकेण शक्योद्भावनः सोऽसिद्ध इत्याशङ्क्याह–। [d]"न तावदि"ति । कुत इत्यत आह–। [e]"तथे"ति । साध्यविरुद्धव्याप्तत्वादिप्रकारेणोपन्यस्यमानस्यापि तथानुमानेपि तथा शक्योद्भावनत्वमस्तीत्यतिव्याप्तिरेवेत्यर्थः ॥ यत्र साध्यविपरीतव्याप्तत्वादिप्रकारो नास्ति व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेकश्च लिङ्गोपन्यासव्यतिरेकेण शक्योद्भावनः सोऽसिद्धप्रकार इत्यत आह–। [f]"सर्वे"ति । सर्वथा विरुद्धादिप्रकारहीनस्यासिद्धधर्मिण उद्भावनस्य†व्याप्त्यादिप्रमिति व्यतिरेकोद्भावनस्याशक्यत्वात्क्वचिदसङ्करेपि सर्वत्रासाङ्कर्याभावादित्यर्थः । यद्यपि विरुद्धव्यवहारोचितप्रकारादावपि तथाशक्योद्भावनत्वमस्ति तथापि तन्नोद्भाव्यते यत्र तु तदुद्भाव्यते सोऽसिद्ध इति व्यवस्थेत्यत आह–। [g]"नचे"ति । स्वार्थानुमानेसिद्धे व्याप्तेरित्यर्थः ।

मू० * [a]नच शक्योद्भावनपदस्थाने उद्भाव्यमानत्वमिति कृते निस्तारः ?*– [b]सोपाधितादायुद्भावने प्रमित्यभावोद्भावनं व्यर्थत्वान्न क्रियत इति तदव्यापकत्वं प्रसज्येत इति प्रागेवोक्तत्वादिति [c]एतेनासिद्धः साध्यसम(१)इति प्रत्युक्तं [d]यथाकथञ्चित्साध्यसाम्यस्य सर्वसाधारणत्वात् ।

---

† अत्र मूले बहुषु पुस्तकेषु तदुद्भावनस्येति पाठः, साङ्कर्यमित्येतदर्थं दृष्ट्वा यते तथैव प्रतीकधारणेनापि भाव्यं–"तदुद्भावनस्येति" इति ।

(१) साध्यसमत्वं च साध्यवत्साधनापेक्षत्वेन रूपेण ।

टी० ॥ तर्हि व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेको यत्र लिङ्गोपन्यासव्यतिरेकेणोद्भाव्यमानः सोऽसिद्ध इति कृते निस्तारो विरुद्धादावनुद्भाव्यमानत्वादिति(1)समनन्तरोक्ताव्याप्तिमपश्यन् केवलातिव्याप्तिपरिहारमाशङ्कते यस्तं प्रत्याह—। [a]“नचे”ति । कुतो न निस्तार इत्यत आह—। [b]“सोपाधौ”ति । सोपाधित्वं व्याप्त्यभावः व्याप्तिविरहपक्षधर्मताविरहदर्शनेनैवानुमानाङ्गवैकल्यात्मनो दोषस्योद्भावनपर्यवसानाद्धि यथ्यात् प्रमित्यभावो नोद्भाव्य इति कृत्वा तस्य लक्षणस्याव्यापकत्वं व्याप्त्यादिविरहमात्रतयोद्भाव्यमानासिद्धं प्रत्यव्यापकत्वं स्यादिति प्रागुक्तमित्यर्थः ॥ इदानीं सूत्र(2)निसृतं लक्षणं निरस्यति—। [c]“एतेने”ति । साध्येन हेतोः साम्यं येन केन चिदाकारेण किं वा साम्यविशेष इति विकल्प्य प्रथमं प्रत्याह—। [d]“यथे”ति । अस्तित्वकृतत्वादिना साध्यसाम्यं विरुद्धादावपि तुल्यमित्यर्थः ॥

सू०[a]साम्यविशेषस्योक्तप्रकारपर्यवसानव्यतिरेकेणान्यस्यासम्भवात् [b]लक्षणान्तरेषु चोक्तदूषणप्रकारा यथासम्भवमिह योजनीया [c]इत्यलं विस्तरेण [d]अपि चासिद्धलक्षणविशेषणेषु प्रमाणव्यवच्छेदकव्यतिरेकेण यद्व्यवच्छेद्यं किं त—

टी० ॥ यथा साध्यं साध्येन व्याप्ततया न प्रमितमेवं स्वाद्यथा च पक्षधर्मतया न प्रमितं सन्दिग्धत्वादेवं रूपत्वमिह साम्यं विवक्षितमिति द्वितीयमाशङ्क्याह—। [a]“साम्ये”ति । एवंविधसाम्यविशेषस्य व्याप्तत्वपक्षधर्मत्वाभ्यां न प्रमित इत्युक्तप्रकारपर्यवसायित्वात्तस्य च खण्डितत्वादित्यर्थः ॥ अनिश्चितपक्षवृत्तिरसिद्ध इत्यादिलक्षणान्तरे को दोषस्तत्राह— [b]“लक्षणे”ति । व्याप्तत्वपक्षधर्मत्वप्रमिति व्यतिरेकस्य तत्राप्य

---

(१) अनुद्भाव्यमानत्वादिति केवलातिव्याप्तिपरिहारमाशङ्कते—इति सम्बन्धः । अनुद्भाव्यमानत्वात्=लिङ्गोपन्यासव्यतिरेकेण व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेकस्याऽनुद्भाव्यमानत्वादित्यर्थः (२) सूत्रम् ‘साध्याऽविशिष्टः साध्यत्वात्साध्यसमः” इति न्यायवात्स्यायने प्रथमाध्याये द्वितीयाह्निके एकोनपञ्चाशत्तमम् ।

बहूयं वक्तव्यत्वादुक्तदोषाः प्रादुष्युरेवेति यावत् किञ्चेदमनि-
श्चितत्वमप्रमितत्वमुत अज्ञातत्वमुत सन्दिग्धत्वमाद्ये दत्तमे-
वोत्तरं द्वितीये व्याप्त्यापि पक्षधर्मतया विदिते सोपाधिकादा-
वव्याप्तिस्तृतीये पक्षधर्मत्वादिविरहात्मना निश्चितत्वात्तु चत्वा-
दावव्याप्तिव्यर्थविशेषणविशेष्यासिद्धादौ चेत्यादि बहु वक्तुं
शक्यमपि नोच्यते ग्रन्थगौरवभयादित्युपसंहरति—। c"इत्यलमि"
ति । विरुद्धखण्डनामि प्रस्तावयति—। d"अपि चे"ति । व्याप्त-
त्वपक्षधर्मत्वप्रमितिव्यतिरेको यत्र लिङ्गस्योपन्यासव्यतिरेकेण
शङ्कयोद्भावनस्तदसिद्धमित्यादिलक्षणेषु व्यतिरेक इत्यन्तं विशे-
षणप्रमाणव्यवच्छेदक(१)तदतिरिक्तं विशेषणद्वयमस्ति तेन किं
व्यावर्त्यं न किञ्चिद्विरुद्धादेरव्याप्यसिद्धत्वात् व्यावर्त्तयितुमशा-
क्यत्वादितरेतराश्रयश्च विरुद्धादौ सिद्धे तद्व्यावर्त्तनेनासिद्धसि-
द्धिरसिद्धसिद्धौ च तद्व्यावृत्तविरुद्धादिसिद्धिरित्याक्षेपाभिप्रायः ॥

मू० a"केनचिद्विरुद्धं केनचिदन्यदितिचेत् b"विरुद्धमेव किमुच्यते c'तथाहि साध्यविपरीतव्याप्तो विरुद्ध इत्याहुः d"तत्र e'साध्यव्यतिरेकेण हि व्याप्तिः कार्त्स्न्येन वानौपाधिको वा स्वाभाविको वा संबन्ध इत्याद्युक्तिभिः सविशेषणः सहभाव एव निरुच्यते ॥

टी० ॥ क्षिप्रमपि पृष्टं मत्वोत्तरं प्राहेतरः—। a"केनचिदि"
ति । लिङ्गस्योपन्यासव्यतिरेकेणेति विशेषणेन विरुद्धं व्यव-
च्छेद्यमनैकान्त्यादि च तुल्यत्वात् केनचिच्छङ्कयोद्भावन इत्यने-
नाप्यव्यापकत्वं स्वार्थानुमानासिद्धे इत्याशयः विरुद्धस्यैव
निरूपणसरणीमधिरोढुमनर्हतया परास्तत्वमित्यभिप्रेत्याह—।
b"विरुद्धमि"ति । विरुद्धाभिरुक्तिमेव प्रतिपादयति—। c"तथा-
ही"ति । साध्यस्य विपरीतोऽभावस्तद्विरुद्धो वा धर्मस्तेन
व्याप्तो विरुद्ध इत्याचार्यदयनाद्यः विपर्ययव्याप्तत्वेन निश्चि-
तो विरुद्धो हेत्वाभास इति वचनात् पक्षविपक्षयोरेव वर्त-
मानो विरुद्ध इति भषणकतो लक्षणस्याप्ययतो न भेदः

(१) प्रमाणव्यवच्छेदकम् = अनुमानात्मकप्रमाणस्य अवच्छेदकम् ।

विपर्ययसाहचर्यमात्रमनेकान्तेऽप्यस्तीति तत्परानाय व्याप्तत्ववि-
शेषणं भङ्क्तुं गमयति—। [d]"तत्रे"ति । लक्षणस्य व्याप्यविशेषणतां
वक्तुं व्याप्तिपदार्थं कथयति—। [e]"साध्ये"ति । साध्यव्यतिरेकेण
हेतोर्व्याप्तिरित्याद्युक्तिभिः सविशेषणः सहभाव एव निरूप्यते
इति संबन्धः ॥ [f]"कार्त्स्न्येने"ति । सार्वत्रिक इत्यर्थः सर्वे एते
प्रकारा अनुमानप्रस्तावे दर्शिताः आदिपदेन यत्र(१)विपक्षे हेतो-
र्वृत्तौ बाधकमस्ति तयोः सहभावो गृह्यते ॥

सू० [a]"तथा सति च साध्यव्यतिरेकेण सामानाधिकरण्यमे-
व विशेषणविशेषयुक्तं विरुद्धत्वमित्युक्तं स्यात् [b]"यथा
चैवं तदा साध्यव्यतिरेकेण सामानाधिकरण्यमेव
हेतोरगमकत्वे समर्थमिति तन्मात्रमुद्राव्यं वृथा
विशेषणप्रक्षेपः [c]"तथाचानैकान्तिक एवायं स्यात् *
[d]"ननु साध्यव्यतिरेकसंबन्धो यद्यपि विरुद्धानैकान्ति-
कयोर्द्वयोरप्यस्ति ।

टी० ॥ सहभाव एव व्याप्तिपदार्थो निरूप्यतां का नाम
वस्तुक्षतिरित्यत आह । [a]"तथे"ति । साध्याभावेन हेतोः समा-
नाधिकरण्यं साहचर्यसम्बन्धो विशेषणकार्त्स्न्यादिना युक्तो
व्याप्तिः स्यादित्यर्थः ॥ यदर्थमुपोद्घातः कृतस्तदिदानीं दर्श-
यति—। [b]"यदे"ति । हेतोः साध्याभावसम्बन्धमात्रस्यैवानुमा-
नाङ्गवैकल्पदोषप्रतिपादनसामर्थ्यात्तस्मात्तन्मात्रमुद्राव्यं नहि भ-
वति साध्याभावसहचरितः साध्याविनाभूतश्चेति ततः का-
र्त्स्न्येत्यादि विशेषणप्रक्षेपो मुधा यद्यपि व्याप्तिरित्युक्तं निर्वि-
शेषणमेव तथापि दण्डोलि वस्तदर्थनिर्वचनेन सविशेषणत्व तर्हि
साध्यस्य व्यतिरेकसहचरितो विरुद्ध इत्येतावन्मात्र ब्रूमस्त-
त्राह—। [c]"तथाचे"ति । पक्षत्रय वृत्तरनैकान्तिकस्यापि साध्य
व्यतिरेकसामानाधिकरण्यमस्तीति ततो भेदो न स्यादित्यर्थः ॥
अनैकान्तिके व्यतिरेकसामानाधिकरण्यं तन्मात्रस्य चागम-
कत्वे प्रयोजकत्वमुक्तमङ्गीकृत्य चोदयति—। [d]"नन्वि"ति ।

(१) यत्र—ययोः साध्यहेत्वोर्मध्ये ।

मू० [a]तथापि वस्तुगत्या स्वाभाविकोऽसौ विरुद्धे [b]एवेत्येतावन्मात्रविवक्षया विरुद्धस्यानैकान्ताद्भेदोपन्यासः ? *- [c]मैवं, दत्तोत्तरत्वात् [d]वस्तुगत्या सन्नप्ययं विशेषो नोद्भावनार्ह इत्युपेक्षणीय इत्युक्तं [e]तथाहि नेदमस्य साधकमेतत्साध्यं प्रति विरुद्धत्वादित्यभिधीयमाने विरुद्धशब्दार्थनिरुक्तौ विशेषणाधिक्यस्योक्तन्यायेन दुष्परिहरत्वात् [f]अत एवानैकान्तिके सन्देहेन प्रत्यवस्थानं विरुद्धे तु व्यतिरेकनिश्चयेनेति विशेषादनयोर्भेदोपन्यास इत्यप्यनवकाशम् ॥

टी० ॥ तर्हि विशेषणवैयर्थ्यमित्यपि न वचनीयं विरुद्धस्यानैकान्ताद्भेदज्ञापकनयान्तर्वर्त्तिन्या व्याप्तेरुपन्यासादित्याह । [a]"तथापी"ति ॥ फलितमाह—। [b]"इत्येतावदि"ति । अनुपयुक्तांशमन्निध्यधिको न वक्तव्यो ज्ञेयत्वादिवन्निग्रहापातादिति परिहरति—। [c]"मैवमि"ति । दत्तोत्तरत्वादिति हेतुरसिद्ध इत्यत आह—। [d]"वस्त्वि"ति । व्यतिरेकसामानाधिकरण्यमेव हेतोरगमकत्वे समर्थमिति विशेषणप्रक्षेपोऽमुधेत्युक्तमित्यर्थः॥ नित्यः शब्दः कृतकत्वादात्मवदित्युक्ते कृतकत्व न नित्यत्वसाधकं विरुद्धत्वादित्युपन्यासे कथ विशेषणवैयर्थ्यमित्यत आह—। [e]"तथाही" ति । साध्यनिश्चयं विरुणद्धीति विरुद्ध इति वक्तव्यं व्याप्तेरपि सार्वत्रिकत्वादविशिष्टसाहचर्यमित्युक्तन्यायेन साहचर्यमात्रस्यागमकत्वसमर्थत्वेन विशेषणाधिक्यं दुष्परिहरमित्यर्थः उक्तामेव नीतिं भङ्ग्यन्तरेण्यनिर्दिशति—। [f]"अत" इति । अनैकान्तिके साध्यव्यतिरेकेण व्याप्तिसन्देहेन प्रत्यवस्थानं विरुद्धे तु साध्यव्यतिरेकव्याप्तत्वनिश्चयेन प्रत्यवस्थानमित्येवंरूपविशेषादनैकान्तविरुद्धयोर्भेदकथन मत एव विशेषणवैयर्थ्यादेव निरवकाशमित्यर्थः अनैकान्तिको हि साधारणो

ऽसाधारणश्चेति द्विधा तत्र साधारणः साध्याभाववति पक्षे च साधारणत्वादसमानधर्मतया पक्षे साध्यसन्देहं करोति विरुद्धस्तु व्यतिरेकव्याप्ततया पक्षे साध्याभावनिश्चयं करोतीति तयोर्भेद इति शङ्काकृतोऽभिप्रायः ।

मू० [a]अनुमितिहेतुव्यतिरेको हि [b]अनुमितिहेतुश्चैको व्याप्तिः [c]अतस्तदभावस्य दोषत्वात्तावन्मात्रं ज्ञाप्यं [d]तच्च हेतुविपक्षसंबन्धोद्भावनमात्रादेव गम्यते [e]तस्माद [f]नुमितहेतुव्याप्तिप्रमितिव्यतिरेकबोधनाय संशये व्यतिरेकनिश्चये वा उद्भाव्यमानेपि कुतस्तावेवेत्यत्र विपक्षासंबन्धमात्रनियततत्संबन्धाववश्योपन्यस्याविति विपक्षसंबन्धमात्रमेवास्तु व्याप्तेस्तत्प्रमितेश्च व्यतिरेकस्य लिङ्गत्वादुद्भाव्यं कृतमितराभ्यामिति ॥

टी० ॥ अत इतिपरामृष्टं विशेषणवैयर्थ्यं दर्शयति—। [a]"अनुमिती"ति अनुमितेर्यत्कारणं तदभावो हेतुदोष इत्यर्थः कस्तर्ह्यनुमितिहेतुर्यद्व्यतिरेको हेतुदोष इत्यत आह—। [b]"अनुमिती"ति । एको व्याप्तिरपरो हेतुः पक्षधर्मतेति यावत् ॥ ततः किमित्यत आह—। [c]"अत" इति । व्याप्तिव्यतिरेकस्य हेतुदोषत्वात्तन्मात्रमुद्भाव्यं तदेव हेतुं दूषयतीत्यर्थः व्याप्तिव्यतिरेकोद्भावनमेव हेतोर्विपक्षसंबन्धानियमानियमदर्शनाधीनमिति तदुपन्यास इत्यत आह—। [d]"तच्चे"ति । साध्याभावसहचरितः साध्यव्याप्तश्चेत्यसम्भवाद्विपक्षवृत्तित्वदर्शनेनैव व्याप्तिव्यतिरेको गम्यते इत्यर्थः । विपक्षसम्बन्धनियमाभ्यामपि व्याप्तिव्यतिरेके गम्यते इति तावेवोपन्यस्याविति विपरीतं किं न स्यादित्याशङ्कोपसंहरति—। [e]"तस्मादि"ति । तत्संबन्धमात्रमेवोद्भाव्यमस्तु कृतमलमितराभ्यां व्यतिरेकसंशयनिश्चयाभ्यामिति सम्बन्धः तदुपपादयति—। [f]"अनुमिती"ति । हेतुव्याप्तेस्तत्प्रमितेश्च व्यतिरेकसंशयेनैकान्तिके व्यतिरेकनिश्चये विरुद्धे वोद्भाव्यमाने तावेव संशयनिश्चयौ कुत इति जिज्ञासायां विपक्षसम्बन्धमात्रं विपक्ष-

नियतसम्बन्धत्वावश्योपन्यस्य इति कृत्वा विपक्षसम्बन्धमात्रस्य व्याप्तितत्प्रमितेश्च व्यतिरेकस्य लिङ्गत्वात्तन्मात्रमुद्भाव्यमुपजीव्यत्वाल्लाघवाच्चेत्यर्थः ॥

सू० "लकारभेदप्रयोगे तैस्तैर्लकारैः कालविशेषप्रतिपादनवद्विभक्तिभिर्लिङ्गसङ्ख्याज्ञापनवत्पर्वतोऽग्निमानित्यादौ धर्म्यादिप्रतिपादनवच्च नेदं घटते "तत्र तेषामतात्पर्यविषयाणामपि 'पदप्रयोगे विशिष्टबोधने वा ऽन्यथासिद्धानां यथा बोधनं तथा यद्यत्रापि व्याप्तेरतात्पर्यविषयत्वं तदानैकान्तिकसाधारण्यादेवा

टी० ॥ अभूद्भवति भविष्यतीति लुङादिलकारभेदप्रयोगेऽविवक्षितोऽपि भूतादिकालः प्रतीयते देवदत्तो ग्रामं गत इत्यादौ पुंलिङ्गत्वादिरविवक्षितः प्रतीयते यथा वाग्निमान् पर्वत इत्यादावविवक्षितधर्मिदृष्टान्तादि प्रतीयते तद्वद्विपक्षसम्बन्धमात्रोद्भावने विवक्षितौ नियमानियमौ प्रतीयेते इत्यत आह । "लकारे"ति ।
कालविशेषस्याविवक्षितत्वं कालसम्बन्धमात्रस्य विवक्षितत्वात्प्रथमादिविभक्तेः कर्त्रादिकारकमात्रपरत्वाल्लिङ्गादेरविवक्षितत्वमस्ति अग्निपर्वतसम्बन्धस्यैव विवक्षिततया प्रत्यक्षसिद्धतया च धर्म्यादेरविवक्षितत्वमित्यर्थः कुतो न घटते इत्यत आह । "तत्रे"ति । तत्र तेषामतात्पर्यविषयाणामन्यथासिद्धानां बोधनं यथेति सम्बन्धः अन्यथासिद्धिं दर्शयति—। "पदेत्या"दि ।
पदानां लिङ्गादिबोधकत्वस्वाभाव्याल्लिङ्गादेरन्यथासिद्धिः कालादिविशिष्टबोधने विशेषणतया कालादिविशेषस्यान्यथा सिद्धिरित्यर्थः । तथा व्याप्तेरतात्पर्यविषयत्वमुत तात्पर्यविषयत्वमिति विकल्प्य प्रथम प्रत्याह—। "तथे"ति । साधारण्यादेव न घटते इति सम्बन्धः व्यतिरेकनियमस्यातात्पर्यविषयतया लक्ष्यलक्षणत्वाभावाद्व्यतिरेकसामानाधिकरण्यमात्रं लक्षणं स्यात्तदनैकान्तेप्यस्तीत्यतिव्याप्तिरित्यर्थः ।

मू [a]ऽन्यथोक्तदोषापरिहारादेवेति [b]अनैकान्तिकत्वं चानुद्भावयतानधिगच्छता च विरुद्धमशक्योद्भावनमशक्यावगमनं चेति [c]तदुपजीवित्वान्न पृथग्दूषणं [d]विशेष्यप्रतिपादनं विशेष्यावगमं च विना विशिष्टप्रतिपादनस्य विशिष्टावगमस्य वाऽशक्यत्वात् एवमन्यत्रापि विशेषणस्याप्रयोजकता विशेषस्य सामर्थ्यं स्वयमूहनीया ॥

टी० ॥ द्वितीयमपवदति—। [a]"अन्यथे"ति। सम्बन्धनियमस्य विवक्षितत्वे व्यतिरेकसम्बन्धमात्रस्यागमकत्वप्रयोजकत्वे सति विशेषणवैयर्थ्यादेवेत्यर्थः खण्डनान्तरमाह—। [b]'अनैकान्तिकत्वमि"ति। विरुद्धानैकान्तिकान्न पृथग्दूषणमिति सम्बन्धः तत्र हेतुः—। [c]"तदि"ति। तस्याप्युपपादनायानैकान्तिकविमित्यादि विरुद्धस्यानैकान्तिकोपजीवित्वेन यदुक्तं भवेत्तदेवासिद्धं व्याप्तिभङ्गलिङ्गत्वाविशेषादित्यत आह—। [d]"विशेष्ये"ति। विपक्षसम्बन्धस्य विशेषणं कात्स्न्यादिकृत्स्नत्वादिविशिष्टविपक्षसम्बन्धप्रतिपादनादि विशेष्यभूतविपक्षसम्बन्धमात्रप्रतिपादनादिव्यतिरेकेण नोपपद्यते विशेषणविशेष्यप्रतिपादनाद्यधीनत्वाद्विपक्षसम्बन्धमात्र चानैकान्तिकमित्यर्थः विशेष्यांशस्य हेतोरगमकत्वे समर्थत्वे सति विशेषणवैयर्थ्यमन्यत्राप्यतिदिशति। [e]"एवमि"ति।

मू० तद्यथा इदमसाधकं साधारणानैकान्तिकत्वादित्यत्र साधारणेति विशेषणे सपक्षविपक्षगतत्वादित्यत्र सपक्षगतत्वे सतीत्युद्भाव्यमाने [b]एवमसाधारणेपीति [c]इदमसाधकं जातित्वादिति जातित्वविवेचने स्वव्याघातकमुत्तरं जातिरिति स्वव्याघातकत्वस्यैव सर्वमसञ्ज्ञेयत्वादित्याद्यजातिजातिसाधारणस्य दूषणसमर्थत्वेनोत्तराभिधाने इति [d]किन्नु साध्यविपरीतेति।

टी० ॥ तदुदाहरणेन विशदयति । "तदि"ति । शब्दोऽनित्यः प्रमेयत्वाद्घटवदित्यत्र प्रमेयत्वमसाधकं साधारणानैकान्त्यादित्युक्ते साधारणविशेषणे सपक्षविपक्षव्यावृत्तत्वादित्यत्र विपक्षेति विशेषणेऽप्रयोजकता द्रष्टव्येत्याह—। "एवमि"ति । विशेषणांशस्यैव समर्थत्वे विशेष्याप्रयोजकतापि द्रष्टव्येत्यभिप्रेत्याह—। "इदमि"ति । सर्वं सज्ज्ञेयत्वादिति प्रथमप्रयोगे दृष्टान्ताभावेनासाधकत्वेपि न जातिता सर्वमसज्ज्ञेयत्वादिति द्वितीयप्रयोगे हेतोरपि ज्ञेयतयासत्त्वप्रसङ्गेन स्वव्याघातकत्वादादिपदेन नेदं साधकं हेतुत्वादित्यादिपरिग्रहः किं जातित्वमिति जिज्ञासायां स्वव्याघातकमुत्तरं जातिरिति विवेचनीयं तथाच जात्यजातिसाधारणस्य व्याघातकत्वस्यैव दूषणसमर्थत्वादुत्तरमिति विशेष्यस्याप्रयोजकता उत्तररूपे व्याघाते जातित्वानङ्गीकारादुत्तरमित्यपि वक्तव्यमेव प्रसङ्गाद्व्यर्थविशेषणत्वमन्यत्रातिदिश्य विरुद्धलक्षणखण्डनं प्रकृतमनुसरति—। "किञ्चे"ति ।

मू० 'साध्याभावेत्यर्थे यदा अभावात्मैव साध्यः क्वचिद्भवितुमर्हति(१)तत्र तद्विपरीतस्य भावत्वात्तदव्यापकत्वं लक्षणस्य 'नच विपरीतशब्दस्य विरोधिमात्रार्थत्वेन भावाभावोभयव्याप्तिरिति वाच्यं 'सहानवस्थानं हि भावाभावयोर्विरोधोऽभ्युपेयते "अनवस्थानं च संसर्गनिषेधः स च भावाभावयोरन्योन्यस्यानवस्थानमेव

टी० ॥ साध्यविपरीतव्याप्त इत्यत्र विपरीतपदेनाभावो विवक्षित उत विरोधिमात्रमिति विकल्प्य प्रथमं प्रत्याह—। "साध्ये"ति । अभाव इत्यर्थे आद्गुण इति गुणे एकारे कृते अभावेत्यर्थे इति रूपं विवक्षिते इति शेषः न नित्यः शब्दः भावानादित्वादित्यत्र नित्यत्वाभावे साध्ये तद्विपरीतेन नित्यत्वेन भावरूपेण व्याप्तोऽयं विरुद्धो लक्षणेन न व्याप्यते इत्यव्याप्तिरिति

(१) केषुचित्पुस्तकेषु "भवितुमर्हति"-इत्यस्य स्थाने "भवति"-इति पाठः।

यावत् द्वितीयमपवदति—। [b]"नचे"ति । यत्र भावः साध्यस्तत्र तद्विपरीतोऽभावो यत्राभावस्तत्र तद्विपरीतो भाव इति कुतो नोभयव्याप्तिर्विरुद्धमात्रार्थत्वे(१)इत्यत आह—। [c]"सहे"ति । भावाभावस्यैव विरोधत्वेऽन्यतरलपप्रसङ्गादित्यर्थः अस्तु ततः किमित्यत आह—। [d]"अनवस्थानमि"ति । एकस्मिन्काले देशे च भावाभावयोरवस्थानं संसर्गस्तन्निषेधोऽनवस्थानमित्यर्थः संसर्गनिषेधः कीदृश इत्यत आह—। "स चे"ति । यत्र भावस्तत्र नाभावो यत्राभावस्तत्र न भाव इत्यन्योऽन्यस्यानवस्थानमेव संसर्गनिषेध इत्यर्थ ॥

मू० [a]परस्परप्रतिषेधरूपत्वात्तयोः [b]तथाच सति भावाभावयोः स्वरूपस्यानुपसङ्ग्रहे प्रत्येकमव्याप्तिर्मिलितस्यासम्भव एवेति [c]वक्ष्यामश्च भावाभावयोर्विरोधनिरुक्तिनिराकरणमुपरिष्टादिति [d]किंच व्याप्तपदेन लक्षणप्रविष्टेन किं व्यवच्छेद्यं अनैकान्तिकमिति चे[e]त्किं तदनैकान्तिकमिति [f]तथाहि अनैकान्तिकः सव्यभिचार इत्यलक्षणं

टी० ॥ कुत इत्यत आह—। [a]"परस्परे"ति । तथाच सति लक्षणस्य को दोष इत्यत आह—। [b]"तथा चे"ति । भावाभावयोः स्वरूपास्वीकारे तयोरनवस्थानस्यैव लक्षणत्वस्वीकारे किं प्रत्येकं लक्षणमुत मिलितमाद्ये न्योन्योदाहरणाव्याप्तिर्द्वितीये ऽसम्भव इत्यर्थः भावाभावयोरनवस्थान च यद्यपि तदुभयव्यतिरेकेण नास्ति तथाप्यङ्गीकृत्यैतदुक्तं भावाभावयोर्विरोधनिर्वचनस्य खण्ड्यमानत्वादपि लक्षणासिद्धिरित्याह—। [c]"वक्ष्यामश्चे"ति । उत्तरवादपातनिकारचयति—। [d]"किंचे"ति । विरुद्धलक्षणप्रविष्टेन व्याप्तपदेन किं व्यवच्छेद्यं न किञ्चिदिति क्षेपः प्रश्नो वा उभयत्र परिहारं शङ्कते—। [e]"अनैकान्तिकमि"ति । असिद्धस्य समरसादिवद्व्यवच्छेद्यत्वादनैकान्तस्य सिद्धिर्वक्तव्या सा च लक्षणायत्ते ति लक्षणं पृच्छति—। [f]"किमि"ति । आक्षेपाभिप्रायमाविष्करोति—। [f]"तथाहि"ति । एकस्मिन्नेव साध्ये

(२) विपरीतपक्षस्य विरुद्धमात्रार्थत्वे—इत्यर्थः ।

नियत एकान्तः न एकान्तोऽनैकान्त व्यभिचारश्च सम्बन्धानियमः अनियतसाध्यसम्बन्धोऽनैकान्त इत्येतद्लक्षणमितियावत् ॥

मू० "सव्यभिचारत्वं हि यदि विपक्षवृत्तिता "तदानीं विरुद्धे प्रसङ्गः 'असाधारणानैकान्तिकाव्याप्तिश्च "अथ सपक्षविपक्षगताभावना 'तदा साधारणोदाहरणाव्यापकत्वम् ॥

टी० ॥ किमिदं सव्यभिचारित्वं विपक्षवृत्तित्वमुत सपक्षविपक्षगताभावता किं स्विदसपक्षविपक्षसाधारणतेति विकल्प्य प्रथममनुवदति-। "'से"ति । दूषयति-। "'तदानी"मि"ति । शब्दो नित्यः कार्यत्वादित्यस्मिन् विरुद्धेपि 'विपक्षवृत्तित्वं लक्षणं गतमित्यतिव्याप्तिरित्यर्थः दोषान्तरमाह-।"'असाधारणे" ति । शब्दो नित्य आकाशविशेषगुणत्वादित्यसाधारणानैकान्तिकाव्याप्तिरनस्य विपक्षवृत्तित्वाभावात् नन्वनध्यवसितोऽय हेत्वाभासो नानैकान्त. साध्यासाधकः पक्षे वर्तमानो हेतुरनध्यवसित इति तल्लक्षणादिति?*-नैवम्, असाधकत्वमनुमित्यजनकत्वं तद्व्याप्तिपक्षधर्मत्वनिश्चये सत्येव उत तद्विरहे नाद्यः असम्भवान्नहि सम्भवति व्याप्तिपक्षधर्मतानिश्चयं सत्यसाधक इति अतिप्रसङ्गात् द्वितीयेऽसिद्धान्तर्भाव. व्याप्तिविरहाच्चेदसाधकत्वं तदा न एकान्तोऽनैकान्तिक इत्यन्वर्थसञ्ज्ञासम्भवेऽपूर्वसञ्ज्ञान्तरकरणमनुपपन्नं प्रमाणाभावाद्गौरवाच्च 'अस्यानैकान्तिकान्तर्भावेऽनुपसंहार्यस्या(१) नैकान्तिकान्तर्भावाभावादनैकान्तिकादनध्यवसितः पृथक् स्वीकर्तव्य ?*-इति चेन्न, समनन्तरमेव तस्याप्यन्तर्भावाभिधानात्तस्माद्भूषणोक्तमध्यनादृत्याचार्योद्योतकरवाचस्पतिप्रभृतिभिरुक्तमेव स्वीकार्यमिति द्वितीयं शङ्कते-; d"'अथे"ति । सपक्षविपक्षयोर्गताभावेयस्य स तथोक्तस्तद्भावस्तत्ता सव्यभिचारत्वमिति सम्बन्धः निराकरोति-।

(१) अनैकान्तिकान्तर्भाविरत्वेनोपसंहार्यं उपलक्ष्यग्राह्यो यो न भवति तस्येत्यर्थः, परन्तु लक्ष्यते यदत्र "अनैकान्तिकान्तर्भावानुपसंहार्यस्य"-इत्युचितः पाठः, तदर्थस्तु अनैकान्तिकान्तर्भावोऽनुपसंहार्यः-अग्रहग्राह्यो यस्य तस्येति ।

''तदे''ति । शब्दो नित्यः प्रमेयत्वादिति साधारणानैकान्तिकोदाहरणाव्यापकत्व लक्षणस्य पक्षत्रयवृत्तित्वात्तस्येत्यर्थः ॥

मू० "अथोच्यते सव्यभिचारत्वं हि सपक्षविपक्षसाधारणताभिप्रेता "सा चान्वयेन साधारणस्य व्यतिरेकेणासाधारणस्यानैकान्तिकस्य सङ्ग्राहिका 'सपक्षविपक्षसाधारणता ''अन्वयेन व्यतिरेकेण वेति विशेषवत्तया न विवक्षिता तत्साधारणासाधारणानैकान्तिकयोरुभयोरपि सङ्ग्रहः 'विवादाध्यासितं क्षणिकं सत्त्वादित्यादेरनुपसंहार्यस्यापि 'सपक्षविपक्षशून्यत्वादेव सपक्षविपक्षगतत्वाभावेन साम्यमिति 'विचार्यमेतद्व्याख्यानं

टी० ॥ तृतीयं शङ्कते । '''अथे''ति । एवमपि कथमुभयसङ्ग्रह इत्यत आह—। ''से''ति । अन्वयः सत्त्वं व्यतिरेकोऽसत्त्वं साधारणस्योभयत्र सत्त्वं समानमसाधारणस्यासत्त्वमित्यन्वयेन व्यतिरेकेण च सपक्षविपक्षसाधारणतोभयसङ्ग्राहिका व्यापिकेत्यर्थः. अन्वयेन साधारण्य चेद्विवक्षितमसाधारणाव्याप्तिर्व्यतिरेकेण चेत् साधारणाव्याप्तिरुभयेन चेदुभयाव्याप्तिरित्यत आह—। '''सपक्षे''ति । लक्षणं व्यापकमिति शेषः हेतुं व्याचष्टे—। ''''अन्वयेने''ति । विवादाध्यासितं सर्वं क्षणिकं सत्त्वादित्यादेरनुपसंहार्यस्य कथं सङ्ग्रहस्तत्रान्वयव्यतिरेकयोरभावादित्यत आह—। '''विवादे''ति । उपसंहारो व्याप्तिस्तद्विषय उपसंहार्यो दृष्टान्तः स न विद्यते यस्य सोऽयमनुपसंहार्यस्तस्यापि सपक्षविपक्षगतत्वाभावेन व्यतिरेकेण साम्यमिति तदुपसङ्ग्रहस्तत्र हेतुः-। '''सपक्षे''ति । नहि सम्भवति सपक्षादिर्नास्ति तत्र गतो हेतुरित्यादिपदेन सर्वं शून्यं ज्ञेयत्वादित्यादिसङ्ग्रहः नच: खपुष्पादिदृष्टान्त इति वाच्यं निरुपाख्यस्य सोपाख्यसाध्यहेत्वनाश्रयत्वादन्यथाश्रयासिद्धिविलोपप्रसङ्गादिति सपक्षविपक्षसाधारण्यं केवलव्यतिरेकिहेतोरप्यस्तीत्यतिव्याप्तिः साध्या-

साधकत्वविशेषणे तदेव दूषणे समर्थमुद्भाव्यं व्यर्थं सपक्षेत्यादिविशेषणमित्यभिप्रेत्याह–। "विचार्यमि"ति ॥

मू० "परमस्तु तावदापाततः "तथापि व्यतिरेकेण 'सपक्षविपक्षसाधारणतायाः सपक्षव्यापके सद्धेतौ धूमविशेषादौ गतत्वेनातिव्यापकत्वं "यदि त्वस्य दोषस्य परिहारार्थं सर्वविपक्षसपक्षसाधारणमनैकान्तिकमिति ब्रूषे तदा व्यतिरेकमात्रेण सर्वविपक्षसपक्षसाधारणता धूमानुमानादिगामिनी न भवतु नाम 'अन्वयेन तु सर्वसपक्षविपक्षसाधारणता विपक्षसपक्षैकदेशगामिनं साधारणानैकान्तिकं शब्दो न नित्यः प्रत्यक्षग्राह्यत्वादित्यादि न सङ्गृह्णातीत्यव्याप्तिरि-

टी० ॥ अङ्गीकृत्याह–। "परमि"ति। परं केवलमापाततोऽस्त्वति नाङ्गीकृत चेल्लक्षणमित्यभिप्रायः किं सपक्षविपक्षसाधारण्यमात्र लक्षणमुत सर्वसपक्षविपक्षसाधारण्यमिति विकल्प्य प्रथमं प्रत्याह–। "तथापी"ति। गोपालघटिकाव्याप्तिधूमव्यावृत्त्यर्थं विशेषपदं धूमवत्वादिति सद्धेतुस्सपक्षविपक्षयोर्व्यतिरेकद्वारासाधारण इत्यतिव्यापकत्वं तत्र हेतुमाह–। "सपक्षे"ति। सपक्षैकदेशद्वारावस्थाप्रमति तदप्रवृत्तेरित्यर्थः आदिपदेन शब्दोऽनित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वात् घटवदित्यादिसङ्ग्रहः द्वितीय कल्पं शङ्कते–। "यदी"ति। सर्वसपक्षविपक्षसाधारणोऽनैकान्तः सद्धेतोः सपक्षैकदेशवृत्तौ तदभाव इति तन्निवृत्तिरित्यर्थः उक्तातिव्याप्तिपरिहारमङ्गीकृत्य दूषयति–। "तदे"ति। व्यतिरेकमात्रेण सपक्षविपक्षसाधारणता धूमानुमानगामिनी न भवतीति कृत्वातिव्याप्तिर्माभूत्नामेत्यर्थः नचैतावता लक्षणं निरवद्यमव्यापकत्वादित्याह–। "अन्वयेने"ति। शब्दोऽनित्यः प्रत्यक्षत्वात् घटवदिति साधारणानैकान्तं न संगृह्णाति न व्याप्नोति सपक्षैकदेशे गुरुत्वादावाकाशादौ चावृत्तेरित्यर्थः शब्दो नित्यो वलसात्मत्वे सति

सामान्यवत्त्वादित्यादिरादिपदार्थः ।

सू० [a]इत्येकं सन्धित्सतोऽपरं प्रच्यवते [b]अपि चा[c]न्वयव्यतिरेकाभ्यां [d]सर्वसपक्षविपक्षगतत्वाद्धूमानुमानादौ स एव प्रसङ्गः [e]विशेषरूपेण तयोरविवक्षितत्वात् [f]किञ्च सर्वसपक्षविपक्षसाधारणमनैकान्तिकमितिवाक्ये यदि सर्वेति विपक्षस्यापि विशेषणं [g]तदा [h]विपक्षैकदेशवृत्तेः सापक्षव्यापिनः साधारणानैकान्तिकस्य त्रसरेणुः कार्यावयवकः महत्त्वात्पटवदित्यादेरव्यापकमिदं लक्षणम् ॥

टी० ॥ उपसंहरति—। [a]"इत्येकमि"ति । अतिव्याप्तिपरिहारमिच्छतस्तेऽपरं सर्वलक्षणव्याप्तिः प्रच्यवते इत्यर्थः सद्धेतावतिव्याप्तिपरिहारमङ्गीकृत्याव्यापकत्वमुक्तमिदानीमतिव्याप्तिरपि तदवस्थेत्याह—। [b]"अपिचे"ति । धूमादौ स एव लक्षणातिव्यापकत्वप्रसङ्गस्तत्र हेतुः—। [d]"सर्वे"ति । तत्रापि हेतुः—। [c]"अन्वये"ति । धूमवत्त्वं हेतुर्विपक्षं व्यतिरेकेण सपक्षैकदेशं च तेनैव सपक्षैकदेशं पुनरन्वयेनेत्यन्वयव्यतिरेकाभ्यां सर्वसपक्षादिव्यापकत्वमित्यर्थः व्यतिरेकेणैवान्वयेनैव वा सर्वसपक्षविपक्षसाधारणोऽनैकान्तिक इति विवक्षितत्वान्नातिव्याप्तिरित्यत आह—। [e]"विशेषे"ति । विवक्षितत्वे चाव्याप्तिरित्यर्थः सर्वसपक्षेत्यादिलक्षणवाक्ये सर्वपदं विपक्षस्यापि विशेषणमुत सपक्षस्यैवेति विकल्प्य प्रथममनुवदति—। [f]"किञ्चे"ति ॥ दूषयति—। [g]"तदेति"ति । तदा साधारणस्यानैकान्तिकस्याव्यापकमिदं लक्षणमिति सम्बन्धः सर्वेतिविशेषणाभावादिति दर्शयति—। [h]"विपक्षेत्या"दि । उदाहरणमाह—। "त्रसरेणुरि"ति । अणुकमित्यर्थः कार्यमवयवो यस्य स तथोक्तः कार्यस्य इत्यर्थः महत्त्वं हेतुः सपक्षे घटादौ सर्वत्र वर्तते विपक्षे परमाण्वादौ न वर्तते दिक्कालादौ वर्तते इति विपक्षैकदेशवृत्तिः परमाणुः स्वतो न्यूनपरिमाणारब्धः द्रव्यत्वात् घटवदित्यादिरादिपदार्थः ।

सू० [a]अथ सर्वेति न विपक्षस्य विशेषणं [b]तदा व्यतिरेक-

मादाय विपक्षसर्वसपक्षसाधारणमनैकान्तिकमित्ये [c]तद्विपक्षैकदेशमात्रवृत्तौ विरुद्धे [d]क्षितिर्नित्या सावयवत्वादित्यादौ गतत्वादतिव्यापकमिति [e]का चेयं वाचोयुक्तिः सपक्षविपक्षसाधारणमनैकान्तिकमित्युक्ते सर्वं सङ्गृह्यते अन्वयेन व्यतिरेकेण वेति कथमनुपसंहार्यस्य [g]असत्सपक्षविपक्षस्य सपक्षे चान्वयेन व्यतिरेकेण वा साधारण्यं स्यात्

टी० ॥ द्वितीयं शङ्कते–। [a]"अथे"ति । अतिव्याप्तिं दर्शयितुं लक्षणवाक्यस्य पर्यवसितमर्थं दर्शयति–। [b]"तदे"ति । व्यतिरेकमादाय विरुद्धे गतत्वादित्युपरि सम्बन्धनीयम् इदमनैकान्तिकमित्युक्तं स्यादिति शेषः अस्तु को दोष इत्यत आह–। [c]"एतदि"ति । उदाहरति–। [d]"क्षितिरि"ति । सावयवत्वादितिहेतुर्विपक्षे घटादौ वर्त्तते बुद्ध्यादौ च न वर्तते सपक्षे परमाण्वादौ सर्वत्र न वर्त्तत इति सर्वसपक्षविपक्षसाधारणत्वं विपक्षैकदेशवृत्तिविरुद्धेस्तोऽत्यतिव्याप्तिरित्यर्थः क्षितिर्नित्या कार्यद्रव्योपादानत्वादित्याद्युदाहार्यमिति दर्शयत्यादिपदेन सपक्षविपक्षसाधारणमितिलक्षणस्य साधारणासाधारणादिसकलानैकान्तिकव्यापकत्वमङ्गीकृत्यातिव्यापकत्वमुक्तमिदानीं सावाऽभङ्गिरेवानुपपन्नेत्याह–। [e]"का चे"ति । साधारणासाधारणानुपसंहार्यमित्यर्थः कानुपपत्तिरित्यत आह–। [f]"कथमि"ति । सपक्षविपक्षयोरन्वयव्यतिरेकाभ्यां साधारण्यमनुपसंहार्यस्यासम्भवीति दर्शयितुं तत्स्वरूपमाह–। [g]"असदि"ति ॥

सू० [a]तयोरेवाभावात् [b]यदि सपक्षेविपक्षे च साधारणत्वमुभयत्र स्वरूपानुगमो विवक्षितस्तदानीमसाधारणानैकान्तिकासङ्ग्रहः [c]अथोभयस्मिन्नसत्त्वं तद्विवक्षितं तदा सर्वाव्याप्तिः [d]तदसत्त्वस्यातद्धर्मत्वात् [e]अथ तदुभयगताभावप्रतियोगित्वं तदुभयसम्बन्धस्य योभावस्तदाश्रयत्वं वाभिप्रेतम् ।

टी० ॥ कथं वा न स्यादित्यत आह—। a"तयोरि"ति। सपक्षविपक्षयोरेवाभावे तन्निष्ठो हेतुभावोऽभावो वा नहि प्रमातुं शक्यते भावाभावयोर्भावाधिकरणतया प्रमानियमादित्यर्थः किन्तु सपक्षविपक्षसाधारणत्व हेतोः सपक्षविपक्षयोरनुगम उत तदुभयासत्त्वं किं वा तदुभयनिष्ठाभावप्रतियोगित्वमाहोस्वित्सपक्षविपक्षसम्बन्धाभाववत्वमिति विकल्प्य प्रथममनुवदति—। b"यदी"ति। अव्याप्त्या दूषयति—। c"तदे"ति। असाधारणानैकान्तस्य सपक्षविपक्षानुगतत्वाभावादव्याप्तिरित्यर्थः ॥ द्वितीयं शङ्कते—। d"अथे"ति। तत्सपक्षविपक्षसाधारण्यमित्यर्थः असम्भवेनैतद्दूषयति—। e"तदे"ति। कुतः सर्वाऽव्याप्तिरित्यत आह—। f"तदि"ति। सपक्षविपक्षगतहेत्वभावस्य हेतुधर्मत्वाभावात्साधारणत्वासम्भवादसिद्धिरित्यर्थः तृतीयचतुर्थौ कल्पावुद्भावयति—। g"अथे"ति। सपक्षविपक्षाभ्यां हेतोः सम्बन्धस्तदुभयनिष्ठ इति तदभावोऽपि तदुभयाश्रय इत्यभावप्रतियोगित्व सपक्षविपक्षाभ्यां हेतुं सम्बन्धस्य योऽभावस्तदाश्रयत्व वा सपक्षविपक्षसाधारण्यं विवक्षितमित्यनुषङ्गः ॥

मू० a"तदा साधारणोदाहरणाव्याप्तिः * b"अथ मन्यसे तदुभयसाधारण्यं नामैकस्मिन् याद्रूप्यं हेतोस्सत्त्वमसत्त्वं वा ताद्रूप्यमपरस्मिन्नपि यतदुच्यते c"तथासति नाव्यापकतादोष इति * d"नैवम्, मुख्यस्तावद्वचनार्थो नोपपद्यते हेतोरैकरूप्यस्य सपक्षविपक्षावाश्रय इति किं नामैकरूप्यवतो हेतोस्तावाश्रयाविति स्या e'त्तदा चासाधारणाव्याप्तिः f'तत्र सपक्षे विपक्षे च हेतोरसत्त्वेन तदाश्रयत्वासंभवात् ॥

टी० ॥ इदमव्यापकमित्याह—। a"तदे"ति। साधारणानैकान्तस्य सपक्षविपक्षगतत्वादेव तदुभयनिष्ठाभावप्रतियोगित्वं तत्सम्बन्धाभाववत्त्वं वा नास्तीत्यर्थः उक्तदोषपरिजिहीर्षया पक्षान्तरं शङ्कते—। b"अथे"ति। हेतोरेकस्मिन्सपक्षे विपक्षे वा याद्रूप्यं यद्रूपत्वं सत्त्वमसत्त्वं वा ताद्रूप्यमपरस्मिन्सपक्षादौ

यस्मान्न तत्सपक्षविपक्षसाधारण्यमुच्यत इत्यर्थः एवं लक्षणाशिक्षाया फलमाह-। [e]"तथे"ति। सपक्षविपक्षयोरैकरूप्यं प्रति यदधिकरणत्वं सप्तम्या प्रतीयते तद्विवक्षितमुत लक्षणया तद्रूप्यवती हेतोस्तदाश्रयत्वं विवक्षितमिति विकल्प्य प्रथमं दूषयति। [d]"नैवमि"ति। हेतोरैकरूप्य हेतुधर्मत्वान्न तदन्यानिष्ठमित्यर्थः। तस्मात् द्वितीयः परिशिष्यत इति प्रश्नपूर्वकमाह। [e]"किमि"ति। अस्तु तथा वा कोदोष इत्यत आह-। [f]"तदे"ति। कुत इत्यत आह-। [g]"तत्रे"ति। तत्साधारणोदाहरणे इति यावत् सपक्षविपक्षयोरैकरूप्य नाम असाधारण्यामस्त्व तद्गतो हेतोर्न सपक्षादिनिष्ठत्वमित्यर्थः॥

मू० [a]"तस्मात्सपक्षे विपक्षे च साधारणत्वं हेतोरनैकान्तिकत्वमित्यनुपपन्नमेव [b]"असत्त्वपक्षे हेतोस्तदाश्रयकत्वानुपपत्त्या सपक्षे विपक्षे चेति सप्तमीनिर्देशस्यासङ्गतत्वा[c]त्तदभावापेक्षया चाश्रयत्वस्योपपत्तौ हेतोस्तदाश्रयत्वे किमायातम् [d]"आयातु वा किञ्चित्तथापि साधारणोदाहरणेषु हेत्वभावापेक्षया सपक्षविपक्षयोर्माश्रयता सप्तम्यर्थः [e]किन्तु हेत्वपेक्षयै वेत्यनेकार्थपर्यवसायित्वे वाक्यस्य लक्षणाव्यापकतापत्तिरेव॥

टी० ॥ सपक्षविपक्षसाधारणोनैकान्त इति लक्षणखण्डनं निगमयति-। [a]"तस्मादि"ति। संक्षेपविस्तराभ्यामुच्यमानं वस्तु मन्दबुद्धिबुद्ध्यारूढं भवतीति कथितमेव हेतुं सङ्क्षिप्याह-। [b]"असत्त्वे"ति। यद्यपि सपक्षादिसाधारण्यं तद्गतासत्त्वं ([1])हेतोर्नित्यसाधारणानैकान्तस्थले हेतोः सपक्षादिनिष्ठत्वं नास्ति तथापि तदभावस्य सपक्षाद्याश्रयत्वमस्तीत्यत आह-। [c]"तदि"ति। तदाश्रयत्वस्य सपक्षादेः सप्तम्यर्थस्य सम्भवेऽपि हेतोः सपक्षादिनिष्ठत्वे लक्षणप्रविष्टे न किञ्चिल्लभ्यते इत्यर्थः सपक्षादिनिष्ठाभावं प्रति प्रतियोगित्वं हेतोर्लाभ इत्यत आह-। [d]"आया-

(१)"तद्गताऽसत्त्वम्"-इत्यपि क्वचित्पाठः।

त्वि''ति। यद्यपि सपक्षविपक्षगतासत्त्वप्रतियोगित्वं हेतोर्विशेषणतयापि साधारणानैकान्तिकस्थलेषु सपक्षविपक्षयोर्हेत्वभावापेक्षया सप्तम्यर्थोऽधिकरणत्वं न भवति सपक्षविपक्षगामित्वादेव तस्येत्यर्थः कस्तर्हि सप्तम्यर्थोऽधिकरणत्वं तत्रेत्यत आह—। ''किन्त्वि''ति। सपक्षविपक्षयोरैकरूप्य हेतोरनैकान्त्यमिति वाक्यं साधारणोदाहरणविवक्षायां सपक्षादौ सत्त्वमैकरूप्यमितरत्र तदसत्त्वमेतावता प्रकृतलक्षणस्य को दोषस्तत्राह-। ''इत्यनेके''ति।

मू० "किञ्च सपक्षविपक्षसाधारणत्वं यदि सामान्यतो लक्षणं साधारणासाधारणानैकान्तिकभेदद्वयसङ्ग्रहार्थमुच्यते तदा सपक्षविपक्षयोरन्यत्वादिभिर्हेतोः साधारण्यमस्त्यन्यत्रापीत्यतिव्याप्तिः c * अथातिव्याप्तिपरिजिहीर्षयान्वयव्यतिरेकाभ्यां सपक्षविपक्षसाधारणमनैकान्तिकमित्युच्यते? *—d तदान्वयव्यतिरेकयोः प्रत्येकमिलितत्व(१)विकल्पानुपपत्त्याव्यापकत्वापातः e स्यादेतत् स्वस्वाभावविरोधाश्रयाश्रितसपक्षविपक्षत्वं f सपक्षविपक्षसाधारण्यं विवक्षित-

टी० ॥ सपक्षविपक्षयोः साधारणो हेतुरनैकान्तिक इत्येतावन्मात्रं लक्षणमुतान्वयादिना विशेषित इति विकल्प्य प्रथमकल्पमनुवदति—। a''किंचे''ति। अतिव्याप्त्यैतदपवदति—। b''तदे''ति। धूमवत्त्वादिहेतोः सपक्षाद्यपेक्षयान्यत्वसत्त्वाय-त्वादिभिः रूपैः सपक्षविपक्षयोः साधारण्यमस्तीत्यतिव्याप्तिरित्यर्थः द्वितीयं कल्पमुत्थापयति—। c''अथे''ति अन्वयेन सपक्षादिसाधारण्येऽसाधारणाव्याप्तिर्व्यतिरेकेण साधारण्यलक्षणस्य साधारणाव्यापकता मिलिताभ्यामुभाभ्यां साधारण्यस्य सर्वाव्याप्ति(१)रित्यभिसन्धाय दूषयति—। d''तदे''ति। उक्ताव्याप्त्यसम्भवपरिहाराय प्रकारान्तरं शङ्कते—। e''स्यादि''ति। स्वशब्देनानैकान्तिकाभिमतहेतुरुच्यते स्वं च स्वाभावश्च स्व-

(१) "मिलिते"ति क्वचित्पाठः।

स्वाभावौ तयोर्विरोधः स्वस्वाभावविरोधस्तस्याश्रयौ स्वस्वाभावविरोधाश्रयौ ताभ्या(२)माश्रितौ सपक्षविपक्षौ यस्य हेतोः स तथोक्तस्तस्य भावस्तत्त्वमनैकान्त्यमिति शेषः अभेदविरोधाश्रयभेदाश्रितसपक्षविपक्षत्व सर्वानुमानसाधारणमिति तद्वारणार्थं स्वेत्यादि विशेषेण सपक्षविपक्षसाधारणोऽनैकान्त इत्युक्तलक्षणपरित्यागाद्दुस्तरमित्यत आह—। "सपक्षे"ति ।

मू० "सैवं नाव्याप्त्यतिव्याप्ती इति "तदप्यसत् 'तथाहि अस्तु तावत्सर्वपदविशेषणोपादानानुपादानपक्षोक्तदोषापातः 'सर्वशब्दोपादाने धूमानुमानादौ प्रसङ्गश्च 'स्वस्वाभावविरोधशब्दार्थस्याप्येकस्यानुगतस्यासम्भवेन लक्षणानुगमाभावो दोषः 'तत्तद्भावयोर्हि विरोधः ।

टी० ॥ लक्षणवाक्ये कुटिलिकास्वीकारफलमाह—। ''एवमि''ति । भावाभावविरोधस्याश्रयभिन्नत्वाद्भावाभावद्वयमपि विरोधाश्रयत्वेनैकं भवति तेन प्रत्येकं भिन्नविकल्पानुपपत्तिर्नाप्यतिव्याप्तिः सद्धेत्वादौ सपक्षविपक्षयोरुक्तविरोधाश्रयाश्रितत्वाभावादित्यर्थः स्वशब्देन व्यक्तिपरामर्शेऽव्याप्तिः सामान्यपरामर्शेऽतिव्याप्तिः धूमादेः सपक्षविपक्षाभ्यामन्यत्वेन स्वस्वाभावविरोधाश्रयाश्रितसपक्षविपक्षत्वादिति दूषयति—। ''तदि''ति । असत्त्वमेव प्रकारान्तरेणोपपादयति—। '''तथाही''ति । सपक्षविपक्षयोर्विशेषणत्वेन सर्वपदमुपादीयते नवाद्ये विपक्षैकदेशगामिनं साधारणानैकान्तिकं न व्याप्नोति द्वितीये व्यतिरेकेण सपक्षविपक्षसाधारणतायाः सपक्षव्यापके सद्धेतौ धूमविशेषादौ गतत्वेनातिव्यापकमित्यर्थः भङ्ग्यन्तरमाह—। '''सर्वे''

(१) सर्वाऽव्याप्तिः—असम्भवः ।

(२) ताभ्यां—स्वस्वाभावविरोधाश्रयाभ्यां भावाभावाभ्यामाश्रितावालम्बिताविन्यर्थः ।

ति । अन्वयव्यतिरेकाभ्यां सपक्षविपक्षगतत्वाद् धूमादौ स एव प्रसङ्गः विशेषरूपेण तयोरविवक्षितत्वादित्यर्थः प्रागुक्तमेव दोषं स्मारयित्वा दोषान्तरं दर्शयति—। "स्वे"ति । असम्भवेनापीति सम्बन्धः कथं विरोधशब्दार्थस्यैक्यासम्भव इत्यत आह—। "तदि"ति । हेतुतदभावयोर्विरोधः सहानवस्थानं भावाभावविरोधस्य सहानवस्थानस्याङ्गीकारादित्यर्थः ॥

सू० सहानवस्थानमवस्थानं चावस्थानप्रतिषेधो नच तद्भावस्याभावस्वरूपादन्यत् नचाभावस्यानवस्थानं भावस्वरूपादन्यत् किन्तु तदेव भावस्वरूपं तत्र स्वस्वाभावविरोधाश्रय इत्यस्य नार्थैक्यं किञ्चिन्मृग्यमाणमवाप्यते स्वस्वाभावविरोधाश्रय इति वचनं विचारमर्हति स्वस्वाभावयो विरोधविशेषणतया आधेयकोटिनिवेशाद्विशेषणघटितमूर्त्तित्वाद्विशिष्टपदार्थस्य तदाधारत्वानुपपत्तेः ।

टी० ॥ एवं च विरोध एको न सम्भवतीति दर्शनाय तत्स्वरूपं दर्शयति—। "सहानवस्थानमि"ति । एकस्मिन् देशे काले च भावाभावयोः संसर्गोऽवस्थानं तदभावोऽनवस्थानमित्यर्थः अस्तु ततः किमित्यत आह—। "नचे"ति । भावस्य तदभावेन सहानवस्थानमभावस्वरूपादन्यन्न सम्भवति यत्राभावस्तत्र भावो नास्तीत्येकार्थत्वादित्यर्थः एवमभावस्यापीत्याह—। "नचे"ति । अभावस्याप्यनवस्थानं भावस्वरूपान्नान्यत्किन्तु भावस्वरूपमेवाभावाभावस्य भावत्वादित्यर्थः उपसंहरति—। "तत्रे"ति । स्वस्वभावाविरोध. स्वस्वभावावेव तयाच प्रत्येकमिलितविकल्पदोष इत्यर्थः स्वस्वाभावविरोधाश्रयत्वं स्वस्वाभावयोरभ्युपगम्यैतदुक्तं नच तत्सम्भवतीत्याह—। "स्वे"ति । स्वस्वाभावविशिष्टो विरोध उत विरोधाश्रयाश्रितसपक्षत्वादिलक्षणमुत स्वस्वाभावाभ्यामुपलक्षितत्वं विरोधस्येति विकल्प्य प्रथमे दूषणमाह—। "स्वे"ति । स्वस्वाभावयोस्तदाधारत्वानुपपत्तेरसम्भव इति सम्बन्धः तदुपपादनं—

''विरोधेत्यादि'' । तत्रापि हेतुं ''विशेषणे''ति । विशिष्टपदार्थस्य विशेषणघटितमूर्तित्वात् स्वस्वाभावविशिष्टविरोधस्य स्वस्वाभावाश्रयत्वे स्वस्वाभावयोरेवात्र स्ववृत्तिः स्यादित्यर्थः ॥

मू० "अतिव्यापकता च स्यात् "अन्वयमादाय सपक्षे व्यतिरेकमादाय विपक्षे वर्तमानस्याप्युक्तलक्षणोपेतत्वात् स्वस्वभावाविशेषितस्य तु विरोधस्याश्रयेऽभिधीयमाने सर्वानुमानव्यापकत्वमनैकान्तिकलक्षणस्यापतेत् *नच वाच्यं स्वस्वाभावोपलक्षितो विरोधोऽभिमतः तेन विशेषणपक्षोक्तदोषस्यानवकाश इति ? * यतः स्वस्वाभावाभ्यां विरोधमात्रं वा लक्ष्यते तद्व्यक्तिर्वा काचित् [g]आद्ये यदेव स्वस्वाभावाभ्यां लक्षितं विरोधमात्रं तदेवान्यत्रापीत्युक्तातिप्रसक्तिस्तदवस्थैव ॥

टी० ॥ न केवलमसम्भवोऽतिव्याप्तिरपीत्याह । ''अती''ति । अतिव्याप्तिमुपपादयति— ''अन्वयमि''ति । अनित्यः शब्दः कृतकत्वादित्यादेः सपक्षव्यापकस्यान्वयव्यतिरेकाभ्यां स्वस्वाभावविरोधाश्रयाश्रितसपक्षविपक्षत्वादित्यर्थः द्वितीयं दर्शयति— [c]''स्वे''ति । अभेदविरोधाश्रयभेदाश्रितसपक्षविपक्षत्वं सर्वानुमानसाधारणमित्यतिव्याप्तिरित्यर्थः स्वस्वभावाविशेषितस्य विरोधस्य सर्वानुमानव्यापकत्वमिति सम्बन्धः स्वस्वभावाभ्यामुपलक्षितत्व विरोधोऽभिप्रेयते तेन विशेषणपक्षोक्तस्वस्ववृत्तिदोषो नेति तृतीयकल्पमाशङ्क्याह— [d]''नचे''ति । कुत इत्यत आह— [e]''यत''इति । यत इत्यस्य विरोधव्यक्त्यनात्मत्वादित्यनेनोपरि सम्बन्धः हेतूपादानाय विकल्पयति— [f]''स्वे''ति । अविवक्षितविशेषं विरोधमात्रमुपलक्ष्यते किं वा विरोधव्यक्तिरेव काचिदित्यर्थः कस्मिन्सति किं स्यादित्यत आह— [g]''आद्ये''इति । विरोधमात्रस्योपलक्षितस्य

लक्षणनिविष्टत्वात्तस्य चैक्यादन्यत्र धूमानुमानादावपि विरोधा-
श्रयभेदाश्रितमपक्षविपक्षगत्वेनोक्ताव्याप्तिरित्यर्थः ॥

मू० 'स्वस्वभावपदोपादानवैयर्थ्यं च 'अथ द्वितीयस्तदा लक्षणाननुगमः 'एकस्य विरोधव्यक्तिविशेषस्याच परिगृहीतस्यापरविरोधव्यक्त्यनात्मत्वात् 'अथ यावत्येऽपेक्षिता विरोधव्यक्तयस्ता उपलक्ष्यन्ते इत्युच्यते 'किं नोपलक्ष्यन्ते तावत्यः 'किन्तु केनचिदनुगतेन रूपेण उत प्रतिस्वं व्यावृत्तेनात्मना 'प्रथमे तदेवोच्यतां किमुपलक्षणोपन्यासप्रयासेन नच तत्सम्भवति विरोधमात्रादेरतिप्रसञ्जकत्वात् 'प्रतिस्वं व्यावृत्तेन व्यक्तीनामात्मनोपलक्ष्यत्वे तथैव तासां लक्षणप्रवेश इति मिलितानां लक्षणत्वे सर्वाव्याप्तिः प्रत्येकं लक्षणत्वे परस्परोदाहरणाव्याप्तिरिति ॥

टी०॥ अव्याप्त्यतिव्याप्तिपरिहारफलत्वाभावात्स्वत्वा-दिविशेषणस्य विशेषणाभिद्ध च लक्षणमित्याह—। "स्वे"ति । द्वितीयं दूषयति—। "अथे"ति । अननुगमे हेतुमाह—। "एके"ति । एकैव तावद्विरोधव्यक्तिर्लक्ष्यते तस्याः साधारणानैकान्तिकाव्याप्तिस्तद्गतत्वे चेतराव्याप्तिरित्यर्थः । विरोधमात्रं नोपलक्ष्यते नाप्येकैव विरोधव्यक्तिः किन्तु साधारणासाधारणकृत्स्नानैकान्तिकोदाहरणेषु यावत्यो विरोधव्यक्तयोऽपेक्ष्यन्ते तावत्यः स्वस्वाभावाभ्यामुपलक्ष्यन्ते तेन नोक्तदोष इति शङ्कते—। "अथे"ति । अङ्गीकरोति—। "किमि"ति । उपलक्ष्यरूपं वेति शेषः । विवक्षितं दोषं दर्शयितुं विकल्पयति—। "किन्त्व"त्यादिना । अपेक्षिता व्यक्तयः केनचिदनुगतरूपेण गृहीता लक्ष्यन्ते इति प्रथममपाकरोति—। "प्रथमे" इति । व्यक्तीनां प्रत्येकमुपलक्ष्यत्वे विशकलितानामेव लक्षणे प्रवेशस्तथा च ता अपि यदि मिलिता विवक्षितास्तदा क्वचिदपि लक्षणं न सङ्गच्छेत लक्ष्यनिरूपत्वे साध्यं सत्त्वस्य च द्रव्यत्वस्य च व्यभिचारे सत्त्वतद्-

भावयोर्द्रव्यत्वतदभावयोर्वा विरोध एकत्र सम्भवति प्रत्येकविवक्षाया चाव्याप्तिरित्याह–। "‘प्रतिस्वमि”ति।

मू० स्यादेतत् "सपक्षे एवविपक्षे एव च वर्त्तते न यः सोनैकान्तिक इति लक्षणमस्तु" तेन साधारणासाधारणानैकान्तिकोदाहरणाव्याप्तिर्भवतीति एतदप्यलक्षणं सद्धेतौ धूमादावपि गतत्वात् न ह्यसौ विपक्षे एव वर्त्तते सर्वथा तत्रावृत्तेः नापि सपक्षे एव विपक्षेपि वर्त्तमानत्वात् '* अथ पक्षवृत्तिरिति विशेषयसि * तथापि सद्धेतोरपरित्यागः, पक्षवृत्तित्वादेव सपक्षे एव वृत्तेरभावात् "असिद्धानैकान्तिकत्वसङ्कराव्याप्तिश्च '* अथ पक्षव्यतिरिक्त इति सम्प्रक्षिपसि* ।

टी० ॥ "‘सपक्षे एवे”ति। सपक्षे एव वर्त्तते सद्धेतुर्विपक्षे एव वर्त्तते विरुद्धस्तदुभयव्यवच्छेदावधारणद्वयविशिष्टव्यवच्छेदात्सिद्ध इत्यर्थ.। "तेने”ति। नहि साधारण सपक्षे एव वर्त्तत विपक्षेपि वर्त्तमानत्वात् असाधारणस्य सपक्षविपक्षोभयव्यावृत्तेस्ताद्रूप्यमित्युभयसंग्रह इत्यर्थ. ॥ "‘पक्षवृत्तिरि”ति। पक्षवृत्ति.सन् य सपक्षमात्रवृत्तिर्न भवतीत्यर्थं सद्धेतावतिव्याप्तिरेव यत एव सद्धेतु पक्षवृत्तिरत एव च सपक्षे एव न वर्त्तते इति भाव ॥ "‘असिद्ध”ति। शब्दोऽनित्यश्चाक्षुषत्वादित्यत्र सामान्ये व्यभिचारिणि पक्षवृत्तित्वाभावादव्याप्तिरित्यर्थः ननु पक्षव्यतिरिक्तं विपक्षे एव न वर्त्तते सपक्षे एव न वर्त्तते इत्युक्तं पक्षपर्युदासेनावधारणे सद्धेतु सपक्षे एव वर्त्तत इति कुतस्तत्रातिव्याप्तिरिति शङ्कते–। "‘अथे”ति।

मू० "तदानी"मप्रसक्तव्यावर्त्तनमनुपपन्नं 'नहि पक्षाव्यतिरिक्तः सपक्षो विपक्षो वा सम्भवतीति सपक्षस्य विपक्षस्य च कुतश्चिदव्यावर्त्तकं विशेषणमेवेदं तयोः कथं घटेत "* अथ पक्षव्यतिरिक्ते वर्त-

शान इति विशेषयसि ? *-'तदानीमसाधारणाव्याप्तिर्नासौ पक्षव्यतिरिक्ते वर्तमानः'* अथ पक्षव्यतिरेकेणेति विशेषणमुपादत्से ? *-।

टी० ॥ पक्षव्यतिरिक्तत्व सपक्षस्य विपक्षस्य वा न विशेषण सम्भवति तयोः सर्वत्र पक्षव्यतिरिक्तत्वेन व्यभिचाराभावात् नहि व्यभिचारमन्तरेण विशेषत्वमर्थवत् यथा लोहितस्तक्षक इति व्यभिचारे सत्येव विशेषणस्य सार्थकत्वं यथा नीलमुत्पलमित्युत्पलत्वस्य रक्तोत्पलेनैव व्यभिचारादित्याह-।"तदानीमि"ति । "अप्रसक्तव्यावर्तनमि"ति । नहि सपक्षविपक्षयोः पक्षात्मकत्वं प्रसक्तं येन तदतिरिक्तत्वेन, विशेषणमर्थवत्स्यादित्यर्थं यद्यपि पक्षोपि सपक्षो भवति यथाय देवदत्ताभिन्नः देवदत्तनिष्ठसकलधर्मवत्वात् पूर्वदृष्टदेवदत्तवत् यथा वा पृथिवीत्वेनेतरभेदसाधने घटादिरेव सपक्षत्वेन दृष्टान्तः तथाप्यवच्छेदभेदेन([1])तत्रापि पक्षभिन्नत्वमिति भावः एतदेव विशदयति-। "नही"ति । ननु यः पक्षभिन्ने वर्तमानः सपक्षविपक्षमात्रवृत्तिर्न भवतीति पक्षेपि वर्तमाने सद्धेतौ नातिव्याप्तिरिति शङ्कते-। "अथे"ति । पक्षभिन्ने वर्तमानत्वमसाधारणानैकान्तिकाव्यापकमिति परिहरति-। "तदानीमि"ति । ननु पक्षव्यतिरिक्ते वर्तमानमसाधारणानैकान्तिके न सम्भवति तथापि पक्षव्यतिरेकेण यो हेतुः सपक्षे एव विपक्षे एव न वर्तते इति हेतुविशेषणे कुतोऽव्याप्तिर्योजना पक्षातिरिक्तवृत्तित्वमत्र नोपात्त सद्धेतुस्तु पक्षव्यतिरेकेण वर्तमानः सपक्षे एव वर्तते तेन न तत्रातिव्याप्तिरिति शङ्कते-। "अथे"ति । पक्षव्यतिरेकेणेति यदि हेतौ तृतीया तथापि नासाधारणसङ्ग्रहः नहि सपक्षविपक्षयोस्तु वृत्तिर्व्यतिरेक पक्षव्यतिरेक. साधारणाव्याप्तिरप्यत्र द्रष्टव्या ॥

सू० "तदापि पक्षव्यतिरेकस्य पक्षविरहरूपस्योपलक्षणत्वं हेतुत्वं वा द्वयमपि पक्षमात्रवृत्तावसाधारणा-

([1]) इदन्त्वपूर्वदृष्टत्वाद्यवच्छेदभेदेनेत्यर्थः ।

नैकान्तिके न सम्भवति पक्षविरहस्य तत्रासम्भवादेव निषेध्यविशेषणत्वे त्वस्य सद्धेतौ गमनं स्यात् [c]एतेन पक्षं विना पक्षमन्तरेणेत्याद्यक्षरैर्विशेषाभिधानमात्रमपास्तम् ।

टी० ॥ अथ पक्षव्यतिरेकेणेति लक्षणे([1]) तृतीया तथाप्य साधारणाव्याप्तिरेव नहि तस्य पक्षविरहोऽस्ति येनानावुपलक्षयेतेति परिहरति—। [a]"तद्यपी"ति । अथ पक्षव्यतिरेकेणेति न सङ्ग्राह्यस्य([2])विशेषणं येनासाधारणासङ्ग्रहः स्यादपि तु निषेध्यस्य व्यवच्छेद्यस्य विशेषण तथाच पक्षव्यतिरेकेण वर्त्तमानः सपक्षे एव वर्त्तते सद्धेतुः विपक्षे एव वर्त्तते विरुद्ध. तदुभयमत्र व्यवच्छेद्यमिति तद्विशेषणमेव पक्षव्यतिरेकेणेत्यत आह—। [b]"निषेध्ये"ति । एवमपि निषेध्यस्य सद्धेतोः पक्षव्यतिरेकेण वर्तमानत्वमस्तु विशेषण तथापि पक्षव्यतिरेकेण वर्तमानोऽप्यसौ सपक्षमात्रवृत्तिर्न भवत्येव यतः पक्षेपि वर्त्तमानवित्यतिव्याप्तिस्तदवस्थैवेत्यर्थः ॥ [c]"एतेने"ति । सङ्ग्राह्यविशेषणत्वे ऽसाधारणानैकान्तिकसङ्ग्रहः निषेध्यविशेषणत्वे तु सद्धेतुसङ्ग्रहोपीति दोषद्वयेनेत्यर्थ. ।

मू० * [a]अथ यदि पक्षव्यतिरिक्ते वर्तते तदा सपक्षे एव विपक्षे एव वर्त्तते न यः सोऽनैकान्तिकः तथा सत्यसाधारणस्यापि व्याप्तिः सद्धेतौ चाप्रसक्तिरिति मन्यसे ? *-तदा भ्रान्तोसि तराम् [b]एवं हि सति नोभयस्यापि सङ्ग्रहः असाधारणे तावद्यदि पक्षव्यतिरिक्ते वर्तते इत्येतन्न सम्भवति तस्य पक्षमात्रवृत्तेः कदाचिदपि पक्षव्यतिरिक्तवृत्तिसम्भावनानु-

(१) लक्षणे इत्यस्योपलक्षणे इत्यर्थः, "नहि अस्य पक्षविरहोऽस्ति येन (पक्षविरहेण) अयावुपलक्षयेत"-इत्यग्रे प्रतिपादनात् ; लेखकप्रमादाद्विगलितं वाऽक्षरद्वयम् ।

(२) सङ्ग्राह्यस्य = सद्धेतोरनैकान्तिकस्य ।

पपत्तेः साधारणेऽपि निश्चितपक्षविपक्षवृत्तौ यद्यर्थं न पश्यामः यदि पक्षव्यतिरिक्ते वर्त्तते इति ᶜन-हि निश्चितवृक्षभावायां शिंशपायां प्रयुज्यते यदि शिंशपावृक्षः स्यादिति तत्कस्य हेतोः

टी० ॥ ननु यद्यपि सद्धेतुः सपक्षे एव न वर्त्तते किन्तु पक्षे-पीति तत्रातिव्याप्तिस्तथापि पक्षव्यतिरिक्ते वर्तमानः सपक्षे एव वर्तते असाधारणानैकान्तिकश्च यद्यपि पक्षव्यतिरिक्ते न वर्तते तथापि पक्षव्यतिरिक्ते वर्तमानत्वं विशेषणं नोपादीयते येन तदसङ्ग्रहः स्यादपितु सम्भावनामात्रेणोद्भाव्यते इति शङ्कते—। ᵃ"अथे"ति एवं साधारणासाधारणानैकान्तिकयोर्द्वयोरप्यसङ्-ग्राहकमिदं लक्षणं भवेदसाधारणं तावत् पक्षव्यतिरिक्तवर्तमा-नता सम्भवनापदमपि कथं भवेत् सपक्षविपक्षव्यावृत्तस्यैवा-साधारणत्वात् साधारणानैकान्तिकस्तु सपक्षविपक्षवृत्तितयैव निश्चित इति पक्षातिरिक्तवृत्तितया सम्भावनापथं कथं स्यात् निश्चितसम्भावनाविरोधित्वादिति परिहरति—। ᵇ"एवं सती"-ति । यदिपदप्रयोगाभावेन निश्चयस्य सम्भावनाविरोधित्व-मेव दर्शयति—। ᶜ"नही"ति ।

सू० ᵃसंशयोपस्थापितात्कोटिद्वयादेकस्यां कोटौ तदाश्रये किञ्चिद्धर्मोपदर्शनार्थमारोप्यमाणायां यदीति प्रयु-ज्यते नतु निश्चिते एव वस्तुनि तस्मादसाधारणा-नैकान्तिकसङ्ग्रहाय यदीत्याद्युपात्तं तन्न साधार-णमपि समग्रहीत * ᵇअथ विपक्षे एव सपक्षे एव न वर्त्तते ये हेत्वाभासः सोनैकान्तिक इति लक्षण-मन्यसे ? *–तदप्यनुपपन्नम्, ᶜअनैकान्तिकत्वमनि-श्चितत्वाग्रत एव हेत्वाभासत्वावधारणे तत एव हेतोरसाधकत्वं सिद्धमिति कृतं तदुपजीविनानैका-न्तिकत्वोपन्यासेन * अथाग्रतो हेत्वाभासत्वं नाव-

धार्यते ? *-तदा लक्षणस्य दुरवधारणत्वं, विशेषणस्य हेत्वाभासत्वस्यानवधारणात् * "अथ ब्रूषे असिद्धविरुद्धप्रकरणसमकालात्ययापदिष्टादन्यो हेत्वाभासोऽनैकान्तिक इति ? *-तदप्युक्तन्यायेनैव निरस्तम् ।

टी० ॥ यत्रैव सम्भावना तत्रैव यदि पदप्रयोगो यत्र तु निश्चयस्तत्र न तत्पदप्रयोग इत्यन्वयव्यतिरेकाभ्यां निश्चयस्य सम्भावनाविरोधित्वमेवेति दर्शयति-। "सपक्षोपस्थापितादि"ति । असाधारणानैकान्तिके सपक्षविपक्षोभयव्यावृत्तत्वनिश्चयादेव न पक्षातिरिक्तवृत्तित्वसम्भावना साधारणानैकान्तिके तु पक्षातिरिक्तवृत्तित्वनिश्चयादेव न सेति समुदायार्थः ननु हेत्वाभासत्वेन विशेषणीयं लक्षणं तथाच कथं सद्धेतुसङ्ग्राहकं स्यादिति शङ्कते-। "अथे"ति । हेत्वाभासत्वस्य प्रथमं ज्ञाने तत एवासाधकत्वं सिद्धं तदज्ञाने तु तद्गर्भलक्षणमपि दुरवधारणमेवेति परिहरति-। "अनैकान्तिकत्वमि"ति । ननु पञ्चसु हेत्वाभासेषु चतुर्भिन्नत्वं लक्षणमस्तु तच्च यद्यपि सद्धेतावप्यस्ति तथापि तद्वारणाय हेत्वाभासत्वेन विशेषणीयमिति शङ्कते-। "अथ ब्रूषे" इति । अत्रापि हेत्वाभासत्वग्रहदशायामनुपपत्तिरेवेति परिहरति-। "उक्तन्यायेने"ति ॥

मू० "किञ्च एवमप्यसिद्ध्यादिसङ्कीर्णस्यानैकान्तिकस्यासङ्ग्रहः स्यात् * "नच तदसिद्धादित्वादेवाहेतुर्भविष्यतीति वाच्यम् ?*-इतरानैकान्तिकवद्विपक्षगतत्वादिनाप्युद्भावने ऽदोषत्वप्रसङ्गात्(१) *अथ मन्यसे साधारणत्वासाधारणत्वयोर्व्यतिरेकाभ्यां विशिष्टादन्यत्वं साधारणासाधारणानैकान्तिकत्वाद्विसामान्यलक्षणमस्तु ?*-मैवम् "यदि व्यतिरेकद्वयविशिष्टा-

(१) "दोषत्वसम्भवात्" इति क्वचित्पुस्तके पाठः सोऽपि साधुरेव ।

दन्यत्वं तर्हि तस्य विशिष्टस्य विशेष्ये विशेषणे चेदमस्तीत्यतिव्याप्तिः ।

टी० ॥ असिद्धाद्यन्यत्वमसिद्धादिसङ्कीर्णानैकान्तिके नास्तीति तत्राव्याप्तिमाह—। "किञ्चे"ति । ननु तत्रासिद्धत्वादिकमेव दोषोऽस्तु तथाच तस्यानैकान्तिकत्वासङ्ग्रहेपि न क्षतिरित्यत आह—। "नचे"ति । असिद्धत्वाद्युस्फुरणदशायां विपक्षवृत्तित्वोपन्यसमानादपि तस्मादनुमितिप्रतिबन्धादनैकान्तिकत्वमवश्यं तस्यापीति तदपि तव सङ्ग्राह्यमेवेत्यर्थः ननु साधारणत्वासाधारणत्वधर्मद्वय यत्र वर्तते तदन्यत्वमनैकान्तिकत्वं तथाच तदुभयात्यन्ताभाववति सद्धेतौ हेत्वाभासान्तरे च नातिव्याप्तिः यत्र चानैकान्तिकसाङ्कर्यं तस्यापि च सङ्ग्रह इति शङ्कते—। "अथे"ति । साधारणत्वासाधारणत्वव्यतिरेकद्वयं विशेषणं तद्वांश्च सद्धेतुर्विशेष्यस्तयोरपि व्यतिरेकद्वयविशिष्टादन्यत्वमस्त्येव नहि विशेषणमात्रं विशिष्टं नापि विशेष्यमात्रं तथेति तदुभयातिव्याप्तिरिति परिहरति—। [a]"यदी"ति । विशिष्टस्य यद्विशेषणं व्यतिरेकद्वयं यच्च विशेष्यं सद्धेतुस्वरूपं तत्रापि तदन्यत्वमस्तीत्यर्थः ॥

मू० [a]यदि च व्यतिरेकद्वयवतोपलक्षणं [b]तदोपलक्ष्यस्वरूपाणां यदि भेदैनैवोपलक्ष्यता [c]तदा व्यतिरेकोप्यविशिष्टे तस्मिन्नस्ति [d]नहि यदेवाविशिष्टं तन्मात्रं विशिष्टं एव([1])मभेदेनापि [e]*भेदाभेदात्तदेवातदपि?*—इति चेन्न अतदपीति प्रसङ्गतादवस्थ्यात् ।

टी० ॥ ननु व्यतिरेकद्वयेन सद्धेतुना च विशेषणविशेष्यभावो न विवक्षितो येन विशिष्टान्यत्वं विशेषणविशेष्ययोः स्यादपितूपलक्षणोपलक्ष्यभावस्तथाच नातिव्याप्तिरिति शङ्कते-। [a]"यदी"ति । व्यतिरेकद्वयोपलक्षितत्वं सद्धेतूनां तदन्यत्व लक्ष-

(१) उपलक्ष्योपलक्षणयोरभेदपक्षेपि भेदवहिर्मुखमभेदमादायाह—एवमिति, अतदपि तदेवेत्यन्वयः । उपलक्षणान्यदपि उपलक्षणमेवेति तदर्थः । तथाच नातिप्रसङ्गः ।

णमित्यर्थः नहि मद्भावातिव्याप्तिस्तदवस्थैव व्यतिरेकद्वयोपलक्षितत्वविशिष्टात्मद्वैतोरविशिष्टस्य मद्वैतोरन्यत्वादिति परिहरति—। [b]"तदे"ति । भेदेनेत्युपलक्ष्योपलक्षणयोर्भेदेनेत्यर्थः ॥ [c]"तदा व्यतिरेक" इति । तदन्यत्वमित्यर्थः अविशिष्टे केवले तस्मिन्सद्धेतौ ननु व्यतिरेकद्वयोपलक्षितान्यत्व कथं केवले इत्यत आह—। [d]"नहीं"ति । ननु व्यतिरेकद्वयोपलक्षितत्वविशिष्ट एव केवलोपि तथाच तदन्यत्व तत्र कथं स्यादुपलक्ष्योपलक्षणभावानुरोधाद्भेदोप्यस्तु तथाच यदेवाविशिष्टं तदेव विशिष्टमपीति शङ्कते—। [e]"भेदाभेदादि"ति । भेदे सत्यभेदो भेदाभेदस्तस्मादित्यर्थः द्वन्द्वसमासे द्विवचनप्राप्तेः एकवद्भावो वैकल्पिकः भेदाभेदपक्षेपि भेदपक्षमादाय विशिष्टान्यत्वमविशिष्टेस्तीति नैवातिव्याप्तिरित्यर्थः ।

सू० [a]ततोऽत्यन्तान्यत्वं लक्षणम् ? *—इति चेन्न, [b]असिद्ध्यादिसंकीर्णानैकान्तिकोदाहरणाव्यापनात् [c]स्वरूपाणां चा[d]नन्त्येन तत्प्रतियोगिकान्यत्वावधारणस्याशक्यता तेषामानन्त्यात् तन्मध्यपतितकतिपयान्यत्वे चान्यच कतिपये प्रसङ्गतादवस्थ्यात् ।

टी० ॥ ननु व्यतिरेकद्वयविशिष्टादत्यन्तभिन्नत्वं लक्षणं तच्चाविशिष्टे सद्धेतौ न गतमित्याह—। [a]"तत" इति ॥ [b]"असिद्ध्यादी"ति । व्यतिरेकद्वयोपलक्षितादसिद्धादेः सङ्कीर्णानैकान्तिकस्यात्यन्तभेदाभावात्तदव्याप्तिरित्यर्थः यद्यपि सङ्कीर्णानैकान्तिकस्यात्यन्तभेदाभावात्तदव्याप्तिरित्यर्थः यद्यपि सङ्करस्थले व्यतिरेकद्वयोपलक्षितत्वं विशिष्टत्वं वा न सम्भवति तत्र साधारणत्वासाधारणत्वयोरन्यतरस्यैव सम्भवात् तथापि ताद्वयावृत्तोपलक्ष्यतावच्छेदकाभावादिदमुक्तं येषु व्यतिरेकद्वयोपलक्षितत्वं यान्यु तेषामैकरूप्याभावात्तावत् प्रतियोगिकान्यत्वमनैकान्तिके दुर्ग्रहमित्याह—। [c]"स्वरूपाणामि"ति । अशक्यत्वे हेतुमाह—। [d]"आनन्त्यादि"ति । सकलसङ्ग्राहकैकरूपाभावेन ताव-

(१) एकंरूपम् ।

तामनुपस्थितेरित्यर्थः नच सद्धेतुत्वमेव "तथा तदवच्छिन्नप्रतियोगिकाभावस्य सर्वहेत्वाभासनिष्ठत्वेनातिव्याप्तेरनैकान्तिकादिभिन्नत्वेन सद्धेतुत्वं सद्धेतुभिन्नत्वेनानैकान्तिकत्वं लक्षणीयमित्यन्योन्याश्रयाच्चेति भावः ॥ ""तन्मध्ये"ति । अन्यत्वप्रतियोगिमध्यपतितकतिपयव्यक्तिभिन्नत्वं तत्रैव कतिपयव्यक्तिषु गतमित्यतिव्याप्तिरित्यर्थः ।

सू० "उपलक्षणत्वे चोभयव्यतिरेकस्यान्यत्वप्रतियोगिकोट्यप्रवेशेन तत्सङ्गृहीत[1]व्यतिरेकपक्षतापाता[b]देवं चादृष्टवाणादिनापि गोत्वादेवम्भूताद्घ्राणादिविषाणित्वानुमानौचित्यापातात् ॥

टी० ॥ ननु साधारणत्वासाधारणत्वव्यतिरेकद्वयोपलक्षितत्वमेवानुगतमन्योन्याभावप्रतियोगितावच्छेदकमस्तु तथाच नोक्तदोष इत्याशङ्क्य निराकरोति—। [a]"'उपलक्षणत्व"इति । व्यतिरेकद्वयोपलक्षितत्वं व्यतिरेकद्वये तावन्न सम्भवति अभेदेनोपलक्ष्योपलक्षणभावाभावात् तथाच व्यतिरेकद्वयोपलक्षितादन्यत्वं व्यतिरेकद्वयेति व्यापकं तथाच साधारणव्यतिरेको. साधारणव्यतिरेकोऽनैकान्तिकः स्यादन्यत्वं ह्यन्योन्याभावस्तत्प्रतियोगिकोटौ चेद्व्यतिरेकद्वयं न प्रविष्टं[2]तदा व्यतिरेकद्वयोपलक्षितान्यत्ववतो व्यतिरेकद्वयस्यानैकान्तिकलक्षणरूपव्यतिरेकिणः पक्षतापत्तिस्तत्राप्यनेन लक्षणेनेतरभेदः सिद्ध्येदित्यर्थः किञ्च यदि व्यतिरेकद्वयविशिष्टान्यत्वमनैकान्तिकलक्षणं तदा येन पुरुषेण सुरभिभिन्नं गोपदवाच्यं न दृष्टमस्ति तस्य गोत्वेन गोपदवाच्यत्वेन हेतुना वा वागादेरपि विषाणित्वं सिद्ध्येत्तेन गोत्वस्याभावत्वेनाग्रहात् न हि गोत्वं साधा-

---

(१) तेन लक्षणेन सङ्गृहीतो यो व्यतिरेकः(=इतरभेदरूपं साध्यं) तदीया पक्षता स्यादित्यर्थः ।

(२) व्यतिरेकद्वयस्याऽन्योन्याभावकोटिप्रविष्टत्वेहि स्वस्मिन्स्वभेदाभावेन व्यतिरेकद्वयोपलक्षितान्यत्वं न स्यादिति न प्रविष्टम्'—इति विकल्पावतारः ।

रणानैकान्तिकत्वेन गृहीतं वागादेरदर्शनेन तद्विपक्षत्वस्यानिश्चयात् नाप्यसाधारणतया शब्दादे. सपक्षाद्व्यावृत्ते न च वाधादेवायमहेतुः पक्षस्यादृष्टत्वेन(१) साध्याभाववत्तया ऽप्रमिते. सपक्षवृत्तेर्विरुद्धत्वासम्भवादित्याह–। b"एव चे"ति । केचित्तु यद्यन्यत्वगर्भं लक्षणं स्यात्तदा वागत्वसुरभित्वात्यन्ताभावद्वयविशिष्टान्यत्वेन पक्षदृष्टान्तसाधारणेन वागस्य विषाणित्वमपि सिद्ध्येदित्यर्थ इत्याहुः ।

सू० a"हेत्वाभासान्तरमप्येवं किं न समग्राहीतिवासनायां यदेवानयोरितरेभ्यो वैधर्म्यं वाच्यं तस्यैव लक्षणस्य निर्वचनापत्तिरिति असिद्धत्वादिप्रकारादन्येन प्रकारेण हेत्वाभासोनैकान्तिकइति चेत् b"वाच्यस्तर्हि स प्रकारः कस्यान्यथा 'ततस्ततोन्यत्वं ज्ञेयम् ॥

टी० ॥ यथा साधारणासाधारणौ द्वौ हेत्वाभासौ कथञ्चिदनुगतेन रूपेण लक्ष्येते तथा हेत्वाभासान्तरमप्यन्तर्भाव्यानैकान्तिकत्वं कथं न निरुक्तमित्याकाङ्क्षायां हेत्वाभासान्तरवैधर्म्यमनयोर्यद्वाच्य संशयफलकत्वादि तदेव लक्षणमस्तु किमनेनेत्याह–। "हेत्वाभासान्तरमि"ति । तथाच(२)साधारणासाधारणयोरपि पृथगेव हेत्वाभासत्वमस्तु किं पंचधाविभागेनेति भावः ॥ b"वाच्य"इति । उक्तानां प्रकाराणां दूषितत्वादित्यर्थ. ॥ c"ततस्तत"इति । असिद्धविरुद्धादि प्रकारादित्यर्थः तथाच येन प्रकारेणान्यत्व स एव लक्षणमस्तु किमनेनेति भावः

सू० a"किंच एवं तर्ह्यसिद्धत्वादन्यदनैकान्तिकमिति कृत्वा b"विरुद्धत्वादीनामनैकान्तिकत्वेनैव सङ्ग्रहे शक्ये विरुद्धादिवद्रूपान्तरासङ्ग्रहयोः साधारणासाधारणयोरेव यदनेन प्रकारेण सङ्ग्रहमकार्षीस्तत्र नियत

(१) अदृष्टत्वेन=पूर्वमननुभूतत्वेन, अनुभूतत्वं तु अनुमितिकाले एव ।
(२) तथाच=हेत्वाभासान्तरस्याऽसङ्ग्रहे च, तद्वत्साधारणासाधारणयोरप्यसङ्ग्रहः स्यादित्यर्थः ।

क्वचिदेव भवतो नियन्त्री [c]यदा चासिद्धादिव्यतिरिक्ततयानैकान्तिकं लक्षयसि तदासिद्धादिभेदकं प्रकारमनवगम्य तदन्यत्वमशक्यावधारणमिति तदभिधाने प्रसक्ते तदाश्रया ये दोषा दर्शितास्तैः [d]स्मृतिव्यतिरिक्तत्वोक्तदोषैश्च निराकर्त्तव्योसि [e]साध्येनाव्याप्तत्वे सति तदभावाव्याप्तोनैकांतिक इत्यपि न साध्याविशिष्टेपि गतत्वात् ॥

टी० ॥ असिद्धान्यत्वेन चतुर्णामैक्यं कथं न कृतमित्यनुयोगे विरुद्धादीनां प्रातिस्विकः प्रकारो यथास्ति तथा साधारणासाधारणयोरेकं रूपं यद्यस्ति तदा तदेवाभिधीयतां किमनेन लक्षणेनेत्याह—। [a]"किञ्चे"ति ॥ [b]"विरुद्धादिवदि"ति । यथा साध्याभावव्याप्तत्वं विरुद्धे । तथा साधारणासाधारणयोरुक्तप्रकारादन्यः प्रकारो नास्ति उक्तश्च दूषित एवेत्यर्थः किञ्चासिद्धादिभिन्नोनैकान्तिक इति लक्षणमसिद्धत्वादिज्ञानसापेक्षं तथाचासिद्धत्वादिकं दूषितं यैर्दोषैस्तेप्यत्र लक्षणे स्युरित्याह—। [c]"यदा चे"ति ॥ [d]"स्मृती"ति । स्मृत्यन्यज्ञानत्वमनुभवत्वमिति लक्षणे स्मृत्यन्यत्वं स्मृत्यन्तरेस्तीत्यादि खण्डनमत्र सञ्चार्यमित्यर्थः ॥ [e]"साध्येने"ति । प्रथमविशेषणेन सद्धेतुनिराकरणं द्वितीयेन विरुद्धस्य शब्दोऽनित्यः अनित्यत्वादित्यत्र लक्षणमिदमतिव्यापकमभेदेन साध्याव्याप्यत्वाभावादिति भावः ॥

सू० [a]विशेषणीभूतसाध्याव्याप्यत्वावगमाच्च प्राथमिकाव्याप्यत्वासिद्धिरेवोपजीव्या दूषणं स्यात् [b]विशेषणांशस्यैव वा साधकत्वसाधनसामर्थ्याद्व्यर्थविशेष्यतापि [c]वस्तुगतिव्यापकवन्मात्रपर्यवसायिनि तदभाववन्मात्रपर्यवसायिनि वा तत्काल [d]संदिग्धमात्रान्यतरव्यापकत्वे शब्दो नित्यः श्रोत्रगुणत्वादित्यादावसाधारणेपि व्यावृत्तत्वाच्च वस्तुतः साध्याव्याप्ते

तत्कालेपि च सत्प्रतिपक्षतया अनिर्द्धारितसाध्या-
व्याप्तिके प्रकरणसमे गतत्वाच्च एतेनानैकांतिकः
सव्यभिचार इत्यप्ययुक्तं वेदितव्यं सव्यभिचारस्योक्त-
प्रकाराधिकस्य निर्वक्तुमशक्यत्वादिति ॥

टी० ॥ नन्वभेदेपि व्याप्तिलक्षणमस्त्येवेत्यनुशयेन दोषान्तरमाह—। [a]"विशेषणीभूते"ति । साध्याव्याप्यत्वमात्रस्यैवासिद्धत्वस्य दूषणसामर्थ्ये तदभावाव्याप्यत्वस्याप्रयोजकत्वादिति भावः अबाधकतानुमाने व्यर्थविशेष्यत्वं चेत्याह—। [b]"विशेषणांशस्ये"ति । सद्धेतौ दशाविशेषेऽसाधारणे विरुद्धे च दशाविशेषेऽसाधारणेऽव्याप्तिरित्याह—। [c]"वस्तुगती"ति । आदिपदादाकाशमनित्यमाकाशत्वादित्युपग्रहः नन्वनयोः साध्यव्याप्यत्वं साध्याभावव्याप्यत्वं च यथासङ्ख्यमस्त्येवेत्यसाधारणता न सम्भवतीति कथमव्याप्तिरित्यत आह—। [d]"सन्दिह्यमाने"ति । अगृह्यमाणव्याप्तितया त्वयैव दशाविशेषे तदसाधारणत्वव्यवस्थापनादित्यर्थः श्रोत्रगुणत्वादिति श्रोत्रविशेषगुणत्वादित्यर्थः ॥ [e]"वस्तुत"इति । यद्यपि साध्याव्याप्तत्वे सति साध्याभावाव्याप्तत्वं ज्ञानगर्भं न लक्षणं येन सत्प्रतिपक्षेतिव्याप्तिः स्यात्तथापि दशाविशेषे व्यभिचारिणीव यत्र सत्प्रतिपक्षत्वं तत्रातिव्याप्तिरित्यर्थः यद्वा साध्यव्याप्यत्वेनाज्ञायमानत्वे साध्याभाववत्त्वेनायमानत्वं लक्षणमभिप्रेत्यैतदुक्तम् ।

सू० [f]"अपिच उक्तलक्षणविशेषणेन प्रमाव्यवच्छेदकादन्येन किं व्यवच्छेद्यं केनचित्सत्प्रतिपक्षः केनचिदन्य इति चेत्कः पुनः सत्प्रतिपक्षः यथाहि सत्प्रतिपक्षलक्षणमनुयुक्तो यद्याह समानबलेन बोधितसाध्यविपर्ययको हेतुत्वेनाभिमतः सत्प्रतिपक्ष इति तन्न तथाहि किमिह बलं विवक्षितं सामर्थ्यमिति चेत्तत्कुत्र कार्येऽभिमतं न ताव[b]त्सर्वस्मिन्कार्ये [c]सत्प्रतिपक्षहेत्वोर्भिन्नविषयबुद्ध्यादिजनकतया सर्वकार्ये सम-

शक्तितायाः असम्भवात् [d]नापि यत्र क्वचित्कार्ये प्रकृतं साध्यं प्रति प्रतीयमानासिद्धत्वादिदोषेणापि प्रमेयत्वप्रतिपादनादौ समर्थेन प्रतिहेतुना सत्प्रतिपक्षताप्रसक्त्यासर्वहेतूनां शक्यप्रकारणसमहेत्वाभासत्वापत्तेः नापि पूर्वहेतुसाध्याभावबोधनरूपे कार्ये ॥

टी० ॥ पूर्वापरखण्डने सङ्गमयितुं पीठमारचयति–। [a]"अपि चे"ति ॥ समानं बलं यस्य तेन हेत्वन्तरेण बोधितः साध्यविपर्ययो यस्य स सत्प्रतिपक्ष इत्यर्थः ॥ सर्वस्मिन्नि"ति । यद्यपि सर्वकार्यसामर्थ्यमेकस्यापि हेतोरसम्भवि किं पुनरुभयोस्तथापि यत्र यस्यैकस्य सामर्थ्यं तत्र सर्वत्र यस्य सामर्थ्यं तेन बोधितसाध्यविपर्ययत्वमित्यर्थः कृतकत्वश्रावणत्वयोः शब्दानित्यत्वनित्यत्वसाधकयोरेकत्र कार्ये सामर्थ्याभावेनासत्प्रतिपक्षत्वं स्यादित्याह–। [c]"सत्प्रतिपक्षहेत्वोरि"ति । ननु तयोरपि प्रमेयत्वसाधने शक्तिरस्त्येव भवति हि शब्दः प्रमेयः श्रावणत्वात्कृतकत्वाद्वेति प्रकृते कथं नानयोः सत्प्रतिपक्षत्वमित्यत आह–। [d]"नापी"ति । एवं सति शब्दोऽनित्यः सत्त्वात् शब्दो नित्यः कृतकत्वादित्यनयोरपि स्फुटप्रतीयमानव्यभिचारविरुद्धत्वयोर्मिथः सत्प्रतिपक्षत्वं स्यात् द्वयोरपि प्रमेयत्वसिद्धौ समर्थत्वादित्यर्थः ॥

सू० [a]उत्तरहेतोरेवमसत्प्रतिपक्षत्वे स्वसाध्यसाधकत्वापत्तेः [b]*प्रतिहेतोः ? *–इति चेन्न, [c]तत्र तत्प्रतिहेतोरसामर्थ्यादेव समशक्तिकत्वानुपपत्तेः [d]इत्यमेव न हेतुसाध्यस्य विपर्ययबोधनेऽपि * [e]अथोच्यते स्वकीये स्वकीये प्रकृतसाध्ये यत्सामर्थ्यं पक्षसत्त्वविपक्षव्यावृत्तत्वाबाधितत्वलक्षणं तत्सत्प्रतिपक्षहेत्वोस्तुल्यं तदभिप्रायेणेदं समबलत्वाभिधानं तेनेदमुक्तं भवति पक्षसपक्षसत्त्वविपक्षव्यावृत्तत्वाबाधितविषयत्वैस्तु-

त्येन बोधितसाध्यव्यतिरेकः सत्प्रतिपक्ष इति ?
*-नैतदपियुक्तं ॥

टी० ॥ ᵃ"उत्तरहेतोरि"ति । नहि पूर्वो हेतुः पूर्वहेतुसाध्याभावबोधनसमर्थो येन प्रतिबद्ध उत्तरहेतुः साध्यं न साधयेदित्यर्थः नतु पौर्वापर्यं न विवक्षितं किंतु प्रतिहेतुसाध्याभावबोधनं द्वयोरपि समं कार्यमिति द्वयोरपि सत्प्रतिपक्षत्वमित्याह–। ᵇ"प्रतिहेतोरि"ति । तत्रापि हेत्वोः प्रतिस्वं विश्रान्तमेव परस्परसाध्याभावबोधनं न तूभय साध्यमेकं कार्यमिति समबलत्वाभावेन द्वयोरसत्प्रतिपक्षत्वापत्तिरित्याह–। ᶜ"तत्रे"ति । ननु हेतुसाध्यबोधनं(१)द्वयोरपि कार्यं तुल्यमित्यत आह–। ᵈ"इत्यमेवे"ति । हेतोर्यत्साध्यं तद्बोधनमपि भिन्नमभिन्नं वेति नोभयोस्तत्र सामर्थ्यमित्यर्थः ननु बलं पक्षसत्त्वादि यस्य तुल्यं तद्बोधितसाध्यविपर्ययकत्वं लक्षणमस्तु तत्र यद्यपि विपक्षः सपक्षो वा नोभयोरेकस्तथापि स्वीयस्वीयेति विशेष्यतामित्याशङ्कते–। ᵉ"अथे"ति ॥

सू० ᵃप्रतीयमानभागासिद्धत्वेनापि प्रतिहेतुना सत्प्रतिपक्षत्वप्रसङ्गात् कियत्यपि पक्षे सत्त्वेनास्य पक्षसत्त्वाभावात् ᵇनचैष्टव्यमेव भागासिद्धेन सत्प्रतिपक्षत्वं प्रतीयमानदोषान्तरेणापि तथा सति सत्प्रतिपक्षत्वस्येष्टव्यत्वापत्तेः हेत्वाभासान्तरत्वाविशेषात् * ᶜन च स्वपक्षे इति कृते नायन्दोष ? *–इति वाच्यं, यत्रैक एव पक्षः ᵈप्रतिहेतौ तस्य सत्प्रतिपक्षस्याव्यापनात् ᵉतत्र पक्षस्य सर्वशब्दार्थत्वाभावादेव स्वप-

(१) अत्र हेतुसाध्यबोधनपदं मौलिकहेतुसाध्यविपर्ययबोधनपदार्थसमानार्थकं, स्वसाध्यसाधकस्यैव हेतोरपरहेतुसाध्यविपर्ययबोधकत्वात्, अतो न व्याख्याव्याख्येययोर्वैयधिकरण्यं पाठाशुद्धिर्वा ऽऽभावनीया ।

सपक्षसत्त्वाभावेनोक्तलक्षणानुपपत्तेः [f]एतेन यावदित्यपि पक्षविशेषणे दोष उक्तप्रायः ॥

टी० ॥ अज्ञायमानदशायां भागासिद्धेनापि सत्प्रतिपक्षतेत्यत आह—। [a]"प्रतीयमाने"ति ननु भागासिद्धस्यापि भागान्तरे साधकत्वेन सत्प्रतिपक्षता स्यादित्यत आह—। [b]"नचे"ति । हेत्वाभासत्वाविशेषेण व्यभिचारित्वेन ज्ञातेनहि सत्प्रतिपक्षता तथा सति स्यात् भागासिद्धस्य भागान्तरेपि न साधकत्वं हेतुलक्षणायोगादित्यर्थः ननु पक्षसत्त्वमात्र न विवक्षितं किंतु सर्वपक्षसत्त्वमिति न भागासिद्धे प्रसङ्ग इत्यत आह—। [c]"नचे"ति । सर्वपदस्यानेकाशेषवाचकतया आकाशं नित्यं विभुत्वात् आकाशमनित्यं विशेषगुणवत्त्वे सति महत्त्वादित्यादेः सत्प्रतिपक्षता न स्यादित्यर्थः । [d]"प्रतिहेतावि"ति । प्रतिहेत्वोरित्यर्थः तदेव विशदयति—। [e]"तत्रे"ति ॥ [f]एतेने"ति । सर्वपदवद्यावत्पदस्याप्यनेकाशेषवाचकत्वादित्यर्थः ॥

सू० [a]किञ्चान्वयव्यतिरेकिणः केवलव्यतिरेकिणा केवलव्यतिरेकिणश्चान्वयव्यतिरेकिणा सत्प्रतिपक्षे लक्षणमिदं नास्ति सपक्षसत्तया तुल्यतायास्तत्राभावात् * [b] न च सपक्षसत्तया तुल्येनेति लक्षणे तदनुरोधान्न कर्त्तव्यमेव * तथासति असाधारणानैकान्तिकतया निश्चितेनापि सत्प्रतिपक्षत्वप्रसङ्गात् * [c]नचान्वयव्यतिरेकिणैवान्वयव्यतिरेकिणः केवलव्यतिरेकिणैव केवलव्यतिरेकिणः सत्प्रतिपक्षता न व्यत्यासेनापीति नियमोऽभ्युपगन्तुं शक्यः [d]उभयोरप्यनवगम्यमानदोषान्तरत्वदशायामेकसम्बन्धिनो दोषस्यावश्यं भवितव्यैकतरस्य(१)व्याप्यत्वपक्षधर्मत्वावगमो

(१) केषुचित्पुस्तकेषु "अन्तरस्य'—इति पाठः ।

मे भ्रान्तिरिति(१)बुद्धिमाधाय प्रतिपित्तुर्निश्चयोत्पत्तिप्रतिबन्धमाधातुं *

टी० ॥ पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वानि पञ्चरूपाण्यन्वयव्यतिरेकिमात्रे केवलान्वयिनि विपक्षाप्रसिद्ध्या विपक्षावृत्तित्वं नास्ति केवलव्यतिरेकिणि सपक्षवृत्तित्वं नास्ति तथा चैकरूपहीनतया हीनबलत्वेन सत्प्रतिपक्षत्वं तत्र न स्यादित्याह–।[a]"किञ्चेति। ननु सपक्षसत्त्वेनापि तौल्यं न विवक्षितं येन व्यतिरेकी हीनबलः स्यादित्यत आह–।[b]"नचे"ति। तदविवक्षायां निश्चितासाधारण्येऽपि सत्प्रतिपक्षता स्यादित्यर्थः नन्वु यावन्ति रूपाणि यस्य तस्य तावद्रूपसम्पन्नेनैव सत्प्रतिपक्षत्वमस्तु नतु व्यत्यासेनेत्यत आह–।[c]"नचे"ति। केवलान्वयिनि केवलान्वयिनैवेत्याशङ्कायां (२) पूरणीयं व्यत्यासेनापि सत्प्रतिपक्षतायाः सम्भवान्नायं नियम इत्याह–।[d]"उभयोरि"ति। एकसम्बन्धिनो दोषस्येत्यादि बुद्धिविषयस्योपवर्णनं भ्रान्तिरिति बुद्धिमाधायेति सम्भावनामात्रेणोक्तं नत्वेतदावश्यकं कतरोऽत्र व्याप्त इति जिज्ञासाफलकत्वात् सत्प्रतिपक्षस्य निश्चयोत्पत्तिप्रतिबन्धकतायामेव तात्पर्यात् ॥

मू०[a]"केवलव्यतिरेकिण्यन्वयव्यतिरेकिणोऽन्वयव्यतिरेकिणि च केवलव्यतिरेकिणः(३)प्रतिहेतोः समर्थत्वस्य दुरपवादत्वात् [b]एतदेव च सत्प्रतिपक्षस्य दोषत्वाभ्युपगमे मूलं यन्नाम व्याप्तिपक्षधर्मताप्रमितिरस्मिन् सति न भवितुमर्हति * [c]अथाभिधत्से पक्षसपक्षासत्त्वविपक्षाव्यावृत्त्यबाधितविषयत्व [d]योगिना बोधित-

(१) इति प्रतिपत्तुर्बुद्धिमाधाय (तस्य) निश्चयोत्पत्तिप्रतिबन्धमाधातुमिति सम्बन्धः। (२) आशङ्कायाम्=केवलान्वयिनि केन सत्प्रतिपक्षत्वम्?—इत्याशङ्कायाम्। आशङ्कायां केवलान्वयिनि केवलान्वयिनैवेति पूरणीयमिति सम्बन्धः। (३) केवलव्यतिरेकिणाऽन्वयव्यतिरेकिणोऽन्वयव्यतिरेकिणा च केवलव्यतिरेकिणः"—इत्यपि बहुषु ग्रन्थेषु दृश्यमानः पाठो युक्त एव।

साध्यविपर्ययः सत्प्रतिपक्ष इति *, न, निरस्तप्रायत्वात् [e]पक्षपदे सर्वशब्दविशेषणप्रक्षेपपक्षोक्तदूषणस्य केवलव्यतिरेकिण्यव्यापकत्वस्यापि भावात् ॥

टी० ॥ [a]"केवलव्यतिरेकिणी"ति । केवलान्वयिन्यपि व्यत्यासो योज्यः भ्रान्तिरिति बुद्धिमाधायेत्यंशमपहाय पर्यवसन्नं दूषकतामूलमाह—। [b]"एतदेव चे"ति ॥ [c]"अथाभिधत्स" इति । तुल्यबलत्वगर्भलक्षणे किम्बलमितिजिज्ञासायां पूर्वं पक्षसत्त्वाद्युक्तमिदानीं स्वतन्त्रमेव लक्षणान्तरमाशङ्कितमित्यपौनरुक्त्यं—। [d]"योगिने"ति । योगित्वेन ज्ञायमानेनेत्यर्थः अन्यथाऽसम्भवात् निरासप्रकारमेव स्फुटयति—। [e]"पक्षपदे"इति । प्रक्षेपे यत्रैक एव पक्षः तत्र सत्प्रतिपक्षाव्याप्तिः रप्रक्षेपे भागासिद्धेनापि सत्प्रतिपक्षत्वप्रसङ्ग इत्यर्थः केवलव्यतिरेकिणीत्युपलक्षणं केवलान्वयिनीत्यपि द्रष्टव्यम् अनयोः सपक्षसत्त्वविपक्षव्यावृत्तिविरहस्य यथासम्भवमभावादित्यर्थः ॥

मू० [a]किंच सोपाधिकमसिद्धभेदं वदतां मते सोपाधितया निश्चीयमानेपि सर्वं यथोक्तमिदं लक्षणमस्तीति तेनापि सत्प्रतिपक्षता स्यात् * अथ ब्रूषे [b]असिद्धत्वविरुद्धत्वानैकान्तिकत्वाबाधितविषयत्वहीनेन बोधितसाध्यासत्वः प्रकरणसम इति * नैतदपि सुस्थम्, [c]आपाततोस्फुरद्दोषेण वस्तुगत्या चासिद्ध्यादिदोषवता सत्प्रतिपक्षतास्वीकारात्तदव्यापकत्वात् [d]किञ्च विरुद्धार्थगोचरयोः सत्प्रतिपक्षाहेत्वोर्मध्येऽवश्यमन्यतरस्यासिद्ध्यादिदोषेण भवितव्य(१)मन्यथा धर्मिणो विरुद्धधर्माध्यासप्रसंगात् ॥

टी० ॥ [a]"किंचे"ति । अनौपाधिकत्वं व्याप्तिरितिमते

---

(१) उभयोरपिव्याप्तत्वपक्षधर्मत्वाभ्यां मितरवाच्यद्वैतुल्ये किंनस्यादित्यत आह—अन्यथेति—उभयोरपि यद्धेतुत्वे नित्यानित्यत्वलक्षणविरुद्धधर्मसम्बन्धाद्धर्म्मिभेदप्रसङ्ग इत्यर्थः ।

सोपाधित्वमेव व्याप्तिविरहस्तथा चोपाधिर्विपक्षसत्त्वोन्नायक-
तया न दोषः किंतु व्याप्तिविरहरूपतयैव तथाच सोपाधित्वे-
नापि स्थाप्यमानस्य प्रतिहेतोः पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्त्य-
बाधितत्वानि रूपाणि सन्तीति तेनापि सत्प्रतिपक्षता स्यादि-
त्यर्थः एतदर्थमेवासिद्धभेदं वदतामित्युक्तमुपाधेर्व्यभिचारोन्नाय-
कतापक्षे नायं दोषः तत्र विपक्षव्यावृत्तेरभावादित्यर्थः॥ [b]"अ-
सिद्धत्वे"ति । सोपाधौ तु नासिद्धत्वहीनत्वमिति न तेन सत्प्र-
तिपक्षत्वमिति भावः अव्यापकत्वं लक्षणदोषमाह-।[c]"आपा-
तत"इति । आज्ञायमानासिद्ध्यादिदोषवता सत्प्रतिपक्षे तद्धीन-
त्वं नास्तीति तत्राव्याप्तिरित्यर्थः लक्षणे सम्भवदोषमाह-।
[d]"किञ्चे"ति । सद्धेतुना सद्धेतुरेव सत्प्रतिपक्षितो न भवति-
धर्मिणो विरुद्धद्विरूपत्वोपपत्तेः (१)तथाचैकतरेणावश्यमाभासेन
भवितव्यमित्यसिद्ध्यादिदोषहीनेन लक्षणमसम्भवीत्यर्थः॥

मू० "तत्रैकस्य व्यवच्छेद्यदोषानिश्चयात् प्रतिहेताव-
प्यसिद्धत्वादिशङ्कायामापतितायामसिद्ध्यादिही-
नेनेति लक्षणांशस्यानिश्चयात् लक्षणस्य दुरवधा-
रणत्वं * [e]"नच वाच्यं किमर्थं सत्प्रतिपक्षहेत्वोरन्य-
तरस्यासिद्ध्यादिकमवश्यमभ्युपेयं सत्प्रतिपक्षताल-
क्षणदोषदुष्टत्वादेव तयोर्न धर्मिणो विरुद्धधर्माध्य-
स्तत्वमापत्स्यते इति * (२)यतोऽवश्यं दुष्टे हेतौ
व्याप्तेः 'पक्षधर्मताया वाऽभावेन भवितव्यं [f]तत्स-
त्ताभ्युपगमे साध्यसत्ताया अप्यभ्युपगमप्रसङ्गात् ॥

टी० ॥ ननु द्वितीयहेतोरसिद्ध्यादिराहित्येऽपि सत्प्रतिप-
क्षता भवत्येवेति कथमसम्भव इत्यत आह-। [a]"तत्रैकस्ये"ति ।
तथापि द्वितीयस्यासिद्ध्यादिविरहित्वं दुर्ज्ञानमित्यसम्भव एव

---

(१) वर्णा नित्या ऽवन्यन्यत्वे सति श्रावणत्वाच्छब्दत्ववत् वर्णा अनित्याः सामान्यवत्त्वे सति श्रावणत्वात् ध्वनिवदित्यनयोः प्रतिहे-त्वोरेकतरेणावश्यमसिद्धेन भवितव्यमित्यर्थः । (२) कुतो न वाच्यमि-त्यत आह—यत इति—

लक्षणदोष इत्यर्थः नतु वस्तुद्वैरूप्यापत्तिभयेनैकतरस्याभाव-त्वमवश्यं वाच्यं तच्च द्वयोः सत्प्रतिपक्षितत्वेनैव सिद्धमित्यसि-द्धत्वादिसत्वमनावश्यकमित्यत आह–। [b]"नच वाच्यमि"ति। [c]"पक्षधर्मताया वे"ति। शब्दोऽनित्यः सामान्यवत्वे सति चाक्षुष-त्वादित्यादाविवत्यर्थः। [d]"तत्सत्त्वे"ति। व्याप्तिपक्षधर्मतोभय-सत्वाभ्युपगम इत्यर्थः॥

मू० * [a]बाधादीनामप्युपाधिरव्यापनादिद्वारा व्याप्त्या-दिभङ्गे एव पर्यवसाना[b]त्सत्प्रतिपक्षत्वादुन्नीयमा-नोपि व्याप्तिपक्षधर्मताभङ्गो न विशिष्यैकस्मिन् हेतौ निर्णेतुं शक्यः * अन्यतरस्मिन् व्याप्त्यादि-भङ्गेनापि सत्प्रतिपक्षत्वस्योपपत्तेः(१)अतो विशेष-निष्ठतया तदुन्नयने स्थिते यदि साक्षादसाववधार्यते तदानीमसिद्धिः अथ लिङ्गेनोन्नीयते, तदा नैकान्तिकादेरन्यतमं दूषणं वस्तुगत्यास्ति सत्प्रतिपक्षे तत्कथमसिद्ध्याद्यन्यतमं नाभ्युपेयं तत्त

टी० ननु बाधे व्याप्तिपक्षधर्मतयोर्नैकतरस्यापि भङ्गोऽथ च न वस्तुसिद्धिरित्यत आह–। [a]"बाधादीनामि"ति। बाधे पक्षेतरत्वोपाधेरावश्यकत्वादुपाधौ चावश्यं व्यभिचारादित्यर्थः नन्वेवं यत्र व्याप्तिपक्षधर्मतान्यतरभङ्गनिश्चयस्तेनहीनबलेन सत्प्रतिपक्षः कथं स्यादित्यत आह–। [b]"सत्प्रतिपक्षत्वादुन्नीय-मान"इति। स्यादेवं यदि विशेषनिष्ठतया दोषः स्फुरेत्त्वेव-मित्यर्थः अनयोरन्यतरदुष्टं सत्प्रतिपक्षत्वादित्यविशेषेण दोष-वत्त्वमात्रनिश्चये कुत्र तदिति विशेषजिज्ञासायां यत्र लिङ्गानु-सन्धानमन्तरेण व्याप्तिपक्षधर्मतयोरन्यतरभङ्गनिश्चयस्तत्रासिद्धिः यत्र तु विरुद्धत्वानैकान्तिकत्वादिना व्याप्तिपक्षधर्मतान्यतरभङ्ग-

(१) ननु तु विशेषेण वोन्नयनं किं तावता प्रकृते स्यादित्यत आह-अत इति-अविशेषनिष्ठतयेति पदच्छेदः–। हेतुप्रतिहेत्वोरन्यतरमात्र-निष्ठतया व्याप्त्यादिभङ्गोन्नयने स्थिते इत्यर्थः।

मानं तत्रोपजीव्यत्वेन विरुद्धाद्यन्यतमस्य हेत्वाभासत्वमिति-वस्तुगतिकथनमात्रम् ।

मू० [a]"तस्मात्तस्य दोषस्य कुत्र द्वयोर्मध्येऽस्तित्वमस्तीत्यन्यतरानिर्धारणे प्रतिहेतावपि तच्छङ्कायां सत्यामसिद्ध्यादिहीने वेति लक्षणांशस्य दुरवधारणत्वं दुःपरिहरमेव [b]स्यादेतत् अस्तु लक्षणांशस्यासिद्ध्यादिहीनत्वस्यानिश्चयः संशयोऽपि तदावस्ति तत्संशयेन शङ्कितसत्प्रतिपक्षतादोषग्रस्तत्वादेवासाधकत्वे दूष्यानुमानस्य शङ्कितोपाधाविवासिद्धिशङ्कया [c]* नच यामसिद्ध्याशङ्कामुपजीव्य सत्प्रतिपक्षताशङ्कादोषः स्यात् सैव तदादोष इति ? *—वाच्यं असिद्ध्यादिशङ्काया एव तादृशप्रतिहेतुदर्शनमूलकतया तदुपजीवकत्वादिति मैवम् ॥

टी० ॥ ननु प्रथम(१)मेव दुष्टमस्तु तथाप्यसिद्ध्यादिहीनेन (२)शोधितसाध्याभाव: सत्प्रतिपक्ष इति लक्षणं सुग्रहमेवेत्यत आह—। [a]"तस्मादि"ति । यद्यपि द्वयोरपि परस्परं सत्प्रतिपक्षत्वमेव अन्यथान्यतरस्यानुमापकत्वं स्यादिति द्वितीयानुमाने तदवधारणत्वाभिधानमयोग्यं तथापि तेनैव रूपेण (३)लक्षणाकरणात्तथोक्तं नन्वसिद्ध्यादिहीनत्वानिश्चये तद्गर्भं सत्प्रतिपक्षत्वं मा निश्चीयतां सन्देहस्तु स्यादेव तथाच सन्दिह्यमानसत्प्रतिपक्षत्वमसाधकत्वसाधनसमर्थं हेत्वाभासान्तरं सिद्धमेवेति शङ्कते—। [b]"स्यादेतदि"ति । ननु सन्दिह्यमानसत्प्रतिपक्षत्वमप्यसिद्ध्यादिदोषसन्देहाधीनमित्यसिद्ध्यादिदोषसन्देहादसाधकत्वं सिद्धं किं शङ्कितसत्प्रतिपक्षत्वेन हेत्वाभासान्तरेणेत्यत आह—। [c]"नचे"ति । प्रतिहेतूपस्थितिं विना स्थापना-

(१) प्रथममित्यतोऽग्रे 'साधनमि'ति शेषः । (२) अत्र 'प्रतिहेतुना' इति शेषः । (३) द्वितीयानुमानगताऽसिद्ध्यादिहीनेनैव रूपेणेत्यर्थः ।

हेतौ नासिद्ध्यादिसन्देह इति प्रतिपक्षस्यैवोपजीव्यत्वेन दोषत्वमित्यर्थः ॥

मू० [a]यतः शङ्कितोपाधिनाऽसिद्धेनाप्येवं सत्प्रतिपक्षता प्रसज्येत [b]* ननु भवत्वेवमपि तेन किं नाम भवेत् [c]तस्यासिद्धतया हीनबलस्य सिद्ध्यादिमता पक्षबाधं विधूय न किञ्चिदन्य[d]द्बाधादेव तर्हि न तेन सत्प्रतिपक्षता ? *—इति चेन्न, [e]सन्दिह्यमानासिद्धतया सत्प्रतिपक्षहेतोरपि तर्हि कथं परहेत्वसाधकत्वप्रसाधकत्वं भविष्यति ॥

टी० ॥ यथा प्रतिहेतूक्तदोषवतापि सत्प्रतिपक्षत्वं तथा स्वरमत एव यत्रोपाधिसन्देहस्तादृशेनापि सत्प्रतिपक्षत्वं स्यादित्याह—। [a]"यत" इति । ननु निश्चितोपाध्यादिदोषवता सत्प्रतिपक्षो नेष्यते सन्दिग्धदोषेण त्विष्यत एवेत्याह—। [b]"नन्वि"ति । सन्दिग्धोपाधिरपि यत्र प्रतिहेतुरुपन्यस्यते तत्र तस्य हीनबलत्वेन बलवता स्थापनानुमानेन बाध्यतेति तत्साध्यविपरीत(१)प्रमाजननात्प्रतिहेतोः पक्षबाध एव स्यादित्याह—। [c]"तस्यासिद्धतये"ति । ननु तत्र बलवता स्थापनानुमानेन प्रतिहेतोः साध्य बाधितं चेत्तदा शङ्कितोपाधिना सत्प्रतिपक्षत्वं यदापादितं तन्न स्यादेवेति शङ्कते—। [d]"बाधादेवे"ति । स्वारसिकसन्देहविषयोपाधिमता यथा न सत्प्रतिपक्षत्वं हीनबलत्वात्तथा प्रतिहेतूपस्थितिसन्दिह्यमानासिद्ध्यादिमतापि भवदभ्युपगतेन कथं सत्प्रतिपक्षता स्यात् दोषसन्देहस्य हीनबलत्वाप्रयोजकस्योभयत्रापि तुल्यत्वात् तथा चेदमसाधकं सत्प्रतिपक्षत्वादितिहेतुना स्थापनानुमानस्यासाधकतासाधनं न स्यादित्याह—। [e]"सन्दिह्यमाने"ति ॥

मू० हे[a]त्वाभासत्वाविशेषात् * [b]हेत्वाभासान्तरं न दोषसंशयापादकमतो नैवम् ? *—इति चेन्न, [c]तर्हि यमु-

(१) साध्यहेतुसाध्यविपरीतेत्यर्थः ।

पाधिमुपादाय न्यूनबलतया बाध्यता त(1)मादायैव तथाविधोपाधेर्दोषसंशयक्षमत्वादेव ।

टी० ॥ ननू पाधिसन्देह एव हीनबलवत्ताप्रयोजको नत्वसिद्ध्यादिसन्देहोपि तथाच सन्दिह्यमानासिद्ध्यादिदोषवता भवति सत्प्रतिपक्षत्वं नतु स्वारसिकसन्देहविषयोपाधिमतेत्यत आह–। a"हेत्वाभासत्वाविशेषादि"ति । ननु येन दोषेण सोपाधित्वादिना त्वया हीनबलस्य सत्प्रतिपक्षत्वमापाद्यते स दोष. संशयापादको न भवति प्रतिपक्षस्त्वनयोरन्यतरदुष्टमित्याकारेण संशयापादक इति कथं न हेत्वाभास इत्याह–। b"हेत्वाभासान्तरमि"ति । स्वारसिकसन्देहविषयो यत्रोपाधिस्तत्रापि तेना-(2)सिद्ध्यादिसन्देह आपादयितुं शक्यत एवेति न विशेष इत्याह–। c"तर्ही"ति । यद्वा असाधकतानुमितौ सत्प्रतिपक्षत्वं हेतुरसिद्धस्तद्धि दोषशून्येन प्रतिहेतुना बोधितसाध्यविपर्यत्वं नचात्र दोषशून्यत्वमित्यत आह–। d"सन्दिह्यमाने"ति ॥ "हेत्वाभासत्वे"ति । सन्दिग्धोपाधिवत्सत्प्रतिपक्षत्वस्यापि सन्दिग्धासिद्ध्या हेत्वाभासत्वाविशेषादित्यर्थः ॥ "हेत्वाभासान्तरमि"ति । सन्दिग्धोपाधिरूप हेत्वाभासान्तरं न सत्प्रतिपक्षत्वसन्देहापादकमधिकबलप्रथमहेत्वपेक्षया हीनबलत्वात्सत्प्रतिपक्षस्तु सत्प्रतिपक्षत्वरूपदोषसन्देहापादक इति सन्दिग्धोप्यय दोषो भविष्यतीत्यर्थः ॥ "तर्ही"ति । उपाधिसन्देहेन प्रत्यनुमानस्य सन्दिग्धासिद्धिदोषापादकत्वेन सत्प्रतिपक्षसन्देहापादकत्वात् सत्प्रतिपक्षेप्यसिद्धिसन्देहस्य सत्वादित्यर्थः ॥

मू० aकिञ्च क्वचित्सत्प्रतिपक्षत्व निश्चयाभावे संशयानुपपत्तिः b * अथान्यथाकारंलक्षणमभिधत्से असिद्धिविरोधव्यभिचारकालात्ययापदेशविरहितया प्रजीयमानेन बोधितो यदीयसाध्यस्य विपर्ययः सप्रकरणसम इति ? *–एतदपि न विचारसहं(3)केन तथा प्र-

(1) तम्=बाध्यमानम् । (2) तेन=उपाधिना ।
(3) विचारासहत्वं कथमित्यत आह-केनेति ।

तीयमानत्वमभिमतं किम्प्रत्यनुमानप्रयोक्त्रा १ अथ-प्रथमानुमानवादिना २ द्वाभ्यामपि वा ३ येन केन-चिद्वा ४ [c]न तावदाद्यः स्वयं दोषं जानतोपि दूष-णान्तरापरिस्फूर्त्तौ यद्यस्य(१)दोषं न प्रति सन्धा-स्यति तदानीमभीष्टमेवाप्यप्रतिसन्धास्यति तदा-नीमन्यथापि ममास्फुरद्दोषान्तरस्य पराजयोनेन कक्षान्तरारूढायाङ्कथायां शाखान्तरं वा सङ्क्रमि-तुमवकाशमासादयिष्यामीत्यभिप्रायवतोऽल्पप्रज्ञस्य मयि वदत्यसत्यक्षोपि निर्वहतीति लोके प्रकर्षप्र-दर्शनार्थं कथमपि ग्रन्थकारादिभिरुक्तस्य वा तथा-विधप्रतिहेतोर्निर्वाहार्थमन्यानुयुक्तस्य (२)प्रौढप्रज्ञ-स्य स्फुटदोषेणापि प्रतिहेतुना सत्प्रतिपक्षकरण-दर्शनात् ।

टी० ॥ किञ्च सत्प्रतिपक्षत्वसन्देहोपि तथा स्याद्यदि सत्-प्रतिपक्षत्वं क्वापि निश्चीयेत कोटिनिश्चयं विना संशया-नुपपत्तेः प्रकृते तूक्तरीत्या सत्प्रतिपक्षत्वनिश्चयो नास्त्वेवे-त्याह—। [a]"किञ्चे"ति । नन्वसिद्धत्वादिराहित्यं वास्तवं न विवक्षितमपि तु तद्वत्तया प्रतीयमानत्वमात्रं तथा च नास-म्भवो न वा दुरवधारणत्वमिति शङ्कते—। [b]"अथे"ति । असि-द्ध्यादिदोषवत्तया निश्चीयापि प्रतिहेतुवादिना सत्प्रतिपक्षकर-णादव्यापकतेत्याह-।[c]"नतावदि"ति। यद्यस्येत्याद्यल्पप्रज्ञाभि-प्रायवर्णनमपि वदतीत्यादिप्रौढप्रज्ञाभिप्रायवर्णनमयं दुष्टत्वेन ज्ञायमानोपि हेतुस्त्वया निर्वाह्यतामित्यन्येनानुयुक्तस्येत्यर्थः ॥

(१) "यद्ययम्"-इत्यपि पुस्तकान्तरे प्रतीयमानः पाठः साधुरेव ।

(२) उदस्तपक्षितस्यापीत्थं भूतहेतुना सत्प्रतिपक्षीकरणं दृश्यते इत्यत आह-प्रौढेति-प्रौढा प्रज्ञा यस्य स प्रौढप्रज्ञस्तस्येत्यर्थस्तथा च प्रौढत्वं प्रज्ञाविशेषणं तच्च नव नवोन्मेषशालित्वमधिकपदार्थावगाहित्वं वेति भावः ।

मू० [a]तत्र परेण दोषानुद्भावने जयस्यापि भावात् [b]किञ्च प्रतीयमानता यदि निश्चीयमानता विवक्षिता तदानीमसम्भव एव यतो विरुद्धार्थयोरेकस्यावश्यं दोषः (१)स च कस्यास्त्विति तदा निर्द्धारयितुमशक्यतया प्रतिहेतावपि तत्संशयादप्यसम्भावना प्रतीयमानता [c]तत्रोद्भावनसम्भावनां दूषयन्तीयद्रूक्ष्याम(२)स्तदेव दूषणमतिदेष्टव्यं नापि द्वितीयतृतीयचतुर्थाः(३) [d]परबुद्धेर्दुरवधारणतया परस्यासिद्ध्यादिविरहित्वबुद्धिरत्रभविष्यतीत्यग्रेवधारयितुं प्रमाणाभावेनाशक्यत्वात् [e]कथं सत्प्रतिपक्षतां प्रतिज्ञाय व्युत्पादयेत् [f]शङ्कान्तरं चात्र निरसिष्यामः।

टी० ॥ एतादृशहेतोरुपन्यासफलमाह—। [a]"तत्रे"ति। असिद्ध्यादिदोषरहिततया निश्चीयमानत्वं न सम्भवति सत्प्रतिपक्षस्थले द्वयोरपि दोषवत्तया सन्दिह्यमानत्वादित्याह—। [b]"किञ्चे"ति। असिद्ध्यादिदोषराहित्येन समाठ्यमानेन बोधितमाध्यविपर्ययत्वमिति कृते प्रतिहेतोर्दोषराहित्यमभ्युपगम्य संभावनां निवर्त्य सत्प्रतिपक्ष(४)मुद्धरेदित्याह—। [c]"तत्रोद्भावने"ति ॥ [d]"परबुद्धेरि"ति। असिद्ध्यादिदोषरहितत्वेन मत्प्रयुज्यमानः प्रतिहेतुरन्येन प्रत्येतव्य इति ज्ञातुमशक्यत्वादित्यर्थः ॥ [e]"कथमि"ति। असिद्ध्यादिदोषरहितत्वेन त्वया प्रतीयमनोयमिति व्युत्पादनमशक्यमित्यर्थः ॥ ननु स्वार्थानुमाने स्फुरितस्य प्रतिहेतोः स्वयमेवासिद्धिदोषरहितत्वेन प्रतीयमानत्व सम्भवति किन्तु वस्तुगत्या प्रतिसाधने दोषो नास्ति-

---

(१) स दोषोवादिप्रयुक्तहेतुनिष्ठतया निश्चीयत इत्यत आह—स इति—। (२) वक्ष्यामः—"यद्युद्भावनकालात्पूर्वकालिकी सम्भावना विवक्षिता तदा तात्कालिकाऽनुद्भावनपक्षोक्त एव दोषोऽतिदेष्टव्यः"—इत्यादि ग्रन्थेन। (३) वादिप्रयुक्तहेतोस्सत्प्रतिपक्षतां प्रतिज्ञाय कथं तां व्युत्पादयेत्कथं वा नेत्यत आह—परेति—परबुद्धेरप्रत्यक्षत्वेनेत्यर्थः। (४) उद्धरेत्—खण्डयेत्।

यत्र तत्र तादृश्यैव निश्चयः सम्भवति किन्त्वसिद्ध्यादिदोषरहितोयमिति शब्दादपि निश्चेतुं शक्यते इति नत्रैव सत्प्रतिपक्षः सावकाशः स्यादित्यत आह–। f"शङ्कान्तरमि"ति। प्रतीतेर्निश्चयरूपत्वे सम्भावनारूपत्वे वा दोषतादवस्थ्यादिति भावः।

मू० एतेनासिद्धिविरोधकालात्ययापदेशव्यभिचारवत्तया व्याप्तिपक्षधर्मताविरहवत्तया वाऽगृह्यमाणेन बोधितसाध्यविपर्ययः सत्प्रतिपक्ष इति निरस्तं a"केन वाऽगृह्यमाणत्वमिति निर्वक्तुमशक्यत्वात्(१)b किंच सर्वेषामेवैषां लक्षणानां धर्म्या(२)दिग्राहकानुमानबाधितेपि गतत्वादतिव्यापकत्वम् c एतेन स्वार्थानुमाने तदाभासेपि वा सत्प्रतिपक्षस्य दोषत्वमपोढम् * अथोच्यते अगृह्यमाणविशेषण बोधितसाध्यविपर्ययः प्रकरणसम इति ? *–अस्तु तत्केनागृह्यमाणत्वमित्यादिविकल्पदोषाभिधानं

टी० ॥ एतेनेत्यस्यातिदेश्यमेव दर्शयति–। a"केने"ति। किन्त्वीश्वरो न कर्त्ता शरीरत्वादित्यादि क्षितिः सकर्तृक कार्यत्वादित्यादिना धर्मिग्राहकमानेनासिद्ध्यादिदोषरहिततया प्रतीयमानेन सत्प्रतिपक्षितं स्यात्तथा चातिव्याप्तिरित्याह–। b"किञ्चेति। न चेष्टापत्तिः तत्राधिकबलत्वेन बाधहेत्वाभासाभ्युपगमादिति भावः॥ c"एतेने"ति। धर्मिग्राहकमानबाधस्थलेतिव्यापकत्वेनेत्यर्थः॥

---

(१) उक्तलक्षणत्रयस्य साधारणं दूषणमाह-किञ्चेति-परमाणुः सावयवः-संयोगित्वात्-घटवत्-इत्येतस्मिन्-अणुपरिमाणतारतम्यम्-क्वचिद्विश्रान्तम्-परिमाणतारतम्यभावत्वात्-महत्परिमाणतारतम्यवत्-इत्यनेन धर्म्मिग्राहकेण बाधितेपि गतत्वादतिव्यापकत्वं धर्मिग्राहकप्रमाणस्योपजीव्यत्वेन व्याप्तिपक्षधर्म्मवत्त्वस्यौकास्त्र्द्वहितत्वेन ज्ञायमानत्वस्यासिद्ध्यादिरहिततया समानबलवत्त्वस्य लक्षणत्रयस्य भावादित्यर्थः–। इति-विद्यासागराः। (२) आदिपदेन लिङ्गग्राहकसंग्रहः।

मू० [a]यदि यः कश्चिद्विशेषो विशेषशब्देनाभिप्रेतस्तदा तद्ग्रहणं क्वचिदपि नास्तीति सर्वाव्याप्तिः * अथ हेतुदोषलक्षणो विशेषोभिमतः? *—[b]तदा धर्म्यादिग्राहकानुमानबाधितेपि गतत्वादतिव्यापकता [c]अगृह्यमाणहेतुदोषरूपविशेषेण बोधितसाध्यविपर्ययत्वात्तत्रापि तस्य] हेतुदोषस्याभावादेवागृह्यमाणविशेषत्वात् * [d]नचागृह्यमाणपरमार्थस्थितहेतुदोषरूपविशेषेणेतिकृते निस्तारः * तथा सति सत्प्रतिहेतुकः सत्प्रतिपक्षो हेतुर्न व्याप्येत [e]परमार्थतस्तिष्ठतीति च दर्शनीयं नच ज्ञेयमिति महती प्रज्ञा ॥

टी० कृतकत्वश्रावणत्वयोरुपाधिद्वयविशेषग्रहवत् (१)सर्वत्रविशेषग्रहणसम्भवादगृह्यमाणस्य (२)यत्किञ्चिद्विशेषत्वमसम्भवीत्याह—। [a]"यदीति"। [b]"तदा धर्म्यादी"ति। नहि तत्र हेतुदोषो गृह्यमाणो नापि तेन प्रत्यनुमानसाध्यविपर्ययो न बोध्यत इत्यर्थः ननु यदि तत्र दोषः स्यात्तदा तदगृह्यमाणत्वं भवेदित्यत आह—। [c]"अगृह्यमाणे"ति। यत एव धर्मिग्राहकानुमानहेतुदोषो नास्त्यत एव तस्यागृह्यमाणत्वं विवक्षितमित्यर्थः नतु विद्यमानदोषस्यागृह्यमाणत्वं विवक्षितं नत्वविद्यमानस्येत्यत आह—। [d]"नचे"ति। तथा सति निर्दोषप्रतिहेतुना सत्प्रतिपक्षे व्याप्तिरित्यर्थः किन्तु सत्प्रतिपक्षत्वं व्युत्पादयता दोषस्य विद्यमानत्वे सत्यगृह्यमाणत्वं वक्तव्यं तथा च विरोध इत्याह-। [e]"परमार्थे"ति॥

मू० * [a]नचागृह्यमाणहेतुदोषहेतुगुणरूपविशेषेणेति विवक्षिते निस्तारः * व्यतिरेकिणि अन्वयव्यतिरेकिणा सत्प्रतिपक्षे हेतुगुणरूपो विशेषः सपक्षासत्वलक्षणो गृह्यते इति तदव्यापकत्वापत्तेः [b] * अथागृह्यमा-

(१) कृतकत्वत्व श्रावणत्वत्व रूपोपाधिद्वयात्मक विशेषग्रहवदित्यर्थः। (२) अगृह्यमाणयत्किञ्चिद्विशेषत्वमिति पाठस्तु युक्तः।

व्याप्तिपक्षधर्मताभङ्गाभङ्गरूपविशेषेणेति यदि क्रियते * तदा प्रष्टव्यं किमपेक्ष्य विशेषत्वमिदमिष्टं [c]यदि यत्किञ्चिदपेक्ष्य तदा विशेषो गृह्यते सदनुमानात्मके प्रतिहेताविति तत्राव्यापकत्वं * अथ प्रकृतं विरोधिनं हेतुमपेक्ष्य * तदा लक्षणवाक्यमीदृशं पर्यवस्यति ॥

टी० ॥ धर्मिग्राहकमानबाधस्थलेतिव्याप्तिनिरासाय गुणस्यागृह्यमाणत्वमाशङ्क्य निराकरोति—। [a]"नचे"ति । तत्र गुणस्य गृह्यमाणतया तत्रातिव्याप्तिनिरासेऽपि सपक्षसत्त्वरूपगुणविशेषवतान्वयव्यतिरेकिणा व्यतिरेकिणि सत्प्रतिपक्षेऽव्याप्तिरित्यर्थः ॥ [b]"अथे"ति । एवञ्च व्याप्तिपक्षधर्मतयोरभङ्गस्यैव ग्रहणात्त धर्मिग्राहकमानबाधेऽतिव्याप्तिर्न वा केवलव्यतिरेकिण्यन्वयव्यतिरेकिणा सत्प्रतिपक्षाऽव्याप्तिरिति भावः ॥ [c]"यदी"ति । शब्दोऽनित्यः श्रावणत्वादित्यादिस्तावत्प्रसिद्धानित्याद्यादिभावस्तदपेक्षया गृह्यमाणविशेषेण श्रावणत्वादिना सत्प्रतिपक्षेऽव्याप्तिरित्यर्थः सदनुमानात्मके इत्युपलक्षणं(१)स्फुटहेत्वाभासापेक्षया गृह्यमाणविशेषे (२)सदनुमानेऽपि दशाविशेषे सत्प्रतिपक्षेऽव्याप्तिरित्यपि द्रष्टव्यम् ।

मू० [a]व्याप्तिपक्षधर्मताभङ्गाभङ्गरूपः प्रकृतहेतुतो यस्य विशेषो न गृह्यते तेन बोधितो यदीयस्य साध्यस्य व्यतिरेकः स प्रकरणसम इति ईदृशमप्येतद्वाक्यं विचारमर्हति तथाहि व्याप्तिपक्षधर्मतेति मिलितस्य भङ्गाभङ्गपदसम्बन्धे विवक्षिते [b]प्रत्येकोदाहरणातिव्याप्तिः॥

टी० ॥ दूषणीयहेत्वपेक्षया व्याप्तिपक्षधर्मताभङ्गाभङ्गरूपस्य विशेषस्य यत्राग्रहस्तेन बोधितसाध्यविपर्ययत्वं लक्षणमित्याह—।

---

(१) उपलक्षणम्, असदनुमानस्याप्युपलक्षणमित्यर्थः ॥
(२) 'सत्प्रतिपक्षोया ऽसदनुमाने सति'—इति शेषः ।

"'व्याप्ती'ति । यदि व्याप्तिपक्षधर्मतयोर्मिलितयोर्भङ्गो यत्र न गृह्यते इति विवक्षितं तदा शब्दोऽनित्यो जातिमत्त्वे सति बाह्येन्द्रियग्राह्यत्वादित्यनेनापि स्फुटस्वरूपासिद्धिमता सत्प्रतिपक्षः स्यात् एवं शब्दो नित्यः प्रमेयत्वादित्यनेन स्फुटव्यभिचारेण सत्प्रतिपक्षः स्यादेकत्र पक्षधर्मतामात्रभङ्गस्य ग्रहेपि मिलितभङ्गाग्रहात् अन्यत्र व्याप्तिभङ्गग्रहेपि पक्षधर्मत्वभङ्गाग्रहात् मिलितभङ्गाग्रह इत्यतिव्याप्तिमाह -। '"प्रत्येकोदाहरणे"ति । क्वचिदव्याप्तिरिति पाठः कथञ्चिदेव व्याख्येयः यत्रैकैकभङ्गमात्रं तत्रापि मिलितोभयभङ्गोऽस्त्येव नहि यत्रैकं नास्ति तत्र मिलितमस्ति तथाच यत्र प्रतिहेतुप्रयोक्त्रा व्याप्तिभङ्गं ज्ञाते पक्षधर्मतामात्रपुरस्कारेण पक्षधर्मताभङ्गग्रहेपि व्याप्तिमात्रपुरस्कारेण सत्प्रतिपक्षः क्रियते तत्र प्रत्येकोदाहरणाव्याप्तिरेकभङ्गग्रहेपि मिलितभङ्गग्रहादिति ।

मू० "तद्भङ्गाभङ्गरूप इत्यस्य च मिलितस्य विशेषपदसम्बन्धेऽभिप्रेते सर्वथासम्भवितया सर्वाव्याप्तिः' अपि-चैवमप्यस्य वाक्यस्यार्थो वक्तव्यः व्याप्तिभङ्गरूपो व्याप्त्यभङ्गरूपः पक्षधर्मताभङ्गरूपः पक्षधर्मत्वाभङ्गरूपः प्रकृतहेतुतो विशेषो न गृह्यते यस्य तेन बाधितो यदीयसाध्यस्य व्यतिरेकः स प्रकरणसमः तथा सति परमाणुर्निरवयवो विश्रान्तपरिमाणतरतमादिभावत्वात् व्योमवदित्युक्ते परमाणुः सावयवो मूर्त्तत्वात् घटवदिति प्रत्यनुमानेन प्रतिवाद्युक्तेन परमाणुधर्मिग्राहिणोप्यणुपरिमाणतरतमादिभावः क्वचिद्विश्रान्तः परिमाणतरतमादिभावत्वान्महत्परिमाणतरतमादिभाववदित्यादेः ।

टी० 'भङ्गाभङ्गे"ति । नहि भङ्गाभङ्गावेकत्र सम्भवत इति सर्वाव्याप्तिरित्यर्थः यद्यपि भङ्गाभङ्गयोरेकत्रासम्भवादेवाग्रहः सम्भवति तथापि तादृशस्य विशेषस्यासम्भवादग्रहनिरूपक-

त्वाभकत्सब इति भावः किञ्च व्याप्तिपक्षधर्मतयोर्भङ्गाभङ्गयोर्वा मिलितत्वं यदि न विवक्षितं तथापि दोष इत्याह-। [b]"अपि चे"ति । सावयवत्वसाधकानुमानेन निरवयवत्वसाधकप्रथमानुमानवत्तृतीयमपि धर्मिग्राहकमानं सत्प्रतिपक्षितं स्यादित्यर्थः ।

सू० [a]"सदनुमानतयेष्टस्य [b]पक्षधर्मताबलेन तदीयनिरवयवत्वेपि प्रमाणतां गतस्य सत्प्रतिपक्षता स्यात् [c]यश्चास्य सदनुमानतां न मंस्यते तं प्रत्येवंप्रायाणि बहून्युदाहरणानि सन्तीति तेषु प्रसङ्गः ।

टी० ॥ ननु नेदमनिष्टमित्यत आह-। [a]"सदनुमानतये"ति । ननु प्रथमानुमाने निरवयवत्वं साध्यं तद्विरुद्धसाधकतया द्वितीयानुमानं तस्यैव सत्प्रतिपक्षो न त्वणुपरिमाणतारतम्यविश्रान्तत्वसाधकस्य तृतीयानुमानस्यापीत्यत आह-। [b]"पक्षधर्मते"ति । यद्यपि तृतीयानुमाने बलवति व्याप्तेरभङ्गो विशेषो गृहीत एवात एव द्वितीयानुमाने व्याप्तिभङ्गरूपोपि विशेषो गृहीतस्तथापि सत्प्रतिपक्षलक्षणाक्रान्तत्वेन दुर्बलत्वमेव तस्य न स्यादिति भावः ननु भट्टनामणुपरिमाणतारतम्यविश्रान्तिर्नेष्यते तेन त्रुटेरेव निरवयवस्य महदारम्भकत्वादिति तं प्रत्ययमापि प्रसङ्गो न भवतीत्यत आह-। [c]"यश्चे"ति । तन्मते आकाशं विभु निःस्पर्शद्रव्यत्वात् आकाशं न विभु आत्मान्यविशेषगुणवत्त्वादित्यनेन शब्दो भूतेन्द्रियग्राह्यो बाह्यद्रव्यत्वादित्य (१) दाहार्यं अत्र तृतीयानुमानस्य धर्मिग्राहकस्य सत्प्रतिपक्षितत्वादित्यर्थः ।

सू० * [a]"नच सोपि तथास्त्वेव * तस्य धर्मि सिद्ध्यर्थमुपजीव्यत्वेन बलवत्त्वात् [b]तद्व्यवच्छेदार्थं [c]स प्रकृतः प्रकरणसम इति कर्त्तव्यमिति चेत्तथाप्यनुपपत्तिः अत्र हि यदि विशेषो यस्य न गृह्यते इति सम्बन्धः तेन यत्सम्बन्धितया न गृह्यते इत्यर्थो विवक्षित-

(१) इत्यादिकमाकाशादिधर्मिग्राहक मानं सत्प्रतिपक्षितं स्यादित्याद्युदाहार्यमित्यर्थः ।

[d]एतदा अव्यापकत्वं दोषः तथाहि यत्र द्वयोरपि हेत्वोः परमार्थतः साधारणो व्याप्त्यादिभङ्गः सत्प्रतिपक्षदशायामगृह्यमाण[(१)]स्तत्र नास्त्येतल्लक्षणं नहि तत्रव्याप्त्यादिभङ्गो विशेषः अपितु प्रकृतहेतुना सह साधारण एव * नन्वत्यन्तासतो व्याप्त्यादिभङ्गरूपस्य विशेषस्यापि तावत्तत्राग्रहणमस्ति तदादायैव लक्षणं तद्व्यापि भविष्यति तर्हि तत्र वादी स्वहेतुसाधारणं व्याप्त्यादिभङ्गादिदोषं जानन् प्रतिहेतुनिष्ठतया परस्योद्भावयति—

टी० ॥ नन्विष्टमेव तत्सत्प्रतिपक्षत्वमत आह—। [a]"न चे"ति । अधिकबलत्वेन तत् सत्प्रतिपक्षतानङ्गीकारादित्यर्थः॥ [b]"तद्व्यवच्छेदार्थमि"ति । धर्मिग्राहकतृतीयानुमानसत्प्रतिपक्षताप्रसङ्गव्यवच्छेदार्थमित्यर्थः ॥ [c]"प्रकृत"इति । तत्काले दूष्यत्वेनाभिमत इत्यर्थः यस्य विशेषो न गृह्यत इति लक्षणवाक्ये यस्य न गृह्यत इति वान्वयः यस्य विशेषो न गृह्यत इति वेति विकल्प्याद्य दूषयति । [d]"तदे"ति । साधारणदोषवतोर्हेत्वोर्विशेष एव नास्ति कस्य तत्सम्बन्धितयाग्रहणं स्यादिति तेन सत्प्रतिपक्षस्थलेऽव्याप्तिरित्यर्थः ननु विशेषाभावात्सुतरां तद्गतत्वेनाग्रहणमिति कथमव्याप्तिरित्याह—। [e]"नन्वि"ति ॥

सू० [a]"परश्च परिहर्तुं न शक्नोति तत्राप्येवं सत्प्रतिपक्षताऽक्षतैव स्यात् यत उक्तरूपविशेषवत्तया [b]तेनासौ न गृहीत उक्तरूपस्य समानतयैव तेन गृहीतत्वात् [c]तथापि प्रतिहेतुवादिना तावद्विशेषवत्तयैव गृहीतस्तस्य तत्साधारणभावास्फुरणात् भ्रान्त्य[d]भ्रान्ति-

(१) एकस्मिन्हेतौ व्याप्त्यादिभङ्गत्वेनागृह्यमाण इत्यर्थः ननु विशेषत्वेनाऽगृह्यमाण इत्यर्थोऽपि विशेषस्यैवाभावेन व्याघातात् ।

साधारणस्य चात्र ग्रहणमात्रस्य विवक्षितत्वात् *— इति चेन्न,

टी० ॥ स्थापनावादिना द्वयोरपि व्याप्तिभङ्गे ज्ञाते सत्यपि व्याप्यत्वासिद्धमुद्भाव्य प्रतिहेतुर्दूष्यते तदापि सत्प्रतिपक्षानुच्छेदप्रसङ्गः; स्थापनावादिनो विशेषवत्तया ग्रहणाभावेन लक्षणस्य तदानीमपि सत्त्वादित्यतिव्याप्तिमेव द्रढयति—। [a]"परश्चे"ति । वाद्युक्तदोषपरिहारे पुनः प्रतिपक्षत्वं स्यादपि ननु प्रतिवादिना तदपरिहारेऽपि तथाच तदानीं हीनबलतया नासौ सत्प्रतिपक्षस्तत्त्वादुक्तलक्षणाच्च तथा स्यादित्यतिव्याप्तिरेवेत्यर्थः ॥ [b]"तेने"ति । स्थापनावादिनेत्यर्थः ननु विशेषतया(१)ग्रहणाभावो यदि न वादिनस्तथापि प्रतिवादिनः सोऽस्त्येवान्यथा स्थापनावाद्यनुमाने प्रतिवादी तं विशेषमुद्भावयेदेव तथाच नातिव्याप्तिरित्याह—। [c]"तथापी"ति । ननु प्रतिवादिनो विशेषरहितेऽपि विशेषवत्तया ज्ञानं भ्रम इति न तल्लक्षणे तन्त्रमित्यत आह—। [d]"भ्रान्तौ"ति ॥

मू० [a]प्रतिहेतुवाद्यभिप्रायेणागृह्यमाणतापक्षस्य प्रागेव निरस्तत्वात् [b]किञ्च प्रतिहेतुवाद्यपि यदि साधारणतां तस्य दोषस्य तदैव पश्येत्तदा का गतिः [c]यद्यसौ वादिहेतावपि दोषं पश्येत्तदा तमुद्भावयेत्तथा सति तत्रैव [d]कथासङ्क्रमः स्यात् * सत्प्रतिपक्षमुपेक्ष्य ? * इति चेन्न, यदि पश्यन्नपि प्रतिवादी तत्र दोषमेवं [e]मन्त्रयेत् [f]यदि तदानीं सत्प्रतिपक्षतां प्रतिज्ञातां

(१) अत्र विशेषतया ग्रहणं मौलिकविशेषतया ग्रहणपदार्थाद्विपरीतं विशेषतयाऽग्रहणपदसमानार्थकं, तच्च परकीयहेतौ दोषविशेषस्य ज्ञानमेव ननु विलक्षणत्वस्य ज्ञानं मूले तु विशेषशब्दो विलक्षणत्ववचनस्तथा च यस्य वादिनः परकीयहेतौ दोषविशेषस्य ज्ञानमस्ति तस्यैव स्वहेतौ दोष साधारण्यनिश्चयः यस्य तु प्रतिवादिनः परकीयहेतौ दोषव्यक्तिविशेषवत्ता ज्ञानं नास्ति न तस्य स्वहेतौ तत्साधारण्यनिश्चयोपीति न व्याख्यानव्याख्येययोर्विरोधः ।

विहाय दोषान्तरमुद्भावयामि तदापि प्रतिज्ञात्यागो नाम भङ्गोऽधिकः ॥

टी० ॥ विशेषं ज्ञात्वापि प्रतिवादी दोषान्तरास्फुरणे भङ्गभीरुः प्रतिहेतुं प्रयुङ्क्ते एव स्वप्रौढिविख्यापयिषया वेत्यादेरुक्तत्वादित्याह -। a"प्रतिहेतुवादी"ति। किञ्च यदा स्थापनायामपि वाद्युद्भावितं दोषं प्रतिवादी समाकलयेत् तदा तत्सम्बन्धितया विशेषः केनापि न गृहीत इति वाद्युद्भावितदोषदशायामपि सत्प्रतिपक्षता स्यादिति नैवातिव्याप्तिरित्याह—। b"किञ्चे"ति। स्थापनायां दोषस्फुरणे प्रतिवादी तमेवोद्भावयेन्न तु सत्प्रतिपक्षं कुर्यादित्याह-। c"यद्यमावि"ति ॥ d"कथासङ्कम" इति। तावतैव स्थापनावादी हिंस्येदित्यर्थः प्रतिहेतु प्रयोगात्पूर्वं दोषान्तरज्ञाने तन्मात्रोद्भावनं स्यादपि तत्प्रयोगानन्तरं दोषान्तरोद्भावने प्रतिज्ञातदोषपरित्यागात् प्रतिज्ञाहानिशङ्कया न दोषान्तरमुद्भावयति तस्यां दशायां स्यादतिव्याप्तिरित्याह—। e"सत्त्वर्येदि"ति। मतान्तरमाशङ्कयमाह—। f"यदि तदानीमि"ति।

मू० * "अथ नोद्भावयामि * तथापि प्रतिज्ञातदोषानिर्वाहात् मम पराजयः तदेवं 'वृथा दोषान्तरव्युत्पादनायायास इति परामृश्य स तूष्णीमास्ते तदा 'का गतिः * d"अथ(१)यस्य विशेष इत्युक्तलक्षणवाक्ये पदसम्बन्धस्तवाभिमतः ? *—तदा 'उक्तस्तावद्दोषो दोषान्तरं च स्याद्व्याप्त्यभङ्गादेर्विरुद्धार्थहेत्वोः (२)साधारणस्यासम्भवाद्विशेषपदेनाव्यवच्छेदकेन सह विशेषणविशेष्यभावानुपपत्तेः ॥

टी० ॥ ननु दोषान्तरोद्भावने चेत्प्रतिज्ञाहानिशङ्का तदा तदनुद्भावनमेवास्तु तत्राह—। a"अथे"ति। वादिना दूषितं स्वहेतुं यदि क्षमेत प्रतिवादी तदा सत्प्रतिपक्षतैव

(१) यथोक्तलक्षणवाक्ये यस्य विशेष इति पदसम्बन्ध इत्यन्वयः।
(२) विरुद्धार्थहेत्वोर्व्याप्त्यभङ्गादेः साधारणस्याऽसम्भवादिति सम्बन्धः।

न स्याद्धीनबलत्वादिति समकरणार्थं वाद्यनुमाने दोषमुद्भावयेदेवेत्यर्थः ॥ [b]"वृथे"ति । उद्भावनानुद्भावनपक्षयोः पराजयध्रौव्ये दोषान्तरोद्भावनस्यायासमात्रफलकत्वमिति मौनमेव श्रेय इत्यर्थः ॥ [c]"का गतिरि"ति । अतिव्याप्तिं कथं परिहरेत्यर्थः ननु यस्य विशेषो न गृह्यत इतिवाक्ये यत्संबन्धितया न गृह्यत इति सम्बन्धो मास्तु यस्येति षष्ठ्यं तस्य विशेष इत्यनेनैवान्वयः स्यादित्याह—। [d]"अथे"ति ॥ [e]"उक्तस्तावदि"ति । यत्र वादिना प्रतिवादिना वा विद्यमान एव विशेषो(१) गृह्यते नतूद्भाव्यते तत्रातिव्याप्तिरित्यर्थः दोषान्तरमाह—। [f]"व्याप्ती"ति । यदि विरुद्धार्थहेत्वोर्भङ्गाभङ्गसाधारण्यं क्वचिदपि भवेत्तदा तद्व्यावर्तनाय विशेषपदं सार्थकं स्यान्नत्वेवमित्यर्थः ।

सू० * [a]अथोच्यते व्याप्तिपक्षधर्मताभङ्गाभङ्गरूपप्रकृतहेत्वपेक्षविशेषवत्तयोद्भाव्यमानेन बोधितो यदीयसाध्यस्य विपर्ययः स प्रकृतः सत्प्रतिपक्ष ?*—इति तदपि नोपपन्नं, [b]यदि परस्त्वदीयोयं प्रतिहेतुरित्थं भग्नव्याप्तिक इत्येवाभिधत्ते नतु मद्धेतुतोयं विशेष इत्यपि ब्रूते आभासान्तरत्वव्युत्पादनादेव प्रतिहेतोः सत्प्रतिपक्षताभङ्गात् तदापीत्थं सत्प्रतिपक्षता न निवर्तेत [c]तथा सति च प्रतीयमानासिद्ध्यादिनापि सत्प्रतिपक्षीकरणमिति साधु व्युत्पादितं [d]सर्वानुमानानुकूलं स्यात् ॥

टी० ॥ ननु विशेषवत्त्वेनान्यतरस्य ग्रहणमस्तु तदुद्भावनमपि न नियत तथाचोक्तविशेषवत्तयानुद्भाव्यमानेन बोधितसाध्यविपर्ययत्वं लक्षणमस्त्वि(२)ति शङ्कते—। [a]"अथे"ति । यत्र व्याप्तिभङ्गमुद्भावयति मदीयहेत्वपेक्षया तव हेत्वपेक्षया तव

(१) अत्रापि पूर्ववद्विशेषशब्दो दोषव्यक्तिविशेषवचनो नतु विलक्षणत्ववचनः । (२) निरुक्तस्थले च स्थापनावादिना व्याप्तिभङ्ग उद्भावित एव अतो नातिव्याप्तिरिति भावः ।

हेतौ विशेषोयमित्यनेन प्रकारेण नोद्भावयति तत्र सत्प्रतिपक्षता नावश्यादिति विशेषवत्तयानुद्भावनालक्षणं तत्रापि गतमित्यतिव्याप्तिरिति परिहरति—। b"यदी"ति । नन्वस्तु तत्रापि सत्प्रतिपक्षता को दोष इत्यत आह—। c"तथा सती"ति । सोपहासमाह—। "सर्वानुमाने"ति । दुष्टदोषेणापि सत्प्रतिपक्षकरणे सकलानुमानोच्छेदः स्यादित्यर्थः ।

मू० a"किञ्च कस्मिन्काले तथानुद्भाव्यमानत्वमपेक्षितं यदि यदा प्रतिहेतूद्भावनेन परहेतुं दूषयति प्रतिवादी तस्मिन् काले नुद्भावनं तद्। पश्चादुक्तेपि प्रतिहेतुदोषे पूर्वकालानुद्भावने bप्रतीकारो न कश्चिदिति सर्वहेत्वाभासैः सत्प्रतिपक्षीकरणमदुष्टमिति cगतमनुमानकथया d * अथ प्रतिवादिनाभिहिते यदा पुनर्वादिवचनावसरः ?*—तदानुद्भावनमिष्टं eतर्हि तत्कथमग्रे प्रत्यनुमानवादिनावधारणीयमयमत्र विशेषदोषं नोद्भावयिष्यतीति ॥

टी० ॥ किञ्च यदि प्रतिहेतूपन्यासकाले दोषवत्तयानुद्भावितं विवक्षितं तदा तदुपन्यासानन्तरं दोषोद्भावनेपि सत्प्रतिपक्षता स्यादेव प्रतिहेतूपन्यासकालीनानुद्भावनस्य लक्षणस्य सत्त्वादित्याह—। a"किञ्चे"ति ॥ b"प्रतीकार"इति । त्वदुक्तलक्षणाक्रान्तत्वेन दुष्टेनापि सत्प्रतिपक्षता स्यादित्यर्थः ॥ c"गतमि"ति । अतिस्फुटदोषेणापि सत्प्रतिपक्षश्चेत्तदा सदनुमानानामपि सत्प्रतिपक्षत्वमित्यनुमानमात्रोच्छेद इत्यर्थः ननु प्रतिहेतूपन्यासानन्तरकालीनं यत्र दोषवत्तयानुद्भावनं तेन बोधितमात्रविपर्ययत्वं विवक्षितं तथा च नातिप्रसङ्ग इति शङ्कते—। "अथे"ति । अनध्यवसायात्तर्हि प्रतिहेतूपन्यास एव न स्यात् को हि जानात्यसौ मदीयहेतौ दोषं नोद्भावयिष्यति भवतु वा कथञ्चित्प्रतिहेतूपन्यासस्तथापीदमसाधकं सत्प्रतिपक्षितत्वा-

दिति नोद्भावयेत् सत्प्रतिपक्षत्वं तु परकालानुद्भाव्यमानविशेषत्वं तत्र प्रथमं निर्णेतुमशक्यमिति परिहरति—। "तर्ही"ति ॥

सू० "दोषशून्यत्वात्स्वकीयस्य प्रतिहेतोः समर्थस्तथावधारयितुमिति चे'दुक्तमत्र प्रतीतदोषेणापि सत्प्रतिपक्षताकरणं सम्भवति 'तत्र परेण दोषेनुद्भाविते विजयश्च भवतीति "किञ्च विशेषदोषशून्यत्वमपि स्वकीयहेतोः कथमयमवधारयेत् 'विरुद्धार्थयोस्तावद्धेत्वोरेकस्यावश्यं दोषेण भाव्यं 'तत्र यथा तेन स्वहेतौ दोषो न दृश्यते तथा परहेतावपि तद्दर्शने तमेवोद्भावयेत् "को हि सचेता ।

टी० ॥ ननु स्वहेतोर्दोषशून्यत्वं निश्चित्य प्रतिहेतूपन्यासाध्यवसाया(१)ऽसाधनानुमानप्रयोगो स्यादिति शङ्कते—। "दोषे"ति । नहि पूर्वोक्ताभिप्रायेण स्वयं प्रतीतदोषप्रतिहेतुं क्वापि न प्रयुञ्जीत वादीत्यनिष्टमिति परिहरति—। "उक्तमत्रे"ति । ननु तादृशप्रतिहेतुप्रयोगो भङ्गभयादनर्ह एवेत्यत आह—। "तत्रे"ति । किञ्च दोषशून्यत्वावहृष्टमेनापि प्रतिहेतूपन्यासाध्यवसायासाधकतासाधनानुमानप्रयोगो न स्यात् पश्चात्तत्र दोषसन्देहप्रत्यस्य प्रतिपादनादित्याह—। "किञ्चे"ति । सन्देहप्रयोजकमेवाह—। "विरुद्धार्थयोरि"ति ननु विपक्ष(२)हेतुदोषनिश्चयादेव स्वहेतौ न दोषसन्देह इत्यत आह—। "तत्र यथे"ति । ननु कथमयं नियमो यत्परहेतुदोषदर्शने तदुद्भावनमावश्यकं ननु प्रतिहेतूपन्यासावसर इत्यत आह—। "को ही"ति । स्थापनावादिप्रयुक्ते हेतौ दोषान्तरमसिद्ध्यादि दृष्ट्वा सत्प्रतिपक्षावसरो नास्तीति कथमयं नियमो यावता दोषत्वाविशेषात्सत्प्रतिपक्षतामिव कथं नोद्भावयेन्नैवं दोषान्तरे पक्षधर्मतामनुपदर्शनीयं सत्प्रतिपक्षं तु व्याप्तिरपीति

(१) 'प्रतिहेतुमुपन्यस्येयम्'—इत्याकारकः प्रतिहेतूपन्यासाध्यवसायः । (२) विपक्षहेतौ=विपरीतहेतौ, दोषस्य निश्चयादित्यर्थः ।

गौरवमित्यर्थः यद्वा अस्फुरत्प्रतीकारेणापि ([1])दोषेण सत्प्रतिपक्षस्य हीनबलत्वं चेत्कुर्यां तदा ममैव भङ्गः स्यादित्यभिप्रायाद्दोषान्तरमेवोद्भावयेत् यद्वा प्रतिहेतुप्रयोगानन्तरं तेनासाधकतानुमानप्रयोगानन्तरं तदनु स्वपक्षस्थापनाप्रयोग इति प्रयासगौरवमित्यभिसन्धिरित्यर्थः ॥

मू० निश्चितं दोषमुपेक्ष्य सदोषस्य निर्दोषसाम्येन प्रत्यवतिष्ठते "तस्मात्सदोषेपि दोषमपश्यन्नयं न स्वेनादर्शनं दोषाभावे प्रमाणयितुमर्हतीति * "अथोच्यते व्याप्तिपक्षधर्मताभङ्गाभङ्गरूपप्रकृतहेत्वपेक्षविशेषत्वेनानुद्भाव्यतया संभाव्यमानेन बोधितो यदीयसाध्यस्य विपर्ययः स प्रकृतः प्रकरणसम * इति ([2])नैतदपि सुस्थं, "यद्युद्भावनकालात्पूर्वकालिकी संभाव—

टी० ॥ तस्मात् स्थापनाहेतौ दोषान्तरमपश्यन एव प्रतिहेतूपन्यास इति स्थितं यथा तत्र([3])स्वय दोषादर्शनमदोषवत्तां व्यभिचरति तथा ममापि दोषशून्यत्वेनोपात्तोपि गृह्यमाणोप्ययं हेतुर्दोषवान् स्यादिति संशयानेन दोषशून्यत्वावष्टम्भेन प्रतिहेतूपन्यासः समाहितो न भवतीत्युपसंहरति—। "“तस्मादि”ति। तथाचैतल्लक्षणानुसारेण प्रतिहेतूपन्यासासाध्यवसायो न स्यादिति भावः ननु दोषवत्तयानुद्भावनं यद्यपि न निश्चितं तथापि सम्भावनास्त्येव तथाच दोषवत्तया सम्भावितानुद्भावनेन प्रतिहेतुना बोधितसाध्यविपर्ययत्वं लक्षणमस्तु तथाच प्रतिहेतूपन्यासाध्यवसायाऽसाधकतासाधनं च द्वयमप्युपपन्नमेवेति शङ्कते—। b“अथे”ति । प्रतिहेतूपन्यासा-

([1]) न स्फुरति स्वहेतावपि प्रतीकारो यस्य सत्प्रतिपक्षदोषस्य तेन सत्प्रतिपक्षस्य हेत्वन्तरस्येत्यर्थः । ([2]) विकल्पासहत्वेनैतद्दूषयति-नैतदपीति-वादिनोर्योदोद्भावनकालस्तस्मात्पूर्वकालिकासम्भावना विवक्षिता ?-१ किंस्वित्तत्कालीना ?-२ यद्वा कालमात्रसम्बन्धिनी ?-३ इति विकल्पप्रथममनुवदति-यदीति-इति विद्यासागराः ।

([3]) तत्र=स्थापनानुमानवादिहेतौ, स्वयं=स्थापनावादिना ।

त्पूर्वमनुद्भावनसम्भावना चेद्विवक्षिता तदा प्रतिहेतून्यासानन्तरं स्थापनाबाधादिदूषितेनापि प्रतिहेतुना सत्प्रतिपक्षता स्यादेव तल्लक्षणस्य तदानीमपि सत्त्वादित्याह—। "यदी"ति ।

मू० ना विवक्षिता(१) "तदा तात्कालिकानुद्भावनपक्षोक्त एव दोषोऽतिदेष्टव्यः * (२)अथोद्भावनस्य योऽवसरो भविष्यति तात्कालिकतया * तदा सत्प्रतिपक्षताव्युत्पादनकाले सा नास्तीति विशेषणाभावात्तल्लक्षणाभावः (३) * "अथोच्यते यावत्सम्भावनानुवर्त्तते तावत्सत्प्रतिपक्षता (४)किं सम्भावनायाः कालनियमगवेषणेन(५) ?*— मैवम् ॥

टी० ॥ ननु प्रतिहेतूपन्यासानन्तरकालीनानुद्भावनसम्भावना विवक्षिता तत्राह । "तदे"ति । यत्र स्थापनाबाधादिना प्रतिहेतौ दूषिते प्रतिवादी तदुद्धृत्य सत्प्रतिपक्षत्वमेव पुनर्द्रढयति तत्र दोषोद्भावनादेवानुद्भावनसम्भावनारूपविशेषणाभावात्सत्प्रतिपक्षलक्षणमव्यापकं स्यादित्यर्थः यत्तु प्रतिहेतून्यासकाले तदुत्तरकालीनानुद्भावनसम्भावनारूपविशेषणाभावाल्लक्षणमव्यापकं स्यादिति कैश्चिद्व्याख्यातं तच्चिन्त्यं ननु सत्प्रतिपक्षत्वदृढीकरणदशायां सत्प्रतिपक्षतैव न विवक्षिता येनाव्याप्तिः स्यात् किन्तु वादिदत्तदोषोद्धारेण निरनुयोज्यानुयोगनिग्रहाद्वादिनो भङ्ग एव किं तदा सत्प्रतिपक्षता दृढीकरणेनेत्याह—। "अथोच्यते"इति ॥

(१) प्रागुक्तानिष्टापत्तिरिहानुसन्धेयेति परिहरति—तदेति पूर्वकालिकानुद्भावनासम्भावनानुद्भाव्यमानदोषो हेत्वाभासस्तेनापि सत्प्रतिपक्षता स्यादित्यर्थः । (२) अस्तु तर्हि द्वितीयो निरवद्यादिति शङ्कते—अथेति—तात्कालिकत्वानुद्भाव्यमानत्वविशेषणाभावाद्विशिष्टलक्षणस्य तात्कालिके सत्प्रतिपक्षेऽव्याप्तिरित्यर्थः ।(३) कालमात्रस्य विवक्षितत्वे सम्भावना विवक्षितेति तृतीयकल्पं शङ्कते—अथेति-प्रतिहेतौ दोषे निरस्ते सत्प्रतिपक्षता निवर्त्तत इति न्यायनियमः । किन्तु तद्विघटनया दोषमुद्भावयतीति यावत्सम्भावनानुवृत्तिस्तावत्सत्प्रतिपक्षतानुवर्त्तते इति नोक्तदोष इत्यर्थः । इति विद्यासागराचार्याः । (४) अतः पूर्वोक्तत्रिकल्पदूषणमनवकाशदुष्टमित्याह—किमिति । (५) प्रतिप्रसङ्गेनैव निरस्यति—मैवमिति ।

मू० "एवं हि प्रतिहेतोर्दोषेनुद्भाविते प्रत्युत निर्दोषतयैव स्वीकृते दोषोद्भावनसम्भावनाया निवृत्तेः सत्प्रतिपक्षता व्यावर्त्तेत तथाचेत्यङ्कारमेव वादी सत्प्रतिपक्षतां परिहरेत् इति साधु स्यात्सत्प्रतिहेतोः प्रतिक्षेपमकृत्वा स्वीकृत्यैव (1)तत्सत्प्रतिपक्षता प्रतिक्षेप्तव्येति "*नच स्वीकारादेव प्रतिहेतोः (2)पराजयः स्यात् * सत्प्रतिपक्षतापरिहारोपायतया स्वीकारस्य करणात् "स्वीकारे सति, सम्भावनानिवृत्त्या तल्लक्षणकस्य सत्प्रतिपक्षत्वस्यापि निवृत्तेः तथा(3)स्वीकारोऽप्ययं परस्यानिष्टार्थं सिद्धसाधने परकीयसाध्यस्वीकारवदुद्गुणाय स्वीकर्त्तुर्नदोषायेति ॥

टी० ॥ साधु प्रतिसाधनतया प्रयुक्तमिति वादिनाभिहिते दोषोद्भावनसम्भावना तावन्निवर्तत एव तथाच विशेषणाभावात्तदा लक्षणाभाव इत्याह । "एवमि"ति । ननु यत्र स्वानिष्टमेवं वादी स्वीकरोति तत्र मास्तु सत्प्रतिपक्षः किन्तः छिन्नमित्यत आह-। "तथाचेत्यि"ति । यद्यपि यत्रैवं न स्वीकुर्यात्तत्र सावकाशः सत्प्रतिपक्षस्तथापि पूर्वदोषावष्टम्भोत्र एवं सत्प्रतिपक्षप्रतीकारं जानानः कथन्न प्रतिकुर्यादिति भावः नन्वेवं स्वदोषाङ्गीकारे मतानुज्ञया वादी पराजितः स्यादित्यत आह-। "नचे"ति । दोषपरिजिहीर्षयाभ्युपगमो न मतानुज्ञामापादयतीत्यर्थः स्वीकाराभिप्रायमाह-। "स्वीकारे सती"ति । ननु प्रतिसाधुत्वाभ्युपगमे तत्साध्यं स्वानिष्टं सिध्येदित्यपरमनिष्टं स्यादित्यतोऽनुरूपं दृष्टान्तमाह-। "सिद्धसाधन"इति ॥

---

(१) तदिति सामान्ये नपुंसकनिर्देशः, प्रतिहेतुस्वीकृत्यैवेत्यर्थः। यद्वा तन्निष्ठा सत्प्रतिपक्षता तत्सत्प्रतिपक्षतेत्यर्थः। केषुचित्पुस्तकेषु तु "स्वीकृत्यैव तस्" -इत्येव पाठः। (२) प्रतिहेतोः स्वीकारादेव-इत्यन्वयः। (३) तथा स्वीकारः=तेन रूपेण स्वीकारः, बहुषु पुस्तकेषु तु "तस्मात् स्वीकारः"-इति पाठः, सच पूर्वपाठापेक्षयोत्तमतरः।

मू० [a]यदि च सत्प्रतिपक्षो वादिनोः समानप्रतिपक्षदर्शनजनितात्स्वहेत्वाभासत्वसंशयात्तदा क्वचिदपि नास्ति सत्प्रतिपक्षता स्वहेतुपक्षपातेन परहेतावेव दोषः कश्चिदस्ति मया तु न गृह्यते इति ताभ्यां मन्यमानत्वात् यदाह निश्चितौ हि विवादं कुरुत इति [b] * अथौचित्यादावर्जितसंशयेन सत्प्रतिपक्षता स्यात् [c] * तदा सर्वत्रैव वादे सर्वानुमानानां सत्प्रतिपक्षता दुर्निवारा तद्यथा शब्दानित्यत्वानुमानेन बुद्धिमद्भिः शतशः शब्दनित्यत्ववादिजयात् शब्दनित्यत्वानुमानेन च प्राज्ञैः शतशः शब्दानित्यत्ववादिजयात् ॥

टी० लक्षणं दूषयित्वा फलं दूषयति–।[a]"यदि चे"ति। प्रतिसाधनं दृष्ट्वा स्वसाधने हेत्वाभासत्वसंशयोऽत्र फलत्वेनाभिमतः स चाशक्यः स्वपक्षपातेन स्वसाधनस्य निर्दोषत्वेनैव निर्णीतत्वात् संशयानुपपत्तेरित्यर्थः ननु विशेषदर्शनं तिरस्कृत्यापि तुल्यबलप्रतिसाधनदर्शनरूपदोषबलादन्योन्यस्य स्वहेतौ संशयोऽवश्य भावीत्याह–। [b]"अथे"ति। औचित्यादावर्जित आहार्यं इति केचित्तन्न आहार्यसंशयाभ्युपगमे प्रतिसाधनोपन्यासानर्थक्यस्यावश्याभ्युपगमप्रसङ्गात्(१)अनित्यत्वसाधकानुमानस्य नित्यत्वसाधकानुमानं तदानीमनुपन्यस्यमानमपि सत्प्रतिपक्षः स्यात् संशयापादकत्वादित्याह–। [c]"तदे"ति ॥

मू० [a]द्वयोः पक्षयोरनुमानेषु कतरद्वस्तुतः सदनुमानमिति [b]अर्हतो दोषसंशयस्य दुर्वारत्वादिति [c]प्रकारभेदाभावाच्च न कालात्ययापदिष्टः पृथक् तद्यथा बाधितविषयः कालात्ययापदिष्ट इत्यलक्षणं तथाहि

(१) अनाहार्यं संशयमुत्पाद्य निश्चयप्रतिबन्धार्थमेव प्रतिहेतुरुपन्यस्यते आहार्यसंशयश्च न निश्चयविरोधी अतः प्रतिहेतूपन्यासानर्थक्यमिति भावः ।

बाधितविषयत्वं किं विवक्षितं न तावद्बलवता बोधितो विषयविपर्ययो यस्य तत्त्वं "यथाश्रुतस्य सत्प्रतिपक्षेपि गतत्वात् 'तत्र प्रत्यनुमानस्य प्रथमानुमानविषयविपर्ययबोधकस्य पक्षधर्मतादिबलसम्भवात् * अथ बलवतेत्यधिकबलेनेति विवक्षितं * 'तदापि केवलव्यतिरेकिणोन्वयव्यतिरेकिणा सत्प्रतिपक्षे गतत्वादतिव्यापकत्वं तत्रान्वयव्यतिरेकिणः प्रतिहेतोः सपक्षसत्त्वलक्षणबलाधिक्यसंभवात् ।

टी० ॥ सन्देहमेवोपपादयति—। "द्वयोरि"ति ॥ "अर्हन" इति । रचितस्य प्राप्तस्येत्यर्थः साध्यविपर्ययबोधघटितसत्प्रतिपक्षान्तर्भावः स्फुटः कालात्ययापदिष्टस्येति तत्खण्डनानन्तर कालात्ययापदिष्टखण्डनमुपक्रमते —। "प्रकारे"ति । हेत्वाभासान्तरभेदस्य प्रकारभेदस्याभावादित्यर्थः ॥ "यथाश्रुतस्ये"ति । अविवेचितबलवत्त्वस्ये(१)त्यर्थः सत्प्रतिपक्षस्य प्रतिबन्धकत्वं नतु साध्यविपर्ययबोधकत्वं यद्यपि तथापि तुल्यबलबोधितसाध्यविपर्ययत्वं सत्प्रतिपक्षत्वमित्यभिप्रेत्यैतदुक्तं अतिव्याप्तिं स्फुटयति "तत्रे"ति ॥ "तदे"ति । यद्यपि व्यतिरेकिणि सपक्षसत्त्वाभावेपि व्याप्तिपक्षधर्मताद्युपबलसाम्यमिति नाधिकबलत्वमन्वयव्यतिरेकिणस्तथापि सपक्षसत्त्वादिकबलमभिप्रेत्यैतदुक्तम् ।

मू० "किञ्चैवं प्रत्यक्षेणानुमानाभासबाधो न स्यात् प्रत्यक्षस्येन्द्रियार्थसन्निकर्षोत्पन्नाभ्रान्तिज्ञानकरणत्वमात्रं बलमनुमानस्य तु पक्षधर्मत्वादि भूयिष्ठं बलमिति ^{b} * अथ मन्यसेऽनन्यथासिद्धत्वं बलं विवक्षित्वेदमुच्यते तेनानन्यथासिद्धेन बोधितो यदीयसाध्यस्य व्यतिरेकस्तत्त्वं बाधितविषयत्वमिति ?

(१) अविवेचितबलवत्त्वस्य = अनिर्णीतन्यूनाधिकबलवत्त्वस्य ।

*मैवम्, "तथापि हि वस्तुतोऽनन्यथासिद्धेन (१)सत्-प्रतिपक्षेपि गतत्वादतिव्यापकत्वं "किञ्चान्यथेत्य-न्येन प्रकारान्तरेणेत्युच्यते अनन्यथेति चानन्येन प्रकारेण 'यस्मादन्यत्वं तेनैवेत्यर्थः सम्पद्यते तथाच वक्तव्यं किं तदन्यताप्रतियोगीति प्रामाण्यं तदिति चेत् अाहो दुर्वैदग्धी भवतः प्रमाण्येनेति वक्तव्ये प्रामाण्याद्योऽन्यः स यो न भवति तेन प्रकारेण सिद्धः उत्पन्नः प्रतीतो वा तेनेति ब्रुवाणस्य ।

टी० ॥ "किञ्चैवमि"ति । यद्यपि रूपवत्त्वादिकं यथायथं तत्रापि बलमधिकं तथापि तद्विवक्षयैवमुक्तं ॥ "अथे"ति । सत्प्रतिपक्षस्थलेऽन्यथासिद्धेनैव साध्यविपर्ययसाधनमतो नाति-व्याप्तिरिति भावः यत्रानन्यथासिद्ध एव प्रतिहेतुर्वस्तुतस्तत्रा-तिव्याप्तिमाह— "तथापी"ति । कुटिलोक्तिकत्व लक्षणदोष माह— "किञ्चे"ति "यस्मादन्यत्वमि"ति । अन्यत्वं सप्र-तियोगिकं तेन यथा घटादन्यः पटादिः अनन्यस्तु घट एव तथा प्रामाण्यादन्यदप्रामाण्यमनन्यत्तु प्रामाण्यमेवेत्यर्थस्तथाच प्रामा-ण्येन सिद्ध इति वक्तव्ये प्रामाण्यप्रतियोगिकान्योन्याभाववत् प्रतियोगिकान्योन्याभाववता सिद्ध इति महत्कौटिल्यमुक्तमि त्यर्थः इति ब्रुवाणस्याहो दुर्वैदग्धी भवत इति योजना ॥

मू० "तथापि प्रमाणेन बोधितविपर्ययो विषयो यस्य स कालात्ययापदिष्ट इति न इदं रजतमिति शुक्तिं विषयीकुर्वति प्रत्यक्षाभासे नेदं रजतमितिप्रमाणेन बाध्यमानेपि हेत्वाभासविशेषलक्षणमिदङ्गच्छदति-व्यापकत्वमापद्यते "एवं बाध्याविषयिण्यामिच्छाया-मपि गच्छेत् * प्रमाणेन बोधितो यदीयविषयस्या-

(१) अनन्यथासिद्धेन=सदनुमानेन ।

न्यथा भावः "स हेतुः कालात्ययापदिष्ट ?*—इति चेन्न, यदि "मुख्यार्थो हेतुशब्दः "तदा हेत्वाभासत्वव्याघातः "अथामुख्यार्थः तदा कोऽस्यार्थः यत्रैव व्यवस्थाप्यते इति सोऽभिधातव्यः *"प्रमाणेन बोधिते यदीय विषयस्य व्यतिरेकः स हेत्वाभासः कालात्ययापदिष्ट ? *—इति चेन्न, यद्यग्रे हेत्वाभासत्वानिश्चयः तदा लक्षणस्य दुरवधारणत्वम् * अथ कालात्ययापदिष्टत्वेन निरूपिते एव हेत्वाभासत्वस्य निश्चयः * तदा तत एव दुरुत्वसिद्धेः कृतं।

टी० ॥ ननूक्तिकौटिल्ये सत्यपि लक्षणसद्भावमेवेत्यत आह—। "तथापी"ति। प्रमाणेन बाधकज्ञानेन बोधितसाध्यविपर्यये भ्रमेऽतिव्याप्तिः भ्रमज्ञानस्य हेत्वाभासत्वायोगादिति भावः भ्रमजनितायामिच्छायामतिव्याप्तिमाह—। "यद्वे"ति। बाध्यं रजतत्वादिविषयो यस्या इच्छायाः सा तथा तस्यामित्यर्थः ॥ "स हेतुरि"ति। तथा च न भ्रमे न वा तज्जनितायामिच्छायामतिव्याप्तिस्तत्र हेतुत्वाभावादिति भावः ॥ "मुख्यार्थ" इति। व्याप्तिपक्षधर्मवचन इत्यर्थः न्यायावयव इति नार्थः अर्थस्यैव हेतुहेत्वाभासत्वस्य विचारात् ॥ "तदे"ति। व्याप्तिपक्षधर्मताविशिष्टस्य हेत्वाभासत्वं व्याहतमित्यर्थः ॥ "अथे"ति। लाक्षणिकस्य हेतुशब्दस्य विविच्य विषयो वक्तव्य इत्यर्थः पूर्वोक्तव्याघातपरिहाराय हेत्वाभासत्वेन विशेषणीयमित्याह—। "प्रमाणेने"ति ॥

मू० "पश्चात्प्रतीतिकस्य कालात्ययापदेशस्योपन्यासेनेति "तदिदं त्वन्मते लक्षणमस्तु मा वा भूत् सामुद्रिकप्रमाणेन पुनर्महदेतदलक्षणं कालात्ययापदेशस्य येनास्य (१) नाम हेत्वाभासभेदपदभ्रंशः प्रासाधि * "अथ ब्रूषे हेत्वाभासत्वं हेतुसदृशतया प्रतीयमानत्वं

न हेतुदोषवत्त्वम्? *-इति मैवं, [d]हेतुना तुल्यता हि अहेतुत्वावगमं विना न शक्यप्रमितिः सादृश्यस्य भेदाधिष्ठानस्य तथैव प्रतीतेः [e]अन्यथा हेतोरपि हेत्वाभासत्वापातात् [f]ततश्च हेतुरूपवैकल्पस्यावश्यं प्रत्येतव्यत्वेन प्रागुक्तदोषानिवृत्तिः * प्रमाणेन बोध्यमानो यदीय [g]पक्षव्यतिरेकः स कालात्ययापदिष्ट? *-इति चेन्न,

टी० ॥ [a]"पश्चात्प्रतीतिकत्वे"ति । हेत्वाभासत्वगर्भलक्षणव्यवस्थाप्यत्वेत्यर्थः अनेन लक्षणेन कालात्ययापदिष्टो हेत्वाभासादेव प्रच्याविन इति महदिदमलक्षणमित्युपहसति- । [b]"तदिदमि"ति । ननु हेतुसदृशत्वं हेत्वाभासत्वं तत्त्वनुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्वं येन कालात्ययापदिष्टत्वज्ञानात्पूर्वमेवानुमितिप्रतिबन्धे किं तेनेति स्यादित्याह । [c]"अथे"ति । तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं हेतुभिन्नत्वज्ञानात्प्रत्येतव्यमिति स एव दोष इत्याह- । [d]"हेतुने"ति । [e]"अन्यथे"ति । यदि सादृश्यं भेदगर्भं न स्यादित्यर्थः ॥ [f]"ततश्चे"ति । हेतुभिन्नत्वं हेतुवैधर्म्यज्ञानाधीनमित्यर्थः ॥ [g]"पक्षव्यतिरेक" इति । तथाच हेत्वाभासपदप्रक्षेपदोषाभावः अतस्तज्जन्येच्छयोरत्र नातिव्याप्तिस्तत्र पक्षव्यतिरेकाभावादित्यर्थः विपरीतप्रमायां सन्देहसिषाधयिषयोरभावान्न पक्षतेति भावः यद्यपि बाधे प्रमाणेन पक्षव्यतिरेको न बोध्यते तथापि सम्भवाभिप्रायेणोक्तम् ।

मू० [a]"आश्रयासिद्धव्यापनात् * आश्रयासिद्धव्यतिरिक्त इति विशेषणीयम्? *-इति चेन्न, [b]विशेषणाद्यसिद्धाश्रयासिद्धेन सह सङ्कीर्णकालात्ययापदिष्टोदाहर-

(१) येन=सामुद्रिकलक्षणेन, अस्य=कालात्ययापदिष्टस्य, नाम=प्रसिद्धं, हेत्वाभासविशेषस्य पदात् स्थानात् भ्रंशः=च्युतिः, मामाधि । सामुद्रिकशास्त्रे कालात्ययापदेशपदस्याऽतिक्रान्तकालस्य उद्देश वाचित्वात् ।

तमेवं न व्याप्येत ^{c}* प्रमाणेन बोध्यमानो यदीय-साध्यस्य व्यतिरेकः स कालात्ययापदिष्ट ? *-इति चेन्न, ^{d}प्रत्यक्षाभासव्यापनात् तत्रापि हि साध्यस्य व्याप्यरूपस्य व्यतिरेको बोध्यते एव ^{e} * प्रमाणेन बोध्यमानो यदीयस्य साध्यस्य व्यापकस्य व्यति-रेकः स कालात्ययापदिष्ट ? *-इति चेन्न, ^{f}प्रमाणेन बोध्यमानाभावस्य प्रकृते हेतुव्यापकत्वासम्भवात् ॥

टी० ॥ ^{a}"आश्रयासिद्धे"ति । यद्यपि गगनारविन्दं सुर-भीत्यादावाश्रयासिद्धे पक्षव्यतिरेको न प्रमाणबोध्यो(१) न वा सिद्धसाधनस्थले पक्षव्यतिरेकः प्रमाणबोध्य(२)स्तथापि प्रमा-णेन सिद्धौ(३)सत्यां सन्देहाभावात् पक्षताव्यतिरेक इत्येनाव-तैव तथोक्तं ॥ ^{b}"विशेषणाद्यसिद्धा"विति । सन्देहसिषाधयिषयोः पक्षविशेषणयोर्बाधे असिद्धिरिति तत्राश्रयासिद्धत्वं प्रबलमिति तत्सङ्कीर्णबाधाव्याप्तिरित्यर्थः स्वाश्रयासिद्धेः साध्यव्यतिरेकः प्रमाणेन न बोध्यत इति न तत्रातिव्याप्तिरिति शङ्कते- ^{c}"प्रमा-णेने"ति । साध्यपदं व्याप्यपरं चेत्तत्राह- ^{d}"प्रत्यक्षे"ति । साध्यपदस्य व्यापकपरतामादाय शङ्कते- ^{e}"प्रमाणेने"ति । कृतकत्वादिहेतुव्यापकत्वमनित्यत्वादेः साध्यस्य न सम्भवतीति हेतुमति पक्षे योबाधस्तत्राव्याप्तिरित्याह-। ^{f}"प्रमाणेने"ति ।

मू० * "प्रमाणेन बोध्यमानो यदीयसाध्यस्य प्रतिज्ञात-स्याभावः स कालात्ययापदिष्ट ? *-इति चेन्न, स्वार्थानुमाने कालात्ययापदिष्टस्यैवमव्यापनात्' तत्र शब्दरूपस्य प्रतिज्ञानस्याभावात् 'शब्दस्य परा-

---

(१) न प्रमाणबोध्यः, पक्षतावच्छेदकगगनीयत्वव्यतिरेकस्यैव तत्र साक्षात्प्रमाणबोध्यत्वादिति भावः । (२) न प्रमाणबोध्यः, पक्षतावच्छे-दकसाध्यसंशयव्यतिरेकस्यैव तत्त्वादिति भावः । प्रत्युताश्रयासिद्धिस्व-रूपासिद्ध्योरुभयोः पक्षस्यैव स्वरूपतस्तात्प्रमाणबोध्यत्वम् । (३) सिद्धा-विति बाधस्याप्युपलक्षणं, तेनाद्योदाहरणमपि संगृहीतंभवति ।

र्थत्वात् * प्रमाणेन बोध्यमानो यदीय साध्यस्य [d]पक्षनिविष्टस्य व्यतिरेकः स कालात्ययापदिष्ट ? *-इति चेन्न, [e]तथा भूतस्य पक्षाभासत्वाभ्युपगमेन मुख्यपक्षार्थत्वासम्भवात् पक्षाभासनिविष्टस्येति क्रियमाणेतु [f]पूर्वं पक्षाभासत्वप्रतीतिपक्षयोः पूर्वं हेत्वाभासत्व प्रतित्यप्रतीतिपक्षोक्तदोषवत् दोषो द्रष्टव्यः पक्षत्वाभिमतांशभूतस्येति क्रियमाणे च प्रष्टव्यं किं पक्षत्वाभिमतत्त्वं ? पक्षतयाभ्युपगमानत्वम् १ अथ पक्षतया प्रमितत्त्वम् २ उत पक्षतयाप्रतीतिमात्रत्वम् ३ नाद्यः [g]दूषकं प्रति तदसम्भवात् तेन बाध्यसाध्यस्य पक्षाभासतयैव प्रत्युताङ्गीकारात् ।

टी० ॥ यद्यपि बाधे हेतुव्यापकत्वं साध्यस्य न सम्भवति तथापि प्रतिज्ञान्तरत्वं भवत्येवेति तदादाय शङ्कते । [a]"प्रमाणेने"ति ॥ [b]"तत्रे"ति । साध्यनिर्देशः प्रतिज्ञेतिलक्षणानुसारादित्यर्थः ननु स्वार्थानुमानेप्रतिज्ञैव कथं नास्तीत्यत आह— [c]"शब्दस्ये"ति । [d]"पक्षनिविष्टस्ये"ति । तथाच न स्वार्थानुमानबाधाव्याप्तिस्तत्र प्रतिज्ञाविरहेऽपि पक्षसम्भवादिति भावः क्वचिदपि बाधे पक्षता नास्तीति मतोऽव्याप्तिरित्याह । [e]"तथा भूतस्ये"ति । पक्षाभासत्वप्रतीतावाश्रयासिद्ध्यैवानुमानदूषणे बाधानवकाशादित्याह । [f]"पूर्वमि"ति ॥ [g]"दूषकं प्रती"ति । बाधमुद्भावयन् वास्तवीं पक्षतां नाभ्युपगच्छतीत्यर्थः ॥ [h]"बाध्यसाध्यस्ये"ति बाध्यं साध्यं यस्येत्यर्थः ।

सू० [a]अनुमानबाधापेक्षयापि नियमाभावः सदनुमानास्फूर्तौ मन्दप्रज्ञेन पक्षाभिमानवता च मयि वदति स्फुटं दोषमपि को दूषयितुं शक्त इत्यभिप्रायेण यदृच्छया ज्ञातदोषस्यापि प्रयोगस्य सम्भवात्तत्रानुमानवादिना पक्षत्वाङ्गीकारभावेन तथाभूतबाधिता-

नुमानाव्यापकमिदं लक्षणं स्यात् [b]* न च पक्षतयो-पन्यस्यमानत्वमङ्गीकारार्थं * इति युक्तं, [c]तथा सति स्वार्थानुमाने कालात्ययापदेशाव्याप्तिः नापि द्वितीयः [d]पक्षत्वेन प्रमिते विषये कालात्ययापदेशानवकाशात् नापि तृतीयः तदा ह्येवं लक्षणमिदं सम्पद्यते प्रमाणेन बोधितो यदीयसाध्यस्य [e]पक्षप्रतीतिविषयांशस्य व्यतिरेकः स कालात्ययापदिष्ट इति ।

टी० ॥ ननु व्याघातादिना स्वपक्षः पक्षत्वेनाभ्युपगम्य । एवेति नासम्भव इत्यत आह—। [a]"अनुमाने"ति । यत्र प्रौढो वादी बाधितमपि साधयितुं प्रक्रमते तत्राव्याप्तिरित्यर्थः अपक्षस्यापि पक्षतयोपन्यासः सम्भवतीति नाव्याप्तिरित्यत आह । [b]"नचे"ति । [c]"तथा सती"ति । तत्रोपन्यासो नास्तीति भावः ॥ [d]"पक्षत्वेने"ति । बाधस्थले पक्षताविघटकत्वादित्यर्थः ॥ [e]"पक्षप्रतीतिविषयांशस्ये"ति । पक्षप्रतीतिविषयस्य धर्मिणोंऽशो धर्मः सिषाधयिषित इत्यर्थः ॥

मू० अस्य च वाक्यार्थस्य न कदाचिदपि सम्भवं पश्यामः [a]यदा तावत्प्रमाणेन साध्यस्य व्यतिरेकबोधस्तदा पक्षप्रतीतिर्नास्ति विशेषदर्शने भ्रमस्यानवकाशात् [b]ततश्च तदा पक्षप्रतीत्यभावेन तद्विषयत्वाभावात् तद्विषयांशस्येति विशेषणाभावाधीनो विशिष्टस्य लक्षणात्मनोऽभावः [c]यदा च प्रमाणेन साध्यव्यतिरेकबोधनं नास्ति तदा [d]तस्यैव लक्षणभागस्याभावाल्लक्षणाभाव इति [e]नित्यमसत्त्वव्यवस्थितेन लक्षणेन लक्ष्यं व्यवस्थापयन् श्लाघनीयप्रज्ञो भवान् ॥

टी० ॥ अत्र च प्रतीतिर्भ्रान्तिर्विवक्षिता प्रमाया दूषितत्वात् यदा साध्याभावप्रमा तदा पक्षप्रतीतिर्भ्रमरूपा न सम्भवतीत्य-

सम्भवो लक्षणस्येत्यत आह—। "यदी"ति। यद्यपि साध्याभा-
वप्रमा साध्यभ्रमं प्रतिबध्नाति न तु पक्षत्वभ्रममपि भिन्नविषय-
त्वात् तथापि सन्देहविषयविषयं विघटयन्ती तद्घटितपक्षत्व-
ज्ञानमपि विघटयत्येवेति भावः तथा च लक्षणे को दोष इत्यत
आह। "तदे"ति। तथा च साध्याभावप्रमाया पक्षप्रतीतेर-
भावात्तदुत्तरकालत्वघटितदुष्टलक्षणाभाव एवेत्यर्थः ननु साध्य-
विपरीतप्रमाया पक्षप्रतीतिर्मा भूत् तु तदभावप्रमया स्यादेवेत्यत
आह— "यदी"ति॥ "तस्यैवे"ति। प्रमाणेन बोधित इत्यस्यैव
भागस्येत्यर्थः तथा च विशेषणद्वयविशिष्टस्य लक्षणस्य न कदापि
सम्भवमित्याह। "नित्यमि"ति। असम्बद्धव्यवहितेन व्य-
वच्छिन्नतामत्वेन॥

मू० [a] * नच वैशेषिकप्रक्रियामाश्रित्य विनश्यदवस्थापि
पक्षप्रतीतिस्तत्काले सम्भावनीया * तदीयसाध्य-
व्यतिरेकावगमनिवर्त्तनीया हि सा तत् साध्यव्य-
तिरेकावगमश्च पूर्वमेव भूत इत्यवश्याभ्युपगमनम्
[b] अन्यथा प्रमाणेन बोध्यमानत्वं कथं साध्यव्यति-
रेकस्य तदावगम्येत।

टी० ॥ ननु पक्षप्रतीत्यव्यवहितोत्तरक्षणे साध्यविपरीत-
प्रमा स्यादिति विशेषणविशेष्योभयभागव्यवच्छेद्यतो कथं व्यव-
च्छिन्नामस्य लक्षणं नहि विनश्यदवस्थेनापि ज्ञानेन यौगपद्य-
माङ्गीक्रियत इत्यत आह। "नचे"ति। दोषोद्भावनकाले
हि साध्यव्यतिरेकस्य प्रमाणेन बोध्यमानत्वमवश्यमभ्युपेय-
मन्यथा तद्गर्भबाधानुद्भावनापत्तेः (१) तथा च तदुत्तरं पक्षप्रती-
तिर्वाच्या सा च कथं विशेषदर्शने सति स्यादिति विनश्यदव-
स्थयापि तया न यौगपद्यमित्यर्थं बाधावतारानन्तरं पक्षप्रती-
तिर्विवक्षिता न तु वैपरीत्यमित्यत्र विनिगमकमाह। [b] "अ-
न्यथे"ति। यदि साध्यव्यतिरेकप्रमा पूर्वं भाता न विवक्षिता

(१) तद्व्यतिरेकगर्भबाधानुद्भावनापत्तेः, स साध्यव्यतिरेको गर्भे यस्य बाधस्य तस्य अनुद्भावनापत्तेरित्यर्थः।

तदा वह्न्यादेः पक्षतयोपदर्शनकाले (१) प्रमाणत्रोध्याभाववत्त्वं कथमुद्भाव्येत विशेषणीभूतस्य बाधस्य त्वया तदानीमनभ्युपगमादित्यर्थः यत्तु विनश्यदविनश्यद्वस्तुनोः क्षणमात्रं सहभावेऽपि नोद्भावनकाले साहित्यमिति व्याख्यानं तच्चिन्त्यं शङ्कोत्तराभ्यामसंस्पर्शादिति बोध्यमानत्वमिति वर्तमानतया निर्देशो विशेषणत्वलाभाय ।

मू० [a] * नच वाच्यं प्रतीतिविषयत्वमिदं विशेषणं न भवति किन्तूपलक्षणम् उपलक्षणेन चासतापि व्यवच्छिन्नप्रतीतिरुपजन्यते यथा काकवन्तो देवदत्तगृहा इत्युपलक्षणीभूतया काकवत्तया देवदत्तगृहस्य व्यवहारकाले इति * [b] यतस्तत्रोपलक्ष्यो देवदत्तगृहस्य स्वाभाविको विशेषोस्ति व्यवहारकाले तेन काकवत्ताभावेपि तमादाय व्यवहारनियमप्रवृत्तिः न तु तत्रापेक्षित उपलक्षणस्य कारणत्वं अत्र तु व्यक्तीनामुपलक्ष्यत्वे लक्षणस्याननुगमत्वम् अनुगतं च किञ्चिदुपलक्ष्यं न लक्षयामहे ।

टी० ॥ ननु साध्यव्यतिरेकप्रमायत्प्रतीत्योर्यदि न यौगपद्यं तथाप्यनन्तरत्व(२)मुपलक्षणमस्तु तस्य हि स्वासत्त्वकालेऽपि व्यवर्तकत्वमित्याशङ्क्य परिहरति । [a] "नच वाच्यमि"ति । काकवत्तया असत्यपीति शेषः दार्ष्टान्तिके दृष्टान्तवैषम्यमाह— [b] "यत इति" । यथा तत्रोत्तुङ्गत्वादिकमुपलक्ष्यतावच्छेदकमस्ति न तथा प्रकृते ह्रदादेः प्रत्येकमुपलक्ष्यत्वेननुगम इत्यर्थः तमादाय उत्तुङ्गत्वादिकं विशेषमादाय व्यवहारनियमप्रवृत्तिः व्यावृत्तप्रतीतिः तथा चोत्तुङ्गत्वस्यैव व्यावृत्तबोधकारणत्व तत्वमतः

(१) वह्निरनुष्णो द्रव्यत्वादित्यादिस्थले वह्न्यादेः पक्षतयोपदर्शनकाले इत्यर्थः । (२) अत्र मूलेनैकवाक्यतार्थं "न भवति, तथाच पक्षप्रतीतिविषयत्वम्"—इत्यध्याहृत्योपलक्षणमस्त्विति योज्यम् । यद्वा पक्षप्रतीतिलक्षणविशेषणविशिष्टानन्तरत्वस्योपलक्षणत्वे व्यवस्थाप्ये विशेषणीभूतपक्षप्रतीतेरप्युपलक्षणत्वम् ।

काकस्येत्यर्थः काकसत्त्वकाले काकवन्तो देवदत्तगृहा इति वाक्येनान्वयानुपपत्त्या काकपदस्योप णत्वे लक्षणा प्रत्यक्षकाले च काकपरिचायितोपलक्षणत्वस्यैव विशिष्टप्रतीतिविषयत्वं न तु काकस्यापीति भावः ।

मू० [a]अत उक्तमेव वाक्यार्थमादाय प्रवर्तमाने लक्षणात्मके साधने विशेषणासिद्धिर्दुर्निवारा [b]एतेन पूर्वं शङ्कितस्य हेतुरित्यस्य प्रत्यक्षाभासव्यवच्छेदार्थमुपात्तस्य स्थाने हेतुत्वाभिमत इत्येतादृशस्य करणं दूषितप्रायम् [c]* अथ त्रुषे प्रमाणेन बोधितो यदीयसाध्यस्याभावः स प्रत्यक्षाभासातिरिक्तः कालात्ययापदिष्ट ? *-इति नैतदपि सुस्थम्, शब्दोपमानाभाससाधारण्यात्तदूरातिरिक्त इत्यपि विशेषणीयमिति चेदेतदपि विचार्यतां किं प्रत्यक्षाभासादिव्यतिरिक्तत्वं प्रत्यक्षाभासादिभ्यो वैधर्म्यं किञ्चित् उत स्वरूपभेदः अथवान्योन्याभावः न तावदाद्यः ।

टी० ॥ ननु प्रतीत्योर्विशेषणत्वोपलक्षणत्वयोरभावे को दोष इत्यत आह । [a]"अत"इति । प्रमाणबोध्यमानपक्षप्रतीतिविषयांशव्यतिरेकत्वाद्यदा व्यापनानुमानस्यासाधकत्वमनुमेय तदा स्वरूपासिद्धिः स्यादित्यर्थः यद्वा बाधस्येतरभेदे साध्ये लक्षणस्य वाक्यार्थस्य हेतोः स्वरूपासिद्धिरित्यर्थः॥ [b]"एतेने"ति। अभिमतिरभ्युपगमः प्रमा वा भ्रान्तिर्वेत्यादिविकल्पदोषेणेत्यर्थः अत्रापि हेतुत्वेनाभ्युपगमो न प्रतिवादिनः तेन हेत्वाभासत्वेनैव वादिहेतोरभ्युपगमात् नापि वादिनः प्रौढेन वादिना हेत्वाभासत्वाभिमतेनापि स्थापनाकरणात् प्रमा चासत्ख्यातिनैव अहेतुत्वेन विशेषदर्शनानन्तरं हेतुत्वेन भ्रमा(१)नवकाशादिति भावः पूर्वं शङ्किते लक्षणे प्रत्यक्षाभासातिव्याप्तिवारणाय तदन्यत्वेन विशेषणं शङ्कते—। [c]"अथे"ति ।

(१) अत्र "अपि"--शब्दमध्याहृत्य भ्रमस्याप्यनवकाशादित्यर्थः।

मू० a"तद्भेदकस्य धर्मस्य निर्वक्तुमशक्यत्वात् नापि द्वितीयः b"स्वरूपस्य परस्परव्यावृत्ततया लक्षणानौपयिकत्वात् नापि तृतीयः c"व्यतिरिक्तत्वस्यान्योन्याभावात्मनः प्रत्यक्षाभासादावपि भावेन तद्व्यवच्छेदकत्वानुपपत्तेः * ननु न व्यतिरिक्तत्वमात्रमन्योन्याभावरूपविशेषणमस्माभिर्निरूपितं d"किं नाम प्रत्यक्षाभासादिव्यतिरिक्तत्वं नच प्रत्यक्षाभासादयः स्वात्मभ्य एव भिन्नाः तत्कथमुक्तस्य प्रसङ्गस्यावकाशः अवगतमिदं त्वद्विवक्षितमेतदेव विचार्यते ॥

टी० ॥ a"तद्भेदकस्ये"ति । भेदको हि धर्मः कात्स्न्येनयथापदेशस्य लक्षण भवेत्तन्नाद्यापि न निर्वक्तुमित्यर्थः ॥ b"स्वरूपस्ये"ति । स्वरूपभेदं हि प्राप्ते लक्षण भोगाय. तदन्तरेणापि लक्षण परस्परं स्वरूपभेदस्थितेरिति लक्षणप्रणयनानर्थक्यमित्यर्थः व्यतिरिक्तत्वमन्योन्याभावत्वमात्रं वा प्रत्यक्षाभासादिप्रतियोगिकान्योन्याभावत्वं वा आद्यं दूषयति--। c"व्यतिरिक्तत्वस्ये"ति । अन्त्यमाशङ्क्य दूषयति-। d"किं नामे"ति । प्रतियोगिविशिष्टस्यान्योन्याभावस्य प्रतियोगिनो विशेषणस्यासत्त्वादसत्त्वमिति प्रत्यक्षाभासादिरिति बाधितहेतौ तद्विशिष्टान्योन्याभावस्याप्यभाव एवेति सर्वत्राव्याप्तिरव्याप्तिरित्यर्थः ॥

मू० किं प्रत्यक्षाभासादिभिर्विशेषितोन्योन्याभावस्त्वयोच्यते उत तैरुपलक्षितः यं प्रत्यक्षाभासादिष्वप्रसक्तं मन्यसे आद्यस्तावन्न सम्भवति नहि प्रतियोगिरूपविशेषणसहितोभावः क्वचिदप्यस्ति ततस्तादृशस्य विवक्षितत्वे सर्वाव्याप्तिः द्वितीये तु a"प्रत्यक्षाभासादिभिरुपलक्षणैर्यदुपलक्ष्यमन्योन्याभावस्य स्वरूपमेकं तत्प्रत्यक्षाभासादिषु बाधितानुमानेषु च

साधारणमिति कथं नोक्तदोषप्रसङ्गः [b]अन्यदस्तु यदात्मकं विशेषणं प्रतियोगीत्वभावस्यासत्त्वेव तज्ज्ञानस्य विशेष्ये व्यावृत्तबुद्ध्याधानाविरोधात् विशेषणं भवतीति चेत् * अयुक्तमेतत्,

टी० ॥ ननु प्रतियोगिनो न विशेषणत्वं येन घटान्योन्याभाववति पटे घटाभावात्तदन्योन्याभावोपि न भवेदपि तूपलक्षणं तथाच नोक्तदोष इत्यत आह—। „"प्रत्यक्षाभासादिभिरि"ति । प्रत्यक्षाभासादिकालात्ययापदिष्टयोरेक एवान्योन्याभावः स यथा कालात्ययापदिष्टे तथा प्रत्यक्षाभासादावपीत्युक्त एव प्रसङ्गोऽनिव्याप्तिरूप इत्यर्थः ननु देशतः कालतो वा असतोपि प्रतियोगिनो विशेषणत्वमेव तथाच नोपलक्षणपक्षोक्तातिव्याप्तिर्दोष इत्याह—। [b]"अन्यदस्त्वि"ति । अन्य द्रव्यगुणकर्मादि तथाच कालात्ययापदिष्टे प्रत्यक्षाभासासत्त्वेपि तद्विशिष्टान्यदन्योन्याभावः स्यादेवेति न सर्वाव्याप्तिरितिभावः ।

मू० "विशिष्टं तावदभावस्य स्वरूपमिहोपात्तं तच्च विशेष्यमात्रशरीरं न भवितुमर्हति तथा सति विशेष्यस्वरूपमेवोच्यतां वृथा विशेषणपदोपन्यासः तदुपन्यासे चान्योन्याभावत्वमात्रमुपन्यस्तं भवेत्तच्च प्रत्यक्षाभासादेर्व्यवच्छेदस्य सङ्ग्राहकं ततश्च विशेष्यादन्योन्याभावादधिकं किञ्चिद्वक्तव्यं तद्विशिष्टमुपन्यस्यतां [b]सच यदि प्रतियोगी तदीयोभिधीयते तर्हि तस्याभावात्तदानीं विशिष्टाभावः प्रसक्तः विशेष्यमात्रं परिशिष्टं तच्च केवलमतिप्रसक्त तस्माद्विशिष्टव्यवहारप्रवर्त्तनकाले विशेष्यातिरिक्तं किञ्चिदनभ्युपेत्य विशिष्टसत्ता व्यवहर्त्तुमशक्या अतः प्रतियोगी नाभावस्य विशेषणं भवितुमर्हति उपलक्षणं तु स्यात्तत्र चोक्तमेव [c]नचान्यो-

न्याभाव एको न भवति भिन्नप्रतियोगिनौ द्वावभावौ तौ तथाच प्रतियोगिलक्षितं तत्स्वरूपमन्यदेवेति सिद्धान्ताविरोधि, नच युक्तम् ॥

टी० ॥ विशेषणाभत्वेपि विशेष्यस्यान्योन्याभावमात्रस्य हत्वाद्यदि लक्षणगमनमुपपादितं तदा विशेष्यमात्रवहि प्रत्यक्षाभावादावपि लक्षणमतिव्यापकमित्याह—। [a]"विशिष्टं तावदि"ति । ननूक्तं प्रतियोग्येव स्वज्ञानद्वारा व्यावृत्तबुद्धिं जनयद्विशेषणमित्यत आह—। [b]"स च यदी"ति । तर्हि विशेषणस्य प्रतियोगिनोन्योन्याभावे(१)देशतः, संसर्गाभावे च कालतोप्यभावाद्विशिष्टस्याऽन्योन्याभावस्याभावः प्रसक्त इत्यन्योन्याभावमात्रमवशिष्यते तत्रातिप्रसक्तिरुक्तैवेत्यर्थः ननु यदि प्रत्यक्षाभावादिकालात्ययापदिष्टयोरेक एवान्योन्याभावो भवेत्तदा प्रत्यक्षाभावान्योन्याभाववत्त्वं प्रत्यक्षाभासेपि स्यादित्यति प्रसक्तो भवेत्किं नाम प्रतियोगिभेदादन्योन्याभावभेदोपीत्यत आह—। [c]"नचे"ति ॥

मू० [a]"उभयं ह्यन्योन्याभावस्यैकात्मतया प्रतियोगि एकात्मतायाश्च भेदविरोध एव ततश्च येन रूपेण प्रतियोगित्वं तेन रूपेण भेदानवकाशाद्भिन्नप्रतियोगिता कुतोऽन्योन्याभावस्य येन रूपेण भिन्नता तेनान्योन्याभावं प्रति प्रतियोगिता नास्ति वस्तुनोः [b]*ननु वस्तुतस्तयोरेकत्वाभावात्कथमेकतया प्रतियोगित्वमन्योन्याभावं प्रति घटते वस्तुनोः* [c]यथा वस्तुनो भूतलसंसर्गाभावेपि घटस्य भूतलसंसृष्टतया भूतलसंसर्गाभावं प्रति,

टी० ॥ अभावद्वैतं न सिद्धान्ताविरोधि नवा युक्तमित्यु-

(१) अन्योन्याभावे (गृह्यमाणे) विशेषणस्य प्रतियोगिनो देशतोऽभावादित्यन्वयः। अयमर्थः—यो देशो घटीयऽन्योन्याभावेनोपहितः स कदाचिदपि तादात्म्येन घटात्मकप्रतियोग्युपहितो न भवतीति। अन्योन्याभावस्य कालिकाव्याप्यवृत्तित्वाभावात् 'कालतोऽभावात्'—इति नोक्तम्।

थमुपपादयति–। [a]"उभय"मिति । घटपटतादात्म्यं प्रतियोगि वाच्यमन्योन्याभावे संसर्गाभावभेदकं तच्चात्यन्तासदि(१)ति तदात्मीभूतौ घटपटावेव प्रतियोगिनौ तथा च तयोरैक्यात्क्व प्रतियोगिभेदो येनाभावभेदः । स्यात् किन्तु घटपटयोर्भेदोऽन्योन्याभावः स च व्यासज्यवृत्तिरेक एव वाच्यो भेदे प्रमाणाभावात् घटपटौ भिन्नावित्येकस्यैव भेदस्यान्योन्याभावात्मन उभयविशेषणतया भानसम्भवे तद्भेदकल्पनाया प्रमाणाभाव इति भावः ननु घटपटयोर्यद्यैक्यं स्यात्तदा प्रतियोगिभेदाभावादभावभेदो न स्यात्तदेवत्वमसम्भवीत्याह–। [b]"नन्वि"ति । यथा घटभूतलयोरसन्नपि संसर्गः प्रतियोगितावच्छेदकस्तथा तादात्म्यमपि घटपटयोस्तथास्यात्तथा च तदात्म्यावच्छिन्नौ तावभिन्नाविति कथं प्रतियोगिभेद इति दृष्टान्तेनोपपादयति–। [c]"यथे"ति ।

मू० [a]तत्र यथान्यद् भूतल(२)संसृष्टतया दृष्टं तथात्रापि तावेव [b]सप्रकारभेदौ तदात्मानौ दृष्टौ [c]सोयं त्वद्दर्शनाभिप्रायो नास्माकं निर्वाह्य इत्यास्तां विस्तरः [d]अपि च घटपटयोः स्वरूपभेदेन वैधर्म्यभेदेन चोभयकोटीकृतयोरन्योन्याभावनिरूपणं भवति अत्र तु प्रत्यक्षाभासादेः प्रत्यक्षाभासत्वादिनैककोटितास्तु नाम यस्तु प्रत्यक्षाभासादिव्यतिरिक्ततया प्रतिपत्तव्यं तस्य केन रूपेणैककोटीकरणं न तावत् प्रतिव्यक्तिभिन्नेन स्वरूपेण तेषामनन्ततया बुद्धिस्थीकर्तुमशक्यत्वात् नापि यद्रूपतयोपात्तं विशेष्यं प्रत्यक्षाभासादिव्यतिरिक्तत्वेन विशेषणेन विशेषणीयं

(१) घटपटस्वरूपातिरेकेण घटपटतादात्म्यमसदित्यर्थः ।

(२) सम्बन्धितयेत्यर्थः ।

तद्रूपक्रोडीकृततयै(१)वान्योन्याभावनिरूपणमिति युक्तं तस्य रूपस्य प्रत्यक्षाभासादसङ्ग्राहकतया कोटिद्वैतभङ्गापादकत्वेनान्योन्याभावनिरूपणाविरोधात्तस्मात्स्वरूपभेदं वैधर्म्यभेदं वा कोटिद्वयव्यवस्थापकमप्रतिसन्धायान्योन्याभावनिरूपणमशक्यमितिस्थिते स्वरूपभेदपक्षस्येह

टी० ॥ ननु तत्र घटान्तरं न पत्र वा घटो भूतलसंसृष्टो दृष्ट प्रकृते तु घटपटौ न कदापि तदात्मानाविति वैषम्यमत आह—। [a]"तत्रे"ति ॥ [b]"सप्रकारभेदावि"ति । घटपटयोरपि प्रमेयत्वसत्वद्रव्यत्वप्रकारभेदसहितत्वयापि तादात्म्यमभ्युपेयं नहि तत्तत्प्रकारकतोऽप्यनयोर्भेदस्तथाननुभवादित्यर्थः ननु तत्रानिर्वचनीयवादिन कथमय निरुक्तिग्रह इत्यत आह—। [c]"सोयमि"ति । भवतु प्रतियोगि भेदादन्योन्याभावभेदस्तथापि प्रकृते स दुर्ग्रह इत्याह-। [d]"अपि चे"ति । यथा प्रत्यक्षाभासत्वं प्रतियोगितावच्छेदक तथा सकलकालान्ययावदिष्टमात्रनिष्टमधिकरणतावच्छेदक किञ्चिन्न गृहीतमस्तीत्यर्थ. ननु प्रमाणेन बोधितसत्त्वविषयकत्व तादृश रूपं निरुक्तमेव तथा स्यादित्यत आह । "नापी"ति । तस्य रूपस्य प्रत्यक्षाभासेपि सत्त्वात्कथमधिकरणतावच्छेदकत्व स्यात्प्रतियोग्यवृत्तिधर्मस्यैव तथात्वाभ्युपगमादित्यर्थः ।

मू० "दूषितत्वात् धर्मभेदः कश्चिद्वक्तव्यः नचासौ वक्तुं शक्यः [b]शक्यत्वे वा तमादायव लक्षणव्यवस्थितिरस्तु कृतमन्योन्यव्यतिरिक्तत्वकुयुक्त्या तदनेनान्यथाप्यतिप्रसक्त्युदाहरणान्यत्वेन व्यावर्त्तनं लक्षणवादिनो भग्नस्य शरणमस्तु निरसनीयम् अत एव भेदकान्तरं विना तद्व्यतिरिक्तत्वमेव दुर्निरूपमित्यभिप्रायेण तत्तादन्यत्वे सतीति विशेष्यमाणं

(१) तद्रूपासत्प्रभावेनैवेत्यर्थः ।

वैशेषिकहेतुं "नैतदेवं येन व्यभिचारस्तदन्यत्वे-
इति प्रमेयत्वादिति सत्प्रतिपक्षहेतूपन्यासादुपहस-
न्तिसन्त इति ॥

इति श्रीश्रीहर्षकृतखण्डने प्रमाणतदाभासखण्डनं नाम

प्रथमः परिच्छेदः समाप्तः ॥

— — —

टी० ॥ [a]"दूषितत्वादि"ति । तस्यानन्तत्वात्प्रत्येकमसा-
धारणत्वाच्चेत्यर्थः ननु निरूपणीयः स कश्चिद्धर्मो यः
सकलकालान्ययापदिष्टसाधारण इत्यत आह—। [b]"शब्दत्वे
वे"ति ॥ [c]"वैशेषिकहेतुमि"ति । इतरभेदसाधकं लक्षणमि-
त्यर्थः ॥ उपहास्यतामाह—। [d]"नैतदेवमि"ति । गुण इतर-
भिन्नः कर्मान्यत्वे सति सामान्यवत्त्वे सति निर्गुणत्वात्
यन्नैव तन्नैवमित्यादि एव वैशेषिकेन प्रयुक्ते गुणो नेतरभिन्नः
प्रमेयत्वात् व्यभिचारि चेदिह स्यात्तदा तत्तदन्यत्वेन विशेष्य-
मित्युपहसन्तीत्यर्थः ॥

इति प्रथमः परिच्छेदः ॥

खण्डनखण्डखाद्यम् ॥

अथ द्वितीयः परिच्छेदः ।

मू० (१)* ननु यदि दुर्लक्ष्या हेत्वाभासास्तर्हि निग्रहस्थानानि प्रतिज्ञाहान्यादीनि aबाधकानि भविष्यन्ति * मैवं, b(२)का पुनः प्रतिज्ञाहानिः स्वीकृतोक्तपरित्यागः प्रतिज्ञाहानिरित्यलक्षणं तथाहि । cझटिति(३)संवरणे निग्रहस्थानेपि गतत्वेन परदूषितेत्यपि विशेषणीयत्वात् dकिञ्च स्वीकृत्येत्यनेनाभीष्टमात्रं वाभिधीयते अस्तित्वेनेष्टं वा आद्ये eकेनचिद्रूपेणेष्टस्य रूपान्तरेण परित्यागः क्व नाम नास्तीत्यतिव्याप्तिः fस्वीकारपूर्वकोऽस्वीकारस्त्यागः * नच रूपान्तरेण तत्र स्वीकारस्ततस्त्याग एवासौ न भवतीति नातिप्रसङ्ग * इति चेन्न, gस्वीकारस्यापि त्यागपदार्थान्तर्भावे स्वीकृतेति व्यर्थं hतत्त्यागेपि च नाद्यद्वितीयौ अस्तित्वेनेष्टस्य iरूपान्तरेण सर्वत्रैवानिष्टत्वसम्भवात् ॥

टी० ॥ a"बाधकानी"ति । अचैतन्यबाधकानीत्यर्थः यद्वा द्विविजयकौतुकबाधकानीत्यर्थः निग्रहस्थानेषु प्रतिज्ञाहानेः प्राथम्यात्प्रथमं तामाक्षिपति- । b"का पुनरि"ति । परित्यागमात्रमपरिहार्यत्वेनोक्तम् उक्तमुक्तपरित्याग इति तदप्यनूद्य त्यक्ते परमतेऽतिव्याप्तिरित्युक्तं स्वीकृतेति स्वीकारश्च विशिष्टयाभिम

---

(१) प्रमाणतदाभासयोर्दुर्निरूपत्वेऽपि निग्रहस्थानान्येव तद्बाधकानि भविष्यन्तीति शङ्कते-नन्विति ।

(२) { उक्तमित्थं खण्डनं पूर्वं प्रमाण तदभासयोः । निग्रहाणां निकेतानि क्रमशः खण्ड्यतेऽधुना । }

वादिप्रतिवादिनोऽसामर्थ्यबोधकत्वं निग्रहस्थानत्वमिति सामान्यलक्षणस्य दुःखादावतिव्याप्तेर्विशेषलक्षणं दूषयितुं पृच्छति-केति-(३)पाच्छादने ।

तोऽन्यथा शास्त्राभ्युपगमेन मानान्यतः सिद्धान्तस्याप्युक्तत्वा-त्तत्परित्यागेतिव्याप्तिः स्यात् ॥ [c]“क्षणिक इती”ति । नैयायिकेना-नित्यः शब्द इति प्रतिज्ञातव्ये प्रमादान्नित्यः शब्द इति प्रति-ज्ञाय स्वयमेव त्यक्ते प्रतिज्ञाहानिस्तावन्न भवतीति तत्रातिव्याप्तिवारणार्थं परदूषितेति विशेष्यमित्यर्थः अस्तु तदपि विशे-षणमिति चेत्तर्हि लक्षणकर्तुर्हैत्वन्तरनिग्रहापत्तिः प्रथममविशिष्ट-स्यैवोक्तत्वात् विशेषणान्तरेऽपि दोषमाह—। [d]“किञ्चे”ति । “केनचिद्”िति गुणत्वेन स्वीकृतस्य शब्दस्य नैयायिकेन नित्य-त्वेन परित्यागे प्रतिज्ञाहानिः स्यादित्यर्थः ननु नित्यत्वेन शब्दस्य तदा स्वीकार एव न जातोऽतस्तत्र परित्यागोऽपि नास्ती-ति नातिव्याप्तिरिति शङ्कते—। [f]“स्वीकारे”ति । परित्यागपदार्था-न्तर्भूत एव चेत् पूर्वस्वीकारोऽपि तदा परित्याग इत्येवास्तु लक्षणं किं स्वीकारपदप्रक्षेपेणेत्याह—। [g]“स्वीकारस्ये”ति । स्वीकृ-तेति पदत्यागेऽपि विकल्पितौ पक्षौ न सम्भवत इत्याह—। [h]“त-त्यागेऽपि चे”ति । आद्यपक्षस्य दूषितत्वेऽपि दोषान्तरदानाय पुन-र्विशेष्यत्वेनोपग्रह ॥ “रूपान्तरेणे”ति । नित्यत्वादिनेत्यर्थः ॥

मू० [a]संयोगाद्यव्याप्यवृत्तितावादिपक्षे चैकस्यैव संयोगस्यास्तित्वनास्तित्वाभ्यामभ्युपगम्यमानत्वात् [b]एवं च कालदेशादिभेदेन सत्त्वासत्त्वाभ्युपगमेतिप्रसङ्गो द्रष्टव्यः [c]तस्यैव च तदैव तत्रैव तेनैव तथैवेष्टत्वाऽनिष्टत्वे विवक्षिते अत्रेति चेत् [d]एवं तर्हि कालमभ्युपगम्यानभ्युपगच्छतः प्रतिज्ञाहानिर्न स्यात् [e]तत्र तदेत्युक्तविशेषणस्यासम्भवात् [f]नहि कालः कालान्तरं स्वात्मानमेव वाध्यास्ते [g]काले तदेतिविशेषणस्य(१)प्रतिक्षेपेऽन्यत्र च प्रक्षेपे लक्षणस्यैकताक्षतिः ॥

टी० ॥ स्वीकारपरित्यागयोरैकरूप्यावच्छेदेनापि विवक्षायां दोषमाह—। [a]“संयोगे”ति । देशकालभेदेनैकस्य स्वीकार-

(१) अप्रक्षेपे इत्यर्थः ।

परित्यागौ चातिप्रसञ्जकावित्याह [b]"एवं चे"ति । ननु देश-कालपुरुषाद्यभेदेन स्वीकारपरित्यागौ विवक्षिताविति नातिप्रसङ्ग इत्याह-। [c]"तस्यैवे"ति । असम्भवदप्येतदभ्युपगम्य दूषयति-। [d]"एवं तर्ही"ति । कालोऽस्तीति प्रतिज्ञाय कालो नास्तीति ब्रुवन्नपि प्रतिज्ञाहान्या न निगृह्येतेत्यर्थः अत्र हेतुमाह-। [e]"तत्रे"ति । तत्र काले तदेत्युक्तविशेषणाभावादित्यर्थः ॥ [f]"तदा"ति । कालान्तरस्याभावादात्मन्यप्यासत्त्वात्मात्रयदुष्टत्वादित्यर्थः यद्यपि काले कालाभ्युपगमेपि न दोषः अभ्युपगमस्य भ्रमनिबन्धनत्वेनाप्युपपत्तेः किन्तु तदेतिविशेषणस्य कालाभ्युपगमपरिहाराश्रयत्वेन कालस्याधिकरणत्वे तात्पर्यं नौ च कालतोभिन्नावेवेति न विरोधः किन्तु कालेपि कालो वर्त्तते एव अन्यथा कालस्यावर्तमानत्वापत्तेः स्वावच्छिन्नकालवृत्तित्वस्यैव कालस्य वर्तमानत्वात् तथापि तादृप्यमपि(१) खण्डनीयमेवेति भावः ननु काले प्रतिज्ञाहानिस्तदेतिविशेषणमपहायैव लक्षणीयेत्यत आह-। [g]"काले"इति ॥

मू० [a]कालं प्रति च प्रतिज्ञाहानेरदोषत्वे तद्वदन्यत्राप्यदोषत्वापातः [b]यदैव स्वीकारस्तदैवास्वीकारासिद्धेश्च * [c]तदेति तत्कथाकालो विवक्षित(२) ?-इति चेन्न, [d]तच्छब्दस्यै(३)कव्यक्तिपरत्वे लक्षणाननुगमः [e]वादादित्वेन साम्ये कदाचिदपि तद्विपरीतवादान्तराकरणप्रसङ्गः [f]एवं तथैव तस्यैवेत्यादिपदस्य द्रष्टव्यम् उक्तपदस्य चापसिद्धान्तव्यवच्छेदकस्य ।

टी० ॥ ननु कालनास्तिताभ्युपगमे प्रतिज्ञाहानिरेव न भवतीति माठ्याप्तिरित्यत आह-। [a]"कालं प्रति चे"ति । लक्षणेऽसम्भवदोषमाह-। [b]"यदैवे"ति । ननु यदा तदेति पदे

---

(१) "यदैव स्वीकारस्तदैवाऽस्वीकार"-इत्यनेन वा वर्त्तमानत्वखण्डनेन वा साधारणखण्डनकोट्या वा खण्डनीयमित्यर्थः ।

(२) विवक्षित इत्यत ऊर्ध्वं नैकक्षणकालीयेनासम्भवस्यादिति पूरणीयम् । (३) कथैकव्यक्तिपरत्वे-इत्यर्थः ।

नैककथायां येनासम्भवः स्यात् किन्त्वेककथायामेव कालसत्ता-
स्यामभिधीयते इत्याह-। "तदेती"ति । एकमात्रकथापरत्वे
तच्छब्दस्य कथान्तरप्रतिज्ञाहान्यनुपग्रह इत्याह-। [d]"तच्छ-
ब्दस्ये"ति । ननु वादे स्वीकृतस्य वादे एव परिहारे प्रतिज्ञा-
हानिरिति नानुगम इत्यत आह- [e]"वादादित्वेने"ति । वादा-
स्वीकृतस्य वादान्तरे परिहारे प्रतिज्ञाहानिः स्यादित्यर्थः
जल्पवितण्डयोः प्रतिज्ञाहान्यनङ्ग्रहः तत्कथाप्रक्षेपेऽप्येवमूह्यं क-
थापदप्रक्षेपेऽपि प्रतिज्ञाहानिर्दोषः स्यादिति भावः ॥ [f]"एवमि"
ति । तथेति यदि प्रकारविशेषो विवक्षितस्तदा प्रकारान्तर-
स्वीकारत्यागयोरनुपग्रहः प्रकारसामान्यं चेत्तदा किञ्चिद्रूपे-
णाभ्युपेतस्य रूपान्तरेण त्यागेऽपि हानिः स्यादित्यर्थः. स्वीकृत-
परित्यागमात्रस्यैव दोषत्वेऽपसिद्धान्तस्यावर्तनार्थमुक्तविशेषण
व्यर्थमित्यर्थः ॥

मू० "विरुद्धन्यायेनासमर्थविशेषणत्वम् एवं सर्वत्र निग्र-
हस्थाने द्रष्टव्यमिति सङ्क्षेपः [b]प्रतिज्ञाहान्यादीत्या-
दिपदेनापि किं सङ्गृह्यते * प्रतिज्ञान्तरादि ? *इति-
चेन्न, [c]प्रतिज्ञान्तरमेव निरूपयितुं न शक्यते तद्यथा
[c]स्वोक्तस्य [d]परदूषितस्य [e]साध्यभागस्य [f]पूर्वानुक्त-
विशेषणवतोऽभिधानं प्रतिज्ञान्तरमित्यलक्षणं तथा-
हि [g]यत्र वादिना प्रथमं सविशेषणः प्रतिज्ञाभागो-
ऽभिहितः परेण च निर्विशेषणोक्तभ्रान्त्या दूषितस्ततो
वादी प्रथममभिहितं सविशेषणमेवोपन्यस्येदृशं म-
योक्तं ननु निर्विशेषणमतो निरनुयोज्यानुयोगो
भवत इति सदुत्तरमेव ब्रूते तत्रापि गतत्वादति-
व्यापकमेतत् * [h]पूर्वानुक्तविशेषणत्वं तत्र नास्ति
तत्कथमतिव्याप्तिः ? *—इति चेन्न,

(१) विप्रतिपत्तिः—विपरीतप्रतिपत्तिः । (२) निग्रहस्थानद्व-
यो—प्रतिज्ञाहानि-प्रतिज्ञान्तर-खण्डनयोरित्यर्थः ।

टी० ॥ [a]"विरुद्ध"ति । साध्यसाधनसामानाधिकरण्यमात्रस्य दोषत्वे नियमांशवैयर्थ्यं स्यादित्यर्थः तत्रासाधकत्वासाधने विशेषणवैयर्थ्यमत्र त्वप्रतिपत्तिविप्रतिपत्त्योरुद्भावने इति भावः ॥ निग्रहस्थानत्वयोः सङ्गतिमाह । [b]"प्रतिज्ञाहान्यादौ"ति ॥ झटिति संबन्धेन पूर्वानुक्तविशेषणाभिधानेतिव्याप्तिवारणायाह—। [c]"परदूषितस्ये"ति । उदासीनेन तादृशविशेषपूरणेति व्याप्तिवारणाय—। [d]"स्वोक्तस्ये"ति । हेत्वन्तरव्यवच्छेदायाह—। साध्यमात्रस्ये"ति । प्रयोज्यभागे विशेषणपूरणात् प्रतिज्ञान्तरं प्रयोजकभागे तत्पूरणे च हेत्वन्तरमिति विभागात् अप्रतिविशेषणादिकं प्रति कदाचिदुक्तमप्यनूद्यत इति तद्वारणाय—। [f]"पूर्वानुक्त"ति । सूत्राभिमतमर्थं दर्शयति—। [g]"यत्रे"ति । यत्रोक्तमेव विशेषणं पुनः श्रावयति तत्रातिव्याप्तिरित्यर्थः ॥ आशयमविद्वान् शङ्कते—। [h]"पूर्वं"ति ।

मू० (१) प्रथमोक्तेः प्रागभावस्य(२)पूर्वं स्थितत्वात् [b]विशेष्योक्तिरपि तदा नासीदिति चेत्' क्रमायातं तावत्। विशेषणानुक्त्यतिप्रसङ्गस्य (३) "विशेष्योक्तिकाले * विशेषणानुक्तिर्विवक्षिता ? *-इति चेन्न, 'एककर्तृकाया वाचो युगपदसम्भवेन सर्वत्र (४)तथाभावस्यैव भावात् * विशेष्योक्तेरनन्तरकाले ? * इति चेन्न, 'नीलोत्पलमित्यादौ पूर्वनिपातिविशेषणे तदभावात् * विशेष्योक्तेरव्यवहितपूर्वकाले ? *-इति चेन्न, उत्पलं नीलमित्यादौ तदभावात् * [h]अव्यवहिते ? *-इति चेन्न, 'बहुविशेषणके तदभावात् ।

टी० ॥ आशयमुद्घाटयति—। [a]"प्रथमोक्तेरि"ति । अनूद्यमानमपि विशेषणं प्रथमाभिधानात् पूर्वमनुक्तमेवासीदित्यर्थः

(१) प्रथमोक्तेरित्यतः प्रागनूद्यमानेत्यपि ज्ञेयम् (२) पूर्वं स्थितत्वम्—इत्यस्य विशेष्योक्तेः प्रक् स्थितत्वादित्यर्थः। (३) विशेषणानुक्त्या कृतस्यातिप्रसङ्गस्येत्यर्थः। (४) विशेष्योक्तिकाले विशेषणानुक्तेरेव सत्त्वादित्यर्थः।

गूढाभिसन्धिः शङ्कनाह—। [b]"विशेष्ये"ति ॥ यथाश्रुतं दूषयति—। [c]"किमायातमि"ति । अनूद्यमानस्य विशेषणस्य पूर्वमनुक्त्या यः प्रसङ्गः कृतस्तत्र किमायातमित्यर्थः शङ्कितास्याभिसन्धिमाह—। [d]"विशेष्ये"ति । अनूदितविशेषणस्य तु न तदानुक्तिरित्यर्थः कालस्यैकोपाध्यवच्छिन्नतामाश्रयाह—। [e]"एके"ति । विशेष्याभिधानकाले विशेषणाभिधानं न क्वापि वचसः क्रमभावित्वात् तथा च विशेष्योक्तिकालानुक्तमेव विशेषणं सर्वत्रोच्यते इति विशेषणमात्राभिधाने एव प्रतिज्ञान्तरं स्यादित्यर्थः ॥ [f]"नीलोत्पलमि"ति विशेष्योक्त्यनन्तरानुक्तविशेषणोक्तौ नातिव्याप्तिरित्यर्थः विशेष्योक्तयव्यवहितपूर्वकालानुक्तविशेषणोक्तावतिव्याप्तिमाह—। [g]"उत्पलमि"ति । ननु पूर्वत्वमुत्तरत्वं वा न विवक्षितं येनोक्तातिव्याप्तिः स्यादपि त्वव्यवहितत्वमात्रमित्याह—। [h]"अव्यवहिते"इति । एकविशेषणाभिधानापेक्षया बहुविशेषणके व्यवधानस्यावश्यकतया उक्तातिव्याप्तिरित्याह—। "बह्वि"ति ।

मू० * [a]"विशेषणाभिधानोचितकाले ? *-इति चेन्न, [b]नानाविशेषणके विशेष्ये क्रमवृत्तित्वाद्वाचः क्रमेणाभिधीयमाने य एकविशेषणाभिधानकालः सोऽपरेषामपि विशेषणाभिधानानां योग्यो भवत्येवेति तदान्येषां क्रमभाविनामभावात्सैवातिव्याप्तिः * [c]'सर्वस्मिन् योग्ये काले ?*—इति चेन्न, [d]दूषणानन्तरकालस्य योग्यकालत्वाभ्युपगमेऽव्याप्तिः [e]'दूषणपूर्वकालस्य तथाभिमतत्वे च दूषणानन्तरभाविन्या विशेषणोक्तिव्यक्ते[f]स्तदानीमभावात् [g]पूर्ववदतिव्याप्तिः ॥

टी० ॥ व्यवहितोपि कालो बहुविशेषणके विशेषणाभिधानोचित एवेति नातिव्याप्तिरित्याह—। [a]"विशेषणे"ति । सुरभि नीलमुत्पलं विकाशिमनोहरमालुपटलपीयमानमकरन्द-

किन्तु मन्दोऽहमित्यादावन्योन्यविशेषणोक्तिकालानुक्तान्योन्यविशेषणोक्तौ पुनः सैवातिव्याप्तिरित्याह—। [b]"नानाविशेषणके"ति । विशेषणाभिधानयोग्ययावत्कालानुक्तविशेषणोक्तौ प्रतिज्ञान्तरं नाप्यत्रेति शङ्कते । [c]'सर्वस्मिन्नि"ति । एवं तर्हि दूषणोत्तरकालेऽपि विशेषणोक्तौ प्रतिज्ञान्तरं न स्यादित्याह—। [d]"दूषणे"ति । ननु दूषणोत्तरकालो निग्रहापादकतया न विशेषणोक्तियोग्यं किन्तु पूर्वकाल एवेत्यत आह—। [e]"दूषणपूर्वकालद्वये"ति । उक्तस्यैव विशेषणस्याश्रवणाद्वादिना दूषणे कृते पुनस्तद्विशेषणोक्तिर्या सैव दूषणपूर्वकालीना व्यक्तिर्न भवति तथा च तस्यां दूषणपूर्वकालीनविशेषणोक्ता(१)वतिव्याप्तिरित्यर्थः ॥ [f]"तदानीमि"ति । दूषणपूर्वकाले इत्यर्थः ॥ [g]"पूर्ववदि"ति । परेण निर्विशेषणभ्रमाद्दूषितत्वमित्यर्थः ॥

सू० * [a]"सर्वस्यास्तस्यास्तज्जातीयाया विशेषणोक्तेरभावो विवक्षित ? *-इति चेन्न, [b]व्यक्तीनामभावप्रतियोगिभूतानां सर्वासां पृथक् प्रमाणेन केनाप्यस्मादृशा प्रत्येतुमशक्यतया भावानिरूपणेन लक्षणस्याज्ञानादसिद्धिप्रसङ्गात् [c]सामान्यप्रत्यासत्त्या व्यक्तयः प्रतिभान्तीति च निरस्तमनुमानखण्डनावसरे [d]एतेन पूर्वमविशिष्टोक्तस्येति विशेषणं प्रक्षेप्तव्यमिति निरस्तम् [e]उत्तरकालवाच्यविशेषणकविशेष्यस्य प्रथममविशिष्टोक्तत्वसम्भवस्य दर्शितत्वात् [f]किञ्च प्रथममविशिष्टमुक्त्वा भवता यदि विशेषणमिदं प्रक्षिप्यते तदा भवतो हेत्वन्तरं स्यात्तथापि तदभावे वा [g]ममापि कुतः प्रतिज्ञान्तरम् ॥

टी० ॥ [a]"सर्वस्या" इति । प्रकृते विशेषणपूर्वकालीना विशेषणोक्तिरस्त्येवेति नातिव्याप्तिरित्यर्थः सकलविशेषणोक्तिव्यक्त्यभावस्य दुर्ग्रहतया तद्घटितलक्षणस्यापि दुर्निरूपणत्वमि-

(१) दूषणं पूर्वकालीनं यस्या विशेषणोक्तेः सा तथा तस्यामित्यर्थः ।

त्याह—। [b]"ऽयुक्तोमामि"ति । ननु विशेषणाक्तिऽयुक्तयत्नाद्दृ-
ष्टेन सामान्यलक्षणया सामन्ते एवेति कथं प्रत्येतुमशक्या इत्यत
आह । [c]"सामान्य"ति । ननु पूर्वमविशिष्ट मोक्तं परेण तु
न श्रुतमित्यन्यत् तथाच कथं तत्रानिष्ठापत्तिरित्यत आह—।
[d]"एतेने"ति । सुखम मोक्तमित्यत्र पूर्वमविशिष्टस्यैवाभिधान-
मिति तत्रानिष्ठापत्तिरित्याह—। [e]"उत्तरे"ति । लक्षणे प्रयोजकत्वाभावे
विशेषणमिदं क्रमेण प्रतिपत्तौ लक्षणादिना एव हेत्वन्तरं निग्र-
हस्थानमित्याह । [f]"विन्नु"ति ॥ [g]"समापी"ति । यद्यपि खण्ड-
नवादिने प्रतिज्ञान्तरं नोद्भावितमस्ति येनायमनुयोगः स्यात्तथापि
तमेव(१)प्रतिसिद्धान्तिना प्रतिज्ञान्तरं व्यवस्थाप्यते इत्यदोषः ॥

मू० * "अथ प्रथममेवेदं विशेषणमुपादाय ब्रवीषि ?
*—तथाप्यव्याप्तिः [b]प्रथमं सविशेषणमुक्त्वा विशे-
षणवैयर्थ्यभ्रमेण झटितिसंवरणान्निर्विशेषणे ऽभिहिते
परेण दूषिते पुनः सविशेषणमभिदधतो [c]नैवं प्रति-
ज्ञान्तरं स्यादित्यव्याप्तिः (२) [d]स्वपरमाध्यपूर्वप
दानां विवेचने न्यक्तौ पतनादव्याप्तिश्च [e]प्रकरणा-
दिलभ्यतया प्रागनुक्त विशेषणस्य भ्रान्तपरदूषितस्य
प्रकरणलभ्यविशेषणवत्तयानुवदतोपि सद्वादेतिप्रसङ्गः
[f]अनुक्तस्थाने चाप्रतिपादितकरणेपि दोषः [g]परस्मि-
न्नजातप्रतिपत्तौ प्रतिपादितत्वानुपपत्तेः [h]इत्यादि
स्वयमूहनीयं प्रतिज्ञान्तरादीत्यादिपदेन किमिष्ट

(१) सं साम्प्रतिकं प्रत्येव सिद्धान्तिना=सिद्धान्त्यभ्युप-
गन्ता, प्रतिज्ञान्तरं व्यवस्थाप्यमानं स्वस्यैवेत्यर्थः । यदि प्रकृते सिद्धा-
न्ती साम्प्रतिक एवेत्याग्रहस्तदा 'प्रतिसिद्धान्तिना'—इति पदविभागः
कर्त्तव्यः । (२) यत्र प्रथमं पार्थिवपरमाणुरूपरसगन्धस्पर्शा अनित्या
इत्यभिधाय पुनरनित्यत्वरूपविशेषणवैयर्थ्यमाशङ्क्य तूष्णीं विशेषणमपा-
स्यैव प्रयुङ्क्ते पार्थिवपरमाणुरूपरसगन्धस्पर्शा इति ततश्च वादिना
दूषिते यत्पुनरनित्यत्वरूपविशेषणोपादानं तत्प्रतिज्ञान्तरमिति तत्रा-
तिव्याप्तिरव्याप्तिर्वा सविशिष्टोक्तस्यैति विशेषणाभावादिति भावः ।

* प्रतिज्ञाविरोधादि ? *-इति चेन्न,

टी० ॥ ननु पूर्वमविशिष्टोक्तस्येति विशेषणमहित्वमेव मया लक्षणं प्रणीतमिति कुतो मम हेत्वन्तरमित्याशङ्क्य व्याप्तिमाह-। a"अथे"ति। व्याप्तिमेव स्फुटयति-। b"प्रथमि" ति। c"नैवमि"ति पूर्वमविशिष्टोक्तत्वस्य विशेषणस्याभावादित्यर्थः स्वोक्तस्य परदूषितस्य साध्यभागस्य पूर्वानुक्तविशेषणवतोऽभिधानमिति लक्षणे स्वपदं परपदं साध्यपदं पूर्वपदं च विविच्यमानं व्यक्तिविशेषपरं भवेदित्यननुगमो दोष इत्याह-। d"स्वपरे"ति। वर्णात्मक शब्दमधिकृत्य विप्रतिपत्तौ शब्दोऽनित्य इति प्रतिज्ञाया ध्वन्यात्मके सिद्धसाधनदेशनाया वर्णात्मक एव पर्यवसित इत्यव्याप्तिरित्याह-। e"प्रकरणादा"विति। सद्वादे समुपस्थापयति-। f"तदुक्ते"ति। प्रकृते प्रकरणपरिप्राप्ततया विशेषणवतोऽभिधान(१)मेवेति नातिव्याप्तिरित्यर्थः॥ यत्र परं प्रकरणापन्नत्वं न प्रतिपद्यते तत्र प्रतिपादितत्वं नास्तीत्यव्याप्तिरेवेत्याह- g"यत्किमि" ति। उक्तस्यापि विशेषणस्य यत्र परेण न श्रवणं तत्राव्याप्तिरित्यर्थः अथ प्रतिपादनयोग्यतापि विवक्षिता तत्राह- h"इत्यादा"विति। योग्यताविवक्षायां निरूपयितुमशक्यत्वादिति भावः परोक्तदूषणोद्धाराय पूर्वानुक्तविशेषणवतः पूर्वोक्तस्य साधनीयांशस्य प्रतिपादनं प्रतिज्ञान्तरमत्र-(२) साध्य-पूर्वं पदानां प्रकरणसमभिव्याहारादिना तत्तद्विशेषणसामर्थ्यप्रतिपादकत्वस्य सर्वसिद्धतया खण्डनमिदमनवकाशमेव यद्यपि तथापि यथाकथञ्चित्(३)खण्डनमन्यथा प्रकृतलक्षणात् स्वारसिकस्यैवार्थविशेषप्रतिपत्तिर्न स्या(४)दिति।

मू० यत "एकवक्तृकैकवाक्यांशयोर्मिथो व्याघातः साध्यविपरीतव्याप्तत्वोद्भावनानपेक्षोद्भावनः प्रतिज्ञाविरोधः

---

(१) प्रतिपादितम्-ज्ञापितम्। (२) स्वपरवाक्यैकवाक्यत्वात् प्राग् यद्यप्यनुक्तस्य सम्बन्धनायम्। (३) यथा कथञ्चित्-सर्वविद्वज्जनमपि तेषां निरंकुशमपव्यवस्थाभिप्रायेणेत्यर्थः। (४) 'न स्यात्'-इत्यतोऽग्रे 'तथा च व्यवस्थापकार्थविशेषज्ञानाभावात्खण्डनमपि तव न स्यात्'-इति शेषः।

रोधः तदेतदलक्षणं तथाहि इह [b]भूतले घटो नास्तीत्यादावपि गतत्वेनातिव्यापकमिदं [c]वचनयोर्हि व्याघातोन्योन्यविरुद्धार्थत्वं तच्चेहास्ति घटोस्तीत्यंशस्य घटसत्त्वबोधकत्वान्नकारस्य च तन्निषेधकत्वात् * [d]नन्वयुक्तमिदमुच्यते नहि घटो नास्तीत्यत्र घटो विधीयते घटस्य निषेधोपि येन मिथः व्याघातः स्यात् किन्तु घटो निषिध्यते घटनिषेध एव विधीयत इति यावत्तत्कुतो व्याहतिरिति चेत् ? *—मैवम् ।

टी० ॥ "[a]'एके"ति । एकवक्तृकं यदेकं वाक्यं तदंशयोरित्यर्थ समस्यापूरणादौ भिन्नवक्तृकमप्येकं वाक्यं भवतीत्यत उक्तमेकवक्तृकमिति कथारूपैकवाक्ये वादिप्रतिवादिवाक्येतिव्याप्तिवारणायोक्तमेकवक्तृकेति कथावहिर्भूतनतद्वाक्येतिव्याप्तिवारणायोक्तमेकेति विरुद्धहेत्वाभासव्यवच्छेदाय साध्येत्यादि साध्याभावव्याप्यत्वोद्भावनमपेक्षमेव विरुद्धोद्भावनमिह तु न तथेत्यर्थं । [b]"भूतले"इति । घट इति घट विधाय नास्तीति तन्निषेधस्य तद्विरुद्धार्थत्वादतिव्याप्तिरित्यर्थं विरोधमेव स्फुटयति—। [c]"वचनयो"रिति । घटतदभावयोरुभयोर्विधौ विरोधः स्यादिह तु न तथा निषेधमात्रस्यैव विधेयत्वादिति शङ्कते—। [d]"नन्वि"ति ॥

मू० "घट इत्यस्य तावदंशस्य घटविधिबोधकत्वं नास्तीत्यस्यापि तत्प्रतिषेधार्थत्वं भवतापि मन्तव्यं [b]यदि त्वेवं नाभ्युपैषि तदा तयोरविरोधार्थतया घटस्वार्पेक्षितनिषेधास्तित्वं च भूतलाश्रितं द्वयमस्य वाक्यस्य बोधनीयं स्यादिति [c]तस्माद्विधिरूप एव घट इति तत्प्रतिक्षेप एव नेति [d]किमेतावेकवक्तृकवाक्यांशौ न भवतः परस्परविरुद्धार्थाभिधायकौ वा न भवतः येन लक्षणमिदं भवतस्तत्र न गच्छेत् न

मिथो विरोधमात्रं मिथो व्याघातकत्वं किन्त्वेक-
देशकालादौ परस्परविरुद्धयोरस्तित्वं * नच नास्ती-
त्यनेनैकदेशकालादौ विधिनिषेधौ वर्तमानौ बो-
ध्येते ? *—इति चेन्न, [f] उक्तोत्तरत्वात् [g] देशका-
लाद्यनन्तर्भावे विरोधस्यैवानुपपत्तेः किञ्च यद्येक-
देशादौ विरुद्धास्तित्वं प्रामाणिकमभ्युपैषि ।

टी० ॥ नञर्थस्य घटेन सम्बन्ध एव हि विरोधस्तयो-
रुभयविधेयतामन्तरेण विरोध एव न भासेतेत्याह-। [a]"घट
इत्यस्ये"ति। विरोधभानानङ्गीकारे विपक्षे दण्डमाह ।[b]"यदी"-
ति । अविरोधे हि घटतदभावौ द्वावपि भूतले विहितौ स्याता-
मित्यर्थः तस्माद्विधिनिषेधबोधकघटपदनञ्पदयोर्विरोध एवे-
त्युपसहरति । [c]"तस्मादि"ति। विशिष्टस्य लक्षणस्य प्रकृते सम्भवं
दर्शयति । [d]"किमेतावि"ति। ननु घट इति विधिमात्रं ([१])निषे-
धस्तस्य भूतले इति कथमिह विरोधो विधिनिषेधयोरेकदेशेऽवि-
धानादिति शङ्कते—। [e]"न मिथ"इति—। [f]"उक्तोत्तरत्वादि"ति।
उक्तस्यैवाप्रोत्तरत्वादित्यर्थः तदेवाह—। [g]"देशे"ति । विरोध-
स्फुरणं तावद्विवादं तच्च देशकालाभेदनिबन्धनमित्यर्थः ॥

मू० [a]तदा विरुद्धशब्दस्तवायमन्य एव सामयिकार्थः
कश्चित्प्रमाणेन तथाभूतस्य ग्रहणादेव विरुद्धत्वा-
भ्युपगमशान्तेः * अथ प्रामाणिकं तन्नाभ्युपैषि *
तदाऽ[h]प्रामाणिकं मिथो व्याघातकत्वं क्व नाम
नास्तीत्यतिव्याप्तिः * [c]अथमन्यसे यथा परेणाभि-
धीयेते अर्थौ तथा मिथो व्याघातकाविति ब्रूमः
तत्र च प्रमाणं प्रसरत्येवेति ? *–न [d]कथमपि तत्र
प्रमाणप्रवृत्तौ विरोधभावापरिभाषामात्रत्वापत्तेः

(१) विधिमात्रम्–सामान्यतो यत्र क्वापि विधानं, नतु निषेधस्य-
स्येव भूतले विधानम् ।

'यथा परेणोक्तोऽर्थस्तथा मिथो व्याघातक इत्यपि क्वचिन्मिथो व्याघातकत्वमप्रमाय न वक्तुं शक्यं ।

टी० ॥ किञ्च त्वयोच्यते प्रकृते घटतदभावयोरेकदेशत्वं नास्तीति न विरोधस्तत्र तदुभयैकदेशवृत्तित्वं प्रमितं न वा आद्ये तयोः सामानाधिकरण्येन प्रमाणप्रवृत्तौ रूपरसवदविरोध एवेत्याह । [a]"तदे"ति ॥ द्वितीये त्वाह । [b]"अप्रामाणिकमि"ति॥ ननु माता वन्ध्येत्यादौ मातृत्ववन्ध्यात्वयोः सामानाधिकरण्यमभिधीयमानं विरुद्धमित्युच्यते न तु तदुभयसामानाधिकरण्यमेतावता प्रमीयते इति शङ्कते—। [c]"अथे"ति । तदुभयसामानाधिकरण्यं वाक्यविषयत्वेनापि यदि प्रमितं तदा प्रमितत्वान्न विरोध इत्याह ।[d]"कथमपी"ति । वाक्यावच्छेदकत्वेनापीत्यर्थः. एतदेवाह—।[e]"यथे"ति । यद्वा प्रकारान्तरेणापि प्रमितत्वमाह—। "यथे"ति । यथा परेणोक्त इति हि सामानाधिकरण्येन परेणोक्तस्तथा च मिथो व्याघातकत्वमनयोरित्यभिधानं मिथो व्याघातकत्वाप्रमितौ न स्यादित्यर्थः ।

मू० * "प्रसज्यते मिथो व्याघातो न प्रसाध्यते ?*—इति चेन्न, क्वचिदप्यप्रमितस्य प्रसञ्जयितुमपि भवताऽशक्यत्वात् *'मा प्रमायि अप्रमयैव तद्व्यवहार !*-इति चेन्न, क्वचिदप्यप्रमितमाभासमात्रोपस्थितं क्व नाम नोपस्थापयितुं शक्यमित्युक्तैवातिव्याप्तिरावर्तते * 'अनेकत्र नियतयोरेकत्र प्रसञ्जनम् ? *—इति चेन्न, 'प्रसञ्जकस्य तद्द्वयस्यैकत्र स्थितिनियतताप्रमितावविरोधस्यानेवंभावे चानापादकत्वस्यापत्तेः ॥

टी० ॥ ननु प्रसङ्गमात्रं व्याघातस्य क्रियते स च पराभ्युपगममात्रप्रयुक्त एव न तु तत्प्रमाप्रयुक्तः परस्याभ्युपगमोपि न प्रमिते एव विषये तद्भानेपि तद्दर्शनादन्यथा आपाद्यबाधः(१)

(१) वह्न्यभावादिनाऽऽपादकेनाऽऽपाद्यस्य धूमाभावादेः पर्वतादौ बाधो न स्यादित्यर्थः ।

क्वापि न स्यात्तथा च गतं तर्कमात्रेणेति शङ्कते– । [a]"प्रसज्यते" इति । प्रसज्यमानस्य(१)तत्र परं बाधस्तर्कगुणो न तु सार्वत्रिकः तथा च क्वचिदपि प्रसञ्जनीयस्य प्रमितत्वं वाच्यमन्यथा प्रसञ्जकप्रसञ्जनीययोर्व्याप्त्यग्रहे मूलशैथिल्यमेव तर्कस्य स्यादित्याह–। [b]"क्वचिदपी"ति । पराभ्युपगममात्रादेव प्रसङ्गः प्रवर्त्तते ज्ञानमात्रतन्त्रो हि व्यवहारो न तु प्रमामात्रतन्त्रः कथमन्यथा शुक्तिरजतनादात्म्यं विधेयत्वेन भ्रमे निषेध्यत्वेन तद्बाधे व्यवह्रियेतेत्याह–। [c]"न प्रमाणे"ति । नैयायिकमते प्रमितमेव व्यवह्रियते मतान्तरमादाय चेदुच्यते तदाभासज्ञानं सर्वत्र सुलभमित्यप्रामाणिकं मिथो व्याघातकत्वं क्व नाम नास्तीति यदुक्तं तदेवावर्तत इत्यर्थः नन्वु व्याहन्यमानयोरर्थयोः स्वस्वस्थाने प्रमितयोरेकत्र प्रसञ्जनं क्रियते न तु प्रसञ्जने तदुभयसामानाधिकरण्यप्रमा तन्त्रमित्याह–। [d]"अनेकत्रे"ति । विरुद्धयोरेकैकमात्रप्रसञ्जनं नानिष्टं मिलितोभयप्रसञ्जनं च तद्व्याप्यधर्मग्रहाधीन तथा च नादृशव्याप्यप्रमाया व्यापकप्रमाध्रौव्ये क्व विरोधस्तदप्रमितौ च नापादनमपीत्याह–। [e]"प्रसञ्जकस्ये"ति ।

मू० * [a]एकैकमव्याप्त्याभ्यां पृथक् पृथक् तथापादनम् ? *–इति चेन्न, [b]एकैकमव्याघातात् * [c]अर्थाद्द्वयं स्यादिति चेत् ? *– [d]अर्थापत्त्यर्थत्वेनैवा(२)व्याघातात् [e]अर्थादापादनं न साधनम् ? *–इति चेन्न, [f]मिथोविरोधित्वेन तर्काभासत्वापत्तेः [g]इष्टापादनाच्च [h]*–मिथो व्याघातात् कथं तथा स्यादिति ? *–तन्न, [i]तद्द्वयधर्मकत्वादव्याघातापत्तेः धर्मिणिप्रमापेक्षायामव्याघातात् ॥

टी० ॥ तदुभयं विरोधिद्वयं मिलितं नापाद्यं किन्तु

(१) प्रसज्यमानस्य–वह्न्यभावादेः, तत्र–पर्वतादौ, परं = केवलं, बाधस्तर्कगुणो, न तु सार्वत्रिकः = ह्रदादावपि बाधस्तर्कगुण इत्यर्थः ।

(२) अर्थापत्ति प्रमाणविरुद्धत्वे नैवेत्यर्थः ।

प्रत्येकमित्याह–। a"एकैके"ति । तथाच व्याघातो नापादितः स्यादित्याह–। b"ने"ति । एकैकापादनमेव मिलितापादनव्याघातापत्तिपर्यवसन्नमित्याह–। c"अर्थादि"ति । एकैकापादने अर्थान्वयेद्व्याघातः सिद्धयेत्तदर्थापत्तिप्रमाणसिद्धतया विरोधिनोः सामानाधिकरण्यस्य व्याघातरूपस्याऽसम्भव इत्याह–। d"अर्थापत्ती"ति । इयमर्थापत्तिर्न विरोधिद्वयसामानाधिकरण्यसाधिका किन्तु तदापादिका तथाच न विरोधः प्रामाणिक इत्याह–। e"अर्थादि"ति । आपाद्यतापि प्रमितस्यैवेति दोषे सत्येवाह–। f"ने"ति । एकत्र मिथो विरुद्धव्याप्यद्वयाभावादुभयापादनमसम्भवि कथञ्चित्पराभ्युपगममात्रबलेनाप्यापादनं न सम्भवति तर्काभासत्वात्तस्यापादनस्येत्यर्थः एकैकापादनं च नानिष्टमतोऽप्यसौ तर्काभास इत्याह–। g"इष्टे"ति । एकैकापादनं विरुद्धद्वयापादनपर्यवसन्नमतः कथमिष्टापादनमित्याह–। h"मिथ"इति । तथैकधर्मि विरुद्धधर्मद्वयाभ्यां क्रान्तं स्यादित्यापादनं पर्यवसन्नं तच्च विरुद्धधर्मद्वयालिङ्गनस्य प्रमितावेव स्यादिति तदप्रमितव्याघातस्याव्याघातत्वमित्याह । i"द्वये"ति ॥

मू० * "एवमादीनां तु दोषाणां परं प्रत्यभिधाने तवापि सर्वमिदं सुवचम् ? * इति चेन्न, bतत्राप्यन्यत्र दोषो मयापाद्यत इति प्रतिबन्दिं गृह्णतः cकिं परपक्षे दोषादानमात्रं विवक्षितमुत यस्तत्र त्वया समाधिरभिधेयः स मयापीत्यभिप्रायात्स्वपक्षे समाधिः न तावदाद्यः dअप्रस्तुतत्वात् eपरोक्तदोषानुद्धारे तावतैव कथाया(१)स्तदर्द्धस्य वा पर्यवसानात् ।

टी० ॥ ननु विरोधव्याघातादिपदं यदि सार्थकं तदा तत्सङ्ग्रहणं न्यायानवकाशं निरर्थकं चेत्तदा त्वयैव सार्थकपदकदम्बकमभिव्याहारेण तदुच्चारणमनुपपन्नं किन्तु प्रतीतौ व्याघातः स्यात्ते अप्रमितौ वा आद्येऽपि प्रमितौऽन्यथा वा प्रथमे तदन-

(१) कथायाः–विमतकथायाः, तदर्द्धस्य–जल्पवादात्मककथार्द्धस्य ।

व्याघातः द्वितीये व्याप्तेरव्याप्तिपूर्वकतया स्ववचनव्याघात एव तृतीयेपि स्ववचनव्याघातः नन्वप्रतीयमानमेव दोषवत्तया व्याप्यते अशक्यत्वादिति दुरुत्तरेयं प्रतिबन्दिरिति शङ्कते ।[a]"एवमि"- ति । इदानीं प्रतिबन्दिखण्डनमुपक्रमते—। [b]"तत्रापी"ति । प्रतिबन्दिफलं पृच्छति-। [c]"किमि"ति । परपक्षे दोषाभिधान- मात्रं प्रतिबन्दिफलं तुल्यन्यायतया परोक्तदोषोद्धारो वेत्यर्थः ॥ [d]"अप्रस्तुतत्वादि"ति । परोक्त दोषमनुद्धृत्य परस्मै दोषाभि- धानस्याप्राप्तकालत्वात् आकाङ्क्षितक्रमविपर्यासरूपत्वादित्यर्थः अप्रस्तुतत्वमर्थान्तरत्वं तु प्रकृते न सम्भवति प्रकृतदूषणाङ्ग- स्यैवाभिधानात् अन्यथावयवविपर्यासवचनमप्यर्थान्तरमेव स्यात् "परोक्ते"ति । परोक्तदोषानुद्धारे हि तेनैव निग्रहेण निगृ- हीतो वादी कक्षान्तरप्रक्रमं नासादयत्येव तथा च वि- वक्षया स्तावतैव पर्यवसानं जल्पस्य वादस्य चाद्धा परपक्षदूषणं पर्य- वसन्नं स्वपक्षस्थापनरूपमङ्गमवशिष्यते तत्र च वैतण्डिका इति जितमस्माभिस्तत्र प्रतिबन्दिग्रहणमात्रेणेत्यर्थः कथापदमिह वितण्डामात्रपरं

मू० [a]निग्रहापरिहारावधित्वात्तयोः द्वितीये तु [b]स एवा- भिधीयतां [c]का नोहानिः * [d]भवांस्तावदभिधत्तां कस्तत्र समाधिः ततो मयाप्यभिधेयम् ? *-इति चेन्न, [e]मया तदभिधानस्य साम्प्रतमप्रस्तुतत्वा न्नहि मया स्वपक्षसाधनं त्वया च दूषणं प्रकृते वक्तुमा- रब्धमस्ति किन्तु त्वया स्वपक्षो निर्वाह्यस्तद्दूषणं च मयाभिधानीयमिति कथा प्रस्तुता वर्त्तते ईदृशि च कथाविभागे मत्पक्षे समाधानाय मां पर्यनु- योक्तुं कुतोऽधिकारो भवतः * [g]अथ विशेषतस्त- [h]न्निष्टङ्कणे किं प्रयोजनमस्ति तावदेतादृशिचोद्ये परिहारो यतस्त्वयापि स्वपक्षे सो स्वीकार्य इत्या- शयस्ते ? *-सोपि न युक्तः ।

टी० ॥ [a]"निग्रहे"ति । नयोः कथातद्द्वयोर्निग्रहापरिहारमात्रावधित्वादित्यर्थः ॥ [b]"स एवे"ति । स्वपक्षसमाधिरेवेत्यर्थः [c]"का नोहानिरि"ति । प्रकृतदोषे त्वया समाहितेपि मदुक्तान्तरस्य मयावतारणीयत्वात् समाधेरेव वा पुनराशङ्कनीयमानत्वादित्यर्थः प्राथमिक([१])समाध्यभिधानायासलाघवमेवापादितः प्रतिबन्दिफलमिति शङ्कते । [d]"भवति"ति । भवेदेवं यदि मम तदभिधानाधिकारः स्यात्त्वेवमित्याह—। [e]"कथे"ति । ननु तुल्य एवायं दोष इति प्रतिबन्दिरहस्यं तथाच त्वया कथं न समाधेयमित्यत आह—। [f]"नही"ति । आकाङ्क्षाक्रमेणैव कथायां साधनदूषणयोरभिधानमुचितं तथाच मम तद्दोषसमाधानं न कथेयानुविधेयाकाङ्क्षितमित्यर्थः ननु प्रतिबन्दिदानेन त्वयि समाधानभाव विन्यस्य मया स्वदोषः समाहितप्राय एव स्वपक्षपक्षपातेनापि मद्दोषसमाधित्सायास्तवावश्यकत्वादित्याह—। [g]"अथे"ति ॥ [h]"तन्निग्रहणे" इति । अन्यथा कथायामयं दोषस्तवैव समाधेयो न ममापीति निग्रहणे इत्यर्थः ॥

मू० [a]नहि मत्पक्षे चेत्समाधिरस्ति तावता त्वत्पक्षेपि तेन भवितव्यमित्यत्र प्रमाणमस्ति * [b]साम्यादेवम् ? *—इति चेन्न, [c]वैषम्यस्याभ्युपगमात् [d]यदि तद्गतमसाधारणं रूपमादाय मद्दूषणं प्रतितन्त्रसिद्धान्तं वा तत्रसमाधिः स्यादत्र च त्वत्पक्षे यदभावान्न स्यात्तथा सति साम्यमात्रात्कथं समाधिरसावत्रापीति निश्चेतुं शक्यते * [e]कोसौ तत्र विशेष ? *—इति चेन्न, मया साम्प्रतं तदभिधानस्याप्रस्तुतत्वादित्युक्तत्वात् * [f]चोद्यसाम्यात्समाधिसाम्यम् ? *—इति चेन्न, दूष्यगतविशेषभावाभावविशेषितत्वादिनापि तद्वैषम्यसम्भवात् ॥

(१) प्राथमिकस्य त्वदुक्तस्य समाधेर्मयाऽभिधाने कृते आयासलाघवमित्यर्थः ।

टी० ॥ यद्यावयोः प्रकृतदोषे समाधिसाम्यं स्यात्तदा स्यादप्येवं न त्वेवमित्याह—। [a]"नही"ति । दोषसाम्यमेव समाधिसाम्यमापादयतीत्याशङ्कते—। [b]"साम्यादि"ति । वैषम्यस्यावश्यकत्वेन बाधादाक्षेप एवायं न सम्भवतीत्याह—। [c]"वैषम्यस्ये"ति । तदेवोपपादयति—। [d]"यदो"ति । यथा परेतरेणोपाधौ स्वव्याघातकत्वेन दूष्ये बाधस्थले प्रतिबन्दिग्रहे तत्रासाधारण्यबाधोन्नीतं रूपमादाय ([1])यथा वा स्वाध्यायाध्ययनविधेः (?)

क्षेनाश्वासप्रसङ्गे मीमांसकेन दोषे दत्ते तावद्ध्ययनाश्वासप्रसङ्गस्तुल्य इति प्रतिबन्दिग्रहे प्रामाण्यस्य स्वतस्त्वं प्रतितन्त्रसिद्धान्तमादाय समाधिर्विषमः एव सर्वत्रोन्नेयमित्यर्थः ननु तथापि समाधिवैषम्यप्रयोजकविशेषोपदर्शनव्यग्रता महती नवैवेत्याह—। [e]"कोसावि"ति । पूर्वं समाधिगतो विशेष उक्तः सम्प्रति दूष्यगतं विशेषमभिधातुं शङ्कितमपि शङ्कते-। [f]"दोषसाम्यादि"ति । दोषमेव न समानं येन समाधिसाम्यमाक्षिप्येतेत्यर्थः ॥

मू० "यथा सद्व्यवहारस्य सत्तास्वीकारकत्वे तुल्येपि सत्तायां सत्ताभ्युपगमेनवस्थया तदाश्रये च तदभावेन [b]एवमन्यत्रापि बहुलं दर्शनादिति [c]किञ्च परोद्भावितमसिद्ध्यादिकमपरिहृत्य प्रतिबन्द्या प्रत्यवतिष्ठमानस्य कोऽभिप्रायः किं यदिदं दोषतया परेणोद्भावितं तद्दूषणमदूष्येपि गतत्वात् उत दूषणमपि सन्नोद्भावनीयं तुल्ययोगक्षेमत्वात् यथाहुः [d]तत्रोभयोरित्यादि ।

टी० ॥ दूष्यगतं विशेषं दृष्टान्तेनोपपादयति—। [a]"यथे"ति । सत्तासाधनायोपन्यस्तः सद्व्यवहारः सत्तायामनैकान्तिकत्वेन दूष्यस्तत्रानवस्थाप्रसञ्जकत्वरहितस्त्वं विशेषस्तादृशः सद्व्यवहारः सत्ताश्रये घटादौ न तु सत्तायामपीत्यर्थः ॥ [b]"एवमि"ति । इहेतिबुद्धिः समवायसाधिका समवाये समवायान्तराभावात्

(१) असाधारण्यं बाधोन्नीतं रूपमादाय समाधिर्विषमः-इत्यन्वयः ।

अनैकान्तिकी तत्राप्यनापादकत्वं (१) दूष्यगतो विशेषः यथा घटाभावविशिष्टबुद्धिर्भूतलेऽतिरिक्ताभावसाधिकाप्यभावेऽभावान्तरसाधने कुण्ठा तत्राप्यनवस्थापादकत्वमेव विशेष इत्याद्युक्तं प्रतिबन्दिग्रहणस्याभिप्रायविशेषमिदानीं विकल्प्य दूषयति—। c"किञ्चे"ति। परपक्षे दोषाभिधानं वा समाधिसाकल्य वेति पूर्वविकल्पितमिदानीमदूष्ये स्वपक्षे गतत्वात् दूषणमेवैतत्र भवति भवदीयं वा नोद्भावनीयमिति विकल्प्यते इत्यपौनरुक्त्य ॥ d"यत्रे"ति। "यत्रोभयोः समो दोषः परिहारोपि वा समः नैकः पर्यनुयोक्तव्यः स्तादृगर्थविचारणे" इति भट्टवार्तिकम्।

मू० नाद्यः a"यद्यत्रासिद्ध्यादिलक्षणमस्ति उद्भाविते दूषणे तदा दोषत्वस्याशक्यपरिहारत्वात् b परिहारे वा तस्यालक्षणत्वप्रसङ्गात् c यद्येतद्दूषणं कथं तर्ह्यदूष्यत्वेन वादिनाङ्गीकृते प्रतिबन्दिस्थाने गतमिति चेत् यद्येतददूषणं d कथं दोषलक्षणोपपन्नमित्यत्रापि दीयतां दृष्टिः e नियामकाभावे तर्हि तदीयदूषणत्वे सन्देहः पर्यवसित इति चेदस्तु दोषसन्देहेपि भवदीयसाधनस्यासाधकत्वं सन्दिग्धासिद्धवत् f किञ्च यल्लक्षणवतोस्य दोषत्वसन्देहस्तल्लक्षणक एवायमन्यत्रापीति तत्राप्यसिद्ध्यादेरदूषणत्वमेव स्यादितीय प्रतिबन्दीदुरुत्तरा प्रतिबन्दिवादिनोपि नापि द्वितीयः।

टी० ॥ a"यदी"ति दूषणलक्षणयोर्नित्यत्वे दूषणत्वप्रौढ्यादि स्वपक्षं तल्लक्षणाक्रान्तमप्येतददूषणं चेत्तदा लक्षणमतिव्यापकमलक्षणमपि गतत्वादित्याह—। b"परिहारे" इति। अदूष्यत्वाभिमतगामित्वादिदं तावददूषणमेव लक्षणं चेदतिव्यापकं तदा तद्दूषणान्तरलक्षणान्तरमेव वक्तव्यमिति शङ्कते—। c"यदी"ति ॥

(१) अनापादकत्वम्, अनवस्थापादकत्वमित्यर्थः।

मिथो विरोधमात्रं मिथो व्याघातकत्वं किन्त्वेकदेशकालादौ परस्परविरुद्धयोरस्तित्वं * नच नास्तीत्यनेनैकदेशकालादौ विधिनिषेधौ वर्तमानौ बोध्येते ? *—इति चेन्न, [f] उक्तोत्तरत्वात् [g] देशकालाद्यनन्तर्भावे विरोधस्यैवानुपपत्तेः किञ्च यद्येकदेशादौ विरुद्धास्तित्वं प्रामाणिकमभ्युपैषि ।

टी० ॥ नञर्थस्य घटेन सम्बन्ध एव हि विरोधस्तयोरुभयविधेयतामन्तरेण विरोध एव न भासेतेत्याह-। [a]"घट इत्यस्ये"ति। विरोधभानानङ्गीकारे विपक्षे दण्डमाह ।[b]"यदी"ति । अविरोधे हि घटतदभावौ द्वावपि भूतले विहितौ स्याताभित्यर्थः तस्माद्विधिनिषेधबोधकघटपदनञ्पदयोर्विरोध एवेत्युपसंहरति । [c]"तस्मादि"ति। विशिष्टस्य लक्षणस्य प्रकृते सम्भवं दर्शयति । [d]"किमेनावि"ति। ननु घट इति विधिमात्रं (१)निषेधस्तस्य भूतले इति कथमिह विरोधो विधिनिषेधयोरेकदेशेऽविधानादिति शङ्कते—। [e]"न मिथ"इति— [f]"उक्तोत्तरत्वादि"ति। उक्तस्यैवात्रोत्तरत्वादित्यर्थः तदेवाह—। [g]"देश"ति । विरोधस्फुरणं तावदविवादं तच्च देशकालाभेदनिबन्धनमित्यर्थः ॥

मू० [a]तदा विरुद्धशब्दस्तवायमन्य एव सामयिकार्थः कश्चित्प्रमाणेन तथाभूतस्य ग्रहणादेव विरुद्धत्वाभ्युपगमशान्तेः * अथ प्रामाणिकं तन्नाभ्युपैषि * तदाऽ[b]प्रामाणिकं मिथो व्याघातकत्वं क्व नाम नास्तीत्यतिव्याप्तिः * [c]अथमन्यसे यथा परेणाभिधीयेते अर्थौ तथा मिथो व्याघातकाविति ब्रूमः तत्र च प्रमाणं प्रसरत्येवेति ! *-न [d]कथमपि तत्र प्रमाणप्रवृत्तौ विरोधभाषापरिभाषामात्रत्वापत्तेः

(१) विधिमात्रम्-सामान्यतो यत्र क्वापि विधानं, नतु निषेधवत्स्येव भूतले विधानम् ।

ᵉयथा परेणोक्तोर्थस्तथा मिथो व्याघातक इत्यपि क्वचिन्मिथो व्याघातकत्वमप्रमाय न वक्तुं शक्यं ।

टी० ॥ किञ्च त्वयोच्यते प्रकृते घटतदभावयोरेकदेशत्वं नास्तीति न विरोधस्तत्र तदुभयैकदेशवृत्तित्वं प्रमितं न वा आद्ये तयोः सामानाधिकरण्येन प्रमाणप्रवृत्तौ रूपरसवदविरोध एवेत्याह -। [a]"नद्दे"ति ॥ द्वितीये त्वाह । [b]"अप्रामाणिकमि"ति॥ ननु माता वन्ध्येत्यादौ मातृत्ववन्ध्यात्वयोः सामानाधिकरण्यमभिधीयमानं विरुद्धमित्युच्यते न तु तदुभयसामानाधिकरण्यमेतावता प्रमीयते इति शङ्कते-। [c]"अथे"ति । तदुभयसामानाधिकरण्यं वाक्यविषयत्वेनापि यदि प्रमितं तदा प्रमितत्वान्न विरोध इत्याह ।[d]"कथमपी"ति। वाक्यावच्छेदकत्वेनापीत्यर्थः एतदेवाह-।[e]"यथे"ति। यद्वा प्रकारान्तरेणापि प्रमितत्वमाह-। "यथे"ति। यथा परेणोक्त इति हि सामानाधिकरण्येन परेणोक्तस्तथा च मिथो व्याघातकत्वमनयोरित्यभिधानं मिथो व्याघातकत्वाप्रमितौ न स्यादित्यर्थ ।

मू० * [a]प्रसज्यते मिथो व्याघातो न प्रसाध्यते [b]* इति चेन्न, क्वचिदप्यप्रमितस्य प्रसञ्जयितुमपि भवताऽशक्यत्वात् * मा प्रमायि अप्रमयैव तद्व्यवहार[c]* इति चेन्न, क्वचिदप्यप्रमितमाभासमात्रोपस्थितं क्व नाम नोपस्थापयितुं शक्यमित्युक्तैवातिव्याप्तिरावर्तते * [d]अनेकत्र नियतयोरेकत्र प्रसञ्जनम् ? *—इति चेन्न, [e]प्रसञ्जकस्य तद्द्वयस्यैकत्र स्थितिनियतताप्रमितावविरोधस्यानेवंभावे चानापादकत्वस्यापत्तेः ॥

टी० ॥ ननु प्रसङ्गमात्रं व्याघातस्य क्रियते स च पराभ्युपगममात्रप्रयुक्त एव न तु तत्प्रमाप्रयुक्तः परस्याभ्युपगमोपि न प्रमित एव विपये तदभानेपि तद्दर्शनादन्यथा आपाद्यबाध.(१)

(१) वह्न्यभावादिनाऽऽपादकेनाऽऽपाद्यस्य धूमाभावादेः पर्वतादौ बाधो न स्यादित्यर्थः ।

क्वापि न स्यात्तथाच गतं तर्कमात्रेणेति शङ्कते—। "''प्रसज्यते'' इति । प्रसज्यमानस्य(१)तत्र परं बाधस्तर्कगुणो नतु सार्वत्रिकः तथाच क्वचिदपि प्रसञ्जनीयस्य प्रमितत्वं वाच्यमन्यथा प्रसञ्जकप्रसञ्जनीययोर्व्याप्त्यग्रहे मूलशैथिल्यमेव तर्कस्य स्यादित्याह—। ''क्वचिदपी''ति । पराभ्युपगममात्रादेव प्रसङ्गः प्रवर्तते ज्ञानमात्रतन्त्रो हि व्यवहारो नतु प्रमामात्रतन्त्रः कथमन्यथा शुक्तिरजततादात्म्यं विधेयत्वेन भ्रमे निषेध्यत्वेन तद्बाधे व्यवह्रियेतेत्याह—। c''ना प्रमायी''ति । नैयायिकमते प्रमितमेव व्यवह्रियते मतान्तरमादाय चेदुच्यते तदाभासज्ञानं सर्वत्र सुलभमित्यप्रामाणिकं मिथो व्याघातकत्वं क्व नाम नास्तीति यदुक्तं तदेवावर्तत इत्यर्थः नतु व्याहन्यमानयोरर्थयोः स्वस्वस्थाने प्रमितयोरेकत्र प्रसञ्जनं क्रियते नतु प्रसञ्जने तदुभयसामानाधिकरण्यप्रमा तन्त्रमित्याह—।d''अनेकत्रे''ति । विरुद्धयोरेकैकमात्रप्रसञ्जनं नाभिमतं मिलितोभयप्रसञ्जनं च तद्व्याप्यधर्मग्रहाधीनं तथाच तादृशव्याप्यप्रमाया व्यापकप्रमाध्रौव्ये क्व विरोधस्तद्प्रमितौ च नापादनमपीत्याह—। e''प्रसञ्जकस्ये''ति ।

मू० * "एकैकमव्याप्याभ्यां पृथक् पृथक् तयापादनम् ? *-इति चेन्न, "एकैकमव्याघातात् * अर्थाद्द्वयं स्यादिति चेत् ? *- "अर्थापत्त्यर्थत्वेनैवा(२)व्याघातात् "अर्थादापादनं न साधनम् ? *-इति चेन्न, "मिथोविरोधित्वेन तर्काभासत्वापत्तेः "इष्टापादनाच्च "*-मिथो व्याघातात् कथं तथा स्यादिति ? *-तन्न, "तद्द्वयधर्मकत्वादव्याघातापत्तेः धर्मिणिप्रमापेक्षायामव्याघातात् ॥

टी० ॥ तदुभयं विरोधिद्वयं मिलितं नापाद्यं किन्तु

(१) प्रसज्यमानस्य=वह्न्यभावादेः, तत्र=पर्वतादौ, परं = केवलं, बाधस्तर्कगुणो, नतु सार्वत्रिकः = ह्रदादावपि बाधस्तर्कगुण इत्यर्थः ।

(२) अर्थापत्ति प्रमाणसिद्धत्वेनैवेत्यर्थः ।

प्रत्येकमित्याह—। [a]"एकैके"ति । तथा च व्याघातो नापादितः स्यादित्याह—। [b]"ने"ति । एकैकापादनमेव मिलितापादनव्याघातापत्तिपर्यवसन्नमित्याह—। [c]"अर्थादि"ति । एकैकापादने अर्थात्सिद्धव्याघात· सिद्धं तदार्थापत्तिप्रमाणसिद्धतया विरोधिनोः सामानाधिकरण्यस्य व्याघातकत्वात्ऽसम्भव इत्याह—। [d]"अर्थापत्ति"रिति । इयमर्थापत्तिर्न विरोधिद्वयसामानाधिकरण्यसाधिका किन्तु तदापादिका तथा च न विरोधः प्रामाणिक इत्याह—। [e]"अर्थादि"ति । आपाद्यतापि प्रमितस्यैवेति दोषे सत्येवाह—। [f]"ने"ति । एकत्र मिथो विरुद्धव्याप्यद्वयाभावादुभयापादनमसम्भवि कथञ्चित्पराभ्युपगममात्रबलेनाप्यापादनं न सम्भवति तर्काभासत्वात्तस्यापादकस्येत्यर्थः. एकैकापादनं च नानिष्टमतोऽप्यसौ तर्काभास इत्याह—। [g]"इष्टे"ति । एकैकापादनं विरुद्धद्वयापादनपर्यवसन्नमतः कथमिष्टापादनमित्याह—। "मिथ"इति । तवैकं धर्मि विरुद्धधर्मद्वयाक्रान्तं स्यादित्यापादनं पर्यवसन्नं तच्च विरुद्धधर्मद्वयालिङ्गितस्वरूपमतावेव स्यादिति त्वदभिमतव्याघातस्याव्याघातत्वमित्याह । [h]"इद्वये"ति ॥

मू० * एवमादीनां तु दोषाणां परं प्रत्यभिधाने तवापि सर्वमिदं सुवचम् ? * इति चेन्न, [b]तथाप्यन्यत्र दोषो मयापाद्यते इति प्रतिबन्दिं गृह्णतः [c]किं परपक्षे दोषादानमात्रं विवक्षितमुत यस्तत्र त्वया समाधिरभिधेयः स मयापीत्यभिप्रायात्स्वपक्षे समाधिः न तावदाद्यः [d]अप्रस्तुतत्वात् [e]परोक्तदोषानुद्धारे तावतैव कथाया(१)स्तदर्द्धस्य वा पर्यवसानात् ।

टी० ॥ ननु विरोधव्याघातादिपदं यदि सार्थकं तदा तत्खण्डनं भवानशक्तः निरर्थकं चेत्तदा त्वयैव सार्थकपदकदम्ब समभिव्याहारेण तदुच्चारणमनुपपन्नं किञ्च प्रतीतौ व्याघातः स्वपक्षे अप्रतीतौ वा नाद्योऽपि प्रतीतेरन्यथा वा प्रथमे स्वपक्ष-

(१) कथायाः—वितण्डाकथायाः, तदर्द्धस्य—जल्पवादात्मककथार्द्धस्य ।

व्याघातः द्वितीये भ्रान्तेरभ्रान्तिपूर्वकतया स्ववचनव्याघात एव तृतीयेपि स्ववचनव्याघातः नन्वप्रतीयमानमेव दोषवत्तया ख्याप्यते अशक्यत्वादिति दुरुत्तरेयं प्रतिबन्दिरिति शङ्कते । [a]"एवमि"-ति । इदानीं प्रतिबन्दिखण्डनमुपक्रमते—। [b]"तत्रापी"ति । प्रतिबन्दिफलं पृच्छति-। [c]"किमि"ति । परपक्षे दोषाभिधान-मात्रं प्रतिबन्दिफलं तुल्यन्यायतया परोक्तदोषोद्धारो वेत्यर्थः ॥ [d]"अप्रस्तुत्वादि"ति । परोक्त दोषमनुद्धृत्य परस्मै दोषाभिधानस्याप्राप्तकालत्वात् आकाङ्क्षितक्रमविपर्यासरूपत्वादित्यर्थः अप्रस्तुतत्वमर्थान्तरत्वं तु प्रकृते न सम्भवति प्रकृतदूषणाङ्ग-स्यैवाभिधानात् अन्यथावयवविपर्यासवचनमप्यर्थान्तरमेव स्यात् [e]"परोक्ते"ति । परोक्तदोषानुद्धारे हि तेनैव निग्रहेण निगृहीतो वादी कक्षान्तरप्रक्रमं नासादयत्येव तथाच वि· खण्डनारम्भेनैव पर्यवसानं जल्पस्य वादस्य चाद्धं परपक्षदूषणं पर्यवसन्नं स्वपक्षस्थापनरूपमर्द्धमवशिष्यते नय च वैतण्डिका इति जितमस्माभिस्तव प्रतिबन्दिग्रहणमात्रेणेत्यर्थः कथापदमिह वितण्डामात्रपरं

मू० [a]निग्रहापरिहारावधित्वात्तयोः द्वितीये तु [b]स एवाभिधीयतां [c]का नोहानिः * [d]भवांस्तावदभिधत्तां कस्तत्र समाधिः ततो मयाप्यभिधेयम् ? *-इति चेन्न, [e]मया तदभिधानस्य साम्प्रतमप्रस्तुतत्वात् नहि मया स्वपक्षसाधनं त्वया च दूषणं प्रकृते वक्तुमारब्धमस्ति किन्तु त्वया स्वपक्षो निर्वाह्यस्तद्दूषणं च मयाभिधानीयमिति कथा प्रस्तुता वर्त्तते ईदृशि च कथाविभागे मत्पक्षे समाधानाय मां पर्यनुयोक्तुं कुतोधिकारो भवतः * [g]अथ विशेषतस्त-[h]न्निष्टङ्कणे किं प्रयोजनमस्ति तावदेतादृशचोद्ये परिहारो यतस्त्वयापि स्वपक्षे सो स्वीकार्य इत्याशयस्ते ? *-सोपि न युक्तः ।

टी० ॥ ᵃ"निग्रहे"ति । तयोः कथातद्दूषयोर्निग्रहापरिहारसामर्थ्यवत्त्वादित्यर्थः ॥ ᵇ"स एवे"ति । स्वपक्षसमाधिरेवेत्यर्थः ᶜ"का नोहानिरि"ति । प्रकृतदोषे त्वया समाहितेपि खण्डनमात्रस्य मयावतारणीयत्वात् समाधेरेव वा पुनराभासीकरिष्यमाणत्वादित्यर्थः प्राथमिक(१)समाध्यभिधानायासलाघवमेवापाततः प्रतिबन्दिफलमिति शङ्कते । ᵈ"भवति"ति । भवेदेवं यदि मम तदभिधानाधिकारः स्यात्त्वेवमित्याह—। ᵉ"कथे"ति । ननु तुल्य एवायं दोष इति प्रतिबन्दिरहस्यं तथाच त्वया कथं न समाधेयमित्यत आह—। ᶠ"नही"ति । आकाङ्क्षाक्रमेणैव कथायां साधनदूषणयोरभिधानमुचितं तथाच मम तद्दोषसमाधानं न स्थेयानुविधेयाकाङ्क्षितमित्यर्थः ननु प्रतिबन्दिदानेन त्वयि समाधानभारविन्यस्य मया स्वदोषः समाहितप्राय एव स्वपक्षपक्षपातेनापि मद्दोषसमाधित्सायास्तवावश्यकत्वादित्याह । ᵍ"अथे"ति ॥ ʰ"तन्निग्रहस्थाने" इति । अस्यां कथायामयं दोषस्तवैव समाधेयो न ममापीति निग्रहस्थाने इत्यर्थः ॥

मू० ᵃनहि मत्पक्षे चेत्समाधिरस्ति तावता त्वत्पक्षेपि तेन भवितव्यमित्यत्र प्रमाणमस्ति * ᵇसाम्यादेवम् ? *-इति चेन्न, ᶜवैषम्यस्याभ्युपगमात् ᵈयदि तद्गतमसाधारणं रूपमादाय मद्दर्शनं प्रतितन्त्रसिद्धान्तं वा तत्रसमाधिः स्यादत्र च त्वत्पक्षे यदभावान्न स्यात्तथा सति साम्यमात्रात्कथं समाधिरसावत्रापीति निश्चेतुं शक्यते * ᵉकोसौ तत्र विशेष ? *-इति चेन्न, मया साम्प्रतं तदभिधानस्याप्रस्तुतत्वादित्युक्तत्वात् * ᶠचोद्यसाम्यात्समाधिसाम्यम् ? *-इति चेन्न, दूष्यगतविशेषभावाभावविशेषितत्वादिनापि तद्वैषम्यसम्भवात् ॥

(१) प्राथमिकस्य त्वदुक्तस्य समाधेर्मयाऽभिधाने कृते आयासलाघवमित्यर्थः ।

टी० ॥ यद्यावयोः प्रकृतदोषे समाधिसाम्यं स्यात्तदा स्याद्दप्येवं न त्वेवमित्याह—। [a]"नही"ति । दोषसाम्यमेव समाधिसाम्यमाक्षिपतीत्याशङ्कते—। [b]"साम्यादि"ति । वैषम्यस्यावश्यकत्वेन बाधादाक्षेप एवायं न सम्भवतीत्याह—। [c]"वैषम्यस्ये"ति । तदेवोपपादयति—। [d]"यदी"ति । यथा पक्षेतरे उपाधौ स्वव्याघातकत्वेन दूष्ये बाधस्थले प्रतिबन्दिग्रहे तत्रासाधारणमबाधोन्नीतं रूपमादाय (१)यथा वा ज्ञानायाथार्थ्यपक्षेनाश्वासप्रसङ्गं मीमांसकेन दोषे दत्ते तावत्यनाश्वासप्रसङ्गस्तुल्य इति प्रतिबन्दिग्रहे प्रमाणस्य स्वतस्त्वं प्रतितन्त्रसिद्धान्तमादाय समाधिर्विषमः एव सर्वत्रोन्नेयमित्यर्थः ननु तथापि समाधिवैषम्यप्रयोजकविशेषोपदर्शनव्यग्रता महती नैवेत्याह—। [e]"कोमार्थि"ति । पूर्वं समाधिगतो विशेष उक्तः सम्प्रति दूष्यगतं विशेषमभिधातुं शङ्कितमपि शङ्कते ।[f]"चोद्यसाम्यादि"ति । चोद्यमेव न समानं येन समाधिसाम्यमाक्षिप्येतेत्यर्थः ॥

मू० [a]यथा सद्व्यवहारस्य सत्तास्वीकारकत्वे तुल्येऽपि सत्तायां सत्ताभ्युपगमेनवस्थया तदाश्रये च तदभावेन [b]एवमन्यत्रापि बहुलं दर्शनादिति [c]किञ्च परोद्भावितमसिद्ध्यादिकमपरिहृत्य प्रतिबन्द्या प्रत्यवतिष्ठमानस्य कोऽभिप्रायः किं यदिदं दोषतया परेणोद्भावितं तद्दूषणमदूष्येऽपि गतत्वात् उत दूषणमपि सत्रोद्भावनीयं तुल्ययोगक्षेमत्वात् यथाहुः [d]तत्रोभयोरित्यादि ।

टी० ॥ दूष्यगतं विशेषं दृष्टान्तेनोपपादयति—। [a]"यथे"ति । सत्तासाधनायोपन्यस्तः सद्व्यवहारः सत्तायामनैकान्तिकत्वेन दूष्यस्तत्रानवस्थाप्रसञ्जकत्वरहितत्वं विशेषस्तादृशः सद्व्यवहारः सत्ताश्रये घटादौ नतु सत्तायामपीत्यर्थः ॥ [b]"एवमि"ति । इहेतिबुद्धिः समवायसाधिका समवाये समवायान्तराभावात्

(१) असाधारणं बाधोन्नीतं रूपमादाय समाधिर्विषमः-इत्यन्वयः ।

[d] "कथमि"ति । लक्षणान्तरप्रणयनमशक्यमिति भावः ॥ अदूष्ये गतत्वाददोषत्वं दोषलक्षणोपपन्नत्वाच्च दोषत्वमिति सत्प्रतिपक्षतया सन्देह इत्याह—। [e] "नियामके"ति । अत्रादोषत्वेऽप्यत्रापीद दूषणं न स्यादित्यपरां प्रतिबन्दिमापादयति—। [f] "किञ्चे"ति ।

मू० [a] तथाहि उभयवादिसम्मतादूष्यत्वं धूमानुमानादिकं यदि प्रतिवन्दीकरोति(१)परस्तदा तद्दर्शने(२)न्यत्र (३)क्वचिदप्येतदसिद्ध्यादिकं नोद्भावनीयं परसाधनेषु तस्यैव धूमानुमानादेः प्रतिवन्द्या भयादित्येषा मयापि सुग्रहैव तं प्रतिप्रतिवन्द्याऽत्रापि शक्यते एव पठितुं यत्रोभयोः समो दोष इत्यादि * [b] अथ यं विशेषमादायप्रतिवन्दी स्यात्तन्मात्रस्यानुद्भावनं न तु सामान्यत एव ? *—इति [c] चेन्न, तत्र विशेषे प्रतिवन्द्या त्याजितदुष्टत्वे गतत्वाल्लक्षणमेव नेति स्यात् [d] विशिष्य तद्विशेषत्याजने च तादृशस्य लक्षणस्यासिद्धिरेव स्यादिति कृतं प्रतिवन्द्या ॥

टी० ॥ [a] "तथाही"ति । उद्भाव्यमानोयं दोषः सदनुमानमास्कन्दतीति भयेन दोषानुद्भावनं चेत्तदा तस्य क्वाप्युद्भावनं न स्यात्तदानीमपि सदनुमानास्कन्दभयस्य विद्यमानत्वात् इत्यपराप्रतिबन्दिः प्रतिबन्दिवादिनं प्रतीत्यर्थः दोषः सदनुमानं नास्कन्दत्येव किंतु पराभ्युपगमरीत्या दोषश्चेदयं स्यात्तदा सदनुमानमप्याकुलयेदिति प्रतिबन्दिग्रहणमित्याह—। [b] "अथे"ति । यं दोषं पुरस्कृत्य प्रतिबन्दिः स चेन्न दोषस्तदा तद्दोषलक्षणमतिव्यापकमलक्ष्येऽपि गतत्वादित्याह—। [c] "ने"ति । ननु प्रतिबन्दिग्रहणस्य नायमभिप्रायो यदयं दोष एव न भवति

(१) प्रतिवन्दीकरोति=दृष्टान्तीयं करोति । (२) तद्दर्शने तच्छास्त्रे । (३) अन्यत्र परसाधनेषु (असिद्धहेत्वाभासेषु) क्वचिदप्येतदसिद्ध्यादिकं नोद्भावनीयमित्यन्वयः ।

किन्तु यद्ययं दोषः स्यात्तदा तथापि स्यादित्यस्य प्रकृते यो दोषो दीयते तत्र दोषलक्षणमेव न गतमित्यभिप्रायस्तदा दोषलक्षणमिह एवाभिधीयतां किं प्रतिबन्द्येत्याह—। [d]"विशिष्ये"ति । असिद्ध्यादिसाधारणलक्षणमेव तथा विशेषणीयं येनातिव्याप्तिर्न स्यादित्यर्थ इति केचित् ॥

मू० * [a]"अथ मद्दर्शनमात्राभ्युपगताद्दूष्यत्वं किञ्चित्पदार्थं प्रतिबन्दीकरोति (१) तदैतदुक्तं [b]तेन स्यादिह नेदं दूषणं वक्तव्यमभिधानेऽनयैव युक्त्या तवेष्टभङ्गप्रसङ्गात् ? *—इति तन्न, [c]इदमिह दूषणं वक्तव्यमनभिधानेऽस्यैवानिष्टस्य परसिषाधयिषितस्य सिद्धिप्रसङ्गात् इत्यभिधानानुकूलाया अपि प्रतिबन्द्याः सम्भवात् * [d]नन्वेवमेवास्तु तथाचाभिधाने नऽभिधाने चोभयतः पाशाप्रतिबन्दीरज्जुर्भवत एव दुर्निवारा स्यात् ? *—नैवम् ।

टी० ॥ ननु प्रपञ्चमिथ्यात्वसाधनं व्यावहारिकत्वं यदि प्रतिबन्दीकरोति(१)तदा तदापादितदोषस्यादोषत्वव्यवस्थापनं न प्रतिबन्दिवादिनोऽभिमत येन लक्षणमतिव्यापकं स्यादपितु दोषत्वव्यवस्थापनमेवेत्यत आह—। [a]"अथे"ति ॥ [b]"तेने"ति । प्रतिबन्दीवादिनेत्यर्थः ॥ [c]"इदमिहे"ति । भेदः पारमार्थिको व्यावहारिकत्वादित्यत्र यदि वेदान्तिनास्वरूपासिद्धिरुक्ता तदा प्रपञ्चो मिथ्या व्यावहारिकत्वादित्यपि स्वरूपासिद्ध्या दुष्टमेव स्यादिति यदि प्रतिबन्दीवादिनोऽभिमतं तदा प्रतिबन्दीपरिहाराय वेदान्तिनाऽपरा प्रतिबन्दिः करणीया तद्यथा यदि व्यावहारिकत्वं मया नासिद्ध्या दूषणीयं तदा भेदस्य त्वदिष्टं पारमार्थिकत्वं सिद्ध्येदित्यवश्यं मया दोषोपमुद्भाव्य इत्यर्थः [d]"नन्वि"ति । यदि दोषत्वं अबोधि तदा स्वल्पता-

(१) प्रतिबन्दीकरोति=दूषणीयं करोति ।

धननदयनेन दोषेण दुष्टं स्यात् नचेद्वीषि तदा मनिष्पादयि-
षितं सिद्धमित्यभिधानानभिधानयोस्तत्रैव सङ्कटप्रवेश इत्यर्थः ॥

मू० [a]मिथो[']विरुद्धायाः प्रतिबन्द्यास्तर्काभासत्वात् [b]मिथो विरोधस्य तर्कदूषणत्वात् [c]सत्प्रतिपक्षानुमानवद्द्वयोरपि परस्पर[d]प्रतिक्षेपेणैवोपक्षीणत्वादिति [e]न्यायद्वितीयाध्यायप्रथमाह्निक(१)सूत्रे प्रमेयता च तुलाप्रामाण्यवदित्यत्रापादितदृष्टान्ताभावलक्षणदोषसाम्येन प्रत्यवस्थितं पूर्वपक्षवादिनं निराकर्त्तुमाचार्यः समानमित्यनुत्तरमभ्युपगमादभ्युपगतं तावद्भवतास्मत्पक्षे दृष्टान्तो नास्तीति ब्रुवन्नुद्योतकरो यत्रोभयोरित्यादिवदतो भट्टस्य प्रतिभटो कर्त्तव्यः ॥

टी० ॥ [a]"मिथ" इति । अभिधानानभिधानाभ्यां दोषो मयि त्वया यदापाद्यते सेयं तृतीया प्रतिबन्दिः सा च न सम्भवति मिथो विरुद्धाभ्यां धर्माभ्यामेकस्यापाद्यस्यापादनं तर्काभासो यत इत्यर्थः कथं तर्काभासोयमित्यत आह—। [b]"मिथ" इति ॥ [c]"सत्प्रतिपक्ष"ति । यद्यभिधानपक्षे दोषस्तदानभिधानपक्षे दोषो न सम्भवती(२)त्युभाभ्यां दोषापादनद्वयस्य मिथः प्रतिबन्धादनुपपत्तिरित्यर्थः ॥ [d]"उपक्षीणत्वादि"ति । परस्पर प्रतिबन्धेन स्वस्वकार्याक्षमत्वादित्यर्थः ननु यत्रोभयोः समो दोषः इत्यभिदधतो महाचार्यस्य प्रतिबन्द्यभ्युपगमस्त्वत्प्रतिबन्दिखण्डन विरुद्ध इत्यत आह—। [e]"न्याये"ति । महाचार्यविरोध्युद्योतकराचार्यस्य प्रतिबन्दिखण्डनाभ्युपगमोऽस्त्येवेति तदनुरोध एव ममापीत्यर्थः ॥

मू० [a]तत्किं प्रतिबन्द्यादिदूषणं न भवत्येव * नन्वेवं भवतोपसिद्धान्तः स्यादिति चेत् ? *—[b]तर्हि दर्श-

(१) षोडश—(२) "यदि चानभिधानपक्षे दोषस्तदाऽभिधानपक्षे न सम्भवति"—इतिशेषः पूरणीयः, कथञ्चिल्लिखितो वा ज्ञेयः।

यापसिद्धान्तस्य लक्षणं प्रकृतसम्बद्धतया, ᶜवाङ्मात्रेणापसिद्धान्ते भवतः किमिति नापसिद्धान्तः स्यात् * सिद्धान्तविपरीताभ्युपगमोऽपसिद्धान्तः प्रतिबन्द्यादि भवता सिद्धान्तत्वेनाभिप्रेतं ᵈममेदं † दर्शनमाश्रित्याभिधेयमिति भवता दर्शनविशेषस्याभ्युपेतत्वात् दर्शनस्य च तत्तत्पदार्थस्वीकारात्मकत्वात् तेषु च पदार्थेषु प्रतिबन्दीदूषणत्वादेः प्रविष्टत्वात् ? *-इति चेन्न, लक्षणमेव तावदिदमपसिद्धान्तस्य नोपपद्यते मत्सिद्धान्तविपरीतमभ्युपगच्छतोऽपसिद्धान्तप्रसङ्गात् ।

टी० ॥ ननु स्थाने स्थाने शङ्कराचार्यप्रभृतिभिः प्रतिबन्दिरभ्युपगतैवेति तदनभ्युपगमे तवापसिद्धान्त इत्यपसिद्धान्तखण्डनाय प्रस्तौति-। ᵃ"तात्कथि"ति ॥ ᵇ"तर्ही"ति । लक्षणाधीनप्रतिपत्तिकत्वाल्लक्ष्यस्येति भावः प्रकृतसम्बन्धितया लक्षणं दर्शयेत्यर्थः ननु किं लक्षणोपदर्शनेन यतः प्रसिद्ध एवापसिद्धान्त इत्यत आह-। ᶜ"वाङ्मात्रेणे"ति । अस्यवर्तिकथनापसिद्धान्तापादनं सर्वत्रसुलभमित्यर्थः ननु कथामुपक्रममाणेन मया प्रतिबन्दिः सिद्धान्तत्वेन नाभ्युपगता येन तदनभ्युपगमादपसिद्धान्तः स्यादित्यत आह । ᵈ"ममेदमि"ति । अभ्युपगतप्रतिबन्दिदोषत्वशास्त्राभ्युपगम एव कथोपक्रमे प्रतिबन्द्यभ्युपगम इत्यर्थः यदीदं लक्षणं तदा मत्सिद्धान्तस्य प्रपञ्चमिथ्यात्वस्य विपरीतमभ्युपगच्छतो नैयायिकादेरपसिद्धान्तापत्तिरित्याह-। ᵉ"लक्षणमि"ति ॥

मू० * स्वसिद्धान्त"स्तथापेक्षित ? *-इति चेन्न, ᵇविशेषणापूरणमन्तरेण तदलाभात् ᶜअन्यथा सर्वत्र विशेषणोपादानवैयर्थ्यम् एवमभ्युपगमे भवत एवेयमप-

(†) "ममेदम्"-इति क्वाचित्कः पाठः ।

सिद्धान्तकृत्या [d]निवृत्त्यापत्तेः त्वत्सिद्धान्ते शतशो हेत्वादौ विशेषणोपादानदर्शनात् परसिद्धान्तहेतूनां चानुपात्तविशेषणानामनैकान्तिकी कृत्य त्वच्छास्त्रे बहुशो दूषितत्वात् प्रथमं स्वशब्दविशेषणमनुपादाय दूषणभयेनेदानीं तत्करणे च हेत्वन्तरं नाम निग्रहस्थानं भवतः हेत्वन्तरं हि प्रथममविशेषणं साधकभागमभिधाय पश्चाद्विशेषणवत्तद्वचनं [e]किञ्चैवं लक्षणमभिदधानस्य भवतोऽप्राप्तकालतापातः अप्राप्तकालोवयवविपर्यास इति लक्ष्यमभिधाय हि लक्षणाभिधानं युक्तं च भवता विपर्यासः कृतः ॥

टी० [a]"तथापेक्षित" इति । यद्विपरीताभ्युपगमेनापसिद्धान्त इत्यर्थः ॥ [b]"विशेषणे"ति । स्वपदमनन्तर्भाव्य पक्षलक्षणं कृत ततस्तद्लाभादित्यर्थः ॥ ननु सामान्यपदस्य विशेषे तात्पर्यात्सिद्धान्तपदं स्वसिद्धान्तपरमतो नोक्तदोष इत्यत आह-। [c]"अन्यथे"ति । एवं सति विशेषण क्वापि न दीयेतेति भावः ॥ [d]"निवृत्त्यापत्तेरि"ति । व्यावृत्त्यापत्तेरित्यर्थः । स्वशास्त्रे विशेषणपूरणात्परकीयहेत्वादौ च विशेषणमन्तरेणोपन्यस्ते त्वया दूषणाभिधानात् विशेषणपूरणस्य त्वत्सिद्धान्तत्वादित्यर्थः [e]"किञ्चैवमि"ति । लक्ष्यं पक्षमुपन्यस्य तन्निर्भेदार्थं लक्षणस्य हेतोरभिधानमित्यस्य विपर्यासस्त्वया कृत इत्यप्राप्तकालस्ते निग्रहस्थानमित्यर्थः ॥

मू० ([1]) [a]एवमेवाभ्युपगमे भवत एवापसिद्धान्तेपातात् * [b]यस्तु प्रथमत एव स्वविशेषणमुपादत्ते तं प्रत्यनु-

---

(१) हेत्वभिधानपूर्वं पश्चात्प्रतिज्ञावचनमित्येवमेवे पत्याक्रमत्वाद्वोक्त दोषइत्यत आह-एवमिति-प्रतिज्ञाहेतूदाहरणोपनयनिगमनाव्यवयवाः क्रमेणोपन्यसनीया इति भवच्छास्त्रेऽ टीकादादित्यर्थः ।

पात्तविशेषणपक्षाभिहितो दोषो वक्तव्यः [c]मदीयो हि सिद्धान्तः स्वसिद्धान्त एव मम [d]अत्र वाक्येऽभ्युपगमपदश्रवणादभ्युपगन्ता लभ्यते तस्य यः स्वकीयः स स्वशब्दार्थः पर्यवस्यति ? *-इति चेन्न, [e]ममाप्यभ्युपगन्तृत्वान्मयापि हि किञ्चिदभ्युपगम्यते एव * विपरीताभ्युपगन्तापेक्षित ? * इति चेन्न, अविशेषात् * सिद्धान्तविपरीताभ्युपगन्ता विपरीताभ्युपगन्ता ? *-इति चेन्न, तथाप्यविशेषात् ममापि त्वत्सिद्धान्तविपरीताभ्युपगन्तृत्वात् * स्वसिद्धान्तविपरीताभ्युपगन्ता तथाभिमत ? *-इति चेन्न,

टी० ॥ "एवमेवे"ति । हेत्वभिधानानन्तरमेव प्रतिज्ञाभिधानमिति क्रमश्चेत्स्वयेदानीमभ्युपगन्तव्य इत्यर्थः ॥ नन्वेतावतापसिद्धान्तखण्डनं न कृतं स्वपदपूरणेन लक्षणानिर्वाहादित्यत आह-। [b]"यदित्व"ति स्वेनिर्विशेषणस्य प्रक्षेपेपि वेदाभिमतसिद्धान्तविपरीतमभ्युपगच्छतो नैयायिकादेरपसिद्धान्तप्रसङ्गस्तदवस्थ एवेत्यर्थं ॥ तदेवोपपादयति -। "मदीयोही"ति । अभ्युपगन्ता स्वपदवाच्यो न च परदर्शनसिद्धान्तस्य परोऽभ्युपगन्तव्यस्तद्विपरीताभ्युपगमे परस्यापसिद्धान्तः स्यादित्याह-। [d]"अत्रे"ति । एतावतापि तत्सिद्धान्ताभ्युपगन्तृत्वं(१) न लभ्यते किन्तु अभ्युपगन्तृत्वमात्रं तथा च सदोषस्तदवस्थ एवेत्याह-। [e]"ममे"ति । अविशेषादिति ममापि यत्किञ्चिद्विपरीताभ्युपगन्तृत्वादित्यर्थ. ॥ [f]"तथापी"ति । सिद्धान्तस्याविशेषितस्यैवोपादानादित्यर्थः ॥

मू० [a]नूनमतिप्राज्ञो सि(२)यतः [b]स्वपदमभ्युपगन्त्रा विशेषयितुं प्रवृत्तो ऽभ्युपगन्तारमेव स्वपदद्वाराविशेषयसि

(१) स्वसिद्धान्तविवक्षतया विशेषरूपेण तदेकसिद्धान्तव्यवस्थाभ्युपगन्तृत्वमित्यर्थः । (२) प्रज्ञामतीत्यवर्त्तसे इत्यर्थः ।

परस्पराश्रया([1])न्नविशेषि स्वपदेपि साधारण्यप्रत्यवस्थानं परोक्तं पुनस्तदवस्थमेवेति च न प्रतिसन्धत्से([2]) [c] * यस्य यः सिद्धान्तस्तेन तत्परित्यागोपसिद्धान्तस्तदीय इति चेत् ? *-मैवम्, यस्य यः सिद्धान्त इति [d]पुरुषव्यक्तिविशेषसिद्धान्तव्यक्तिविशेषपरत्वेऽसाधारण्यादव्यापकत्वं लक्षणदोषः यस्येति सिद्धान्तसंबन्धिनः इत्यर्थे तेनेति च सिद्धान्तसंबन्धिनेत्यर्थे च भवतोऽपसिद्धान्तात् [e]तथाहि सिद्धान्तसंबन्धिनो मम यः सिद्धान्तस्तस्य सिद्धान्तान्तरसम्बन्धिना भवता त्यागोस्त्येव * ([3]) [f]त्याग एव तस्य नास्ति मया परिगृहीतविषयत्वात्त्यागस्य ? *-इति चेन्न,

टी० "नूनमि"ति । स्वपदार्थः साधारणो माभूदित्यभ्युपगन्ता तद्विशेषणत्वेनोपात्तस्तस्यापि साधारण्यं स्वपदेनापाकरोषि चेत्तदान्योन्याश्रय इत्यर्थः । एतावतापि नोक्तदोषोद्धार इत्याह—। [b]"स्वपदेपी"ति । [c]"यस्ये"ति । तथाच नैयायिकस्य स्वकीयसिद्धान्तविपरीताभ्युपगमादेवापसिद्धान्तो ननु परसिद्धान्तविपरीताभ्युपगमादपीत्यर्थः । यत्पदस्य व्यक्तिमात्रपरत्वेऽननुगमः साधारणत्वे पुनः पूर्वोक्तदोष इत्याह—। [d]"पुरुषे"ति । यत्पदस्य साधारणपरतायां दोष व्युत्पादयति—। [e]"तथाही"ति ॥ [f]"त्याग एवे"ति । मया नैयायिकेन भवदीयसिद्धान्तस्य त्याग एव नास्तीत्यर्थः ।

---

(१) अन्योन्याश्रयः । अभ्युपगन्तृनियमसिद्धौ स्वपदार्थनियमसिद्धिस्स्वपदार्थनियमसिद्धौ चाभ्युपगन्तृनियमसिद्धिरित्यन्योन्याश्रयः । (२) स्वपदं परित्यज्य अप्रतिपन्नोऽद्विशेषणमभिप्रेत्याशङ्कते-यस्य य इति- (३) त्यागपदस्याबलेनातिप्रसङ्गपरिहारं चोदयति—त्याग एवेति—

मू० "यदि त्यागोऽस्वीकारस्तदा न परिगृहीतविषयता-नियमः(१) * [b]अथ स्वीकृतस्यास्वीकारः ? *—तदा मया स्वीकृतस्य भवताऽस्वीकारो भवत्येव तथेति विशेषो नास्ति(२) * [c]अथ तेनैव स्वीकृतस्य तेनैवास्वीकारः *सोपि न [d]तेनेति स्वीकर्त्तृत्वर्थे ममापि स्वीकर्त्तृत्वेन मया स्वीकृतस्य भवताऽस्वीकारे तथापसिद्धान्तापत्तेः * [e]एकेनैकस्य स्वीकृतस्यास्वीकारोपसिद्धान्त ? *-इति चेन्न, केनेति यद्येकसङ्ख्यायोगिनेति तदा मम यथैकसङ्ख्यायोगित्वं तथा तवापीति स एवापसिद्धान्तापातः * [f]अथैकेनेत्यभिन्नेनेति ? * -[g]तदापि स्वस्मादभिन्नत्वं तव च मम च समानम् अन्यस्मादभिन्नत्वं न मम न तवेत्यपसिद्धान्तविषयोच्छेदः ॥

टी० ॥ (३)अस्वीकारमात्रस्य त्यागत्वे परिगृहीतविषयत्व नास्तीत्याह । "यदी"ति । यद्यपि परिगृहीतविषयत्वं त्यागस्येत्यभिधानानन्तरमयं विकल्पोनुपपन्नस्तथाप्यभिप्रायदार्ढ्यार्थं विकल्पो द्रष्टव्यः ॥ [b]"अथे"ति । प्रकृते तु त्वया स्वीकृतस्य मयाऽस्वीकार इति नापसिद्धान्तापातः इत्यर्थः ॥ तत्पदस्य स्वीकारकर्त्तृमात्रपरत्वे स एव दोष इत्याह—। [c]"तेनेती"ति ॥ [d]"एकेने"ति स्वीकारास्वीकारकर्त्रोरैक्यं विवक्षितमित्यर्थः ॥ एकत्वपे(४)कसङ्ख्यायोगित्वं चेत्तदा स एव दोष इत्याह—।

(१) पुनरपि प्रथमकल्पनिरासाय शङ्कते-अथेति (२) कश्चित्तत्पदप्रक्षेपेणाद्यकल्पमङ्गीकृत्य पुनश्शङ्कते-अथेति । (३) अथ स्वीकृतस्यास्वीकारस्त्यागोऽस्वीकारमात्रं वा । नाद्यः । व्याघातात् । नापि द्वितीयस्त्वाह-अस्वीकारमात्रस्येति- (४) एकमपि=एकपदस्यार्थोऽपि । एकसङ्ख्यायोगित्वम् = एकत्वसङ्ख्यावत्त्वम् ।

[e]"ने"ति स्वीकारास्वीकारकर्त्रोरभेदो विवक्षित इति न पूर्वदोष इत्याह—। [f]"अथे"ति । स्वाभेदविवक्षायां पूर्वदोषतादवस्थ्यं([1]) पराभेद विवक्षायामसम्भवलक्षणदोषः नहि कश्चित्परस्माद्भिन्नो भवतीत्याह—। [g]"तदापी"ति ॥

मू० * [a]अथ स्वीकर्त्तुरस्वीकर्त्तृतो न भिन्नत्वं ? *—तदाऽयमर्थः स्यात् स्वीकर्त्तृतो न भिन्नेन एकस्य स्वीकृतस्यास्वीकारोऽपसिद्धान्तस्तथाच स एव भवतोऽपसिद्धान्तः [b]मया यदीयाङ्गीकारः किञ्चित्स्वीकर्त्तुरभिन्नस्य भवतस्तदीयास्वीकर्त्तृत्वात् [c]एतेनैकस्यैकेन स्वीकारास्वीकारावपसिद्धान्त इत्यपास्तं [d]मिलितयोरावयोरपसिद्धान्तापातात् * [e]अथ तत्स्वीकर्त्तुरेव तदस्वीकर्त्तुरभिन्नत्वमेकशब्देनाभिमतं ? *—॥

टी० ॥ ननु स्वीकर्त्तृप्रतियोगिकभेदात्यन्ताभाववता यो ऽस्वीकारस्तुल्यविषयकः सोऽपसिद्धान्त इति शङ्कते—। [a]"अथे"ति । प्रपञ्चसत्यत्वस्वीकर्त्तृप्रतियोगिकभेदात्यन्ताभाववता भवता प्रपञ्चमिथ्यात्वास्वीकारोऽपसिद्धान्तः स्यादत्रापि स्वीकर्त्तुर्नोभिन्न एवास्वीकर्त्ता विषयः प्रपञ्चोऽप्येक एवेत्याह । [b]"मये"ति । यदङ्गीकारो यस्य विषयस्य प्रपञ्चमिथ्यात्वादेरङ्गीकार इत्यर्थः ॥ [c]"एतेने"ति । स्वीकारास्वीकारकर्त्रोः कर्मण([1])श्चैक्यं यत्रे([2])ति शङ्कार्थः ॥ एकत्वमङ्गायोगित्वविवक्षादोषे सत्येव दोषान्तरमाह—। [d]"मिलितयोरि"ति । एकेन मया भवता च कस्यचिद्विषयस्य स्वीकारः कस्यचिच्चास्वीकार एक एवापसिद्धान्त उभयोः स्यादित्यर्थः । विषयैक्यविवक्षायामपि प्रकारभेदमाश्रित्य स्वीकारास्वीकारावेकेन सम्भवत एवेति भावः । यद्वा विषयाभेदमविवक्षित्वैव पूर्वशङ्का तेन तद्विवक्षया शङ्कान्तरमाह—। [e]"अथे"ति ॥

---

(१) कर्मणः—स्वीकारविषयस्य । (२) "तत्रापसिद्धान्तः"—इति शेषः ।

मू० "तदापि यदि स्वीकारविषयाभिन्नत्वं तच्छब्देनोच्यते ऽस्वीकारविषयस्य तदा स्वीकर्त्रन्तरस्वीकारविषयस्य भवता किञ्चित्स्वीकर्त्रभिन्नेनास्वीकारविषयतया स्वीकारविषयाभिन्नत्वस्वीकारेण भवतोऽपसिद्धान्तप्रसङ्गस्य दुर्वारत्वात् * b"एकेन स्वीकर्त्रा ननु भिन्नेन स्वीकारास्वीकारौ विवक्षितौ ? * -इति चेन्न, c'एकेन स्वीकर्त्रे'त्येतदेव विवेचयन् भूयस्तदाकर्षन्नभिहितदूषणगणाव्यावृत्त्यापत्त्या कथय कथं न घनाघनसमय(१)समाग d"मोदीयमानतरलतरङ्गिणीवेणिजलविवर्त्तनिर्वर्त्तितावर्त्तचक्रचङ्क्रम्यमाणतृणकदम्बविडम्बनामनुभविष्यसि * स्वीकृत्यास्वीकारः स ? *-इति चेन्न,

टी० ॥ "तदे"ति । स्वीकर्त्रन्तरस्य वेदान्तिनः स्वीकारविषय प्रपञ्चमिथ्यात्व तस्य स्वीकर्त्रन्तराभिन्नेन भवता यो स्वीकारः सोऽपसिद्धान्तः स्यादित्यर्थः ॥ नन्वत्रापि स्वीकारास्वीकारौ भिन्नकर्तृकावेव पर्यवसन्नौ समानकर्तृकौ च विवक्षिताविति नोक्तदोष इत्याह । b"एकेने"ति ॥ एकेनेत्येकमठ्यायोगिनेत्युक्तदोषनादवश्यमेवेत्युपहसन्नाह -। c"एकेने"ति । तदाकषन् द्रापनविशेषणैरेव विशेषयन् दूषणगणाव्यावृत्तिर्दूषणगणप्रत्यासत्तिः कथं न विडम्बनामनुभविष्यसीति कथयेत्यन्वयः । d"उदीयमाने"ति दैवादिकस्येङ् गताविति धातोरात्मनेपदिनो रूप वेणिः प्रवाहः जलविवर्तो भ्रूयन्त्या जलपरिणामस्तेन निर्वर्तितो निष्पादित आवर्तोऽम्भसां भ्रमिस्तस्य चक्र समूहः तत्र चङ्क्रम्यमाणस्य घूर्णमानस्य तृणसमूहस्य या विडम्बना विकल्पना तां भजेत्यर्थः ॥

मू० "कार्यविवेचनेनोक्तबाधापातात् b"अस्वीकृत्य स्वीकारे च तदभावापत्तेः । c'किञ्च सिद्धान्तपरित्यक्तरि

(१) वर्षासमयेत्यर्थः ।

यदपसिद्धान्तोद्भावनं तत् किं स्वीकृतदर्शनानुमतापसिद्धान्तदूषणाभावे वादिनि उतानेवम्भूते [d]आद्ये पर्वसिद्धान्तवदपसिद्धान्तेऽप्यनेन व्युत्थातुं शक्यते तत्र किं वक्तव्यं * [e]न तावन्न वक्तव्यमेव किञ्चित्पूर्वसिद्धान्तत्यागादेवापसिद्धान्तेन निगृहीतत्वादतियुक्तम् ? *- [f]अपसिद्धान्ते तत्परिहारस्य(१)तद्दूषणत्वान्यतरासिद्धेस्तेनाभिहितत्वात् ।

टी० ॥ [a]"क्त्वार्थे"ति । क्त्वाप्रत्ययस्याप्येककर्तृकत्वमर्थः । तत्र चैकपददोषतादवस्थ्यमित्यर्थः ॥ [b]"अस्वीकृत्ये"ति । प्रपञ्चमिथ्यात्वस्यास्वीकृतस्य नैयायिकेन स्वीकारोऽपसिद्धान्तो न स्यात् क्त्वाप्रत्ययेन स्वीकारपूर्वकास्वीकारस्यैवाभिधानादित्यर्थः॥ ननु सिद्धान्तपरित्याग एवापसिद्धान्तः सचोभयथाप्यस्ति स्वीकृत्यास्वीकारे अस्वीकृत्य स्वीकारे चेत्यत आह—। [c]"किञ्चे"ति। यद्दर्शनमाश्रित्य कथायां प्रवर्त्तते तद्दर्शनं स्वीकृतापसिद्धान्तदोषभावमुत नेति विकल्पार्थः ॥ [d]"आद्ये" इति । सिद्धान्तं त्यजता तेन यद्यपसिद्धान्तस्य दोषत्वमपि त्याज्यं तदा तस्मै किं वाच्यमित्यर्थः ॥ [e]"न तावदि"ति । मृतमारणस्यानर्हत्वादित्यर्थः । [f]"अपसिद्धान्ते" इति । येन सिद्धान्तेन मृतस्तत्र विप्रतिपत्तिश्चेत्तदा न मृत एवेत्यर्थः ॥

मू० [a]अन्यथा स्वाभिप्रायेणासिद्धिमुद्भाव्यैव कथां विच्छिन्दानो विजयेत परासिद्धिपरिहारं नापेक्षेत इत्यनसिद्धावप्यसिद्धिमुद्भाव्य परं पराजित्याप्रत्यूहं गृहान् प्रतिष्ठेत * [b]निगृहीतस्य तस्यापरमभिधानमनादरणीयमेवेति चेन्न ? *- [c]अन्यतरासिद्ध्या निग्रहपरिहारस्यैव तेनाभिधीयमानत्वात् [d]तथाप्यनादरणेऽन-

(१) तत्परिहारस्य तेनाऽभिहितत्वादित्यन्वयः । तद्दूषणत्वेत्यत्र त्वादिति पदं क्वचित्पुस्तके नास्ति ।

सिद्धावसिद्धिमुद्भाव्य पराभिधीयमानमसिद्धिपरिहारमनादृत्य विजयेतैवेत्युक्तम् * [e]अथ मन्यसे मध्यस्थेनैतद्विचारणीयं किमनसिद्धावसिद्धिरनेनोक्ता अनपसिद्धान्ते चापसिद्धान्तः एतद्विचार्य्य तेनैव जयपराजयाववधारणीयौ एतदर्थमेव मध्यस्थोपस्थापनमिति ? * [f]तर्हि वादिना साधने प्रयुक्ते दुष्टमेतदित्यभिधायैव प्रतिवादिना निवर्त्तनीयं मध्यस्थस्तु परमार्थतो दुष्टत्वमदुष्टत्वं वा तस्य साधनस्य विचार्य जयपराजयाववधारयिष्यति सोयं प्रसूय निर्वृत्तीभूतपिकदम्पत्यपत्य(१)पोषणकृतमहायासवायसव्यसनमासादयिष्यति मध्यस्थोवराकः तावकदुःपरामर्शप्रकर्षेण ।

टी० ॥ [a]"अन्यथे"ति । यदि परोद्भावितदोषे परविप्रतिपत्तिर्न निरसनीयेत्यर्थः । परासिद्धिपरिहारं परेण क्रियमाणमसिद्धिपरिहारम् । अनसिद्धौ परोद्भावितासिद्धिशङ्के ॥ [b]"निगृहीतस्ये"ति । अपसिद्धान्तेन निग्रहेण निगृहीतस्यापसिद्धान्ते विप्रतिपत्तिवचनं नादरणीयमित्यर्थः । अपसिद्धान्तपरिहाराय तस्य तत्र विप्रतिपत्तिरतोवश्यमादरणीयेत्याह—। [c]"अन्यतरे"ति । पूर्वोक्तमेव विपक्षे दण्डं स्मारयति—। [d]"तथापी"ति । उद्भावितदोषपरिहारं क्वापि नोद्भावयितापेक्षेतेत्यर्थः ॥ [e]"अथे"ति । उद्भावितदोषस्य समीचीनत्वे स्थापनावादिनस्तदसमीचीनत्वे निरनुयोज्यानुयोगेन दूषणवादिनोभङ्गमेव मध्यस्थो व्यवस्थापयेत् तूद्भावितदोषे वादिविप्रतिपत्तिर्वादिना गवेषणीयेत्यर्थः ॥ तर्हि वादी विशिष्य दोषमपि नोद्भावयेत्तत्रापि मध्यस्थस्यैव दोषविशेषविचारणाश्रमः स्यादित्युपसंहरति—। [f]"तर्ही"ति ।

सू० * अथोच्यते [a]"संप्रति विप्रतिपद्यतां नामापसिद्धान्ते-

(१) अपेक्षेत् = आदरेत् ।

प्यसौ किमेतावता पूर्वस्वीकृतापसिद्धान्तदूषणभावस्य दर्शनस्य तावत्तेन स्वीकरणमकारि तदेवादायापसिद्धान्तस्योपन्यासो युक्तः इति ? * —मैवम्, [b]यदीदानींतन्यननुमतिरस्य नाद्रियते अस्यामुपजातायामपि प्राक्तनानुमतिमादायैव दूषणप्रवृत्तिः तदापसिद्धान्तस्यापि कुतोऽवकाशः स(२)हि पूर्वमनुमतस्येदानीमननुमतिमाश्रित्यैव प्रवर्त्तते नान्यथा [c]तस्मात्स्वीकृतापसिद्धान्तदूषणभावमपि वादिनं प्रति विप्रतिपत्तिकाले साधनीयमपसिद्धान्तस्य दोषत्वमिति । [d]द्वितीयानवकाशः ।

टी० ॥ सामान्यतोऽप्यनङ्गीकृततद्दोषभावस्यैव तत्र विप्रतिपत्तिर्देया येन तु तद्दोषभावः सामान्यतोऽभ्युपगतस्तस्यापि कथाकालीना तद्दोषविप्रतिपत्तिश्चेदादरणीया तदा क्वचिदपि दोषव्यवस्थितिर्न स्यात् को हि परापादिते दोषे न विप्रतिपत्स्यते इत्याशङ्कते—। [a]"सम्प्रती"ति । पूर्वस्वीकृतास्वीकारसाम्येऽप्यपसिद्धान्त आद्रियते अपसिद्धान्तविप्रतिपत्तिः कथाकालीना कथं नाद्रियेतेत्याह—। [b]"यदी"ति । साऽप्याद्रियतां किं तेनेत्यत आह । [c]"तस्मादि"ति । तथाच कथाकालेऽपसिद्धान्तस्य दोषत्वं व्यवस्थापनीयं तत्रोक्तक्रमेणाशङ्कामित्यर्थः ॥ [d]"द्वितीयानवकाश" इति च इनैव अपसिद्धान्तस्य दोषत्वं व्यवस्थापनीयं न तु मध्यस्थे ति मध्यस्थस्य द्वितीयस्यानवकाश इत्यर्थः ।

सू [a]"यस्य तु सौगतादेर्मतेऽपसिद्धान्तो न दूषणं तं प्रति साधनीयमवश्यमेवास्य दूषणत्वं * [b]नच वाच्यं योऽपि सिद्धान्ते विप्रतिपत्तिं करोति तं प्रति व्याघात

(१) पिकदम्पती स्वापत्यं प्रसूय काकापत्यमपसार्य तत्स्थाने तं निधाय काकेन स्वापत्यं पोषयतः । (२) सः=अपसिद्धान्तः ।

एवापादनीयः? *—'दर्शनविशेषं स्वीकुर्वता प्रथमं[1]) तद्दर्शनान्तर्निवेशिनः प्रतिवन्दीदूषणत्वादेस्तेन स्वीकारात् पश्चात्तस्यैवास्वीकारस्तावेतौ स्वीकारास्वीकारावेकेनैकस्य व्याहताविति ।

टी० ॥ तदेवाह—। "'यस्येति । यथा सौगतं प्रति वादिनैव तद्दोषत्वं व्यवस्थाप्यं न तु मध्यस्थेनेत्यर्थः यद्वाऽपसिद्धान्ते विप्रतिपन्नं प्रत्यपसिद्धान्तस्य द्वितीयस्यानवकाश इत्यर्थः । तद्दोषत्वस्य तं प्रत्यव्यवस्थितत्वात् ॥ ननु कथायां कथकेन दोषत्वं यदि व्यवस्थाप्यं तदा कथैव न पर्यवस्येदित्यत आह—। '"यस्य त्वि"ति । अनभ्युपगतापसिद्धान्तदोषत्वं सौगतं प्रति कथावसरेऽपि तद्व्यवस्थापनस्य व्यावहारिकत्वादित्यर्थः । यद्वा तदानेवंभूतं प्रतीति यो द्वितीयो विकल्पः तस्यानवकाश इत्यर्थः ॥ कुतः इत्यत आह—। "यस्य त्वि"ति तुशब्दो हेत्वर्थः । साधनीयदोषभावस्यापसिद्धान्तस्य तं प्रत्युद्भावनमनुचितमेव यत इत्यर्थः ॥ नन्वपसिद्धान्ते विप्रतिपन्नं प्रत्यपसिद्धान्तान्तरं नोद्भाव्यं येन तद्दोषभावस्यान्यतरासिद्धत्वं स्यादपि तु व्याघात उद्भाव्य इत्यत आह—। ""स्वे"ति । व्याघातं स्फुटयति दर्शनेति प्रतिवन्दीदूषणादेरित्येतद्गुणसंविज्ञानबहुव्रीहिणापसिद्धान्त एवाभिहितस्तेनापसिद्धान्तस्य स्वीकृतस्यास्वीकारो लभ्यते यद्वा प्रथमापसिद्धान्तसाध्यदर्शनाय प्रतिबन्द्यादेरित्युक्तम् ।

मू० "यद्ययमपसिद्धान्तात्मैव व्याघातस्तदाऽपसिद्धान्तदूषणत्वे विप्रतिपन्नस्य विप्रतिपत्तिमव्युदस्य नभिधातुं शक्यः * अथ दूषणान्तरमयं व्याघातोपसिद्धान्तमनुपजीव्य सम्भाव्यमानोद्भावनः? *—तदा

(१) केषुचित्पुस्तकेषु मूले "प्रतिवन्दीदूषणत्वादेः'—इति पाठः ।

प्रथमसिद्धान्तस्य स्वीकारादित्यनेन [illegible] यः ।

सार्वत्रिकापसिद्धान्तोदाहरणेऽप्ययमेवास्तु किमपसिद्धान्तस्य दूषणताङ्गीकारेण [b]किञ्च एवमपसिद्धान्ते उद्भाविते पश्चात्तद्विप्रतिपत्तावुपजातायामपसिद्धान्तमुपेक्ष्य व्याघातलक्षणस्यास्य दोषान्तरस्याभिधाने प्रतिज्ञाहान्यापत्तेः प्रतिज्ञाहानिः [c]स्वीकृतोक्तत्याग इति [d]एवं प्रथमं किञ्चित् दूषणमुक्त्वा तत्परिहारिणः दूषणान्तराभिधाने न प्रतिज्ञाहानिरिति गतं प्रतिज्ञाहान्यादिभिर्निग्रहैः ।

टी० ॥ व्याघातो यद्यपसिद्धान्त एव तदा तत्र विप्रतिपन्नं प्रति तदुद्भावनानर्हतैव दूषणान्तरं चेत्तदाऽपसिद्धान्त एव पृथक् निग्रहस्थानं न स्यात्तुल्यलक्षणत्वादित्याह-। [a]"यद्यपि"ति । व्याघातस्य दोषान्तरत्वपक्षे दोषान्तरमाह [b]किञ्चेति दूषणहानेरपि प्रतिज्ञाहानिपदेन सङ्गृहीतत्वादित्यर्थः दूषणहानिसाधारणं प्रतिज्ञाहानिलक्षणमाह—। [c]"स्वीकृतोक्ते"ति ॥ नन्वेवं प्रतिज्ञातं यदपसिद्धान्त एवात्र दोषस्तथा च तत्र व्युत्थितं प्रति व्याघातोद्भावनं कथं प्रतिज्ञाहानिः स्यादित्यत आह—। [d]"एवमि"ति । तत्परिहारिणस्तं दोषं त्यजतस्तन्निर्वाहमकुर्वत इति यावत् "तत्परिहारिणो"ति क्वचित्पाठस्तत्राप्ययमेवार्थः । स्वीकृतोक्तत्यागे सत्यपि यदि न प्रतिज्ञाहानिस्तदा क्वचिद्प्यय दोषो न भवेदित्यर्थः । आदि पदात् प्रतिज्ञान्तरादिपरिग्रहः ।

सू० * "प्राक् प्रतिज्ञातदोषनिर्वाहार्थमेव निग्रहान्तरकथनात् नैष दोष ? *—इति चेन्न, (१) [b]पूर्वनिग्रहपरिहारमकृतवति तेनैव पराजिते निग्रहान्तरोपन्या-

(१) पूर्वोद्भाविते निग्रहे परिहृते व्याघातनिग्रहोद्भावनमुतापरिहृत एव नाद्यः प्रतिज्ञाहान्यापत्तेः द्वितीयश्चेत्तत्राह- नेति-

स्यायुक्तत्वादिति (1) * 'नचानेन भयेन भवता व्याघात एवाभिधातव्यः प्रथमं नापसिद्धान्त इति वाच्यम् ? *–अपसिद्धान्तवैयर्थ्यप्रसङ्गात् [d]'सर्वत्राप-सिद्धान्तोदाहरणे व्याघाताभिधानस्यैव सङ्गीकर्त्त-व्यः वा ब्रूहि क्वचिच्छक्यतेवधारयितुं मयापसिद्धान्ते उद्भाविते नायं तत्र विप्रतिपत्स्यते इति ।

टी० ॥ ननूद्भाविनापसिद्धान्तनिर्वाह एव व्याघातोद्भा-वनेन क्रियते तथा च कथं प्रतिज्ञाहानिरित्याह –। [a]"प्रागि"ति ॥ [b]"पूर्वे"ति । पूर्वनिग्रहोपसिद्धान्तस्तत्परिहारमकृतवति दोषा-न्तरानवकाशान्नहि मृतोपि मार्यते इत्यर्थः । क्वचित्परिहार-मकृतवतीति(2)पाठः । तत्र प्रथमोद्भाविनापसिद्धान्तरूपनिग्रह-स्थानपरिहारः तत्र व्युत्थानेनान्यतरासिद्ध्यादिना कृतः तत्परि-हारमपसिद्धान्तदोषत्वव्यवस्थापनमकृतवति वादिनि निरनु-योज्यानुयोगेन पराजिते निग्रहस्थानान्तरस्य व्याघातस्य च उपन्यासः स न युक्तः पराजितवादिकर्तृक उपन्यासो न युक्त इत्यर्थः ॥ [c]"नचे"ति । अपसिद्धान्तदोषत्वे व्युत्थित प्रति दोषत्वव्यवस्थापनभयेनेत्यर्थः एव सत्यपसिद्धान्तः क्वापि लब्धा-वकाशो न भवेत्सर्वत्र व्याघातस्यैवोद्भावनीयत्वादिति तद्दोष-त्वव्युत्पादनवैयर्थ्यं स्यादित्यर्थः ॥ एतदेवाह–। [d]"सर्वत्रे"ति ॥ ननु यत्रैव नापसिद्धान्तदोषत्वे विप्रतिपत्स्यते तत्रैवाय लब्धा-वकाशः स्यादित्यत आह–। [e]"नही"ति ॥

सू० * नन्वस्त्वेवं विप्रतिपन्नं प्रत्यपसिद्धान्तस्य दूष-

(१) अयुक्तत्वं चात्राकृतपरिहारे पूर्वनिग्रहे निग्रहान्तरोद्भावने-नोद्भावयितुरेवनिग्रहान्तापत्त्या बोध्यमिति भावः ।

(२) पूर्वनिग्रहपरिहारपरिहारमकृतवतीति पाठ इत्यर्थः ।

चात्वं प्रसाधनीयमिति ? *-(१)मैवं, [b]येनाप्यस्वीकारदण्डेन तत्स्वीकारविध्वंसि तदनङ्गीकारस्यापि सम्भवात् उक्तं च सौगतैः "[c]नहि शास्त्राश्रया वादा भवन्ती"ति नापसिद्धान्तो निग्रहाधिकरणमिति [d]रिक्तस्य जन्तोर्जातस्य गुणदोषमपश्यतः विलब्धा वत केनामी सिद्धान्तविषयग्रहा इति ।

टी० ॥ ननु यथा सौगतं प्रत्यपसिद्धान्तस्य दोषत्वं तदेव व्यवस्थापनीयं तथान्यमप्यपसिद्धान्तव्युत्थितं प्रतीत्याह– । [a]"नन्वि"ति । ननु यत्किञ्चिद्दृष्टान्तमुपन्यस्यापसिद्धान्तो व्यवस्थाप्यस्तत्रापि तद्व्युत्थितिसम्भवादित्याह-। [b]"येनापी"ति । अपसिद्धान्तस्यादोषत्वे सौगतानुमतिमाह--। [c]"नही"ति । कथायां यथास्फुरणं वक्तव्यं कथाक्रमेण नतु शास्त्रानुरोधस्तथा चापसिद्धान्तो निग्रहस्य कथाकारणसम्यग्ज्ञानाभावस्याधिकरणमुन्नायकं न भवतीत्यर्थः ॥ [d]"रिक्तस्ये"ति । न खल्वयं सिद्धान्तमादायैव कश्चिज्जायते येनास्यायं सिद्धान्त इति नियमः स्यात् न वा गुणदोषविचारविधुरेण जन्मानुपदं स्वेच्छया सिद्धान्तः परिगृहीतो नवा जातमात्राय केनचिन्नियामकेन सिद्धान्ता विलभ्यन्ते तवायं सिद्धान्तस्तवायं सिद्धान्त इति तथाच सिद्धान्तो न कस्यापि येन तत्त्यागतोऽपसिद्धान्तः स्यादित्यर्थः । सिद्धान्तविषयग्रहा इति रूपक(२) यथा विषयो ग्रामादिः राजादिना विलभ्यते तथा न सिद्धान्तोपीत्यर्थः ॥

मू० "[a]अत्र कश्चिदाह शास्त्रमनाश्रित्य कथारम्भानुपपत्तिः यदा हि क्षणभङ्गसाधनप्रयोक्ता [b]अस्फुतिमता स्थिरत्वादिना सिद्धसाधनमुद्भाव्य निगृह्यते तदा

(१) दूषणत्वेन तदङ्गीकृतव्याघातादिदण्डेनापसिद्धान्तस्य तथा दूषणत्वं प्रसाधनीयं तदपि न सम्भवति पूर्वं सिद्धान्तवदव्याघातादपदूषणत्वादपि व्युत्थानसम्भवादिति परिहरति–मैवमिति-इति तु विवाचाकाराः (२) रूपकम्–रूपकालङ्कारः ।

'किं कुर्यात् d* प्रथमविप्रतिपत्तिविरोधमुद्भावयेत् ?
—इति चेत्, 'एवं तर्हि विप्रतिपत्त्यनुगुणप्रमेयान्तरव्यतिक्रममप्युद्भावयेदेव अन्यथा विप्रतिपत्तिव्यतिक्रममप्युपेक्षेत न खलु तत्तदनुगुणव्यतिक्रमयोर्विरोधापत्तिं प्रति कश्चिद्विशेषः f नचैकपुरुषार्थानुगुणाङ्गाङ्गिभावव्यवस्थितपदार्थजातव्युत्पादनादन्यच्छास्त्रं नाम *

टी० ॥ नहि शास्त्राश्रया वादा भवन्तीति वादिनं सौगतं प्रति परिशिष्टे(१) यदुक्तमुदयनाचार्यचरणैस्तदाह—। ""अत्र कश्चिदि"ति ॥ b""अस्फूर्तिमते"ति । दोषान्तरस्फुरणरहितेन ॥ c""किं कुर्यादि"ति । अपसिद्धान्तं तिरस्कृत्य किमन्यद्कुर्यादित्यर्थः ॥ ननु स्थैर्यपक्षं गृहीत्वा कथायां प्रवृत्तः क्षणभङ्गमङ्गीकुर्वन् प्राथमिकविप्रतिपत्तिविरोधेनैव निग्रहीतुं शक्यते नापसिद्धान्तेनेति शङ्कते- । d""प्रथमे"ति । स्थैर्याभ्युपगमविरोधमित्यर्थः । यदि तत्कालीनस्थैर्याभ्युपगमविरोधो दोषस्तदा स्थैर्यसाधनोपयुक्तप्रमेयान्तरव्यतिक्रमोऽपि दोष एवाविशेषादित्याह—। e""एवमि"ति । स्थैर्यवत् स्थैर्यसाधकप्रत्यभिज्ञानप्रामाण्यमपि तदभ्युपगमविषय एवेति भावः । ननु भवत्वेवं तथापि नहि शास्त्राश्रया वादा इत्यत्र किमुक्तं भवेदित्यत आह f""नचे"ति । एकः पुरुषार्थः स्वर्गापवर्गौ वा तदनुगुणं तदुपयुक्तमङ्गाङ्गिभावापन्नं यत्पदार्थजातं तद्व्युत्पादनात्तद्व्युत्पादकादन्यादित्यर्थः । कर्तरि ल्युट् प्रत्ययान्तो व्युत्पादनशब्दः करणव्युत्पन्नो वा यथा मीमांसायां स्वर्गः पुरुषार्थस्तदङ्गमपूर्वं तदङ्गं च यागादि तद्व्युत्पादनमेवमान्वीक्षिक्या(२)मपवर्गः पुरुषार्थस्तदङ्गाङ्गिभावापन्नं प्रमाणप्रमेयसंशयादीति ॥

सू० 'तस्मात् क्षणिकत्वस्वीकारे तदनुगुणायोहादिसम-

(१) परिशिष्टे—परिशिष्टनामके ग्रन्थे । (२) आन्वीक्षिक्याम्—न्याये ।

स्तत्स्वीकारः तदेकपरिहारे वा समस्ततदनुगुणपरिहार इति परमेश्वरोपि नान्यथा कर्त्तुं क्षमः[b] * नच समस्ततदनुगुणपदार्थजातं कथारम्भे स्वशब्देनाभिधातुमुचितं * तदैव शास्त्रप्रणयनप्रसङ्गात् [c]परिषदनपेक्षितत्वाच्च [d] * नच तद्व्यतिक्रमोद्भावनाय समस्ततदनुगुणोहः परस्परशास्त्रमनाश्रित्य शक्यः * [e]नच तदनुगुणव्यतिक्रमे तदुपेक्षणे वा तत्त्वप्रतिपत्तिजयाविच्यकामेनापि तत्तदधिकारप्रवृत्तं शास्त्रमेवाश्रयणीयम् ? * —इति ।

टी० ॥ किमतो यद्येवमित्यत आह—। [a]"तस्मादि"ति । तथाच तात्कालिकविप्रतिपत्तिविषय परित्यागवत्तदनुगुणसमस्तपरिहारोपि दोष इत्यर्थः । एवं च शास्त्रमाश्रित्यैव कथेति तदुक्त(१)समस्तपदार्थातिक्रमस्य दोषत्वमाह—। [b]"नचे"ति ॥ [c]"परिषदि"ति । विप्रतिपत्तिविषयसाधनदूषणाभिधानमात्रे परिषदाकाङ्क्षेत्यर्थः ॥ ननु तदनुगुणा अपि पदार्थाः कथाकाले स्वयमुन्नीयतां वादिना किं परस्परं वादिनोः स्वस्वशास्त्राश्रयणमत आह—। [d]"नचे"ति । ननु तदनुगुणव्यतिक्रमोपि नोद्भाव्यतामत आह—। [e]"नचे"ति ॥

मू० [a]तदेतदपेशलं, किं तदनुगुणं प्रमेयान्तरं यदनभ्युपगमे विरोधमुद्भावयेदित्युच्यते द्वयमभ्युपगम्यं सम्भवति एकं तावद्यदनभ्युपगमे कथैव प्रवर्तयितुमशक्या यथा प्रमाणादि सर्वकथकसिद्धम्, इतरत्तु प्रतिदर्शनसिद्धं किञ्चिद्यथा क्षणभङ्गेश्वरादि तत्र यदि प्रथममभ्युपगम्यैव कथाप्रवृत्तिरिति तत्स्वीकारे परस्पा-

(१) शास्त्रोक्तेत्यर्थः ।

तदनङ्गीकारेऽपसिद्धान्तः तन्न (१) स्वव्याघातकत्वेन तस्य(२)भवद्भिरेव जातित्वाङ्गीकारात् ॥

टी० ॥ तदिदमाचार्यमतं खण्डयति-। "तदेतदि"ति। सर्वतन्त्रसिद्धान्तो हि प्रमाणं धर्मादिश्च तदनभ्युपगमेऽपसिद्धान्तो न भवेत् किन्तु जात्युत्तरमेव स्यात् प्रमाणानभ्युपगमे स्वपक्षसाधकानुमानप्रयोगो व्याहतः धर्म्यनभ्युपगमे च कुत्र धर्मिणि स्वहेतुं प्रयुञ्जीत ततो साधकतासाधकानुमानमपि प्रमाणमेव तत्रापि च धर्म्यपेक्षैवेति स्वव्याघातकत्वाज्जात्युत्तरमेतदित्यर्थः। यद्यपि नैतज्जात्युत्तरं प्रमाणं नास्ति धर्मी वा नास्तीत्येतावन्मात्राभिधानस्य चतुर्विंशतौ जातिष्वनन्तर्भावात् तथापि प्रमाणं नास्तीतिवाक्यमात्मानमपि शब्दरूपं प्रमाणं व्याहन्त्येवेति जातिसामान्यलक्षणाक्रान्ततया आकृतिगणत्वेनाभ्युपगतायामनुपदर्शितमायां जातावन्तर्भाव एव अत एव तत्र महाविद्यानुमानानामन्तर्भावः ॥ एवं धर्मी नास्तीतिवाक्यमात्मानमेव धर्मिभूतं व्याहन्तीति जात्युत्तरमेव

मू० "जातेश्च निरनुयोज्यानुयोगे निवेशात्(३)नापि द्वितीयः दर्शनभेदनियतं हि क्षणभङ्गादि यत्कथारम्भेऽभ्युपगन्तव्यं तत्किं "तदभ्युपगमस्य प्रकृतसाध्यापोहाद्युपायता(४)उत तन्नान्तरीयकतया "न प्रथमः क्षणभङ्गसाधनप्रस्तावेऽपोहादिपरित्यजतः सौगतस्यापसिद्धान्ताभावापत्तेः तदभ्युपगमस्य तदनुपायत्वात् " * अन्योन्याभ्युपगमोपायत्वे चा-

(१) सर्वतन्त्रसिद्धान्तसिद्ध प्रमाणाद्यनभ्युपगमेऽपसिद्धान्तो न भवेत् किन्तु जात्युत्तरमेवेत्याह—स्वेति- (२) प्रमाणाद्यनभ्युपगमस्येत्यर्थः।

(३) अत्र "नापसिद्धान्तत्वम्"--इति पूरणीयम्--।

(४) अपोहलक्षणप्रकृतसाध्याभ्युपायतेत्यर्थः।

न्योन्यविचारस्य निष्पत्तिरेव न स्यात्(१)विचारे इति प्रमाणिकत्वप्रतीतौ तदभ्युपगमः तदभ्युपगमे च विचार इति [e]अभ्युपगतोपायत्यागविषय एवापसिद्धान्तो नान्यत्र ? *—इति चेन्न,

टी० ॥ ननु जातेरपि निग्रहस्थानतयापसिद्धान्ते एव निग्रहे तदन्तर्भावोऽस्त्वित्यत आह—। [a]"जातिरि"ति ॥ [b]"तदभ्युपगमस्ये"ति । क्षणभङ्गाभ्युपगमापोहयोरुपायोपेयभावो वा क्षणभङ्गाभ्युपगमापोहयोर्व्याप्यव्यापकभावो वेति विकल्पार्थः। तन्नान्तरीयकं यस्येति बहुव्रीहिः ॥ [c]"न प्रथम"इति । क्षणभङ्गाभ्युपगमस्योपायत्वं यद्यपोहे साध्ये तदा क्षणभङ्गं साधयतः सौगतस्यापोहत्यागेऽपसिद्धान्तो न भवेत् अपोहाभ्युपगमस्य क्षणभङ्गासाधकत्वादित्यर्थः । क्षणभङ्गापोहाभ्युपगमयोरन्योन्यसिद्ध्युपायतायां दोषमाह—। [d]"अन्योन्ये"ति । नन्वन्योन्यविचारेऽन्योन्याभ्युपगमापेक्षायामन्योन्याश्रयो ननु स्वस्वसूत्रकारवचनप्रामाण्यादभ्युपगमे तथा च तादृशत्यागे स्यादेवापसिद्धान्त इत्याह—। [e]"अभ्युपगते"ति ॥

मू० [a]यो हि यदुपायस्तमभ्युपगम्य विचारः प्रवर्त्तयितव्य इत्येतत्कुतः [b]तस्योपायतया तेन विचारः प्रवर्तते इत्येव युक्तं ननु तदभ्युपगमोऽपि तावता तदुपायः स्यात्तस्य च तदभ्युपगमस्य च पृथक्कारणत्वाभ्युपगमे प्रमाणस्योपदर्शयितुमशक्यत्वात् [c]अनुपायत्वेऽपि वा तत्र स्वाभ्युपगमः किमित्यभ्युपेयो वैयर्थ्या[d]दुपायत्वादेव परस्य तथाप्रतीत्युपपत्तेः * अथोच्यते—

---

(१) अत्र "अन्योन्याश्रयात्"—इति हेतुः पूरणीयः । अर्थनिष्पत्तौ त्वन्योन्यविचारस्य निष्पत्तिरेव स्यादिति पाठस्तथ स्वन्योन्यविचारस्य—अन्योन्याश्रयस्योत्कर्षोऽवगन्तव्यः ।

टी० ॥ स्वरूपसत एवोपायत्वं तदभ्युपगमोऽपि पृथगुपायो येन कथावसरे तदभ्युपगमः प्रयोजकः स्यादित्याह—। [a]"यो ही"ति ॥ ननु तदभ्युपगमोऽप्युपाय एवेत्यत आह—। [b]"तस्ये"ति ॥ तन्वभ्युपगमस्याप्युपायत्वं व्यवस्थाप्यं यत्र तत्र तदनभ्युपगमेऽपसिद्धान्तः स्यादित्यत आह—। [c]"शक्यत्वे" इति । तत्रापि सूत्रकाराभ्युपगम एव तथास्यात्तथाच कथाकाले तदभ्युपगमस्तस्य न तन्त्रमित्यर्थः । तथाच तत्स्वीकारे पश्चात्तदनभ्युपगमोऽपसिद्धान्त इति लक्षणं तत्र न गतमेवेति भावः ॥ ननु(१) तस्योपायत्वं कथाकाले तदभ्युपगममन्तरेण कथं परो बोधनीय इति तदा तदभ्युपगम आवश्यक इत्यत आह—। [d]"उपायत्वादेवे"ति । तत्कालीनतदभ्युपगममन्तरेणापि परस्य तदुपायत्वप्रतीतिसम्भवादित्यर्थः ॥

सू० [a]उपेयमुपायेन साधयतोपेयवदुपायस्यापि सत्त्वमभ्युपगन्तव्यमिति पश्चात्तदनभ्युपगमेऽपसिद्धान्तोपन्यासः सावकाशः ? *— [b]असत उपायत्वानुपपत्तेः [c]तदुपायत्वेनोपन्यसना(२)त्तत्सत्त्वाभ्युपगमस्तस्य साक्षादश्रुतोऽप्यसत्त्वेनाभ्युपगम्यमानस्योपायत्वस्वीकारानुपपत्त्या कल्पनीयः कल्पितेन तेन श्रूयमाण(३)तत्सत्त्वानभ्युपगमविरोधादपसिद्धान्तोऽभिधेयः [d]एवं च सति सत्त्वानभ्युपगमे एवो(४)पायत्वानुपपत्तिप्रसङ्गो दूषणमुच्यतामुपजीव्यत्वात्तदुपन्यासमन्तरेण(५)श्रूयमाणतदीयाभ्युपगमस्य दर्श-

(१) ननु कथाकाले तदभ्युपगममन्तरेण तस्योपायत्वं (प्रति) परः कथं बोधनीय इत्यन्वयः । (२) तदुपायत्वेनोपन्यसनात्तस्य साक्षादश्रुतोऽपि तत्सत्त्वाभ्युपगमः कल्पनीय इत्यन्वयः । (३) श्रूयमाणेत्यस्याऽनभ्युपगमपदार्थेनान्वयः । (४) एवकारः प्रसङ्ग इत्यस्यानन्तरं द्रष्टव्यः उपायत्वानुपपत्तिप्रसङ्ग एवेति । (५) तदुपन्यासमन्तरेण, उपायत्वानुपपत्तिप्रसङ्गलक्षणदूषणोपन्यासमन्तरेणेत्यर्थः ।

पितुमशक्यत्वात् कृतं तदुपजीविना पश्चात्तेनाप-
सिद्धान्तेन [f]अत एव न द्वितीयः तन्नान्तरीयकाभ्यु-
पगमो हि तत्सत्तानभ्युपगमे साध्यस्याभावापत्त्या-
नुमन्तव्यः तथाच [g]सैव तद्दूषणमस्त्वनभ्युपगमे
कृतं [h]तयाभ्युपगमं परिकल्प्य [i]तेनानभ्युपगमविरो-
धादपसिद्धान्तोपन्यासेनेति [j]एवं निग्रहान्तरखण्ड-
नमूहनीयम् ॥

इति श्रीश्रीहर्षमिश्रविरचितानिर्वचनीयसर्वस्वे खण्डन-
खाद्ये निग्रहानिरुक्तिर्द्वितीयः परिच्छेदः ॥

—:o:—

टी० ॥ ननूपायत्वान्यथानुपपत्त्या कथाकाले वादिनस्त-
दभ्युपगमः कल्पनीयस्तथाच पश्चात्तदनङ्गीकारे स्यादेवापसि-
द्धान्तस्तच्च निग्रहस्थानान्तरं माङ्कुर्यास्मावादित्याशङ्क्यते । [a]"उ-
पेयमि"ति । [b]"अमत" इति । सत्त्वेनानभ्युपगम्यमानस्येत्यर्थः ॥
[c]"तर्ही"ति । अश्रूयमाणः कथाकालीनस्तदुपायत्वाभ्युपगम उपा-
यत्वान्यथानुपपत्त्या कल्पनीयस्तदुपायत्वानभ्युपगमे चापसि-
द्धान्तो निग्रहो भवेत् तथाचानभ्युपगमेन तदुपायत्वभङ्गलक्षणा-
मेवानिष्टमापाद्यतां किमपसिद्धान्तोपन्यासेनेत्यर्थः । अनभ्युप-
गमः श्रूयमाणोऽभ्युपगमश्च कल्पनीय इति तयोरभ्युपगमान-
भ्युपगमयोर्विरोधोऽपसिद्धान्तस्तथाच सत्त्वानभ्युपगमात्तदुपाय-
त्वक्षतिरित्येव दूषणमुचितमित्याह—। [d]"एवं चे"ति । उपजी
व्यत्वमेवाह—। [e]"तदुपन्यासमि"ति ॥ तन्नान्तरीयकतया वेति
यद्विकल्पितं तद्दूषयति—। [f]"अत एवे"ति । यदि क्षणभङ्गसत्ता
नाभ्युपेयते त्वया तदा तद्व्याप्यस्या(१)पोहस्यैव सिद्धिर्न स्यादिति

---

(१) वा—क्षणभङ्गसत्ता व्याप्या यस्यापोहस्य तस्यैव सिद्धिः प्रमि-
तिर्न स्यात् तथा चाऽप्रमितस्य सत्त्वाऽपोहलक्षणस्य व्यापकस्य निवृत्त्याऽ-
भावापत्त्या तद्व्याप्यस्य क्षणभङ्गस्याप्यभावापत्तिरेव स्यादित्यर्थः ।
अधिकं तु न तन्नान्तरीति न्यायादग्रेऽभिधास्यमानबाधाभावापत्तेरपि
दूषणत्वं च विरुद्धम् ।

व्याघातनिवृत्त्या व्याप्त्यनिवृत्तिरेव दोषो नत्वपसिद्धान्त इत्यर्थः । “ऐवे”ति । साध्याभावापत्तिरेवेत्यर्थः तयेति साध्याभावापत्त्येत्यर्थः ॥ “तेने”ति । कल्पिताभ्युपगमेन सहेत्यर्थः । यद्यसौ कथभङ्गं नाङ्गीकुर्यात्तदापोहलक्षणं साध्यमेव न सिद्ध्येदिति कथाभङ्गाभ्युपगमेन कल्पितेन तदनभ्युपगमविरोधोपसिद्धान्तः स्यात्तथाच साध्यानुपपत्तिरेव दोषोऽस्तु किमपसिद्धान्तेनेति भावः ॥ “एवमि”ति । सामान्यशब्दानां यत्किञ्चिद्विशेषमादाय पर्यवसानात्सर्वनामपदानां चाविशेषकत्वाद्व्याप्त्यतिव्याप्त्यसम्भवा यथायथमूहनीया इत्यर्थः ॥

इति श्रीखण्डनखाद्यटीकायां द्वीतीयः परिच्छेदः समाप्तः ॥

खण्डनखण्डखाद्यम् ॥

अथ तृतीयः परिच्छेदः ।

—:o:—

मू० [a](१) अथ यान्यवलक्ष्य बहुलं वाग्व्यवहारास्तेषां सर्वनाम्नामर्थः कथं निर्वाच्यः तथाहि ईश्वरसद्भावे किं प्रमाणमिति ब्रुवाणः प्रतिवक्तव्यः(२) [b]किंशब्दोऽयमाक्षेपार्थो वा कुत्सितार्थो वा। [c]वितर्कार्थो वा [d]प्रश्नार्थो वा स्यात्तत्र यदि प्रथमः पक्षस्तदेश्वरसद्भावे नास्ति प्रमाणमित्युक्तं स्यात्तथा च न प्रतिज्ञामात्रात्साध्यसिद्धिरिति हेत्वादिकं किञ्चिद्वाच्यं तच्च भवता नाभ्यधायि तस्मान्न्यूनत्वं दोषः [e]अत एव न द्वितीयः ईश्वरसद्भावे कुत्सितं प्रमाणमित्यस्यापि प्रतिज्ञामात्रत्वात् अपि च साध्यसाधकत्वाद्वा तत्कुत्स्यते भवतान्यथा वा [f]अन्यथा चेदलं तदुद्भावनया साध्यसिद्धेरप्रत्यूहत्वात् नापि प्रथमः प्रमाणं च साध्यासाधकं चेति व्याघातात् * गौणोऽयं प्रमाणशब्द ? * इति चे(३)न्न,

---

(१) अवाच्यत्वप्रपञ्चेन निग्रहस्थानांहृतः ।
विरोधस्याधुनाऽद्वैते प्रपञ्चेन वार्यते ॥ १ ॥

(२) "कुत्सिते चाक्षेपे तथा प्रश्नवितर्कयोः ।
किं शब्द प्रवृत्तिस्स्यादेवमर्थ चतुष्टये"
इति पद्ये किमोऽर्थचतुष्टयवाचकत्वदर्शनात्—कीदृशार्थकोऽयं भवत्प्रश्ननिक्षिप्तः किं शब्द इति पृच्छन्प्रश्ननिरासाय विकल्पते किं शब्दोऽयमिति—।

(३) यद्यपि पाणिनीये किं शब्दः सर्वनाम्नामन्यतमस्तथापि विलोमपठनाक्रममनुसृत्य तथाप्यस्योपवर्णनं, व्याकरणान्तरमनुसृत्य चेति ध्येयम् ।

टी० ॥ ननु यत् तत्सर्वनामपदमहिम्नैव तत्तद्विशेषलाभे लक्षणाना दूषणानि न प्रसज्यन्त इत्यत आह—। [a]"अथे"ति । सर्वनाम्नामाद्यस्य(१)किंशब्दस्य तावदर्थं व्युत्पादयति—। [b]"किंशब्द" इति । आक्षेपो निषेधस्तदर्थः यथा तत्र किं गमनेन मा याहीत्यर्थः कुत्सितार्थो निन्दार्थः यथा "स किं सखा साधु न शास्ति यो नृपं हितान्न यः संशृणुते स किंप्रभुरि"त्यादौ ॥ [c]"वितर्कार्थ" इति । यथा वितर्के किं किमुत चेत्यमरः यथा "किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशावि"त्यादि ॥ [d]"प्रश्नार्थ" इति । यथा "का त्वं शुभे कस्य परिग्रहो वा मदभ्यागमकारणं ते" इत्यादि यद्यपीश्वरसद्भावे प्रमाणं नास्तीति न प्रतिज्ञा किन्तु विप्रतिपत्तिमात्र तथाच प्रमाणमीश्वरवादिनाभिधेय तथापि प्रतिज्ञापरत्वे दोष उक्तः ॥ [e]"अत एवेति । न्यूनभियहापादकत्वादेवेत्यर्थः ॥ [f]"अन्यथे"ति । कुत्सितादपि प्रमाणात् साध्यसिद्धिश्चेत्तदा कुत्सितत्वोद्भावनमफलमित्यर्थः ।

मू० [a]प्रमाणत्वयोगिनि यद्ययं प्रमाणशब्दप्रयोगस्तदा गौणत्वव्याघातः [b]मुख्यत्वात् [c]* अथ प्रमाणाभासे तदाऽलं तदुद्भावनया [d]*ईश्वरसद्भावे यः प्रमाणाभासः स कुत्सित इत्यत्र परस्यापि सम्प्रतिपन्नत्वात् ईश्वरसद्भाव इति विशेषोपादान च व्यर्थं स्यात् अन्यत्रापि विषये प्रमाणाभासः कुत्सित एव साध्यासाधकत्वात् [e]अतो नापि तृतीयः तथा सति हि वितर्कस्य पक्षान्तरसापेक्षत्वेन पक्षान्तरमपि निर्वचनीयमिति ईश्वरसद्भावे किमेतत् प्रमाणमुतान्यदिति स्यात् तच्च भवता नान्यथापि ततो न्यूनत्वं दोषः ॥

(१) प्रमाणत्ववतिगौणोयं प्रमाणशब्द उत प्रमाणत्वशून्ये प्रमाणाभास इति विकल्प्य परिहरति—नेति—

टी० ॥ [a]"प्रमाणत्वयोगिनी"ति । यद्यप्यजहत्स्वार्थलक्षणा शक्यसाधारणीभवत्येव यथा छत्रिणो यान्तीत्यादौ तथाप्येकसार्थगन्तृत्वादिकमेव शक्यलक्ष्यसाधारणं तत्र लक्ष्यं नतु छत्रिणः छत्रित्वेन रूपेणोपस्थितिः । प्रमाणत्वं प्रमाणपदप्रवृत्तिनिमित्तं तादृूप्येण प्रमाणपदं चेत्प्रमाणपरं तदा गौणत्वहानिरित्यर्थः ॥ [b]"मुख्यत्वादि"ति । शक्यतावच्छेदकेन रूपेण शक्योपस्थापनादित्यर्थः ॥ [c]"अथ प्रमाणाभासे"इति । अत्र प्रमाणशब्दप्रयोग इत्यनुषङ्गः ॥ [d]"ईश्वरे"ति । अन्यत्रापि प्रमाणाभासस्य कुत्सितत्वादित्यर्थः ॥ [e]"अतः"इति । वितर्को हि सन्देहः स च विरुद्धनानाकोटिको भवति तथाच कोट्यन्तरानुल्लेखात् न्यूनत्वमित्यर्थः । यद्यपि कथावयवन्यायावयवहान्या न्यूनत्वं भवति अत्र च न तथा किन्तु सन्देहकोट्यन्तरस्योल्लेखाभावः पर तथापि संशयपरं वचनमेव विरुद्धनानाकोट्यनुल्लेखान्न पर्यवस्येदिति भावः ॥

मू० नापि चतुर्थः प्रश्नार्थात् खलु किंशब्दात्कस्यचित्पदार्थस्य जिज्ञास्यमानता प्रतीयते सा चेह प्रमाणपदसमभिव्याहारात् प्रमाणविषयिणी प्रतीयते यद्विषयश्च प्रश्नस्तदुत्तरवादिनाभिधेयं तदयं प्रश्न ईश्वरसद्भावे प्रमाणसामान्यविषयस्तद्विशेषविषयो वाभिप्रेतः आद्यश्चेदीश्वरसद्भावे प्रमाणमित्येवोत्तरमापद्येत यद्विषयो हि प्रश्नस्तदभिधेयं प्रमाणसामान्यविषयश्च प्रश्नः तच्च प्रमाणशब्देनाभिहितमेव अथ द्वितीयः तथापीश्वरसद्भावे प्रमाणमित्येवोत्तरमापद्येत ।

टी० ॥ "कस्यचिदि"त्यादि । प्रमाणसामान्यजिज्ञासायां प्रमाणमित्येवोत्तरं तद्विशेषजिज्ञासायामपि प्रमाणमित्येवोत्तरं प्रश्नवाक्यस्थप्रमाणपदस्य विशेषपरत्वे चेदुत्तरवाक्यस्य प्रमाणपदस्यापि तत्परत्वौचित्यादित्यर्थः । यद्यपि जिज्ञासा स्यात्तु-

जिज्ञासा सा च येन प्रष्टुर्निवर्त्तते तादृशमुत्तरं वाच्यम् अन्यथो-न्मत्ततैव स्यात् यथोक्तमाम्रान् पृष्टः कोविदारानाचष्टे इति तथा च "किं प्रमाणमि"ति प्रश्ने प्रमाणमित्युत्तरमनुन्मत्तस्यानुचितमेव नहि प्रष्टा प्रमाणसामान्यमेव न जानाति तथा सति नाजिज्ञासेत्ततः किं प्रमाणमिति प्रश्ने प्रत्यक्षमनुमानं शब्दो वा विशिष्य तस्य दर्शनीयं तथा च प्रमाणमित्युत्तरं दददनपेक्षिताभिधानेनाऽनव-धेयवचनः स्यात् । किञ्च किंशब्दोऽयमाक्षेपार्थो वा कुत्सितार्थो वे-(१)ति चतुःकोटिके प्रश्ने प्रश्नवाक्यानुवादमात्रेणोत्तरयितु-स्त्वयापि किं वाच्यं विकल्पकोटिष्वेकतरकोटिपरिग्रहमन्तरेण न मम जिज्ञासाविच्छेद इति चेत् तर्हि प्रकृतेऽपि तुल्यम् एवं सति कस्यैव न वर्द्धतेति चेत्तुल्यं । तथाचेश्वरे किं प्रमाणमिति पृष्टः क्षितिः सकर्त्तृका कार्यत्वात् घटवदित्यादिप्रकारेण विशे-षमनुपदर्श्य यथोक्तरेण निगृह्यतेव तथाऽव्यापाततः प्रश्नखण्ड-नमिदं वादिव्यामोहनाय भवत्येवेति तात्पर्यम् ।

मू० * [a]यथा प्रश्नवाक्ये प्रमाणशब्दो विशेषपरः तथो-त्तरवाक्ये [b]कोऽसौ विशेष ? *–इति चेन्न, [c]पूर्ववदुत्त-रात् [d]अस्यापि प्रश्नस्य विशेषो विषयः किंशब्दस्य विशेषशब्देन सामानाधिकरण्यात्तथा च सति विशेष इत्येवोत्तरं स्यात् [e] * स्यादेतत् विशेषशब्देन न विशेषमात्रमनिर्द्धारितमात्रं विवक्षितं किन्त्वसाधा-रणी व्यक्तिः तत्र विशेषशब्दस्य तात्पर्यं तस्मात्का-सावसाधारणी प्रमाणव्यक्तिरिति प्रश्नार्थः तत्र तादृश्याः प्रमाणव्यक्तेरभिधानमुत्तरं युक्तं नैवंविधाः प्रलापा ? *–इति नैतदेवं, [f]यतोऽत्रापि विशेष इत्ये-वोत्तरं यथा प्रश्नवाक्यगतस्य विशेषशब्दस्य सर्वतो व्यावृत्तस्वरूपायां प्रमाणव्यक्तौ तात्पर्यं तथोत्तर-वाक्यस्थितस्यापि एवं च सति यत्र विषये भवदी-

(१) "वितर्कार्थो वा प्रश्नार्थो वा"–इति शेषः ।

यस्य प्रश्नवाक्यस्य तात्पर्यं तदेवास्माकमुत्तरवाक्येन प्रतिपादितमिति युक्तमुक्तम् ।

टी० ॥ ननु प्रमाणविशेषप्रश्नश्चेत्तदा प्रमाणसामान्येनोत्तरं कथमित्यत आह-। [a]"यद्ये"ति ॥ [b]"कोनामे"ति । ईश्वरसद्भावे कः प्रमाणविशेषइति पृष्ठयमित्यर्थः ॥ [c]"पूर्ववदि"ति । प्रश्नवाक्यस्यैव तद्विशेषपरत्वादित्यर्थः तथाच प्रमाणविशेष इत्येवोत्तरमस्माकमित्यर्थः तदेवोपपादयति-। [d]"अस्यापी"ति ॥ ननु विशेषेपि प्रश्नो व्यक्तिविशेषाभिप्रायकस्तथाच विशेष इत्युत्तरं कथं सङ्गतं स्यादित्याशङ्कते-। [e]"स्यादेतदि"ति । असाधारणी व्यक्तिस्तथापि प्रश्नवाक्यस्य विशेषपदेनाभिधेया चेत्तदोत्तरवाक्यस्यविशेषपदमपि तत्परं स्यादविशेषादित्याह-। [f]"यत"इति ।

मू० * [a]अथ मन्यसे [b]किमिह प्रमाणमिति पृच्छतोयमभिप्रायः अत्रार्थेनुमानं प्रमाणमितरद्वेति ? *—तत्राप्यनुमानमित्युत्तरमस्माकं * किं तदनुमानमिति चेत् ? *—अयमपि प्रश्नोनुमानमात्रविषय उत तद्विशेषविषयइति विकल्प्य प्रमाणप्रश्नवदुत्तरं वाच्यमिति अत्र च सङ्ग्रहश्लोकौ [c]"यथाविधं यं विषयं निजस्य प्रश्नस्य निर्वक्ति परो यथोक्तया । वाच्यस्तथैवोत्तरवादिनापि तथैव वाचा स तथाविधोर्थः ॥

[d]प्रश्नस्य यः स्याद्विषयः स वाच्यो 'वाचानयैवैष भवेन्निरुक्तः । [f]इदं त्वयाप्यास्थितमेतयैव गिरा स्वपृच्छा विषयस्य वक्त्रा" ॥

टी० ॥ नन्वीश्वरेनुमानं प्रमाणमन्यद्वेत्येवमाकार एव प्रश्नः कर्त्तव्य इत्याह—। [a]"अथे"ति ॥ [b]"किमिह प्रमाणमिति पृच्छत"इति । प्रमाणं प्रष्टुमुद्यतस्येत्यर्थः ॥ [c]"यथाविधमि"ति। यं प्रकारं प्रमाणत्वादिवक्तोत्वा प्रश्नवाक्यं प्रवर्त्तते तमेव प्रकारमादायोत्तरवाक्यमपि प्रवर्त्तनीयमित्यर्थः ॥ नन्वनेनोत्तरेण प्रष्टु-

जिज्ञासा कथं विच्छिद्यतामित्यत आह-। d"प्रश्नस्ये"ति । अविषयमादायोत्तरे दातारयितुरेवापोन्तरं स्यादित्यर्थः ॥ एतदेवाह-। e"वाचे"ति ॥ ननु नामान्यशब्देनापि प्रश्नो विशेषपर्यवसायी विशेषमभिदधानस्य भवत उत्तरमेतदनादेयं स्यादित्यत आह-। f"इदमि"ति । स्वपृच्छाविषयस्य वक्ता स्वपृच्छाविषयमभिदधानेन त्वया एतयैव गिर प्रश्नलक्षणयैव गिरा इदमभिधेयमाक्षिप्तं स्वीकृतमित्यर्थः तथाच मयापि कथं नाख्येयमिति भावः ।

मू० a"प्रश्नार्थाच्च किंशब्दाज्जिज्ञासाविषयताऽर्थस्य प्रतीयते जिज्ञासा च ज्ञातुमिच्छा इच्छा चाज्ञाते न सम्भवति अतिप्रसङ्गात् तस्मादीश्वरविषयं प्रमाणं ज्ञातुमिच्छता तत्र स्वज्ञानमिच्छाकारणीभूतं वक्तव्यं तद्यथाभूतार्थं वा स्यादयथाभूतार्थं वा यथार्थं चेत्तेनैव ज्ञानेन स्वकीयो विषयः प्रमाणमुपस्थाप्यते विषये प्रमाणप्रवृत्तिमन्तरेण तदीययथार्थत्वस्य वक्तुमशक्यत्वात् तेनापि प्रमाणेन स्वगोचर ईश्वरसद्भावः उपास्थाप्यत इत्यनायासेनैव सिद्धोस्माकमीश्वरसिद्धिमनोरथः अथायथार्थं तत्तस्मिन्नयथार्थज्ञानविषये यद्यस्माभिरप्ययथार्थमेव ज्ञानमुत्पादनीयमिति भवतः पृच्छतो वाञ्छितं तदा केय स्वाधीनेऽर्थे परापेक्षा भवानेवायथार्थज्ञानोत्पादनकुशलो यथैकं तत्र मिथ्याज्ञानमजीजनत्तथापरमप्युत्पादयतु वयं पुनर्यथार्थज्ञानस्योत्पादयितारो मिथ्याज्ञाने स्वयं वाकृतिनः किमिह नियुज्येमहि * अथ मदीयस्यायथार्थज्ञानस्य यो विषयः स मदीययथार्थज्ञानविषयो भवता क्रियतामिति ? *-त्वदीयं वाञ्छितं तदा व्याघातादीदृश्यर्थं भवतः

प्रवृत्तिरेवानुपपन्ना शुक्तिका रजतात्मत्वेन मम यथार्थज्ञानविषयो भवत्वित्येतदर्थं प्रेक्षावान् कथङ्कारं प्रयतेत येन रूपेणायथार्थज्ञानविषयत्वं तेन रूपेण यथार्थज्ञानविषयत्वे व्याघातात् ॥

टी० ॥ प्रकारान्तरेण प्रश्नखण्डनमुपक्रमते—। “"प्रश्नार्थादि”ति । ज्ञाते एव जिज्ञासा तथा च ज्ञानार्थं प्रश्नानुपपत्तिः यत्तु ज्ञानं प्रमाणविषयकं तवास्ति तद्यदि यथार्थं तदा प्रमाणं प्रमितमेव तथाभूदयथार्थं तदा वस्तुगत्या ईश्वरे प्रमाणं नास्ति तत्र त्वया प्रमाणगोचरमयथार्थमेव ज्ञानं समाधेयमिति विपरीतफलक एवायं प्रश्नः यद्विशेष्यकं यत्प्रकारकं ममायथार्थज्ञानं तद्विशेष्यकं तत्प्रकारकमेव मम यथार्थज्ञानं क्रियतामिति च न सम्भवत्येवेति प्रघट्टकार्थः ॥

मू० * अथ मन्यसे स्वसिद्धान्तमनुरुन्धानेन भवता यथार्थज्ञानं तत्रोत्पादनीयमतस्तदर्थं भवाननुयुज्यते ? * -इति नैवम्, ईश्वरसद्भावविषयो भवता प्रमाणाभासः प्रमाणतया भ्रान्त्या प्रतीतस्तस्य प्रमाणत्वमस्माभिरुत्पादनीयमिति नास्माकमीदृशः सिद्धान्तः प्रत्युतेश्वरसद्भावविषयं यत् प्रमाणं भवता प्रमाणाभासत्वेन भ्रान्त्या प्रतीतमस्ति तत् प्रमाणनीयमिति * स्या(१)न्मतमीश्वरसद्भावविषयस्य प्रमाणस्य भवता ज्ञापनमात्रं क्रियतामित्यभिमतं पृच्छतामस्माकं न तु प्रमाणेनाप्रमाणेन वेति विशेषोऽप्यभिमत ? *-इति न, “ज्ञापनमात्रस्याप्रमाण-

(१) मतसिद्धान्तयोरविशेषात् “सिद्धान्त इत्यमुपपन्नोऽयम्”-इति पङ्क्त्यन्तराङ्कुरव्याख्यानानुरोधेन पारम्परिकः कौश्चित् “स्यान्मतम्”-इति पाठो मूले प्रक्षिप्त इति सम्भाव्यते । यद्वा प्रश्नोऽन्वयं कृत्वा “स्यादेतादृशं तव मतं तथापीश्वरसद्भावविषयस्य”-इत्यादि पङ्क्त्यपरतया कथञ्चिद्ग्रन्थो योजनीयः ।

इत्युक्तं स्यात् एवं तर्हि तदेव कोऽयमवधारणं भवतां यथार्थमयथार्थं वेति विकल्पयोक्तयुक्त्या दूष्यं एतेनाऽनाध्यवसायेन तदस्माभिः प्रतिपन्नमित्यपि निरस्तं वेदितव्यं व्यभिचारिविषयं वा तदितिविकल्पाभ्यां तस्यापि ग्रस्तत्वात् परस्परविरोधे हि न प्रकारान्तरस्थितिरितिन्यायात् [b]एवमीश्वराभिसन्ध्यादौ तत्तस्यानर्थं सर्वनामान्तरखण्डनं द्रष्टव्यम्॥

इति श्रीश्रीहर्षमिश्रकृतानिर्वचनीयसर्वस्वे खण्डनखाद्ये सर्वनामार्थानिरुक्तिस्तृतीयः परिच्छेदः ॥

——:o:——

टी० ॥ [a]"अनध्यवसायेने"ति । अनध्यवसायाख्यं वैशेषिकाभिमतमविद्याप्रभेदोऽसाधारणधर्मजन्यं ज्ञानं तत्रापि पूर्व एव विकल्पः यद्यपि प्रमाणं किञ्चिदपीश्वरं न गोचरयतीत्यस्माकं पक्षः किञ्चित्प्रमाणमीश्वरं गोचरयतीति त्वत्पक्षस्तत्र पृच्छ्यते किं तत्प्रमाणं यदीश्वरं विषयीकरोति अत्र च भवद्विकल्पजालस्य नावकाशः तत्र यत्त्वया प्रमाणमुपदर्शनीयं तन्मया खण्डनीयमिति नचेश्वरः प्रमितो नवेति विकल्पावसरोऽत्रापीति वाच्यम् अद्वैते किं प्रमाणमिति खण्डनेन पौनरुक्त्यापातात् सर्वनामखण्डनेनोपक्रान्तेनाऽसं[illegible]वेति तथापि वादिव्यामोहनतापातनो भवत्येवानेन विकल्पजालेनेति भावः ॥ ननु सर्वसर्वनामखण्डनमुपक्रम्य किंशब्दमात्रखण्डनं न्यूनमत आह—। [b]"एवमि"ति ईश्वराभिसन्धिग्रन्थे सर्वनामखण्डनं कृतमेवात्रातिदिश्यत इति न न्यूनतेति भावः ॥

इति तृतीयः परिच्छेदः ॥

अथ चतुर्थः परिच्छेदः ।

——:0:——

मू० (१) [a]ननु तथापि भावात्मके तस्मिन्नीश्वरे विधायकं किञ्चित्प्रमाणं वक्तव्य(२)मिति चेत् किं पुनर्भावत्वं * विधित्वमिति ? *-चेन्न, [b]पर्यायाप्रश्नात् * स्वरूपसत्त्वमिति ? *-चेन्न, [c]अभावस्यापि तथाभावात् [d]प्रतिस्वं व्यावृत्तत्वेनाननुगतत्वापत्तेश्च * अस्तीति प्रतीतिविषयत्वम् ? *-इति चेन्न, अभावो घटस्यास्तीतिप्रतीति सम्भवेनाभावस्यापि [e]तथात्वप्रसङ्गात् [f]नास्तीतिप्रतीतिविषयत्वेपि घटादेर्भावत्वानिवृत्तेः ॥

टी० ¹॥ भावत्वखण्डनं पूर्वखण्डनेन सङ्गमयितुमाह—। [a]"नन्वि"ति । विधित्वमिति यदि भावत्वपर्यायस्तत्राह—। [b]"पर्याये"ति । अथ विधिमुखप्रत्ययवेद्यत्वं तदग्रे दूष्यं स्वरूपसत्त्व यदि सत्तासंबन्धस्तदाग्रे दूष्यं स्वरूपमेव सत्त्वं चेत्तत्राह । [c]"अभावस्यापी"ति ॥ तत्रैव दोषान्तरमाह—। [d]"प्रतिस्वमि"ति । प्रति व्यक्तीत्यर्थः । [e]"तथात्वप्रसङ्गादि"ति । भावत्वप्रसङ्गादित्यर्थः किञ्चास्तीतिप्रतीतिविषयत्व यदि भावत्वं तदा घटाभावो नास्तीत्यनेन प्रकारेणानुभूयमानस्य घटस्य भावत्वं निवर्त्तेत नचैवमतोऽस्तीतिप्रतीतिविषयत्वमेव न भावत्वमित्याह नास्तीति यद्वास्तीतिप्रतीतिविषयत्वमेव चेद्भावत्वं तदा नास्तीतिप्रतीतिविषयत्वमभावत्व वाच्यं तच्च न सम्भवति

---

(१) { प्रमाणादिपदार्था ये तार्किकादिप्रकल्पिताः ।
तेषामवाच्यता चात्र परिच्छेदे प्रकीर्त्यते ॥ }

(२) यद्यपि न पार्य्यते ईश्वरसद्भावे प्रमाणं वक्तुं तथापि भावत्वात्मस्य विधायक प्रमाणमन्तरेणासिद्धे विधायकप्रमाणं वाच्यमिति समग्रपङ्क्तेरर्थः ॥

घटाभावो नास्तीतिभावस्यापि तादृप्येण प्रतीतेरित्याह—। f"नास्ती"ति। यद्वा घटोऽस्ति घटो नास्तीत्युभयत्रापि घटस्य प्रतीयमानत्वेनास्तीतिप्रतीतिविषयत्वमभावत्वं([1]) कथं न निरुक्तमित्याह—। "नास्ती"ति । केचित्तु "तर्हि नास्तीतिप्रत्ययाविषयत्वे सत्यस्तीति प्रतीतिविषयत्वं भावत्वमित्याशङ्कासम्भवीदं लक्षणमित्याह नास्तीत्या"भास([2])माहुः ॥

मू० a"अस्तीति चार्थो वा शब्दो वा विवक्षितः नाद्यः b"तस्यानिरुक्तेः * सत्ता तदर्थ ? *–इति c"चेन्न, समान्यादीनां तदभावादभावत्वापत्तेः स्वरूपसत्त्वं च निरस्तं नापि द्वितीयः d"अभावोऽस्तीति प्रतीतेरुक्तत्वात् e"वर्त्तते इत्याद्याकारेण च प्रतीयमानस्याभावत्वप्रसङ्गात् * सोऽप्यस्तिपर्याय ? *–इति चेन्न, f"उभयसाधारणैकार्थनिर्वचनमन्तरेण पर्यायत्वस्य प्रतिपादयितुमशक्यत्वात् g"यत्रैकस्यास्तिपदप्रयोगस्तत्रैवापरस्य वर्तते इति प्रयोगात् * सामान्येन तावत्पर्यायत्वं शक्याधिगमम् ? *–इति चेन्न,

टी० ॥ a"अस्तीति चे"ति । अस्त्यर्थस्य सत्तादेः प्रतीतिर्विवक्षितास्तीतिशब्दोल्लेखिनी प्रतीतिर्वा विवक्षितेति विकल्पार्थः ॥ b"तस्ये"ति । अस्तिशब्दार्थस्येत्यर्थः सत्तावत्त्वं भावत्वं सामान्यादौ नास्तीत्याह—। c"ने"ति ॥ d"अभावोऽस्ती"ति । अस्तिशब्दोल्लेखिप्रतीतिविषयत्व([3])मभावेऽतिव्याप्तं लक्षणमित्युक्तत्वादित्यर्थः । अस्तीतिशब्दोल्लेखस्य तन्त्रत्वे दूषणान्तरमाह—। e"वर्तत" इति । यद्यपि वर्तत इत्युल्लेखेऽपि कदाचिदस्तीत्युल्लेखोऽस्त्येव तावतैव तत्रापि लक्षणं गतं तथाप्युल्लेखो

(१) पुस्तकान्तरे "भावत्वमि"ति पाठः । तत्र नास्तीति प्रतीतिविषयत्वमिति पदच्छेदः । (२) आभासम्=अर्थाभासम् । (३) अस्तिशब्दोल्लेखि प्रतीतिविषयत्वं लक्षणमभावेऽति व्याप्तमित्यन्वयः ।

वस्तुस्वरूपनिरुक्तौ न तन्त्र(१)मित्येवंपरो ग्रन्थः [f]"उभये"ति।
अभिन्नप्रवृत्तिनिमित्तानां पदानां पर्यायत्वादत्र च तन्नास्तीति
न पर्यायत्वमित्यर्थः यथोरेकत्रार्थे प्रयोगस्तावेव पर्यायौ नतु
प्रवृत्तिनिमित्ताभेदेऽपि तत्र तन्त्रमिति शङ्कते—। [g] 'यत्रे'ति ॥

मू० प्रमेयाभिधेयादिशब्दानाम् [a]तथात्वेऽप्यपर्यायत्वात्
[b]यत्रेत्यस्य प्रवृत्तिनिमित्तार्थत्वे च त न्निर्वचनप्रसङ्गस्त-
दवस्थः स एवार्थो(२)भावत्वमुच्यतां किं शब्दोल्ले-
खगवेषणया * [c]'अपरप्रतिषेधात्मकत्वं भावत्वम् ?
*—इति चेन्न, [d]व्यवच्छेद्यासम्भवेन परपदवैयर्थ्यात्
[e]भावाभावयोः परस्परप्रतिषेधात्मकत्वस्वीकाराच्च *
[f]तथापि भावे नास्तीत्यभावप्रतिपत्तिवदभावो ना-
स्तीतिभावस्याप्रतीतिः' * इति चेन्न,

टी० ॥ [a]"तथात्वेऽपी"ति। एकधर्मिवाचकत्वेऽपीत्यर्थः ॥ "ननु
यत्रेति। धर्मिमात्रं नोक्तं येनातिप्रसङ्गः स्यादपितु प्रवृत्तिनि-
मित्तमेव तथोक्तं भवति हि घटकलशपदयोरभिन्नं प्रवृत्तिनि-
मित्तं वाच्यं नतु प्रमेयाभिधेययो(३)रपि प्रमाविषयत्वाभिधान-
विषयत्वयोः प्रवृत्तिनिमित्तयोर्भेदादित्याशङ्काह—। [b] 'यत्रे"ति ॥
[c]"अपरे"ति। अभावस्य भावविरहात्मकतया तद्व्यव-
च्छेद इत्यर्थः प्रतिषेधात्मकं यत्तत्परप्रतिषेधात्मकमेव भवति
नतु स्वप्रतिषेधात्मकमपीति व्यवच्छेद्याभावात्परपदवैयर्थ्यमि-
त्याह—। [d]"व्यवच्छेद्ये"ति तर्हि प्रतिषेधात्मकत्वमेव लक्षण-
मस्तु किं परपदेनेत्याशङ्कासम्भवं तत्र दोषमाह—। [e]"भावाभा-
वयोरि"ति। यद्यभावो नास्तीत्याकारा यदि भावप्रतीतिः
स्यात्तदा प्रतिषेधात्मकत्वं भावस्यापि भवेदित्यसम्भवः स्यान्न
त्वेवमित्याह —। [f]"तथापी"ति।

(१) "न तन्त्रमि'ति प्रतिज्ञायां 'शुक्तौ रजतोल्लेखेऽपि तदिदन्त्व-
भावादि'ति हेतुर्द्रष्टव्यः। (२) "स एवार्थः'—इत्यतः प्राक् "शब्दान्वे
वा"—इत्यधिकः पाठः केषुचित्पुस्तकेषु दृश्यते स चाऽयुक्तत्वादुपे-
क्षणीयः। (३) प्रमेयाऽभिधेययोः प्रमेयाभिधेयपदयोरित्यर्थः।

मू० [a] तावतापि लक्षणानिरुक्तेः * [b]अपरप्रतिषेधमुखेन प्रतीयमानत्वमेव भावत्वम् *-इति चेन्न, [c]चक्षुरादिभिर्भावत्वाग्रहणप्रसङ्गात् नहि प्रतीयमानत्वं चक्षुरादिग्राह्यम् [d]अभावो नास्तीति प्रतीतेर्निर्विषयत्वप्रसङ्गाच्च [e]नहीयं भावविषया भवत्पक्षे परनिषेधमुखेन प्रतीयमानत्वात् नाप्यभावविषयैव तन्निषेधार्थत्वात् * [f] नैवं प्रतीतिरेव स्यात् ? *—इति चेन्न, [g]शाब्द्याः प्रतीतेः सम्भवात् ।

टी० ॥ एतादृशप्रतीतिविरहेऽपि स्वाभावप्रतिषेधात्मकत्व वस्तुमिद्धं दुरपह्नव भावस्येत्यसम्भवस्तदवस्थ एवेत्याह—। [a]"तावतापी"ति ॥ ननु परप्रतिषेधमुखेन प्रतीयमानादभावादपरप्रतिषेधमुखेन प्रतीयमानत्व भावस्य विशेषः स एव लक्षणमिति कथ लक्षणानिरुक्तिरित्याह-। [b]"अपरे"ति । प्रतीतेरचक्षुर्वेद्यत्वेन तद्घटित भावत्वमपि चक्षुरवेद्य स्यादित्याह-। [c]"चक्षुरि"ति । यदि परप्रतिषेधमुखेनाप्रतीयमानत्व भावत्वं भवेत्तदा दोषान्तरमाह-। [d]"अभाव"इति । निर्विषयत्वमेवोपपादयति-। [e]"नही"ति । भावेषु सर्वदा विधिमुख एव प्रत्ययो नतु निषेधमुखोऽपीति शङ्कते—। [f]"नैवमि"ति । आकाङ्क्षादिमहिम्ना शब्दादेतादृशी प्रतीतिः स्यादेवेत्याह । [g]"शाब्द्या"इति ।

मू० आकाङ्क्षादिमद्भिः पदैः प्रतिस्वं संसर्गबोधनात् [a]"अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि" * प्रत्यक्षप्रतीते[b]स्तथा विवक्षितत्वा[1]दयं न दोष ? -*इति चेन्न, [c]सर्वस्य भावस्य प्रत्यक्षत्वानङ्गीकारात् * नेश्वरपक्षे सर्वं प्रत्यक्षम् ? *- इति चेन्न, [d]तेन तेषामपरप्रतिषेधात्मकतया ग्रहणे प्रमाणाभावात् *

(१) "अभावो नास्तीति प्रतीतेर्निर्विषयत्वप्रसङ्गाच्च"--इति किञ्चिन्न्यूनमाश्रित्य समाधत्ते-यद्यपीत्यादिना ।

तेषां विधिरूपतया तथैव ग्रहणम् ? *- इति चेन्न, [f]विधिरूपत्वस्यानवधारणात् * [g]यदपरप्रतिषेधात्मकतया शब्देनापि बोध्यते तत्तावद्भावरूपम् ? *—इति चेन्न, [h]परपदवैयर्थ्यात् ।

टी० ॥ ननु विषय एव न कश्चित्तादृशो यत्र शब्दोपि प्रतीतिं जनयेदित्यत आह—। [i]"अत्यन्ते"ति । यद्यप्य(१)सत्ख्यातिवादिनं प्रति प्रतीतेर्निर्विषयत्वापादनं न दोषः अन्येषां मते योग्यताविरहात् प्रतीतिरियं न शब्दादपि अन्यथाख्यातिश्चेत्तदा सन्नेव विषयस्तथापि सदृशमात्रावष्टम्भेनेदमुक्तं ॥ [b]"तथे"ति । अपरप्रतिषेधमुखत्वस्येत्यर्थः । अतीन्द्रियभावाव्याप्तिमाह—। [c]"सर्वस्ये"ति ॥ [d]"तेने"ति । ईश्वरेण परमाण्वादीनामपरप्रतिषेधमुखेन प्रतीयमानत्वं नतु परप्रतिषेधमुखेनेत्यत्र प्रमाणाभावादित्यर्थः ॥ ईश्वरस्यातीन्द्रियेषु विधित्वेनैव ज्ञानमिति नाव्याप्तिरित्याह—। [e]"तेषामि"ति । विधित्वं भावत्वमेव पर्यवस्येत्तच्चानिरूपितमेवेत्याह—। [f]"विधौ"ति नन्वतीन्द्रिये भावे यद्यप्यपरप्रतिषेधात्मकतया प्रत्यक्षेण न ज्ञानं तथापि शब्देन तादृशी प्रतीतिरस्त्येवेत्याह-। [g]"यदी"ति । अत्रापि पूर्ववत् परपदवैयर्थ्यमित्याह—। [h]"परे"ति ।

मू० [a]तस्यागोप्यचाक्षुषादित्वापत्तेः * [b]सुरभिचन्दनमित्यादाविवान्योपनीतभगवत्तत्त्वचाक्षुषत्वं भविष्यति? *-इति चेन्न, [c]तथाविधविषयेण विशिष्टाया बुद्धेर्विषयविशेषणताग्रहे स्वाश्रयोंशतः स्यात् तेनोपलक्षितायास्तथात्वे चाभावविशिष्टभावग्रहार्थस्याभावस्य तत्त्वापत्तेः तेन [d]यदेवंविधं तद् भावरूपमिति च ब्रुवतैवं विभक्त्वात् भावत्वमन्यद्वाच्यम् ॥

(१) "तथाविषयत्वात्"-इति कापिलकस्तकपाठः ।

टी० ॥ ननु परपदत्यागेनैव लक्षणमस्त्वित्यत आह—। a"तत्त्याग"इति । प्रतीतिगर्भभावत्वस्याचानुपपत्तिरित्यर्थः ननूपनीतमेव प्रतीयमानत्वं चक्षुषापि गृह्यतामित्याह—। b"कु-त्वेर्ती"ति । विषयविशिष्टा प्रतीतिरुपनीता सती विशेषणं भवतीति विषयांशे विषयवृत्तावंशत आत्माश्रयः अथोपनीतायां प्रतीतौ विषय उपलक्षणं प्रतीतिश्च पुनर्विषयेऽप्युपलक्षणं तदा विशिष्टस्य तद्विशिष्टाश्रयतायामात्माश्रयो न भवति किंतु घटाभाववद्भूतलमितिप्रतीत्या विषयीक्रियमाणस्याभावस्यापि भावत्वं स्यात् प्रतिषेधानात्मकतया या भूतलप्रतीतिस्तया भावस्याप्युपलक्षितत्वादित्याह—। c"तथापि वे"ति । प्रतीतौ वा विषय उपलक्षणं तथापि स एव दोषः यद्धार्थस्याभावस्येति पाठे यद्ध-स्यार्थो विषयो योऽभावस्तस्येत्यर्थः दोषान्तरमाह—। d"यदेवं-विधमि"ति । यत्परप्रतिषेधानात्मकतया प्रतीयमानं तद्भाव-स्वरूपमिति । त्वयोच्यते तथाच लक्षणाल्लक्ष्यतावच्छेदकं भाव-त्वमन्यदेव त्वया वक्तव्यं तच्च दुर्वचमित्यर्थः ।

मू० a"अभेदे च यदेवंविधं तद्भावरूपमिति नियमानुपपत्तेः b"अस्योपलक्षणत्वे चोपलक्ष्यत्वस्यान्यस्य वाच्यत्वात् अस्यैव भावार्थत्वे वाऽभावो नास्तीति प्रतीयमानस्य भावस्य भावत्वाभावप्रसङ्गात् d"भिन्नं च भावत्वं न सम्भवति षट्पदार्थव्यतिरेकप्रसङ्गादिति यच्च किञ्चिद्भावत्वं तत्स्वात्मन्यस्ति नो वा अस्ति चेत्स्वात्मनि वृत्तिविरोधः नास्ति चेत्स्वस्यान्यप्रतिषेध-मुखेनाप्रतीयमानस्याभावत्वप्रसङ्ग इति ।

टी० ॥ अथ लक्षणस्य लक्ष्यतावच्छेदकरूपादभेदमेव मन्यसे तदा लक्षणलक्ष्यतावच्छेदकयोर्यो नियमः समव्याप्तिस्तदनुपपत्तिः अभेदे व्याप्त्यभावात् भवति पृथिवीत्वगन्धवत्त्वयोः समनियमो भिन्नयोर्नत्वभिन्नयोरित्याह—। a"अभेदे चे"ति ॥ ननु यच्चवत्त्वेन दर्शितं तदुपलक्षणं तथोपलक्षणेनापि नियमोक्ती-

क्रियते येनाभेदे तदनुपपत्तिः स्यादित्यत आह—। b"अस्ये"ति। यद्यलक्षणत्वेनोक्तं तच्चेदुपलक्षणं तथापि भावत्वमुपलक्ष्यतावच्छेदकमन्यदेव वक्तव्यं उपलक्ष्यतावच्छेदकं भवतीत्यर्थः भवतु वा लक्ष्यतावच्छेदकमेव रूपं लक्षणं तथापि प्रतिषेधानात्मकतया प्रतीयमानत्वं लक्षणमव्यापकमित्याह-। c"अस्ये"ति। अभावो नास्तीति भावस्यापि परप्रतिषेधमुखेन प्रतीयमानत्वादित्यर्थः ननु लक्षणभिन्नमेव भावत्वं किञ्चित्स्यादित्यत आह-। d"भिन्नं चे"ति। विकल्पितप्रकारभिन्नत्वे तस्य सप्तमपदार्थत्वापत्तिरित्यर्थः॥ "स्वरूपे"ति। अपरप्रतिषेधमुखेन(1) प्रतीयमाने भावत्वे लक्षणमव्यापकमित्यर्थः। ननु यद्यपि भावत्वं स्वरूपं(2)सत्तासंबन्धवत्त्वमेव तच्च सत्तायां सत्त्व(3) च घटादिसत्त्वविशिष्ट सामान्यादिष्वेकार्थसमवायेन समवाये च स्वरूपसंबन्धेनैवं सर्वत्रेति नाव्याप्त्यतिव्याप्ती लक्षणं तु सत्तासंबन्धधीविषयत्वं तस्य चानुपपत्तेरिति न दोषः नहि लक्ष्यलक्षणयोरैक्याद्यत्वनियम सत्तासंबन्धवत्त्वेऽपि सत्तासंबन्धवत्त्वमन्यस्येव तत्त्वं नदेवान्यद्वेति न दोषः प्रमेयत्वे प्रमेयत्ववत् तथापि सत्तासंबन्धाभिप्रायोऽप्यस्तीति भावः।

मू० * 'नन्वेवमीश्वरे प्रमाणानुपदर्शनात्तदभाव एवापद्यते इति चेत् ? *-अभावत्वं किमभिधीयते * निषेधात्मकत्वमिति चेत् ? * तद्यदि प्रतिक्षेपात्मकत्वं तदा भावेष्वस्ति भावाभावयोर्द्वयोरपि परस्परप्रतिक्षेपात्मकत्वस्वीकारात् * dअथाभावत्वमेव ? *-तदा न निवृत्तः पर्यनुयोगः 'एतेन विषेधमुखेन प्रतीयमानत्वमिति निरस्तम् * भावविरोधित्वम् ? *-इति चेन्न, सर्वभावविरोधित्वं वा तद्विशेषविरोधित्वं वा नाद्यः असिद्धेः।

(१) अपरप्रतिषेधमुखेन—परप्रतिषेधाऽनात्मकत्वेनेत्यर्थं इति न व्याख्यातव्यं स्वयेयोर्वैयधिकरण्यम्। (२) "लक्ष्यतावच्छेदकम्"-इति शेषः। (३) सत्त्व—सत्तावत्त्व।

टी० ॥ अभावत्वखण्डनाय सङ्गतिङ्करोति—। [a]"नन्वेव-मि"ति । यद्यपि प्रमाणानुपदर्शनमात्रेण नाभावपर्यवसानं तथापि सङ्गतिमात्रार्थमेतदुक्तम् । [b]"अथाभावत्वमेवे"ति । प्रतिषेधात्मकत्वमित्यपुषज्जनीयं । [c]"एतेने"ति । निषेधशब्देना-भावाभिधाने पर्य्यनुयोगानिवृत्तिः प्रतिक्षेपाभिधाने च भावे-ऽतिव्याप्तिरिति पूर्वोक्तदोषेणेत्यर्थः अभावोनास्तीतिप्रतीत्या निषेधमुखेन भावस्यापि प्रतीयमानत्वादित्यर्थः ।

सू० [a]"नहि घटाभावो भूतलादि विरुणद्धि नापि द्वितीयः
[b]भावानामपि केषाञ्चित्तथाभावात् * अथ सहान-
वस्थानं विरोधो विवक्षितः स भावानां नास्ति ?
*—इति चेन्न, गोत्वाऽश्वत्वादौ [c]तस्यापि भावात् *
एकविधावन्यनिषेधः [d]स ? *-इति चेन्न, [e]भेदे भाव-
भेदयोरेव प्रसङ्गात् [f] * एकविधिरेवान्यनिषेधः स ?
*-इति चेन्न, निषेधस्याभावार्थत्वे भावार्थत्वे वा-
सिद्धेः * नास्तीतिप्रतीयमानत्वम् ? *—इति चेन्न,
घटाभावो नास्तीति घटस्य तथाप्रतीयमानतया
[g]ऽभावत्वापत्तेः ॥

टी० ॥ [a]"नही"ति । सहानवस्थानं प्रतियोग्यनुयोगि-भावो वा विरोधो वाच्यस्तदुभयं च घटाभावस्य भूतलादिना न भवतीत्यर्थः ॥ [b]"भावानामि"ति । उत्तरसंयोगेन कर्मणो विभागस्य च वध्यघातकविरोधदर्शनादतिव्याप्तिरित्यर्थः [c]"त-स्यापी"ति । सहानवस्थानस्यापीत्यर्थः ॥ [d]"स" इति । विरोध इत्यर्थः नीलविधौ पीतनिषेधोस्तीति तत्रातिव्याप्तिरित्याह-। [e]"भेदे" इति । नीलपीतयोर्न परस्परप्रतिषेधात्मकत्वं किंतु परस्परविरहव्याप्यत्वमात्रमतो नातिव्याप्तिरिति शङ्कते-। [f]"एके"ति । निषेधपदं यद्यभावार्थकं तदा तदनिरूपणादेवा-सिद्धिरथ भावार्थकं तथाप्यसिद्धिर्नहि निषेधपदं भावमभिधत्ते

इत्यर्थः भावार्थत्वे एकविधिर्नोपरनिषेधोऽपि तु विधिरेवेत्य(१)-सिद्धिरित्यप्याहु. ॥ [g]"अभावत्वापत्ते"रिति । अभावलक्षणस्य भावेतिव्याप्तेरित्यर्थः यद्वा लक्षणस्य लक्ष्यतावच्छेदकधर्म-व्याप्यत्वेन भावेऽपि लक्षणं गतं तदा तस्याभावत्वापत्तिरित्यर्थः ॥

मू० "अस्तीतिभावत्वनिरुक्तौ यदुक्तं दूषणं तदापत्तेश्च * प्रतियोगिनिरूपणाधीननिरूपणत्वम् ? *-इति चेन्न, [b]प्रतियोगिनः परार्थत्वेतिप्रसङ्गात् विरोध्यर्थत्वे तद-निरुक्तेः '[c]असदर्थत्वे नञर्थस्यासिद्धेः अतीतानागत-ज्ञानादौ विषयादिनातिप्रसङ्गात् यञ्च किञ्चिदभा-वस्य लक्षणमुच्यते स भावोभावो वा नाद्यः भाव-स्याभावानाश्रितत्वात् [d]विषयिधर्मेण च कथमपि तथात्वे तन्निर्वाच्यं स्यात् ॥

टी० ॥ "अस्ती"ति । अस्तीतिप्रतीयमानत्वं भावत्वम् अस्ति शब्दार्थो वा विवक्षितस्तच्छब्दोल्लेखमात्रं वा आद्येऽसि-द्धिरन्त्येऽतिप्रसङ्गः किंचाभावस्य प्रतीतिगर्भत्वे तद्वाच्यत्वा-द्यापत्तिरित्यादिदूषणमत्राप्यूह्यमित्यर्थः ॥ [b]"प्रतियोगिन" इति । परनिरूपणाधीननिरूपणत्वं बुद्धिसंयोगादावतिव्यापकं विरो-धिनिरूपणाधीननिरूपणत्वं च विरोधानिरुक्त्या दुर्ग्रहमित्यर्थः ॥ [c]"असदि"ति । असन्निरूपणाधीननिरूपणत्वं च ज्ञानसंयोगादौ नास्ति तत्र सत एव विषयस्य संयोगिनश्च निरूपकत्वादभा-वस्य त्वसतो घटादेर्निरूपकत्वं तदसत्वं देशतः कालतो वेति यदि तदा नञर्थाभाव एव वाच्यः स चाद्याप्यनिरूपित एवे-त्यर्थः क्वचिन्नञर्थस्येति पाठः तत्रापि नञर्थस्येत्यर्थः ॥ [d]"वि-षयी"ति । प्रमेयत्वाभिधेयत्वादिर्विषयीधर्मो भाव एवाभावेऽपि वर्तत इति यदि तदा स विषयीधर्मः क्वचिन्निर्वाच्यः स्यादित्यर्थः॥

मू० * अन्यदेव तद्वत् ? *–इति चेन्न, [b]तद्वदभावस्याभा-वत्वे स्ववृत्तेर्भावत्वे च व्याघातात् न द्वितीयः

(१) इति प्रसङ्गत्वस्यादित्यर्थः । तस्माल्लक्षणस्याऽसिद्धिरित्यर्थः ।

[d]तस्यात्मनि वृत्तौ विरोधापत्तेः अवृत्तावव्यापकत्व-प्रसङ्गादिति [e] * प्रतिक्षेप्यविशिष्टमेव यत्प्रतिभाति सोभाव ? *—इति चेन्न, प्रतिक्षेपानिरुक्तौ प्रतिक्षेप्यानिरुक्तेः विशिष्टशब्दार्थश्च निर्वचनीयः स्यात् [f]तत्र विशिष्टं विशेषणविशेष्यतत्सम्बन्धेभ्यो भिन्न-मभिन्नं वा नाद्यः ।

टी० ॥ "अन्यदेवे"ति । तद्बुद्धिविषयिधर्मवदेव किञ्चिद्भा-वरूपप्रभावलक्षणं स्यादित्यर्थः तद्वद् अभाववत् षट्पदार्थाति-रिक्तमन्यदेव लक्षणमभावस्ये"त्यर्थ इत्यन्ये ॥ [b]"तद्वदभाव-स्ये"ति । तद्वान् लक्षणवान् योऽभावस्तस्येत्यर्थः लक्षणविशि-ष्टोप्यभावो यद्यभाव एव तदा तत्रापि तल्लक्षणं वाच्यमिति तदा स्वविशिष्टे स्ववृत्त्यावंशत आत्माश्रय इति भावः ॥ "भावत्वे" इति । लक्षणविशिष्टोप्यभावो भाव इति वाक्य-मेव व्याहतं नहि भावोऽभावो भवतीत्यर्थः ॥ [d]"तस्ये"ति । अभावस्य यल्लक्षण तदभावात्मकमेव यदि तदा तत्रापि तल्लक्ष-णाङ्गीकारे स्ववृत्तित्वमनङ्गीकारे चाव्याप्तिरित्यर्थः प्रतिक्षे" प्येति । निषेध्यविशिष्ट एवाभावो भासते भवति हि घटाभावः पटाभाव इत्यादिप्रतीतिरिति शङ्कार्थः प्रतिषेधप्रतियोगी हि प्रतिषेध्यः प्रतिषेध एवाद्यापि न निरूपित इत्यर्थः यद्यपि सतात्यन्ताभावत्वमभावत्वं सत्तात्यन्ताभाव एक एवेति तद्-नुगतधर्मज्ञानं विनाप्याकाशादिवद्ग्रहीतुं शक्यते एव सामा-न्यादौ च सत्तावत्त्वमेकार्थसमवायादिति न तत्रातिव्याप्तिः नच सत्तात्यन्ताभावेऽव्याप्तिस्तत्रापि तद्धेतुः नहि सत्तायामपि सत्ता तथापि सत्तैव नास्तीत्यभिप्रायः(१)विशिष्टखण्डनेन लक्ष-

(१) अस्तु वा यथा कथं चित्प्रतिक्षेप्यस्य निरुक्तिर्विशिष्टश-ब्दार्थ एवानिर्वचनीय इति विशिष्टानिर्वचनीयता प्रपञ्चेन विशिष्ट-खण्डनशङ्काद्विशिष्टपदघटितं लक्षणमनुचितमित्यभिप्रेत्याह—विशि-ष्टखण्डनेनेति—

समात्रमेव खण्डित स्यादित्यभिप्रेत्य विशिष्टं खण्डयति–। [f]"तत्रे"ति।

सू० [a]"दण्डपुरुषसंबन्धमन्तरेण [b]दण्डिनोऽन्यस्याप्रतीतेः दण्डिनमानयेत्युक्ते तदानयनप्रसङ्गाच्च * [c]तत्सम्बन्धेनोपलक्षितत्वात्तथा ? *–इति चेन्न, [d]अत द्रुत उपलक्ष्यत्वेतिप्रसङ्गात् [e]तद्भुतश्चान्यत्वात् * [f]सम्बन्धो हेतुः स च तदधिकरण एव ? *–इति चेन्न,

टी० ॥ अतिरिक्तं विशिष्टमनुपलब्धिबाधितमित्याह–। [a]"दण्डे"ति। व्यवहाराविषयत्वादपि तन्नास्तीत्याह–। [b]"दण्डिनमि"ति। दण्डपुरुषसम्बन्धातिरिक्तं किमपि तत्र न व्यवह्रियत इति भावः नतु दण्डपुरुषयोः सम्बन्धेन विशिष्टमुपलक्षितमतो विशिष्टे प्रतीतिव्यवहारौ भवतो दण्डपुरुषावादायैव भवत इत्याह–। [c]"तत्संबन्धेने"ति। तद्विशिष्टं तथा व्यवहारविषयः तथाच विशेषण विशेष्ये अपि व्यवहारविषयाविति भावः विशेषणविशेष्याभ्यां विनाकृत विशिष्टमुपलक्ष्यं ताभ्यां विशिष्टं वा आद्यं दूषयति–। [d]"अतद्रुत" इति तद्विनाकृतस्योपलक्ष्यत्वे दण्डिनमानयेत्युक्ते कुण्डलिनमानयेत्यतिप्रसङ्ग इत्यर्थः ॥ अन्त्यं दूषयति–। [e]"तद्भुत" इति। दण्डपुरुषविशिष्टं चेदुपलक्ष्य तदा विशिष्टस्यान्यत्वेन दण्डपुरुषयोरानयनाभावप्रसङ्गस्तदवस्थ एवेत्यर्थः। [f]"सम्बन्ध" इति। विशिष्टताघटकः सम्बन्धः स च विशेषणविशेष्योभयाश्रय इति विशिष्टे प्रतीतिव्यवहारौ विशेषणविशेष्ययोरपि भवत इत्यर्थः ॥

सू० [a]"संबन्धात्तदधिकरणसंबन्धान्यत्वापत्तेरिति नैष पन्थाः * [b]तत्सम्बन्धिनि तद्व्यवहार ? *–इति चेन्न, [c]तस्यापि विशिष्टत्वेनान्यत्वापत्तौ व्यवहारविषयगतविशेषस्य वक्तुमशक्यत्वात् [d]एवं परम्पराकल्पनायामप्यनवस्थामात्रं नतु व्यवहार्य्यगतो विशेषः कश्चित् [e]द्वितीये तु प्रत्येकं दण्डिव्यवहारप्रसङ्गो विशेषाभावात्

न ते प्रत्येकं दण्डपदार्थाः किन्तु मिलिताइति चेत् इति किं ते च मेलकं चाभिधीयते उत तेभ्योन्य एव कश्चित् [f]आद्ये प्रत्येकं स एव प्रसङ्गः मेलकेप्यधिकः ॥

टी० ॥ [a]"संबन्धादि"ति । केवलात्संबन्धात्तदधिकरणसंबन्धो विशिष्ट इति तस्याप्यन्यत्वापत्तिरित्यर्थः तथाच संबन्धस्य केवलस्य विशेषणविशेष्ये आश्रयो नतु तदधिकरणस्य विशिष्टस्यापीति संबन्धोपि विशेषणविशेष्यगोचरव्यवहारं प्रति न तन्त्रमित्यर्थः । यद्वा(१)' संबन्ध" इति । विशिष्टव्यवहारजनकस्य सबन्धस्य दण्डपुरुषावाश्रयाविति तत्रापि व्यवहार इत्यर्थः । 'संबन्धादि"ति । केवल. संबन्धोपि न विशिष्टव्यवहारहेतुः किन्तु तदधिकरणदण्डादिविशिष्टः सचान्य एवेति दण्डादौ नानयनाद्यन्वय इत्यर्थः; एष विशेषणविशेष्यादन्यद्विशिष्टमिति पन्था न भवतीत्यर्थः । [b]"तत्संबन्धिनी"ति । विशिष्टं यद्यप्यन्यत्तथापि विशेषणविशेष्यसंबन्ध्येव तथाच विशिष्टे व्यवहारस्तदुभयगोचरः स्यादित्यर्थः ॥ [c]"तस्यापी"ति । विशिष्टमात्र न दण्डपुरुषसंबन्धि किं तु दण्डपुरुषीयत्वविशिष्टं तच्चान्यदेवेति नैतदपि व्यवहारनियामकमित्यर्थः ननु पुरुषीयत्वविशिष्टमपि यद्विशिष्टं तदपि परम्परया पुरुषसंबन्ध्येवेति स्यादेव । पुरुषे आनयनादिव्यवहार इत्यत आह–। [d]"एवमि"ति । पुरुषीयत्वेनापि विशेषणेन विशिष्टमात्रं न विशिष्टं किंतु विशिष्टविशेष एवं तत्रतत्रापीत्यनवस्थेत्यर्थः ॥ दण्डपुरुषसंबन्ध एव यदि विशिष्टं तदाह–। [e]"द्वितीय" इति ते च मेलकं चेति सर्वेषां विशिष्टव्यवहारापत्तिरित्याह–। [f]"आद्य" इति ।

मू० [a]द्वितीयस्तु प्रतीतिव्यवहारविरोधा[b]त्पूर्ववदेव निरस्तः * एकज्ञानरूढो वा [c]ऽविरलनानाज्ञानारूढो वा

---

(१) "सम्बन्धो हेतुः" -इत्यत आरभ्य पूर्वोत्तरपक्षयोरर्थान्तरमाह-यद्वेति ।

अनेकश्च संबन्धश्च संबन्धश्च विशिष्टपदार्थ ?*—इति चेन्न, [d]घटपटाविति बुद्धावारूढौ घटपटौ संबन्धश्च घटपटरूपो विशिष्टः स्यात् [e]घटत्वपटत्वतत्संबन्धानां तद्बुद्धावारूढानामभ्युपगमेन संबन्धस्यापि तद्बुद्ध्यारोहाभ्युपगमध्रौव्यात् । [f]अन्यथा घटत्वविशिष्टरूपो घटः पटत्वविशिष्टरूपश्च पटः कथमभ्युपगन्तव्यस्तत्र [g]नव घटपटावित्यपि विशिष्टमेव स्वतन्त्रयोर्घटपटयोः परस्परासम्बन्धयोस्तत्र व्यवहरणात् न पुनर्यथा दण्डी पुरुषस्तथा घटीपटः पटीघट इति वा तत्र व्यवहारः ॥

टी० ॥ [a]"द्वितीयस्त्वि"ति । तेभ्योऽधिकं चेन्मेलक(१)मित्यर्थः । [b]"पूर्ववदि"ति । विशिष्टस्य भिन्नत्वपक्षे यद्दूषणं तदिहापीत्यर्थः ॥ [c]"अविरले"ति । भिन्नजातीयज्ञानान्तरितज्ञानधारारूढ इत्यर्थः । तथा चैकज्ञानविषयत्वावच्छिन्ना दण्डपुरुषसंबन्धा एव विशिष्टपदार्थ इति न प्रत्येकं विशिष्टव्यवहारप्रसक्तो न वा तदुभयगोचरव्यवहारानुपपत्तिरिति भावः । एवं च सति समूहालम्बनारूढौ घटपटौ द्वावप्येकं विशिष्टं स्यादित्याह—। [d]"घटपटावि"ति । ननु घटपटाविति बुद्धेः संबन्धविषयता नास्तीत्यत आह—। [e]"घटत्वे"ति । समूहालम्बनस्य घटत्वपटत्वसमवायविषयकत्वादित्यर्थः अन्यथा विशिष्टप्रतीतिरेव न स्यादित्याह—। [f]"अन्यथे"ति । ननु तदुभयं विशिष्टमेवास्त्वित्यत आह—। [g]"अन्योन्योपरक्तभानाभावान्न तदुभयं विशिष्टमित्यर्थः ।

सू० [h]नचैकज्ञानारूढतैव तयोर्न मन्तव्या यतो घटपटाविति द्वित्वं तयोस्तद्द्वयानवगाहिता कथं विज्ञानेनावगाह्येतेति प्रत्यभिज्ञाप्रस्तावोक्तान् दोषाना-

(१) मेलकम्=विशिष्टमित्यर्थः ।

ह्रास्यामः अत एवाविरलनानाज्ञानारूढतापि वि-शिष्टता निरवकाशा * [c]अथाप्रकाशमानासंबंधोनेक एकबुद्ध्यारूढस्तथा नचैवं घटपटौ तत्कथमुक्तदोषापत्तिः ? *-इति चेन्न, [d]अप्रकाशमानोसंबन्धो ययोरित्ययमर्थो विशकलित इति घटत्वपटत्वव्यक्त्यादिवैशिष्ट्यमपि भज्येताविशेषात् * [e]अथ धर्मधर्मिसंबन्धाः स्वतन्त्रा एवैकबुद्ध्युपारूढास्तथा नच घटपटौ धर्मधर्मिरूपावित्यनतिप्रसङ्ग ? *-इति चेन्न, [f]धर्मत्वस्यैकस्य दण्डादिगुणादिसाधारणस्य वक्तव्यत्वापातात्॥

टी० ॥ [a]"नचेति । एकज्ञानाविषयत्वे द्वित्वमुभयगतं न प्रतीयेत यथा प्रत्यभिज्ञानस्य स्मृत्यनुभवरूपत्वे तत्ताविशिष्टे इदन्ताविशिष्टयोरभेदे न केनापि ग्रहीतुं शक्यः स्यादिति भयेन द्वयोरेकज्ञानविषयत्वमङ्गीक्रियते तथेहापीत्यर्थः ॥ [b]"अत एवे"ति । स्वतन्त्रयोर्विशिष्टत्वप्रसङ्गादेवेत्यर्थः ॥ ननु घटपटौ कथं विशिष्टे स्याद्यतस्तयोरसम्बन्ध एव प्रकाशते दण्डपुरुषौ ननु तथेत्याशङ्कते-। [c]"अथे"ति । असम्बन्धाविषयकैकज्ञानारूढयोर्विशिष्टत्वे घटपटयोः स्वस्वजातिवैशिष्ट्यमपि न स्यात् यतो विशकलितयोर्घटपटयोः घटत्वपटत्वयोस्तत्तिमज्ज्ञानेऽसम्बन्धस्यैव प्रकाशनात्वादिति परिहरति-। [d]"अप्रकाशमाने"ति ॥ ननु धर्मो धर्मीत्युभयमम्बन्धश्च विशिष्टपदार्थो घटपटौ न धर्मधर्मिभावापन्नाविति नातिप्रसङ्ग इति शङ्कते-। [e]"अथे"ति । धर्मत्वमेकमनुगतं नास्तीतिनिरूपकाप्रतीतौ लक्षणं दुर्ग्रहमित्याह-। [f]"धर्मत्वस्ये"ति ॥

मू० [a]सोप्येष्टव्य इति चेत् इष्यतां परं तस्यापि वालुकावद्विशकलितस्योपगन्तव्यत्वेन [b]धर्म्येव किं न धर्मः स्यात् [c]*तया प्रतीत्यभावान्न स्यात् ? *-इति चेन्न, [d]त्वदुक्तैकप्रतीत्यारोहणस्याविशेषात्प्रतीतिरपि तया

किं न स्यात् [c]* मास्तु धर्मत्वमनुगतं तत्तद्रूपादिपदार्थस्वरूपमेव तथा विचित्रं यत्तदेव धर्मिणा संबन्धेन च सममेकबुद्ध्युपारूढं विशिष्टं नान्यत् ? *-इति चेन्न. [f]तेषां स्वरूपाणां भेदेन नानाभूतेषु विशिष्टेष्वनुगता विशिष्टबुद्धिर्न स्यात् [g]संबन्धमपि च तर्हि विलुम्पैवं स्वभावादेव रूपादिकं तथाधिपमाधत्तां ।

टी० ॥ "[a]"सोपी"ति । धर्मत्वलक्षण एको धर्मः प्रमेयत्वादिवदेष्टव्य इत्यर्थः । एवं सति धर्मत्वस्य केवलान्वयित्वेन क्वापि धर्मधर्मिभावस्य व्यवस्था न स्यात् अव्यवस्थितत्वमेव बालुकावद्विशकलितत्वं वैशिष्ट्या निरूक्तया धर्मधर्मिभावस्य विशकलितत्वम् अव्यवस्थामेवाह—। [b]"धर्म्येवे"ति । प्राधान्येन प्रतीयमानो धर्मी धर्मस्तूपसर्जनतया प्रतीयमान इति प्रतीतिकृत एव विशेष इत्याह—। [c]"तथे"ति । तथाप्रतीतिरेवापद्यतामित्याह—। [d]"त्वदुक्ते"ति । उभयोरेकप्रतीत्यारोहाविशेषादिति भावः धर्मित्वं विशेष्यत्वपर्यवसन्नं विशेषणत्वं च विशिष्टत्वनिर्वाह्यं चेत्तद्धर्मत्वमनुगतं मास्तु किंतु वस्तूनामेव रूपरसादीनामयं स्वभावविशेषो तद्घटादिना धर्मिणा समवायादिना च संबन्धेन सहैकबुद्ध्या विशिष्टं भवतीत्याशङ्कते—। [e]"मास्त्वि"ति । एवं तर्हि रूपादीनामेवम्भूतानामननुगतानामेव विशिष्टत्वे विशिष्टाकारानुगतप्रतीतिर्न स्यादिति परिहरति—। [f]"तेषामि"ति । दोषान्तरमाह—। [g]"संबन्धमि"ति विलुम्प निरस्कुर्वित्यर्थः यथा रूपादय एकबुद्ध्यारूढा विशिष्टव्यवहारभाजनं भवन्ति" तथा समवायादिसंबन्धव्यवहारोपि तैरेवास्तु कद्वैरस्तु कृतं संबन्धेनेत्यर्थः ॥

मू० [a]एवमपि किं न स्यादिति चेत्, [b]तर्हि वराको धर्म्यपि विसृज्यतां यथा विना संबन्धं विशिष्टबुद्धी रूपादिस्वभावसामर्थ्यात्समर्पिता तथा विना धर्मिणम-

प्यस्त्विति जितं जैनैः * "स्यादप्येवं यदि शुक्ल इत्येतावन्मात्राध्येव प्रतीयेत किंतु शुक्लः शङ्ख इत्यादिना प्रत्ययेन सामानाधिकरण्योल्लेखिना धर्म्यप्यानीयत? *—इति चेन्न, "शङ्खत्वजातेरुपाधेर्वा रूपादेरविरलतादृगवस्थितस्य वा स्वरूपवैलक्षण्यमेव तत्पदेऽभिषिच्यतां येन विनाप्यधिकरणं सामानाधिकरण्यव्यवहारः स्यात् किंच नैतावन्मात्रं बुद्धिमादाय तदर्थगतवैचित्र्यान्तरखण्डने बुद्धिरेव स्वकारणसामर्थ्यात्तथोत्थिता तत्तद्व्यवहारप्रवर्तिनी स्वीक्रियतां कृतमर्थव्यसनेन ॥

टी० ॥ भट्टमतं शङ्कते—। ""एवमि"ति । सम्बन्धप्रचेत्तिरस्कृतस्तथा धर्म्यपि तिरस्क्रियतामिति धर्ममात्रमतद्व्यावृत्तिरूपं विशिष्टज्ञाने भासत इति वादिभिर्बौद्धैर्जितमित्याह—। ""नह्री"ति ॥ ननु गौरियमित्यादिप्रत्यये तथात्वेऽपि शुक्लः शङ्ख इत्यादिधीस्तु धर्मिणमुल्लिखन्ती कथं तत्र प्रमाणं न स्यादित्याह—। ""स्यादपी"ति । शङ्खत्वजातिरेव रूपेण सहैकज्ञाने सा समाना सामानाधिकरण्यव्यवहारं करोति यद्वा धर्मवैलक्षण्यमेव धर्मिपदेऽभिषिच्यतां किं धर्मिणेत्याह—। ""शङ्खत्वे"ति । दूषणान्तरमाह—। ""किञ्चे"ति । नैतावन्मात्रं न विशिष्टविलोपधर्मिविलोपमात्रं बुद्धिमादायापितु सकलार्थविलोप एव बुद्धिमादायेत्यर्थः ॥

मू० "तस्मात् "प्रत्येनव्यस्य वैचित्र्यं प्रत्ययोल्लेखसाक्षिकम् । धियं निवेश्य लुम्पद्भ्यो भद्रं साध्वेव यच्छति" यत्तु केनचिदभावस्य स्थाने तन्मात्रधीरभिषिक्ता तत्तस्य परमुचितं "गुरुर्धियमभावस्य(१)स्थाने स्थानेऽभिषिक्तवान् । प्रसिद्ध एव लोकेऽस्मिन् बुद्धबन्धुः प्रभाकरः" अपिच एकबुद्ध्यारूढोऽनेकस्य

(१) स्थाने—इत्यव्ययं युक्तमित्यस्मिन्नर्थे—।

सम्बन्धश्च विशिष्टपदार्थ इति पक्षे योयमेवंरूपवै-
लक्षण्यभाग् विशिष्ट इति कथ्यते सोप्येवं विशिष्टो-
विशिष्टाद्वैलक्षण्येन बोध्यमानो ज्ञानमन्तर्भाव्यैव
स्यादिति तत्र तत्रापि ज्ञानान्तरनिवेशनेऽनवस्था
क्वचिदप्यनिवेशे तस्याभावादविशिष्टत्वे शेषस्या-
मूलमवैशिष्ट्यापातः ॥

टी० ॥ विशिष्टखण्डनं कक्षाक्रमेण प्रपञ्चमिथ्यात्वे पर्यव-
सन्नं तथाच तत्सत्त्ववादिनो भङ्ग एवेत्युपसंहरति ।— [a]"तस्मादि"
ति । प्रत्येतव्यवैचित्र्ये तावत्तादूप्येणोल्लेख एव साक्षी स चेदु-
ल्लेखो बुद्धिवैचित्र्यमात्रेण समाहितस्तदा स एव साक्षी प्रप-
ञ्चसत्यत्ववादिभ्यो भङ्गं प्रयच्छतीत्यर्थः तावन्मात्रबुद्ध्यधीन
एवाऽभावोल्लेख इति वादिनं प्रभाकरमुपहसति—। [b]"गुरुरि"-
ति । अभावस्य स्थाने धियमभिषिक्तवान् गुरुस्तत्स्थाने समु-
चितं बुद्धबन्धुः प्रभाकर इति लोके प्रसिद्ध एव यतः बुद्धोप्य-
भावं पदार्थान्तरं नाङ्गीकरोति प्रभाकरोपि तथेति सिद्धान्तसा-
म्यादेवं बन्धुभाव इत्यर्थः गौतमश्चार्कबन्धुश्च मायादेवीसुत-
श्च सः इत्यत्र तथा प्रसिद्धिरिति भावः किंच विशिष्टस्य बुद्धि-
घटितं यल्लक्षणं तल्लक्षणविशिष्टमविशिष्टेभ्यो विशिष्टं व्याव-
र्तनीयं ज्ञानान्तरमेतादृशं निवेश्य चेत्तदाऽनवस्था ज्ञानान्तरं
चेत्क्वचिद्दृत्वा नानुसरणीयं तदा तल्लक्षणविशिष्टं न भवे-
दिति मूलपर्यन्तं विशिष्टहानिरित्याह ।— [b]"अपि चे"ति ॥

सू० "तद्योग्यस्तथेति 'चेत्तर्हि योग्यतापि तद्विशेषणं 'वा-
लुकादिवदलग्नातिप्रसञ्जकैवेत्युक्तमावर्तते । [d]"एव-
मेकमिति ज्ञानमित्याकृढमित्यादिद्वारैरपि द्रष्टव्यं
तथाहि '"अविविष्टाद्विशिष्टस्य वैशिष्ट्ये यदि धीर्वि-
शेत् । तद्बुद्धिधाराविश्रान्तिस्याद्वा मूलाविशिष्टते"ति

[f]विशिष्टनिरासेन सर्वाणि लक्षणानि निरस्तानीति मन्तव्यं यथा गुणाश्रयो द्रव्यमित्यादि [g]इतोपि गुणाश्रयो द्रव्यमित्यसङ्गतं। तथाहि [h]कथमेतल्लक्षणमवधारणीयं सङ्ख्यारूपगुणवत्तया रूपादेरपि प्रतीतेः भ्रान्तिरसाविति चेत्पृथिव्यादौ कथमभ्रान्तिरिति वक्तव्यं तत्र बाधकाभावादिति चेत्तुल्यं गुणस्य गुणवत्तायां बाधकमस्माभिरवश्यं वक्तव्यम्। * निर्गुणा गुणा इति सिद्धान्तात् ? *-इति चेन्न, [i]रूपादेर्गुणत्वस्यैव निश्चेतुमशक्यत्वात्

टी० ततोऽग्रे ज्ञानान्तरयोग्यतामात्रघटितमेव विशिष्टं स्यादिति नानवस्था न वा मूलपर्यन्तं विशिष्टज्ञानैः योग्यतायाः सर्वत्र सत्त्वादित्याशङ्कते-। [a]"तदि"ति। तद्योग्यताया अपि वैशिष्ट्यं तत्र विशिष्टे ज्ञेय चेत्तदा सैवानवस्था न ज्ञेयं चेत्तदा शेषासिद्ध्या सर्ववैशिष्ट्यासिद्धिरिति परिहरन्ति-। [b]"तर्ही"ति। [c]"बालुकावदि"ति। वैशिष्ट्यस्याद्याप्यसिद्धेरिति भावः लक्षणवैशिष्ट्यद्वारकं दोषमभिधाय तदीयतद्विशेषणवैशिष्ट्यद्वारकमाह-। [d]"एवमि"ति। [e]"अविशिष्टादि"ति। अविशिष्टात्पदार्थाद्विशिष्टस्य यद्वैशिष्ट्य व्यावृत्तधीः सा चेत्तादृशबुद्धिधाराधीना तदाऽनवस्था न चेत् शेषासिद्ध्या सर्वासिद्धिरित्यर्थः। विशिष्टखण्डनप्रयोजनमनुवदन्नेव खण्डनान्तरमङ्गनिमाह—। [f]"विशिष्टे"ति॥ [g]"इतोपी"ति। वैशिष्ट्यखण्डनरूपलक्षणानुपपत्तिसमुच्चयः। [h]"कथमि"ति। रूपादीनामपि गुणाश्रयत्वदर्शनाद्द्रव्यमात्रवृत्तितया कथमेतदवधारणीयमित्यर्थः॥ [i]"रूपादेरि"ति। गुणत्वव्यवस्थापकानतिप्रसक्तधर्माभावादित्यर्थः गुणाकारानुगतमतिश्च न सर्वसाधारणीति भावः॥

मू० [a]* सामान्यवानगुण इत्यादितल्लक्षणयोगात्तन्निश्चय इति सिद्धान्तात् ?*-इति चेन्न, [b]अगुण इति लक्षणांशस्याद्याप्यासिद्धेः सङ्ख्यावत्तया प्रतीतेर्विद्यमान-

त्वात् * "भ्रान्तिरसौ" ?*-इति चेन्न, परस्पराश्रयप्रसङ्गात् [d]सङ्ख्यावत्तया प्रतीतेर्भ्रान्तित्वे गुणलक्षणसिद्धिस्तत्सिद्धौ च [e]बाधेन भ्रान्तित्वव्यवस्थापनं * [f]नच हेत्वन्तराद्रूपादेर्गुणत्वसिद्धौ बाधकसिद्धिः*दृष्टान्तस्यापि सङ्ख्यायोगिप्रत्ययाक्रान्तत्वेन प्रसक्तद्रव्यकोटिप्रवेशितया गुणत्वेनासिद्धेः * [g]सङ्ख्यायाः सङ्ख्यावत्त्वेनवस्थाप्रसङ्गान्निःसङ्ख्यत्वव्यवस्थितौ दृष्टान्तत्वं भविष्यति ?*-इति चे[h]न्न, पृथक्त्वेनापि तस्याः सम्भावितद्रव्यकोटिप्रवेशत्वात् ॥

टी० ॥ "[a]"सामान्यवानि"ति। सामान्यवत्त्वे सत्यगुणत्वमेव व्यवस्थापकमित्यर्थः॥ कर्मण्यतिव्याप्तौ सत्यामेवाह-। [b] 'अगुण' इति। अगुणत्ववत्त्वमसिद्धं सङ्ख्यादीनां गुणानां तत्र सत्त्वादित्यर्थः दोषान्तराभिधानाय पुनः शङ्कते। [c]"भ्रान्तिरि"ति। अन्योन्याश्रयमेव विशदयति। [d]"सङ्ख्ये"ति॥ "बाधेने"ति। निर्गुणेषु गुणेषु सङ्ख्यादिप्रतीतिर्बाधितविषयेत्यर्थः॥ ननु रूपादयो गुणाः सामान्यवत्त्वे सत्यचलनात्मकत्वात् शब्दवदिति रूपादीनां गुणत्वं सेत्स्यति तथाच गुणवत्त्वप्रतीतेर्भ्रमत्वसिद्धिरिति नान्योन्याश्रय इत्यत आह। [f]"नचे"ति। शब्दस्यापि दृष्टान्तस्य सङ्ख्यारूपगुणवत्त्वेन द्रव्यत्वसिद्ध्याऽगुणत्ववत्त्वासिद्धेरित्यर्थः। ननु सङ्ख्यैवात्र दृष्टान्तोऽस्तु नहि सङ्ख्यापि सङ्ख्यावती येन तस्या अपि द्रव्यत्वं भवेदित्याह-। [g]"सङ्ख्याया"इति। सङ्ख्यायामनवस्थाभयात्सङ्ख्या मावर्त्तिष्ट पृथक्त्वं तु तत्र वर्त्तत एव तावता तस्यामपि द्रव्यत्वापत्तौ न दृष्टान्तत्वमित्याह-। [h]"ने"ति॥

सू० [a]"एवं पृथक्त्वस्यापि सङ्ख्यावत्तयेति जातीतरानाश्रयोऽकर्मरूपो गुण इत्यपि न, [b]जातिव्यापनात् *[c]जातिमात्राश्रय इत्यर्थः? *-इति चेन्न, [d]अभावाश्रयतया सर्वाव्यापनात् * जातिमात्रभावाश्रय ?*-

इति चेन्न, [e]उपाधीनामपि तदाश्रितत्वात् * नोपाधीनामाश्रयो रूपादिः [f]किन्तु कथमपि संबन्धी तावतैवानुमानादिप्रवृत्तिः ? *—इति चेन्न, [g]उपाधिसंबन्धं प्रत्यप्याश्रयत्वस्य मन्तव्यत्वात् । [h]अन्यथा यदि किञ्चिद्रूपमत्र नेष्यते तदा सामान्यविशेषानुमानं तत्र न स्यात् । व्यधिकरणयोर्गम्यगमकभावानभ्युपगमात् तस्माद्यदेतदेव लक्षणं तत्तावन्न जातिरूपं तदिदं यदि रूपादौ नास्ति तदानीमस्ति यद्यस्ति तदा नास्तीति चित्रेण लगित्युक्ते न लगति मालगेत्युक्ते लगतीति । प्रवल्हिकामनुकरोति

टी० ॥ तर्हि पृथक्कमस्तु दृष्टान्त इत्यत आह—। [a]"एवमि"ति ॥ [b]"जातिव्यापनादि"ति । जातावपि जातिभिन्नधर्मानाश्रयत्वमकर्मत्वं चेत्यर्थः ॥ [c]"जातिमात्रे"ति । जातिश्च न तथेत्यर्थः । एवं च सत्यसम्भव एव रूपादीनामपि रसत्वाद्यभावाश्रयत्वादित्याह—। [d]"अभावे"ति ॥ [e]"उपाधीनामि"ति । प्रमेयत्वाभिधेयत्वादीनामित्यर्थः । उपाधयो न रूपादौ समवयन्तीति न तदाश्रय इत्यर्थः ॥ तर्हि रूपादिकं प्रमेयमभिधेयत्वादित्यादि कथं मदनुमानं स्यादपक्षधर्मत्वादित्यत आह—। [f]"किन्त्वि"ति ॥ [g]"उपाधी"ति । तथाच जातिमात्राभावाश्रयत्वमसम्भवीत्यर्थः ॥ [h]"अन्यथे"ति । चक्षुर्मात्रग्राह्यत्वेन्द्रियग्राह्यत्वादिना रूपत्वादिकमपि नानुमीयेत समानाधिकरणयोरेव साध्यसाधनयोर्गम्यगमकभावाभ्युपगमादित्यर्थः यदि जातिमात्राभावाश्रयत्वं लक्षणं तत्र रूपादौ न स्वीकर्त्तव्यं तदा जातिमात्राभावाश्रयत्वं लक्षणं भविष्यति अन्यथा लक्षणरूपोपाधिकत्वादेव तल्लक्षणं दुष्टं भवेदित्यर्थः ॥ प्रवल्हिका प्रहेलिका

मू० अपिच गुणाश्रयो द्रव्यमित्यत्र कोऽयमाश्रयार्थः * समवाय ? *—इति चेन्न, [a]गुणत्वादेरपि द्रव्यत्वप्रसङ्गाद्गुणावच्छिन्नस्य समवायस्य गुणत्वेपि विश्रान्तत्वात् । * [b]गुणः समवेतो यत्र स गुणसमवायीति विवक्षितम् ? *—इति चेन्न, [c]यत्रेत्यस्याधिकरणार्थस्याद्याप्यनिरूपणेन तेनैव तद्द्रव्याकारानुपपत्तेः * इहेतिप्रत्ययहेतुराधार ? *—इति चेन्न, इह शङ्खे पीतिमेति प्रत्ययाच्छङ्खस्य पीतिमाधिकरणत्वप्रसङ्गात् * [d]भ्रान्तिरसौ यथार्थश्च प्रत्ययोऽत्र विवक्षित ? *—इति चेन्न, [e]तदर्थासत्त्वनिरूपणव्यतिरेकेण तदप्रमाणत्वस्य बोद्धुमशक्यत्वात् नचाद्यापीहेतिप्रत्ययस्यार्थः प्रतीतो यत्प्रतियोगिकमसत्त्वं तत्र निरूप्यते [f]पीतत्वं प्रतियोगी तच्च क्वचित्सिद्धम् ? *—इवेति [g]चेन्न, तस्य प्रमितत्वादेवासत्त्वानुपपत्तेः ॥

टी० ॥ [a]"गुणत्वादेरि"ति । गुणनिरूपितः समवायो यथा द्रव्ये तथा गुणत्वजातावपीत्यर्थः गुण इति गुणत्वे च न गुणः समवेत इति न तत्रातिव्याप्तिरित्यर्थः कुत्र गुणः समवेत इति नाद्यापि सिद्धमित्याह—। [b]"यत्रे"ति । यद्वा गुणाधिकरणत्वं द्रव्यत्वमित्यनेनोक्तं स्यात्तथाचाधिकरणमेव दुर्वचमित्याह—[c]"यत्रे"ति ॥ [d]"भ्रान्तिरि"ति । इहेतिप्रमाहेतुराधार इति लक्षणं विवक्षितमित्यर्थः विषयबाधगम्यं भ्रमत्वं विषयबाधश्च न व्यवस्थित इत्याह । [e]"ने"ति । शङ्खे पीतिमेत्यत्र पीतिमाविषयत्वद्वाधश्च तद्भ्रमत्वं तथाचाऽस्याः प्रतीतेर्भ्रमत्वमेवेत्याह—। [f]"पीतत्वमि"ति । पीतत्वं प्रमितं चेत्तदा तदसत्त्वं सामान्यतो वक्तुं न शक्यत इत्याह । [g]"ने"ति ।

मू० * तस्य [a]तत्राप्रमितत्वम् ? *—इति चेन्न, [b]तत्रेत्याधारत्वानिरूपणादिति [c]एतेन समवायिकारणं द्रव्य-

मित्यपि लक्षणं निरस्तं [d]कथं निर्णेतव्यमिदं समवायिकारणमिदं नेति रूपादौ घटादौ च सङ्ख्यासमवायिकारणत्वयुक्तेस्तुल्यत्वात्सङ्ख्यैव तु रूपादौ नास्तीति चेद्घटादौ कथमस्ति प्रत्ययस्योभयत्र तुल्यत्वादित्युक्तमनुषञ्जनीयं [e]* द्रव्य एव सङ्ख्यास्वीकारे तत्संबन्धाद्गुणेपि तद्व्यवहारोपपत्तौ कल्पनालाघवाद्गुणे सङ्ख्याद्यस्वीकार ? *—इति चेन्न, [f]विपरीतमेव कुतो न स्यात् [g]सत्तासामान्याद्यपि च गुणादौ किमर्थमङ्गीक्रियते । द्रव्यद्वारैव तत्र तद्व्यवहारोपपत्तेः ननु [h]सामान्यार्थ एव कः तथाहि अनुवृत्तप्रत्ययकारणं सामान्यमित्यलक्षणं सामग्र्या सर्वकार्योत्पत्तौ[i]स्तया तदेकदेशान्तरैश्च व्यभिचारात्॥

टी० ॥ यद्यपि सामान्यतस्तदसत्त्वं नास्ति तथापि शङ्क्येऽधिकरणेस्त्येवेत्याह—। [a]"तत्रे"ति । तत्रेत्याधारत्वमेवोच्यते तच्च दुर्वचमेवेत्याह—। [b]"ने"ति । [c]"एतेने"ति । रूपादावनिव्यापकत्वेनेत्यर्थः । रूपादीनामपि समवायिकारणत्वादिति भावः एतदेवाह—। [d]"कथमि"ति । रूपादौ सङ्ख्यैकार्थसमवायाधीनः सङ्ख्याप्रत्ययो नतु समवायाधीन इत्याह—। [e]"द्रव्य एवे"ति । रूपादिसमवेतयैव संख्यया परम्परासंबन्धेन द्रव्येपि सङ्ख्याप्रत्ययः स्यादित्याह—। [f]"विपरीतमि"ति । सङ्ख्याद्विरपि सत्तैकार्थं समवायादिना स्यादिति रूपादौ सत्तापि नाङ्गीक्रियतामित्याह—। [g]"सत्ते"ति ॥ [h]"सामान्यार्थ" इति । सामान्यशब्दार्थ इत्यर्थः । सामान्यरूपोऽर्थ इत्यर्थः । अनुवृत्तप्रत्ययो भिन्नेष्वेकाकारप्रत्ययः सामग्र्येति तत्कारणत्वसाधनावष्टम्भेनोक्तं—। [i]"तये"ति । सामग्र्येत्यर्थः ॥

मू० [a]असाधारणविशेषणात् * [b]अनन्यजातीयप्रयोजकत्वं च [c]तत् । ? *—इति चेन्न, [d]स्वसामग्र्यामपि प्रस-

कृतादवस्थ्यात् । [e]भेदप्रतिपत्त्यादावपि प्रयोजकत्वाच्च । * [f]एतत्प्रतिपत्तिप्रमाणकत्वम् ? *—इति चेन्न, स्वसामग्र्यामप्यस्याः प्रमाणत्वात् * [g]एतदेकप्रमाणकत्वम् ?*—इति चेन्न, [h]अर्थक्रियाभेदादेरपि तत्र प्रमाणत्वात् * [i]एतत्प्रतिपत्तिप्रमाकत्वम् ? *—इति चेन्न, [j]तद्विशिष्टस्यापि तत्त्वप्रसङ्गात् ॥

टी० ॥ अनुवृत्तप्रत्ययासाधारणकारणं सामान्यमिति लक्षणं शङ्कते—। [a]"असाधारणे"ति । असाधारणत्वेन विशेषणात् ॥ [b]"तदि"ति । तल्लक्षणमित्यर्थः ॥ एतदेव विवृणोति—। [c]"अनन्ये"ति । आत्ममनस्संयोगप्रभृतीनामन्यजातीयमपि कार्यं प्रति प्रयोजकत्वं सामान्यस्य त्वनुवृत्तप्रत्ययमात्रं प्रतीत्यर्थः । [d]"स्वसामग्र्यामि"ति । असाधारणत्वादित्यर्थः । अनन्यजातीयप्रयोजकत्वस्य सामान्येऽप्यसंभव इत्याह—। [e]"भेदे"ति । सामान्ये हि वैधर्म्ये तत्र भेदप्रत्ययमपि प्रति कारणमेवेत्यर्थः। [f]"एतदि"ति । अनुवृत्तप्रतिपत्तिः प्रमाणं यस्य तत्सामान्यमित्यर्थः । अनुगतमतिः स्वसामग्र्यामपि प्रमाणमिति तत्रातिव्याप्तिरित्यर्थः । [g]"एतदेके"ति । सामग्र्यामन्यदपि प्रमाणमिति भावः ॥ [h]"अर्थक्रिये"ति । कार्यभेदस्याऽऽकस्मिकत्वादपि कारणगतनियतजातिभेदकल्पनमित्यर्थः ॥ [i]"एतत्प्रतिपत्तौ"ति । अनुवृत्तप्रत्यय एव प्रमा यत्रेत्यर्थः । [j]"तद्विशिष्टे"ति । सामान्यविशिष्टव्यक्तावपि तदेकप्रमाकत्वमिति तत्रातिव्याप्तिरिति भावः ॥ जातिवैशिष्ट्यांशे च तदेकप्रमाकत्वमावश्यकमिति भावः ।

सू० * [a]तदवच्छिन्नप्रमांशप्रमाकत्वम् ?* इति चेन्न, [b]तदसिद्ध्यैवासिद्धेः * [c]इयं प्रतीतिर्येन विना नोपपद्यते(१)तत्सामान्यम् ? *—इति चेन्न, [d]कारणान्त-

(१) नोत्पद्यते—इति बहुषु पुस्तकेषु दृश्यमानः पाठोऽपपाठ एव जातिमन्तरेण प्रतीतेरनुगतस्योत्पत्त्यविरोधादिति भावः ।

राणामपि तथात्वादिति अनुवृत्तं सामान्यमित्यप्यलक्षणं किमिदमनुवृत्तत्वं नाम * [e]अनेकाश्रितत्वम्? *-इति चेन्न, [f]अवयविना संयोगादिभिश्च व्यभिचारात् * नित्यत्वे सति?*-इति चेन्न, [g]समवायेन व्यभिचारात् अत एव न बहुवृत्तित्वमपि [h]* असंबन्धत्वे सति?*-इति चेन्न, [i]अणुभिर्व्यभिचारात् * [j]नित्यत्वे सत्यनेकसमवेतं सामान्यम्? *-इति चेन्न, विकल्पासहत्वात् एतल्लक्षणं नित्यमनित्यं वा स्यात् नाद्यः [k]स्वात्मनि वृत्तिविरोधात् ॥

टी० ॥ [a]"तदवच्छिन्नप्रमाशे"ति । व्यक्तिवैशिष्ट्यस्य च न जात्यंशप्रमाविषयत्वं विषयभेदेन ज्ञानेऽप्यंशभेदादित्यर्थः। जातिसिद्धौ तदंशप्रमासिद्ध्यैव जातिरेव लक्षणाभावान्न सिद्धेत्याह । [b]"ने"ति । अनुगतप्रत्ययान्यथानुपपत्तिप्रमाणकत्वं लक्षणं शङ्कते-। [c]"इयमि"ति । आत्मनस्तत्संयोगादावतिव्याप्तिमाह-। [d]"कारणान्तरे"ति । [e]"अनेकाश्रितत्वमि"ति । स्वाश्रयान्योन्याभावसमानाधिकरणत्वमित्यर्थः । व्यासज्यवृत्तिसर्वपदार्थातिव्याप्तिमाह-। [f]"अवयवी"ति । [g]"समवायेने"ति । तस्यापि संबन्धिद्वयवृत्तित्वादित्यर्थः ॥ [h]"असम्बन्धत्वे"इति । नित्यत्वेसंबन्धत्वे सत्यनेकाश्रितत्वमित्यर्थः । [i]"अणुभिरि"ति । संयोगवृत्त्या परमाणूनामनेकदिगवच्छेदेन वृत्तेरित्यर्थः॥ [j]"नित्यत्वे"इति । समवायलक्षणा वृत्तिर्विवक्षितेति न परमाण्वतिव्याप्तिरित्यर्थः । [k]"स्वात्मनी"ति । नित्यत्वे सत्यनेकसमवेतत्वरूपं लक्षणं यदि नित्यं तदा नित्यत्वांशेपि नित्यत्ववृत्तिरित्यंशत आत्माश्रय इत्यर्थः ॥

मू० [a] विशिष्टमविशिष्टमपि हि नित्यत्वं नित्यत्वमेव नापि द्वितीयः [b]सामान्यस्य समवायस्य च नित्यत्वाभावप्रसङ्गात् [c]आत्मत्वादौ व्यक्त्यभावायत्तस्यापि विशि-

ष्टाभावस्यासंभवात् [d]तस्य च कदाचिदसत्त्वानङ्गीकारे तदनित्यत्वस्य वक्तुमशक्यत्वात् [e]तद्ग्राहिणश्च प्रत्ययस्यैककालिकस्य मिथ्यात्वेऽविशेषात्सार्वकालिकस्य मिथ्यात्वप्रसङ्गेन सर्वथा तदसत्त्वापत्तेः ।

टी० ॥ ननु नित्यत्वे नित्यत्वं न वर्त्तते येनात्माश्रयः स्यादपि तु नित्यत्वविशिष्टे इत्यत आह-। [a]"विशिष्टे"ति ॥ [b]"सामान्यस्ये"ति । अनेकसमवेतत्वस्य लक्षणस्यानित्यत्वं सामान्यानित्यत्वात् भवेत्समवायानित्यत्वाद्वा उभयं च न त्वयेष्यते इति तद्घटितं लक्षणमपि कथमनित्यं स्यादित्यर्थः । नन्वनेकवृत्तित्वमित्यत्रानेकव्यक्तिरपि विशिष्टघटिकेति तदनित्यत्वात्तल्लक्षणमनित्यं स्यादित्यत आह-। [c]"आत्मत्वादावि"ति । आत्मनां व्यक्तीनामपि नित्यत्वादित्यर्थः ननु सामान्यतद्व्यक्तितत्समवायानां प्रत्येकं नित्यत्वेपि विशिष्टं यल्लक्षणस्वरूपं नित्यत्वे सत्यनेकवृत्तित्वं तदेवानित्यमस्तु को दोष इत्यत आह-। [d]"तस्ये"ति । तस्य विशिष्टस्यानित्यत्वं तदा स्याद्यदि कदाचित्तदसत्त्वं स्यान्न त्वेवमित्यर्थः ॥ ननु तस्य कदाचिदसत्त्वमेवास्तु को दोष इत्यत आह-। [e]"तद्ग्राहिण"इति । यदा लक्षणं नास्ति तदा लक्षणविशिष्टलक्ष्यग्रहश्चेद्भ्रमस्तदा सर्वत्रैव भ्रम एव स्यादिति लक्षणस्य नित्यसत्त्वमेव पर्यवसन्नमित्यर्थः ॥

मू० [a]एकस्य च सत्यत्वेऽविशेषात्सर्वसत्यतायां कदाचिदपि तदसत्त्वं नास्तीति* [b]एकदा तत्संबन्धेन तदुपलक्षितस्यान्यदापि विद्यमानत्वात्तथात्वम् ?*— इति चेन्न, [c]तादृशोपलक्ष्यासम्भवाद् [d]व्यक्तीनां भेदादित्यनित्यत्वानुपपत्तिरेवे[e]ति । [f]एतेन नित्यत्वमन्यत्रापि प्रतिवचनीयं [g]केचानेन लक्षणेन व्यवच्छिद्यन्ते * विशेषादय ?*—इति चेन्न, विशेषा एव केऽभिधीयन्ते तत्र नित्येष्वेव द्रव्येष्वेव वर्त्तन्त एव ये ते विशेषा इत्यलक्षणम् ॥

टी० ॥ ननु लक्षणविशिष्टलक्ष्यप्रत्ययस्तत्सत्त्वकाले सत्य एवेति कथं सर्वकालिकं लक्षणसत्त्वमत आह—। [a]"एकत्ये"ति तर्हि विषयाबाधात् सर्वतत्प्रत्यययाथार्थ्ये लक्षणं सर्वकालस्थितीतिकथननित्यं स्यादित्यर्थः ॥ ननु लक्षणं स्वाकालेपि लक्ष्यमुपलक्षयतीति तदापि तद्विशिष्टप्रत्ययः सत्य एवेति शङ्कते—। [b]"एकदे"ति। सामान्यानां बहूनामेकरूपाभावात्तल्लक्षणेन किमवच्छिन्नं लक्ष्यमुपलक्षितं स्यादित्याह—। [c]"ने"ति । [d]"व्यक्तीनामि"ति । लक्षणा सामान्यानामित्यर्थः तथाच लक्षणस्यानित्यत्वानुपपत्तिरित्याह—। [e]"इती"ति ॥ [f]"एतेने"ति । आकाशादीनां नित्यत्वं यदि नित्यं तदात्माश्रयः । अनित्यं चेत्तदाकाशस्याप्यनित्यत्वमेव स्यादिति सर्वनित्यत्वं खण्डनीयमित्यर्थः "नित्यत्वघटितं लक्षणान्तरमप्येवं खण्ड्यमित्यर्थः" सत्यन्ये आगामिखण्डनं सामान्यखण्डनेन सङ्गमयति—। [g]"केचानेने"ति । नित्येष्वेवेत्यन्ययोगव्यवच्छेदेन द्रव्यगुणकर्मणां व्यवच्छेदः तेषामनित्येष्वपि वृत्तेः द्रव्येष्वेवेत्यन्ययोगव्यवच्छेदेन सामान्यानां व्यवच्छेदः तेषामद्रव्येष्वपि वृत्तेः वर्तते एवेत्ययोगव्यवच्छेदेन ज्ञानसुखादीनां व्यवच्छेदः तेषां स्वासत्त्वकाले वृत्तेरयोगेऽपीत्यर्थः ॥ ननु गुणादीनां सामान्यादीनां नित्येष्वेवेत्यनेन व्यवच्छेदात् किं पदान्तरेण नहि गुणा नित्येष्वेव वर्तन्ते न वा सामान्यानि तथाच गुणत्वेन सामान्यत्वेन च ताद्रूप्ये(1)सर्वगुणानामन्यव्यवच्छेदः सिद्ध एवेति चेन्न नित्यत्वस्य धर्मस्य व्यवच्छेदार्थं "द्रव्येष्वेवे"ति करणात्

मू [a]आत्मत्वादिना व्यभिचारात् * [b]नित्यान्तरेऽसत्त्वान्न तत्सर्वत्र नित्ये वर्त्तते विशेषास्तु नैवं नित्ये वर्त्तन्ते एवेति नियमात् ? *—इति चेन्न, [c]प्रतिविशेषमव्याप्त्याऽलक्षणत्वात् * [d]यज्जातीया एवमिति लक्षणार्थं ? *—इति चेन्न, जातेरनङ्गीकारात् * जा-

(१) ताद्रूप्ये=नित्याऽनित्योभयवृत्तित्व इत्यर्थः ।

तीयेत्यस्मात्पदात् उपाधिरेव तथा विवक्षित ? *- इति चेन्न, ^e^तस्येतरव्यावृत्तस्याधिगतौ व्यर्थं तदुपजीविलक्षणमिदं तत एव विजातीयव्यावृत्तिप्रतीतेः इतरव्यावृत्तस्य चानधिगतौ लक्षणस्य दुरवधारणत्वापत्तेः इतरव्यावृत्ततया ^f^तज्जातीयत्वस्याप्रतीतेः॥

टी० ॥ तादूप्येण वृत्त्यविवक्षायां दोष(१)माह-। ^a^"आत्मत्वादी"ति । ननु नित्येष्वेव द्रव्येषु वृत्तेरयोगो वर्त्तत एवेत्येवकारेण व्यवच्छिद्यते तथाचाकाशादावर्तमानेनात्मत्वादिना कथं व्यभिचार इत्याह-। ^b^"नित्यान्तरे"ति । प्रतिस्वं विशेषविशेषाव्याप्तिरेवं मतीत्याह-। ^c^"प्रती"ति ॥ ननु विशेषत्वावच्छिन्नानां न नित्ये द्रव्ये वृत्तेरयोग इति शङ्कते-। ^d^"यज्जातीया"इति । यावद्विशेषवृत्तिरुपाधिर्न कश्चिदस्तु इत्याह-। ^e^"तस्ये"ति ॥ ^f^"तज्जातीयत्वस्ये"ति । यावद्विशेषनिष्ठोपाधेरित्यर्थः ॥

मू० * भवतु ^a^स एवोपाधिर्लक्षणम् ?*-इति चेन्न, तस्यानिरुक्ते * यतो नित्यद्रव्यव्यक्तिषु विश्वव्यावृत्तधीर्योगिनां स विशेष ?*—इति चेन्न, ^b^स्वरूपधर्मव्यक्तिभेदेष्वपि प्रसङ्गात् अन्यथा कार्यद्रव्यगुणादिव्यक्तिषु स तेषां कुतः स्या^c^त्तास्विव वैधर्म्यान्तरस्य नित्येष्वपि सम्भवात् ^d^विशेषवद्विशेषासम्भवेन लक्ष्यासिद्धिरिति अथ विशेषादिभ्यो विशेषलक्षणादेर्भेदे कथं तत्र तत्रैव नैर्विशेषादिव्यवहारः क्रियतां नान्यत्र *^e^संबन्धो नियामक ?—इति चे^f^न्न, संबन्धस्यापि संबन्धो नियामकत्वेनवस्थापातात् ।

टी० ॥ ^a^"स एवे"ति । यदवच्छेदेन विशेषाणां नित्यद्रव्यवृत्तित्वं प्राप्तमित्यर्थः । स्वरूपेति भेदपदं प्रत्येकान्वयि [illegible]

---

(१) दोषमाह-अन्ते एवेति विशेषणमदृष्ट्वा दोषमाहेत्यर्थः ।

व्यावृत्तबुद्धिः तेषां योगिनामतीन्द्रियकार्यमनुमितिवदनित्य विशेषपदार्थाभावात् योगिनां व्यावृत्तबुद्धिर्यद्यपीना तथापि-व्याप्तिरित्यर्थः ॥ [b]"ताहिव"ति । गुणादिव्यक्तिष्वित्यर्थः ॥ [c]"नित्येद्रव्ये"ति । द्रव्येष्वित्यस्य विशेषणं । [d]"विशेषवदि-"ति । यथा विशेषपदार्थे विशेषान्तरमन्तरेणैव व्यावृत्तधीस्तथा तदाश्रयेपि स्यादित्यन्यथा विशुधा विशेषपदार्थ एव न सिद्ध्ये-दित्यर्थः । सम्बन्धस्वरूपमवतारयितुं पीठमारचयति—। [e]"अथे"-ति । विशेषादीनां पदार्थानां विशेषलक्षणानि भिन्नानि तथाच किं लक्षणं कस्य स्यात्तथाच केन लक्षणेन कुत्रेतरव्यावृत्तिव्यव-हारौ स्यातामित्यर्थः यत्र लक्ष्ये यल्लक्षणं सम्बद्धं तत्र तेन तौ स्यातामित्याह—। [f]"सम्बन्ध"इति । सम्बन्धस्यापि तदीयत्वे संबन्धान्तरं चेन्नियामक स्यात्तदानवस्थेत्याह—। [g]"ने"ति ॥

मू० [a]अन्यथा त्वनियमात्तदनिरुक्तेश्च तथाहि कः संबन्धश-ब्दार्थः समवायादय इति चेत्सत्यं किन्तु [b]केन निमित्तेनेति हि प्रश्नवाक्यतात्पर्यं प्रतिस्वं व्यावृ-त्तेन संयोगत्वादिनान्येन वा आद्ये [c]नुगतव्यवहा-रानुपपत्तिप्रसङ्गः [d]अस्ति चासाविन्द्रियार्थसन्निक-र्षोत्पन्नादिप्रत्यक्षं [e]नित्या प्राप्तिः समवाय इत्यादि नच द्वितीयः [f]तस्यैकस्यासंभवात् * [g]नियामकत्वं तत् ? *—इति चेन्न, [h]स्वभावस्यापि भवता नियाम-कत्वाङ्गीकारा[i]न्नचासौ संबन्धः * [j]तथाविधः सोपि संबन्ध एव ? *—इति चेन्न,

टी० ॥ ननु संबन्धेपि संबन्धान्तरं नाभ्युपेयं येनानवस्था स्यादित्याशङ्क्याह—। [a]"अन्यथे"ति । [b]"केने"ति । सम्बन्धपद-प्रवृत्तिनिमित्तप्रश्नोपमित्यर्थः । यथाकाशादिपदस्य प्रवृत्तिनि-मित्तमन्तरेणैव सम्बन्धपदप्रवृत्तिस्तत्राह—। [c]"अनुगते"ति । ननु मा भूदनुगतमत्यय इत्यत आह—। [d]"अस्ति चे"ति । नचिरू-र्षपदेन संयोगसमवायादीनामभिधानमेकं प्रवृत्तिनिमित्तमन्तरेण

न स्यादित्यर्थः ॥ "“नित्येति प्राप्तिपदेन संयोगसमवाययोर-लाभे संयोगव्यावर्त्तनाय नित्येति । विशेषणं न घटेतेत्यर्थः ॥ “तद्भवे”ति । अनुगतरूपस्येत्यर्थः । g“नियामकत्वमि”ति । अतिप्रसक्तनिवर्त्तकत्वमित्यर्थः ॥ h“स्वभावस्यापी”ति । अभा-वसमवायादिविशिष्टप्रतीतौ स्वभावस्यापि नियामकत्वस्वीका-रादित्यर्थः । i“नचासौ सम्बन्ध”इति । सम्बन्धलक्षणं तत्राति-व्यापकमिति भावः । j“तथाविध”इति । नियामकः स्वभावः संबन्ध एवेति नातिव्याप्तिरित्यर्थः ॥

सू० a“त्वया सर्वस्वभावनियतृताया अवश्याभ्युपगन्तव्य-त्वेन नियामकनिरुक्तिलभ्यसत्त्वाद्यधिकांशासाम-र्थ्यापत्तेः bनियम्यस्य च स्वस्यातिप्रसङ्गेन निया-मकत्ववोधोयुक्त्यनुपपत्तेः cअतिप्रसक्तत्वे च तस्यैव नियामकत्वात् अतिप्रसक्तेन नियमायोगात् dभूत्वा नियमकरणे च प्रागनियतत्वापत्तेः eएवमन्येनापि अन्यनियमेन्यदपि हि यदि पूर्वं घटादिरूपेणानि-यतमेव घटादि करोति तदा पटाद्यपि तथा कुर्यात् ॥

टी० ॥ a“त्वये”ति । सर्वस्वभावाश्चेन्नियन्तारस्तदा नियमनियतपूर्वत्वमिति या नियामकपदनिरुक्तिस्तत्र सत्त्व-मेवास्तु नियामकत्वं तदादिभूतमधिकं यद्विशेषणं तद्वैयर्थ्यापत्ते-र्व्यावर्त्तकत्वादित्यर्थः सत्त्वादित्यतद्गुणसंविज्ञानो बहुव्रीहिः ॥ b“नियमस्य चे”ति । स्वभावेन यन्नियम्यं तदतिप्रसक्तं यदि तदा नियामकत्वं व्यवच्छेदकतया बोधकत्वं न सम्भवति स्वत एव व्यवच्छिन्नत्वादित्यर्थः ॥ c“अतिप्रसक्तत्व” इति । निय-म्यमतिप्रसक्तं चेत्तदा नियामकमपि तदेवेत्यतिप्रसक्तस्य निया-मकत्वानुपपत्तिरित्यर्थः । यत्तु नियामकं तदुत्पन्नं सन्नियम-येदनुत्पन्नमेव वा आद्ये आह । d“भूत्वे”ति । स्वमेव हि निया-मकं नियम्यं चेति स्वोत्पत्तेः पूर्वं स्वमनियतं स्यादित्यर्थः । तथात्वे वा पश्चादपि कथंनियतं स्यादित्यर्थः । स्वस्य स्वं

प्रति नियामकत्वानुपपत्तिमुक्त्वा कारणस्य कार्यं प्रति नियामकत्वानुपपत्तिमाह—। e"एवं न"ति । दण्डचक्रादिकारणं यद्यघटमेव घटीकरोति तदा पटमपि घटीकुर्यादित्यर्थः ॥

मू० [a] * न घटादित्वे नियामकत्वस्य किन्तु घटादेः कालविशेषयोगे? *—इति चे[b]न्न, यदि नाम घटादेः कालविशेषयोगिता नियतेष्यते तदा पटादिकालविशेष योगमपि तथा कुर्यात्तस्मात् [c]"यदि कुर्याद्धेतुकालानियतं नियतं परः तत्स्यादतिप्रसक्तत्वम[d]न्यथा चानियन्तृतेति" [e]कार्यकारणयोः कालभेदान्नियम्यनियामकत्वोपगमे उत्तरोत्तरेण पूर्वपूर्वनियमः किं न स्यादित्यविनिगम्यत्वापत्तिः [f]"प्राचोत्तरस्य नियमः प्राच एव न तेन किं [g]अनाद्यनन्तयोर्नैवं विनिगन्ता प्रवाहयोरिति" ॥

टी० ॥ कारणस्य घटं प्रति नियामकत्वं न ब्रूमः किन्तु कालयोगं प्रतीति शङ्कते—। [a]"न घटादित्व इति । कालविशेषयोगो घटीय एव नियम्यश्चेत्तदा घटनियामतैवेति पूर्वदोष एव । अथ घटमनन्तर्भाव्यकालविशेषयोगमात्रं नियम्यं तदा पटकालविशेषयोगमपि नियमयेदविशेषादित्याह—। [b]"ने"ति । इममेवार्थं कारिकया सङ्गृह्णाति—। [c]"यदी"ति । परो हेतुः कालानियतमतद्यदि कालनियतं कुर्यात्तदाऽवश्याविशेषाद्दण्डः पटमपि कालनियतं कुर्यादित्यतिप्रसङ्गः । [d]"अन्यथे"ति । सवे घटादिः कालविशेषनियतश्चेत्क्रियते तदा दण्डादेर्नियामकत्वमेव भज्येत घटादेस्ताद्रूप्याविशेषादित्यर्थः । दोषान्तरमाह—। [e]"कार्ये"ति कारणं नियामकं कार्यं च नियम्यमिति भिन्नकालत्वाविशेषान्न स्यात्प्रत्युतवैपरीत्यमेव स्यादित्यर्थः ॥ इममेवार्थं संगृह्णाति—। [f]"प्राचे"ति । पूर्वेणोत्तरस्य नियमनं चेत्तदोत्तरेणैव पूर्वस्य नियमनं किन्नस्यात् ननु पौर्वापर्यमेव नियामकमित्यत आह—। [g]"अनादी"ति । अनादौ प्रवाहे पौर्वा-

यद्यनपि कारणजातीयकार्यजातीययोरनियतमित्यर्थः यत्नकार्यस्योत्तरत्वनियमो मा भूदित्यनन्तरत्वमप्युक्तं ॥

मू० [a]अभूत्वा च करणे व्याघातात्। [b]संबन्धिनश्चाधारत्वात् संबन्धस्याधेयत्वात् तस्यैव तदाधारत्वानुपपत्तेः [c]न हि सुशिक्षितोपि नटवटुः स्वस्कन्धमारुह्य नृत्यति नाप्यन्यस्यासौ संबन्धः स्वयैव तथानभ्युपगमात् [d]स्वभावादेवायमीदृश इति हि स्वभाववादस्तत्र परस्य नियमनाभावात् कथं परः संबन्धी स्यादुच्येत यत्र किंचित्संबन्धत्वमभिधीयते तत्समवायेपि स्वीकार्यम्। नच [e]समवायाधारत्वं द्रव्यादिषट्कस्य सम्भवति ॥

टी० ॥ द्वितीयं पक्षमाशङ्क्याह–। [a]"अभूत्वे"ति। असतो नियामकत्वं व्याहतमेव नियतनियतपूर्वसत्त्वस्य नियामकत्वादित्यर्थः। स्वभावसंबन्धे दूषणान्तरमाह–। [b]"संबन्धिन" इति। नहि तदेव तेनैव तद्वदिति सम्भवति आधाराधेयभावस्य भेदगर्भत्वादित्यर्थः ॥ असम्भवमेव दर्शयति–। "नही"ति। अनभ्युपगममेवाह–। [d]"स्वभावादि"ति। यद्यपि घटाभावभूतलयोरन्योन्यं संबन्धत्वं तथाच घटाभावस्य भूतलं संबन्धः भूतलस्य च घटाभावः संबन्ध इति संबन्धसंबन्धिनोर्भेद एव भूतलस्य संबन्धः कथमभाव इत्यत्र स्वभाव एवोत्तरं तद्विशिष्टप्रत्ययस्य संबन्धान्तरेण दर्शनात्। यद्वा विशिष्टप्रत्ययजनकत्वं यस्य स्वस्य भावो धर्मः स एव संबन्धस्तज्जनकत्वमेव कथमस्येत्यत्र तु स्वभावेनैवोत्तरं तथापि संबन्धस्वरूपमात्रे तात्पर्यं–। [e]"समवायाधारत्वमि"ति। समवाय आधारो यस्येत्यर्थः ॥

मू० [a]नचोपाधिभावात्स्यात्, तत्संयोगसमवायासम्भवात् [b]स्वभावसंबन्धस्य च निरस्तत्वात्। [c]नचाधावभावोपि, प्रतिषेध्यप्रतियोगिभावभेदाभिधानप्रसङ्गात्

[d]सप्तपदार्थोपरिसमाप्तं च जगत् । [e]परस्परविरोधेन तल्लक्षणस्य व्यवस्थापनादिति ॥

टी० ॥ ननु प्रमेयत्वादिवदुपाधिरेव कश्चित्सम्बन्धत्वं समवाये वर्त्ततामत आह—। [a]"नचे"ति । उपाधेरपि संयोगलक्षणस्य समवायलक्षणस्य([1])वा तत्र वृत्तिर्न सम्भवतीत्यर्थः ॥ ननु स्वभावसम्बन्धेनैव स उपाधिस्तत्र वर्त्ततामत आह—। [b]"स्वभावे"ति ॥ ननु समवाये भावरूपो धर्मः सम्बन्धत्वं मा वर्त्तांसाभाव एवास्त्वस्तित्वस्त्वयत आह । [c]"नचे"ति । [d]"अभाव" इति नञ्पदस्य निषेध्यो यः प्रतियोगी भावस्तदभिधानप्रसङ्गादित्यर्थः ॥ प्रतिषेध्यप्रतियोगिपदयोः पर्यायत्वेपि प्रतिषेध्यपदं वस्तुपरं प्रतियोगिपदं वाच्यत्वपरमित्यन्ये स्वार्थिकणिजन्तप्रतिषेधपदे क्तप्रत्ययेन प्रतिषेधं कृत्वा यः प्रतियोगीत्यर्थं इत्यपरे प्रतिषेध्यं प्रतिषेधाधिकरण([2])मित्यप्याहुः । ननु पदार्थान्तरमेव संबन्धत्वं स्यादित्यत आह—। [e]"सप्तपदार्थी"ति । एतदेव कुत इत्यत आह—। [f]"परस्परे"ति । तत्सगुणं निर्गुणं वा सगुणं चेद्द्रव्यमेव निर्गुणमपि सामान्यवन्निःसामान्यं वा सामान्यवद्वा, सामान्यवदपि चलात्मकमन्यथा भूतं वा आद्ये कर्मैव अन्त्ये गुण एव निःसामान्यमप्यसमवेतं समवेतं वा आद्ये समवायः अन्त्येऽनेकसमवेतमेकसमवेतं वा आद्ये सामान्यं अन्त्ये विशेष एवेति षडेव भावाः सप्तमश्चाभाव इत्यर्थः ॥ "परस्परविरोधे हि न प्रकारान्तरस्थितिः । नैकतापि विरुद्धानामुक्तिमात्रविरोधः" इति न्यायादित्यर्थः ॥

सू० [a]यदपि नियम्याद्भिन्नं नियामकं यदपि, कथं तदेव नियमयति नान्यदिति तदाधारत्वादिति चेत्कः पुनराधारार्थः * यत्र स्थीयते तत् ? *—इति चेन्न, यत्रेति सप्तम्यर्थस्यापि विवेचनीयत्वात् * इहेति

(१) "सम्बन्धस्य"-इति शेषः । अधिकरणे चेता षष्ठ्यौ ।

(२) प्रतिषेधाधिकरणम्=प्रतिषेधानुयोगी ।

प्रत्ययविषय ? *–इति चेन्न, [b]तत्रेति प्रत्ययविषयस्यानाधारत्वप्रसङ्गात् [c]किञ्च प्रत्ययविशेषाधिगमो विषयविशेषाधिगमात् विषयस्य च विशेषाधिगमः प्रत्ययविशेषादिति व्यक्तमन्योन्याश्रयः * [d]समवायी ? *–इति चेन्न, [e]शशे शृङ्गाभावः कुण्डे बदरमित्याद्यव्याप्तेः * गौण[f]स्तत्र प्रयोग ? *–इति चेन्न, एतावन्मात्रं प्रत्ययश्च भ्रान्त इत्यपि वक्तव्यमवशिष्यते भवतः ओमिति चेदप्य[g]विपरीतमेव कुतो न स्यात् [h]शशे विषाणं नास्तीति च यदि विषाणाभावाधिकरणत्वप्रतीतिर्भ्रान्ता शृङ्गस्य तर्हि शशोऽधिकरणं स्याद्भावाभावयोरन्यतरनिषेधस्यान्यतरविधिपर्यवसायित्वेनाभ्युपगमात् * पतनप्रतिबन्धकमधिकरणम् ? *–इति चेन्न, [i]अवयविनं गुणादिकं च प्रति तदभावात् * अव्यवहिताधः स्थितम् ? *–इति चेन्न,

टी० ॥ आधारत्वखण्डनं प्रस्तौति–। [a]"'यद्पी"ति । आधारत्वमेव सप्तम्यर्थ इत्यर्थः ॥ [b]"तत्रे"ति । तच्छब्दापेक्षता इदं शब्दस्यान्यार्थत्वादित्यर्थः प्रत्यय एव कथं तथेत्यनुयोगे विषयवैलक्षण्यं नियामकं स्यात्तत्र च प्रत्ययवैलक्षण्यमित्यन्योन्याश्रय इत्याह–। [c]"किञ्चे"ति । [d]"समवायी"ति । समवायित्वमाधारत्वमित्यर्थः । संबन्धान्तरेणाधारत्वेऽव्याप्तिरित्याह–। [e]"शश"इति ॥ [f]"तत्रे"ति । समवायलक्षणां वृत्तिमन्तरेण यत्राधारत्वप्रतीतिरित्यर्थः ॥ विपरीतमिति कुण्डे बदरमित्यादिप्रतीतिः प्रमास्तु पटे शौक्ल्यमित्यादिप्रतीतिरेव भ्रमः स्यादित्यर्थः । दूषणान्तरमाह–। [g]"शश"इति । अवयविपतनं नावयवाः प्रतिबध्नन्ति तथा मत्यवयवी कदाचिदपि न पतेन्न वा

(१) अंशवः=तन्त्ववयवाः ।

गुणपतनं गुणी प्रतिबध्नाति गुणानां गुरुत्वानाधारत्वादपत-नधर्मकत्वादिति तदुभयं प्रत्याधारत्वं न भवेदित्याह—। [h]"अवयविनमि"ति। अंशवादीनां पटाद्याधारत्ववारणायाऽप-बहितेति ॥

सू० [a]"गुणाद्यपेक्षया गुणवदादेरधः स्थितत्वे प्रमाणाभा-वात्। अविशेषेण वा[b]वयविगुणादीनामवयवाधा-रत्वप्रसङ्गात् [c]ऊर्ध्वस्थितस्य च संयोगिनः संयोगं प्रति तदभावात् [d]सूत्राऽवलम्बितद्रव्यादौ च बहुलं व्यभिचारात् *[e]यद्येकोऽधिकरणार्थो नोपपद्यते तर्हि-षष्ठ्यर्थवद्भिन्न एवास्तु ? *–इति चेन्न, [f]आश्रया-सिद्ध्यादेर्भेदप्रसङ्गात् * [g]सोपि स्वीकार्य ? *–इति चेन्न, [h]असिद्ध्यादिविषयपरिगणनस्य व्यवहारहेतो-रन्यथाभावप्रसङ्गात् [i]क्वचिदाश्रयस्य समवायित्वात् क्वचिन्नाभावं समवायं च हेतुं प्रति तदसम्भवात् [j]एकस्य च तेषामुपसङ्ग्राहकस्य वक्तुमशक्यत्वात् बहव एवाश्रयशब्दार्थाः आश्रयासिद्ध्यादयोपि पृथक् पृथगेव बहवः असिद्धिभेदपरिगणनग्रन्थोप्य-

टी० ॥ गुणगुणिनोराधाराधेयस्य नियन्तुमशक्यत्वमि-त्याह—। [a]"गुणादी"ति ॥ [b]"अवयविगुणादीनामि"ति । अवय-विनां ये गुणादयस्तेषामवयवानामविशेषादवयवा अप्याधाराः स्युरित्यतिव्याप्तिरित्यर्थः कुण्डे बदरसंयोगस्यापि बदरमाधारो न स्यादधः स्थितत्वाभावादित्याह—। [c]"ऊर्द्ध्वे"ति। अधः स्थितेपि सूत्रबद्धे द्रव्ये सूत्रस्याधारत्वप्रतीत्या तत्राव्याप्तिरित्याह—। [d]"सूत्रे"ति । उत्पत्तये स्थितये ज्ञप्तये वा यद्येनापेक्ष्यते तदेव तदा-धार इति नानार्थ एवायमाधारशब्द इत्याह—। [e]"यद्ये"ति । आश्रयासिद्ध्यादेराश्रय नानात्वेन भेदः स्यादित्याह । [f]"आश्र-ये"ति। आदिपदाद्व्यभिचारादिपरिग्रहः व्यभिचारोपि साध्या-

भावसामानाधिकरण्यमित्यत्राप्यधिकरणशब्दस्य नानार्थत्वा-
दिति भावः आश्रयासिद्धिभेदोऽपि कार्य इत्याह—। [g]"सोऽपी"ति।
आश्रयासिद्धिभेदा एव सिद्धास्तदाऽसिद्धिप्रपञ्चव्युत्पादकं शास्त्रं
विरुद्ध्येतेत्याह—। [h]"असिद्धी"ति । आश्रयासिद्धिभेदमेव प्रदर्श-
यति—। [i]"क्वचिदि"ति । आश्रयत्वस्यानुगतस्याभावादित्याह—।
[j]"एकस्य चे"ति ॥

मू० [a]न्यथाकारं बोधदर्शनात् ? *-इति चेन्न, [b]तथापीह
कुण्डे बदरमित्यत्र क आधारार्थ इति वक्तव्यं न
तावत्पतनप्रतिबन्धकत्वं [c]सहैव कुण्डेन पतति बदरे
तदभावात् नापि संयोगित्वं [d]वैपरीत्यस्यापि प्रस-
ङ्गात् * संयोगित्वे सत्यधःस्थितत्वं तत्राधिकरणार्थ ?
*-इति चेन्न, [e]तस्मिन्सत्यप्यन्यत्र चरणतलमिलि-
तधूलिपटलादौ तदधिकरणप्रतीत्यनुत्पत्त्या प्रत्युत
चरणतले धूलीत्येव प्रतीत्याऽऽधारत्वप्रतीतौ व्यभि-
चारित्वेन [f]प्रकृतेऽपि तथा स्वीकारानुपपत्तेः * [g]न
सार्वत्रिकोऽयमाधारार्थः किन्तु क्वाचित्को नानारूपा-
धारत्ववादिपक्ष ? *-इति चेन्न, [h]भवत्वन्यत्रान्यस्या-
धारार्थत्वं तस्य त्वाधारार्थत्वं नोपपद्यते अनाधा-
रत्वप्रतीतिविषयेऽपि गतत्वादित्युक्तेः ।

टी० ॥ [a]"अन्यथाकारमि"ति । व्याप्तत्वपक्षधर्मत्वाभ्या-
मप्रमितत्वस्यानुगतस्याश्रयभेदेऽपि सुवचत्वात्सर्वेषामेवाश्रयाणां
पक्षत्वेनोपसङ्ग्रहादित्यर्थः ॥ बाधो दोषः । [b]"तथापी"ति ।
आश्रयार्थो विशिष्य निर्वक्तुमशक्य इत्यर्थः ॥ [c]"सहैवे"ति ।
यद्यपि कुण्डादधः पतनं तत्रापि कुण्डप्रतिबद्धमेव तथापि तदा-
काशदेशात्पतनं न प्रतिबध्नातीत्यर्थः ॥ [d]"वैपरीत्ये"ति ।
दध्नोऽपि कुण्डाधारत्वप्रसङ्गादित्यर्थः ॥ [e]"तस्मिन्नि"ति ।
अधःस्थितत्वे सत्यपि धूलीपटलस्याधेयत्वमेव न त्वाधार-

त्वमित्यर्थः। अन्यत्रेत्यस्य विशेष्यं "धूलीपटलादावि"ति ॥ [f]"प्रकृतेपी"ति। विशिष्यापि यल्लक्षणमुपक्रान्तं तदव्यतिव्याप-कमेवेत्यर्थः। संयोगवृत्त्याप्याधारत्वं नास्त्येवेति शङ्कते—। [g]"ने"-ति। तत्रापि यद्विशेषलक्षणं कृतं तदेव धूलीपटलादावतिव्यापक-मिति परिहरति—। [h]"भवतिव"ति। अनाधारप्रतीतिविषये धूलीपटलादावित्यर्थः॥

मू० * [a]"आधेयापेक्षया महत्परिमाणत्वे सति? *-इति चेन्न, करतलस्थित तूलराश्यादौ तदसम्भवात् [b]अन्यस्य च तत्राधारार्थस्य वक्तुमशक्यत्वात् [c]अधः शब्दार्थस्य च वक्तुमशक्यत्वात् [d]*पतनाभिमुखदि-गवस्थितत्वम्? *-इति चेन्न, [e]पतनार्थस्य गमना-धिकस्याधः शब्दार्थव्यतिरेकेण निर्वक्तुमशक्यत्वात् अत एवाधः शब्दार्थदुर्वचनत्वमधिगम्याद्वैतवादिना गुरुणा शिष्याय खण्डनमुपाचक्षाणेन भगवता परा-शरेणाभिहितम् "अधः शब्दनिगद्यं किं किञ्चो-र्ध्वमभिधीयते" * [f]पृथिव्यभिमुखा दिगधः शब्दार्थ? *-इति चेन्न, [g]ऊर्ध्वशब्दार्थस्यापि पृथिव्यभिमुखा दिक् तदपेक्षया साध? *-इति चेन्न, [i]यदपेक्षयेति किं यमवधीकृत्येति विवक्षितमुत यदीयाभिमुख्य-व्यवस्थितेति ॥

टी० ॥ [a]"आधेये"ति। धूलिस्तु चरणापेक्षयाल्पपरिमाणेति भावः॥ [b]"करतले"ति। प्रचयाख्यसंयोगेन करापेक्षया तूलक-पिण्डे महत्त्वारम्भादिति भावः॥ ननु तत्रापि पृथगेवाधारत्वं स्यादित्यत आह—। [c]"अन्यस्ये"ति। अव्यवहिताधः स्थित-मिति यदुक्तं तत्राह—। [d]"अध"इति। यदभिमुखं फलादि पतति तदधः शब्दार्थ इत्याह—। [e]"पतने"ति। अधः संयोगफलिका क्रिया पतनमित्यन्योन्याश्रय इत्याह—। [f]"पतने"ति। गुरुणा

अमुना शिष्यस्य यत्खण्डनं कृतं तदुपाख्यानेन तदुपाख्यानं कुर्वता परशरेणेत्यर्थः । [g]"पृथिवी"ति । उपरि स्थितं पदार्थमपेक्ष्य या पृथिव्यभिमुखा दिक् साऽधः शब्दार्थ इत्यर्थः ॥ [h]"ऊर्द्ध"ति । आभिमुख्यमुभयत्राप्यविशिष्टमित्यर्थः । मार्तण्डमण्डलापेक्षया पृथिव्यभिमुखा दिक् तदपेक्षयैवाध इति शङ्कते-। [i]"यदि"ति । [j]"यदपेक्षये"ति । अवधित्वमात्रे वाऽपेक्षा अभिमुख्ये वा अपेक्षेति विकल्पार्थः ।

मू० आद्ये पृथिव्यूर्ध्वस्थितं यदर्थमवधीकृत्य योर्ध्वा दिगिति भवद्भिर्व्यवह्रियते सापि पृथिव्यभिमुखी भवतीति साप्यधः स्यात् अत एव न द्वितीयोपि * * यस्यां दिशि क्रियया पृथिवी सन्निहिता भवति सा दिगध ? *-इति चेन्न, कूपादौ मध्यगतस्य तिर्यग्दोलायमानस्य क्रिया पतनं स्यात् तद्गत्याक्रान्ता च तिर्यगधः स्यात् * पृथिवीमवधीकृत्ययं चान्यं पदार्थमवधीकृत्य यो मध्य इति देशो व्यवह्रियते स पृथिवीव्यतिरिक्ततदवध्यपेक्षयाध ?*-इति चेन्न,

टी० ॥ [a]"आद्य" इति । पृथिव्या उपरि गिरिस्तमवधीकृत्योर्ध्वस्य मार्तण्डमण्डलस्याप्यधः शब्दार्थत्वं स्यादित्यर्थ आभिमुख्यस्य साधारण्यादवधेस्तत्रापि सत्त्वादित्यर्थः ॥ [b]"अत एवे"ति । आभिमुख्यस्योर्द्ध्वाधः साधारणत्वादिति भावः ॥ [c]"यस्यां दिशी"ति । यया क्रियया पृथिवी सन्निहिता भवति सा क्रिया पतनमिति तात्पर्यार्थः(१)यस्यां दिशीत्यध इति च कथं चिदुपलक्षणतयोक्तम् अत एव पतनलक्षणातिव्याप्तिरित्याह—। [d]"कूपादावि"ति । कूपे घूर्णमानस्य विहङ्गमादेः क्रिया पतनं स्यादित्यर्थः ॥ [e]"तद्गत्ये"ति । सा चासौ गतिश्चेति तद्गतिः तस्य दोलायमानविहङ्गमादेर्गतिर्वा तद्गतिरित्यर्थः पत-

(१) वादिगधः पदार्थ इति यच्छब्दार्थं प्रविष्टत्वादुपेक्ष्य तात्पर्यार्थ एवोपवर्णितः ।

तल्लक्षणया क्रियया यत्र संयोगो जन्यते तस्यैवाधःशब्दार्थत्वा-
दिति भावः ॥ पृथिवीमार्तण्डमण्डलान्तरालदेशो मार्तण्डापेक्ष-
याध इत्याह— [f]"पृथिवीमि"ति ॥

मू० पृथिव्यामेव तद्व्यवहारापत्तेः पृथिवीं पदार्थान्तरं
चापेक्ष्य मध्यत्वस्य विवक्षितस्याधः शब्दार्थप्रदर्शन-
मन्तरेण निर्वक्तुमशक्यत्वात् । पृथिव्यपेक्षयोर्ध्वम-
परापेक्षया चाधः तत्र तयोर्मध्यमित्येव निरुच्यते
मध्यत्वम् अन्यथा तिर्यगतिप्रसङ्गात् । तद्यथा पृथि-
व्यपेक्षया पूर्वमपरापेक्षया च पश्चिमं तयोर्मध्यमु-
च्यते प्रतीपदिगवस्थितयोः परस्परापेक्षया प्रतीप-
दिक्सङ्करेमकव्यवहारात् * अथान्यः कश्चिदाधारा-
र्थोऽस्तु प्रतीतिसिद्धत्वात् प्रतीतेश्चैवमनन्योपपाद्य-
त्वात् ? *—मैवम् ॥

टी० ॥ [a]"पृथिव्यामि"ति । पृथिव्याः पृथिवीमार्तण्डा-
पेक्षयान्तरालत्वाभावान्मार्तण्डापेक्षया पृथिव्यधो न स्यादित्यर्थः ।
पृथिव्यपेक्षया नागलोको नाधः स्यात्पृथिव्यतिरिक्तत्वेनावधे-
र्विशेषितत्वादिति वार्थः [b]"पृथिवीमि"ति । पृथिव्या ऊर्ध्वं
मार्तण्डस्याधो मध्यमिति मध्यत्वज्ञानमधो ज्ञानाधीनमधो-
ज्ञानं च मध्यत्वज्ञानाधीनमित्यन्योन्याश्रय इत्यर्थः ॥ एतदे-
वाह— [c]"पृथिवी"ति । अन्यथा तिर्यग्देशोऽपि मध्यः स्यात्
यद्यधस्तन्निरूपकं प्रकृते न स्यादित्याह— [d]"अन्यथे"ति । तदेव
व्युत्पादयति । [e]"तद्यथे"ति ॥ [f]"परस्परे"ति । विरुद्धयोर्दिशो-
रन्तराले मध्यव्यवहारादित्यर्थः [g]"प्रतीपदिगवस्थितयोरि"ति ।
स्फुटार्थं निरूपकमात्राभिधानं अधःपदार्थनिरुक्त्या व्यवहि-
ताधःस्थितत्वमाधारत्वं मास्तु यदतिरिक्तमेव किञ्चित्स्यादि-
त्याह— [h]"अथे"ति । इहेतिप्रतीत्यन्यथानुपपत्त्या कल्पनीय-
मिति भावः ॥

मू० [a]तद्रूप्यनित्यं वा स्यान्नित्यं वा नाद्यः [b]तदभावे आधारप्रतीत्यभावप्रसङ्गात् [c]गोत्वादिनित्यत्वन्याय-साम्येप्यस्यानित्यत्वे तेषामप्यनित्यत्वापाताच्च नापि द्वितीयः तादृशमप्यनुगतमननुगतं वा स्यात् द्वितीये त्वनुगताधारप्रतीत्यसम्भवः [d]सङ्केतग्रहाशक्यत्वं च । प्रथमे [e]सामान्यवदाश्रयापरित्यागि वा स्यात्तत्त्यागि वा आद्ये यदेव तदाधारतया प्रतीतं तत्तदाधेयं न स्यात् द्वितीये च यदि नियामकमन्तरेण तत्स्वाश्रयं भजति च त्यजति च तदनियमानुपपत्त्या [f]सर्वदा तद्भजनत्यजनोचितप्रत्ययव्यवहारप्रसङ्गः ॥

टी० ॥ [a]"तद्वीति । यत्कल्पनीयमाधारत्वमित्यर्थः ॥ [b]"तदभावे" इति । तदभावकाले इत्यर्थः ॥ [c]"गोत्वादी"ति । एकगोव्यक्तिनाशेपि व्यक्त्यन्तरनिष्ठतया प्रतीयमानत्व प्राक्पश्चाच्च प्रतीयमानत्वं गोत्वस्य नित्यत्वमन्तरेणानुपपद्यमानमित्यय न्यायोऽस्त्याधारत्वेपि तुल्यः स चेदाधारत्व नित्यं न साधयेद्गोत्वमपि नित्यं न साधयेदित्यर्थः यद्वा आधारत्वस्यानित्यत्वे गोत्वमपि नित्यं न स्यादाधारमन्तरेण तस्यानिरूपणादित्यर्थः ॥ [d]"सङ्केते"ति । व्यक्तीनां आनन्त्यव्यभिचाराभ्यामाधारपदशक्तिग्रहो न स्यादित्यर्थः ॥ [e]"यदेव तदि"ति । आधाराधेयभावापन्नयोः पीठपिठरयोर्नियमेनाधाराधेयभावौ न प्रतीयेते पीठस्याधेयतादशायामप्याधारत्वपरित्यागप्रसङ्गादित्यर्थः यत्तु व्याख्यानं दण्डाधारः पुरुषो दोलाद्याश्रये न स्यादिति तदसादेयं दण्डाधारदशायामपि दोलाधेयत्वसम्भवात् ॥ [f]"सर्वदे"ति । आधारत्वस्य स्वाश्रयपरित्यागेनाधारत्वप्रतीतिर्भञ्जने चाधारत्वप्रतीतिरित्येक वस्तु सर्वदा विरुद्धप्रतीतिद्वयालिङ्गितं स्यादित्यर्थः ।

मू० * अथ तस्याश्रयभजनत्यजनयोर्नियामकमस्ति तर्हि [a]"स वक्तव्यः सोऽपि कल्पयिष्यते ऽन्यथाधारप्रतीत्यनुपपत्तेः ? *—इति चेन्न, [b]तत्परिकल्पने यदेव भजने नियामकं स एवाधारो[c]ऽस्तु कृतं पूर्वपरिकल्पितेनेति * अस्त्वेवमेव ? *—इति चेन्न, [d]तस्यापि स्वाश्रयभजनत्यजननियामकस्यावश्यं वाच्यत्वे तस्यापि चैवं वैयर्थ्यमित्यधिकापरिकल्पने नियमानुपपत्तिरधिकपरिकल्पने च पूर्ववैयर्थ्यप्रसङ्ग इति [e]दुरुत्तरं व्यसनमापद्येत ॥

टी० ॥ [a]"स वक्तव्य" इति । तादृशं न किञ्चिदस्तीति भावः ॥ [b]"तत्परिकल्पने" इति । आधारत्वविशिष्टप्रतीतेरन्यदेव यर्हि प्रयोजकमिति किमाधारत्वेनेत्यर्थः ॥ [c]"अस्तु" इति । भजननियामकमेवाधारत्वमस्त्विति विवक्षितमित्यर्थः । भजननियामकमाधारत्वाभिव्यञ्जकं धर्मान्तरं तदेवाभिव्यक्तिविरोधि धर्मान्तरं त्यजननियामकमित्यर्थः त्यजननियामकं च भिन्नशक्तिमिति व्याख्यानमनादेयम् । नित्यत्वपक्षस्याऽदूषितत्वात् ॥ [d]"तस्यापि" इति । भजननियामकस्यापीत्यर्थः । तत्रापि स्वयं वाऽन्याश्रितेति विकल्पसम्भवादिति भावः ॥ [e]"दुरुत्तरम्" इति । एवं प्रति यन्नियामकं तेनैव तद्वैयर्थ्ये क्वापि विश्रामो न स्यात् । उपजीव्योपजीवकभावोऽपि न नियामकः । आधारत्वस्यानुत्पादादेवोत्पत्तौ नोपजीव्यत्वं ममाप्युपजीव्यत्वेनान्यथासिद्धेः सम्भवादिति भावः ॥

मू० * [a]परस्परस्य परस्परेण नियामकत्वम् ? *—इति चेत् [b]अन्योन्याश्रयिणौ तौ द्वावपि परस्परापेक्षकभावव्यवस्थया शून्यीकुरुतः ततो द्वाभ्यामस्तवोत्तरम् [c]*आत्मवादयोऽपि तर्ह्येवमनुपपन्ना ?*—इति चे[d]न्न, नैवं वक्तव्यम् । यदि कोऽपि परः शृणोति तदा महद-

निष्टमस्माकं प्रकाशीकृतं स्यात्। किन्तु [e]तदाधारत्वं तदाधारमनाधारं वा?। अन्त्ये क्व(१) विशिष्टप्रत्ययं कुर्याद्विशेषाभावात्। आद्ये तदाधारत्वं वाच्यम्। स्वरूपमेव तस्य तादृशं येन स्वयं सत्ता स्वात्मनि सत्ताप्रत्ययकारिणी सत्तान्तरमन्तरेण यथा यथेद-मपि विनैवाधारत्वान्तरं स्वाधारप्रत्ययकारि ?*-इति चेन्न, [f]भ्रान्तित्वप्रसङ्गात्। यथा विना रजतत्वं तत्प्रत्ययो भ्रान्तिस्तथैव स्यात्। उपपाद्यश्चायमर्थो भेदखण्डनप्रस्तावे इत्युपरम्यते * [g]विनाप्याधारा-धेयभावं स्वभावसंबन्धेन नियामकत्वं भविष्यति। यथा विषयविषयिभावेनार्थज्ञानयोः ? *-इति चेन्न,

टी० ॥ अनवस्थापरिहारायाह। [a]"परस्परे"ति। एव सत्यन्योन्याश्रयो दोषः क्वापि न स्यादित्याह- [b]"अन्योन्ये" इति। आधारत्वखण्डनं जात्युपप्लावकमित्याह-। [c]"जात्याद-य" इति। इष्टापत्तिमाह। [d]"नाश्चर्य"मिति। सर्वपदार्थखण्डनप्र-वृत्तस्य जातिखण्डनमिष्टमेवेति भावः ॥ [e]"तदाधारत्वमि"ति-आधारत्वविशिष्टं वर्तमानमाधारत्वं साधारं भवेत्तथा च तदा-धारत्वं वाच्यमित्यर्थः ॥ दृष्टान्तदार्ष्टान्तिकयोर्दोषमाह-। [f]"भ्रा-न्तित्वे"ति। विषयविषयिभावखण्डनं प्रस्तौति-। [g]"विने"ति।

सू० स्वभावसम्बन्धस्य निरस्तत्वात् यमुदाहरसि च विष-यविषयिभावं सोऽपि निर्वक्तुं न शक्यते। तथाहि-कः पुनर्ज्ञानादेर्घटादिना विषयविषयिभावः * प्रका-शस्य सतस्तदीयताभावरूपः स्वभावविशेष ? *-इति चेन्न, [a]इच्छादिविषयाव्यापनात् * [b]विषयिण ?* इति चेन्न, [c]तत्त्वस्यैव निरूप्यमाणत्वात्। किंच [d]स्वभावः

(१) क्वेत्यस्य स्थाने कथमित्यपि क्वचित्पुस्तके पाठः।

स्वधर्मो वा स्वात्मा वा तस्य विवक्षितः ᵉआद्ये ज्ञानत्वादिकं वा साधारणमसौ तत्तद्घटज्ञानादिनियतो वा कश्चित् आद्ये ᶠसाधारण्यान्न विशेषतत्तदीयतामात्ररूपत्वसम्भवः द्वितीये तु ᵍप्रतिविषयं व्यावृत्तज्ञानधर्मस्वीकारे वचनभङ्गिभेदेन साकारतास्वीकारः ॥

टी० ॥ प्रकाशस्य सत स्वत्वभावसमवाययोराविर्भावाय ᵃ"इच्छे"ति । अस्याः प्रकाशत्वाभावादित्यर्थः ॥ ᵇ"विषयिण" इति । प्रकाशस्येति स्थाने "विषयिण" इति कर्तोऽपमित्यर्थः ॥ ᶜ"तत्त्वस्ये"ति । विषयित्वेनैव विषयित्वनिरूपणे आत्माश्रय इत्यर्थः ॥ स्वस्य भावो स्व वा स्वभाव इति समासद्वयाश्रयणेन विकल्पयति-। ᵈ"स्वभाव"इति ॥ ᵉ"आद्ये"इति । ज्ञानत्वं वा तत्तद्घटादिज्ञानत्वं वा धर्म इति विकल्पार्थः ॥ ᶠ"साधारण्यादि"ति । ज्ञानत्वमेव यदि विषयित्वं तदा तस्य साधारण्याद्घटविषयकमपि ज्ञानं पटविषयकं स्यादित्यर्थः ॥ ᵍ"प्रतिविषयमि"ति । घटज्ञानत्वं चेद्विषयित्वं तदा घटस्यापि ज्ञानाकारप्रविष्टतया योगाचारमतप्रवेश इत्यर्थः ॥

सू० किञ्च ᵃ* नासौ धर्म उपधेयान्तराधीनः ?*-विषयीभूतघटाद्यतिरिक्तोपाधिप्रतीत्यपेक्षाप्रसङ्गात् * ᵇनच घटादिरेव तथा * असंबन्धात् ᶜतथापि तथात्वे चातिप्रसङ्गात् ᵈनापि जातिरूपः, क्वचिद् घटमात्रपटमात्रज्ञानगततया पृथग्व्यवस्थितौ सत्यां घटपटविषयैकज्ञाने सह व्यवस्थित्या जातिसङ्करप्रसङ्गात् । ᵉप्रतिविषयं ज्ञानभेदनियमे विशिष्टज्ञानानुपपत्तेः ॥

टी० ॥ किञ्च घटज्ञानत्व स्वस्य(¹)धर्मस्तदीयत्वं यत्तदुपाधिरूपं जातिरूपं वा उपाधित्वेऽप्युपाधेयमन्यद्वा घटादिकमेव

---

(१) स्वस्य=ज्ञानस्य ।

वा?। आद्यं दूषयति। [a]"नास्या वि"ति। यथा पुरुषे दण्डित्वज्ञानं दण्डरूपोपाधेयपरतन्त्रं तथा प्रकृतेऽपि घटज्ञानमुपाधेयाकारपरतन्त्रज्ञानं स्यादित्यर्थः। द्वितीयमाशङ्क्याऽऽह-। [b]"नचे"ति। घटज्ञानत्वलक्षणोपाधौ घट एव हेतुरुपाधेयस्तदा यथा दण्डस्वरूपेणोपाधेयेन पुरुषस्य संयोगः संबन्धस्तथा ज्ञानस्य नास्तीत्यर्थः। विषयविषयिभावस्य चाद्याप्यनिरूपणादिति भावः॥ [c]"तथापी"ति। उपाधेयोपधिमतोः संबन्धं विनाऽप्युपाधेरवच्छेदकत्वेऽदण्डिनमपि दण्डित्वमवच्छिन्द्यादित्यर्थः। तृतीयमाशङ्क्य(1) निराकरोति। [d]"नापी"ति। घटज्ञानत्वपटज्ञानत्वे जाती तदुभयसमूहालम्बने सङ्कीर्णे स्यातामित्यर्थः॥ ननु जातिसङ्करभयेन नानाविषयकं ज्ञानमेव नाभ्युपेयमित्यत आह-। [e]"प्रतिविषयमि"ति। तर्हि विशेषणविशेष्योभयविषयकं विशिष्टज्ञानमपि न स्यादित्यर्थः।

मू० [a]"एवंभूतविचित्रजात्यभ्युगमे प्रत्येकोचितव्यवहारस्याप्यभावप्रसङ्गात् * [b]अथ जातिसङ्करोऽपीष्यते(2)? तथापि स एव विशेषो घटज्ञानत्वादिरस्त्विति विषयासिद्धिः [c]* अथ विषयेणापि संबन्धप्रतिभासान्न सोऽपीष्यते *-न, [d]तस्यैव संबन्धस्य विचार्यमाणत्वात् * [e]स एवासौ? *-इति चेन्न, [f]तदैक्याज्ज्ञानार्थसाधारणविषयप्रतीत्यापत्तेः * संयोगप्रतीतिवत्। [g]विषयित्वं तत्र(3)अर्थे तु विषयत्वमन्यत्? *-इति चेन्न॥

(1) उपाधिरूपं जातिरूपं वा उपाधिस्त्वेऽप्युपाधेयमभ्युपगम्य घटादिकमेव वा-इत्यथवाऽभ्युपगम्य घटादिकमेव चेति पक्षद्वयं निराकृत्य जातिरूपं चेति तृतीयं पक्षं निराचष्टे इत्यर्थः।

(2) निर्दुष्टत्वादिति शेषः।

(3) तत्र-ज्ञाने।

टी० ॥ ननु नीलत्वादिभिन्ना यथा चित्रत्वं पृथगेव जातिस्तथा नानाविषयज्ञाने चित्रत्वमेव घटज्ञानत्व भिन्ना जातिः स्यादित्यत आह—। [a]"एवंभूते"ति । अन्ततो निर्विकल्पकस्यापि नानाविषयत्वेन चित्रत्वापत्तौ घटज्ञानत्वादिव्यवहारः क्वापि न स्यादित्यर्थः ॥ ननु गुणगतजातौ जातिसङ्करो न दोष इत्याह । [b]"अथे"ति । तर्हि घटज्ञानत्वपटज्ञानत्वादिजातीनामेव ज्ञानव्यावर्तकत्वे विषयासिद्धिरेवेत्यर्थः ॥ ननु विषयासत्वे घटस्य ज्ञानमित्येव कथं स्यादित्याह—। [c]"अथे"ति । षष्ठ्यर्थ एव विचार्यत इत्याह—। [d]"तस्यैवे"ति । ननु विषयविषयिभाव एव षष्ठ्यर्थस्तत्र किं विचारणीयमित्याह—। [e]"स एवे"ति । तर्हि संयोगवदेक एवासौ व्यासज्यवृत्तिसंबन्ध इत्युभयं विषयिविषयश्च स्यादित्याह—। [f]"तदैक्यादि"ति । ननु ज्ञानमात्रनिष्ठ एवायं सम्बन्धो विषयित्वाख्यस्तदन्यदेव च वैषयगतं विषयत्वं तत्र चोभयत्रोभयं निरूपकमात्रं न त्वधिकरणमपीत्याह—। [g]"विषयत्वमि"ति ।

मू० [a]सैव हि ज्ञातता स्यात् सा च निराकरिष्यते [b]द्वितीये च स्वात्मा घटपटव्यक्तीनामिव घटपटज्ञानव्यक्तीनां व्यावृत्त इति तत्तद्विषयभानगोचरानुगताकारबुद्धिव्यवहारभङ्गप्रसङ्गः । किञ्च तदीयता ज्ञानस्य स्वभाव इति वचनं विचारमर्हति तदिति तत्तद्विषयपरामर्शः संबन्धिता च छप्रत्ययार्थः तदेतदन्योन्यविशिष्टमुभयं ज्ञानस्य स्वभाव इति ब्रुवाणेन विषया विज्ञानस्य स्वभाव इत्युक्तं भवतीति साधु विज्ञानवादनिराकरणप्रकरणोपसंहरणमकारि*। संबन्धमात्रं ज्ञानस्य स्वभावो न तु विषय इत्याशय? *—इति चेन्न, [d]विशेषानुपादाने संबन्धमात्रमिदं सर्वस्यैव स्यात् [e]ततो न तावन्न कस्यचित् संबन्धस्वरूपतात्यागप्रसङ्गात् नापि नियतस्य ॥

टी० ॥ a"नैव ही"ति । अनुगतं यद्विषयत्वं तामेव महो ज्ञाततामाह सा च निरसनीयैवेत्यर्थः ॥ b"द्वितीये"इति । एवं च तद्भावश्चेति कर्मधारयपक्षे इत्यर्थः ॥ घटज्ञानाकारपटज्ञानाकारानुगतप्रत्ययाभावप्रसङ्ग इत्यर्थः । तदीयत्वं घटीयत्वं ज्ञानस्य स्वभावः स्वरूपमित्युक्ते घटोऽपि ज्ञानस्वभावान्तर्गत एवेति विज्ञानवादिनो योगाचारस्य निराकरणमात्मतत्त्वविवेके यदुपसहृतं "प्रकाशस्य सतस्तदीयत्वमेव विषयित्वमि"ति तद्विज्ञानवादपर्यवसन्नमेवेत्यर्थः । ननु घटीयत्वं ज्ञानस्येत्यनयोक्त्या घटसंबद्धत्वं ज्ञानस्यायाति न तु घटस्वरूपमपीति न विज्ञानवादप्रवेश इति शङ्कते—। c"संबन्धे"ति । सम्बन्धोऽपि संबन्धिनं विषयमादायैव ज्ञानस्य स्वभावो भवेदित्याह—। d"विशेषे"ति । ननु संबन्धः कथं संबन्धिनियत इत्यत आह—। e"यत"इति । कस्यापि चेन्न स्यात् तदा सम्बन्ध एव न स्यादित्यर्थः ॥

सू० "तादात्म्यापरेरुक्तत्वात् fनियामकासम्भवाच्च* eकारणं नियामकम् ? *-इति चेन्न, तेन नियामकेन किं भवति dतदीयत्वं तस्य संबन्धस्येति चेत्तदेव तदीयत्वं ज्ञानस्वभावभूतसंबन्धस्वरूपप्रविष्टं उत बहिर्भूतं धर्मान्तरम्?। यदि प्रथमः तच्छब्दार्थोऽपि तर्हि स्वरूपप्रविष्ट इति fविषयज्ञानयोः स एवाभेदप्रसङ्गः द्वितीये च तस्य धर्मान्तरस्य विषयेणाभेदः gतच्छब्दार्थस्य विषयस्य विशेषणस्य तदीयशब्दार्थविशिष्टरूपे प्रविष्टस्य स्वकृतधर्मान्तरस्वभावतया निरुक्तत्वात् hअस्त्वसौ धर्मो विषयाभिन्न एवेति चेत् ॥

टी० ॥ ननु भवतु नियतस्यैव कस्यचिदित्यत आह—a"तादात्म्ये"ति । दोषान्तरमाह—। b"नियामके"ति । घटीयमेव घटज्ञानमित्यत्र नियामकाभाव इत्यर्थः ॥ ननु घटीयत्वे

घटेन्द्रियसन्निकर्षजन्यत्वमेव नियामकमित्याह—। "कारणमि"ति ॥ [d]"तदीयत्वमि"ति । घटज्ञानं घटीयं क्रियते इत्यर्थः ॥ [e]"तद्दि-वे"ति । ज्ञानस्वभावभूतो यः संबन्धस्तत्स्वरूपप्रविष्ट इत्यर्थः ॥ तदीयत्वस्य ज्ञानस्वरूपप्रविष्टत्वे दोषमाह—। [f]"विषयज्ञानयो-रि"ति । धर्मान्तरं चेत्तदीयत्वं तदा तच्छाऽऽदार्थो विषयो धर्मा-न्तरस्वरूपं भवेदित्याह—। [g]"तच्छऽऽदार्थस्ये"ति ॥ [h]"अस्त्व-स्तावि"ति । तदीयत्वं धर्मो विषयाभिन्नोऽस्तु तावतापि विषयो ज्ञानं चेत्येनावदेवायात तन्नास्मदभिमतमेवेत्यर्थः ।

मू० [a] तथापि किमसौ स्वीकृतेन स्वभावसंबन्धेन संबद्धो न वा?। न चेत् तद्विज्ञानं न कस्यचित्संबन्धि स्यात्। संब-द्धश्चेत्तत्किं संबन्धान्तरेणाहोस्वित् स्वभावसंबन्धेनै-वासौ ज्ञानात्मकसंबन्धसंबन्धीय:?। आद्ये तत्राप्येवं प्रसङ्गो यस्य भयेन स्वभावसंबधः स्वीकृतःसा तदवस्थै-वानवस्था। द्वितीयश्चेज्ज्ञानात्मकसंबन्धीय इत्यत्र विशिष्टस्वरूपे ज्ञानमपि विशेषणं प्रविष्टमिति [b]पूर्वो-क्तन्यायेना [c]धुनोक्तन्यायेन च ज्ञानस्यैकस्यैव [d]द्वय-मपि स्वात्मेति वाग्भङ्गिभेदमात्रेण [e]ज्ञानगोचरयो-रभेदस्वीकार इति । [f]एतेनान्यत्रापि स्वभावसंबन्धः प्रत्याख्यातव्यः । ज्ञानफलाधारत्वं विषयत्वम् ।

टी० ॥ [a] "तथापी"ति । तदीयत्वं यद्धर्मान्तरं तद्विषय-पर्यवसन्नं स्वभावसंबन्धश्च ज्ञानमेव(१) तच्चोभयं संबद्धं न वा?। आद्ये तत्रापि संबन्धान्तरापेक्षायामनवस्था अन्त्ये ज्ञानं वा कस्यापि तदिति घटव्यवहारादिकं न प्रवर्त्तयेत् प्रवर्त्तयद्वा न सर्वत्रैव प्रवर्त्तयेदित्यर्थः ॥ [b] "पूर्वोक्ते"ति । ज्ञानस्य घटीयत्व-स्वभावत्वे ज्ञानघटयोरभेदापादकेनेत्यर्थः । [c] "अधुने"ति । तदीयत्वं धर्मान्तरं तच्च विचार्यमाणं विषयस्वरूपं तेन च पुनर्ज्ञानस्य स्वभाव एव सबन्ध इत्यादिनेत्यर्थः ॥ [d] द्वय-

(१) स्वो भावः स्वभाव इति पूर्वोक्तरीत्या ।

न्”इति । घटो घटीयत्वं चेत्यर्थः ॥ [e] “ज्ञानगोचरयोरि”ति । ज्ञानविषययोरित्यर्थः ॥ [f] “एतेने”ति । घटरूपसमवायोऽपि घटीयः स्वभावसंबन्धेन चेत्तदा घटोऽपि समवायप्रविष्ट एव भिन्नेन संबन्धेन चेत्तदा तत्र तत्रापि संबन्धापेक्षायामनवस्थे-त्यादिनेत्यर्थः ॥

मू० [a] तद्रूपत्वं च विषयित्वमित्यपि दुष्टम् । तथाहि-। ज्ञानीयं फलं ज्ञातता वा व्यवहारो वा स्यात् आद्ये [b]ऽतीतानागतधीभ्रमाद्यर्थाव्याप्तिः [c]न च तत्रैव फलजनने किं नियामकमिति प्रयोजकमनुगतं शक्यनिर्वचनं तथात्वे वा [d]तदेव विषयत्वमस्तु व्यवहारश्च यदि [e]कराकर्षणादिः स [f]न सार्वत्रिकः [g]नान्तरीयकश्चान्यथापीत्यतिव्यापकं [h]यदीच्छादिस्तदाधारत्वमात्मन इति घटाद्यव्याप्तिः [i] तद्विषयत्वं च तद्विषयत्वमेवापेक्षते ।

टी० ॥ [a]“तद्रूपत्वमि”ति । ज्ञानीयफलजनकत्वमित्यर्थः ॥ [b]“अतीते”ति । अतीतानागतयोरसतोर्भ्रमविषये चासति ज्ञानेन ज्ञातताधानासंभवात्तेषां विषयत्वं न स्यादित्यर्थः ॥ [c]“न चे”ति । घटज्ञानेन घटे ज्ञातता जन्यते न तु पटेऽपीत्यत्र नियामकं नास्तीत्यर्थः ॥ [d]“तदेवे”ति । नियतज्ञातताधाने यदेव नियामकमित्यर्थः ॥ [e]“कराकर्षणादिरि”ति । नयनानयनादिरित्यर्थः । [f]“न सार्वत्रिक”इति । गुणादौ तादृशो व्यवहारो नास्ति दृष्टेऽपि न सर्वत्रेत्यर्थः ॥ [g]“नान्तरीयक”इति । नयनानयनव्यवहारस्तत्प्रमायां सत्यपि न च मणिमात्रगोचरस्य ज्ञानस्य प्रमाऽपि विषय इत्यर्थः । [h]“यदी”ति । इच्छारूपज्ञानफलाधारत्वमात्मन एवेति सर्वज्ञानानामात्मैव विषयो नैव घटादिरित्यर्थः । ज्ञानजन्येच्छाविषयत्वमेव तज्जन्यव्यवहारविषयत्वं चेत्तदाऽस्वाश्रय इत्याह । [i]“तद्विषयत्वमि”ति । इच्छाविषयत्वेऽपि ज्ञानविषयत्वस्यैव तन्त्रत्वादिति भावः ॥

सू० [a]यश्चोपेक्षां नाम व्यवहारं नानुमनुते तन्मते कथं नोपेक्षाप्रेक्षामुपेक्षते [b]हानादिव्यवहारज्ञानानामेव च कथं न निर्विषयत्वं प्रसज्यते* अथ सर्वत्र हानादिव्यवहारोपगमः* [c]तदा व्यवहारज्ञानयोरनुपरम एव स्यात् । एतेन तत्संबद्धव्यवहारानुकूलस्वभावं यद्विज्ञानं तत्तस्य विषयस्तद्वत्त्वं विषयित्वमिति तदपि प्रागुक्तयुक्तिं नातिवर्त्तते * [d]अथोच्यते य एवार्थो तस्यां संविदि भासते तद्वेद्यः [e]स पृथक्कृतिवेद्यावेद्यस्य लक्षणम्*इत्येतदपि न विद्मः, यस्यां संविदीति किं सविदधिकरणम्, अथ विषयः, अथ संबन्धिमात्रम्? । नाद्यः ।

टी० ॥ [a]"यश्चे"ति । उपेक्षा उदास्यमात्रं प्रवृत्तिनिवृत्तिविलक्षणः प्रयत्नो वा तत्र य उदास्यमात्रमुपेक्षां मन्यते स वादी उपेक्षाप्रेक्षामुपेक्षाज्ञान([1])मुपेक्षते सविषयकत्वं तस्य कथं तन्मते भविष्यति ज्ञानेन तत्र व्यवहाराजननादित्यर्थः । दोषान्तरमाह । [b]"हानादी"ति । हानोपादानज्ञानेनापि हानोपादानादिगतव्यवहाराजननादित्यर्थः । तत्रापि व्यवहारान्तरजननेऽनवस्थाऽनुपपत्तिश्चेत्याह—। [c]"तदे"ति । प्रतिबद्धो नियतः । अथ व्यवहारस्यैव परावर्तिकं चेत्तदा शङ्का न स्यादिति तद्विहायैव परमतमाशङ्कते—। [d]"अथे"ति ॥ [e]"स पृथक्कृते"ति । ज्ञानाद्भिन्नो न वेद्यस्तथा च स्वाभिन्नं वेद्यं स्वभिन्नमवेद्यमित्यर्थः । यद्वा स वेद्यवेदकभावो न पृथगित्यर्थः । संविदीत्यधिकरणसप्तमी वा संबन्धमात्रविवक्षयैव वा सप्तमीति विकल्पार्थः ।

सू० [a]घटादेस्तदधिकरणत्वानुपगमेनाव्यापनात् । [b]यथा निर्वचनीयज्ञानत्वाद्यतिव्याप्तेश्च । [c]द्वितीयश्चाद्या-

(१) उपेक्षाज्ञानम्—उपेक्षाबुद्ध्या ज्ञायमानं घटपटादिविषयकं ज्ञानमित्यर्थः ।

र्यानिरूपितः कथं निरूपकः स्यात् [d]वैपरीत्यापाताच्च। तृतीयश्चातिव्यापकः कारणादेरपि तत्संबन्धित्वात् ज्ञानान्तरेण च भासमानत्वात्*तयैव संविदा भासमानत्वम् ? *—इति चेन्न, भासमानत्वस्यैव निरूप्यमाणत्वात्। [e]* यस्यां संविदि प्रकाशमानायां यः प्रकाशत एव ? *—इति चे [f]न्न, प्रकाशमानताया एव निरूप्यमाणत्वात् [g]सामान्यतो विषयत्वे सिद्धे विशेषतो विषयत्वाभिधानमिदम् ? *—इति चेन्न, [h]सर्वथा विशेषानुपपत्तिद्वारा सामान्यानुपपत्तौ यद्विषयप्रमात्वस्यापि सन्दिग्धत्वात् ॥

टी० ॥ [a]"घटादेरि"ति। घटादिर्विषयो न स्यादित्यर्थः ॥ [b]"यथे"ति । यद्यपि ज्ञानत्वमप्यनिर्वचनीयमेव तथापि ज्ञानत्वमेव सर्वसंविद्विषयः स्यात्। तदधिकरणत्वादित्यर्थः ॥ [c]"द्वितीय"इति। विषयविषयिभाव इत्यर्थः। [d]"वैपरीत्ये"ति। विषयविषयिभावस्याव्यवस्थिततया संविदेव विषयो घट एव विषयी स्यादित्यर्थः ॥ [e]"यस्यामि"ति । यन्निरूपणाधीननिरूपणं ज्ञानं स विषय इत्यर्थः। एतदपि विषयविषयिभावनिरूपणाधीननिरूपणाधीननिरूपणमेवेत्यात्माश्रय एवेत्याह—। [f]"ने"ति। ननु विषयत्वमात्रे न केषांचिद्विमतिः घटविषयत्वादिकं च तद्भिन्नमेव वेत्स्यति नहि निर्विशेषं सामान्यं नामेति॥ [g]"सामान्यत"इति। यावद्विशेषबाधे सामान्यमपि बाधितमेव तथा च नहि निर्विशेषं सामान्यं नामेति विपरीतमेवेत्याह—। [h]"सर्वथे"ति । सामान्यतोऽपि यद्विषयत्वं तद्ग्राहिणो ज्ञानस्य प्रमात्वं सन्दिग्धमित्यर्थः ॥

मू० [a]* ज्ञानाकारार्पणक्षमो हेतुरेव विषय ? *—इति चेन्न, [b]आकार एव केनार्पित इति विनिगन्तुमशक्यत्वात् [c]नह्याकारस्ततो विज्ञानरूपादन्यः तथाच तथोत्पन्नानि कारणानि प्रत्येकमेव समर्थानीति कथं

तेषु विशेषं विनिगमयिष्यति । यद्यपि सकलकार्यहेत्वनुविधानमस्ति तथापि स्फुटं तावद् घटस्यानुविधानमिति * तदेव तदाकारप्रयोजकमिष्यते ?* इति चेन्न, समस्तकारणतदनुविधानवद् घटानुविधानस्य प्रामाणिकत्वाविशेषेण किं स्फुटत्वास्फुटत्वाभ्यां स्यात् * [d]स्फुटानुविधानमादायैव विषयनिरुक्तिं कुर्मः?*-इति चेन्न, [e]सर्वहेत्वनुविधानस्य न्यायतः स्फुटत्वात् * दृश्यमानमनुविधानं यस्य ?*-इति चेन्न, [f]दत्तोत्तरत्वात् * दृश्यमानतैव च विषयत्वानिर्वचनान्न शक्योपदर्शनेति ज्ञानकर्मत्वम् * इत्यपि न ॥

टी० ॥ साकारवादिमते विषयत्वलक्षणं शङ्कते—। [a]"ज्ञानाकारे"ति । चक्षुरादिव्यावर्तनाय ज्ञानाकारेत्यादिविशेषणं बहूनां ज्ञानहेतूनां मध्ये कस्याकारार्पकत्वमिति संदिग्धमित्याह—। [b]"ते"ति । एतदेव स्फुटयति—। [c]"यद्यपी"ति । यद्यप्याकारस्य ज्ञानभेदेऽपि विनिगमनाऽशक्यैव तथाऽपि तत्सिद्धान्तानुसारादिदमुक्तं [d]"स्फुटानुविधानमि"ति । घटसाक्षात्कारे घटान्वयव्यतिरेकानुविधानं स्फुटमित्यर्थः ॥ [e]"सर्वे"ति । युक्तिसिद्धत्वं स्फुटत्वं सर्वहेतुसाधारणमेवेत्यर्थः ॥ [f]"दत्तोत्तरत्वादि"ति । दृश्यश्चेज्ज्ञानवचनस्तदा सर्वहेतुसाधारण्यमेवेत्यर्थः । चाक्षुषज्ञानपरश्चेत् तदा गन्धरसादीनां विषयत्वं न स्यादित्यर्थः । यद्वा दत्तोत्तरत्वमेवाह—। [g]"दृश्यमानतैव चे"ति । आत्माश्रय इत्यर्थः ॥

मू० [a]ज्ञानेन कर्मणः संबन्धस्य निर्वक्तव्यत्वात् [b]तन्निरुक्तिभङ्गश्चेश्वराभिसन्धौ ज्ञाततावादे द्रष्टव्यः। विना सम्बन्धान्तरं यद्विशेषणं ज्ञानं स विषयस्तेन विना सम्बन्धान्तरं ज्ञानविशेष्यं विषयः [c]विशेष्यं चेदं यद्विशिष्टनामकं तत्त्वान्तरं 'यद्रूपं धर्मं गृह्णातीति । अत्रोच्यते । यद्रूपं धर्मं गृह्णातीत्येतावन्मात्रमेव वा

विवक्षितं गृह्णात्येवेति वा ? आद्ये दण्डस्यापि विशेष्यत्वापातः। तद्गतस्यापि सत्त्वादेर्धर्मस्य ग्रहणात्। नापरः। [f]भवति हि व्यभिचारिणो धूमस्याविच्छिन्नमूलत्वादिविशेषणं तद्विशिष्टं च तत्त्वान्तरम्। न च विशेषस्य धर्मं व्यभिचारितां गृह्णाति।

टी० ॥ [a]"ज्ञानेने"ति। ज्ञानस्य कर्मत्वमिति षष्ठ्यर्थः॥ ज्ञानकर्मत्वमिति ज्ञानक्रियां प्रति कारकत्वमतीतानागतादौ नास्ति, शब्दानुमित्योश्च निर्विषयत्वापत्तिः तयोर्विषयानन्वयत्वात्। ईश्वरप्रमाया अजन्यत्वेन चाविषयत्वापत्तिः। परसमवेतक्रियाफलशालित्वं च विषयस्य व्यवहारलक्षणेन ज्ञानफलेन चेत्तस्य दूषितत्वादित्यभिप्रेत्याह—। [b]"तन्निरूक्तौ"ति। विना सम्बन्धान्तरमित्यात्मनो घटज्ञानविषयत्ववारणाय, पर्यवसितमर्थमाह-। [c]"तेने"ति। विशेष्यसामान्यस्य लक्षणमाह। [d]"विशेष्यमि"ति। विशिष्टनामकं तत्त्वान्तरं कर्तृभूतं यद्गतं धर्मं गृह्णातीत्यर्थः। दण्डी पुरुषः पुरुषत्वं गृह्णाति न तु दण्डत्वमतो दण्डो विशेषणं पुरुषो विशेष्यः तथा ज्ञातो घट इत्यत्रापीत्यर्थः। यत्किञ्चिद्धर्मग्रहणं वा विवक्षितं सकलधर्मग्रहणं वेति विकल्पयति—। [e]"यद्गतमि"ति। विशिष्टं यत्तत्त्वान्तरं तद्दण्डस्यापि धर्मं सत्त्वादि गृह्णात्येवेति दण्डस्यापि विशेष्यत्वं स्यादित्यर्थः। केवलस्य धूमस्य विशेष्यस्य व्यभिचारित्वं धर्मः तं च विशिष्टो धूमो न गृह्णातीति सोऽपि विशेष्यो न स्यादित्याह [f]"भवति ही"ति॥

मू० * [a]अथोर्द्ध्वाविरतगतिविशिष्टस्य विच्छिन्नमूलता विशेषणं न च तथभूतस्य व्यभिचारिता धर्म इत्युच्यते * मैवं, प्रथमविशिष्टः किं व्यभिचरी न वा आद्ये [b]स एव दोषः द्वितीये विशेषणान्तर [c]वैयर्थ्यं [d]प्रथमविशिष्टे एव च तद्दोषावसरः [e] * अथ यद्धर्मविशिष्टस्य विशेषणं तद्धर्मं गृह्णाति न सर्वं नच व्यभिचारिता विशिष्टस्य तानि विशेषणानि? *—

इति चे^{f}न्न, तत्किं न धूममात्रं व्यभिचारि ततश्च व्यभिचारिता विशिष्टस्यैव तानि * तथा^{g} भवतु व्यभिचारिता तद्विशेषणं परं सा न विशेष्यकोटिः ? *- इति चेन्न,

टी० ॥ नन्वविच्छिन्नमूलत्वं धूममात्रस्य न विशेषणं किन्तूर्ध्वविरलगतिविशिष्टस्य तच्च न व्यभिचारीत्याह—। ^{a}"अथे"ति । ^{b}"सएवे"ति । प्रथमविशेषणविशिष्टस्य व्यभिचारित्वं द्वितीयविशेषणाविशिष्टं न गृह्णातीति तद्विशेष्यं न भवेदित्यर्थः ॥ ^{c}"वैयर्थ्यमि"ति । व्यभिचारावारकत्वादित्यर्थः । किन्त्वविच्छिन्नमूलत्वस्यैव विशेषणस्य धूमो व्यभिचारी विशेष्यो न स्यात् तद्गतस्य व्यभिचारित्वस्य तद्विशिष्टेनाग्रहणादित्याह । ^{d}"प्रथमे"ति । ननु धूमत्वविशिष्टो धूमो विशेषणेन विशेष्यते न तु व्यभिचारित्वविशिष्टोऽपीति नैकदोष इति शङ्कते -। ^{e}"अथे"ति । वस्तुगत्या तत्र व्यभिचारित्वमप्यस्तीति व्यभिचारित्वविशिष्ट एव धूमो विशेष्यः । अन्यथा विशेषणवैयर्थ्यमेवेत्याह- ^{f}"तत्किमि"ति । नन्वविच्छिन्नमूलो धूम इत्युच्यते न च विच्छिन्नमूलो व्यभिचारी धूम इति । तथा च विशेष्यतावच्छिन्नो यो धर्मस्तं गृह्णात्येव विशिष्टमिति शङ्कते—। ^{g}"भवत्वि"ति ॥

सू० ^{a}अद्यापि विशेष्याज्ञानात् । किञ्च तद्विशेषणमिति तत्संबन्धिमात्रं वा विशेषणतया वा संबन्धि ? । आद्ये^{b}ऽतिप्रसङ्गः द्वितीये तु ^{c}तथैवान्योन्याश्रयादि । किञ्च विशेष्यत्वलक्षणो यस्तद्गतो धर्मस्तं गृह्णाति नवा ? । आद्ये^{d}ऽतिव्याप्तः । द्वितीये गृह्णात्येवेति ^{e}नियमो विद्धः । किंच ^{f}मत्समवायो ज्ञानस्येत्यत्र भवति मत्समवायस्य ज्ञानं विशेषणं तत्संबन्धमन्तरेणैव तच विषयः ॥

टी० ॥ तर्हि विशेष्यतावच्छेदको धर्मो विवक्षित इत्यु-

च्यते तत्राह—। a"अद्यापी"ति ॥ b"अतिप्रसङ्ग"इति । उपलक्षणोपरञ्जकयोरपि विशेषणत्वापत्तिरित्यर्थः ॥ c"तथैवे"ति । यथा विषयित्वलक्षणे तथा विशेषणत्वलक्षणेऽपि । यतो विशेषणत्वज्ञानाधीनं विशेषणतया सम्बन्धित्वज्ञानं तदधीनं च विशेषणत्वज्ञानमित्यन्योन्याश्रयः । तत्रापि(¹)विशेषणतया संबन्धित्वज्ञानापेक्षायोमनवस्था विशेषणत्वज्ञानाधीनमेव तत्ज्ञानमित्यात्माश्रयोऽप्यादिपदग्राह्यः ॥ d"अनिष्टाप्तिरि"ति । विशिष्टस्यापि विशेष्यत्वप्रसङ्ग इत्यर्थः ॥ e"नियम"इति । सकलधर्माग्राहित्वं ज्ञानमित्यर्थः f"सत्समवाय"इति । सत्समवायस्य सम्बन्धान्तरमन्तरेण घटज्ञानं विशेषणं भवति न तु घटज्ञानस्य सत्समवायोऽपि विषय इत्यर्थः॥

सू० *ᵃनच गुणगुण्यादिविशेषणविशेष्यभावे यः संबन्धान्तरमन्तरेणेत्युक्त्या व्यवच्छेद्यतां नीतः स एवायं समवाय इति कथं न व्यवच्छेद्यतां प्रतिपत्स्यते । ᵇयतोऽत्र तस्यैव विशेषणविशेष्यभावत्वादन्तरत्वासिद्धिरिति । ᶜतस्मात्संबन्धमन्तरेण ज्ञानं विशेषणं यस्येत्युक्तम् तत्र ज्ञानं संबन्धमनपेक्ष्य स्वभावत एव यथार्थस्य विशेषणं यथा समवायस्यापीति न कश्चिद्विशेष इति साध्वुक्तम् । सत्समवायो ज्ञानस्ये(²)त्यत्र ज्ञानविषयता समवायस्यापि स्यादिति ज्ञानाभावे प्रसङ्गात् ॥

टी० ॥ ननु संबन्धान्तरमन्तरेण यद्विशेषणं ज्ञानं स विषय इति लक्षणे गुणि आत्मनो ज्ञानं गुणः समवायेन विशेषणमत एतद्व्यावर्त्तनाय संबन्धान्तरमन्तरेणेति कृतम् । तथाच सत्समवा-

(१) तत्रापि=विशेषणतया सम्बन्धित्वज्ञानेऽपीत्यर्थः ।

(२) ज्ञानस्य=घटपटादिविषयकज्ञानस्येत्यर्थस्तेन समवायविषयकज्ञानविषयताया समवाये सत्त्वेऽपि तदतिरिक्तघटादिविषयकज्ञानविषयतायाः समवायेऽभावान्न दोषः ।

योग्यभावयोः संयोगसमवायाभावात् घटज्ञानस्य ज्ञानाभावोऽपि विषयः स्यादित्यर्थः सर्वत्राभावे प्रतियोगिन उक्तलक्षणत्वादि-(१)त्याह —। f"न तत्रे"ति ॥ g"प्रतीते"ति । तत्र विशेष्याभावादेव ज्ञानस्य विशेषणत्वानुपपत्तिरित्यर्थः ॥

मू० *a भावे चिन्तेयम् ? *-इति चेत् । न, b अभावस्याविषयत्वापातात् । c ज्ञानादन्यज्ज्ञानीयं च यत्कारणादि तत्रापि प्रसङ्गादिति किं विस्तरेण । * d नच ज्ञानाकारतायां गोचरस्य नास्त्येव ज्ञानगोचरयोर्भेदः । e प्रतीतिविरोधात् । f भेदमनिच्छता च स प्रतिषेद्धुमप्यनर्ह इति । h वक्तव्यस्तर्हि कोऽसौ भेदो नाम स हि स्वरूपं वा स्यादि-

टी० ॥ a"भावे चिन्तेयमि"ति । यद्यप्यतीतानागतयोर्भावयोरेव दोष उक्तस्तथापि यत्र ज्ञानं व्यावर्त्तकं स भावविषय इति लक्षणमभिप्रेत्याह—। b"अभावस्ये"ति । ज्ञानीयं कारणं चक्षुराद्यपि घटज्ञानविषयः स्यादुक्तलक्षणत्वादित्याह—। "ज्ञानादन्यदि"ति । ज्ञानीयं कारणं व्यवसायोऽप्यनुव्यवसायस्य तत्र विषयत्वमस्त्येवेति नातिप्रसङ्ग इत्यत आह—(२)"ज्ञानादन्यदि"ति । कारणादीत्यादिपदात् ज्ञानवाचकपदानां सङ्ग्रहः । तेषामपि ज्ञानेन सह स्वरूपसम्बन्धात् । ननु ज्ञानादन्यदिति विशेषणमेवानुपपन्नं तेषां ज्ञानात्मकत्वात् ज्ञानविषययोरभेदादित्यत आह—। d"नचे"ति । गोचरस्य विषयस्य ज्ञानाकारतायां ज्ञानविषययोर्भेद एव नास्तीत्यर्थः । तथा च ज्ञानाभिन्नस्यैव विषयत्वमिति भाव (३)इत्यन्ये । e"प्रती"ति । ज्ञानविषययोर्भेदस्य सार्वजनीनत्वादित्यर्थः । ननु भेदश्चेदस्ति(४)तदा प्रतीतिभ्रम एव स्यात् इत्यत आह ।

(१) इति—अग्रे वक्ष्यमाणदोषोद्धारसन्देहेऽर्थः ।

(२) अत्र—उक्तमित्यर्थः । (३) सौत्रान्तिकापेक्षया (४) सम्मते इति शेषः ।

[f]"भेदमि"ति । साकारवादिमतेन भेदलक्षणमुपक्रमते । [g]"वक्तव्य" इति ॥

मू० [a]इतरेतराभावो वा [b]धर्मान्तरं वा ? । नाद्यः । [c]भिन्नेऽभिन्नभ्रमानुपपत्तिप्रसङ्गात् । भ्रान्त्याऽपि धर्मिस्वरूपावगाहनात् । अन्यथा कस्याभेद स भ्रान्तिरुल्लिखेत् —[d]* ननु (१)निःसंबन्धित्वेन व्यवस्थितेषु तरुदारुप्रभृतिषु नानाधारोऽन्य एवावयव्यारोप्यते । येषु चारोप्यते ते ते भेदेनैव भान्ति । किन्त्वनारब्धावयविषु तेष्वारब्धावयवितया विभ्रम्यते ? । *—मैवं, तेषां प्राग(२)नुदाहरणीकृतत्वात् । [e]अतस्मिन् स एवायमिति प्रत्यभिज्ञाभासार्थानां दृष्टान्तत्वनेष्टत्वात् [f]तत्रापि धर्मान्तरारोपाभ्युपगमे तदात्म्याभावस्य संसर्गाभावप्रवेशापत्तेः । नचैवमप्येष्टव्यमेव । [g]तथापि स्वरूपभेदग्रहे तत्राभेदस्य(३) धर्मस्याप्यशक्यारोपत्वात् । नापि द्वितीयः ॥

टी० ॥ [a]"इतरेतरे"ति । भेदनं भेद इति व्युत्पत्तिमालम्ब्येत्यर्थः । [b]"धर्मान्तरमि"ति । भिद्यतेऽनेनेति व्युत्पत्तिमालम्ब्येत्यर्थः ॥ [c]"भिन्न" इति । रजतभिन्ने शुक्त्यादौ रजताभेदग्रहो न स्यात् । विशेषदर्शनादित्यर्थः । [d]"नन्वि"ति । निःसम्बन्धितया व्यवस्थितेषु परस्परोदासीनेष्वित्यर्थः । एतस्यैव विवरणमनारब्धावयविष्विति । तथा चारब्धावयवित्वारोपो न भेदग्रहविरोधीति न भ्रमानुपपत्तिरित्यर्थः । सैव स एवायं चैत्र इत्येतादृशभ्रमानुपपत्तिरुक्तेत्याह—। [e]"अतस्मिन्नि"ति ॥ ननु

(१) तत्राभेदभ्रम एव तत्र न भवति येन भेदग्रहस्तत्परिपन्थी स्यात् किन्त्वनारब्धाऽवयविनामिदेर्धर्मस्यारोप इति शङ्कते—ननिवति ।

(२) प्राक्—"भिन्नेऽभिन्नभ्रमानुपपत्तिप्रसङ्गा"दित्यत्रानुदाहृतपूर्वमेव ।

(३) अभेदस्य—तादात्म्यस्य ॥

तत्राप्यभेदो नारोप्यते येन भेदग्रहस्तत्परिपन्थी स्यादपि तु येनमेनयोस्तादात्म्यमित्यत आह—। f"तत्रापी"ति । तथा च नाय येन इति विशेषदर्शनं तादात्म्यमारोपितं निषिध्येत् ततो यां धियमन्योन्याभावविषयामुपैषि तयाऽत्यन्ताभाव एव चेद्विष-यीकृतस्तदाऽन्योन्याभावेऽतिरिक्ते प्रमाणं नास्तीत्यर्थः। दोषा-न्तरमाह—। g"तथापी"ति । तादात्म्यारोपोऽप्यनुपपन्न एव तत्रेत्यर्थः ॥

मू० [a]प्रतीतावन्योन्याश्रयप्रसङ्गात् । [b] *प्रतियोगित्वेनाप्र-तीतावधिकरणप्रतीतिः अधिकरणस्वभावत्वेनास्मृ-तौ प्रतियोगिस्मृतिश्च तद्ग्रहणकारणमतः क्वेतरेत-राश्रय? *-इति चेत् । मैवं, [c]एवं हि सति कुम्भः पटो न भवतीत्यत्र यथैव तस्याभावस्य प्रतियोगितया पटो निषिध्यते तथा कुम्भोऽपीति सोऽपि कुम्भात्मतया निषिद्धः प्रसज्यते।[d]वस्तुतोऽन्योन्याभावस्य कुम्भप्र-तियोगिकत्वेऽपि कुम्भस्यापटत्वनिरूपणकाले कुम्भ-प्रतियोगिता नापेक्ष्यते किन्त्वाश्रयतैवेति कुम्भाप्र-तिक्षेपः पटस्य तु प्रतियोगितैवापेक्ष्यते न त्वाश्रय-तेति कुम्भवत् पटस्यापि न सङ्ग्रहापत्तिः । यद्य-प्यन्योन्याभावस्योभयप्रतियोगिकता तथाप्यन्या कुम्भाश्रयताऽन्या च पटाश्रयताऽन्या कुम्भप्रतियो-गिकताऽन्या च पटप्रतियोगिकता तेना—

टी० ॥ a"प्रतीताविति"ति । प्रतियोगित्वेन गृह्यमाणेन प्रतियोगिनाऽन्योन्याभावनिरूपणं प्रतियोगित्वं चाभावविरहा-त्मकत्वमित्यन्योन्यापेक्षायामन्योन्याश्रय इत्यर्थः । प्रतियोगित्वेन प्रतीतिर्न तत्र किन्तु प्रतियोगिप्रतीतिरिति न परस्पराश्रय इत्याह—। b"प्रतियोगित्वेने"ति । c"एवं ही"ति । प्रतियोगिनः प्रतियोगित्वेन भानं न चेत्तत्र तदा घटः पटो न भवतीत्यत्र

नञन्वयेऽविशेषेणैव स्यादित्युभयं प्रतियोगि भवेदित्यर्थः । घटा-ऽधिकरण एवान्योन्याभाव इति मतमाश्रित्येदमुक्तमित्येके । अन्यो-न्याश्रय दूषयितुं प्रतियोगित्वेन ज्ञानमन्योन्याभावनिरूपणे तन्त्रमाह—। [d]"वस्तुत" इति । यस्य प्रतियोगित्वं स्फुरति तस्य प्रतिक्षेपो यस्याधिकरणत्वं स्फुरति न तस्यापीत्यवश्यं वक्तव्यं तथा चान्योन्याश्रय एवेत्यर्थः । यद्वा वस्तुत इत्यारभ्य विशेषादिति पर्यन्तमाशङ्काग्रन्थ एव । वस्तुतो यद्यपीत्यत एवा-ऽऽशङ्का द्रष्टव्या ।

मू० [a]न्योन्यभावस्योभयप्रतियोगिकत्वे चोभयाश्रितत्वे च नोभयोरपि सङ्ग्रहप्रतिक्षेपविरोधापत्तिः *प्रति-योगित्वस्यानुयोगिनो भेदोपजीवनेऽन्योन्याश्रयः अ-नुपमजीवने च स्वस्मादपि भेदग्रहापत्तिः प्रसज्यते । * यतः स्मर्यमाणस्य प्रतियोगितानुभूयमानस्य चाश्र-तेत्येतावन्मात्र एवोक्ते स्वस्मादपि भेदग्रहानाप त्तिः । [b] * न चैवं स एवायमित्यत्रापि भेदग्रहप्रसङ्गः । वास्तवतत्सत्त्वासत्त्वाभ्यां विशेषात । ? *—इति चे-न्मैवं, तथाहि—किमधिकरणप्रतीतिरधिकरणतया प्रतीतिरुत वस्तुगत्याधिकरणस्य स्वरूपेण विवक्षि-ता? । आद्ये किमियमाधिकरणतया घटादेः प्रतीति-स्तस्य कारणं स्यात् न तावदन्योन्याभावाधिकरणतया दण्डाप्रतीतौ दण्डाधिकरणताया इव तदप्रतीतौ तदधिकरणतायाः प्रत्येतुं पूर्वमशक्यत्वात् [c]विशि-ष्टप्रतीत्या विशेषणस्यावश्योल्लेख्यत्वात् [d]विशिष्टस्य च विशेषणघटितमूर्त्तित्वात् ॥

टी० ॥ [a]"अन्योन्याभावस्ये"ति, । एकस्यैवेति शेषः । तस्यैवैकस्य चत्वारो धर्मा पटाश्रयत्वं घटाश्रयत्व पटप्रति-योगित्वं घटप्रतियोगित्व च । तत्र स्मर्यमाणो निषेध्य एवानुभू-

यथानन्त्वाश्रय एवेति व्यवस्थायां क्रोभयनिषेध्यत्वमुभयस्य चात्मप्रत्यं भासेतेत्यर्थः ॥ ननु स एवायमित्यत्रापि स्मर्यमाणस्य सत्ता विशिष्टस्यानुभूयमाने इदन्ताविशिष्टे भेदः प्रतीयेतेत्यत आह—। b"नचे"ति। तद्ग्रहे भेदस्यापि वास्तवस्य प्रयोजकत्वादित्यर्थः। अधिकरणत्वेन प्रतीतिराधेयपरतन्त्रेत्यन्योन्याभावस्याधेयस्य ग्रहं विनाधिकरणत्वेन प्रतीतिरेव न स्यादिति स एवान्योन्याश्रयः। c"विशिष्टे"ति। अन्योन्याभावाधिकरणस्य यद्विशिष्टं तस्यान्योन्याभावस्य विशेषणस्य स्फुरणं विना स्फुरणानुपपत्तेरित्यर्थः। अत्र हेतुमाह। d"विशिष्टस्येति ॥

सू० "*नापि यस्य कस्यचिदधिकरणतया प्रतीतिस्तत्कारणम्। * यत्र भिन्ने भेदभ्रमस्तत्र धर्मिणः सत्त्वाधारतया प्रतीतावपि तदनुपपत्तेः न तन्मात्रादुत्पत्तिः अपि तु प्रतियोगिस्मृतिसहितात्। * ᵇसा च ᶜतदा नास्तीति तदनुपपत्तिः? *-इति चेन्न, ᵈप्रतियोगिस्मृतिरपि किं प्रतियोगितया स्मृतिः, उत वस्तुगत्या प्रतियोगिनः स्वरूपेणेति विकल्प्यत्वात्। आद्ये किमन्योन्याभावप्रतियोगितया यस्य कस्यचित् प्रतियोगितया वा?। नाद्यः। अन्योन्याभावाप्रतीतौ तदनुपपत्तेः। ᵉपूर्ववत् नापि द्वितीयः ॥

टी० ॥ नन्वन्योन्याभावाधिकरणत्वेन ग्रहो न तत्त्वं किन्त्वधिकरणत्वमात्रेणेति नान्योन्याश्रय इत्यत आह—। a"नापी"ति। एवं सति सत्तायां गृह्यमाणायां शुक्तौ रजताभेदग्रहकालेऽपि रजतभेदग्रहः स्यादित्यर्थः। b"सा चे"ति। प्रतियोगिस्मृतिरित्यर्थः॥ c"तदे"ति। अनुभूयमानारोपकाले इत्यर्थः। केचित्तु प्रत्यभिज्ञाने स्मृतिर्न हेतुः किंतु पूर्वानुभव एव संस्कारद्वारेति प्रतियोगिस्मरणं तत्र नास्तीति व्याचख्युः। तन्मन्दम्। स्मृतेरेव तत्र हेतुत्वात् तथाऽव्यभिचारपक्षे त्यागात् चात्मप्रत्य-

स्मिश्च न स्मर्यमाणारोपान्तरे वा यद्यप्येवमप्यन्योन्याभावग्रहोपपत्तिस्तथाऽपि परिहारान्तरमाह—। [d]"प्रतियोगी"—ति ॥ [e]"पूर्ववदि"ति । यथाऽन्योन्याभावग्रहे तदधिकरणत्वं दुर्ग्रहं तथा तद्ग्रहे तत्प्रतियोगित्वमपीत्यर्थः ॥

सू० [a]यस्य वस्तुगत्या भिन्नस्याभिन्नतया भ्रमविषयीकृतस्य स्वदेशेतरदेशादावसत्त्वेन प्रतीयमानत्वे स्वाभावप्रतियोगितया प्रतितावन्योन्याभावप्रतीत्यनुपपत्तेः प्रतियोग्यनुभूतिः 'सा न स्मृतिः? *-इति चेत्। न, [c]स्मृतित्वस्याप्रयोजकत्वात्। [d]अन्यथाऽनुभूयमानयोरन्योन्याभावाप्रतीतिप्रसङ्गात् । [e]अत्रान्तराले स्मृतिकल्पनया नान्योन्यात्मानावित्यनुभवबाधितया प्रयोजकत्वेऽपि वा स्मृतित्वस्य ॥

टी० ॥ [a]"यस्ये"ति । वणिग्वीथ्यामिदं रजतं नास्तीति संसर्गाभावप्रतियोगितया गृह्यमाणस्य रजतस्य तादात्म्यारोपदशायां भवदुक्तान्योन्याभावग्रहसामग्रीसत्त्वेऽपि तदनुपपत्तेरित्यर्थः ॥ [b]"स्वे"ति । देशान्तराभावप्रतियोगितया प्रतीतिरित्यर्थः । प्रतियोगिनो रजतस्य तादृप्येण स्मरणसामग्री तदा नास्तीति भावः ॥ अनुभूतेरप्येतादृश्यास्तथान्योन्याभावग्रहहेतुत्वेनावश्य मन्तव्यत्वादित्यभिप्रेत्याह—। [c]"स्मृतित्वस्ये"ति । एतदेवाह—। [d]"अन्यथे"ति । ननु तत्राप्यन्योन्याभावग्रहान्यथानुपपत्त्या स्मृतिः कल्पनीयेत्यत आह—। [e]"अत्रे"ति । नान्योन्यात्मानावित्यनुभवबाधितयाऽप्यन्तराले स्मृतिकल्पनया स्मृतित्वस्य प्रयोजकत्वे वेति योजना । यद्वा स्मृतिकल्पनया ऽलमिति शेषः । प्रतियोगिज्ञानमात्रस्यैव तन्त्रत्वात् । प्रयोजकत्वे वेत्यास्याभ्युपगमवादो भिन्न एव ॥

सू० [a]योऽसौ तत्र नासीत् सोऽयमिति स्मर्यमाणाभावप्रतियोगिकत्वेऽपि वस्तुगत्या भिन्नस्याभिन्नतया भ्रमणोल्लिख्यमानस्याऽन्योन्याभावप्रतीत्यनुदयात् * दोषा-

भावोऽपि हेतुः स भ्रमोदाहरणे नास्ति ? *-इति चेत्।
न, [b]पूर्वदृष्टे स्मृतिमतः ततो वस्तुगत्याऽन्यस्यैवान-
न्तरदृष्टस्य पूर्वदृष्टाद्भिन्नमभिन्नं वेत्यनिरूपितस्यापि
सम्भवेन तत्रेतरेतराभावबुद्ध्यापत्तेः। * बुध्यत एव
? *-इति चेत्। न, [c]पश्चात्तत्संशयदर्शनात्। [d] *वि-
शेषधीरपि तत्र हेतुः? *-इति चेत्। न, विशेषत्वस्या-
न्योन्याभावनिरूपणं विना दुर्निरूपत्वात्। [e]एतेन
वस्तुगत्या प्रतियोगिनः स्वरूपेण स्मृतिः सहकारी-
त्यपि व्युदस्तम्। वेदितव्यं वस्तुगत्याऽधिकरणस्य
स्वरूपेण प्रतीतिः सहकारिणीत्यपि ॥

टी० ॥ [a]"योऽभावि"ति। विश्वनाथसदृशे यो नासीत् स एवायं चैत्र इति मैत्रे प्रत्यभिज्ञानतोऽपि त्वदुक्तसामग्रीसत्वे-ऽप्यन्योन्याभावप्रतीतिर्नोदेतीत्यर्थः ॥ [b]"पूर्वे"ति। गेहनिष्ठाभावप्रतियोगितया पूर्वदृष्टं घटं स्मरतो घटान्तरानुभवकाले त्वदुक्तसामग्री व्यभिचारात्त्वदन्योन्याभावग्रहणमित्यर्थः। यद्यप्यग्रे संशयदर्शनेन दोषस्तत्र नास्तीति वक्तुमशक्यं तथापि तत्काले दोषस्तत्रमाऽपि नास्तीत्यर्थः। बुद्ध्यत एवान्योन्याभाव इति शेषः। [c]"पश्चादि"ति। भेदग्रहे तत्संशयो न स्यादित्यर्थः ॥ [d]"विशेषधीरि"ति। भ्रमे च विशेषदर्शनं नास्तीत्यर्थः। विशेषो हि व्यावर्तको धर्म उच्यते व्यावर्तकत्वं च स्वविशेष्ये तदितरान्योन्याभावावबोधजनकत्वमिति स एवान्योन्याभाव इत्यर्थः॥ [e]"एतेने"ति। प्रतियोगित्वेन ज्ञानं न तन्त्रं किन्तु प्रतियोगिनः स्मरणमात्रमन्योन्याभावग्रहकारणमिति निरस्तमित्यर्थः। वस्तु तदधिकरणस्य स्वरूपेण प्रतीतिरित्यपीत्यत्रापि व्युदस्तमिति योज्यम् ॥

सू० [a]भिन्नस्याभिन्नतया वृक्षादेः प्रतीयमानस्यान्योन्याभा-
वत्वेन ग्रहणप्रसङ्गात्। [b]नापि तृतीयः। अभावस्य
निर्धर्मकतापक्षे तस्य विश्वाभिन्नत्वप्रसक्तौ विश्व-

स्वाभ्यभावरूपत्वेन निर्धर्मकतया धर्मलक्षणान्योन्य-
भेदविरहिता ऐक्यव्यापत्तेः—* अभावे धर्माभावा-
त्स्वरूपमेव भेद ? *—इति चेत् । न, योऽसौ भेदः तस्य
स्वात्मा च किं कस्मादपि भेदः उत निष्प्रतियो-
गिक एव? । न तावन्निष्प्रतियोगिक एव । [d]प्रमाणा-
भावेनासत्त्वप्रसङ्गात् । [e]योऽसौ भेदव्यवहारोऽस्ति स
कस्मादपि [f]न तु नीलव्यवहारवन्निष्प्रतियोगिकः ।
[g]स च निष्प्रतियोगिको नोपपद्यते । निष्प्रतियोगि-
कोऽपि वा [h]यद्ययं सप्रतियोगिकव्यवहारं करोति
तदा प्रतियोगिनियमो न स्यादिति ॥

एतेनाऽस्यातिदेशमाह—। [a]"भिन्नत्वे"ति । चैत्रं मैत्रतया
प्रत्यभिज्ञानत्वाद्भयोर्धर्माभावग्रहणप्रसङ्गस्तद्वस्य एवे-
त्यर्थः । वैधर्म्यभेदं स्पष्टयति—। [b]"नापी"ति । अभावे वैधर्म्या-
भावात् सर्वाभेदप्रसङ्ग इत्यर्थः । वैधर्म्यं विनाऽपि स्वरूपभेदेनैवा-
भावो भिद्यते इत्याह । [c]"स्वरूपमि"ति । निष्प्रतियोगिकश्च
भेदश्चेति विरुद्धमित्याह—। [d]"प्रमाणे"ति । एतदेवाह—। [e]"यो-
सावि"ति । तथा च व्यवहाराभावेन व्यवहर्तव्याभाव इत्यर्थः ॥
ननु नीलादिव्यवहारवद् भेदव्यवहारोऽपि निष्प्रतियोगिकः
स्यादित्यत आह । [f]"नत्वि"ति । [g]"सचे"ति । भेद इत्यर्थः ॥
यदि भेदो निष्प्रतियोगिकः स्यात् तदा नीलवन्निष्प्रतियोगिक-
स्तद्व्यवहारः कस्मादयमिति न त्वेवमित्यर्थः । ननु निष्प्रति-
योगिक एव भेदः स्वाभाव्यात् प्रतियोगिकभेदव्यवहारं कुर्या-
दित्यत आह—। [h]"यद्यी"ति ॥

मू० [a]स्वस्मादपि भेदव्यवहारं कुर्यात् । स्वस्मात् कथं
भेदः सम्भवतीति चेत् तत्किं भिन्नाद्भेदः ? । [b]अन्यैव-
मनवस्था स्यात् । नापि प्रथमः । [c]वक्तव्यं हि तदसमा
[d]दसौ भेदः न तावत्सर्वस्मात्स्वात्मनोऽपि भेदप्रस-

त्रा ᵉत्रापि घटादे ᶠर्घटादिना सह तत्त्वावच्छेदकावधिमद्भावो योऽसौ स ह्यर्थान्तरं वा स्यात्स्वरूपमेव वा?। आद्ये ᵍतस्यापि भेदावधित्वेन तत्राप्येवमेवानुयोगे यद्यो तदेवोत्तरमनवस्था स्यात्। ʰ*अथ तत्र स्वरूपमेव तर्हि प्रथमस्य तथाभावे प्रद्वेषः किन्निबन्धन इति प्रथमत एव स्वरूपं वाच्यम् * ॥

टी० ॥ अनियममेवाह—। ᵃ"स्वरूपमादप्यी"ति ॥ ᵇ"नन्वे-वमि"ति। येन भेदेनासौ भिन्नः सोऽपि भेदान्तरेण भिन्नो भवे-दित्यनवस्थेत्यर्थः। स्वरूपभेदस्य सप्रतियोगिकत्वे दोषमाह। ᶜ"वक्तव्यं हो"ति ॥ ᵈ"असावि"ति। अभाव इत्यर्थः ॥ ननु घटादेर्भावादभाव स्वरूपभेदात्मा स्यादित्यत आह। ᵉ"नापी"ति। यद्यप्यावधित्व घटादेः प्रतीयते स्वरूपभेदस्यावधिमान् भवति हि घटाद्भिन्नस्तदभाव इति तत्रावच्छेदकावधिमद्भावे वाऽवधेर्घटादवधिमतश्चाभावात् सम्बन्धान्तरं वा स्यादुभयस्वरूपं वेति विकल्पयति। ᶠ"घटादिने"ति ॥ ᵍ"तस्यापी"ति। अवच्छेदकावधिमद्भावात्मा यः संबन्धो घटतदभावभिन्नस्तस्माद्-प्यभावो भिन्नो वाच्यस्तत्राप्यन्य एवावच्छेदकावधिमद्भाव इत्यात-तोऽपि भेद एवाभावस्य। अवच्छेदकावधिमद्भावपरम्परानुसरणाद-नवस्थेत्यर्थः ॥ ननु घटतदभावयोरवच्छेदकावधिमद्भावो भिन्न एवास्तु तत्रापि योऽवधित्वप्रत्ययः स स्वरूपसम्बन्धाधीन एवेति नानवस्थेति शङ्कते—। ʰ"अथे"ति ॥

मू० ᵃतदपि न, तथाहि ᵇयदि घटादिभिः सार्द्धमवच्छेदकावधिमद्भावसम्बन्धोऽस्य स्वरूपं प्रतियोगिना सार्द्धं तदभावस्याऽस्य निषेध्यनिषेधभावलक्षणः संबन्धः स्वरूपं न स्यात् स्वरूपस्यैकत्वात् ᶜअनयोश्च संबन्धयोर्भिन्नत्वात्। ᵈनहि यदेव प्रतियोगिनः साकाशात् भिन्नत्वं तदेव तन्निषेधत्वमिति सम्भवति। ततो

व्यतिरिक्तत्वस्यानिषेध्यसाधारणत्वान्निषेध्यनिषेध-भावस्य नियतवस्त्वपेक्षत्वादिति 'एवं च कार्य-कारणभावादौ स्वभावसंबन्धान्तरेऽपि वाच्यम् ॥

टी० ननु प्रथमोऽप्यवच्छेदकभावः स्वरूपमेव घटतद्भावयोः स्यादित्यत आह—। [a]"तदपि ने"ति। अस्ति प्रतियोग्यभावयोरवच्छेदकभावोऽस्ति च निषेध्यनिषेधलक्षणसंबन्धस्तदुभयं च प्रतियोग्यभावस्य स्वरूपमेव तथा चैकस्य स्वरूपद्वयात्मकत्वमनवस्थेत्याह। [b]"यदी"ति। ननु द्वावपि संबन्धाविभिन्नौ स्यातां तत्कुतो विरोध इत्यत आह। [c]"अनयोश्चे"ति भेदमेवोपपादयति। [d]"नही"ति। घटाभावो हि निषेधात्मा घटमात्रस्य, भेदात्मा तु पटादेरपीति कथमनयोः संबन्धयोरैक्यं स्यादित्यर्थः। व्यतिरिक्तत्वस्य भेदस्यानिषेध्यसाधारणत्वात् अनिषेध्येन पटादिना साधारणत्वात् ॥ [e]"एवमि"ति। कार्य-कारणभावो दण्डघटयोः स्वरूपमवच्छेदकभावोऽपि तथेत्येकस्यैवोभयस्वरूपात्मकत्वं स्यादित्यर्थः ॥

सू० "ऊहनीयश्चान्यत्रापि स्वरूपभेदे एष दोषः। किञ्च धर्मान्तरं भेद इति ब्रुवतः कोऽभिसन्धिः?। किं घटत्वादय एव भेद, उत भेदो नामान्य एवैकः कश्चिद्धर्मः?। आद्ये घटत्वादीनां सप्रतियोगिकत्वप्रसङ्गः। भेदस्य सप्रतियोगिकत्वात्। न च घटत्वादयस्तथा। पटाद्यनपेक्ष्य तेषां प्रतीतेः। [b]*यदा पटाद्यपेक्षया प्रतीयन्ते तदा भेदव्यवहारं कुर्वन्ति*-इति चेत्। न, प्रतीतौ कस्य पटाद्यपेक्षेति वाच्यम्। किं घटत्वादेः, उत तद्धर्मस्य कस्यचित्?। [c]आद्ये पटाद्यपेक्षामन्तरेण घटत्वप्रतीत्यनुपपत्तिप्रसङ्गः। [d]न हि यदन्तरेण यदुत्पद्यते तत्तत्कारणकं नाम। [e]वन्ह्यादाविवावान्तरजातिभेदे कारणभेदस्य चरितार्थयितुमश-

ध्यत्वात् । साक्षात्कारित्वादिना सह परापरभावा-
नुपपत्तेः ।

टी० ॥ पृथक्त्वादिनिरूपणे योऽवध्यवधिमद्भावस्तत्रायं दोष उक्तः । यदि च घटादिरपि स्वरूपभेद उच्यते तत्राप्ययं दोष ऊहनीय इत्याह—। "ऊहनीय" इति । अत्र केषाञ्चिद्व(¹)ध्याख्यानम्—। [b]"यदे"ति । निरूपकप्रकारभेदादेकस्यैव सप्रतियोगिकत्वं निष्प्रतियोगिकत्वं च स्यादित्यर्थः । घटत्वनिरूपणे पटापेक्षा चेत्तदा पटज्ञानमन्तरेण कदापि घटत्वनिरूपणं न स्यादित्याह- । [c]"आद्य"इति । [d]"नही"ति । व्यभिचारेण कारणतैव न स्यादित्यर्थः ॥ ननु विजातीयमेव तद्घटत्वज्ञानं यत्र पटापेक्षा । न हि जातिभेदाभ्युपगमेऽपि कारणं व्यभिचरति । तृणारणिमणिकारणतादर्शनादित्याह- । [e]"वन्ह्यादावि"ति । अनुपलम्भबाधे सत्यपि दोषान्तरमाह— । [f]"साक्षादि"ति ॥

सू० "जात्योः परापरसङ्करमिच्छता(²)मपि मते पञ्चम्यावधिभावः प्रतिपाद्यमानः केन समन्वियात् घटत्वस्यावधिघटितत्वे तथैव परं प्रतीत्यापत्तेः [b]*तद्धर्मस्य तथात्वम् ? *—इति चेत् । न, तथाहि—न द्वितीयः । [d]स एव सापेक्षप्रतीतिर्भेदो न तु घटत्वादिः [e]घटत्वादेश्च स भेदः स्यात्तद्धर्मत्वाद्घटादेस्तु भेदपर्यनुयोगे तदभिधानमसङ्गतं [f] कथं च भिन्नैरनुगतभेदव्यवहारः स्यात्तथापि ॥

टी० ॥ ननु गुणगतजातौ परापरभावानुपपत्तिर्न दोष इत्यत आह । [a]"जात्योरि"ति । ज्ञानवैजात्याभ्युपगमेऽप्यवधितद्भावाद्यवधिभावो(³)यदा घटत्वेनान्वियात् तदा स्वरूपसम्बन्ध एव स्यादन्यो वक्तव्य इति घटत्वस्वरूपमवधिघटित

(१) व्याख्यानम्=अपपाठ इत्यर्थः । (२) क्वचित्तु परापरसङ्करमिच्छतामिति पाठः । (३) अवधिभावेऽवधित्व पटादि नष्टं यदा स्यात् अनिरूपितस्वरूपत्वेन घटत्वस्वरूपेण वैधर्म्यभेदोनाऽस्त्वत्रादित्यर्थः । ।

भवेत् तथा च सर्वदा तादृप्येणैव तत्प्रतीतिः स्यादित्यर्थः ॥ ननु घटत्वगतो धर्मः कश्चिदवधित्वघटिते न तु घटत्वमित्याह-। [b]"तद्धर्मत्वे"ति । एवं सत्युक्त धर्मस्य कस्यचिदिति यद्विकल्पितं तत्रैवानुप्रवेश इति तदेव दुष्टमित्याह—। [c]"न द्वितीय" इति ॥ [d]"न एवे"ति । घटत्ववृत्तिधर्म एवेत्यर्थः । दूषणान्तरमाह—। [e]"घटत्वादेरि"ति । न घटादेरित्यर्थ ॥ घटे भेदाभिधानमुपक्रान्तं घटत्वे तदभिधानमसङ्गतमित्यर्थः ॥ न हि घटत्ववृत्तिरपि धर्मो घटवृत्तिर्येन घटभेदः स्यादित्यर्थः ॥ किंच घटत्वपटत्वप्रत्येकवृत्तिधर्मात्मा भेदत्वे कथ भेदाकारानुगतप्रत्यय इत्याह—। [f]"कथ चे"ति । यद्वा भेदमात्र(१)मभिप्रेत्यैतदुक्तम् ॥

सू० [a]तथा सति वा किं न तैरेव तदादिव्यवहारोऽपि स्यात् । [b]नापि द्वितीयः । [c]अनभ्युपगमात्समस्तपदार्थानामनन्तर्भावप्रसङ्गा [d]त्स्वात्मनिवृत्ति वृत्तिभ्यामनुपपत्तेश्च । [e]ईदृशां चोपाध्यालीढवैचित्र्याणां जात्या समर्थने सर्वोपाध्युपधानानां जात्यैव समर्थनं स्यात् । [f]ननु घटत्वादय एव भेदः ॥

टी० ॥ ननु भिन्नैरेवानुगतप्रत्ययः स्यादित्यत आह—। [a]"तथा सती"ति । एवं सति जातिमात्रापलाप इत्यर्थः ॥ उत भेदो सामान्य एव कश्चिद्धर्म इति यद्विकल्पितं तद् दूषयति—[b]"नापी"ति ॥ [c]"अनभ्युपगमादि"ति । इतरेतराभावस्य दूषितत्वादिति भावः । तस्य भेदाख्यधर्मस्य स्वाश्रयादिभ्योऽपि तेनैव भेदेन भेदो भेदान्तरेण वा ? । आद्ये स्ववृत्तिता द्वितीये त्वनवस्थेत्याह—। [d]"स्वात्मनी"ति ॥ ननु जातिरेवास्तु काचिद्भेद इत्यत आह । [e]"ईदृशां चे"ति । प्रतियोग्यधिकरणादिरूपोपाधिघटितवैचित्र्यस्य भेदस्य जातित्वे प्रमाविषयत्वमपि जातिरूपमेव स्यादित्युपाधिमात्रोच्छेद इत्यर्थः । प्रमेयत्वादीनामुपाधीनां जातित्वे जात्यादिवृत्तित्वं बाधकमित्यपि तुल्यमिति भावः ॥ शङ्कितमपि दोषान्तराभिधानाय शङ्कते—। [f]"ननु"ति ॥

(१) भेदमात्रम्—स्वरूप पृथक्त्वादिकम् ।

सू० a* घटत्वादिज्ञानाविशेषेऽपि प्रतियोगिज्ञानसहकारिवशाद् विचित्रव्यवहारोपपत्तिः ? *-इति चेन्न, b व्यवहारसत्यत्वार्थं वास्तवार्थगतविशेषस्य वश्यं स्वीकर्त्तव्यत्वे तथैव पर्यनुयोगानुवृत्तेः अनन्तभेदपरम्पराभ्युपगमे च क्रमज्ञेयतायां प्रतीत्यपर्यवसानात् तद्युगपज्ज्ञेयतायामनन्तस्वसदृशतया कस्यचिदन्यभेदस्यान्यदीयतयापि ग्रहणसम्भवादिना सर्वत्र-प्रामाण्यानाश्वासात् c सर्वप्रतीतिनियमानङ्गीकारे चाऽनीतसत्त्वे प्रमाणाभावात् ॥

टी० ॥ नन्वेव घटत्वादि गृह्यमाणं भेदत्वेनैव सदा गृह्यते तथाच प्रतीतिवैलक्षण्यं क्वापि न स्यादित्यत आह— a"घटत्वादिज्ञाने"ति । यद्वा पूर्वमविशिष्टं घटत्वादिभेद इति शङ्कितमिदानीं तु प्रतियोगिनिरूप्यत्वविशिष्टं घटत्वादिकं भेद इति शङ्कते इत्यपौनरुक्त्यं तदेव दोषान्तरमाह— b"व्यवहारे"ति । विषयं विना सत्यो व्यवहारो न भवतीति । घटत्वपटत्वादिकमपि भिन्नतया व्यवह्रियत इति सर्वत्रानुगतो भेदो वाच्यश्चेत्तदा तत्रापि को भेद इति पर्यनुयोगस्तदवस्थ एवेत्यर्थः ॥ अनन्तभेदा यदि क्रमेण ज्ञेयास्तदैकवस्तुभेदपरम्परानुसरणे भेदप्रतीतिर्न पर्यवस्येदित्यर्थः ॥ यद्येकदैव सर्वे भेदा ग्राह्यास्तदा सर्वेषां भेदानां भेदत्वेन स्वसदृशतया किं केन भिन्नं कस्य भेदो मया गृहीत इदमस्माद्भिन्नं न वेत्यादिसंशयविपर्ययोः सर्वत्र सौलभ्येन भेदज्ञानप्रामाण्यानाश्वासः स्यादित्यर्थः ॥ ननु भिन्नतुरा एव भेदा गृह्यन्ते न तु तत्परम्पराकाः सर्वे इत्यत आह— c"सर्वे"ति अगृहीतभेदस्य स्वाश्रयभेदे मूलपर्यन्तमभेदः स्यादित्यर्थः ॥

सू० a जिज्ञासायां तस्य तस्यापि ज्ञेयत्वे तद्बुद्धीनां भेदबुद्धित्वात् तदर्थं त्वनुगतस्यानुपपत्त्या तेष्वेकजात्याद्यभ्युपगमे तद्भेदेऽपि तदङ्गीकारे परम्पराश्रयि-

भावप्रसङ्गात् । [b]एवं च सत्तादीनामानन्त्यस्वीकारे द्रष्टव्यम् । किञ्च घटत्वादेर्भेदत्वे चावधिभूतपटत्वादिसापेक्षप्रतिपत्तिकतायां घटत्ववत्पटत्वस्यापि भेदरूपस्य भेदावधिप्रतिपत्तिसापेक्षतयावधेश्च घटत्वादित्वेन घटत्वादिप्रतीत्यपेक्षाया(१)मन्योन्याश्रयप्रसङ्गः । *[c]भेदरूपत्वे घटत्वादेरवधिप्रतीत्यपेक्षा न तु स्वरूपमात्रप्रतिपत्तौ स्वरूपमात्रेण चावधित्वं तत्कुत एवम्? *—इति चेत् । न, [d]भेदस्वरूपता यदि तस्य स्वात्मैव तदा स्वरूपमात्रप्रतिपत्तौ नावध्यपेक्षेति शून्यं वचनम् ॥

उ॰ ॥ ननु तदानीमगृहीतोऽपि भेदः क्रमेण गृहीतव्य इति न मूलपर्यन्तभेद इत्याह—[a]"जिज्ञासायामि"ति । भेदजिज्ञासायामपि या भेदबुद्धिधारा तत्रानुगतो यो भेदो विषयस्तत्रानुगमिका यदि जातिस्तदा साऽपि स्वाश्रयभिन्नेति स्वभावादायेत्र नुगमिका स्यादिति नैवाश्रयस्स्यादाश्रितापि तत्र स्यादित्यर्थः ॥ [b]"एवमि"ति । सत्तायामपि सद्बुद्ध्यनुरोधेन सत्तान्तरस्वीकारे सर्वासां सत्तानां क्रमेण वा युगपद्वा ज्ञाने दोषोऽयं बोध्य इत्यर्थः । घटत्वपटत्वे हि कथं भेदौ परस्परावधिकौ परस्परज्ञानाधीनज्ञाने स्यातामित्यर्थः । घटत्वेन तज्ज्ञाने पटत्वेन च ज्ञानं नान्योन्यापेक्षेत्याह—[c]"भेदे"ति । घटत्वस्वरूपमेव चेद्भेदस्तदा तत्प्रतीतावश्यमवध्यपेक्षेत्याह—[d]"भेदस्वरूपते"ति ॥

सू॰ [a]* अथ धर्मान्तरं तदा [b]स एव भेदोऽस्तु कृतं तद्वत्तया घटत्वादेर्भेदरूपतेति प्रक्रियाकल्पनया अस्तु स एव धर्मान्तरं भेदः? *-इति चेन्न, (तुल्यत्वात् । [d]अथापि स्वरूपादित्रयमिदं भेद इति कथं सङ्गच्छते तत्र व्यवहारस्यैकाकारस्य नानानिमित्तत्वे गोत्वाद्यनु-

(१) घटादिप्रतीत्यपेक्षायामित्यपि क्वाचित्कः पाठः ।

गताकारप्रतीतेरपि कथमेकनिमित्तत्वसिद्धौ प्रमाणत्वं व्यभिचारात् ,सामान्यविशेषैरेव परसामान्यबुद्धिव्यवहारोपपत्तौ तत्कल्पनाऽनुपपत्तेः । [f]किञ्च भेदे भेदान्तरमस्ति न वा ? । आद्ये ऽनवस्था द्वितीये तदभावएव स्यात् । तद्धर्मिण्येव ([1])तत्प्रवेशात् । *भेदस्वभावत्वात् स्वात्मन्यपि स्वयमेव तद्व्यवहारमयं करोति यतेव तद्व्यवहारम् ? *-इति चेन्न,

टी० ॥ घटत्वस्वरूपमेव न भेदत्वं किन्तु तद्वृत्तिधर्मान्तरमेवेत्याह । [a]"अथे"ति : नहि घटत्ववृत्तिधर्मान्तरादेव भेदव्यवहारोऽस्त्वित्याह–। [b]"स एवे"ति ॥ [c]"दूष्यत्वादि"ति । दूषितत्वाद्वस्त्वपि दूष्यम्, अन्योन्याश्रयादिदोषेणेति भावः ॥ किञ्च स्वरूपान्योन्याभाववैधर्म्याण्यनुगतभेदबुद्धिर्यद्यनुगतनिमित्तमन्तरेणैव तदा क्वापि न सामान्यं सिद्ध्येत् तद्व्यतिरेकेणाऽननुगतधर्मोद्दर्शनेन व्यभिचार दित्याह । [d]"अपापी"ति । प्रत्येकभेदवृत्तिधर्माधीनैव भेदाकारानुगतिश्चेत्तदा घटत्वपटत्वादिनैव द्रव्याकारानुगतप्रत्ययोऽस्तु किं तेनेत्याह–। [e]"सामान्ये"ति । इतरेतराभाववैधर्म्ये भेदान्तरविकल्पयाह । [f]"किञ्चे"ति ॥

सू० [a]"यदि स्वस्मादपि स्वयं भिन्नो न स भेद इति स्वस्मादित्यवधेयावधिभावस्वरूपः स्वयं भेदोऽन्यस्माच्च स्वस्य तदाऽस्य भेदस्य स्वात्मप्रतियोगिकत्वेन स्वाश्रयत्वेन चाङ्गीकारे स्वस्मादपि स्वयं भिन्नः किं नाङ्गीक्रियते विरोधाभावात् । * [b]स्वीक्रियेत वाऽप्येवं यदि प्रतीतिर्व्यवहारो वा स्यात् ? *-इति चेन्न, [c]अस्त्यपि([2]) शब्दाभावादेस्तथाप्रतीतिराभासशब्दव्यवहारश्च * सत्यौ प्रतीतिव्यवहारौ स्वीकारकारणम् । न च तौ स्वात्मन एव स्वस्माद्भेदविषयौ स्तः ? *-इति चेन्न,

([1]) स्वधर्मिणि घटपटादौ स्वस्य प्रवेशादित्यर्थः । ([2]) शब्दाभावादेरस्त्यपि तथा प्रतीतिरित्यन्वयः । अपिशब्दः स्वरूपार्थः शाऽस्त्वेवेति ।

स्वात्मा स्वस्यैवाधिकरणमवधिश्चेत्यपि तर्हि न तथा प्रतीतिः सम्भवति न वा व्यवहारः तत्कथमित्यमङ्गीकुरुषे । * [d]ननु च वयं स्वाधिकरणं स्वावधिर्वेत्यभ्युपगच्छामः किन्तु धर्मान्तरे तत्प्रतियोगिके तदाधारे वा स्वीकृते यौ बुद्धिव्यवहारावुपपद्येते तावनवस्थाभयाद्धर्मान्तरमन्तरेणैव स्वभावाद्भेदः करोतीति ब्रूम ? *-इति चेत् न ॥

टी० ॥ स्वस्मादभिन्न एवायं स्वस्य भेद इति पञ्चम्या अवधित्वं षष्ठ्या च धर्मित्वमेकस्य प्रतीयमानमविरुद्धं चेत्तदा स्वस्माद्भिन्नत्वमेव स्वस्य किं न स्यादित्याह -। [a]"यद्वे"ति । स्वभिन्नत्वेन न किंचित् प्रतीयते न वा व्यवह्रियते इति कथं तथा स्यादित्याह । [b]"स्वीक्रिये"ति । स्वस्माद्भिन्नोऽयं घट इत्यादौ विरोधाच्च तादृशी प्रतीतिर्व्यवहारश्चास्त्येव ।"अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि"ति न्यायादिति शङ्कते-। [c]"अस्त्वि"ति । स एव स्वस्मादभेदो भेदश्च स्वस्येत्यपि बाधितमेवेत्यर्थः । स्वस्मिन् वर्तमान एव भेदः परस्मात् स्वात्मानं भिनत्तीति ब्रूम इति शङ्कते । [d]"ननु न वयमि"ति ॥

सू० "तर्ह्यन्यत्र यादृशी प्रतीतिर्धर्मान्तरविषया तादृश्येवात्र धर्मान्तरं विनोत्पद्यत इति भ्रान्ता स्यात् [b]यस्य च स्वभावस्य बलेनेदृशी सा जायते स दोषः स्यात् [c]यथा सत्यरजते रजतप्रतीतिः रजतत्वादुत्पन्नान्यत्र विना रजतत्वं जायमाना भ्रान्ता भवति यस्य च सामर्थ्यात् सा तादृशी जायते स दोष इत्युच्यते * [d]तत्र रजतत्वं नास्ति अत्र तु धर्मिरूपोऽपि भेद एव तदवलम्बनम् ? *-इति चेत् न, 'भिन्नप्रतीतिविशिष्टविषयाभेदतदाश्रयोभयवस्तुविषयान्यत्र यादृशी त्वयाङ्गीकृता ततो व्याप्यव्यापकभावाया

इह जायमानाया यदि द्वयं विषयं नाङ्गीकुरुषे तदा शक्रेणापि भ्रान्तत्वं दुर्वारम्, अथाङ्गीकुरुषे [f]अनवस्थाप्रसङ्गः ॥

टी० ॥ अन्यत्र भिन्नत्वप्रतीतिः स्वनिष्ठभेदवैशिष्ट्याधीना । भेदे तु भिन्नत्वप्रतीतिस्तद्व्यतिरेकेण भवन्ती भ्रान्तैव स्यादित्याह—। [a]"तर्ही"ति । ननु दोषमन्तरेण कथं भ्रम इत्यत आह—[b]"यस्ये"ति । क्वचिद्विषय एव दोषो यथा तमसीत्यर्थः । विषयबाधे भ्रमत्वे विषयस्य च दोषत्वे दृष्टान्तमाह—। [c]"यथे"ति । तत्र विषयबाधोऽत्र तु विषयो भेदोऽस्त्येव तथा च भ्रान्तिः कथं भ्रमः स्यादिति शङ्कते—। [d]"तत्रे"ति । सति भेदे प्रतीतिमात्रमस्तु भिन्नत्वप्रतीतिस्तु भेदे भेदान्तरमन्तरेण भवन्ती भ्रान्तैव स्यादित्याह—। [e]"भिन्ने"ति । न हि स्व स्वेनैव विशिष्टमिति भावः । भेदान्तर वैशिष्ट्ये त्वाह—। [f]"अनवस्थे"ति ॥

सू० [a]अथ तदुभयविषयव्यतिरेकेणैवात्र सा सत्या [b]अन्यत्र तर्हि ततोऽन्याद्दृशविषया मिथ्या स्यादित्यलं पल्लवेन । [c]यत्तु सत्तैवेत्युक्तं त [d]त्कटकगवोदाहरणं नुहरति यतः सत्ताप्यमुना दूषणेनास्माभिः खण्डनीया यत्पुनरभिधीयते किमेतेन भेदखण्डनवादिभिरभिहितं भवति किं भेदज्ञानमेव नास्ति सदपि वा, नित्यमनित्यमपि, वा निर्हेतुकं सहेतुकमपि, वा निर्विषयं सविषयमपि, वा बाध्यमानविषयं वा? । तत्र प्रथमः ॥

टी० ॥ [a]"तदुभये"ति । भेदतदाश्रयरूपमुभयमित्यर्थः । भेदमन्तरेणैव विशिष्टप्रतीतिश्चेत् सत्या तदा भेदे सति तद्विशिष्टप्रतीतिर्मिथ्या स्यात् सत्यत्वप्रयोजकविषयवैषम्यादित्याह—। [b]"अन्यत्रे"ति । सतैव सद्व्यवहारमिति यदुदाहृतं तत्राह—। [c]"यत्त्वि"ति ॥ [d]"कटकगवे"ति । यथा कटके बद्धा गौरन्यतर कुमादाय विद्रवति विद्रवद्भिरश्वैः सह तथामुना खण्डनेन

विद्रुवता भेदेन तथापि विद्रुविष्यतीत्यर्थः यद्वा यथा घटके गौरवमापादनेनापि पुनरन्यथैवायाति तथा बहुधः खण्डितापि सता पुनरुदाहरणत्वेनायातीत्यर्थः। भेदखण्डने यदुद्धनाचार्यैः समाहितं तत्खण्डनाय शङ्कते— [e]"यदि"ति। भेदग्राहिकां सामग्रीं खण्डयद्भिः खण्डनवादिभिः किमभिहितमित्यर्थः॥

सू० [a]सर्वतो विरोधादनुत्तरः द्वितीयः [b]सुषुप्त्यवस्थानुरोधादुपेक्षणीयः। तृतीयोऽपि [c]विरोधाद्धेयः। चतुर्थस्तु [d]भेदोल्लेखादेव त्याज्यः। पञ्चमस्तु चिन्त्यते [e]किमेतेष्वन्यतमोऽस्य विषयः तदन्यो वा ?। द्वितीये [f]किमेताभिर्न्यायाधिकरणानुपपत्तिभिस्तस्य बाध्यते [g]एवं हि चौरापराधेन माण्डव्यनिग्रहः स्यादथान्यतमात्मा न (१)तत्रापि यदि धर्मान्तरमेवेति तत्त्वं तदाऽनवस्थाभयात्तदधिकः प्रवाहस्त्यज्यताम्॥

टी०॥ [a]"सर्वत"इति। अप्रतीतस्य भेदस्य निषेद्धुमशक्यत्वाद्यदि भेदज्ञाने भेदो नास्तीति शब्दप्रयोगव्याघातात् भेदग्राहिका सामग्री नास्तीति(२)तत्परिच्छेदमन्तरेण निषेधानुपपत्तेः। भेदवादिनं प्रति वाक्यस्य सार्थकत्वे तत्वादिस्वापरिचयात् पदानां भेदेन ज्ञानमन्तरेण वाक्यप्रयोगाभावात् भेदवाद्यपेक्षया स्वस्य भेदग्रहमन्तरेण कथोपक्रमाभावात् साधनीयदूषणीययोर्भेदज्ञानमन्तरेण कथायामप्रवृत्तेः साधनदूषणभेदग्रहमन्तरेण तत्प्रयोगानुपपत्तेः। साधकबाधकप्रमाणभेदग्रहं विना कथायामप्रवेशात् भेदस्य निषेध्यत्वेनापि ज्ञानमन्तरेण निषेधानुपपत्तेरिति सर्वतो विरोध इत्यर्थः॥ [b]"सुषुप्तौ"ति। ज्ञानाभावकालस्य सुषुप्तित्वादित्यर्थः॥ [c]"विरोधादि"ति। अनित्यत्वस्य सहेतुकत्वेन व्याप्तत्वादित्यर्थः॥ [d]"भेदोल्ले-

(१) क्वचित्पुस्तके नेति नास्ति।

(२) भेदग्राहिका सामग्री नास्तीति निषेधानुपपत्तेरित्यन्वयः।

णा"दिति। उल्लिख्यमानस्यैव विषयत्वादित्यर्थः॥ e"एतेष्वि"ति। स्वरूपान्योन्याभाववैधर्म्येष्वित्यर्थः॥ f"किमि"ति। अन्यतमखण्डनेऽपि भेदो न खण्डित इत्यर्थः॥ g"तत्र हे"ति। धीरः पलायित एव मातङ्गयस्तु महर्षिः शूलमारोपित इति तद्द्वेषोऽपि न दूषयितुं परितोऽन्यत् दूषितमित्यर्थः॥ h"धर्मान्तरमि"ति। वैधर्म्यमित्यर्थः॥

मू० a तस्य तु कुतस्त्यागः न ह्यनवस्था प्रतिभासमानमर्थं निवर्तयति किं तु प्रवाहं परिहारयति गन्धे गन्धान्तरवत्। अथेतरेतरभावमेव भेदज्ञानमालम्बते तत्रापि(१) b आत्माश्रयः तेन हि भेदे ज्ञानमेव न स्यात् अस्ति चेत्ततो हेत्वन्तरमाक्षिपेत् न तु स्वात्मनि स्वयमहेतुत्वे स्वयमेव निवर्त्तते। c अविद्यावशादिति चे d त्किं चातः। न ह्यविद्येत्येवात्मयनिवृत्तिः तथा सति घटादयोऽपि कुलालादिनिरपेक्षाः स्वयमेव भवेयुः e अथात्माश्रयादिदोषोपहततया न तत्स्यैव कारणमतो यतः कुतश्चित्तस्य जन्म तच्च दुर्निरूपम्। अतोऽविद्येत्युच्यत इति विचारार्थः नास्ति तर्हि विवादः॥

टी० ॥ a"तस्य त्वि"ति। अनुभूयमानस्येत्यर्थः। b"आत्मे"ति। इतरेतराभावप्रतियोगित्वेन ज्ञानमितरेतराभावग्रहकारणं चेत् तदात्माश्रय इति यदुक्तं तन्न। भवति इतरेतराभावज्ञानेन त्वदभ्युपगतेन स्वं प्रति कारणान्तरस्याक्षेपादित्यर्थः॥ c"अविद्ये"ति। अविद्या भेदग्रहे कारणमित्यर्थः। अविद्यावशादपि सत्कारणसापेक्षमेवेत्याह— d"किञ्चात"इति। अविद्यावशा-

(१) क्वचित्पुस्तके तत्रापीत्यस्य स्थाने तदापीति पाठः।

देश घटादयोऽपि स्युस्तथा च दूरकारणसाधा अपि घटादये न कारण स्युरित्यर्थः । तदेव कारणं भेदज्ञानं प्रति घटादिकं च दुर्वचमित्यर्थविद्यात इत्युक्तं न त्वविद्या कारणत्वेनाभ्युपगता मयेत्याशङ्कते–, a"अथे"ति । भेदज्ञानं तावद्भेदविषयकं भेदहेतुकं चेति वचनभङ्गिभेदेन स्वयऽपि स्वीकृतमित्यर्थः ॥

सू० "नच तदपि दुर्निरूपं, प्रतियोगिरूपत्वेनाप्रतीताव-धिकरणस्वभावत्वेनाधिकरणाप्रतीतिः अधिकरण-स्वभावत्वेनास्मृतौ प्रतियोगिस्मृतिश्चेतरेतराभाव-ग्रहणकारणमिति निरूपणात् ॥ * अथ स्वरूपमेव भेदप्रतिभासस्य विषय इति तत्त्वं * तथापि bसहप्र-योग एवानुपपन्नः परिहीयतां भेदेन तु किमपराद्धं सोऽपि दृश्यत इति चेत् सत्यम् । cनैमित्तिकस्तु स्यान्न स्वरूपतः । न हि घटमानय घटमवलोकयेत्यादौ भेदपदमपि प्रेक्षावानुपादत्ते व्याख्यायां तु सूक्ष्म-बोधनार्थं घटः कुम्भ इति वत्सहप्रयोगोऽपि न दोषः dतथापि कः परमार्थः ।

टी० ॥ a"न चे"ति । अधिकरणग्रहणं प्रतियोगिस्मरणं च भेदग्रहकारणं न त्वधिकरणत्वेन प्रतियोगित्वेन वा तदुभयज्ञानं कारणं येनान्योन्याश्रयः स्यादित्यर्थः ॥ स्मृतिरित्युपलक्षणमनुभवोऽपि क्वचित्प्रयोजकः क्व पि चान्तरा स्मृतिकल्पनमित्यर्थः ॥ b"सहप्रयोग" इति । घटस्वरूपं भेद इति सहप्रयोगः । यद्वा घटो भिन्न इति सहप्रयोगः । घटस्य भेद इति तु राहोः शिर इति वदुपपाद्यम् । c"नैमित्तिक"इति । सञ्ज्ञापरिचायननिमित्तकः यथा पिकः कोकिल इति पर्यायान्तरसहप्रयोग इत्यर्थः ॥ d"तथापी"ति । भेदपदस्य नानार्थत्वापत्तेरित्यर्थः ॥

मू० [a]यथायथं त्रयमपि [b]घटस्य हि घटाद्यात्मना प्रतीतिः अपटाद्यात्मना च प्रतीतिः ततो [c]वैशिष्ट्यप्रतीतिश्चेत्यनुभवसिद्धं तत्राभावस्य [d]प्रथममात्रमभावान्तरभावात् सामान्यादिषु त्रिषु [e]द्वयं धर्मान्तराभावात् द्रव्यादिषु त्रयं त्रयस्यापि तत्र सम्भवात् ॥ भवति हि पटोऽयं न घटः तन्तुमयश्चेति । [f]गन्धोऽयं न रूपं सुरभिश्चेति ॥

टी० ॥ [a]"यथायथमि"ति । पूर्वोक्तद्युत्पत्तित्रयमाश्रित्य नानार्थ एवायं भेदशब्द इत्यर्थः ॥ यद्वा द्रव्यगुणकर्मसु त्रयमपि सामान्यविशेषसमवायाभावेषु स्वरूपभेदमात्र(१)मित्यर्थः ॥ यद्वा सर्वत्र भेदत्रयमेव यथायथं तु सामग्रीवशात् ग्रहणमित्यर्थः ॥ क्रमेणाभावत्रयप्रतीतिः प्रमाणयति । [b]"घटस्य ही"ति । घटादेरित्यर्थः । तेन घटाद्यात्मनेत्यविरोधः ॥ [c]"वैशिष्ट्यप्रतीति रि"ति । वैधर्म्यप्रतीतिरित्यर्थः । [d]"प्रथममात्रमि"ति । स्वरूपभेदमात्रमित्यर्थः । एतच्च सुप्रतिपद(२)येोक्तम् । अभावेष्वऽधिकरणप्रतियोगिरूपवैधर्म्यसत्त्वात् ॥ [e]"द्वयमि"ति । स्वरूपभेदेतरेतराभावरूपमित्यर्थः ॥ यद्यपि सामान्ये सामान्यान्तराभावेऽपि व्यक्तिरेव वैधर्म्यं विशेषसमवाययोरप्याश्रयो वा निरूपकान्तरं वा यथायथं वैधर्म्यमस्ति तथापि तत्र सामान्यभावमात्रविवक्षयेदमुक्तं पटोऽयमिति स्वरूपभेदग्रहप्रकारः न घट इत्यन्योन्याभावग्रहस्य तन्तुमय इति वैधर्म्यस्य द्रव्ये त्रयमुक्त्वा गुणेष्वाह—। [f]"गन्धोऽयमि"ति ॥

(१) स्वरूपभेदमात्रम्=स्वरूपभेदोभयमात्रमित्यर्थः ।

(२) सुप्रतिपदतया=स्फुटतया वस्तुतस्त्वभावे वैधर्म्यभेदोऽप्यस्तीत्यंशद्वैता—प्रभावेति ।

सू० [a]गतिरियं नोत्क्षेपणं तिर्यक् चेति [b]लक्षणं तु स्वरूपभेदस्य ताद्रूप्येणाप्रतीतौ प्रतीतिः इतरेतराभावस्य त्वबाधितः समानाधिकरणो निषेधप्रत्ययः वैधर्म्यस्य तु [c]विरोधः [d]स चैकधर्म्यसमावेश इत्येवमादिरिति । अत्रोच्यते । तथाहि-[e]यत्तावत्पृष्टं किमेतेष्वन्यतमात्मास्य विषयस्तदन्यो वेति तन्निर्वचनवादिनि शोभेत नास्मासु प्रतिभासमानोऽयं भेदः स्वरूपादिपक्षान्तर्भावानन्तर्भावाभ्यां चासद्सत्त्वाभ्यां वान्येनापि वा धर्मेण येन निरूप्यमाणोऽन्वयेन च व्यतिरेकेण वा बाध्यतामेति तेन सर्वथानिर्वचनीय इति भ्रमः । एतच्च न केवलं भेदस्यापि तर्हि जगत एवानिर्वचनीयवादश्चायं यथा तथोदितं प्राक् । यदप्युक्तमयान्यतमेत्यादि ग्रन्थे ग्रन्थान्तरवदित्यन्तम् । तदपि न साधु । यथा युक्त्यैकस्वीकारस्तथैव प्रवाहस्वीकारस्य दुर्वारत्वात् ॥

टी० ॥ क्रमेण्याह—[a]"गतिरियमि" ति । प्रत्येतव्यस्य प्रतीतिरेव लक्षणं सुप्रतिपदमिति क्रमेण तदाह—[b]"लक्षणं त्वि" ति ॥ [c]"विरोध" इति । विरुद्धधर्मप्रतीतिरित्यर्थः । सहानवस्थानं विरोध इत्याह—[d]"स चे"ति । यद्वा प्रतीतिपदेन प्रत्येतव्यमेवोक्तं तेन प्रतियोगिसमानाधिकरणो भाव इतीतरेतराभावलक्षणमित्यर्थः । निर्वचनाय प्रश्न एवानिर्वचनवादिनि न घटते तथाच किमेतेनेत्यादिप्रश्नानुपपत्तिमाह—[e]"यत्तावदि" ति ॥ [f]"यथा युक्त्ये"ति । भेदप्रतीत्यन्यथानुपपत्त्या प्राथमिकभेदवत्त्रापि (१) तत्प्रतीतिरिति तदन्यथानुपपत्तिरविशिष्टेत्यर्थः ॥

सू० [a]"तत्र यदि प्रवाहस्वीकारे तस्या असाधकत्वं स्वीक्रियते एकस्वीकारेऽपि स्यात् । अविशिष्टलक्षणत्वात् ।

(१) तत्रापि = द्वितीयेऽपि ।

[b]अत एव प्रतिभासमानत्वादेकस्वीकार इत्यप्ययुक्तम्। [c]एकप्रतिभासिकाया युक्तेः सर्वसाधारण्यात्। [d]नहि प्रत्यक्षादेव जायमानः प्रतिभासः प्रमाणं नानुमानादेरित्यत्र युक्तिरभ्युपगमो वा तव। [e]न चानवस्था प्रसञ्जिका युक्तिरनुमानादेरन्या नाम। [f]तर्कस्यापि व्याप्तिमूलत्वं ॥

टी० ॥ प्रवाहे तस्या युक्तेराभासत्वे प्रथमोऽपि भेदो न स्यात् साधकाभावादित्याह—। [a]"तत्रे" ति। ननु प्राथमिके भेदे युक्तिर्न प्रमाणं किन्तु प्रत्यक्षमेवेत्यत आह—। [b]"अत एवे" ति। प्रत्यक्षमाभासं मन्यमानाय त्वया युक्तिरवश्यं वाच्या सा च साधारणीत्याह—। [c]"एके" ति। ननु द्वितीयादिभेदगोचरं प्रत्यक्षमाभासतयापि सन्दिह्यमानं नास्तीत्यत आह-। [d]"नही" ति। ननु भेदप्रवाहे युक्तिरपि नास्तीत्यत आह—। [e]"नचे" ति। भेदे भेदान्तरानभ्युपगमे तस्य स्वाश्रयाभेदे भेदस्वरूपमेव न स्यादिति तत्र तत्रावश्यं भेद इत्यनवस्थाप्रसञ्जिका युक्तिरनुमानमेवेत्यर्थः। ननु तर्क एवानवस्थाप्रसञ्जको नानुमानमत आह—। [f]"तर्कस्यापी" ति। तथाच तर्केणापि सिद्ध्यन् प्रवाहो व्याप्तिबलादेव सेत्स्यतीत्यर्थः। तर्केऽपि विपर्ययावसानमेव मूलं तच्चानुमानमेवेति भावः ॥

मू० "सर्वं चानुमानच्छायामापद्य दूषणमपि प्रवर्त्तते इति भवत एव व्युत्पादनम्। [b]अतोऽनवस्थाप्रसञ्जिकाया युक्तेर्दोषो वा वक्तव्यः त्यक्तव्यो वा स्वपक्षः। प्रवाहस्वीकारवदेकस्वीकारे नाऽनवस्थेति चेत् तत्किमनवस्थाभावविशिष्टायास्तस्या युक्तेः साधकत्वं मन्यसे?। एवं तर्हि द्वितीयमात्रस्वीकारेऽपि नानवस्थेति द्वितीयस्वीकारप्रसङ्गः। ओमिति चेत् परार्द्धपर्यन्तप्रवाहस्वीकारं को वारयिता ?। नैतावन्मात्रेण तुष्यति भवान् परार्द्धादप्यधिकमेकादिकं किं नाभ्युपगम्यते

इत्यपि भवता वक्तव्यमेव तथाच सैवानवस्थेति चेत् । सत्यम् । तस्यास्तु भवात्कीदृशमभ्युपगम्यतामिति निपुणं मन्त्रयावहे । इत्यादिकं परित्यज्यतामिति चेत् । [d] एकस्मिन्नाम कीदृशोऽनुग्रहः येनानवस्थाप्रवाहनिवेशाविशेषेऽपि द्वित्यादिकमुपेक्षितमेकं तु रक्षितम् । द्वितीयमादायानवस्थेति चेत् । द्वितीये यदि भवतोऽनुग्रहः स्यात् ॥

टी०॥ भवतु वा तर्कोऽनवस्थाप्रसञ्जकस्तथाप्यनुमानस्याबाधक एव स प्रयोज्य इत्याह—। [a] "सर्वमि" ति। असिद्ध्यादिकमपीत्यर्थः। तथाच भेदेऽपि भेदप्रतीत्यन्यथानुपपत्तिर्यद्यनाभासा तदानवस्थैव यदि चाभासा तदा प्राथमिकोऽपि भेदो न सिद्ध्येदित्याह- [b] "अत" इति । नन्वनवस्थादोषादेव प्रवाहो न सेत्स्यतीत्याह—। [c] "प्रवाहे" ति। यथा द्वितीयो भेदोऽनवस्थामूलत्वेन त्यज्यते तथा प्रथमोऽपि त्यज्यतामविशेषादित्याह—। [d] "एकस्मिन्नि" ति ।

मू० [a] तृतीयमादायानवस्थेत्यभिधाय सोऽपि रक्षितः स्यात् । तावेतौ भवतो रागद्वेषौ निःश्रेयसाय यतमानस्य मानसमास्कन्दमानौ न कल्याणोदर्कौ तर्कयामि । [b] गन्धे गन्धान्तरप्रसञ्जिका च न युक्तिरस्ति। [c] तदस्तित्वे का नो हानिः। [d] तस्या अप्यस्माभिः खण्डनीयत्वात्। यदप्ययेतरेत्यादिति निरूपणादित्यन्तं [e] तदप्ययुक्तम् । तथाहि-इतरेतराभावज्ञानं भेदव्यवहारहेतुं मन्यते यस्तस्य पक्षो नोपपन्न आत्माश्रयप्रसङ्गादित्येवं प्रमाणस्य न किञ्चिद्बाधकमुक्तं स्यात् [f] प्रतियोगिरूपत्वेनेत्यादिसमाधानं च प्रागेव दूषितम् । अथ स्वरूपमेवेत्यादि न दोष इत्यन्तं यदुक्तं तदप्यस्मदनुक्तदोषदूषणमित्युपेक्षितम्। यदपि

तथापि के इत्यादि तिर्यक् चेत्यन्तं तदपि गर्तव-र्त्तिगोधामांसविभजनन्यायमनुहरति । पक्षत्रयस्या-प्युक्तयुक्त्या आच्छादितस्य दर्शयितुमशक्यत्वेन त-द्विभागव्यवस्थितेरनवसरनिरस्तत्वात् ॥

टी० ॥ यथा द्वितीयस्तथा तृतीयश्चतुर्थोऽपीति क्रमेणैके कमात्राभ्युपगमे द्वितीयपक्षानवकल्पेत्याह—। [a]"तृतीयमि" ति ॥ [b]"गन्धे" इति । नहि गन्धे गन्धविशिष्टप्रतीतिर्यदन्यथानुपपत्त्या गन्धेऽपि गन्धः स्यान्न वा?। तदनभ्युपगमे प्रथमोऽपि गन्धो न स्यादित्यर्थः । अनवस्थया गन्धोऽपि वा मा सिद्ध्य त्वित्याह—। [c]"तदस्तित्व" इति । [d]"तस्या अपी"ति । गन्धसाधिकाया युक्तेरित्यर्थः । अथेत्यादिनिरूपणादित्यन्तेनेतरेतराभावाग्रहसामग्रीपर्यवसायिका युक्तिरुक्ता तां खण्डयति—। [e]"तदप्ययुक्तमि" ति । एतावताप्यात्माश्रयपरिहारो न कृत इत्यर्थः । ननु यदि प्रतियोगित्वेन प्रतियोगिज्ञानं तन्त्रं स्यात्तदात्माश्रयः स्यान्नत्वेवमित्यत आह-। [f]"प्रतियोगी" ति । एवं सति निषेध्यनिषेधसाङ्कर्यं स्यादित्यादिना दूषितत्वादित्यर्थः ॥

मू० [a]यत्तु स्वरूपभेदस्य लक्षणमुक्तं ताद्रूप्येणाप्रतीतौ प्रतीतिरिति तदप्ययुक्तम् । [b]यदेकमेव वस्तु भ्रान्त्या भिन्नमिति प्रतीयते तत्र [c]ताद्रूप्येणैकरूपतया प्रतीतिर्नास्ति अस्ति च प्रतीतिः । नच स्वरूपभेद इत्यतिव्याप्तिः । ताद्रूप्येणेत्यस्य धर्मान्तररूपभेदासङ्कीर्णोदाहरणार्थत्वात् । प्रतीतिरभ्रान्ता विवक्षिता ?*—इति चेन्न, [d]स्वरूपप्रतीतेस्तत्राप्यभ्रान्तत्वात् । [e]यत्र स्वरूपमात्रेण प्रतीयते वस्तु न ताद्रूप्येण । न च नानात्मतया वस्तुगत्या चैकमेव तत्रापि स्वरूपलक्षणो भेदः स्यात् ॥

टी० ॥ स्वरूपभेदे सहप्रयोगानुपपत्तिर्न यथोक्ता येन

मतप्रतिपत्त्यनुरोधेन समाहिता किन्तु दोषान्तरमुक्तं तत्र समाहितमित्याह—। "a"यत्र"ति । "यद्येकमेवे"ति । यत्र चन्द्रद्वयधीरस्ति तत्रैकस्यापरात्मतया प्रतीतिर्नास्ति । अतस्ताद्रूप्येणाप्रतीतौ प्रतीतिरस्ति ननु द्वित्वेन प्रतीयमानस्य स्वरूपभेदोऽस्तीत्यर्थः । ताद्रूप्येणेत्यस्य विवरणमेकरूपतयेति । ननु ताद्रूप्येणाप्रतीतावित्येव तत्र नास्तीति कथमतिव्याप्तिरित्यत आह—। b"ताद्रूप्येणेत्यस्ये"ति । धर्मान्तररूपो यो भेद इतरेतराभावात्मा वैधर्म्यात्मा च तदन्यतरस्याग्रहणं ताद्रूप्येणाप्रतीतावित्यस्यार्थः । तथा च यस्यान्योन्याभावो वैधर्म्यं वा यत्र तत्र ताद्रूप्येणाप्रतीतिर्विवक्षिता सा (1) च चन्द्रद्वयदर्शनेप्यस्ति । नहि तत्र चन्द्रयोरन्योन्याभावो वैधर्म्यं वेति भावः ॥ c"स्वरूपप्रतीतेरि"ति । चन्द्रादिस्वरूपप्रतीतेरित्यर्थः । नैकरूपतया न वा नानारूपतया यत्प्रतीयते तत्र लक्षणगमनादतिव्याप्तिरित्याह "यत्रे"ति ॥

मू० a नास्त्येवेदृशमुदाहरणम् । ताद्रूप्याताद्रूप्याभ्यामेकस्यावश्यं प्रतीते(2)रिति चेत् । प्रतीतिकलहानवकाशात् (3) bभवति हि यत्त्वया दृष्टं तत्किमेकमनेकं वा इत्यनुयुक्तौ नायं विशेषो मया शङ्कितो जिज्ञासितो वा स्वरूपमात्रं तु प्रतीत्याहमुदासीनोऽभूवमित्यभिधत्त इति । * cननु तदपि स्वरूपं भेद एव कस्मादपि तत्कथमुक्तदोषावतार ? *—इति dमैवम्, एवं ताद्रूप्येणाप्रतीताविति व्यर्थं स्यात् । प्रतीतिमात्रलक्षणं वक्तव्यं e"यत्प्रमेयं तत्कस्मादप्यवश्यं भिन्नमित्ये fकस्यैव स्वस्माद्भेदप्रसङ्गनिराकरणार्थमपि ताद्रूप्येणाप्रतीतावित्युक्तं "तच्च खण्डितमिति

(1) सा=प्रतियोगिभूता । (2) "नहि कश्चाभ्युपगमे च प्रतीतिविरोध" इति शेषः । (3) प्रतीतिकलहानवकाशात्=प्रतीतिविरोधानवकाशात् ॥

* ताद्रूप्य(१)मन्यरूपत्वं विवक्षितम् ? *—इति चेन्न, तदा(२)हि तदानुपस्थापितपरामर्शवदन्यत्वस्य स्वरूपभेदत्वे आत्माश्रयः ॥

टी० ताद्रूप्याताद्रूप्ययोरन्यतरप्रकारेण प्रतीतिध्रौव्यमाशङ्कयाह—। a"नास्ती"ति। ताद्रूशी प्रतीतिमुपपादयति—। b"भवति ही"ति। स्वरूपमात्रप्रतीतौ ताद्रूप्याताद्रूप्यप्रकारयोरभावादित्यर्थः ॥ ननु तद्रूपमपि तत्रास्त्येवेति नानिष्टापत्तिरित्याह—। c"नन्वि"ति। सर्वप्रतीतिविषये स्वरूपभेदस्य सत्त्वस्य सत्वात्तदितरविशेषणवैयर्थ्यमित्याह—d"नैवमि"ति। एतदेवोपपादयति—। e"यदी"ति। ननु ताद्रूप्येणाप्रतीतावपि यदि न कल्प्यं तदा स्वस्मादपि स्वस्य स्वरूपभेदो भवेदित्याह-। f"रूपस्यैवे"ति। g"तच्चे"ति। यत्र ताद्रूप्याताद्रूप्याभ्यां न प्रतीतिः किन्तु स्वरूपप्रतीतिमात्रं तत्रापि स्वरूपभेदः ...दित्यनेन खण्डितमित्यर्थः ॥ h"तदा ही"ति। तच्छब्दे...: । तदानीमन्यतोऽनुपस्थितस्यैव स्वयं परामर्शे यथात्माश्रयस्तथा स्वरूपभेदज्ञानाधीनमेव स्वरूपभेदज्ञानमित्यात्माश्रय एव । अन्यशब्दस्य(३)स्वरूपभेदार्थत्वात् ॥

मू० a"सर्वस्वरूपाणां लक्ष्यत्वात् b"अन्योन्याभावत्वे चाऽन्योन्याश्रयः c"वैधर्म्यं च चक्रकम्।d * यदपीतरेतराभावस्य लक्षणमबाधितः समानाधिकरणो निषेधप्रत्यय * इति तदप्यशोभनम्। e"समानाधिकरणइत्यादिभाषायाः कथमऽपि|तात्पर्यगवेषणेऽपि समानाधिकरणो यो निषेधस्तत्प्रत्ययविषयोन्योन्याभाव इति तात्पर्यपर्यवसाने सामानाधिकरण्य इति ॥

(१) ताद्रूप्यम्=स्वरूपभेदान्यरूपत्वम् । (२) तदा = तच्छब्देनेत्यर्थः । तदेति शब्दान्तरं चाध्याहार्यम् । तदा (परामृष्टस्या) ऽन्यत्वस्य स्वरूपभेदत्वे-इत्यन्वयः । (३) अन्यशब्दोऽन्योन्याभावप्रातियोगिपरत्वेन स्वरूपभेदस्य वाचकः ।

टी० तर्हि स्वरूपभेदान्तरज्ञानाधीनं स्वरूपभेदज्ञानान्तरमेवास्तु तथाच नात्माश्रय इत्यत आह–। a"सर्वे"ति । ननु तच्छब्दोऽन्यपरोऽन्यश्चान्योन्याभावप्रतियोगीति नात्माश्रय इत्यत आह–। b"अन्योन्ये"ति । तच्चान्योन्याभावग्रहाधीनः स्वरूपभेदग्रहस्तदधीनश्चान्योन्याभावग्रह इत्यन्योन्याश्रय इत्यर्थः । नन्व यच्छब्दोऽन्यपरोऽन्यश्च तद्विधर्मेति नात्माश्रयान्योन्याश्रयावित्यत आह–। c"वैधर्म्यैति चे"ति । वैधर्म्यग्रहाधीनः स्वरूपभेदग्रहस्तदधीनश्चान्योन्याभावग्रहस्तदधीनं च पुनर्वैधर्म्यज्ञानं तथाच चक्रकवैधर्म्यं हि तदन्योन्याभावसमानाधिकरणधर्मत्वमित्यर्थः । निषेधप्रत्ययस्य सामानाधिकरण्यं केनेति वाच्यम् । प्रतियोगिना चेत् तदा प्रत्यय आत्मनि प्रतियोगी च घटादिरन्यत्रेति भाषेयमनादेयेत्याह–। d"यद्पी"ति । तात्पर्यमाह–। e"सामानाधिकरण"इति ॥

सू० a"किं तुल्याश्रय, उतैकाश्रयः, उत b"तादात्म्यप्रतियोगिकः, उताधिकरणीभूतपदार्थवाचिशब्दविशेषणविशेष्यभावव्यवस्थितपदाभिधेयः, उतान्यदेव? । तत्र न प्रथमः । तुहिनमयूखे प्रियमुखे च न तूपणकणस्यापि सम्भव इति प्रत्ययस्यापि दर्शनात् ।* d"तत्र मुखचन्द्रयोरन्योन्याभावोऽस्ति? *–इ(१)ति चेन्न,

टी० सामानाधिकरण्यं विकल्पयति–। a"किमि"ति । तुल्य आश्रयो यस्याभावस्य सोऽन्योन्याभाव इत्यर्थः । अपदार्थमपि तात्पर्यगतिमालम्ब्य विकल्पयति–। b"तादात्म्ये"ति । शाब्दं सामानाधिकरण्यमभिप्रेत्याह–। c"अधिकरणीभूते"ति । अधिकरणवाचिना शब्देन घटादिशब्देन विशेषणविशेष्यभावव्यवस्थितं यत्पदं तदभिधेयो योऽभावः सोऽन्योन्याभाव इत्यर्थः । तुहिनेति भवति घटः घटो न भवतीति घटान्योन्या-

(१) अत्र अपि शब्दोऽध्याहर्तव्यः । लक्ष्यीभूत इति च शेषः ।

भावत्वात् घट इत्यर्थः । तुहिनमयूखप्रियामुखे(¹)तुल्ये दूषणकणात्यन्ताभावस्याप्यधिकरणे इति तत्रातिव्याप्तिरित्यर्थः । यदि तत्रान्योन्याभावो न भवेत्तदातिव्याप्तिर्न त्वेवमित्याह ।[d]"तत्रे"ति । परिहरति–नेति । तत्प्रत्ययस्य यो विषयः सोऽन्योन्याभाव इति लक्षणं तत्प्रत्ययविषये मुखचन्द्रवर्त्तिकलङ्कदोषात्यन्ताभावेऽपि गतमित्यतिव्याप्तिरेवेत्यर्थः । यद्वा ननु यत्रायं प्रत्ययस्तत्र शीतमयूखयोरन्योन्याभावोऽस्तीति(²)नातिव्याप्तिरित्याह–। "तत्रे"ति ॥

मू० [a]तस्य(³)सत्त्वेप्युक्तप्रत्ययस्य तदविषयत्वात् [b]*मास्तु तद्विषयः लक्षणं त्वस्यैत(⁴)त्तच्च तदविषयत्वेऽपि न दुष्टम् ? *–इति चेन्न, कीदृशं तर्हीदं लक्षणम् । [c]न तावत्समानाधिकरणो यो निषेधः तत्प्रत्ययो यस्तस्य यो विषयः सोऽन्योन्याभाव इति । नापि [d]स एवान्योन्याभाव इति । [e]नापि यत्र सामानाधिकरण्ये भेदप्रत्ययस्तत्र योऽस्ति सोऽन्योन्याभाव इत्य(⁵)स्तु । [f]तद्धर्मस्य सर्वस्यान्योन्याभावत्वापातात् ॥

टी० ॥ [a]"तस्ये"ति । एतत्प्रत्ययप्रतीयमानत्व तत्र नास्तीत्यर्थः ॥ ननु लक्ष्यलक्षणयोर्विषयविषयिभावमन्तरेणापि व्यावर्त्तकत्वसम्भव इत्याह–। [b]"मास्त्वि"ति ॥ [c]"न तावदि"ति । प्रियामुखशीतमयूखयोर्या दूषणकणात्यन्ताभावस्तत्रातिव्याप्तेरित्यर्थः–। [d]"स एवे"ति । समानाधिकरणप्रत्यय एवेत्यर्थः । प्रत्ययस्यान्योन्याभावे लक्ष्ये वृत्त्यभावेन(⁶) लक्षणत्वानुपपत्तेरित्यर्थः । यद्वा समानाधिकरणनिषेधप्रत्ययविषय एवेत्यर्थः । संस-

(१) प्रथमाविभक्तिद्विवचनमेतत् । (२) यत्र दूषणकणाऽत्यन्ताभावोऽपि लक्ष्यीभूतोऽस्तीति नातिव्याप्तिरित्यर्थः । (३) तस्य=लक्ष्यीभूताऽन्योन्याभावस्य । उक्तप्रत्ययस्य = दूषणकणात्यन्ताभावप्रत्ययस्य । (४) अन्योन्याभावस्यैव चैतल्लक्षणमित्यर्थः । (५) 'अस्त्वि'त्यन्वयः ।

(६) लक्ष्ये वृत्तित्वाभावस्यात्यन्तवृत्तित्वाभावस्य चाभावः

भेदाभावस्तु ऽधिकरणनिषेधप्रत्ययविषयोऽस्तीत्यर्थः । समानाधि-करण(१)पदार्थविकल्पानुपपत्तेरित्यर्थः ॥ "नापी"ति । समाना-धिकरणनिषेधप्रत्ययसमानाधिकरणेऽभावोऽन्योन्याभाव इत्यपि नेत्यर्थः ॥ [f]"तद्धर्मेष्वि"ति । घटाद्यन्योन्याभावाधिकरणानां घटादीनां ये धर्मास्तेष्वतिव्याप्तिरित्यर्थः । आत्मनो च ये धर्माः प्रत्ययसमानाधिकरणास्तत्रातिव्याप्तिरिति वार्थः, प्रत्यय-त्वादौ वातिव्याप्तिरित्यर्थः ॥

मू० [a]समानाधिकरणपदवैयर्थ्यप्रसङ्गाच्च। [b]एतेनैकमुदाहर-णमादाय द्वितीयोऽपि निरस्तः। [c]नापि तृतीयः। ता-दात्म्यप्रतिसन्धानव्यतिरेकेण तत्प्रतियोगित्वस्य प्र-त्येतुमशक्यतया तन्निर्वचनप्रसङ्गात्।तच्चाशक्यम्। तथा हि-[d]तदेकत्वं वा भेदाभावो वा [e]स्वरूप त्वसम्भावित-म्। तस्य भेदत्वोपगमात्। [f]तस्मिन् दृष्टेऽपि तन्नवेति तादात्म्यसंशयानवकाशापत्तेः। [g]आद्योऽपि सङ्ख्या-विशेषो वा धर्मान्तरं वा ? ॥

टी० एवं सत्यत्यताभावाव्यवच्छेदे तदर्थोपादीयमानसमाना-धिकरणपदवैयर्थ्यमित्याह—। [a]"समानाधिकरणे"ति । एतेका-श्रय इति पक्षं दूषयति—। [b]"एतेने"ति । प्रियामुखशीतमयूखौ द्वावुदाहृतौ यौ तयोरेकमुदाहरणं प्रियामुखं शीतमयूखो वा तदादायेत्यर्थः। तथा च प्रियामुखे दूषककौ नास्तीत्यत्यन्ताभा-वेऽतिव्याप्तिरित्यर्थः । तत्र तादात्म्यप्रतियोगिक इति विकल्पितं पक्षं दूषयति—। [c]"नापी"ति । यद्यपि समानाधिकरणपदस्य नायमर्थः सम्भवति तथापि परविवक्षामात्रेण विकल्पः तादा-त्म्यस्य दुर्वचतया तत्प्रतियोगित्वं दुर्निरूपमित्यर्थः ॥ [d]"त-दि"ति । तादात्म्यमित्यर्थः ॥ [e]"स्वरूप त्वि"ति । परैः स्वरूपस्य भेदत्वमभ्युपगम्यते तेन तादात्म्यत्वेन सम्भवदपि न तद्विकल्पि-तमित्यर्थः । तादात्म्यं न स्वरूपमित्यत्रोपपत्त्यन्तरमाह—। [f]"त-

(१) नेति प्रतिज्ञायां हेतुमाह—समानेति ।

क्षिणि"ति । स्वरूपे दृष्टे तादात्म्ये संशयो न स्याद्यदि स्वरूपमेव तादात्म्यं स्यादित्यर्थः ॥ [g]"आद्ये" इति । एकत्वं स्वरूपं तत्रेत्यर्थः ।

सू० नाद्यः । गुणादौ तदभावप्रसङ्गात् । [b]प्रथमक्षणे कार्य-[c]द्रव्यस्यैकस्यापि स्वातादात्म्यप्रसङ्गात् [d]वैशेषिकमतव्युत्थाने चै [e]कत्वे तदभावप्रसङ्गात् । [f]उपाधिभिन्नावलम्बि च तादात्म्यं कथं स्वरूपमात्रावलम्बिनैकीकर्त्तुं शक्यम् । [g]विचित्रप्रतिपत्तिकत्वात् ॥

टी० ॥ [a]"गुणादावि"ति । गुणे गुणस्य सङ्ख्यायास्त्वयानभ्युपगमादित्यर्थः ॥ [b]"प्रथमे"ति । क्षणमगुणो भाव इति त्वया स्वीकारात् प्रथमक्षणे सङ्ख्यायास्तत्राभावात् ॥ [c]"द्रव्यस्ये"ति तादात्म्यं न स्यादित्यर्थः । ननु वैशेषिकस्य प्रक्रियेयं यद्गुणे गुणो न वर्त्तते क्षणमगुणो भाव इति न त्वस्माकमपीति नोक्तदोष इत्यत आह—। [d]"वैशेषिके"ति । व्युत्थानं विप्रतिपत्तिः ॥ [e]"एकत्वे" इति । आत्माश्रयभयेनैकत्वे त्वयैकत्वं नाभ्युपेयमिति तत्र तादात्म्यं न स्यादित्यर्थः ॥ ननु तदेकत्वं यदि तत्र वर्त्तेत तदात्माश्रयः सजातीयैकत्वप्रवाहाङ्गीकारे चानवस्था किन्तु भिन्नाभिन्नोपाधिघटितमेकत्वं तदेकत्वेषु वर्त्ततां तदेव च तेषां तादात्म्यमिति नोक्तदोष इत्यशङ्क्याह—। [f]"उपाधी"ति । तावतामुपाधीनामेकपदेनोपसङ्ग्रहीतुमशक्यानामसङ्ग्रहे लक्षणमिदं तादात्म्यस्य दुरुपपादनमेव स्यादित्यर्थः ॥ ननु तेऽप्युपाधय एकत्वपदेनैवोच्यतां को दोष इत्यत आह—। [g]"विचित्रे"ति । एकप्रकारिकया हि प्रतिपत्त्या ये विषयीक्रियन्ते घटादयस्ते घटादिपदेन सङ्ग्रहीतुं शक्यन्ते प्रकृते च तदभाव इत्यर्थः ॥

सू० [a]नापि द्वितीयः । तस्यापि धर्मान्तरापेक्षयानवस्थानात् । अनपेक्षायां स्वातादात्म्यप्रसङ्गात् । [b]नापि द्वितीयः । [c]नहि भेदस्याभावो भवन्नप्यन्योन्याभावस्यैव स्यादन्योन्याभावस्य तत्प्रतिक्षेपात्मकत्वात् ।

तेनाप्यन्योन्याभावप्रतिक्षेपात्मना भवितव्यं परस्परप्रतिक्षेपात्मकत्वात् निषेध्यनिषेधयोः तथाच सत्यन्योन्याभावप्रतीतिमन्तरेण तन्निरूपणमशक्यं निषेध्यप्रतीतिमन्तरेण च न निषेधबुद्धेरित्यन्योन्याश्रयः । [d]नापि तुरीयः । [e]निर्घटं भूतलमित्यत्रापि प्रसङ्गात् । [f]नापि पञ्चमः ॥

टी० ॥ धर्मान्तरं वेति पक्षं दूषयति—। [a]"नापी"ति । यद्धर्मान्तरमेकत्वं घटतादात्म्यं तत्र यदि धर्मान्तरमभ्युपगम्यते तदानवस्था यदि न तत्र धर्मान्तरं तदा तत्र स्वतादात्म्यमेव न स्यादित्यर्थः । मूलविकल्पे भेदाभावो वेति पक्षं दूषयति—। [b]"नापी"ति । तादात्म्यप्रतियोगिकोऽभावस्तादात्म्यं च भेदाभाव इत्यन्योन्याभावाभावपर्यवसन्न(१)एवेत्यन्योन्याभावेनैव तन्निरूपणमित्यात्माश्रयस्तादात्म्यमान्तरालिकं विवक्षित्वान्योन्याश्रय इत्याह । [c]"स ही"ति । समानाधिकरणीभूतपदार्थवाचिशब्दद्विशेष्यभावव्यवस्थितपदाभिधेय इति विकल्पं दूषयति—। [d]"नापी"ति । [e]"निर्घटमि"ति । अत्रापि निर्घटत्वभूतलयोर्विशेषणविशेष्यवाचिनी पदे निर्घटभूतलपदे विशेषणविशेष्यभावापन्ने एव तद्वाच्यत्वं तुल्यमिति संसर्गाभावेऽतिव्याप्तिरित्यर्थः । अन्यदेवेति पक्षं हि दूषयति- । [f]"नापि पञ्चम"इति॥

मू० [a]समानाधिकरण इति प्रतियोगिसमानाधिकरणो विवक्षितः तादृशश्च निषेधोऽन्योन्याभावः तत्प्रत्ययश्च तल्लक्षणमित्यस्याप्ययुक्तत्वात् भावासमानाधिकरणस्यान्योन्याभावस्य कुम्भः पटत्वं न भवतीत्यादेरव्यापानात् । [b]तज्जातीयतथात्वं च यं विशेषमन्योन्याभावे गतमादाय स्यात् तदेव लक्षणी-

(१) भेदाऽभाव इति शेषः । तथाचान्योन्याभावापेक्षायामात्माश्रयः ,

भवनसमर्थ(१)मुपजीव्यमानमस्य लक्षणस्योपन्या-
सं प्रत्यादिशति। नच तदपि सम्भवति, °अन्योन्या-
भावसंसर्गाभावभेदखण्डनप्रस्तावे निरस्तात्। प्रका-
रान्तरस्य चासम्भवात्॥

टी०॥ यद्यपि समानाधिकरणपदार्थविकल्पे(२)तद्विशिष्य तदनिरुक्तः पञ्चमविकल्पपर्यवसानं तथापि तदादायैव(३)दूषयति—। a"समानाधिकरण"इति। पटत्वस्यान्योन्याभावप्रतियोगिनः कुम्भावृत्तित्वात् सामानाधिकरण्याभावादव्याप्तिरित्यर्थः॥ ननु यद्यप्ययमन्योन्याभावो न प्रतियोगिसमानाधिकरणस्तथाप्यन्योन्याभावजातीयं किञ्चित्तथा भवत्येव। यथा भूतलं घटो न भवतीत्यादि। तथाच कथमव्याप्तिरित्यत आह—"तज्जातीयतथात्वं चे"ति। अन्योन्याभावजातीयत्वमेकमुपग्राह्यमन्तरेण दुर्निरूपमित्यर्थः॥ ननु तादात्म्यावच्छिन्नप्रतियोगिकाभावत्वादिनैकजात्यं स्यादित्यत आह। "अन्योन्याभावे"ति।

मू०a*नच पटः पटत्वं न भवतीत्ययमेवाऽभावः घटः पटत्वं न भवतीत्येक एव एवं प्रतियोग्यैक्येन मयाऽत्राभ्युपगमादिति क्वचित्प्रतियोगिसमानदेशत्वाल्लक्षणसिद्धिरिति* वाच्यम्। तथापि प्रतियोग्यैक्येन तदत्यन्ताभावैक्यापत्तेः bतादात्म्यवत्संयोगस्यापि द्विष्ठत्वाविशेषादतिव्याप्तेः cकालभेदेन च प्रागभावादेरपि प्रतियोगिसमानाधिकरणतयाऽतिव्याप्तेः॥

टी०॥ ननु य एव पटे पटत्वान्योन्याभावःप्रतियोगिसमानाधिकरणः स एवेतरस्मिन्नपि पटत्वान्योन्याभाव इति कथं लक्षणमव्यापकमित्याशङ्क्य निराकरोति—। a"नचे"ति।

(१) नटेन लक्षणीभवनसमर्थं प्रत्यादिशतीत्यन्वयः। (२) समानदेशेस्वस्मिन्विकल्पे इत्यर्थः। (३) तद्=विशेषकपदम्।

यद्यभिन्नप्रतियोगिकत्वाद्घटपटनिष्ठयोः पटत्वान्योन्याभावयो-रभेदस्तदा घटसंसर्गाभावान्योन्याभावयोरप्यभेद एव स्यादि-त्यर्थः । नन्वन्योन्याभावे घटपटतादात्म्यं द्विष्ठो धर्मः प्रति-योगी तदवच्छेदको वा न त्वेवं संसर्गाभावे इति तयोर्भेद इत्यत आह—। [b] "तादात्म्यवदि"ति । संयोगस्य संसर्गस्ये-त्यर्थः । तत्रापि(¹)संसर्गस्तथेति भावः । यद्वान्योन्याभावे द्वयं प्रतियोगि संसर्गाभावे तु न तथेति वैषम्यमित्यत आह—। [c] "तादात्म्यवदि"ति । तत्रापि संसर्गावच्छेदकतया द्वयं प्रतियोगीति भावः । प्रतियोगिसमानाधिकरणे संयोगात्य-न्ताभावेऽतिव्याप्तिपरोऽयं ग्रन्थः कालभेदेन प्रतियोगिसामा-नाधिकरण्यं प्रागभावप्रध्वंसयोरतिव्यापकमित्याह—। "काल-भेदेने"ति ॥

सू० [a] कालैक्येन विशेषणे च तदन्तोन्यव्यतिरेकाऽव्या-प्तेरिति । यदपि धर्मान्तरस्य लक्षणमवादि वैध-र्म्यस्य विरोधः स चैकधर्म्यसमावेश इति तदप्यु द्भ्रान्तमनसो भाषितम् । [b] तथाहि प्रमाणप्रमेययो-र्भेदोऽस्ति न वा ।। [c] न चे [d] त्तदभिधानस्य पर्याय-त्वप्रसङ्गः [e] किम्प्रमाणिका बुद्धिरित्युक्ते बुद्धेर्विष-येणोत्तरप्रसङ्गश्च । [f] नापि प्रथमः । स हि [g] न ताव-त् स्वरूपलक्षणः । तुलादिद्रव्यस्यैकस्याप्युभयभावद-र्शनात् ॥

टी० ॥ प्रतियोगिसमानकालीनत्वे विशेषणे कालान्यो-न्याभावाव्याप्तिरित्याह—। [a] "कालैक्येने"ति । न हि कालस-मानकालीनः कालस्यान्योन्याभावः । काले कालाभावादित्यर्थः । प्रमाणत्वप्रमेयत्वयोरेकधर्मिसमावेशेऽपि वैधर्म्यं त्वया वा-च्यमिति तल्लक्षणं तत्राऽव्यापकमिति(²) आह—। [b] "तथा ही"ति ॥ ननु तयोर्न वैधर्म्यं तत्कुतोऽव्याप्तिरित्याशङ्कते—।

(१) तत्रापि = संसर्गाभावेऽपि ।

(२) अव्याप्तिमेव दर्शयितुमत एवाहेत्यर्थः ।

[c] "मत्वे"ति । तर्हि प्रमाणप्रमेयपदयोः पर्यायत्वमित्याह—। [d] "तद्भिन्नाभत्वे"ति । पर्यायत्वे दोषान्तरमाह—। [e] "किं प्रमाणिके"ति । प्रमाणप्रश्ने प्रमेयेणोत्तरं स्यादित्यर्थः । [f] "नापि प्रथम"इति । प्रमाणप्रमेययोर्भेदपक्षोऽपि न घटत इत्यर्थः । भेदपक्षेऽप्यनुपपत्तिमाह—। [g] "न तावदि"ति । स्वरूपभेदे यदेव प्रमाणं तत्प्रमेयं न स्यादित्यर्थः ॥

सू० [a] अत एव नान्योन्याभावोऽपि । धर्मान्तरं तु तयोर्भेदः परिशिष्यते यतोऽन्येन रूपेण तत्प्रमाणमन्येन च तदेव प्रमेयमित्युच्यते । तथा च सत्येकधर्म्यसमावेशो लक्षणव्यापकं [b] सोऽयं "प्रमेया च तुलाप्रामाण्यवदि"ति पारमर्षमपि परामर्शव्यस्मार्षीदित्यास्तां विस्तरः * [c] ननु भेदप्रतिपत्तेस्तावत् प्रत्यक्षफलस्यार्थेन्द्रियसन्निकर्षः कारणं वक्तव्यं तच यश्चेन्द्रियसन्निकर्षस्य भेदप्रतीतिहेतोर्द्वितीयस्संबन्धी [d] स एव भेदोऽस्तु, न [e]उक्तबाधकैर्बाधितायाः प्रतीतेरर्थेन्द्रियसन्निकर्षकारणत्वाभावादिति । किञ्च तत्कारणत्वमेव [f] पूर्वभावित्वम् ? *— इति चेन्न । चिरा [g] नन्वयध्वस्तानामपि कारणत्वम् ! *—इति चेन्न ।

टी० ॥ स्वरूपभेदाभावेऽन्योन्याभावोऽपि न स्यादित्याह—। [a] "अत एवेति । नैयायिकमुपहसति—। [b] "सोयमि"ति । द्वितीयाध्याये प्रमेया च तुलाप्रामाण्यवदिति सूत्रं तदुभयनिमित्तसमावेशोपदर्शकं त्वया विस्मृतमित्यर्थः । कारणताखण्डनावतारं सङ्गमयितुं पीठकमारचयति—। [c] "नन्वि"ति । भेदसाक्षात्कारविषय एवेत्यर्थः । तथा च नान्योन्याभावादिविकल्पावकाश इति भावः ॥ [e] 'उक्ते"ति । तत्प्रतीतिविषयखण्डनमेव बहुशः कृतमिति न प्रतीतिरर्थजन्येत्यर्थः । अर्थकारणत्वाभावादिति बहुव्रीहिः ॥ [f] "पूर्वभावित्वमि"ति । पूर्ववर्त्ति-

त्वमित्यर्थः । चिरध्वस्तस्य यागादेः कारणत्वमिष्टमेवेति विभ्रि- नहि—। [g] "अनन्वये"ति । यागादेरन्वयोऽपूर्वादिव्यापारः ॥ [h] "अव्यवहिते"ति । चिरध्वस्तानां व्यवहितत्वात्कारणतिव्याप्तिरिति भावः ॥

सू० [a] व्यापारस्यैव कारणत्वप्रसङ्गात् * [b] व्यापारेण न व्यवधानम्? *—इति चेन्न, [c] कारणकारणस्यापि कारणत्वप्रसङ्गात् [d] * कारणस्यातद्व्यापारत्वान्नैवम्? *—इति चेन्न, । [e] विना विशेषोक्तिं तस्य दुर्विवेकत्वात् * [f] यद्विना यद्यन्न जनयति तत्तस्य तत्रावान्तरव्यापारः? *—इति चेन्न, । [g] सहकारिणामप्यवान्तरव्यापारत्वप्रसङ्गात् [h] * अन्यम्? *—इति चेन्न, [i] तथापि कारणत्वाव्यवस्थितो विशेषोक्तेरयु(१)क्तेः ॥

टी० ॥ [a] "व्यापारस्यैवे"ति । ननु यागादेर्व्यापारित्वोपीत्यर्थः ॥ [b] "व्यापारेणे"ति । स्वाङ्गम (२) प्यव्यवधायकमिति न्यायादिति भावः ॥ [c] "कारणे"ति । अन्यथासिद्धस्यापि कुलालपित्रादेरित्यर्थः । कुलालः कुलालपितुर्न व्यापार इति न तत्पितुः कारणत्वमित्याह—। [d] "कारणस्ये"ति । कारणकारणस्य कारणं व्यापारो न भवति यागादेस्तु कारणमेवापूर्वं व्यापार इत्यत्र नियामकं नास्तीत्याह—। [e] "विने"ति । व्यापारस्य दुर्विवेकत्वादित्यर्थः । व्यापारविवेकायाह—। [f] "यद्विने"ति । कुलालस्तु पुत्रमन्तरेणापि जनयति ननु यागोऽपूर्वमित्यर्थः ॥ [g] "सहकारिणामि"ति । नहि चक्रं विना दण्डो घटं जनयतीत्यर्थः ॥ [h] "जन्यमिति । तज्जन्यत्वे सति तज्जनकमित्यर्थः । तज्जन्यत्वं तत्कारणकमित्यात्माश्रय इत्याह—। [i] "तथापी"ति ॥

(१) अतिप्रसक्तेरित्यपि क्वाचित्कः पाठः ।

(२) स्वं यागस्तमङ्गमपूर्वम् ।

मू० [a] कथमपि वा विशेषोक्तौ गगनादेः सर्वत्र कार्य-हेतुत्वप्रसङ्गात् * [b] अनन्यथासिद्धपूर्वभावित्वम् ? *—इति चेन्न । वक्तव्यं हि [c] कस्मादन्येन प्रकारेण विना का च सिद्धिरिति । यदि [d] कार्यादन्येन प्रकारेण न निष्पत्तिस्तदाऽसिद्धत्वम् । नहि कार्येण कारणस्योत्पादनं [e] नापि कार्यादन्येन प्रकारेण न ज्ञप्तिः प्रत्यक्षादेरपि कारणत्वज्ञप्तेः । न खलु सर्वा कार्यलिङ्गजा कारणस्य ज्ञप्तिः । [f] नापि कारणत्वाद्व्यतिरिक्तेन प्रकारेण न निष्पत्ति(१)र्ज्ञप्तिर्वा । [g] ज्ञप्तावात्माश्रयात् । अन्यथापि ॥

टी० ॥ ननु तज्जन्यत्वं तदुत्पाद्यत्वं न तु तत्कारणकत्वमिति नात्माश्रय इत्यत आह—। [a] "कथमपी"ति । अव्यवहितपूर्वभावित्वं सर्वकार्यापेक्षया गगनस्येति तत्रातिव्याप्तिरित्यर्थः ॥ ननु शब्दं प्रति कारणत्वे गृहीते कार्यान्तरं प्रत्याकाशस्य पूर्ववर्तित्वं गृह्यत इति तत्र तदन्यथासिद्धत्वादकारणमित्याह—। [b] "अनन्ये"ति । अन्यत्वस्य सप्रतियोगिकत्वनियमात् सिद्धेश्चोत्पत्तिज्ञप्तिसाधारणत्वाच्चैवोऽयं पृच्छति—। [c] "कस्मादि"ति । सन्निहितत्वेन कार्यमेवान्यत्वप्रतियोगितया शङ्कते—। [d] "कार्यादि"ति । ननु कार्येण कारणं न जन्यते यद्यपि तथापि ज्ञाप्यत इति कार्यादेव ज्ञप्तिः स्यादेवानन्यथासिद्धं कारणमित्यत आह—। [e] "नापी"ति । न हि नियमतः कार्यादेव कारणज्ञप्तिरित्यर्थः । कारणत्वमेवान्यत्वप्रतियोगीति शङ्कते—। [f] "नापी"ति । कारणत्वेनैव कारणत्वज्ञप्तावात्माश्रयमाह—। [g] "ज्ञप्तावि"ति । दण्डत्वादिनापि कारणस्य दण्डादेर्ज्ञप्तिरित्याह—। "अन्यथापी"ति ॥

---

(१) ज्ञप्तिर्वा निष्पत्तिरित्यन्वयः ।

सू० तदुपगमात् * [a]व्यतिरिक्तत्वमकारणत्वमिष्टम् ? * -इति चेन्न, । उक्तदोषानिवृत्तेः । [c]कारणत्वात्पूर्वमुत्पत्तिज्ञप्त्योरक्षणिकवादिभिरभ्युपगमात् * [d]अव्यवहितपूर्वतया कदाचित्तदपि कारणमेव तत्पूर्वतरमपि (१) कस्याश्चिद्व्यक्तेरनेवम्भावेऽपि तज्जातीयतया तथाभावित्वविवक्षिततया व्यक्तिव्यभिचाराप्रयोजकत्वात् ! *-इति चेन्न,

टी० ॥ तदुपगमात् ज्ञप्त्युपगमात्। [a]"व्यतिरिक्तत्वमि"ति । अनन्यथासिद्धमित्यकारणत्वव्यतिरेकेण सिद्धमित्यर्थः ॥ [b]"उक्तेति । अकारणत्वव्यतिरेकेणेति । कारणत्वेनेत्यर्थपर्यवसाने पुनरात्माश्रयादित्यर्थः ॥ [c]"कारणत्वादि"ति । पूर्वक्षणमात्रनियतं हि कारणत्वं स्थैर्यपक्षे तत्पूर्वं नास्तीति तदाऽकारणव्यतिरेकेण सिद्धिरनुपपन्नेत्यर्थः। ननु कार्योत्पत्त्यव्यवहितपूर्वपक्षवृत्तितामात्रे स्थिरमपि कारणमेव पूर्वमिति तदाप्यकारणत्वव्यतिरेकेणैव तत्सिद्धिर्या च कारणव्यक्तिरुत्पन्नविनष्टकार्योत्पत्तिपूर्वक्षणे सती न भवत्येव तत्रापि तादृशव्यक्तिजातीयत्वेनैव कारणत्वमिति न व्यभिचारोऽपीति शङ्कते-। [d]"अव्यवहिते"ति। तत्पूर्वतरमपि कारणमेव कदाचिदव्यवहितपूर्वक्षणवर्ति तथेत्यन्वयः ॥

सू० [a]कार्यान्तरेऽपि गगनादेरतथाभावस्य विनिगन्तुमशक्यत्वात् [b]*कालदेशव्यापकतया अन्यथासिद्धस्थितिः ! *-इति चेन्न । [c]तथा सति शब्दादौ गगनादेरकारणत्वप्रसङ्गात् । [d]एतेनानन्यथासिद्धान्वयव्यतिरेकानुविधायित्वमपि निरस्तम् । [e]गगनादेर्व्यतिरेकाभावादकारणत्वप्रसङ्गस्याधिकः * [f]व्यापारवत्त्वं कारणत्वम् ? *-इति चेन्न । तद्धि व्यापारसमवायित्वं

(१) तत्पूर्वतरमपि कारणमेव कदाचिदव्यवहितपूर्वतयेत्यन्वयः ।

व्यापारजनकत्वं वा ?। नाद्यः [g]यागादेरकारणत्वप्रसङ्गात् । नोत्तरः । [h]तस्यैव निरूप्यमाणत्वात् ॥

टी० ॥ [a]"कार्यान्तरेऽपी"ति। शब्दादन्यतोऽपि घटादावित्यर्थः। अतथाभावस्य। अकारणत्वस्येत्यर्थः। गगनादेः स्वकार्याद-न्यत्राऽव्यवहितपूर्वसत्तया कारणत्वं दुर्वारमिति भावः ॥ ननु गगनादीनां घटादिपूर्वसत्त्वे सत्त्वं व्यापकत्वनित्यत्वप्रयुक्तमिति नातिप्रसङ्ग इति शङ्कते—। [b]"कालदेशे"ति । एवं सति स्वकार्यमपि प्रति तत्कारणं न स्यादुक्तप्रकारेणान्यथासिद्धत्वादिति परिहरति—। [c]"तथा सती"ति ॥ [d]"एतेने"ति । अनन्यथासिद्धत्वग्रहणेनेत्यर्थः । अतिदिष्टाद्दोषान्तरमाह—। [e]"गगनादेरि"ति । नित्यत्वव्यापकत्वाभ्यां देशतः कालतो वा व्यतिरेकाभावात् स्वकार्यमपि प्रति गगनादेः कारणत्वं न स्यादित्यर्थः ॥ लक्षणान्तरं शङ्कते—। [f]"व्यापारत्वमि"ति ॥ [g]"यागादेरि"ति । यागस्य चेच्छाविशेषरूपा(१)पूर्वरूपव्यापारसमवायित्वप्रसङ्ग इत्यर्थः ॥ [h]"तस्यैवे"ति । जनकस्यैवेत्यर्थः ॥

सू० [a]नित्यसत्त्वासत्त्वयोरन्यतरप्रसक्तिनिवारकत्वम् ? *- इति चेन्न, [b]निवारकपदावयवस्य प्रत्ययस्य कारणनिर्वचनं विनाऽनिरूप्यमाणार्थत्वात्। [c]अन्यतरत्वस्य चैकस्य निरुक्त्यशक्तेः *[d]यदनभ्युपगमे यस्य तत्पूर्वसत्त्वप्रसङ्गः, तत्तस्य कारणं तद्भवश्च कारणत्वम् ?*- इति चेन्न । [e]भावस्य विनाशित्वानभ्युपगमे तथा प्रसङ्गेनातिव्यापकत्वात् ॥

टी० ॥ कार्यस्य नित्यसत्त्वं नित्यासत्त्वं वा प्रसज्यमानं येन निवार्यते तत्कारणमिति । शङ्कते—। [a] "नित्ये"ति । निवारकं हि निवृत्तिजनकं तच्चाद्याप्यनिरूपितं तेनैव तन्निरूपणे आत्माश्रय इति परिहरति—। [b]"निवारके"ति । अवयवस्यैकदेशस्य करणाधिकरणयोश्चेति विधीयमानस्य ल्युट्प्रत्य-

(१) यागत्वं हि देवतोद्देश्यकस्वस्वत्वध्वंसवद्द्रव्यविशेषस्यैच्छात्मकत्वम्

सत्येत्यर्थः । अन्यतरत्वं यद्यभिद्वौरित्यैकत्वं तदा ऽभिद्धौरणगर्भं लक्षणमविद्धम् । अथ तदुभयान्योन्यत्वं तदान्योन्याभावखण्डनेन तद्गर्भलक्षणखण्डनेन वा गतार्थमित्याह—। [a]"अन्यतरत्वस्ये"ति । [b]"यदनभ्युपगमे"इति । कारणानभ्युपगमे हि कार्यस्य स्वोत्पत्तिकालात् पूर्वं सत्त्वं प्रसज्येतेत्यर्थः । यद्यप्यसत्त्वमपि प्रसज्यते तेन नियमाभावात् पूर्वसत्त्वप्रसङ्गो न भवति तथापि यदि सदिदं सकारणकं न स्यात्तदा पूर्वं सत् स्यादिति प्रसङ्गो द्रष्टव्यः । यदि भावो विनाशी न स्यात्तदा (१) पूर्वं सत्स्यादिति तद्विनाशोऽपि तदापादकत्वात्कारणं स्यादिति परिहरति—। "भावस्ये"ति । विनाशित्वानभ्युपगमेन पूर्वसत्त्वमापादयितुं न शक्यते ध्वंसे व्यभिचारादत उक्तम्—। [c]"भावस्ये"ति ॥

मू० [a]तत्पूर्वस्थितत्वेन च विशेषणे सहभावनियतस्याभावेऽपि प्रसङ्गः [b]तथात्वोपगमे तत्सामग्र्यामपि प्रसङ्गः [c]तस्या अपि तथात्वोपगमे कार्यद्वयैक्यप्रसङ्गः [d]असाधारण्यं च ॥

टी० ॥ ननु पूर्ववर्त्तिनो यस्यानभ्युपगमः पूर्वसत्त्वमापादयति तत्कारणम् । ध्वंसस्तु कार्यपूर्ववर्त्ती न भवतीति न तत्र कारणत्वप्रसङ्ग इत्यत आह—। [a]"तत्पूर्वस्थितत्वेने"ति । एवं सति कार्यपूर्वसत्त्वे सति कार्यपूर्वसत्त्वापादकानभ्युपगमविषयत्वं कारणत्वमित्युक्तं स्यात् । तथा च पाकस्थले यदि रूपप्रागभावो न स्यात्तदा रसोऽपि पूर्ववर्त्ती स्यादिति रसपूर्वसत्तापादकरूपप्रागभावानभ्युपगमविषयरूपप्रागभावस्यापि रसकारणत्वं स्यादित्यर्थः ॥ ननु रसे रूपप्रागभावः कारणं भवतु को दोष इत्यत आह—। [b]"तथात्वोपगम"इति । एवं सत्युक्तन्यायेन रसं प्रति रूपसामग्र्या अपि कारणत्वं स्यादित्यर्थः ॥ ननु रसे रूपसामग्री पाकजस्थले तु कारणमित्यत आह—। "तस्या अपी"ति । एवं सत्यभिन्नसामग्रीकत्वे रूपरसयोर-

(१) घाकाशवत् इति दृष्टान्तो ऽत्र ज्ञातव्यः ।

भेदापत्तिः सामग्रीभेदस्यैव कार्यभेदप्रयोजकत्वात्तदभेदे सोऽपि न स्यादित्यर्थः। यदनभ्युपगम इत्यादिलक्षणे दोषान्तरमाह—। [d]“असाधारण्यं चे”ति। घटपदार्थाननुगमे नानुगम इत्यर्थः॥

मू०। [a]विशेषापेक्षित्वेऽतिव्याप्ति [b]रविशेषे भाविपूर्वार्थविकल्पावकाशश्च * [c]नियतप्राग्भावित्वम्? *— इति चेन्न। [d]अवश्यम्भावस्य नियमार्थत्वे गगनादेः सर्वकार्यहेतुत्वप्रसङ्गस्य तदवस्थत्वादवयवरूपादेश्चावयविद्रव्यादिषु कारणत्वप्रसङ्गात्। [e]अनौपाधिकत्वं नियमार्थ इति चे[f]देवं ह्यनौपाधिकः पूर्वभावो हेतुत्वमित्युक्तं भवति। तथा च पिपीलिकोत्थानादेर्वृष्ट्यादौ जनकत्वप्रसङ्गः॥

टी०॥ ननु यदनभ्युपगमे घटपूर्वसत्ताप्रसक्तिस्तद्घटकारणमिति लक्षणमप्यननुगतमेवेत्यत आह—। [a]“विशेषापेक्षित्वे” इति। लक्षणस्य विशेषमात्रपरत्वे इत्यर्थः। एवं सति रूपपूर्वसत्तापादकानभ्युपगमविषयत्वं घटरूपकारणत्वं रसकारणेऽपि तत्र गतमित्यतिव्याप्तिः, घटस्योभयकारणस्योभयत्राविशेषाद्विशेषलक्षणस्यैव तथाभिप्रेतत्वादिति भावः॥ ननु पूर्वसत्तापादकानभ्युपगमविषयत्वं कारणत्वं सामान्यत एव विवक्षितं तथा च नाननुगमो न वाऽतिव्याप्तिरित्यत आह—। [b]“अविशेषे”इति। सामान्याविवक्षा चेत्तदा भावी वक्ष्यमाणो यः पूर्वपदार्थविकल्पः तस्यावकाशः, तथा च लक्षणस्य(१)पूर्वपदार्थानिरुक्त्या लक्षणं दुर्ग्रहमिति भावः। लक्षणान्तरं शङ्कते—। [c]“नियते”ति। नियमः पूर्ववर्तित्वमात्रं वा कार्येण सहाविनाभावो वा। आद्यं दूषयति—। [d]“अवश्यम्भावस्ये”ति। [e]“अनौपाधिकत्वमि”ति॥ [f]“एवमिति। पिपीलिकाण्डसञ्चारस्य वृष्ट्यनुमापकतयाऽनौपाधिकसंबन्धाभ्युपगमादित्यर्थः॥

(१) लक्षणस्येति क्वचित् पाठः।

मू० [a]सहभाविसामग्र्या वा [b]न प्रावृषि पूर्वभावो नियतः, किन्तु वृष्टेः [c]परं भाव ? *-इति चेन्न, [d]प्राग्रूपाणामेव नियतत्वात् * [e]तानि कारणमेव ?*-इति चेन्न । [f]निदानप्राग्रूपयोः कार्यप्रसङ्गात् पूर्वार्थश्च वक्तव्यः * [g]पूर्वकालसंबन्धित्वं पूर्वत्वम् ? *-इति चेन्न, [h]कालस्याहेतुत्वप्रसङ्गात् [i]तस्यापि किं पूर्वत्वमिति च विवेचनीयत्वात् ॥

टी० ॥ [a]"सहभावो"ति । रूपसहकारिणो एतस्य वा सामग्री साऽपि रूपकारणं स्यात् अनौपाधिकत्वादित्यर्थः ॥ [b]"न प्रावो"ति । प्रावृषि प्राक्कालवर्त्तिनि पिपीलिकाण्डसञ्चारे पूर्वभावनियमो नास्ति । न हि यत्र वृष्टिस्तत्र पूर्वं सोऽस्त्येवापि तु तदनन्तरं वृष्टिर्भवत्येवेत्यानन्तर्यनियमः । [c]"परमि"ति । पूर्वभावनियम एव विवक्षितो न त्वनौपाधिकत्वमित्यर्थः ॥ [d]"प्राग्रूपे"ति । रोगलिङ्गानां प्राग्रूपाणां निदानसिद्धत्वेन चरकाद्युक्तानामतिव्यापकता स्यादित्यर्थः । उक्तं हि- "निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा । संप्राप्तिश्चेति रोगाणां पञ्चधा ज्ञानमिष्यते" ॥ रोगकारणानामित्यपव्याख्यानम् । वैद्यकविरोधात् ॥ [e]"तानी"ति । पूर्वरूपाणीत्यर्थः ॥ [f]"निदाने"ति । तथा च पञ्चधा विभागव्याघात इति भावः ॥ [g]"पूर्वकाले"ति । यद्यपि पूर्वभावित्वमिति पूर्वकालभावित्वमेवोक्तं तथापि पूर्वत्वमात्रं खण्डयितुमेतदुक्तम् । [h]"कालस्ये"ति । न हि कालः कालसंबन्धीत्यर्थः ॥ [i]"तस्यापी"ति । कालस्यापीत्यर्थः ॥

मू० [a]अतीतोपाध्यवच्छिन्नत्वं तस्य पूर्वत्वम् ? *-इति चेन्न, [b]अतीत इति निष्ठान्तस्य पूर्वकालवाचिनो विवेचनीयत्वात् *[c]परत्वापरत्वयोर्गुणयोर्मध्ये यत्परत्वं तत्पूर्वत्वमुच्यते? *-इति चेन्न । [d]कालादौ गुणादौ च तदनङ्गीकारात्तेषामकारणत्वप्रसङ्गात्, [e]त-

स्मिन्नेव च तदभावात् [f]साक्षात्कारिज्ञानादावपि तस्याकारणत्वमसङ्गात्। * सामग्र्येकदेशत्वं कारणत्वम् ? *-इति चेन्न। एकदेशत्वस्यानिर्वचनत्वात् अवयवत्वप्रदेशत्वादीनां सामग्र्यामसम्भवात् ॥

टी० ॥ [a]"अतीते"ति। अतीता ये सूर्यस्पन्दादयः उपाधयस्तदवच्छिन्नत्वमेव कालस्य पूर्वत्वमित्यर्थः ॥ [b]"अतीत"-इति। अतीतत्वं हि पूर्वकालीनविषयत्वमित्यात्माश्रय इत्यर्थः। परत्वं गुणविशेष एव पूर्वत्वमिति शङ्कते-। [c]"परत्वे"ति। तस्य मूर्तगुणत्वेन कालावृत्तितया तेषां पूर्वत्वासम्भवादित्याह-। [d]"कालादावि"ति। परत्वे परत्वाभावात् पूर्वत्वानुपपत्त्या कारणत्वं न स्यादित्याह-। [e]"तस्मिन्नेवे"ति। ननु परत्वापरत्वद्वित्वद्विपृथक्त्वादीनामकारणत्वमेवोक्तं वैशेषिकशास्त्रे इति तदकारणत्वं नानिष्टमित्यत आह-। [f]"साक्षादि"ति। ज्ञानेतरकार्यापेक्षया तदकारणत्वमुक्तं। न तु ज्ञानेऽपीत्यर्थः। आदिपदात्सुखदुःखपरिग्रहः। तथाचात्मधर्मेतरकार्यापेक्षया तदकारणत्वाभिधानं द्रष्टव्यं भवति हि मम प्रिया परापरा चेति सुखदुःखे॥ [g]"अवयवत्वे"ति। द्रव्यासमवायिकारणस्यावयवत्वात् संयोगविशेषावच्छेदकस्य प्रदेशत्वात्तयोश्च सामग्र्यामभावादित्यर्थः ॥

मू० [a]सकलकारणकलापसमवधानस्यैव च मेलकार्थत्वात्तेनैव तन्निर्वचनत्वात् * [b]यदनन्तरं कार्यं भवत्येव सा सामग्री ? *-इति चेन्न। [c]विभागानन्तरं संयोगनाशस्योत्पत्तेर्विभागस्यापि सामग्रीत्वमसङ्गात् * एवं कर्मणो विभागेऽन्त्यतन्तुसंयोगस्य पट इत्यादि कार्यकारणभावो नाम संबन्धः [d]कोऽपि? *-इति चेन्न। [e]तदा अविशेषेण कार्यकारणसाङ्कर्यापत्तेः [f]कार्यकारणविशेषितत्वात् भेदे तयोः पृथक् निर्वाच्यत्वापत्तेः * [g]कारणत्वं धर्मः कोऽपि * ?-इति चेन्न, । [h]तत्सद्भावे प्रमाणस्य वाच्यत्वात् ।

टी० ॥ आत्माश्रयमप्याह—। a"सकले"ति । कारणेनैव कारणनिर्वचनादित्यर्थः । आत्माश्रयपरिहाराय कारणबहिर्भावेन सामग्री शङ्कते—। b"यदनन्तरमि"ति । अकारणे चरमकारणे चातिव्याप्तिमाह—। c"विनाशे"ति ॥ d"कोऽपी"ति । संयोगसमवायभिन्नो विशिष्यानिर्वाच्य इत्यर्थः ॥ e"तदि"ति । संबन्धस्य द्विष्ठतया कार्यमेव कारणं किं न स्यादित्यर्थः ॥ ननु कार्यसंबन्धित्वं कारणत्वं कारणसंबन्धित्वं च कार्यत्वमिति न साङ्कर्यमत आह—। f"कार्यकारणे"ति । यद्वा ननु कार्येण विशेषितात् संबन्धात् कारणविशेषितोऽसावन्य एवेति न तयोः साङ्कर्यमित्यत आह—। "कार्यकारणे"ति ॥ ननु भावत्वाभावत्वादिवत् कारणत्वमपि कश्चिद्धर्मः सिद्धः किं तल्लक्षणोपन्यासाग्रहेणेति शङ्कते—। g"कारणत्वमि"ति । अनुगतमतिसाक्षिकेऽपि विशेषव्यवहाराधानाय प्रमाणं पृच्छति—। h"तत्सद्भाव"इति ॥

मू० *a"क्वचित्प्रत्यक्षः स क्वचिद्दृष्टानुमेय ? *-इति चेन्न । किं हि प्रति कारणत्वं प्रत्यक्षमुल्लिखेन्न ताव bदनिर्लुठितकार्यम cप्रतीतेः, अन्वयव्यतिरेकादेर्व्यञ्जकस्य च विशेषं प्रत्येव सम्भवात् । dनापि सामान्यतो घटादि प्रत्येवं विशेषतो घटाद्यनुत्पत्त्यापत्तेः । eतावन्मात्राद्विशेषोत्पत्तेर्विशेषेषु विनिगमना न स्यात् fप्रति विशेषं चोत्पत्तेः प्रागवर्तमानत्वादसन्निकर्षादध्यक्षविषयतानुपपत्तेः ॥

टी० ॥ a"क्वचिदि"ति । दण्डादौ प्रत्यक्षं परमाण्वादावनुमेयमित्यर्थः । दण्डादेः कारणत्वं प्रत्यक्षमुल्लिखत् घटकारणत्वप्रकारकं वा स्यात्कारणत्वप्रकारकं वा स्यात् । द्वितीयं दूषयति—। b"अनिर्लुठिते"ति । अनिर्णीतकार्यविशेषकारणत्वे प्रतीतिव्यवहारयोरभाव एवेत्यर्थः । अत्र हेतुः माह—। c"अप्रतीतेरि"ति ॥ ननु दण्डादेः घटत्वसामान्यावच्छिन्नकार्यकारणत्व

प्रत्यक्षत्वं स्यात्तत्र चान्वयव्यतिरेकौ प्रमाणम् एवेत्यत आह—। d"नापी"ति। एवं सति दण्डादेर्घटसामान्यमेव स्यात्। ननु घटविशेषः सामान्यकारणस्य एव प्रमाणप्रवृत्तेः विशेषे तदभावादित्यर्थः॥ ननु सामान्यमपि विशेषोपरक्तमिति सामान्यकारणादेव विशेषोत्पत्तिरपि स्यादित्याशङ्क्याह—। e"तावन्मात्रादि"ति। उत्पत्स्यमानविशेष एतद्दण्डजन्य इति विनिगमना न स्यात्। तथा च तदर्थं प्रवृत्तिर्न स्यादिति भावः॥ ननु सामान्यतो न कारणत्वं ग्राह्यमपि तु प्रतिविशेषमित्याशङ्क्याह—। f"प्रतिविशेषमि"ति। तर्ह्युत्पत्स्यमानविशेषकारणत्वमध्यक्षं न स्यात्। न हि तदा तद्वर्त्तमानमवर्त्तमानविशेषघटितत्वेनैव तस्यावर्त्तमानत्वाद्वर्त्तमानस्यैवाध्यक्षविषयत्वादित्यर्थः॥

मू० aकार्यसत्त्वकालश्च सामग्र्यभावान्न तज्जननकाल इति तदानीं तज्जननविशिष्टता कथमध्यक्षा स्यात् bप्राक् तदग्रहणेन च संस्कारसाचिव्यस्याप्यसम्भवात् cएवं च क्वचिदपि हेतुत्वे साक्षात्कारासम्भवेन किं मल-व्याप्तिग्रहात्तत्रानुमापि स्या dत्प्रतिबन्दी चानिर्वचनीयवादिनि न स्थाने * कादाचित्कत्वानुपपत्त्या तद्ग्रह ? *—इति चेन्न,

टी० ॥ ननु यदा यत्कार्यमुत्पद्यते तदा तद्घटितं कारणत्वं वर्त्तमानत्वात् प्रत्यक्षं स्यादित्याशङ्क्याह—। a"कार्यसत्त्वका-ल"इति। कार्योत्पत्त्यनन्तरं च प्रागभावस्याभावाद्दण्डस्यापि सामग्री विनाकृतस्य न जनकत्वमिति कथमध्यक्षता तस्य स्यादित्यर्थः॥ ननु प्रत्यभिज्ञायां तत्तांशवत् संस्कारोपकारणत्वं प्रत्यक्षं तत्र स्यादित्याशङ्क्याह—। b"प्रागि"ति। उत्पत्स्यमानविशेषं प्रति दण्डकारणत्वस्याननुभूततया संस्काराविषयत्वादित्यर्थः। ननु कारणत्वमनुमेयं स्यादित्यत आह—। c"एवमि"ति।

अनुमानमपि प्रत्यक्षोपजीव्य(१)मिति तदभावात्तस्याप्यभाव इत्यर्थः ॥ ननु कारणत्वग्रहमन्तरेण परप्रतिपत्त्यर्थं तत्रापि वाक्यव्यवहारो वा तोयपानादौ प्रवृत्तिर्वा कथं स्यादित्यत आह—। [d]“प्रतिबन्दी”ति । न स्यान्न नोचितेत्यर्थः । प्रतिबन्दिग्रहस्य कृतत्वादिति भावः ॥ अर्थापत्तिं कारणत्वे शङ्कते—। [e]“कादाचित्कत्वेने”ति ॥

सू० [a]वैयधिकरण्यात् [b]कथमपि सामानाधिकरण्ये तदुपपादकस्योपपाद्यवदनुपपत्तावविशेषाद्विश्रान्तेर्नानादित्वेनापि शक्योपपादना [c]वैयधिकरण्येऽप्युपपाद्यासंबन्धश्चेदनियमः संबन्धश्चेदविश्रान्तिरिति ॥

टी० ॥ यदि कारणत्वं न स्यात्तदा कार्याणां कादाचित्कत्वं न स्यादित्यर्थापत्तिरुपपाद्यकादाचित्कत्वाधिकरणस्योपपादकस्य कारणत्वस्य कल्पनायां कथं प्रभवेत् । अन्यथा देवदत्तीयगृहासत्त्वे न यज्ञदत्तबहिःसत्त्वमपि कल्पनीयं स्यादित्याह—। [a]“वैयधिकरण्या”दिति । ननु कार्ये यत्कादाचित्कत्वं धर्मः स कार्यस्य सकारणत्वं समानाधिकरणमेवाक्षिपतीत्याशङ्क्याह—। [b]“कथमि”ति । एवं सकारणत्वमपि स्वकीयं सकारणत्वं समानाधिकरणमाक्षिपेदित्यनवस्था । नहि परस्तत्रानुपपत्तिं न ब्रूयात् कार्येण कारणमाक्षेप्यं तेन तेनापीति चानवस्था । न च तत्रानादित्वं परिहारस्तत्रापि प्रमाणस्य वाच्यत्वात् बीजाङ्कुरादिदर्शनात्तदन्यथानुपपत्तिश्च नानादित्वे प्रमाणम् । कार्यकारणभावानुपपत्तेरेवमपाद्यमानत्वादिति भावः । वैयधिकरण्ये दोषान्तरमाह—। [d]“वैयधिकरण्येऽपी”ति । उपपाद्योपपादकयोरसंबन्धेऽर्थापत्तिरनुपपन्ना अर्थापत्त्याभासानवकाशात्संबन्धश्च तयोः संबन्धान्तरनियत एव । अन्यथा पुनरविशेषादर्थापत्त्याभासानवकाश एवेति संबन्धाविश्राम एवेत्यर्थः । अवैयधिकरण्येऽपीत्यकारप्रश्लेषेण केचिद्व्याचक्षते संबन्धासंबन्धविकल्पस्तत्रापि तुल्य एव ।

(१) क्वचित् प्रत्यक्षजन्यमिति पाठः ।

मू० एतेन [a]शक्तिः कारणत्वमित्यपि निरस्तम् । किञ्च [b]प्रत्यक्षप्रमितौ विषयस्यापि सन्निकर्षव्यापारकस्य कारणतया स्ववृत्त्यापत्तेः [c]अन्यथाऽक्षस्यापि कारणत्वं न स्यात् [d]अनुविधानाविशेषा[e]द्विषयाविशेषिताक्षसंनिकर्षस्य तथात्वेऽत्यापत्तेः [f]क्वचित्कारणाकारणत्वविवादस्य चानुच्छेद्यत्वापत्तेः ॥

टी० मीमांसकमते दोषमाह—। [a]"शक्तिरि"ति । तत्रापि प्रमाणाभाव एव उक्तरीत्या भवदभ्युपगमाच्च न तत्राध्यक्षं तदभावाच्च तन्मूलकव्याप्तिग्रहाभावान्नानुमानम् । न चार्थापत्तिकृद्दोषादित्यर्थः । कारणत्वमभ्युपेत्य दोषान्तरमाह—। [b]"किञ्चे"ति । कारणत्वं स्वसन्निकर्षद्वारा[1]प्रत्यक्षकारणं वाच्यमिति कारणत्वेऽपि कारणत्वं वाच्यं तद्यदि स्वाभिन्नं तथापि प्रत्यक्षे विषयतया कारणं तदवश्यं वाच्यमित्यर्थः । सन्निकर्षेणैवान्यथासिद्धौ दूषणमाह—। [c]"अन्यथे"ति ॥ "अनुविधाने"ति । अन्वयव्यतिरेकतौल्यादित्यर्थः ॥ ननु सन्निकर्षमात्रं कारणं न तु सन्निकर्षप्रतियोग्यपीति कारणत्वस्याध्यक्षत्वेऽपि न कारणत्वमत आह—। [e]"विषये"ति । एवं सति यत्किञ्चित्त्वेऽसन्निकर्षादेव प्रत्यक्षमुत्पद्येतेत्यतिप्रसङ्ग इत्यर्थः । कारणत्वप्रत्यक्षत्वे दोषान्तरमाह—। [f]"क्वचिदि"ति । प्रत्यक्षेण तन्निर्णयान्निर्णीते च विवादानवकाशात् अवकाशे चानुच्छेद्यत्वापत्तेरित्यर्थः ॥

मू० [a]"एकेन तस्य दृष्टेरपरेण चादृष्टेः तल्लक्षणस्य च नियतपूर्वभावित्वादेः कथने कथितदोषापत्तेः [b]विना च तच्चिन्हाद्भूमसन्देहौ तत्र किं दर्शनादुच्छेद्यौ [c]अक्षेण हेतुधर्मिणि दृष्टेऽपि तददृष्ट्वा [d]यदभ्युपगमोऽक्षसहकारी वाच्यः [e]तदर्थेन सिद्धेन [f]हेतुधियोऽर्थवत्त्वे सम्भवति [g]तदन्यार्थकल्पनागौरवं कुतो बलात्सिद्ध्येत् ।

(१) सन्निकर्षद्वारा = सन्निकर्षघटकत्वेनेत्यर्थः ।

टी० ॥ ननु कारणत्वस्याननुगमादेव विवादानुच्छेद इत्यत आह—। a"एकेने"ति । येन कारणत्वं दृष्टं तेनाङ्कुरकारणत्वादिना प्रत्यनुमानार्थं नियतपूर्ववर्त्तित्वादि यल्लिङ्गमुपादेयं तत्सर्वं दूषितमेवेत्यनुमापकलिङ्गाभावादेव न विवादोच्छेद इत्युक्त्वा स्वारसिकभ्रमसंशयानुच्छेदमाह—। b"विना चे"ति । विशेषदर्शनमन्तरेण न भ्रमसंशययोर्निवृत्तिर्विशेषश्च नियतपूर्ववर्त्तित्वादिचिह्नभूतं तच्च दूषितमेवेत्यर्थः । दण्डे दृष्टेऽपि कारणत्वे तत्र व्यञ्जकाग्रहान्न ग्राह्यं व्यञ्जकं च तस्य यद्यस्ति तदा तदेव कारणत्वपदे निष्ठता किं कारणत्वाङ्गीकारेणेत्याह—। c"अक्लेशे"ति । हेतुरूपो धर्मी हेतुधर्मी दण्डादिः तद्दृष्ट्या कारणत्वादृष्ट्या ॥ d"यदभ्युपगम"इति योऽभ्युपगम्यमान इत्यर्थः ॥ e"तदर्थेने"ति । अभ्युपगमविषयेण कारणत्वव्यञ्जकभूतेनेत्यर्थः ॥ f"हेतुधिय"इति । हेतुत्वविशिष्टधिय इत्यर्थः ॥ g"तदन्ये"ति । व्यञ्जकादन्यो योऽर्थः कारणत्वं तत्कल्पनागौरवं कुतो बलादिमदूषयेत् कथमभ्युपगम्येतेत्यर्थः ॥

मू० a*यस्यान्वयानुविधानादेरनुमेयहेतुत्वे व्योमादावनुपपत्तेः b*तदन्यत्वसिद्धिः ? *—इति चेन्न, c अन्योन्याश्रयापत्तेः । प्रत्यक्षस्यान्यस्मिन् विषये सिद्धेऽन्यत्र दृष्टान्तेन तदनुमानं तत्सिद्धौ च प्रत्यक्षस्यान्यविषयतासिद्धिः d तस्य चानागन्तुकत्वे प्रागपि तत्सत्त्वादस्तीति प्रतिपत्करोतीति प्रमापातः आगन्तुकत्वे च तदुत्पत्तेः प्राक् कारणत्वं क्वापि न स्यात् e व्याप्यजातित्वे घटाद्यपि किं न तथा स्यात् व्यावृत्तेषु तेष्वनुगतौ च सर्वं प्रति सर्वकारणत्वप्रसङ्गात् ॥

टी० ॥ ननु व्यञ्जकत्वं क्वचिदन्वयव्यतिरेकित्वं क्वचिच्च बीजादिकारणत्वानुरोधेन धर्मिग्राहकं प्रमाणमिति व्यञ्जकाननुगमेऽपि व्यञ्ज्यं कारणत्वमनुगतमवश्यं कल्पनीयमिति शङ्कते—।

a"तस्ये"ति । अनुमेयहेतुत्वे इति बहुव्रीहिः (१) ॥ b"तदन्यत्वसिद्धिरि"ति । ठ्यणुकापेक्षया कारणत्वस्यान्यत्वसिद्धिरित्यर्थः । यदि प्रत्यक्षस्य कारणत्वं विषयः स्यात्तदा तद्दृष्टान्तेन द्व्यणुकादावपि द्व्यणुकातिरिक्तं कारणत्वमनुमेयं तत्र यदि कारणत्वमनुमेयं तदा प्रत्यक्षस्यापि द्व्यणुकभिन्नकारणत्वविषयत्वसिद्धिरित्यन्योन्याश्रय इति परिहरति—। c"अन्योन्ये"ति । दोषान्तरमाह—। d"तस्य चे"ति । कारणत्वं दण्डादौ यदि नित्यं तदा सर्वदा करोतीति मतिः स्यात् अनित्यत्वे तु तदुत्पत्तेः पूर्वं कारणत्वं न स्यात् तथाच तदुत्पत्तिरपि (२) न स्यादित्यर्थः । ननु कारणत्वमनित्यमपि न जायते एवेत्यत आह—। e"तथापी"ति । दोषान्तरमाह—। f"व्यावृत्तिश्चे"ति । घटादिकारणेषु दण्डादिष्वेकमनुगतकारणत्वं चेत्तदा दण्डादेः सकलकार्यकारणत्वापत्तिः । नहि गौः कश्चित्प्रत्यगौरित्यर्थः ॥

सू० * a प्रतिकार्यव्यक्ति तत्पृथक् ? *—इति चेन्न, b साधारणस्यापि तद्गतस्य स्वरूपस्य घटादिकारणात्मतयानुवृत्तौ घटकारणत्वस्यापि स्तम्भकारणत्वापत्तेः c * कारणत्वमात्रेण तदनुगतं रूपं न घटकारणत्वादिना ? *—इति चेन्न, d घटादिविशेषानुपहितकारणत्वमात्रस्य किं प्रतीत्य निर्देश्यस्य सद्भावे प्रमाणाभावात् e अन्यथा यदि किञ्चित्प्रतिकारणे सामान्यतः कारणत्वं नाम धर्मः स्यात्तदा तस्या एव व्यक्ते किञ्चित्प्रत्यकारणत्वादकारणत्वमपि रूपं तत्र स्यादित्यनपेक्षितविशेषकारणत्वाभ्यासाद्भेदेनैकमात्रमेवोच्छिद्येत् ॥

टी० ॥ कारणत्वं घटादिप्रत्येकनिरूपितमेवेत्याशङ्कते—।

---

(१) अनुमेया हेतुना येनेति बहुव्रीहिरित्यर्थः ।
(२) तदुत्पत्तिः = कारणत्वस्योत्पत्तिरित्यर्थः ।

a"प्रतिकार्यव्यक्ती"ति । अनुगतप्रतीतिसाक्षिकमनुगतं यत्कारणत्वं तद्यदि घटादिप्रतियोगिकत्वविशिष्टमेव तदा घटकारणमेव घटादिकारणं स्यादित्याह—। b"साधारणस्यापी"ति—। ननु कारणत्वमन्यदन्यच्च घटकारणत्वमिति सामान्यविशेषरूपतया घटकारणमेव रासभादिकारणं कथं स्यादिति शङ्कते । c"कारणत्वे"ति । कारणपदार्थः न प्रतियोगिक एव प्रतीयत इति भिन्नप्रतियोगिककारणत्वसामान्यमप्रामाणिकमेवेति परिहरति—। d"घटादा"विति कारणत्वसामान्याङ्गीकारे दूषणमाह—। e"अन्यथे"ति । कार्यविशेषोपहितकारणत्वमेव यदि कारणत्वं तदा कार्यविशेषे तदकारणत्वमपीति कारणत्वाकारणत्वलक्षणविरुद्धधर्माध्यासात्तत्त्वतोऽपि दण्डो भिन्नः स्यादित्यर्थः ॥

सू० a"किञ्च कार्यव्यक्तेः कारणमस्ति न वा? । न चेन्नित्यसत्त्वासत्त्वयोरन्यतरप्रसङ्गः । अस्ति चेत्किं तत्कारणम्? । b*व्यक्तिविशेष? *—इति चेन्न, c पूर्वादिभावस्य रासभादिसाधारणत्वात्तां कार्यव्यक्तिं प्रति तस्याः किं तत्कारणत्वं d * स्वरूपमेव ? *—इति चेन्न, तस्य व्यावृत्तत्वात् e तस्य(१) तत्कारणात्मत्वे वा f तदात्मनं तत्कारणत्वविरोधात् g तत्कारणत्वस्य च समवाय्यसमवायिनिमित्तभूतानेकव्यक्तिसाधारण्यात् h अनेकस्य चैकानुगतबुद्धिव्यवहारनिमित्तत्वे गोत्वाद्युच्छेदप्रसङ्गस्य दर्शितत्वात् ॥

टी० ॥ ननु घटस्य कारणमस्ति न वा? । अन्त्ये नित्यं सत्त्वमसत्त्वं वा हेतोरन्यस्यानपेक्षणादिति नित्यसत्त्वासत्त्वान्यतरप्रसङ्गः । यदि च घटव्यक्तेः कारणमस्ति तदा तत्स्वरूपं वक्तव्यमित्याह—। a"किञ्चे"ति । ननु दण्डादिव्यक्तिविशेष एव घटव्यक्तिकारणमिति शङ्कते—। b"व्यक्तिविशेष" इति । भवतु व्यक्तिविशेष एव कारणं तथापि तस्या दण्डादिव्यक्तिविशेषस्य

(१ तस्याः दण्डव्यक्तेः घटकारणत्वे इत्यर्थः ।

घटव्यक्तिविशेषं प्रति किं कारणत्वमिति पृच्छति—। [c]"पूर्वादि-भावस्ये"ति । तद्व्यक्तिपूर्वसत्त्वमात्रं रासभादावतिव्याप्तमिति तद्व्याख्यमित्यर्थः ॥ ननु दण्डादिस्वरूपमेव तदिति शङ्कते—। [d]"स्वरूपेति । तद्दण्डस्वरूपं चेत्तदा चक्रस्वरूपं घटव्यक्तिकारणं न स्यादिति परिहरति—। [e]"तस्ये"ति ॥ [f]"अतदात्मनामि"ति । अतदात्मनां भिन्नात्मनामित्यर्थः ॥ नन्वेकमेवैककार्यकारणमित्याशङ्क्याह—। [g]"एककारणत्वस्ये"ति । ननु प्रतिस्वं व्यावृत्तमेव दण्डादिस्वरूपं घटकारणत्वानुगतव्यवहारं कुर्यादित्याशङ्क्याह—। [g] "अनेकस्य चे"ति । एवं सति गवाकारानुगतमतिरपि व्यक्तिभिरेव स्यात् किं गोत्वेनेत्यर्थः ॥

मू० [a] * नियतपूर्वभावित्वम् ? *—इति चेन्न, [b] व्याप्त्यर्थस्य नियमस्यैकस्य सर्वत्र व्यक्तावसम्भवात् पूर्वमात्रस्य चातिप्रसञ्जकत्वात् * तज्जातीयं प्रति नियततज्जातीयत्वम् ? *—इति चेन्न, [d] तस्य तज्जातीयव्यक्त्यन्तरसाधारण्यात् [e] * नियततज्जातीयत्वे सति तत्पूर्वत्वम् ? *—इति चेन्न, [f] तत्समानकालोत्पत्तिककार्यव्यक्त्यन्तरसाधारण्यात् [g] तथाभ्युपगमे चैकसमवायादिनाशे सर्वतत्कार्यनाशप्रसङ्गः ॥

टी० ॥ ननु घटनियतपूर्वभावित्वमेव रासभादिव्यावृत्त घटकारणत्वमिति शङ्कते—। [a] "नियते"ति । एकघटव्यक्तिनिरूपितनियमस्य तत्कारणव्यक्तिषु निरूपयितुमशक्यत्वात्सामान्यद्वयावच्छेदेनैव नियमनिरूपणादिति परिहरति—। [b] "व्याप्त्यर्थस्ये"ति ॥ ननु घटत्वावच्छिन्नकार्यं प्रति दण्डादीनां नियतपूर्ववर्तित्वं सुग्रहमेवेति शङ्कते—। [c] "तज्जातीयमि"ति । एवं सत्येकघटव्यक्तिकारणत्वमपरघटव्यक्तिकारणेऽपि गतमिति व्यक्तिविशेषकारणत्वाभिधानाय प्रवृत्तस्तज्जातीयकारणत्वमात्रमभिधत्सुरत्यसंबद्धमिति परिहरति । [d] "तस्ये"ति घटनियतपूर्ववर्तिजातीयत्वे सति तद्घटपूर्ववर्तित्वं तद्घट-

कारणत्वं न च घटान्तरकारणेषु व्यक्तिविशेषपूर्ववर्त्तित्वमिति नातिप्रसङ्ग इति शङ्कते—। e "नियते"ति। एकस्मिन् घटे जायमाने यत्र शतं घटा जायन्ते तत्रोक्तरूपमेकघटकारणत्वमप-रघटकारणत्वे गतमित्यतिप्रसङ्ग एवेति परिहरति—। f "तत्स-माने"ति। नन्वेकं कपालं भवतु समानकालीननानाघटकारणं को दोष इत्यत आह—। g "तथे"ति। आदिपदादसमवायि-कारणसङ्ग्रहः॥

मू० a तत्कालतज्जातीयसर्वसामग्रीतः सर्वतत्कालतज्जा-
तीयोत्पत्तौ सामग्रीभेदस्य कार्यभेदहेतुतया प्रत्येक-
मिलितसामग्रीत्वविकल्पेन कार्यव्यक्त्यभेदप्रतिव्य-
क्तिस्वरूपभेदयोरन्यतरप्रसङ्गश्च b समवायित्वं प्र-
त्यपि साधर्म्यानु वधायिनि नियमेत्यापत्तेः c व्यावृ-
त्तत्वे चानियमात् * d नियततज्जातीयत्वे सति
तत्सादेश्यम् ? * इति चेन्न, e समवायिदेशापेक्षया
कार्यकारणयोः सादेश्यनियमानभ्युपगमात् f संयो-
गिदेशापेक्षया गुणादावसम्भवात् ॥

टी० ॥ समानकालोत्पत्तिकनानाघटसामग्रीणामनेकत्वे एकोऽपि घटोऽनेकः स्यादेकत्वे वानेकोऽप्येकः स्यादित्याह— a "तत्कालतज्जातीये"ति। इदानीं समवायिकारणं विशिष्य लक्षयति—। b "समवायित्वमि"ति। पटं प्रति तन्तुत्वेन सम-वायिकारणत्वे सर्वेषां तन्तूनामेकपटसमवायित्वापत्तिः तथाच किञ्चित्तन्तुनाशे सर्वपटनाशः स्यादित्यर्थः। ततत्तन्तुत्वेन तु कारणत्वं दुर्ग्रहमित्याह—। c "व्यावृत्तत्वे"इति। अनियतावि-यमग्रहाभावात्सामान्यावच्छेदेनैव तद्ग्रहादिति भावः। ननु यत्पटसमानदेशो यः तन्तुः स तत्पटसमवायिकारणमिति शङ्कते—। d "नियतेति"तन्तुपटयोरेकत्रांशे वृत्तौ सादेश्यं स्यात्त-चैव त्वयाऽभ्युपगम्यते इति परिहरति—। e "समवायी"ति। ननु समवायेन सम्बन्धेनावयवावयविनोः सादेश्यं न ब्रूमः

किन्तु संयोगेन तथा च तन्तुपटयोर्मूर्तत्वे सादेश्यं सम्भवत्येवे त्याशङ्क्याह—। f"संयोगी"ति । एवं सति गुणकर्मणोः समवायिकारणासङ्ग्रहः तयोस्संयोगाभावादित्यर्थः ॥

मू० [a]यथाकथञ्चित्सादेश्यमात्रस्य चातिप्रसञ्जकत्वाद् [b]दृ-
ष्टादेर्भिन्नदेशस्यापि कारणत्वोपगमे सर्वं प्रति सर्व-
कार्यसामग्र्याः कारणत्वापाता [c]त्पूर्वभावनियमादे-
स्तुल्यत्वात् [d]अनुगते च रूपेन्वयव्यतिरेकसम्भवात्
व्यक्तिगतसामान्ययोरेव कार्यत्वकारणत्वा-पत्तेः [e]त-
द्गतसामान्ययोरन्वयव्यतिरेकादिनियमः व्यक्तयो-
श्च कार्यकारणतेति लक्ष्यलक्षणभाववैयधिकरण्यात् ॥

टी० ॥ नन्ववयवावयविनोरिव गुणगुणिनोरपि कथञ्चि-त्सादेश्यमस्त्येवेत्याशङ्क्याह—। a"यथाकथञ्चिद्"ति । किञ्च त्वयाऽदृष्टादीनां भिन्नदेशानामपि नियतपूर्ववर्त्तिजातीयत्वेन कारणत्वमभ्युपगम्यते इति सर्वत्र सर्वं कारणं स्यादित्याह—। b"अदृष्टादेरि"ति । c"पूर्वभावे"ति । वाराणसीवर्त्तिदण्डस्य पाटलीपुत्रीयघटजातीयपूर्ववर्त्तित्वेन कारणत्व स्यात्सादेश्य-त्यस्य त्वयैव तिरस्कृतत्वादित्यर्थः । किञ्च दण्डव्यक्तिघटव्यक्त्योः कार्यकारणभावो न स्यादेव पूर्ववर्त्तितानियमस्य सामान्य-द्वयमात्रविश्रान्तत्वादित्याह—। d"अनुगते"इति । ननु नि-र्विशेषं न सामान्यमिति सामान्यावच्छेदेनापि व्यक्तीनामेव कारणत्वं पर्यवसन्नमित्याशङ्क्याह—। e"तद्गते"ति । सामा-न्ययोर्नियतपौर्वापर्यलक्षणं कार्यकारणभावलक्षणं दण्डघटादौ व्यक्ते नास्तीति वैयधिकरण्यमित्यर्थः ॥

मू० [a]सामान्याकारेण प्रविष्टां व्यक्तिमादायान्वयव्यति-
रेके विशेषस्याकारणत्वं [b]सामान्याकारेण च पूर्व-
कार्यत्वं [c]द्रव्यसामग्र्यां वृक्षसामग्र्या शिंशपासामग्र्या
च पृथग्व्यक्तिजननापातः [d]पृथगेव तासां सामग्री-

स्यात् सर्वासां च व्यक्तिं प्रत्येव जनकत्वात् द्रव्यत्वादीनामजन्यत्वात् ॥

टी० ननु तथापि घटजातीयनियतपूर्ववर्तित्वमेव कारणत्वं प्रमाणेन सामान्यस्य परिच्छेद्यमिति विशेषयोरपि कार्यकारणभावः स्यादेव विशेषणभंत्वात् सामान्यवत्येरयाशङ्क्याह—a"सामान्याकारेणे"ति । एवं सति विशेषः(१) कारणं न स्यादेव कारणताग्राहकप्रमाणस्य विशिष्टे एव प्रवृत्तेः सामान्यविशिष्टं वस्त्वन्तरमेव कारणं तत्र दण्डादिरित्यर्थः ॥ b"सामान्याकारेणे"ति । पूर्वमत एव कार्यत्वं स्यादिति सत्कार्यवादापत्तिरथवा पूर्वमत एव घटस्य भाविद्रव्यकार्यत्वं स्या(२)दित्यर्थः । किञ्च द्रव्य वृक्षः शिंशपेतिसामानाधिकरण्यप्रत्ययो न स्यात्सामग्रीत्रयेण कार्यत्रयजननप्रसङ्गादित्याह—। c"द्रव्यसामग्र्ये"ति । अत्र हेतुमाह—। d"पृथगेवे"ति । ननु सामग्रीत्रयेण वृक्षत्वशिंशपात्वादिधर्मत्रयं पृथगेव क्रियते व्यक्तिस्त्वभिन्नैवेत्याशङ्क्याह—। e"सर्वासामि"ति । सामान्यत्रयमजन्यमेव तेन तद्भेदो नापाद्यते किन्तु व्यक्तिभेद एव सामग्रीभेदादापाद्यत इत्यर्थः ॥

मू० *a शिंशपासामग्र्या वृक्षसामग्रीसहिताया एव सामग्रीभावान्न पृथक् शिंशपाव्यक्तिः ? *-इति चेन्न, वृक्षसामग्र्या शिंशपासामग्रीमतीत्यापि शालतालादेर्वृक्षस्य जननात् पृथक्तया वृक्षव्यक्तिजननापत्तेः c*सापि शिंशपासामग्रीतन्मिलितजनिकेति न व्यक्तिभेद ? *-इति चेन्न, d"शिंशपातिरिक्तवृक्षार्थाभावापत्तेः वृक्षशिंशपासामग्र्योरेकीभूतयोर्जननाविशेषात् वृक्षसामग्री च वृक्षजनन एव कथं क्वचिच्छिंशपासामग्रीं क्वचित्तमालसामग्रीमपेक्षत इति स्यात् ।

(१) विशेषः—विशेष्यविशेष इत्यर्थः । यद्वा विशेष इत्यस्य स्थाने विशेष्य इत्येव सर्वत्र पाठ उचितः ।

(२) स्यात्, तथापि द्रव्यत्वधर्मोऽस्त्यनन्तत्वादिति भावः ।

टी० ॥ ननु शिंशपासामग्री वृक्षसामग्रीमिलितैव जनिकेति शिंशपा कथं वृक्षभिन्ना स्यादित्याशङ्कते—। [a]"शिंशपे"ति। शिंशपा सामग्रीसाहित्यनियम इति परिहरति—। [b]'वृक्षसामग्र्ये"ति ॥ ननु तमालादौ शिंशपासामग्रीमन्तरेणापि वृक्षसामग्री भवतु किं तेन प्रकृते वृक्षसामग्रिता शिंशपासामग्रीमादायैवेति कथं व्यक्तिभेदः स्यादिति शङ्कते—। [c]"सापी"ति। सा शिंशपासामग्री वृक्षसामग्रीसाहित्यनियता चेत्तदा वृक्षसामान्यसामग्रीतोऽपि प्रकृते वृक्षसामग्री तत्राभिन्नैव वाच्या तदा तदेकवृक्षगतं वृक्षत्वं शिंशपात्वं चाभिन्नमेव स्यात्तत्र वृक्षसामग्र्याः सामान्यसामग्रीत्वभावादिति परिहरति—। [d]"शिंशपायै"ति। किञ्च शिंशपातमालसामग्रीमिलिता वृक्षसामान्यसामग्र्यप्येका कथं तिष्ठेद्येन शिंशपातमालयोर्द्वयोरपि वृक्षत्वाविशेषः स्यादित्याह—। [e]"वृक्षसामग्री चे"ति ॥

मू० एकस्य वृक्षलक्षणस्य कार्यस्य सामग्रीभेदे स्वरूपभेदापातात् [b]अनुगतायाश्च वृक्षसामग्रीत्वे पृथग्वृक्षव्यक्तेः पृथक् शिंशपादिव्यक्तेरुत्पत्त्यापत्तेरित्यादि स्वयमूहनीयं [c]नियमे च प्राक्कालतयाभिधीयमाने प्रागित्यस्य व्यवच्छेद्यौ वर्त्तमानभविष्यत्कालौ प्राक्कालश्च व्यवच्छेदको विवेचनीयः। न च तद्विवेचनं शक्यं * वर्त्तमानादिबुद्धय एव स्वविषयवैचित्र्ये प्रमाणम् ? *-इति चेन्न, [c]तथाहि वर्त्तमानादिबुद्धेरेव को विषयः कालविशेष इति चेत्कालस्य विशेषः स्वाभाविक औपाधिको वा ?। नाद्यः। कालस्य भवद्भिरेकत्वाभ्युपगमात् ॥

टी० ॥ ननु भवतु वृक्षसामग्र्या अपि विशेषसामग्रीद्वयभेदेन भेदः को दोष इत्यत आह—। [a]"एकस्ये"ति। विशेषद्वयसामग्रीतः सामान्यसामग्री भिन्नैवेत्यत आह—। [b]"अनुगता

या" इति । तथा सति विशेषद्वयातिरिक्त एकरूपं कालस्वरूपं प्रतीतेरित्यर्थः । प्राक्कालीनतायां कारणस्य नियम एकत्वात्र पूर्वपदार्थं स्पष्टयति-। c "नियते चे"ति । तदनित्यत्वे तस्मात्कालच्छेद्याप्रतीतौ विशेषणमफलं स्यात्लक्षणं च दुरवधारणमापद्येतेति भावः ॥ ननु विषयवैचित्र्याधीनमित्यतीतत्वेन प्रतीयमान एव कालः पूर्वकाल इति ब्रुवन्नमेवैतदित्याह-। d "वर्त्तमानादिप्रतीतिविषयमेव न विद्म इति सोऽयमयं निर्बोध्य इत्याह-। e "ने"ति ॥

सू० a य एव च कालो वर्त्तमान इति प्रतीयते स एव पूर्वं भावीति पश्चाद्भूत इति च न प्रतीयेत * b त्रिविधस्वभाव एवासौ ? *--इति चेन्न, भेदप्रसङ्गात् c व्यवस्थानुपपत्तिप्रसङ्गाच्च d यदैव वर्त्तते इति प्रत्ययस्तदैव वृत्तो वर्त्तिष्यते इति प्रत्ययः स्यात् e द्वितीयश्चेदुपाधिरभिधीयतां * सूर्यादिक्रियासंबन्धभेदः स ? *--इति चेन्न, f भूतभविष्यतोरपि क्रियासंबन्धप्रत्ययस्यावश्यं वक्तव्यत्वात् g य एव दिवसः सूर्यगतिविशेषावच्छिन्नो वर्त्तते इति प्रतीतः स एव हि तदवच्छिन्नो वृत्त इत्यवगम्यते वर्त्स्यन्निति च । नहि निर्विशेषस्य कालस्य तदतीतत्वं वा किन्तूपाधिविशेषेणैवावच्छिन्नस्य ॥

टी० ॥ एकत्वाभ्युपगमे दोषमाह-। a "य एवेति । एकस्य विरुद्धत्रैविध्यानुपपत्तिरित्यर्थः । ननु स्वभाव एवास्य प्रतीतिबलात्त्रिविध इति न विरोध इति शङ्कते-। b "त्रिविधे"ति । एकस्य विरुद्धस्वभावत्वानुपपत्तेरिति परिहरति । नेति । दोषान्तरमाह-। c "व्यवस्थे"ति । तदेव दर्शयति-। d "यदे"ति । वर्त्तमान एवातीतत्वादिनापि भासेतेत्यव्यवस्थितिः स्यादित्यर्थः । औपाधिकत्वे दोषमाह-। e "द्वितीय"इति । वस्त-

मानात्वमात्रं प्रतिनियतस्यो(१)पाधेरभावात्तावतांशेन चोपाधिना नियतप्रतीतिप्रयोगयोरनुपपत्तिरित्याह—। [f]"भूतभविष्यतोरपी"ति । भूतभविष्यतोरप्यनौपाधिकत्वमित्याह—। [g]"य एवे"ति ॥

मू० [a]येनैवासौ पूर्वं दिनान्तराद्व्यवच्छिन्नो वर्त्तत इति प्रतीतस्तेनैवोपाधिना तत एव व्यवच्छिन्नो वृत्त इति वर्त्तिस्यत इति च कदाचिज्ज्ञायते * [b]ननु सत्यमेतत्परं यदा तदुपाधिसंबन्धोऽस्य स्वरूपेणावतिष्ठमानस्तदा वर्त्तमानप्रत्ययो यदा स एवविनष्टो भवति तदा भूतप्रत्ययो यदानागतस्तदा भविष्यत्प्रत्यय इति * [c]नैतस्ति, यद्यच लटो विवक्षितोर्थः तदा तज्ज्ञानस्यैव तज्ज्ञानोपायत्वमित्यात्माश्रयानवस्थयोरन्यतरप्रसङ्गः [d]विनष्टादिशब्दाश्चातीतादिपर्याया: तेषां सर्वेषामेवार्थं निरूप्यमाणे तन्मध्यपतितमेकं शब्दं प्रयुज्य तन्निरुक्तिं कुर्वाणः श्लाघनीयप्रज्ञो मातापितृमानसि * [e]क्रियावच्छिन्नः कालो वर्त्तमानः तत्प्रागभावाच्छिन्नो भविष्यन् तत्प्रध्वंसावच्छिन्नो भविष्यन्? *-इति यः । , अतीतानागतप्रतीतिकालेऽपि क्रियावच्छि— प्रतीयत इति वर्त्तमानप्रत्ययप्रसङ्गस्य तादवस्थ्यात् ।

टी० ॥ वर्त्तमानोपाधेरभिन्न एवोपाधिर्भूतभविष्यतोरपीत्याह—। [a]"येनैवे"ति । तथाच वर्त्तमानबुद्धिरेवातीतादिबुद्धिरपि स्यात्तदुपाध्यवच्छेदरूपविषयाविशेषादित्यर्थः । ननूपाधेरेकत्वेपि तद्वर्त्तमानातीतानागतत्वैः प्रत्ययवैचित्र्यं स्यादिति शङ्कते । [b]"नन्वि"ति ॥ [c]"नैतदि"ति। स्वरूपेणावतिष्ठमान इति शानच्स्थानिभे लट इत्यर्थः । यदि तेनैव वर्त्तमानेन तन्निरूपणं तदात्माश्रयो वर्त्तमानान्तरेण चेत्तदानवस्थेत्यर्थः । आत्माश्रया-

(१) नियमस्य = असाधारणस्य ।

न्तरमाह—। [d]"विनष्टा"दीति । विनष्टो ध्वनीत एवोच्यते तथा-त्मनाश्रय इत्यर्थः । वर्तमानादिष्वव्याख्यारीवाभिमेदं प्रति नियत-माह—। [e]"क्रिये"ति । कालस्यैक्यादेकस्यैव क्रियातत्प्रागभाव-तत्प्रध्वंसावच्छेदसम्भवे वैचित्र्यानुपपत्तिरिति परिहरणम् । यद्वा क्रियापदेन क्रियामात्रमभिधीयते तथाच क्रियाप्रागभावावच्छि-न्नोऽपि(१)किञ्चित्क्रियावच्छिन्नो भवत्येवेति नैतत्कृतमपि वैचि-त्र्यमित्यर्थः ॥

मू० [a]क्रियानवच्छिन्नस्य तत्प्रागभावप्रध्वंसभावावच्छेदा-नुपपत्तेः [b]प्रागभावश्च प्रागर्थानिरुक्तौ कथं तदुर-धिगमः [c]प्रध्वंसस्यापि प्रागभावात्कथं विशेषो व-क्तव्यः * अभावो विनाशी प्रागभाव उत्पत्तिमान् प्रध्वंस इत्यनयोर्विशेष ? *-इति चेन्न, [d]को हि प्रागभावस्य विनाशो येन विनाशीत्युच्यते । यदि प्रतियोगिभूतो घटादिः प्रध्वंसस्यापि प्रागभावव-त्प्रतियोगीति सोऽपि विनाशी प्राप्तः उत्पत्तिमांश्च प्रध्वंस इत्युत्पत्तिपदार्थो विवेचनीयः । यद्यसावसतः सत्त्वं [e]तन्न सामान्यं तदाऽभावेऽसम्भव एव । अथ स्वरूपसत्त्वं तदा प्रागभावेऽपि प्रसङ्गः [f]तस्यापि कदा-चिन्निरूपत्वा [g]त्पूर्वमसतः पश्चात्सत्त्वं विवक्षितम् ? *-इति चेन्न, पूर्वेदानीं पश्चादर्थस्यैवानिरूपणात् [h]एतेन कारणावच्छिन्नं सत्त्वमुत्पत्ति रित्यपिनिरस्तम् ॥

टी० ॥ तदेवाह—। [a]"क्रियानवच्छिन्नस्ये"ति । प्राक्काल एव निरूप्यते प्राक्कालस्यभाव इत्यात्माश्रय इत्याह—। [b]"प्रा-गभावश्चे"ति । प्रध्वंसोऽपि प्रागभावादभिन्न एवेति भन्नभवि-ष्यतोर्नोपाधिवैचित्र्यमित्याह—। [c]"प्रध्वंसस्यापी"ति । विना-शीति विनाशवान् विनाशश्च प्रतियोग्येव प्रागभावस्येव प्रध्वं-

(१) क्रियाप्रागभावावच्छिन्न इत्युपलक्षणं क्रियाध्वंसावच्छिन्नोऽपी-त्यपि बोध्यम् ।

तस्यापि सप्रतियोगिकत्वमेव विनाशित्वमित्याह—। [d]"को ह्री"ति । [e]"तत्र सामान्यमि"ति । समस्तेत्यर्थः ॥ [f]"तस्यापी"ति । उत्तरकाले सत एव पूर्वकाले सत्त्वादित्यर्थः । [g]"पूर्वमसत"इति । प्रागभावस्य तु पूर्वं स्वरूपमसत्त्वमेवेत्यर्थः । [h]"एतेने"ति । प्रागभावे कारणावच्छेदाभावान्नोत्पत्तिरित्यर्थः ।

मू० [a]पूर्वापरनिर्वचनमन्तरेण कारणार्थानिर्वचनादस्तु तावदतीतानागतयोर्यथातथा निरुक्तिः * यत्क्रियावच्छिन्नो यः कालः स तत्क्रियापेक्षया वर्त्तमानो न त्वन्यापेक्षया ? *-इति चेन्न, तदपेक्षयेति कोर्थः [b]किं तदुपधानेन उत तदवधिकतयोत तत्प्रतियोगिकतया उत तेन प्रकारेणेत्येव? । नाद्यः [c]तदुपाध्यवच्छिन्नस्यातीतानागतप्रतिपत्तिविषयत्वमपि तस्येत्यसकृदुक्तत्वात् [d]नापि द्वितीयः । अस्मादयं दीर्घ इतिवदस्मादयं वर्त्तते इत्यवध्यपेक्षामन्तरेण प्रतीयमानत्वा[e]त्सर्वस्यैव च त्रिविधावध्यपेक्षयासीदस्ति भविष्यतीति प्रत्ययाऽव्यवस्थाप्रसङ्गात् ॥

टी० ॥ अतिदेशं दर्शयति—। [a]"पूर्वे"ति । अपरेति सम्पातायातं कार्यं पूर्ववर्त्तित्वं कारणत्वं कार्यत्वं चापरकालवर्त्तित्वमिति परम्परयापरकालस्यापि कारणत्वनिरूपकत्वमिति तात्पर्यम् । न त्वन्यापेक्षयेति । न त्वानवच्छेदकापेक्षयेत्यर्थः ॥ [b]"किमि"ति । क्रियाया उपाधित्वमवधित्वं प्रतियोगित्वं वेति विकल्पार्थः तत्क्रियोपहितस्यैवातीतत्वमनागतत्वं चेत्यविशेषः । कालस्यैकत्वादित्याह—। [c]"तदुपाध्यवच्छिन्नस्ये"ति । क्रियाया अवधित्वे दोषमाह—। [d]"नापी"ति । किन्तु यद्यवधिर्वर्त्तमानत्वे तथा तत्प्रागभावप्रध्वंसावधी भूतभविष्यतोरपि स्यातां तैश्चावधिभिरेक एव कालस्तत्प्रत्ययविषयः स्यात्तदा वर्त्तत इतिवदासीद्भविष्यतीत्यपि प्रत्ययः स्यादित्यव्यवस्था भवेदित्याह—। [e]"सर्वस्ये"ति ॥

सू० [a]अत एव न तृतीयः । नापि चतुर्थः । [b]अतीतानागतप्रतीतिकाले क्रियावच्छेदप्रकारेण वर्त्तमानप्रत्ययविषयत्वप्रसङ्गात् * [c]नासौ क्रियावच्छेदलक्षणः प्रकारोऽतीतानागतकाले वर्त्तते? *-इति चेन्न, [d]वर्त्तमानताया अद्याप्यनिरूपणेन वर्त्तते इति उक्त्वा विशेषस्य दर्शयितुमशक्यत्वात् *तत्क्रियाकाले तत्क्रियावच्छिन्नः कालो वर्त्तमान ? *-इति चेन्न,

टी० ॥ [a]"अत एवे"ति । तथाप्रतीत्यभावादेवेत्यर्थः । ननु भवत्येव तस्यायं वर्त्तमानः कालः तस्यायमतीत इत्यादिप्रतीतिः षष्ठ्या प्रतियोगित्वस्यैवाभिधानादिति चेन्न । घटो वर्त्तत इत्यादि न स्यात् । किन्तु क्रियाया एव प्रतियोगित्वे घटादेरपि वर्त्तमानत्वे यात्र्ये क्रियामात्र एव (¹)प्रतियोगित्वं स्फुरेदिति भावः । एवं क्रियायाः प्रकारत्वेऽपि द्रष्टव्यम् ॥ [b]"अतीतानागते"ति । अतीतानागतया च क्रियया विच्छिन्न. स एव काल इति तयोरपि वर्त्तमानत्वेन भान स्यादित्यर्थ. । यदा क्रियावच्छेदः प्रकारो वर्त्तमानस्तदा तथाप्रत्ययं करोति तदतीतत्वादिदशायां च न स वर्त्तमान इति न तादृप्येण प्रतीतिरिति शङ्कते । [c]"नासा वि"ति । यदि वर्त्तमानत्वं परिच्छिन्न(²) स्यात्तदा क्रियावच्छेदः प्रकारो यदा वर्त्तते इत्युक्त्यातीतानागतयोर्विशेषः प्रतीयेत तदेवाद्यापि न परिच्छिन्नमिति परिहरन्ति- । [d]"ने" ति । तत्क्रियावच्छिन्नः काल इत्युक्ते अतीतादावपि प्रसङ्ग इत्यत उक्तं तत्क्रियाकाले इति ॥

सू० [a]कालस्य कालाश्रयतया निरूपणासम्भवात्कालान्तरस्यानभ्युपगमात्तस्यैव कालस्य तदाश्रयत्वे व्यक्तमात्माश्रयत्वापत्तेः* [b]स्यादेतत् । ग्राहकविज्ञानविषयो ग्राहकविज्ञानाश्रयश्च कालो वर्त्तमानः वर्त्तमानोपाधिप्रागभावावच्छिन्नश्च पूर्वस्तत्प्रध्वंसाभावव-

(१) क्वचित् क्रियाया एवेति पाठः (२) परिच्छिन्नम्=सम्भूतम् ।

च्छिन्नस्यानागतः ᶜप्रागभावप्रध्वंसयोश्च स्वाभाविकमेव भेदमादाय व्यवस्था प्राग्व्यवस्थाहेतुरभावः प्रागभाव इति स्वभावभूतस्यैव विशेषस्य कार्यमादाय लक्षणमनागतव्यवस्थानिदानभावः प्रध्वंस इति च प्रध्वंसस्य ? *-इति । मैवं,

टी० ॥ ᵃ"'कालस्य कालाश्रयतये"ति । यद्यपीदानीं काल इति प्रतीत्यनुरोधात्कालेपि । कालः स चात्माश्रयतया यद्यपि न स्वरूपे तस्य तथाप्युपाधिविशिष्टे केवलः केवले चोपाधिविशिष्ट इति सम्भवत्येव काले कालः । किन्तु स्थूलोपाध्यवच्छेदेन सूक्ष्मोपाध्यवच्छिन्नः कालः सम्भवत्येव भवति हि दिवा मुहूर्त्तमित्याद्याविधा तथापि तत्राप्यतीतादिविशेषको प्रयोगो (¹)नास्तीति भावः । वर्त्तमानविषयकज्ञानाश्रयः कालो वर्त्तमानः एवं तदतीतत्वाद्यपि निर्वाच्यमिति शङ्कते— ᵇ"स्यादेतदि"ति । ननु प्रागभावप्रध्वंसावेव दुर्वचावित्यत आह— ᶜ"प्रागभावप्रध्वंसयोरि"ति । व्यवस्थानलक्षणं कार्यमादायेत्यर्थः । यद्वा कार्यपदेन प्रतियोगीत्युच्यते तथाच प्रतियोगिजनको ऽभावः प्रागभाव इत्यर्थः ॥

सू० ᵃज्ञानाऽस्वप्रकाशतापक्षे स्वोपहितस्य स्वयं ग्रहणानुपपत्तेः कथं वर्त्तमानताग्रहः ज्ञानान्तरेण च तथाग्रहे वर्त्तमानतावभासाङ्गीकारे तदासौ दृष्टो मयेति प्रत्ययस्य तदासौ मया दृश्यत इत्याकारतापत्तिः अत एव स्वप्रकाशपक्षेप्यनिस्तारः ᵇयावानर्थः स्वप्रकाशे वर्त्तमानतयोक्तस्तावत एव परेण ग्रहणे व्यभिचारा ᶜत्स्वप्रकाशतायाश्चाधिक्येऽपि विषये विशेषाभावा ᵈ* त्स्वरूपमेव विशेषः ? *-इति चेन्न,

(१) अतीतादिभ्यो वर्त्तमानस्य विशेषकेण भेदकेनोपयोगः व्यवहारो नास्तीत्यर्थः । अतीतादिकालेतिप्रसङ्गवारणमेतावतापि न भवतीति भावः ।

टी० ॥ [a]"ज्ञाने"ति । वर्त्तमानताग्राहकं ज्ञानं स्वप्रकाशमस्वप्रकाशं वा ? । अन्त्ये वर्त्तमानत्वग्रहो न स्यादेव तस्य ज्ञानघटितत्वात् वर्तमानताघटकज्ञानान्तरमुत्पन्नेनापि ज्ञानेन यदि वर्त्तमानताग्रहस्तदा दृष्टं तज्जयेत्यत्रापि दृश्यते तज्ज्ञायेत्याकारः स्यात् तदुपगमेपि तथा तद्ग्रहस्येष्यमाणत्वादित्यर्थः । [b]"यावानर्थे"इति । ग्राहकज्ञानविषयो ग्राहकज्ञानाश्रयश्चैक एव कालोतीतादिसाधारण इति सैवाव्यवस्था । किञ्च पक्षेणाप्यतीतत्वादिग्राहकेणापि ज्ञानेनायमेवार्थो गृह्यत इति तस्य वर्त्तमानग्राहकता नास्तीति व्यभिचार इत्यर्थः । ननु स्वप्रकाशात्मकज्ञानविषयत्वे सति तादृशज्ञानाश्रयत्वं विवक्षितमिति नोक्तदोष इत्याशङ्कते—। [c]"स्वप्रकाशताया"इति । एतावताप्यतीतादिवैलक्षण्यमनिरुक्तमेवेत्यर्थः । ननु स्वेनेव विषयीक्रियमाणं तज्ज्ञानं वर्तमानत्वप्रत्ययं करोति नान्यनेत्यतीतादौ कः प्रसङ्ग इति शङ्कते—। [d]"स्वरूपमेवे"ति ।

मू० "तस्यानुगमाननुगमाभ्यामनुपपत्तेः प्राक्प्रध्वंसभावयोश्च स्वरूपतो विशेषेऽपि [h]कतरो भूतव्यवहारस्य कतरश्चानागतव्यवहारस्योपाधिरित्यनुयुक्ते [c]कार्यभेदजनकतया च तन्निरुक्तावुत्तरे पूर्वप्रत्युक्तां पूर्वतापरतानिरुक्तिं विना जन्यजनकत्याज्ञानमिति [d]उपाधिभेदाच्च कालभेदे योऽप्येकतयाभिमतः कालः सोपि चन्द्रसूर्यक्रियाद्यसङ्ख्योपाधिभेदसम्भवेन नाना स्यात् [e]तत्रायमेवोपाधिर्नायमिति चाविनिगम्यत्वा-[f]त्प्रतिक्षणस्वभावभेदवादिपक्षे च नानाक्षणेषु वर्त्तमानत्वादिव्यवहारार्थमुपाध्यनुसरणावश्यम्भावेनोक्तोपाधिदोषग्रस्तस्यैवापातादि'त [h]* ननु तथापि तावद्विषयभेदेनावश्यं भवितव्यं [h]प्रतीतिभेदस्य दुरपह्नवत्वा-

टी० ॥ चैत्रज्ञानस्य खगद्याव्यपत्वे चैत्रस्य वर्तमानताप्रत्ययो न स्यादिति परिहरति—। b"तस्ये"ति ॥ c"कतर"इति । लक्षणमन्तरेणास्तत्त्वग्रहमेवे(१)त्यर्थः। h"कार्यभेदे"ति। पूर्वपश्चाद्भूत्वव्याहरणलक्षकार्यभेदः पूर्वापरभावनिरुक्तिमन्तरेणाग्रह एवेत्यर्थः। उपाधयः। सूर्यादि(२)स्पन्दा बहव इति तमुपहितस्यैकदेशे बहुत्वप्रसङ्ग इत्याह—। d"उपाधी"ति। नन्वेकेन केनचिदुपाधिनोपहितत्वे नैकमानात्वमित्यत आह—। e"तत्रे"ति। ननु प्रतिक्षणकालस्वरूपभेदाधीनमेव वर्त्तमानादिव्यवहारवैचित्र्यं स्यादत आह—। f"प्रतिक्षणे"ति। संशयखण्डनं प्रस्तौति—। g"ननु तथापी"ति ॥ h"प्रतीतिभेदस्ये"ति। प्रतीतिभेदवैलक्षण्यस्येत्यर्थः। विषयभेदमन्तरेण सर्वाः प्रतीतय एकाकाराः स्युरिति भावः

मू० इतः "सामान्यतः सिद्धौ विशेषतो विवेचनाशक्तौ भेदे संशय एवास्ताम् ? *-इति चेन्न, संशयस्यापि निर्वक्तुमशक्यत्वात् तथापि संशयस्य निश्चयात्किमुपाधिकृतो विशेषः उत जातिकृतः ?। आद्ये किं[b] विषयविशेषेणोपाधिना उत [c]कारणविशेषेण उतान्येनैव केनचित्संबन्धिना कृतः न तस्यानिर्वचनात् * उभयकोटिविषयः संशय*इति चेन्न, [d]कोटिद्वयसमुच्चयनिश्चयस्यापि संशयत्वप्रसङ्गात्। * प्रतीतिरेवनैव(३)म् ? *-इति चेन्न, [e]भेदाभेदप्रतीतीनां शाब्दस्वप्नादिप्रतीतीनां च तादृशासम्भवात् [f]*समुच्चयप्रकाशे कोट्योरविरोधः प्रकाशते संशयेत् विरोध ? *--चेन्न, पीतः शङ्ख इत्यादिषु पीतत्वशङ्खत्वादेर्भिन्नाश्रयतानियमं विरोधं जानतोपि प्रत्ययात् ॥

(१) असत्त्वग्रहमेव, तत्तु ग्रहमेवेति वा पाठः ।
(२) आदिपदेन चन्द्रादयः ।
(३) एकस्मिन् धर्मिणीति शेषः ।

टी० ॥ a"सामान्यत" इति। प्रतीतिभेदान्यथानुपपत्त्या विषयभेदः सामान्यतः सिद्धोऽपि स्वरूपान्योन्याभाववैलक्षण्यानां प्रत्येकमनुपपत्तौ तत्र सन्देह इत्यर्थः। यद्वा विषयभेदो घटादिरेव निर्वक्तुमशक्य इति सन्देह इत्यर्थः॥ b"विषयविशेषे"ति। विरोधिनानाकोटिस्थादिमेत्यर्थः॥ c"कारणविशेषे"ति। समानधर्मज्ञानादिनेत्यर्थः। स्थाणुरयं पुरुषो वेत्यत्राति-व्याप्तिमाह—। d"कोटिद्वये"ति॥ e"भेदाभेदे"ति। भिन्नो यमभिन्नश्चेति मते तादृशप्रतीतसम्भवात् भिन्नोऽयमभिन्नश्चेति शाब्दप्रतीतेस्सम्भवादित्यर्थः। "अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि" इति न्यायादिति भावः। विरोधिविषयत्वं लक्षणमाशङ्कते—। f"समुच्चये"ति॥

सू० * a"तथापि तस्यां बुद्धौ न भासते विरोध ?*—इति चेन्न, कथमेवमिति प्रकाशेऽपि b"तत्प्रकाशात् c"तयोरेकाश्रययोर्विरोधप्रतीतेरवश्योपेयत्वात् * d"मिथ्याधियस्ता इति ?*—e"चेन्न, संशयस्यापि भवद्भिरतत्त्वबुद्धितयाङ्गीकारात् f"तत्त्वातत्त्वबुद्ध्योश्च तद्विषयत्वेन विशेषाभावात्। नहि मिथ्या रजतबुद्धौ रजबुद्धिरेव न भवति g"अव्यवस्थितकोटिद्वयविषयसंशय इति चेत्, केयमव्यवस्थितता पाक्षिकतेति चेत्, न पर्याय पृच्छमोपितु किं कोटिद्वयस्वरूपमेव उत कोटिद्वयस्य धर्मः कश्चिदाद्ये कोटिद्वयनिश्चयेन सहाविशेषस्तदवस्थः द्वितीये यद्य h"सौ केनचित्प्रमाणेन सिद्धः॥

टी० ॥ पीतत्वशङ्खत्वयोर्यद्यपि वास्तवो विरोधस्तथापि पीतः शङ्ख इति प्रतीतौ न भासते इति नातिव्याप्तिरित्याह—। a"तथापी"ति। कथमयं शङ्खः पीत इत्यर्थसंशयस्यापि पीतः शङ्ख इति निश्चयदर्शनादित्याह—। b"कथमि"ति। ननु कथमेव सति पृथगेव विरोधज्ञानमित्यत आह—। c"तयोरि"ति।

शुक्लत्वपीतत्वयोरित्यर्थः ॥ ननु विरोधे भासमाने नानाकोटिकं प्रमारूपं ज्ञानं संशयः शुक्लत्वपीतत्वसमुच्चयज्ञानं न तथेत्याह—। [d]"निश्चये"ति । लक्षणभिदमनन्यभिचारि संशयस्यापि प्रमात्वादित्याह—। [e]"ने"ति । ननु तत्त्वबुद्धित्वेन लक्षणं विशेषणीयं येनासम्भवः स्यादपि तु वस्तुस्थितिस्ताद्दृशीत्याह—[f]"तत्त्वे"ति । विरोधकोटिद्वयविषयकत्वस्याविशेषादित्यर्थः ॥ [g]"व्यवस्थिते"ति । समुच्चयस्तु विरोधविषयकोऽपि व्यवस्थितकोटिक इति भावः ॥ [h]"अभावि"ति अव्यवस्थितेत्यर्थः ।

सू० [a]तदा तस्यैव कोटिद्वयाश्रिततद्धर्मविषयस्य संशयत्वप्रसङ्गेन प्रमाणत्वव्याघातः । अथ कस्य चित्प्रमाणस्य नासौ विषयः [b]नास्ति तर्हि विषयकृतो विशेषः [c]एतेनान्योऽपि यः कश्चिद्दूषयविशेषः स्याणुतदभावपुरुषतदभावादिरूपोऽभिधीयते सोऽपि निरस्तो वेदितव्यः अत्यन्ता [d]सत एव च तस्य प्रतिभासे जितं जिनैरसत्ख्यातिवादिभिः क्वचिन्मतश्चेत्त [e]त्रैव प्रसङ्गः [f]नापि द्वितीयः कारणविशेषो हि विशिष्य सामग्री स्यात्तदेकदेशो वा ?। नाद्यः तस्या अप्रत्यक्षत्वे तदुपहितस्य प्रत्यक्षतोऽवगमानुपपत्तेः।

टी० ॥ [a]"तदे"ति । अव्यवस्थितत्वं विषयीकुर्वत् प्रमाणमव्यवस्थितविषयतया संशयः स्यादेवेत्यर्थः । [b]"नास्ती"ति । विषयविशेषस्याव्यवस्थितत्वासिद्धेरित्यर्थः ॥ [c]"एतेने"ति । प्रमाणसिद्धत्वासिद्धत्वविकल्पेनेत्यर्थः यद्यपि स्थाणुत्वपुरुषत्वतदभावानां प्रत्येकं प्रमितत्वेनैकत्र दोषवशादारोपः सम्भवति स एव च संशयस्तथापि विशिष्टं न प्रमितमित्यर्थः । ननु तत्र प्रमितत्वं असत्त्वमित्यत आह—। [d]"सत" इति । अत्यन्तासद्विषयत्वमेव तर्हि संशयस्य स्यादित्यर्थः ॥ [e]"तत्रैवे"ति । येन प्रमाणेन तद्ग्रहणं वाच्यं तस्यैव संशयत्वप्रसङ्ग इत्यर्थः । कारणोपधानेन संशयस्य वैलक्षण्यं निरस्यति—। [f]"नापी"ति ॥

[k]"तस्या" इति । दृष्टादृष्टकारणचक्ररूपायास्तस्याः उपधायकत्वे संशयः क्वापि मानसप्रत्यक्षविषयो न स्यादित्यर्थः ॥

मू० [a]न च तस्या अनुमेयत्वं लिङ्गासम्भवात्, [b]*कार्यविशेष एव लिङ्गम् ? *-इति चेन्न, [c]कार्यगतस्यैव विशेषस्य चिन्त्यमानत्वादात्माश्रयप्राप्तेः [d]जातिभेदस्य दूषणीयत्वात् । नापि द्वितीयः। द्वयस्य तदेकदेशस्य [e]साधारणधर्मदर्शनादेर्विशेषद्वयस्मरणादेश्च साधारणमविशेषद्वयज्ञानं प्रत्यक्षादावपि हेतुत्वेन साधारण्यात् अदृश्ये च तस्मिल्लिङ्गाभावात् [f]तेन कार्यविशेषजात्याधानस्य निरस्तत्वात् [g]तस्या अविषयत्वेनानुव्यवसायसाक्षिककार्यगतविशेषविभवनाऽसामर्थ्यात् ॥

टी० ॥ नन्वनुमानोपहिता संशयसामग्रीसंशयानुव्यवसायविषयः स्यादित्यत आह । [a]"नचे"ति ॥ [b]"कार्यविशेष" इति । संशयरूप इत्यर्थः। ज्ञानान्तरापेक्षया संशयस्य पक्षाभेदकाभावेन तद्विषयासिद्धेरित्याह—। [b]"कार्ये"ति । ननु संशयत्वजातिरेव कार्यविशेषिका स्यादित्यत आह—। [d]"जाती"ति । आदिपदग्राह्यं धर्मिज्ञानविशेषादर्शनादि ॥ [e]"साधारणे"ति । साधारणधर्मज्ञानस्य कोटिस्मरणस्य धर्मिज्ञानस्य च यन्मानसं प्रत्यक्षत्वादि जन्यतया तत्रातिव्याप्तिरित्यर्थः [g]"तेने"ति । तेनातीन्द्रियकारणोपनायकमित्यपि नेत्यर्थः । तस्यां जातावनुपलम्भबाधमाह— [f]"तस्या" इति । जातिश्चेदृदृश्येन कारणेन संशये काचिदाधेया तदा योग्यव्यक्तिवृत्तितया सा योग्या स्यान्नचैवमित्यर्थः ॥

मू० [a]नापि तृतीयः । तस्य दर्शयितुमशक्यत्वात् [b]नच द्वितीयः धर्म्मिस्वरूपादेरपि तद्विषयतया संशयितत्वप्रसङ्गात् [c]न चैवं नह्ययं स्थाणुर्वा पुरुषो वेति सं-

शये सतीदमा परामृश्यमाणस्योर्द्ध्वत्वशालिनो धर्मि-णः स्वरूपसत्त्वेपि स्वरूपमेव भवति न वेति तद्द्र-ष्टुरभिमानो व्यवहारो वा ^d^किन्नाम तत्र । किमि-ति चेत्, ^e^एकस्यैव ज्ञानस्य निश्चयत्वसंशयत्वजा-तिसङ्करः * ^f^स प्रामाण्याप्रामाण्यवद्भविष्यति ? *-इति चेन्न, अत एव हि तयोरपि जातित्वानङ्गीकारः किन्नाम ।

टी० ॥ येनकेनचिदुपाधिनेति शङ्कितं पक्षं दूषयति-"नापि तृतीय" इति । जातिविशेषं दूषयति-। ^b^"नच द्विती-य" इति । संशयत्वजातेर्धर्म्यवृत्तितया धर्म्यंशेति सन्दिग्धत्व स्यादित्यर्थः ॥ ननु धर्म्यंशेपि संशयः स्यात्तदायं धर्मी न वा स्वरूपमिदं न वेति तदाकारस्स्यादित्यर्थः । प्रत्युत धर्म्यंशे निश्चयत्वमेवाह-। ^d^"किं नामे"ति ॥ ^e^"एकस्यैवे"ति । यद्य-प्यनुगतस्वभावात्वादिना परापरभावानुपपत्त्यानित्यत्वं न जातिस्तथापि उपाधिरपि निश्चयत्वं संशयविरोधिज्ञानत्वमेव वाच्यं तत्र कथं संशयवृत्ति स्यादिति भावः ॥ नन्वभेदेन व्यैकत्वं प्रमात्वमप्रमात्वं च यथा तथा निश्चयत्वसंशयत्वे स्यातामित्याह-। ^f^"स" इति । जातिसङ्कर इत्यर्थः ॥

सू० ^a^ तथाभूताऽतथाभूतार्थतालक्षणोपाधिद्वयरूपता-स्वीकार एव तयोः ^b^ यदा च संशयत्वलक्षणजा-तिद्वयसंभिन्नं तद्विज्ञानमास्थियते तदा कञ्चिद्वि-षयमपेक्ष्य संशयत्वं किञ्चिदपेक्ष्य निश्चयत्वमित्या-पेक्षिकी जातिव्यवस्थितिरित्यपूर्वः पन्थाः ^c^ ईदृ-शस्य पथः पान्थेनापि भवता किं नियामकमभि-धेयं येन धर्मिणि तस्य निश्चयत्व व्यवतिष्ठते ^d^ वि-शेषद्वये च संशयत्वं विशेषदर्शनादर्शने इति चेत् तर्हि भवति स्थाणोः स्थाणुत्वं पुरुषत्वं पुरुषस्य

विशेषः प्रतीयते यावदिति विशेषदर्शनात्तत्रापि निश्चयप्रसङ्गः ॥

टी० "तथाभूते"ति । सत्यानुभवत्वासत्यानुभवत्वलक्षणमुपाधिद्वयमित्यर्थः । ननु तथाप्यवच्छेदकभेदेनैकत्र वृत्तिर्निश्चयत्वसंशयत्वयोरुभयोस्संयोगतदभाववदित्यत आह— b"एकदे"ति । तर्हि धर्म्यपेक्षया निश्चयत्वं कोटिद्वयापेक्षया संशयत्वमिति जातेः सापेक्षत्वप्रसङ्ग इत्यर्थः ॥ नन्वस्त्वेव यथा तथा तु संशयत्वसम्भवे त्ववस्थितिरुभयोरनुभूयत एवेत्यत आह— c"इदमंशे"ति धर्म्यंशे निश्चयत्वं कोटिद्वये च तस्य संशयत्वमत्र यदि किञ्चिन्नियामकं स्यात्तदानुभवोऽप्ययमन्यथासिद्धस्स्यान्न त्वेवमित्यर्थः ॥ ननु कोटिद्वये विशेषादर्शनात्संशयो धर्मिणि विशेषदर्शनान्निश्चय इत्याह— d"विशेषे"ति । स्थाणुपुरुषयोः स्थाणुत्वपुरुषत्वे विशेषेण दृश्येते इति तत्रापि निश्चय एवायं स्यादित्याह— e"तर्ही"ति ॥

मू० a संशयात्पूर्वं नास्ति विशेषदर्शनमिति युक्तः तत्रापि संशय ?*—इति चेन्न, b धर्मिधियः पूर्वं तर्हि कथं तद्गतविशेषदर्शनं स्यात् c संशयकाले नास्ति विशेषदर्शनमित्यनन्तरं तर्हि संशया न नवृत्तिप्रसङ्गोपि युक्त एव * d तदीयविषयाद्विशेषा' द्व्यतिरिक्तस्य विशेषस्य दर्शनं विवक्षितम् ? *—इति चेन्न, e स्थाणुर्वा पुरुषो वेति संशयानन्तरं दारुमयो मांसमयो वायमिति संशयो नोपपद्यते तदुभयत्वातिरिक्तयोः स्थाणुत्वपुरुषत्वयोर्विशेषयोः पूर्वज्ञानेनोल्लिखितत्वात् * अन्यतरविशेषदर्शनं संशयप्रतिरोधकं संशयेन तूभयोरुपदर्शनमतो नोक्तदोषप्रसङ्ग * इति चेत्, तर्हि स्थाणुः पुरुषश्चेति

कुतोऽपि विभ्रमे जाते दारुमयो वा मांसमयो [f] वेति संशयप्रतिरोधो न स्यात्

टी० ॥ ननु संशय तदुभयनिश्चयत्वमापद्येत तदा तस्मात्पूर्वं तदुभयविशेषदर्शनं स्यान्न त्वेवमित्याह—। [a] "संशयादि"ति । धर्मिण्यपि विशेषदर्शनं संशयात्पूर्वं नास्तीति तदंशेऽपि निश्चयो न स्यादित्याह—। [b] "धर्मिधिय"इति । दूषणान्तरमाह—। [c] "संशयकाले"इति । प्रथमसंशयरूपविशेषदर्शनात्संशयधारावाहिज्ञानं न स्यादित्यर्थः । ननु तत्संशयमारभत कोटिद्वयं अतिरिक्तविशेषदर्शनेन तत्संशयप्रतिबन्धकं प्रकृते तु न तथेत्याह—। [d] "तदीये"ति । तर्हि यद्विशेषद्वयविषयकः प्राथमिकः संशयस्तदतिरिक्ततद्विशेषद्वयविषयकस्तत्र धर्मिणि न स्यादित्याह—। [e] "स्थाणुत्वे"ति ॥ [f] "कुतोऽपी"ति । शब्दाभासादेरपीत्यर्थः ॥ ननु विशेषनिश्चयः संशयप्रतिबन्धकः स च प्रकृते नास्तीत्याह ।—

मू० पूर्वज्ञानेन विशेषद्वयोपदर्शनस्य कृतत्वात् * [a] विशेषदर्शनं हि विशेषनिश्चयो विवक्षितो न तु विशेषज्ञानमात्रं येन संशयोपनीतादपि विशेषात्संशयप्रतिरोधः प्रसज्येतेति चेत् ? *—मैवं, [b] संशयेन यावुपदर्शितौ विशेषौ तत्र न संशयस्य निश्चयत्वमिति व्यवस्थायां सिद्धायामुपदर्शितनियामकसिद्धिर्भवति सिद्धे वा ऽस्मिन्नियामके संशयस्य विशेषद्वयं प्रति निश्चयत्वं नास्तीति सिद्ध्येदित्यन्योन्याश्रयापत्तेः। को वारयिता?। * स्यादेतत् । संशयज्ञानस्य धर्मिविषयत्वेऽभ्युपगम्यमानेऽद्धवैशसमापद्येत तच्च तदनभ्युपगमे एव निवर्तते तेन धर्मिज्ञानं निश्चयात्मकमन्यदेव स्थाणुर्वा पुरुषो वेति चान्यदेव संशयज्ञानमित्यभ्युपैष्याम इति चेत् ?*—मैवम्, एकधर्मिसंबन्धोपनयनव्यतिरेकेण स्थाणुत्वपुरुषत्वयोर्विरोध एव

नास्तीति स्थाणुर्वा पुरुषो वेत्येतदेव न स्यात् । न हि यस्य कस्यचित्स्थाणुत्वेन यस्य कस्यचित्पुरुषत्वं विरुध्यते । एकधर्मिसंबन्धमनन्तर्भाव्य विरोधे जगति तयोरन्योन्यस्य व्यतिरेकतोऽसत्त्वमेव प्रसज्येत ॥

a"विशेषे"ति । मध्यस्थनिश्चयाद् भेदे सति संशयोपस्थापितादपि विशेषात् संशयबाध इति स्यात्तद् एव तु नाद्यापि सिद्ध इत्याह— b"संशयेन चाबि"ति । नियामकसिद्धिरिति विशेषनिश्चयस्य संशयप्रतिबन्धकत्वेन भवदुक्तनियामकस्य सिद्धिरित्यर्थः । तथा च संशयस्या . स्य निश्चायकत्वसिद्धौ भवदुक्तनियामकत्वसिद्धिस्तत्सिद्धौ च संशयत्वे व्यवस्थिते निश्चयत्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः ।

मू० "तस्य धर्मिणो वा पुरुषत्वनिश्चयाद्यथा संशयो निवर्तते नोत्पद्यते वा तथा स्वात्मनः पुरुषत्वनिर्णयात्संशयो निवर्तेत नोत्पद्येत वा विशेषाभावाद्यथायं द्रष्टुर्न स्वशरीरविषयः संशयः तथैव पुरोवर्त्तिविषयोऽपि नासौ कथं चेदमर्थेन सामानाधिकरण्याभिमानः योयमूर्ध्वताधर्मा स किं स्थाणुरुत पुरुष इति कस्माद्वा प्रत्यभिज्ञानादयोऽप्येकं ज्ञानमङ्गीकृता इत्युच्छिन्नः विशिष्टविज्ञानसंकथा संजातश्च गौरश्च पुरुष इतिवद्विशकलितो विज्ञानसंसार इत्यास्तां विस्तराभिनिवेशः * नन्वस्ति तावदयं स्थाणुर्वा पुरुषो वेति परस्परविरुद्धार्थावगाही प्रत्ययः स स्वविषयं तथाभूतमुपस्थापयिष्यति * न, उक्तबाधकैः सर्वप्रकारखण्डने परिशेषासम्भवात् । यत्तु स्वरूपमादाय विरुद्धार्थत्वमभिधीयते तदपि निर्वक्तुं न शक्यते । तथाहि भावतदभावयोः को विरोधः * सहानवस्थानम् ? *-इति चेन्न, देशभेदेन सहाप्यव-

स्थानात् * देशाभेदेन ? *-इति चेन्न, ᵇसंयोगाद्यव्यापकत्वं यद्यभ्युपैषि तथाप्यनुपपत्तिः। प्रकारभेदेन तथा भावस्याभ्युपगमात् * तस्य पक्षे एकेन प्रकारेणैकस्मिन् सहानवस्थानं विरोधः, संयोगाद्यव्यापकत्वानभ्युपगन्तृपक्षे च देशाभेदेन सहानवस्थानं—

टी० ॥ शङ्कते-। ᵃ"नन्वि"ति। पक्ष संयोगादेः स्वाभावस्य मादेश्याङ्गीकारपक्षे पक्षे धर्मिणि वा। ननु येन संयोगादीनामव्याप्यवृत्तित्वं नाभ्युपगम्यते तन्मते एकेन प्रकारेणेति व्यर्थमत आह-। ᵇ"संयोगादी"ति ॥

मू० स ? *-इति चेन्न, तद्धि तदुभयावस्थानसाहित्यनिषेधो वा तदुभयावस्थाननिषेधसाहित्यं वा स्यात्। आद्येऽप्रसिद्धप्रतियोगिकत्वं तदुभयावस्थानसाहित्यस्य क्वचिदप्यप्रमितेः शशविषाणनिषेधादेश्च ᶜशशके विषाणनिषेधादिरूपत्वाङ्गीकारेण प्रसिद्धप्रतियोगिकत्वाभ्युपगमात् यदाहैका वस्तुनः प्रतियोगितेति अन्यत्र लब्धरूपं क्वचित्किञ्चित्ताद्गेव निषिध्यते इति। द्वितीये तु तदुभयावस्थानसाहित्यस्वीकार एव स्यात्तदुभयनिषेधयोस्तदुभयतयैवाङ्गीकारात् *परस्परप्रतिक्षेपकत्वं विरोध ? *-इति चेन्न, तद्धि

टी० ॥ स इति। विरोध इत्यर्थः। तद्धीति। सहानवस्थानमित्यर्थः। तदुभयानवस्थानसाहित्यमप्रसिद्धत्वान्निषेद्धुमशक्यमित्याह। ᵃ"अप्रसिद्धे"ति। ननु शशविषाणं नास्तीति वचनाद्यथा प्रसिद्धमेव विषाणं निषिध्यते तथा प्रकृतेऽपि स्यादित्यत आह- ᵇ"शशे"ति। तत्र गवादिविषाणं प्रसिद्धमेवाधिकरणे निषिध्यते तत्र व्यधिकरणमेव शशीयत्वं तद्गोमादौ प्रसिद्धं प्रतियोगितावच्छेदकमिति नाप्रसिद्धप्रतियोगिकत्वमि-

चितमित्याशङ्क्याह—। "सम्बन्धस्य तद्व्यतिरेकत्वे" इति ॥

मू० यत्र घटाभाव इत्यत्र खल्वयमर्थो यन्नाम यस्याधेयतया संबन्धी घटाभावस्तत्र घटो नास्तीत्यस्याप्ययमर्थः तस्याधेयतया संबन्धी घटाभाव इति यत्र घट इत्यस्य कोऽर्थः यस्याधेयतया सम्बन्धी घटः तत्र घटाभावो नास्तीति कोऽर्थः तस्याधेयतया संबन्धो घटाभावसंबन्धनिषेधः घटाभावसंबन्धस्य घटाभावात्मकतया घटाभावनिषेधस्यापि घटात्मकतेति "तस्मात्तस्याधेयतया संबन्धी घट इत्येवार्थ इतो घटतदभावयोर्भेदं मनसिकृत्यापि न विप्रतिपत्तव्यमिति * [b]यत्रैकस्यासत्त्वं तत्रैकस्यैवेति नियमाभिप्रायेण न पौनरुक्त्यादिः ? *-इति चेन्न, नियमस्य यत्किंचिदन्यव्यवच्छेदकत्वेऽसिद्धत्वापातात् ॥

टी० ॥ तर्हि घटस्य सत्त्वमेव तदभावासत्त्वमिति यत्र घटसत्त्वं तत्र घटाभावासत्त्वमित्ययमर्थः पर्यवस्येत् । तथा च पौनरुक्त्यादेकस्यैव विरोध इति प्रतियोगिनोर्भिधानेऽपरानभिधानमित्येवाव्याप्तिरित्यर्थः । पौनरुक्त्यमेव व्याकुर्वन् स्फुटयति यत्र घटाभाव इति । पौनरुक्त्यं व्याख्यायाव्याप्तिमुपसंहरति—। [a] "तस्मादि"ति । यद्यपि घटतदभावयोर्भेदो मनसि वर्तते तेनापि तदुभयविरोधस्वरूपमनेन लक्षणेन प्रतिपत्तव्यं न बोद्धव्यमेकस्यैव विरोधप्रतियोगिनोर्भिधानादित्यर्थः । ननु विशेषणेन पौनरुक्त्यमिति यत्रैकस्यासत्त्वं तत्रैकस्य सत्त्वमिति द्वितीयं वाक्यं नियमपरमिति नोक्तदोष इति शङ्कते—। [b] "यत्रैकस्ये"ति । तत्रैकस्यैवेत्येवकारस्यायोगव्यवच्छेदार्थस्य घटादि यत्किंचिदयोगव्यवच्छेदार्थकत्वं तदा विरोध एव न सिद्ध्येदप्रतिपाद्यतेत्यर्थः । असिद्धत्वापातो लक्षणस्याव्याप्तित्वं वा नहि यत्र भूतले कपाले वा घटस्तत्र तत्तद्गुणादिकमपीति येनायोगव्यवच्छेदः स्यादित्यर्थः ॥

मू० "विरोधिव्यवच्छेदकत्वस्य च विरोधानिर्वचनेऽनिर्वचनात् *[b]अभावपक्षे भावव्यवच्छेदो भावपक्षे चाभावव्यवच्छेदो नियमार्थः ? *-इति चेन्न, [c]एकरूपानभिधानेऽनुगतविरोधानिर्वचना [d]त्किंच भावाभावव्यवच्छेदयोरभावभावविधानातिरिक्तयोरनभ्युपगमे पुनरपि च यत्र भावस्तत्राभावोयत्राभावस्तत्र भाव इत्युद्देश्यविधेयभावानुपपत्तिरभेदादिति पौनरुक्त्याधिकफलाभाव एव * [e]स्यादेतत् भावाभावयोः स्वरूपमेव नचैयं कस्यविरुद्धतापत्तिः यथा सत्ता भावरूपैव सती स्वात्मनि सदिति भवितृव्यवहारं करोति तथा भावाभावौ विरोधात्मानावेव स्वात्मनि विरुद्धरूप भवितृव्यवहारं कुर्वाते कस्यैतौ विरोध इति चानुयोगे स्वाश्रयस्येत्युत्तरं, किं तत्र विरोधफलमिति प्रश्ने भेदव्यवस्थानमित्यभिधेयम् ॥

टी० ॥ नन्वन्यमात्रं न व्यवच्छेद्यं येनासंभवः स्यात् किंतु विरोधिनोऽन्यस्माद्व्यवच्छेदोऽभिमत इति तत्राह–। [a]"विरोधी"ति । ननु विरोधित्वेनान्यपदार्थनिर्वचने दोषः स्यादिह तु तत्रैकस्यैवेत्येकपदेनाभावविवक्षायां भावव्यवच्छेद इति नोक्तदोष इति शङ्कते–। [b]"अभावपक्ष"इति । सकृदुच्चरितात्सकृदर्थप्रतिपत्तिरित्येकपदस्यैकमात्रपरत्वेनानुगमो दोष इति परिहरति–। [c]"एकरूपे"ति । किंच यत्रैकस्यैवेत्यवधारणे यत्र घटस्तत्र घट एव न तदभाव इति घटाभावनिषेधे घटविधिरेव स्यादिति तदेव पौनरुक्त्यं स्यादित्याह–। [d]"किंचे"ति । ननु भावाभावयोर्धर्मो न विरोधः किंतु तावेव विरुद्धावुभाविति व्यवहारश्च स्वाभाव्यादेवेत्याह–। [e]"स्यादेतदि"ति ॥

मू० यदाह "[a]अयमेव हि भेदो भेदहेतुर्वा यद्वि[b]रुद्धधर्माध्यासः कारणभेदश्चेति तदेतदनुपपन्नमेतयोर्विरोधत्वं प्रत्येकं वा स्यान्मिलितयोर्वा ?। नाद्यः। प्रत्येकमेवाश्रयैकत्वभङ्गप्रसङ्गात् * नै[c]कत्वाभावो भेदोऽभिमतः किन्त्वन्योन्याश्रयापेक्षभेदरूपधर्मवत्त्वम् ? *-इति चेन्न, [d]तस्याभावात् * कालत्वभेदेनैकस्य भावाभावाश्रयत्वाभ्युपगमात्तदभेद ? *-इति चेन्न,(१) तदभेदस्य स्वाभाविकस्य विवक्षितत्वविशेषणवैयर्थ्यात् [f]एकोपाध्यवच्छिन्नस्य विवक्षितत्वे कालभेदाभिमतेऽपि संभवात् ॥

टी० ॥ भवितृव्यवहारं धर्मिव्यवहारं दर्शितं विरोधफले परसम्मतिमाह—। [a] "अयमेव हि भेद" इति—विरोध एव विरुद्ध इत्याह—। [b] "विरुद्धधर्माध्यास" इति । विरुद्धौ धर्मौ भावाभावौ गोत्वागोत्वरूपौ वा तदध्यासस्तदध्यवस्थानमित्यर्थः । प्रत्येकमेवेति । ननु विरुद्धधर्माध्यासेन एकत्वभङ्गो नाम भवति किन्तु विरुद्धयोर्द्वयोराश्रयभेद इति शङ्कते—। [c] "नैकत्वे"-ति । अन्योन्याश्रयभेदोऽपि पाकरक्तघटादौ नास्तीत्याह—। [d] "तस्याभावादि"ति । रक्तरूपाभाववत एव घटस्य रक्तरूपदर्शनेनाश्रयभेदस्य भावादित्यर्थः । ननु कालाभेदेन विरुद्धौ धर्मौ नाश्रयभिन्नौ मताविति नियम इति शङ्कते—। [e] "काले"ति । तदभेदस्येति । यदि कालभेदो भवेत्तदा (२)तद्व्यावर्त्तनार्थं कालभेदेनेति विशेषणमर्थवत्स्यात्तत्त्वेऽभिप्रायः । तत्त्वेकोपाध्यवच्छिन्ने एकस्मिन्नपि काले भावाभावाश्रयभेदकाविति शङ्कते—। [f] "एकोपाधी"ति । एकदिनावच्छेदेनैकत्रैव भूतले घटतदभावयोरसत्त्वात्तादृशोरपि नाश्रयभेदकत्वमित्यर्थः । कालभेदाभिमतः प्रहरमुहूर्तादिस्तत्रापि संभवादाश्रयभेद इत्यर्थः ।

---

(१) आश्रयभेदव्यावर्त्तनार्थम् ।

(२) कालभेदस्य ।

मू० ⁶भिन्नोपाध्यवच्छिन्नत्वेऽस्य विवक्षितत्व ऽसम्भवात् असहावस्थितभिन्नोपाध्यनवच्छिन्नस्य वाञ्छितत्वे सहत्वस्यैव कालरूपत्वेन तत्रापि कालाभेदविकल्पानुवृत्त्यापत्तेः मिलितत्वं चानयोरेकदेशत्वं वाभिमतमेककालत्वं वा एकप्रकारेण वृत्तिर्वा वृत्तिप्रकारान्यैकोपाध्यवच्छेदो वा ? । नाद्यः भावात्यन्ताभावयोस्तदभावात् । न द्वितीयः । भावस्य प्रध्वंसप्रागभावाभ्यां तदनुपपत्तेः । न तृतीयः । संयोगाद्यव्याप्यवृत्तितावादिपक्षे गगनादौ संयोगभावाभावयोस्तदभावात् ॥

टी० ॥ भिन्नोपाध्यनवच्छिन्ने काले भावाभावौ भेदाभेदकौ तत्राह -। ⁶"भिन्नोपाधी"ति असहेति । असहत्व हि सहत्वप्रतियोगिनिरूप्यं सहत्वं चैककालीनत्व चेत्तदानिप्रसङ्गः एकोपाध्यवच्छिन्न कालीनत्व चेत्तदोक्तदोषापत्तिरित्यर्थः । मिलितौ भावाभावौ विरोध इति पक्ष दूषयति—। ⁶"मिलितत्वमि"ति । एकप्रकारेणेति । एकावच्छेदेनेत्यर्थः । वृत्तीति । वृत्तिप्रकारः शाखामूलादिः तद्भिन्नोपाध्यवच्छिन्नत्वमित्यर्थः । तदभावादिति । एकदेशत्वाभावादित्यर्थः । तथाच तयोर्मिलितत्वाभावाद्विरोधो न स्यादिति भावः । तदनुपपत्तेरिति । विरोधानुपपत्तेरित्यर्थः । तदभावादिति । एकावच्छेदेन वृत्त्यभावाद्विरोधानापत्तेरित्यर्थः । गगनादावव्यवच्छेदभेदेनैव संयोगतदभावयोरभ्युपगमादिति भाव.॥

मू० अव्याप्यवृत्तिधर्मानभ्युपगन्तृपक्षे भावाभावयोर्वृत्तौ प्रकारान्तराभावे प्रमाणाभावात् । नापि चतुर्थः । स हि यदि निर्दष्टुं शक्यते तदापि भावप्रागभावयोर्भावप्रध्वंसयोर्वैकदानभ्युपगमेन (१)तद्विशेषितयोरप्येकदावस्थानमनभ्युपगन्तव्यतया कदा विरोधस्य त-

---

(१) घटविशेषितो घटसंयोगादिः प्रागभावविशेषितश्च तत्प्रध्वंसादिस्तयोरित्यर्थः ।

दाश्रयतेति वक्तुमशक्यत्वात् [a]"किञ्च भावप्रागभावयो-र्यदि तथाभावो ऽभ्युपगम्यते तदाश्रयभेदप्रसङ्गः [b]अभावान्तरेऽपि सावकाशत्वात् न परस्परप्रतिक्षेपात्मकत्वं च परस्परप्रतिक्षेपात्मकत्वं हि भावात्यन्ताभावयोरेव अथवाभ्युपगम्यते ।

टी० ॥ अव्याप्यवृत्तीति । येनाव्याप्यावृत्तित्वं संयोगादीनां नाभ्युपगम्यते तेन भावाभावयोरवच्छेदोऽभेदान्तर्भावेन तत्त्ववृत्तिरपि नाभ्युपगम्यते तदभावान्मिलितत्वं तयोर्न स्यादिति तद्घटितोऽपि विरोधो न स्यादित्यर्थः । सहेति । वृत्तिप्रकारादन्य एव उपाधिभावोऽप्रामाणिक एव यदि च केचित्तदुपाधयो वाच्यास्तदा प्रतियोगिना सह प्रागभावध्वंसयोर्मिलितत्वं संभवतीति तयोरविरोधः स्यादित्यर्थः । तदाश्रयेति । प्रतियोगिना सह प्रागभावप्रध्वंसयोरित्यर्थः । किञ्च घटतत्प्रागभावयो(१)र्विरुद्धाश्रयत्वेन कपालमपि स्वस्माद्भिद्यं तेत्याह — [a]"किञ्चेति । किञ्च घटतत्प्रध्वंसप्रागभावयोः परस्परप्रतिक्षेपात्मकत्वमपि विरोधो न संभवति । नहि घटः स्वप्रागभावमात्रं प्रतिक्षिपति ध्वंसस्यापि प्रतिक्षेपात् । नापि ध्वंसमात्रम् । प्रागभावस्यापि प्रतिक्षेपात् । नच तत्प्रागभावो घटमात्रं प्रतिक्षिपति । तत्प्रध्वंसस्यापि प्रतिक्षेपात् । एवम(२)न्यत्रापीत्याह— [b]"अभावान्तर' मिति ॥

मू० [a]तदा भावप्रागभावयोर्भावप्रध्वंसयोश्चाविरोधापत्तिः * [b]तत्तदसत्त्वमात्रयोर्विरोधो न तु तत्तदसत्त्वविशेषयोः ?*—इति [c]चेन्न, विशेषस्य तथाप्यविरोधात्कदापि सहावस्थितियोग्यतापत्तेः [d]नियमेन तथात्वे च विरोधव्याघातान्मात्रशब्देन च यदि वि-

(१) विरोधाश्रयत्वेनेति पाठमुचितं मन्ये—यद्वा विरुद्धाश्रयतामुपादायेत्यर्थः ।

(२) अन्यत्र—ध्वंसेऽप्येवा नतिर्न हि ध्वंसो घटमात्रं प्रतिक्षिपति प्रागभावस्यापि प्रतिक्षेपादिति ।

शेषशून्यत्वमसत्त्वस्योच्यते तदा तदनभ्युपगम एव प्रमाणाभावात् । न हि निर्विशेषासत्त्वमात्रसद्भावे प्रमाणमभिधातुं शक्यते । अथ मात्रशब्दोपादानं सत्यपि विशेषे ऽसत्त्वस्य साधारणरूपपुरस्कारेण विरोधव्यवस्थितिप्रदर्शनार्थं तदाभावप्रध्वंसयोस्ताद्रूगेव दोषापत्तिः ।

टी० ॥ प्रतियोगिप्रागभावयोः प्रतियोगिप्रध्वंसयोः परस्परप्रतिक्षेपात्मकत्वानभ्युपगमे दूषणमाह—। a"तदाभावे"ति । ननु घटप्रागभावयोर्न विरोधोऽपितु घटतदभावयोरेवेति परस्परप्रतिक्षेपात्मकत्वमपि नादूष्येयेति शङ्कते-। b"सत्त्वासत्त्वमात्रयो"रिति । एवं सति घटतत्प्रागभावयोर्विरोधो न स्यादेककालसमावेशोऽपि स्यादिति परिहरन्ति—। c"ने"ति । ननु घटतत्प्रागभावयोरयं स्वभावो यदेतौ विरोधं विनापि सह न भवत इत्याशङ्क्याह—। d"नियमेने"ति । एवं सति विरोध एव तयोः पर्यवसन्न इत्यर्थः । सत्त्वासत्त्वमात्रयोरित्यत्र मात्रपदार्थं विकल्पयति—। e"मात्रशब्देने"ति । अभावत्वसामान्यस्य निर्विशेषत्वं वा मात्रार्थो विशेषविवक्षित्वं वा ?। यदाद्यः तदा विशेषपुरस्कारेण घटतत्प्रागभावयोरविरोधे समावेशः स्यादेवेत्यर्थः ॥

मू० * a"प्रध्वंसादौ विशेषे सामान्यरूपस्यावश्याभ्युपगम्यत्वात्तदाद्यैव विशेषे विरोधपर्यवसानात् भावाभावयोर्विरोधानभ्युपगमे तथाप्यनिष्टापत्तिरिति चेत्, केयमापत्तिस्तर्कभेद इति चेत् b"अथ कस्तर्कः अभ्युपगतव्याप्यं प्रति व्यापकप्रसञ्जनं च स्वीकाराऽर्हताबोधनम् ?*-इति चेन्न, अव्याप्तेः । अस्ति ह्यप्रसक्तेऽपि संभावना नाम तर्कः ॥

टी० ॥ तर्कलक्षणं वक्ष्यति कुर्वाण एव विशेषं शङ्कते—। a"प्रध्वंसादावि"ति । सामान्ययोरेव विरोधो विशेषद्वयविरोध-

पर्यवसायी सामान्यस्य विशेषनियतत्वादिति कथं तयोरविरोधः। किंच त्वयापि भावाभावयोर्विरोधश्चेदभ्युपगम्यते तदाऽनिष्टमापतेदित्यर्थः। केचित्तु प्रथमादावित्यादिपूर्वग्रन्थोपपादकतया व्याचक्षते भावाभावयोरित्यादिग्रन्थमग्रिमशङ्कागामिनं तर्कस्तु सर्वशङ्कानिवारणपटीयानित्यभिमत इति सिद्धान्तिनामभिमानस्तमेवन्निराकर्तुं तमत्पदार्थखण्डनानन्तरं तर्कखण्डनं प्रस्तौति-। [b]"अथे"ति। अभ्युपगतेति अभ्युपगतो व्याप्यो येन वादिना तं प्रति व्यापकप्रसञ्जनमित्यर्थः। अनुमितावतिव्याप्तिं निराचिकीर्षुस्तत्प्रसञ्जने विवेकमाह—। [c]प्रसञ्जनमिति। नहि धूमेन वह्न्यभावो बोध्यते किंतु वह्निरेव बोध्यते इति नानुमितावतिव्याप्तिरिति भावः। अत्र संभावनातर्कादिष्वव्याप्तिमाह—। [d]"अव्याप्तेरि"ति ॥

मू० [a]तद्यथा यदि जलं सहकारिभिः संपत्स्यस्यते तदा मे तृषं शमयिष्यतीति [b]इष्टापादनेऽपि गतत्वाच्च * [c]अनभ्युपगतव्यापकमित्यपि? *-इति चेन्न, [d]तथा भूतमपि प्रत्यव्याप्याद्व्यापकप्रसञ्जने गतत्वात् * [e]व्याप्येनेत्यपि कार्यम्? *-इति चेन्न, विकल्पासहत्वात्किं [f]परमार्थतो व्याप्यव्यापकभावव्यवस्थितयोःस्वरूपेणेष्टानिष्टत्वमुत व्याप्यव्यापकयोर्भावेन तत्?। नाद्यः।

टी० ॥ संभावनां विवृणोति [a]"तद्यथे"ति। उदन्योपशमो व्यापको जलस्य सहकारिसंपत्तिः पानरूपा व्याप्या तर्केण तु कश्चित्प्रति तदा प्रतिपाद्यते इति प्रसञ्जनत्वाभावादव्याप्तिरित्यर्थः। ननु तर्कमात्रमिह न लक्ष्यं किंतु प्रसञ्जनात्मक एव तर्को लक्ष्य इति नाव्याप्तिरित्याशङ्क्याह—। [b]"इष्टापादनेऽपी"ति। तत्राऽभासेऽपि तर्कलक्षणं गतमित्यतिव्याप्तिरित्यर्थः। ननु व्यापकाभ्युपगन्तारं प्रति तत्रेष्टापादनं स्यात् येन तु नाभ्युपगम्यते तं प्रति तदापादनं तर्क इति नातिव्याप्तिरिति शङ्कते—। [c]"अनभ्युपगतेति" यत्र व्याप्यस्याभ्युपगममात्रं न तु वस्तुगत्या व्याप्यत्वं तेनानभ्युपगतव्यापकं प्रति प्रसञ्जनं तत्रातिव्याप्तिः प्रशिथिलमूलतय-

व्यापकप्रसञ्जनं तर्क इत्यपि नेत्यर्थः । यत्र तर्कप्रयोक्ता पक्षं व्याप्यवत्तया व्यापकाभाववत्तया चेच्छति तादृशमेव प्रतिवादिनं प्रति तर्के प्रयुक्ते प्रतिवादी च तत्प्रतिपन्नवत्तमेव प्रसङ्गं प्रति प्रसङ्गतयोपन्यस्यति तत्र पर्वप्रसङ्गे तत्प्रतिप्रसङ्गतया तर्काभासतां गतेति व्याप्तिरित्यर्थः। संभवति हि यदि सद्व्यवहारविषयः स्यात्सत्तासत्तावती स्यादित्यत्र प्रसङ्गे पुनरयमेव प्रतिप्रसङ्गः यद्यपि वास्तवी व्याप्तिरिह नास्ति सत्तायामेव व्यभिचारात् तथापि तदा तथात्वेन द्वाभ्यामिष्यमाणमस्त्येवेति भावः । एतदेव स्वयमित्यादिना दर्शितम् ॥

मू० *[a]स्वयं व्याप्यतयानिष्टेनेत्यपि विशेषणीयम् ?*-इति चेन्न, [b]स्वयमपि व्याप्यतयेष्टेन स्वमात्रेष्टव्यापके विषये प्रसङ्गस्याव्यापनात् *अथ[c]स्वयमनिष्टव्यापके स्वयं व्याप्यतयेष्टेन यत्र भवति तत्रानभ्युपगतव्यापकं परं प्रति पराभ्युपगतेन व्याप्येन व्यापकप्रसञ्जनं तर्कः, [d]एवं सति हि स्वानिष्टव्यापके स्वयमिष्टव्याप्येन यत्र प्रसङ्गस्तत्र गमनादतिव्याप्तिर्या या च स्वमात्रेष्टव्यापके स्वयमपि व्याप्यतयेष्टेन प्रसङ्गस्याव्याप्तिस्ते निरस्ते भवतः ?*-इति चेन्न,

टी० ॥ ननु प्रसङ्गस्य तत्रावकाशो यत्र तर्कप्रयोक्ता व्याप्यत्वं नेच्छति सत्तया तु प्रतिवादिमात्रस्य व्याप्यत्वेनेष्यमाणेऽपि प्रसङ्गनं विवक्षितमिति नातिव्याप्तिरिति शङ्कते—। [a]"स्वयमिति" स्वयं यद्व्याप्यत्वेनेष्टं तेन परानिष्टव्यापकस्य पक्षे यदापादनं क्रियते तत्राव्याप्तिरिति परिहरति । [b]"स्वयमपी"ति। पूर्वोक्तां प्रति प्रसङ्गस्थलेऽतिव्याप्तिमधुनोक्तामव्याप्तिं च परिहरन् विशिष्टव्यतिरेकेण लक्षणं शङ्कते [c]"स्वयमनिष्टव्यापक"इति। स्वयमनिष्टव्यापके यत्र भवतीत्यनेन नातिव्याप्तिः परिहृता सद्व्यवहारविषयत्वेन व्याप्येन सत्तायां सत्तावत्त्वं सद्व्यापकमापादितं तत्स्वयमनिष्टव्यापके एवेति मत् प्रसङ्गस्तर्काभासेऽपि नाति व्याप्तिः स्वयं च व्याप्यत्वेनेष्टापादने या अव्याप्तिरुक्ता सा

स्वयमिष्टव्याप्येन व्यापकस्य पक्षे परानभ्युपगममात्रेणेति न सापीत्यर्थः । ननु विशिष्टातिरेकेण लक्षणं प्रवर्त्तमानमननुगतं कीदृशं भवतीत्यत आह– d"एवमि"ति । सत्तायां सत्तावत्त्वस्य व्यापकस्य स्वानिष्टत्वादतिव्याप्तिर्यां च प्रतिप्रसक्तस्य भिया सत्तेऽव्याप्तिरुक्ता तदुभयं दूषण न भवतीत्यर्थः ॥

सू० ॰यद्यत्र सत्तयापि घटोऽभविष्यत्तदाऽद्रक्ष्यदित्याद्यापना तत्र स्वयमनिष्टदर्शनरूपव्यापके स्वयं व्याप्यतयेष्टेनैव हि दर्शनयोग्येन घटसत्त्वेनासौ प्रसङ्गः * ′अथ तत्र सत्तयापि स्वयमिष्टेनेति निषेध्यकोटौ प्रवेश्य निषेधोऽभिधीयते एवं यत्र भवतीति तदपि न, ′एवं भूते एव विपर्ययापर्यवसायिनि गततयातिव्यापकत्वात् विपर्ययपर्यवसायिनेत्यपि प्रक्षेप्यम् ? *-इति चेन्न,

टी० ॥ अत्रापि लक्षणाव्याप्तिमाह a"यद्यत्रे"ति । अयं हि प्रसङ्गो न परमात्रानिष्टव्यापके किंतु घटाभाववति घटादर्शने तस्य व्यापकस्य स्वानिष्टत्वात् व्याप्यस्य च स्वयमभ्युपगमादित्यर्थः ननु घटसत्त्वस्य दर्शनापादकस्य व्याप्यत्वमात्रमिष्यते न तु भूतले तत्सत्त्वमिति तथाच विशिष्टव्यतिरेके स्वय व्याप्यतयेष्टेन यत्र भवतीति यो निषेध उक्तस्तत्र कोटौ प्रतियोगितया पक्षे व्याप्यस्य सत्तानिवेशनीयता तथा च स्वयमनिष्टव्यापके स्वयं व्याप्यतया सत्तया चेन्न यत्र भवतीति विशिष्टव्यतिरेकः पर्यवस्यति तथाच प्रकृतेऽपि प्रसङ्गतया दृष्टेन न भवत्येवेति नाव्याप्तिरिति शङ्कते– b"अथ तत्रे"ति । यद्याकाशं जन्यं स्यादिति नैयायिक प्रति यत्रापाद्यते मीमांसकेन तत्र मीमांसकेन तत्र मीमांसकमते विपर्ययापर्यवसायिनि तकाभासे गतत्वादतिव्याप्तिरिति परिहरति– c"एवंभूते एवे"ति । अनभ्युपगतव्यापक नैयायिक प्रति तदभ्युपगतव्याप्यत्वेन जन्यत्वेन व्यापकस्य प्रसञ्जनादित्यर्थः ॥

मू० केवलपरपक्षदूषणाय परमात्राभ्युपगम्यमानव्याप्य-त्वेनैवं क्षमस्य परं प्रति व्यापकप्रसञ्जनस्याव्याप-नात् तत्र a"स्वयं व्याप्त्यनभ्युपगमेन विपर्ययपर्यव-सायित्वासंभवात् * b"स प्रसङ्ग एव न भवति विरो-धमात्रं तत् ? *-इति चेन्न, c"अनिष्टं व्याप्त्यभ्युप-गमबलेन परं प्रत्यापाद्यते इत्येवं भूतस्यार्थस्यो-भयत्रापि तुल्यत्वेऽपि लक्षणकरणासामर्थ्याद्यदि वि-पर्ययपर्यवसायिन्येव प्रसङ्गत्वं त्वया परिभाष्येत तर्हि मया परबाधमात्रे एव प्रसङ्गताया विपर्ययप-र्यवसायिनि तु तत्र विरोधतायाः परिभाषितुं शक्य-त्वात् । अन्यथाविरोधत्वमेवोभयोरपि स्यात् ॥

टी० ॥ केवलेति स्वमते विपर्ययापर्यवसायिनापि परमते दूषणाय कृतः प्रसङ्गोऽयं स तर्क एव दूषणक्षमत्वात् विपर्ययपर्य-वसायिनो न विशेषणतः संग्रहः स्यादित्यर्थः । ननु विपर्ययप-र्यवसन्न एवायं कथं न भवतीत्यत आह "स्वय"मिति । नन्वेतादृ-शस्तर्क एव न भवति दूषणक्षमतात्वस्य विरोधापादनमात्रेणैवे-ति—। b"शङ्कते—। "प्रसङ्ग एवे"ति । व्याप्त्यभ्युपगमबलेन परा-निष्टापादनमेवोभयसाधारणं लक्षणमस्तु किं विपर्ययपर्यवसा-यित्वविशेषणग्रहेण । अन्यथा त्वदभ्युपगत एव तर्को विरो-धात्मा विपर्ययापर्यवसन्न एव न तर्क इति परिभाषाविनिग-मकतयापत्तिरिति परिहरति—। c"अनिष्टमि"ति । तुल्यत्वेऽपी-ति । अनिष्टप्रसङ्गत्वेन तुल्यत्वेऽप्युभयसाधारणलक्षणकरणासा-मर्थ्यादिति । यद्वा द्वयमपीदं तर्कलक्षणाक्रान्तमेवास्तु परंतु मत्किथनामात्रखण्डनव्याकुलितप्रश्नेन लक्षणकरणासामर्थ्याद्विपर्य-यपर्यवसायित्वेन विशेषितं चेत्तदा वैपरीत्यमेव किं न स्यादि-त्यर्थः । अन्यथेति । मत्परिभाषां नाद्रियसे तदा त्वत्परिभा-षामप्यनादृत्य द्वयोर्विरोधत्वमेवास्थातुमुचितमित्यर्थः ॥

सू० [a] प्रत्यवस्थानवैचित्री चेत्तत्र विरोधाद्विशेषः साऽत्रापि तुल्यैव । अत एव संभावनापि तर्कादन्यैवेति निरस्तम् । आरोपादपि व्याप्यता निमित्तव्यापकाभ्युपगमाविशेषात् [b] अत एव परप्रमितेनेति विशिष्य परानिष्टापादनमात्ररूपविपर्ययापर्यवसायितर्कता निरस्येति निरस्तम् । परमार्थतो व्याप्त्यभावेऽपि पराभ्युपगममादाय प्रसङ्गप्रवृत्तेरुपपत्तेः ॥

टी० ॥ ननु व्याप्यमभ्युपैषि व्यापकं च नाभ्युपैषीति कथं व्याप्यवत्ता तत्रापि व्यापकाभ्युपगम आवश्यक इति विरोधापादनप्रकारात् यद्ययं निर्वह्निः स्यान्निर्धूमः स्यादित्यनिष्टप्रसञ्जनप्रकारो भिन्न एवेति कथमनयोर्न भेद इत्यत आह—। [a] "प्रत्यवस्थाने"ति । उभयोरपि प्रकारयोरुभयत्र संभवादयमपि विशेषो न भेदक इत्यर्थः । अत एवेति । प्रसङ्गभेतर्कलक्षणस्य संभावनात्मकतर्काव्याप्तिरुक्ता तदतर्कत्वमभ्युपेत्य परिहृता येन तस्यापि तुल्यन्यायतया तर्कत्वमेव व्यवस्थाप्य दोषो वाच्य इत्यर्थः । व्याप्यारोपाधीनव्यापकाभ्युपगमस्य तर्कत्वप्रयोजकस्य तत्रापि संभवादित्यर्थः । ननु परप्रमितेन परानिष्टापादनं तर्क इति लक्षणं न संभावनात्मकेन वा विपर्ययापर्यवसायिनीत्यत आह—। [b] "अत एवेति" । तर्कत्वेन निर्णयात्मयोरेव साध्याव्यापकत्वादित्यर्थः । यत्र न पारमार्थिकी व्याप्तिस्तत्रापि पराभ्युपगमेनापादनाविशेषात्तर्कत्वमिति तत्राप्यव्याप्तिरित्यर्थः ॥

सू० [a] कथं हि परेण व्याप्यतया ऽनुमता तं प्रति व्यापकानुमत्या नापत्तितव्यं [b] नहि प्रसङ्गो वास्तवत्वं व्याप्तेरालम्बते किं नामाभ्युपगममात्रं [c] अनभ्युपगतौ वस्तुगत्या स्थितेनापि तेनापादनाप्रवृत्तेः । अत एव परस्य प्रमाणेन व्याप्यानुमतिमुत्पाद्यापत्त्यापादनं क्रियते * [d] वस्तुगत्या व्याप्यत्वं च [e] तथा-

त्वेनाभ्युपगतत्वं च द्वयमपि प्रसङ्गस्याङ्गम् ? *— इति चेन्न, तथात्वेनाभ्युपगमस्यावश्यं प्रसङ्गाङ्गतयमन्तव्यस्य परानपेक्षस्यैव समर्थत्वे वास्तवव्याप्तत्वस्यापि प्रवेशने प्रमाणाभावा ᶠत्तस्माद्यः प्रसङ्गः स्वपक्षसिद्ध्यङ्गं तस्य विपर्ययापर्यवसायिता दोषायैव स्यात् ॥

टी० ॥ ननु व्याप्तेरभावे प्रसञ्जनमेव न भवतीत्यत आह—। ᵃ "कथं हि" इति । औचित्यावर्जितमेव तत्र व्यापकापादनमित्यर्थः । औचित्यमेव दर्शयति—। ᵇ "नही" ति । विनिगमकमाह—। ᶜ "अनभ्युपगतावि" ति । तथाच विपर्ययापर्यवसायिनाप्यापादनं तर्क एव तथाच तद्व्यावर्त्तनाय विपर्ययापर्यवसायेति यद्विशेषितं तदनुपादेयमेवेति भावः । अत एवेति । यत एवाभ्युपगममात्रं व्याप्यस्य तन्त्रं नतु वास्तवत्वमपि तेन त्वया व्याप्यत्वेनाभ्युपगतोऽयमर्थ इत्येव प्रमाणेन साध्यते न तु व्याप्योऽयमर्थ इत्यपीत्यर्थः । विपर्ययापर्यवसायिन्यतिव्याप्तिवारणाय पुनः शङ्कते—। ᵈ "वस्तुगत्ये" ति । यत्र वस्तुतो व्याप्तिसत्त्वे विपर्ययापर्यवसानमेवेत्यर्थः । अभ्युपगममात्रमेव तन्त्रमापादनेन तु वस्तुगत्यापि व्याप्यत्वं गौरवादिति परिहरति—। ᵉ "तथात्वेने" ति । नन्वेवं तर्कदोषत्वे विपर्ययापर्यवसानपरिगणनं किंमूलकमिति प्रसङ्गद्वय विभज्योपसंहरति—। ᶠ "तस्मा" दि" ति । स्वसाधनपरपक्षदोषापादनभेदे प्रसङ्गसामान्यस्थितौ विपर्ययापर्यवसानमाद्ये दोषो न द्वितीयेऽपीत्यर्थः ॥

मू० ᵃप्रसङ्गस्य तस्य विपर्ययपर्यवसानदार्ढ्यार्थं दण्डतयोपन्यासात् सौगतानां स क्षणिकत्वव्याप्तिसाधकविपर्ययान्यथा भावदण्डप्रसङ्गवत् ॥

टी० ॥ नन्वत्रापि किं विपर्ययपर्यवसानगवेषणयेत्यत आह—। ᵃ "प्रसङ्गस्य" ति । आपाद्यस्य निर्धूमत्वादेरापादकस्य निर्वह्निमत्त्वादौ प्रमाणं तदीयदार्ढ्यार्थमेव हि तत्र प्रसङ्गस्य दर्शनीयत्वेन विपर्ययपर्यवसानमन्तरेण स्वपक्षसाधकतैव

प्रसङ्गस्य न घटेतेत्यर्थः। दण्डतयेति। विपक्षबाधकतयेत्यर्थः।
निश्चितसाध्यवतः पक्षस्यैव विपक्षत्वशङ्कां तर्को बाधत इत्य-
र्थः। सौगतानामिति। सत्त्वमर्थक्रियाकारित्वं क्षणिकत्वव्याप्य
त्वेन सौगतैरुपन्यस्तं तत्र तावत्सत्त्वमात्र स्यात् क्षणिकत्वं
मास्त्विति विपक्षवृत्तिताशङ्कायां यदि क्षणिकत्वं न स्यादर्थ-
क्रियाकारित्वमपि न स्यादर्थक्रियाकारित्वं हि क्रमाक्रमाभ्यां
व्याप्तं तच्च क्षणिकत्वाद्व्यावर्त्तमानमर्थक्रियाकारित्वाख्यं सत्त्व-
मपि व्यावर्त्तयेदेव। नहि स्थिरस्य क्रमकारित्वं सम्भवति तथा-
सति न कुर्यादेव कार्यं हि क्रमकारित्वं स्वाभाव्यमेव विरु-
ध्येत नाप्यक्रमकारित्वं तथासत्युत्पत्त्यनन्तरमेव यावत्सर्वं का-
र्यं कुर्यादित्यादि सत्त्वक्षणिकत्वयोर्व्याप्तिस्तत्साधको विपर्य-
ये बाधकाभावाय (१) विपर्ययशङ्कानिवारणाय दण्डरूपो यः
प्रसङ्गस्तद्वदित्यर्थः॥

सू० तामन्तरेण तस्य स्वपक्षसाधनाक्षमत्वात्तस्य च व्या-
प्तिवास्तवत्वमपि मन्तव्यम्। अन्यथा विपर्ययेऽपि
व्याप्त्यभावेन स्वपक्षसाधनाक्षमत्वादेव यस्तु प्रसङ्गः
परपक्षबाधनाङ्गं तत्र पराभ्युपगममात्रं प्रयोजकं ता-
वतैव परपक्षप्रतिक्षेपक्षमत्वेन वास्तवव्याप्तिविप
र्ययपर्यवसानपर्यन्तानुसारित्वादिति युक्तं प-
श्यामः। तथाच सति कथितलक्षणासङ्गतिस्त-
दवस्थैव * [a] अथ व्याप्त्याभ्युपगमेनानिष्टस्य व्याप-
कस्य प्रतीतिस्तर्कः? *—इति चेन्न, [b] इष्टार्थसंभा-
वनायामव्याप्तेः * [c] तेन व्यापकस्य प्रतीतिः स?
*—इति चेन्न, [d] इष्टापादनेऽपि गतत्वात् * अप्र-
मितस्य तथेति चेन्न,

टी० ॥ तामिति विपर्ययपर्यवसायिनामित्यर्थः विपक्ष-
बाधकोपन्यासमन्तरेण सत्त्वाख्यसाधनस्य क्षणिकत्वसाधकत्व-

(१) विपक्षशङ्कावारणायेत्यर्थः।

मेवानुपपन्नमिति भावः। कथितेति। विपर्ययपर्यवसायित्वेन तर्कलक्षणविशेषणे परपक्षबाधकतर्कव्याप्ते(१)रसङ्गतिरित्यर्थः। एतद्दोषपरिजिहीर्षया शङ्कते—। [a]"अथेति। अभ्युपगमो व्याप्तेः सत्त्वे वा ऽसत्त्वे वा एवं च स्वपक्षसाधकपरपक्षबाधकतर्कयोरुपग्रहः। प्रतिप्रसङ्गेतिव्याप्तौ सत्यामपि दोषान्तरमाह—। [b]"इष्टार्थे"ति। जलस्य सहकारिसंपत्तौ तदन्योपशमस्य व्यापकस्य पिपासोरिष्टस्यैव प्रतीतेस्तत्तर्कोव्याप्तिरित्यर्थः। ननु व्यापकेनिष्टत्वं विशेषणं न देयमेव येन संभावनायामव्याप्तिस्स्यादिति शङ्कते—। [c]"तेने"ति। व्याप्त्याभ्युपगमेनेत्यर्थः। एवं सतीष्टापादने तर्काभासेति व्याप्तिरिति परिहरति—। [d]"इष्टे"ति। ननु अप्रमितस्य व्यापकस्य व्याप्याभ्युपगमेन प्रतीतिस्तर्कः प्रकृते तद्व्यापकं प्रमितमेवान्यथेष्टापादनानुपपत्तेरिति शङ्कते—। [e]"अप्रमितस्ये"ति ॥

सू० [a] प्रथमानुमानेऽपि गतत्वात् * [b] अनुमाने व्याप्यस्य (१)प्रमया तथा न त्वभ्युपगमेन ? *—इति चेन्न, [c]वस्तुगत्यां व्याप्यस्य प्रमयापि प्रतिवाद्यसिद्धस्य व्यापकानुमानासंभवेन तत्राप्यभ्युपगमपर्यन्तगन्तव्यत्वादेव * [d] नन्वेवमन्यतरासिद्धं व्याप्यं प्रसाध्यानुमानव्यवस्थापनमुच्छिन्नं [e] तदप्रसाधनेन्यतरासिद्ध्या तत्प्रसाधने परस्याभ्युपगन्तुरपसिद्धान्तमनुद्भाव्य वादिना प्रसाधितात् व्याप्यात् व्यापकसाधने पर्यनुयोज्योपेक्षणादिति ॥

टी० ॥ प्रथमं यानुमितिरुत्पद्यते तत्राप्रमितस्यैव व्यापकस्य प्रतीतिरिति परिहरति [a]"प्रथमे"ति। नन्वनुमाने व्याप्यप्रमाधीनव्यापकप्रतीतिस्तर्के तु तदभ्युपगमात्राधीनेति

(१) लक्षणस्येति शेषः। तर्कव्याप्तेरसङ्गतिरिति वा पाठः।

(२) अस्मदीयप्रमयान्यस्य तदनभ्युपगन्तुर्व्यापकानुमानासंभवेनेत्यर्थः।

विशेष इति शङ्कते [b] "अनुमान"इति । तथेति । व्यापकप्रतीतिरित्यर्थः। अन्यतरासिद्धोद्भावनस्थले यावत्प्रतिपादितव्याप्यत्वाभ्युपगमो न कर्तव्यस्तावत्तस्मादनुमितिरपि नोत्पद्यत इति तद्वस्थैव तत्राव्याप्तिरिति [c] "वस्तुगत्ये"ति । तस्यान्यतरासिद्धव्याप्यत्वस्य हेतोर्व्याप्यत्व प्रमाण्य परोऽभ्युपगमयितव्य इति न भवतीत्याक्षिपति [d] "नन्वि"ति । कथमुच्छिन्नमित्यत आह—। [e] "तदिति" । यदि व्याप्यत्वेऽस्यान्यतरासिद्धत्वं न परिहर्त्तव्यं तदा तेनैव निग्रहेण वादी निगृह्येत अथान्यतरासिद्धत्व परिहृतप्रतिवादिनस्तत्राभ्युपगमः कारयितव्यस्तदनन्तर ताद्रूशेन हेतुनानुमानं प्रवर्तनीय तदा तदनभ्युपगममात्रेण प्रतिवादिनापसिद्धान्त उपपादित उपेक्षितः स्यादिति पर्यनुयोज्यापेक्षणेन वादी निगृह्येत सेयं वादिन उभयतः पाशा रज्जुरित्याक्षेपार्थः ॥

सू० किं तत्र तथा न स्यात्किमत्राप्रस्तुतया तच्चिन्तया । अन्यतरासिद्धस्य तावद्व्याप्यस्याभ्युपगमं परेणाकारयित्वैव न व्यापकसाधनमुपेयं * [a] तस्याऽप्रमा स ? *—इति चेन्न, मिथोविरुद्धादौ तर्काभासेऽपि गतत्वात् * आश्रयासिद्ध्यादिव्यतिरेके सति ? *—इति चेन्न, संदिग्धधूमदर्शनात् यद्यत्र धूमस्तदाग्निमानिति संभावनायाः परमार्थतस्तथार्थावस्थानात् प्रमात्वं त्यक्तुमपारयन्त्या अव्यापनात् * [b] तत्कालं प्रमात्वेनाप्रमीयमाण इत्यपि ? *—इति चेन्न,

टी० ॥ किं तत्रेति भवतु वादिन उभयथापि निग्रहः परंतु तर्कखण्डनप्रवृत्तस्य ममाप्रस्तुतमेतत् कथामार्गस्त्वयं तत्राभ्युपगमकारयित्वैवानुमान प्रवर्त्तनीयं तथाच तस्यानुमितौ व्यापकप्रतीतिरिति लक्षणमतिव्यापक मेवेत्यर्थः । ननु व्याप्याभ्युपगमेन व्यापकस्याप्रमा तर्क इति नानुमितावतिव्या-

प्तिरिति शङ्कते—। [a] "तस्ये"ति। व्यापकस्येत्यर्थः। मिथो विरुद्धावित्यादिपदाश्रयासिद्ध्यादिपरिग्रहः गगनारविन्दं यदि विकचं स्यात्सुरभिस्यादित्यादिकमाश्रयासिद्ध्यादिक तथा च यदीश्वरः कर्त्ता स्यात सर्वज्ञः स्यादित्यादीश्वरासिद्धिदशायामाश्रयासिद्ध्यादीत्यादिपदेन मिथो विरुद्धोपग्रहः सन्दिग्धेति वास्तवे धूमे धूमत्वव्याप्यत्वकोटिकसन्देहबलात्कृतायां वह्निसम्भावनायां तर्कत्वेन व्यवस्थापितायामव्याप्तिरित्यर्थः। ननु तत्र वह्निप्रतीतिर्वस्तुगत्या प्रमात्वेऽपि सम्भावनाकाले प्रमात्वं न प्रमीयते इति न तत्राव्याप्तिः(१) व्यापकप्रतीतेर्नप्रमीयमाणप्रमात्वमुभयसाधारणमिति शङ्कते—। [b] "तत्काल-मि"ति॥

सू० [a] बहुशोदत्तोत्तरत्वा [b] त्सर्वस्य चास्य पूर्वोक्तोभयानिष्टव्यापकेष्टव्याप्योदाहरणे गतत्वेनातिव्यापकत्वात् तद्व्यवच्छेदार्थमारोपितस्य व्याप्यस्याभ्युपगमेनेति करणे च सिद्धेन व्याप्येन प्रसङ्गस्याव्यापनात् [c] तद्यथा कार्यत्वात् यद्यदृष्टसृष्टमङ्कुरादिमीमांसकः शंसति तदानीमविशेषेण कर्तृकार्यमपि पर्यवस्येत् अस्य तदिति [d] अपि चात्माश्रयोन्योन्याश्रयश्चक्रकं व्याघातोऽनवस्था प्रतिबन्दी वेत्यापाद्यैर्भिद्यमाना षट्तर्कीष्यते "स्वरूपं चैषां—

टी०॥ तच्छब्दान्तर्भावेण लक्षणमननुगतमप्रमीयमाणत्वं च वादिना प्रतिवादिना वेत्यादिविकल्पकवलितं चेत्याह—। [a] "बहुश" इति यत्रोभयोरित्यादिना प्रसक्तेन तर्काभिमताङ्गेऽतिव्याप्तिस्तदवस्थैव व्याप्याभ्युपगमेनानिष्टव्यापकप्रतीतिस्तर्क इत्यादीनां लक्षणानामित्याह—। [b] "सर्वस्ये"ति। ननु नात्रव्यापकप्रसङ्गो नारोपितेन व्याप्येन किंतु वस्तुतो

(१) ननु कथं तत्र व्यापकप्रतीतेरप्रमीयमाणप्रमात्वमित्यत आह—व्यापकेति।

यतैव नहि तत्तायां सद्व्यवहारविषयत्वं सत्तान्तरापादनमवा-
स्तवमिति नातिव्याप्तिरित्याशङ्कते—। "यदि" ति । यदि
कार्यत्वादङ्कुराद्यदृष्टयोरन्यतराद्यं तदा तत एव सकर्तृकमपि किं न
स्यादिति मीमांसकं प्रति नैयायिकेन कृतप्रसङ्गेऽव्याप्तिरित्यर्थः ।
इदानीमात्माश्रयादिरूपं तर्कं खण्डयितुमारभते—। "अपि चे"
ति । खण्डनसौकर्याय स्वरूपममीषामादर्शयति—। "स्वरूपं
चे" ति ॥

मू० स्वस्याऽव्यवहितस्वापेक्षणमात्माश्रयः अन्योन्यस्या-
ऽव्यवहितान्योन्यापेक्षित्वमन्योन्याश्रयः अन्तरितस्य
तदेव द्वयमात्माश्रयोन्योन्याश्रयश्चक्रकं विरुद्धसमु-
च्चयो व्याघातः ॥

टी० ॥ स्वस्येति । स्वस्याऽव्यवहितस्यापेक्षणाभ्युपगमनि-
बन्धनमनिष्टापादनमात्माश्रय इत्यर्थः । स्वस्य स्वापेक्षणाभ्युप-
गमः परम्पराश्रयचक्रकयोरपीति तद्व्यावर्त्तनाय अव्यवहितेति ।
यद्यपि स्वापेक्षित्वमप्रसिद्धं तथापि घटापेक्षित्वं पटेऽभ्युपगम्य-
माने भवत्यात्माश्रयो दोष इति विशिष्टाप्रतीतावपि खण्डशः
प्रतीतिरस्त्येव यद्वा स्वापेक्षित्वं प्रमेयत्वादौ प्रसिद्धमन्यत्राभ्यु-
पगम्यमानं दोषायेति भावः । अन्योन्येति । अन्यान्यस्याऽव्यव-
हितान्योन्यापेक्षित्वाभ्युपगमनिबन्धनमनिष्टापादनमन्योन्याश्रय
इत्यर्थः । अत्राऽव्यवहितपदं चक्रकव्यावर्त्तनाय आत्माश्रयव्याव-
र्त्तनाय । अन्योन्यस्येति । अन्योन्यापेक्षित्वं दीर्घत्वह्रस्वत्वज्ञा-
नादौ प्रसिद्धं कथञ्चित् द्रष्टव्यम् । चक्रकस्वरूपमाह—। "अन्त-
रितस्ये" ति । अन्तरितस्य व्यवहितस्य भाऽयात्माश्रयोऽन्योन्या-
श्रयो वा यस्तदेव चक्रकं तेन स्वस्य द्व्यापेक्षणाभ्युपगमनिबन्धन-
मनिष्टापादनं चक्रकमित्यर्थः । विरुद्धेति । विरुद्धसमुच्चयाभ्युप
गमनिबन्धनमनिष्टापादनं व्याघातः विरुद्धसमुच्चयाभ्युपगमस्तु
माता वन्ध्याऽसौ गौरयमपीत्याकारेण इत्यर्थः । अत्र हि मा-
तरि वन्ध्यात्वमात्राभ्युपगमः सम्भवत्येव सिद्धत्वात् एवमभ्यु-

पगन्तुर्व्याघात आपाद्यते यदि मातुर्वन्ध्यात्वं गोश्चाश्वत्व-मभ्युपैषि तदा व्याघात इति ॥

मू० [a] "उपपाद्योपपादकप्रवाहो ऽनवधिरनवस्था स्वाभ्युपगतदोषतुल्यता प्रतिबन्दी"

ननु विरुद्ध समुच्चय एव क्वचिदपि प्रसिद्ध इति भावः। अनवस्थास्वरूपमाह—। [a] "उपपाद्ये"ति। भेदव्यवहार उपपाद्य उपपादकश्च तस्य भेदः। नहि भेदमन्तरेण तद्व्यवहारः संभवति। एवं सत्यर्थां व्यवहार उपपाद्यस्तद्गता च सत्ता उपपादिकेति तथाचैतादृशव्यवहाराभ्युपगमनिबन्धनमनिष्टापादनमनवस्थेत्यर्थः। अत्र यदि तृतीयश्चतुर्थो वा भेदः प्रथमभेदमपेक्षत इत्यभ्युपेयेते तथापि प्रवाहाभ्युपगमोऽस्ति। नचानवस्थेत्यत उक्त"मनवधिरि"ति। प्रवाहस्यानादित्वात् कार्यकारणभावेऽव्यवस्थिताभ्युपगम्यते एकैकभेदबुद्धावापाद्यमानायां भेदमात्रं प्रसिद्धमेवेति भावः। आपत्तिप्रयोजकीभूतरूपवदापाद्यापादनमनवस्थेत्येके। तत्र यदि मामान्यं सामान्यवत्स्यात् द्रव्यादित्रितयान्यतमं स्यादित्यापादनमिदं चानवस्थैवामान्ये त्युच्यते। नहि द्रव्यादित्रयान्यतमत्वेन सामान्यं व्यवतिष्ठत इत्यूह्यम्। "स्वाभ्युपगते"ति। यदि पुरुषत्वादयं चौरस्तदा एवं त्वमपि चौरः स्या इत्यापादनात्मकः प्रतिबन्दी। यद्वा परापादितं दोषमभ्युपेत्य परस्मै तदापादनेन यदनिष्टापादनं तत्प्रतिबन्दी भवति हि त्वं चौर इत्यभिदधानस्य प्रतिबन्दीति भावः ॥

मू० [a] "तत्रात्माश्रयस्य सबन्धद्वारं भेदादाभासत्वं यथा प्रमेयत्वस्यात्मनि वृत्तौ [b] क्वचिन्नैवमपि यथानेककालस्थस्य घटस्य पूर्वकालवृत्त्यात्मन उत्तरकालवृत्त्यात्मन प्रति कारणत्वेऽन्योन्याश्रयस्य व्यक्तिभेदात् यथाज्ञानेन संस्कारस्य तेन च ज्ञानस्याजनने चक्रकस्यापि ॥

टी० ॥ तेषामाभासत्वानामाभासत्वे विवेचयति—। [a] "तत्रे"ति। घटादीनां घटादिविषयकप्रमाणीनां प्रमेयत्वस्य च

प्रमेयत्वगोचरप्रमाधीनं प्रमेयत्वं हि प्रमैव द्वारं या चान्या घटादौ अन्यथा च प्रमेयत्वे यद्यपि स्वगोचरप्रमाऽद्वारके प्रमेयत्वे द्वारभेदो नास्ति तथापि तत्सम्भवात् स्वप्रकाशस्यैव तस्याभ्युपेतं तदुक्तं "प्रमाणं प्रवणं वृत्तौ न भिन्नाभिन्नते यत"इति । उक्तं च "प्रमेय व्यवहर्तव्यत्वाः स्वे स्वे रूपे तथाविधं व्यवहारं(१)तनोत्येव विरोधं भजते न चे"ति। एवं विशेषणत्वविशेष्यत्वाभिधेयत्वधर्मित्वादावात्माश्रयस्याभासत्वमनाभासमात्माश्रयमाह—। "क्वचिदि"ति । नानाकालस्थितस्यैकस्य घटस्य पूर्वापरकालवृत्तितामादाय कार्यकारणभावेऽभ्युपगम्यमाने भवत्येवात्माश्रयदोष इत्यर्थः । व्यक्तिभेदादिति ज्ञानेन संस्कारद्वारा ज्ञानमेव जननीयमित्यभ्युपगमेऽन्योन्याश्रयापादानमाभासो भवति अनुभवेन स्मृतिजननस्य प्रामाणिकत्वादित्यर्थः ॥

मू० तस्मात् "यथा बीजेनाङ्कुरस्तेन स्तम्बः तेन बीजं जन्यत इत्यत्र व्याघातस्योपाधिभेदात् यथा कालभेदादिना जननाजननादौ अनवस्थायाः क्रियायै परस्परानन्त्यानपेक्षणात् यथा सामग्र्या कार्यजननाय स्वसामग्र्यनन्त्यानपेक्षणे तामेतामधोधावन्तीमनवस्थामाचक्षते क्वचिन्नैवमपि यथा स्वाश्रये भिन्न बुद्धिजनाय स्वगतभेदानुपजीवनादपि भेदभेदस्यानन्त्ये ॥

टी० ॥ तस्मादिति व्यक्तिभेदादेवेत्यर्थः । बीजेनाङ्कुरस्तेन स्तम्बस्तेन मञ्जरी तेन पुनर्बीजमेवेति चक्रकदशाया व्यक्तिभेदादेवाभासत्व नहि तदेव बीज तदुत्पाद्येन बीजेन जन्यते इति भावः । व्याघाते आभासत्वमाह—। "यथे"ति । कुसूलस्थस्य बीजस्याजनकत्वं क्षेत्रपतितस्य च जनकत्वमिति सम्भवत्येवेत्यर्थः अजननमिह क्रियानुपधानमात्रम् । अनवस्थाभासमाह—। "क्रि-

(१) उपलब्धसकलपुस्तकेष्वेवंविधस्यैव पाठस्य दर्शनादयमेव पाठो धृतः परन्त्वेतत्पाठस्यायुक्तत्वेन चिन्तनीयत्वमिति ।

नवस्थाया"इति । क्रियायै कार्यजननाय । नहि कार्यं स्वसाम-ग्र्यधीनं सापि सामग्री स्वसामग्र्यधीनैवं कादाचित्कत्वादिति प्रवाहाभ्युपगमोऽस्ति । किंचेदानीं नून कार्यं न तावत्सामग्रीप्र-वाहाधीनमेव तथा च तदुत्पत्तिरेव न स्यात् दृश्यते च कार्योत्प-त्तिरिति प्रमाणिकीयमनवस्था भवत्याभासा "तामेतामि"ति । आभासरूपामित्यर्थः । आचक्षत इति । अनवस्थातु स्वकार्यो-पहितस्य स्वसामग्र्यादिकारणस्यायःप्रदार्थत्वात्सद्भावनशीलेत्यर्थः। अनाभासरूपामनवस्थामाह—। c"क्वचिदि"ति । भेदः स्वा-श्रये घटे स्वयमेव भेदबुद्धिं जनयति स्वगतं भेदान्तरं नोप-जीवतीति तावद्वस्तुगतिस्तत्र भेदस्यानन्त्ये आपाद्ये याऽन-वस्था साऽनाभासेत्यर्थः ॥

मू० a"प्राग्लोपादिदोषात् तामेतामूर्ध्वं धावन्तीमनवस्था-
माचक्षते प्रतिबन्धाविशेषात् यथा धूमानुमानेऽप्यु-
पाधिशङ्का[b]प्रतिबन्द्या तर्कानुकूलत्वादिति 'तदेषा-
मापादनानि तर्काभासाः कथमुक्तलक्षणेन न सं-
ग्राह्याः [d]सत्यपि व्याप्त्याद्यदोषे प्रसङ्गस्थानगतेन तेन
विशेषणेनाभासीभूतत्वात् * 'प्रसङ्गस्थाने तावता
विशेषणामभावेनापि लक्षणं विशेषणीयम् ?
*-इति चेत् ॥

टी० ॥ ननु कथमिय दोष इत्यत आह—। a"प्राग्लो-पे"ति । यदि भेदे भेदान्तरमङ्गीक्रियते तदा प्रथमभेदो लुप्त एव स्यादित्यर्थः आदिपदाद्विनिगमनाविरहप्रमाणाभावयोस्सग्रहः । "तामेतामि"ति । अनाभासरूपामित्यर्थः "ऊर्ध्वमि"ति । भाविप्रवाहरूपामित्यर्थः । आभासमाह । b"प्रतिबन्द्ये"ति । यद्यनुपलभ्यमानोपाधिशङ्कास्मदनुमानमास्कन्देत तदा भवदनु-मतं धूमानुमानमपि हि द्वितीयं भवत्याभास यतो यथा धूमव्या-प्तिग्रहेऽनुकूलः तर्को न तथा त्वदभिमतव्याप्ताविंत्यर्थः । यत्र तु विशेषाभावस्तत्र प्रतिबन्दी दोष एवेति भावः । एवं व्युत्पा-

दिते स्वाभ्युपगतव्याप्यं प्रति व्यापकप्रसञ्जनं तर्क इति लक्षणमिति व्यापकमित्याह—"तदेवामि"ति। आपादनाकारेण तर्काभास इत्यर्थः। आत्माश्रयादीनामभावादित्याशङ्क्याह—"सत्यपी"ति। द्वारभेदादिना विशेषेण तेषामाभासत्वस्य स्वयापि वक्तव्यत्वात्। अन्यथा प्रमेयत्वे प्रमेयत्वमनेन दोषेण न भवेदिति केवलान्वयित्वं तस्य न स्यादित्यर्थः। ननु तर्काभासव्यावृत्तये द्वारभेदरहितत्वे सतीति विशेषणीयमिति शङ्कते "प्रसङ्गस्यान"इति॥

मू० "न, अन्योन्याश्रयाभासत्वप्रयोजकस्य व्यक्तिभेदस्याभावो नानवस्थायामेवमात्माश्रयाभासत्वप्रयोजकस्य द्वारभेदस्याभावो नात्माश्रयान्तरादाविति व्यक्तमव्यापकत्वापत्तेः अपि चापसिद्धान्तविरोधादिष्वपि तर्कलक्षणं गच्छत्कथङ्कारं वारणीयं यत्रैव निग्रहे तर्कान्तराणामन्तर्भावः तत्रैवानयोरपीति पृथग्निग्रहत्वानुपपत्तेः॥

टी०॥ नहि तर्कलक्षणमव्यापकं स्यादेकाभासत्वप्रयोजकस्य द्वारभेदादेरन्यत्र सत्त्वेन तदभावघटितस्य विशेषणस्य तत्राभावादित्याह—"ने"ति। अनाभासान्योन्याश्रयादावव्याप्तिः स्यादित्यर्थः। स्वेतरस्वाभ्युपगमस्वाभ्युपगच्छतः सांमतमपसिद्धान्तापादनं विरोधापादनं वा तर्कलक्षणाक्रान्ततया तर्कः स्यादित्याह—"अपि चे"ति। अनैकान्तिकं चापसिद्धान्तस्योपन्यासमात्रं न त्वापादनमिति चेन्न। उक्तप्रकारेणापादनस्यापि सत्त्वादनैकान्तिकापादनं च न सम्भवति। अपसिद्धान्तस्वाभ्युपगमतन्त्र इति विभ्रमात् अपसिद्धान्तस्य तर्कत्वं दोषमाह—"यत्रैवे"ति। अन्योन्याश्रयादीनां व्याप्त्यादिग्रहं प्रति प्रतिबन्धकतया व्याप्यत्वसिद्ध्यादिनिग्रहेऽन्तर्भाव इति तदपेक्षयापसिद्धान्तस्य पृथग्निग्रहत्वं भज्येत। भवति हि भेदव्यवहारविषयत्वात् घटो भेदवानिति स्थापनाया भेदेऽपि भेदव्य-

वहारस्तेनैव भेदेन चेदात्माश्रयोऽन्योन्यापेक्षायामन्योन्याश्रयः ऽव्यवहितान्योन्यापेक्षायां चक्रकमनन्तप्रवाहापेक्षायामनवस्थे-त्यापादनैर्भेदाभावप्रति भेदे भेदव्यवहाराविषयत्वं गतमित्यनेन ऽव्याप्त्यासिद्धिनिग्रहस्थानेन्तर्भावितमित्यर्थः ॥

मू० [a]"आत्माश्रयादेश्च मूलव्याप्तौ प्रमाणोपगमश्चेत्तर्हि प्रामाणिकत्वान्न दोषत्वं न चेन्मूलशैथिल्यमित्यु-भयतः पाशबन्धः कथं मोचनीयः * अथोच्यते [b]"य-देतदाश्रयत्वमाश्रयित्वं च तद्भेदे दृष्टं तद्यदि विवा-दाध्यासिते त्वयोपेयते तदा भेदः स्यादित्याकारेणा-पादने नोक्तदोषापत्तिः ? *-इति [c]"मैवं, एकत्र द्वय-स्यापि दृष्टत्वात् * तदाश्रयत्वं तदाश्रितत्वं च मि-थो भेदनियतम् ? *-इति चेन्न, [d]"तन्मिथःशब्दाभ्यां क्षारीकृतत्वात् * एतदाश्रयत्वादेतदाश्रितत्वाद्वा नैकत्वं स्यादित्यादिवचनभङ्ग्यापाद्यम् ? *-इति चेन्मैवं यद्येतदेतदाश्रयादि स्यात्तदै तन्न स्यादिति ह्यापाद्यम् । न चैतद्युक्तम् । धर्म्यापाद्ययोर्व्याहत-त्वात् ॥

टी० ॥ दोषान्तरमाह–। [a]"आत्माश्रये"ति । यदि स्वस्य स्वापेक्षित्वं स्यात्तदात्माश्रयः स्यादित्यापादनप्रकारो नेह येन तस्य प्रामाणिकत्वाप्रामाणिकत्वविकल्पेऽवतरेत् अपि तु यद्यय घट एतद्घटाश्रयः स्यादेतद्घटकारणं वा स्यादेतद्घटव्याप्यो वा स्यात्तदेतद्घटभिन्नः स्यादित्याद्यापादनप्रकारे कथमप्रामाणिक-त्वमित्याशङ्कते–। [b]"यदेतदाश्रयत्वमिति । आश्रयत्वमाश्रि-तत्वं च रूपकपालाभ्यां निरूपितं घटस्यास्ति नतु भेद इति परिहरति–। [c]"मैवमि"ति एकनिरूपितमाश्रयत्वमाश्रितत्वञ्च भेदनियतमिति शङ्कते–। [d]"तदे"ति । अत्रानुगममाह–। [e]"तन्मिथ"इति । तच्छब्दस्य मिथः शब्दस्य च विशेषपरत्वा-

दितिभावः । आरोपकस्यापादकाननुगमदोषदुष्टत्वम् । नन्वा-
पादकाननुगमो न दोषः यथा च घट एतद्घटाभिन्नः स्यादेतद्घट-
भिन्नः स्यादिति संभवापादनमिति शङ्कते-। f"एतदिति । तथा
त्वन्यय न स्यादित्यापादनार्थस्तथा च धर्मिपाठ्येऽव्याघात
इति परिहरति- । g"यद्येतदि"ति ॥

मू० "न च वाच्यमापाद्यस्य प्रमाणाबाध्यतानुकूलैवेति
व्याघातादपि वा संभवति न दोषमावहतीति,
यत आपाद्यापादकयोः सामानाधिकरण्यानादरे-
तिप्रसङ्गः स्यादतो विपर्ययापर्यवसायित्वमेवं स्या-
देवं हि विपर्ययो वक्तव्यो यन्नाम भवति चैतदेत-
त्तस्मान्नैतदाश्रय इति न चैतदेतद् भवितुं शक्नोति
एतदित्युद्दिष्टे धर्मण्येतत्त्वविधानासंभवदुद्देश्यवि-
धेययोः प्रकारभेदस्याभावात् । न hच प्रसङ्गमात्रमेत-
द्बाधायैवास्तु कृतमस्य विपर्ययपर्यवसानेनेति युक्तं,
स्वयमपि प्रसङ्गमूलस्य व्याप्तेरिष्टतया प्रसञ्जित-
निषेधे तद्व्यतिरेकप्रामाणित्वस्यावश्यमन्तव्यत्वा-
पत्तेः ॥

टी० ॥ ननु व्याघातादेरापाद्यबाधात्मकौ न दोषः किंतु
अनुगुण एवेत्याह-। a"न च वाच्यमि"ति । अयमयं न स्यादिति
प्रसङ्गस्य विपर्ययो भवति नायमयमित्याकारेणावसेयः स
च उद्देश्यविधेयभावानुपयुक्त इति विपर्ययापर्यवसानं स्यादि-
त्यर्थः । तदुक्तम्-प्रथमखण्डनेन "अतत्त्वमन्यसे तत्त्वं तत्तदपि
मन्यसे सामानाधिकरण्य हि रूपभेदमपेक्षते" इति । ननु तर्कद्वै-
विध्यं त्वयैवोक्तं तथाच परबाधाय यस्तर्कस्तत्र किं विपर्यया-
पर्यवसायित्वेनेत्यत आह । b"नचेति" विपर्ययापर्यवसाने मूल
शैथिल्यमावश्यकं यतोऽन्वयव्याप्तेर्व्यतिरेकव्याप्तिव्यापकत्वा-
त्तदभावे सापि न स्यादिति भावः । व्यतिरेकाप्रामाणिकत्वमेव
वा तदपर्यवसानम् ।

मू० [a]अतएवैतदन्यत्स्यादित्यपि न शक्यप्रसञ्जनमेतद-
न्यत्वस्यैतत्स्वरूपभेदमादायैव प्रतीतिपर्यवसायि-
तया प्रसङ्गे व्याघातादेव [b]विपर्ययेऽप्येतद्विशेषि-
तान्यत्वविधायिनो विशेषणविशेष्यताप्रविष्टमा-
त्मानमात्मनि विधीयमानं न क्षमते एतदनन्यत्व-
स्यैतदन्यान्यत्वस्यैतत्त्व।देवान्यत्वावधेरात्मन उप-
लक्षणत्वे चान्यत्वमात्रमुपलक्ष्यमाणमन्यस्मादप्य-
न्यत्वमादाय पर्यवस्येत् स्वरूपत एव विलक्षणम-
न्यत्वविशेषमवधिरावत्मोपलक्षयतीति च न घटते
यतोऽन्यत्वमात्रमेवावधिविशेषैरुपधीयमानं तदन्य-
त्वप्रत्ययव्यवहारोपपादकं भवदन्यत्व(१)व्यक्तिभे-
दपर्यन्तगमनं प्रमाणस्य न सहते यदि चान्यत्वव्य-
क्तिभेदोऽपि(२)स्यात्तथापि प्रसङ्गमूलभूता व्याप्तिः
सामान्याकारपुरस्कारित्वादेतेनैवोपधीयमानानाम-
न्यत्वव्यक्तीनामैक्यमादाय प्रवृत्ता तथैव प्रसङ्गे
विपर्यये वोपनयन्ति स्यादेवोक्तदोषालंघनायेति
एवं प्रकारताचाश्रयाश्रयिभाववत्प्रकारान्तराश्रयेष्व-
प्यात्माश्रयोदाहरणेष्वतिदिश्यते अन्योन्याश्रयो
यथाभेदेना(३)वगताद्भेदज्ञानोपगमे सोऽपि त्वया
कथं कारमुपन्यसनीयः न तावद्यद्येतद्बोधाधीन-
बोधाधीनबोधं स्यात्तदा न बुध्येतेति तथा सति
व्याप्त्यसिद्धेः एतद्बोधाधीनबोधं यद्बोधाधीनबोध-
स्य तस्यैवादृष्टचरत्वात्कयाचन व्याप्त्र-

टी० ॥ नन्वन्यत्वं न स्यादिति न प्रसङ्गाकारो येन न

(१) व्यक्तिविशेषपर्यन्तेत्यर्थः। (२) स्यादिति—अवधिभेदैरुपधी-
यमान इति शेषः। (३) धर्मिप्रतियोग्यादिना इति शेषः।

विपर्ययः सामानाधिकरण्याभावात् पर्यवस्येत् अपि स्वेतदन्यः स्यादित्यापाद्यमित्याशङ्क्याह—। a"अतएवे"ति । एतदन्यत्वमेतत्त्वं विनापीत्येतदापादनं व्याहतमिति भावः। नचापमेतदन्य इत्याकारेण वर्तमानेऽयं घट इत्याकारपर्यवसित एव स्यादिति युक्तम एव दोषः स्यादित्याह । b"विपर्ययेऽपी"ति । स्वप्रकाशेति तन्नैव ज्ञानेन तज्ज्ञानग्रहे ह्यभेदो नास्ति स्वप्रकाशतावादिमते अन्यमते वेश्वरज्ञानेन तद्ग्रहोऽन्यथा तदसर्वज्ञस्य पातः शब्दो बाधक इति शब्दस्यैव बाधकत्वं परिशिनष्टि॥

सू० व्यापकभेदकल्पनया व्यभिचाराप्रतीतचरत्वयोर्वारणेऽप्य (१) यथाभावशङ्काखण्डकदण्डदुर्लभत्वादेवमन्योन्याश्रयान्तरेऽपि । चक्रकं च मध्ये परमन्तर्भाव्यात्माश्रयान्योन्याश्रयावेव विपरिणमत इति तद्दोषं नातिक्रामति । व्याघातस्तु यथा सन्नास्तीत्यत्र तमपि कथं प्रयोक्ष्यसे यदि यद्ययं सन्न स्यात्तदानीमसन् स्यादिति तर्ह्यसन्न स्यादित्यस्यापि सन् स्यादित्यस्मिन्नेवार्थे पर्यवसानादभेदेन व्याप्यव्यापकभावस्यैवासिद्ध्यापत्तिः स्वभावविरुद्धोपजीविनी च विरुद्धान्तरे(२)तद्व्याघातनिरासादेव निरस्तप्राये गौर्महिषः ततो न भवति अश्ववाक्यानियता यतो महिषात्मतेति एष हि तयोर्विरोधो ऽनवस्था तु यथा सत्तायामपि सत्तान्तरमित्यनवधौ सत्ताप्रवाहे दृश्यमाणे तत्र कथं प्रत्यवस्थेयम् । न तावद्यदि सत्तायां सत्ता स्यात्तदा न विश्रान्तिः स्यादिति सत्तायां

(१) यथा न भवतीति शङ्कायाः पूर्वोक्तस्य खण्डकोदण्डेन दुर्लभत्वादित्यर्थः । (२) स्वभावविरुद्धोपजीव्यव्याघातनिरासादेवेत्यर्थः ।

सत्ताभ्युपगमस्य विश्रान्त्यभावेन "सह व्याप्ति (१) प्रमेयत्वाभिधेयत्वव्यवहार्यत्वसन्निकर्षवत्त्वाभावप्रतियोगित्वादीनामात्माश्रितत्वदर्शनात् कथमाश्रयता सविकल्पकाव्याप्तिः सव्यभिचारा न स्यात् (२) द्वारव्यक्तिभेदस्यापि व्यभिचारिव्यतिरेकत्वात्स्वप्रकाशवादिना स्वयमेव स्वज्ञानत्वस्य एवमभावेप्यन्यमभावमस्वीकुर्वता स्वयमेव स्वाभावत्वस्य एवं तदेव ग्राह्यं ग्राहकं चात्मप्रतीतौ एवं तदेव ज्ञाप्यं ज्ञप्तिकारणं च शब्दो वाचक इत्यत्र एवं तदेव नाश्यं नाशकं च प्रध्वंसिनि एवं तदेव संबन्धि संबन्धश्च स्वभावसंबन्धोपगम इत्यादि बहुलमुपगमादात्माश्रयतदाभासविवेकाय किं नियामकमुपेयं अन्योन्याश्रये चान्त्योपान्त्यशब्दयोरन्योन्यनाशकतायां समव्याप्तिकयोश्चान्योन्यव्याप्यव्यापकतायां एककार्यकारिणां चान्योन्यसहकारितायां एवमन्यस्मिन्नपि तत्र तत्र दर्शनात्कथं न व्याप्तिभङ्गः" कश्च विशेषो * यद्व्यतिरेको विशेषणमुपादीयेत तत्र तत्राविरोधान्नैवम् ?* इति चेन्न, अन्यत्र तथाभावादर्शनस्य विरोधाभ्युपगममूलस्याविशेषात्तत्र तथात्वे प्रमाणसद्भाव एव विशेष इति चेत्तर्हि सर्वत्रानभ्युपगममूलं तथात्वे प्रमाणाभाव एवोप-

---

(१) व्याप्तिविच्छित्त्यर्थां विद्रावान्यत्र दृष्टा-यद्वा व्याप्तिनिष्ठावपि दोषस्त्र दुर्घटं तन्निष्ठावपि चैवम् ॥

(२) यत्र द्वारव्यक्तिभेदो नास्ति तत्रात्माश्रयो दोष इति द्वारव्यक्तिभेदस्य यो व्यतिरेकस्तोपि तु स्वव्यक्तिभेदमन्तरा स्वप्रकाशज्ञानवाद्यादिपक्षे व्यभिचारित इत्याह—द्वारेति—।

जीवो दूषणमिष्यतां कृतमन्योन्याश्रयेण व्यभिचरितदोषत्वेनेति [b]चक्रकेऽपि दुःखजन्मादिसूत्रोक्तादिषु व्यभिचारदर्शनाद्व्याप्ति [c]विशेषव्यतिरेकदर्शनदुःशक्यत्वं च [d]कार्यकारणभावस्य तज्जातीयतयानियतत्वेन व्यक्तिभेदस्य चक्रकानन्तर्भूतत्वात् व्याघातेऽप्येकस्यैव जनकत्वाजनकत्वे तथा [e]न च कलाभेदादिर्विशेषो घटतत्प्रध्वंसादौ कालभेदेऽपि तादात्म्यव्याघातोपगमादेव [f]सत्प्रतिपक्षजात्योश्चको विशेषो व्याघाते येन पूर्वत्र बाध्यबाधकयोर्द्वयोरप्याभासत्वमुत्तरत्र तूत्तरस्य परं तथोपेयत इति गुरवः ॥

टी० ॥ दूषणान्तरमभिधातुं पृच्छति— [a]"कश्चे"ति । आत्माश्रयादीनां द्वारादिभेदादाभासत्वे प्रमेयत्वादौ प्रमेयत्वादेः प्रामाणिकत्वेन चेदुच्यते तदा यत्रात्माश्रयादिर्दोषस्तत्र प्रमाणानिर्वचनस्यैव दोषत्वमिति किमात्माश्रयादित्यर्थः । ननु चक्रकं न क्वाप्याभासं येन स दोषो न स्यादित्यत आह— [b]"चक्रकेऽपी"ति । दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग इत्यत्र दोषात्प्रवृत्तिः प्रवृत्त्या च जन्म जन्मना च पुनर्दोष एव जन्यत इत्यादिक्रमेण कथं न चक्रकम् ? । येन विशेषेण व्यक्त्यभेदादिना चक्रकं भवति स विशेष इह नास्तीति व्यवस्थापनमशक्यमित्याह— [c]"विशेषे"ति"नन्वन्या दोषव्यक्तिः कारणमन्यच्च कार्यमिति व्यक्तिभेदाच्चक्रकमिहाभासमित्यत आह— [d]"कार्यकारणभावस्ये"ति । कार्यकारणभावग्रहस्तज्जातीयत्वेनेति तत्रापि व्यक्तिभेदो न तन्त्रमित्यर्थः । "व्याघातेऽपी"ति । एकमेव बीजमङ्कुरजनकं तदजनकं चेति व्याघात एवेत्यर्थः । यदि तदा जनकत्वं तद जनकत्वं व्याहतमित्युच्यते तदा कालभेदे व्याघातो न स्यादेव । दृश्यते च भिन्नकालयोरपि प्रतियोगिध्वंसयोस्तादात्म्यं व्याहतमित्याह । [e]"न च काले"ति ।

व्याघातस्य स्वरूपान्तरमाह f"सत्प्रतिपक्षजात्योरि"ति। पूर्वत्रेति। सत्प्रतिपक्ष इत्यर्थः। सत्प्रतिपक्षे हि द्वयोरपि हेत्वोरविशेषेणैव बाध्यबाधकभावो जातौ तु जातिरेव बाध्या न तु तया स्थापनीयहेतुरपि बाध्यत इत्यत्र किं विनियामकमिति व्याघातविशेषे कथय कथमिदं वैषम्यमिति गुरूपदिष्टोयं दोषो नतु मयोदित इत्यर्थः॥

मू० a"यद्यपि प्रतिपक्षहेतुः साध्यान्तरसाधक इत्यस्ति तस्य जात्युत्तरवैधर्म्यं तथापि त्वद्धेतुरसाधकः समबलप्रतिपक्षप्रतिहतत्वादित्यस्य दूषणत्वार्थमवश्यापेक्षस्य द्वारात्मव्याघातकत्वा b"त्साक्षाद्वावश्योपस्थाप्यद्वारेण वा स्वव्याघातकतायामुपयुक्तविशेषाभावः॥

टी०॥ ननु सत्प्रतिपक्षहेत्वोर्व्याप्तिपुरस्कारात्साधकत्व जातेश्च तदपुरस्कारादसाधकत्वमित्ययं तदधीनमेव वैषम्यमित्याशङ्क्याह – a"यद्यपी"ति। इदं वैषम्यमत्र यत्तु प्रतिहेतुप्रतिहतत्वात् यथा सत्प्रतिपक्षः परं व्याहन्ति तथा स्वात्मानमपि व्याहन्त्येवेति। स्वव्याघातकत्वस्य तुल्यत्वादित्यर्थः। दूषणत्वार्थमिति। न नित्यः शब्दः कृतकत्वादिति प्रयुक्ते यथा नित्यत्वसाधर्म्यात्कृतकत्वादनित्योऽयं तथानित्यत्वसाधर्म्यादस्पर्शत्वान्नित्य एव किं न स्यादित्ययं प्रत्यवस्थानप्रकारः, इदमसाधकं नियमानपेक्षप्रतिधर्मप्रतिहतत्वादित्यत्रैव पर्यवस्यति। अस्य च साक्षादेव स्वात्मानं व्याहन्ति किं तर्हि तदुपन्यासानन्तरमसाधकतासाधनार्थं प्रतिहेतुप्रतिहतत्वं यदुच्यते तत्परंपरयेति वैषम्यमित्याशङ्क्याह – b"साक्षाद्वे"ति। यद्यपि प्रतिहेतुप्रतिहतत्वे प्रतिहेतुप्रतिहतत्वं न सम्भवति नियमानपेक्षप्रतिधर्मप्रतिहतत्वे च नियमानपेक्षप्रतिधर्मप्रतिहतत्वं सम्भवतीति स्वव्याघातकत्वं स्फुटमेव तथापि प्रतिधर्मप्रतिहतत्वं स्वपरसाधारणमेवेति भावः।

मू० ᵃनच तत्रास्तामेव व्याघातः सत्प्रतिपक्षता तु निरवद्यैवेति शक्यं वक्तुं, यतः "शब्दादेर्नित्यत्वमेकस्मादनित्यत्वं चापरस्मादनुमानात्तथासति किं न स्यात् * 'तयोर्विरोधग्राहिणः प्रमाणस्य बलात्'*-इति चेन्न,, ᵈयथा नित्यत्वमनित्यत्वमित्युभयमास्तामित्याचक्ष्महे तथाविरुद्धं मविरुद्धं चरितामित्यपि ब्रुवतोऽस्मान्कथं निवारयिष्यसि स्यादप्येवं यदि सत्प्रतिपक्षत्वमेव तत्र दोषो न स्यादिति चेत्तर्हि मन्तव्यं प्रथमस्य हेतोः समानबलप्रतिपक्षप्रतिहतत्वादसाधकत्वमित्युक्तमावर्तते ॥

टी० ॥ स्वव्याघातकत्वे सति सत्प्रतिपक्षतास्तु नियमपुरस्कारा जात्युत्तरं च नियमानपेक्षत्वे सतीति तदसदुत्तरमित्याशङ्क्याह-।ᵃ 'नचे"ति । उभयोरिति व्याप्तिपुरस्कारेण सत्प्रतिपक्षतायां नियमत्वानियमत्वविरुद्धधर्माध्यास इत्याह—।ᵇ"यत" इति । ननु विरुद्धयोरध्यासे विरोध एवमनयोर्न भवेत् विरोधित्वाभावात् एकत्रेति शङ्कते—। ᶜ"तयोरि"ति । तथ्यं न्यत्र विरुद्धत्वं विरुद्धत्वांशे वा विरुद्धत्व नित्यत्वानित्यत्वयोरस्तु को दोष इत्याह--। ᵈ"ने"ति। ननु सत्प्रतिपक्षिताभ्यां नित्यत्वानित्यत्वा नित्यत्वयोरेकस्यापि न तत्र सिद्धिरसत्प्रतिपक्षितत्वस्य सत्त्वादिति शङ्कते ᵉ"स्यादप्येवमि"ति । प्रथमस्य समानबलप्रतिहेतुप्रतिहतत्वादसाधकत्वमिव द्वितीयस्यापि जात्युत्तरवत् स्वव्याघातकत्वमायातमिति परिहरन्ति—। ᶠ"तर्ही"ति ।

मू० "अनवस्थायां च यस्यां यस्यां सत्तायामपरापरसत्तायास्तस्यास्तस्याः प्रमाणेन सिद्धौ नानवस्थादोषः स्यादसिद्धौ चाश्रयासिद्धविषयमापादनमिति ᵇयदि चात्माश्रयादिषु सर्वत्र विशेषोऽयमभिधीयते प्रमाणसिद्धत्वात्तत्र तथोपेयत इति तर्ह्यापादनस्थाने

तथाभ्युपगमाय प्रमाणं नास्तीत्युक्तं भवति तथाच तत्र प्रमाणप्रश्नस्यावसरो न प्रसङ्गस्येति [c]अपरोऽपि विषयभेदात्तर्कभेदा आत्माश्रयादिवन्मन्तुमुचिताः। तद्यथा अविनिगमः उत्सर्गः कल्पनागौरवलाघवे चानौचित्यं चेति ॥

टी० ॥ द्वितीयसत्तायां तृतीया तत्रापि चतुर्थी आपाद्या तत्राश्रयस्य द्वितीयसत्तादेः सिद्ध्यसिद्धिपराघातादनवस्था स्यातु- मेव न पारयतीत्याह—। [a]"अनवस्थायामि"ति। ननु यत्रात्मा श्रयादीनाभासत्वं तत्र प्रमाणिकत्वं यत्र च तथा न तत्रैव तेषा- मनाभासत्वाद्दोषत्वमित्याशङ्क्याह—। [b]"यदि चे"ति। आपाद- नस्थान" इति। यत्रात्माश्रयादिदोषत्वेनापाद्यत तत्रेत्यर्थः। तर्कविभागोऽन्यून इत्युपदर्शयन्नेव तर्कप्रतिरूपकत्वेनाभिमता- नामुत्सर्गादीनां खण्डनमभिधातुं स्वरूपमादर्शयति—। [c]"अप- रेऽपी"ति ॥

मू० विकल्पेनान्वयावगमयोर्द्वये एकस्मिन्नभ्युपगते तदेक- देशान्वयनियमनिर्द्धारणाऽशक्यत्वमविनिगमः सत्प्र- तिपक्षहेत्वोरिव निर्द्धारयितुमशक्यान्वययोः परस्प- रप्रतिक्षेपएवपर्यवसानात् * नन्वन्यतरमादायापि प्रकृतस्योपपत्तिसम्भवेनाविनिगमस्य दोषत्वमेवानु- पपन्नं केवलं पंसस्तत्र यदि संशयः स्यात्स च किं न स्यात्? *-इति चेन्न, भावानवबोधात्प्रमाणासम्- म्भवेन क्वचिदपि विशेषः कथमभ्युपगन्तुं शक्योप- पगमादायवस्तुगत्याप्येकस्यान्वयः स्यात् * नन्वेवं प्रमाणाभाव एव दोषः स्यान्नाविनिगम ? *-इति चेन्न,

टी० ॥ "विकल्पेने"ति। भूतत्वमूर्तत्वयोर्जातित्वेनान्वय- योव्वतायामुभयोर्जातित्वे जातिसङ्कर इत्येकतरं जातिस्तत्र

विकल्पः किम्भूतत्वं मूर्तत्वं वा जातिरतस्तत्रैकतरस्य जातित्व ग्राहकं प्रमाणं विनिगमनाविरहः प्रतिबन्धमातीत्यर्थः। ननु निर्द्धारणशक्यत्वमेव कथं स्यादेकस्य जातित्वसाधकमन्यस्य जातित्वं प्रतिबन्धातीत्यत्र विनिगमनाविरह एव तन्त्रमित्यर्थः। भूतत्वमात्रस्यापि जातित्वाभ्युपगमे जातिसाङ्कर्यान्निवर्तते एवेति भूतत्वस्य जातित्व सेद्धुमर्हत्येवापाततः ननु संशयमात्रं भवतीति शङ्कते—। [a]"नन्वि"ति। अन्योन्यप्रतिबन्धादेकमात्रनियतं प्रमाणमेव न भवतीति परिहरति [b]"प्रमाणे"ति ॥

मू० 'तस्याविनिगमोऽन्नयत्वेनाविगमस्यैव प्रथमोत्पन्नस्योपन्यासमौचित्यात् * [b]नन्वेवमनुमाने व्यक्तयविगमो दोषः स्यात्? *-इति चेन्न, 'तत्रानेकव्यक्तीनामभ्युपगमसिद्ध्यभावात्सामान्योपसंहारस्यैकामेव व्यक्तिमाक्षेप्तुं सामर्थ्यात् "अविनिगमस्य चानेकाभ्युपगमे सत्युपस्थानादिति 'बाहुल्यदृष्टमपेक्ष्य बाहुल्यादृष्टता दुर्बलस्योपगमार्हतोत्सर्गः। तद्यथा।

टी० ॥ प्रमाणाभावेऽपि विनिगमनाविरहप्रयुक्त एवेति तस्यैवोपजीव्यत्वमित्याह— । [a]"तस्ये"ति। ननु धूमेन तार्णः पार्णो वा अनुमीयतामिति विनिगमनाविरहादेकमपि वह्निस्तत्र न सिध्येदिति शङ्कते—। [b]"नन्वि"ति। तार्णत्वेन पार्णत्वेन वा वह्निर्नानुमीयते किंतु वह्नित्वेन तत्र च न विनिगमनाविरह इति परिहरति। [c]"तत्रे"ति। तत्र वैकल्पिकौ द्वयोरुपस्थितिरेव नास्तीत्यर्थः एतदेवाह। [d]"अविनिगमस्ये"ति। "अनेकाभ्युपगमे" प्रतीतेः पर्वतेऽनेककोटिकविकल्पे सतीत्यर्थः। उत्सर्गस्वरूपमाह। [e]"बाहुल्ये"ति ॥

मू० स्वस्थस्य जाग्रतो ज्ञानं प्रामाण्याप्रामाण्यनिर्द्धारकप्रमाणानुपनिपाताविशेषेऽपि विना बाधमप्रामाण्यमभ्युपगच्छन्तं प्रति स्यात् न तु प्रामाण्यं यं तर्कमेतमालक्ष्याहुः "तस्माद्बोधात्मकत्वेन प्राप्ता

बुद्धेः प्रमाणता अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यत" इति । "दृष्टव्योदाहरणञ्चैतदीश्वराभिसन्धौ वेदप्रामाण्ये तथा, यथा न सौगतोपि विप्रतिपत्तुमर्हति * ननु बलवदेककोटिकः संशय एवोत्सर्गस्तत्कथं तर्कः स्यात् ? *-इति चेन्न,

टी० ॥ "स्वस्यस्ये" ति । सुप्रकाशद्वस्थमपि ज्ञानमप्रमाणं स्यादित्यभ्युपगमे ज्ञानानामौत्सर्गिकं प्रामाण्य "तस्माद् बोधात्मकत्वेने" ति । बोधकप्रमाणस्यौत्सर्गिकत्वेनेत्यर्थः । ननु ज्ञानप्रमाणस्यौत्सर्गिकं नियतमेवेत्यत उक्तम् "अर्थान्यथात्वे"-त्यादि । अर्थान्यथात्वे विषयताविऽधिकरणं तत्र हेतुश्चक्षुराद्यस्तदुत्थस्य तन्निष्ठस्य दोषस्य पित्तादेर्ज्ञानादपोद्यते तथोत्पादकत्वेन नायं स नियमः क्वचित्र बाधाणस्यापि सम्भवादित्यर्थः । औत्सर्गिकं च शब्दानामर्थपरत्वं क्वचिदित्यादिभिः ? दैत्योद्य-न इत्युदाहरणम् । उदाहरणान्तरमभिप्रेत्या :-। "दृष्टव्ये"ति ।

मू० "उत्सर्गस्य सम्भावनायाः स्वार्थस्थित्यनुकूलतयावलम्ब्यत्वात्संशयत्वनेवंभावात् "उत्सर्गस्यैककोटिनिष्ठत्वात्संशयस्य कोटिद्वयावगाहित्वात् । "एतेन संशयस्यैवैका बलवती या कोटिः सैवोत्सर्ग इति निरस्तम् । निर्णयोऽपि संशयस्येव वस्तु नियतकारणजस्वरूपबलवती कोटिः स्यात् । * "स्यादप्येवं यद्युत्सर्गवन्निर्णयेऽपि संशयस्यानुस्फुर्तिः स्यात् ? *-इति चेन्न, । "उत्ससर्गोदाहरणे उत्सर्गमाद्रियमाणैः संशयोच्छेदानुमतेरेव बाधाभावं सहकारिणमपेक्ष्योत्सर्गणार्थैक्यमात्र एव प्रमाणीभवनात् "तस्माद्यथाऽनसस्यादये बाधाद्दूषणात्वं त्यजन्तस्तदभावे दूषणानि भवन्ति तथोत्सर्गोपि तथैवेति॥

टी० ॥ प्रायशो ज्ञ नमिदं प्रमैव स्याद्देवमेकमभावनात्मक

संशयस्तयोरुत्सर्गो बाध्यः संभावनायाश्च स्यादुत्सर्ग एव मूलम्। अन्यथा समकोटिक एव संशयः स्यादिति मूलमूलीभावापन्नयो-र्महान् भेद इत्याह—। [a]"उत्सर्गस्ये"ति । भेदकमूलमाह । "उत्स[b]र्गस्ये"ति—। ज्ञाने प्रामाण्य संभवनीत्युत्सर्ग आकारः, ज्ञानं प्रमाणं न वेति संशयाकारस्तयोराकारकृत एव भेद इत्यर्थः । प्रशयस्यैकस्यां कोटावुत्सर्गपदप्रयोगं निरस्यति [c]"एतेने"ति-। संपजीव्योपजीवकभावेन । विषयभेदेनेत्यर्थः । ननूत्सर्गकाले संश-यानुवृत्त्या तस्य संशयकोटित्वं संभाव्यते निर्णयकाले संशयो नास्त्येवेति कस्य कोटित्वनिर्णयः स्यादिति शङ्कते—। [d]"स्याद-प्येव"मिति । येनोत्सर्गस्तर्कं इष्यते तस्य तत्काले कोटित्वं सम्भाव्यते निर्णयकालेऽपि संशयानुमतिर्नास्तीति परिहरति—। "उत्सर्गे"ति । तर्को भवत्येवेत्याह -। [f]"तस्मादि"ति ॥

मू० सुगमासुगमयोरसुगमदुर्बलत्वं कल्पनागौरवं "दृष्ट-जातीयमपेक्ष्यादृष्टजातीयं दुःखं न प्रमीयते स्वल्प-मपेक्ष्य च बह्विति अखिलजनानुभवसिद्धमेतत्, दर्शितं च विविच्येदमीश्वराभिसन्धौ तथा नैया-यिकादिकं प्रति क्षित्यादिषु प्रति कार्यं कर्त्तॄणां भिन्नानामभ्युपगमापादके च सौगतं प्रति प्रत्येकं का-रणानां समर्थानामनेकसमानदेशकालानेकनीलादि-व्यक्त्युत्पादापादकं चेति दूषणानुकूलमिदं तद्व्य-तिरेकेण कल्पनालाघवं साधनानुकूलं "प्रामाणिका-व्यवहार्यत्वमसमाधेयजातीयमनौचित्यम् ।

टी० ॥ "सुगमासुगमयोरिति" । सुबोधकदुर्बोधकयो-रित्यर्थः । तथाच दृष्टजातीयमत्यन्तसुबोध अदृष्टजातीयं च दुर्बोधं तत्र गौरवं प्रमाणप्रतिबन्धक लाघवं च प्रामाण्यसहकारि गौरवे लाघवे च विषयभेदो तद्विषयभेदो वा तद्विषयके ज्ञाने एव इदं गुरु इदं लघ्वित्याकारं प्रमाणत्वाभावादेव लघुविषयपरिच्छेदकत्वं गुरुविषयाग्राहकत्वमित्याह—। [a]"दृष्टे-

ति"। नैयायिकानामेकेश्वरसिद्धौ प्रमाणसहकारि सौगतानां न समर्थबीजक्षणस्यैकाङ्कुरजनकत्वे लाघवं सहकारि विपरीतसिद्धौ च गौरवं दोष इत्यर्थः। अनौचित्यस्वरूपमाह—। [b]"प्रामाणिके"ति—। प्रामाणिकानां न व्यवहारो यत्र सर्वथाप्यसमाधेयं तदनौचित्यमित्यर्थः॥

मू० वैजात्यनामकं तस्य भेदाः प्रश्नवैजात्यादयः प्रश्नविषयमप्रमिण्वतां प्रष्टरि प्रश्नानौचित्यं प्रश्नवैजात्यम्। यथा अवस्तुनि विधिनिषेधयोः किमिच्छसीति पृच्छसीति प्रमाणव्यवहारिणां सौगते अत एवाऽनौचित्यापरनामकं वैजात्यं परस्य दोषं मनसि कृत्वैके ब्रुवते। अत्र [a]"सहृदयानां मूलकतैवोचितेति। अपरे च न ह्यप्रतीते देवदत्तादौ स किं गौरः कृष्णो वेति वैजात्यं विना प्रश्नः स्यादिति। यदि चेदमनौचित्यं नाम दोषो नाभ्युपेयते तदानीमर्थान्तरेण प्रकृतमर्थं निरस्यार्थान्तरस्यार्थान्तरेण परिहारात् तत्परामालम्बितुकामः केन दोषेणार्थान्तरपरिहाराभासत्ववादिनि अर्थान्तरेणैव तत्परिहरणमनुचितमित्यतोऽन्येन जीयेत [b]अर्थान्तरनिग्रहतायां विप्रतिपन्नोऽपि प्रश्नपरम्परामालम्ब्य स्वभङ्गभयात् कथावसानमनिच्छन्तं कथं जयेत॥

टी० ॥ उत्तरानर्हाभिधानमनौचित्यमिति सामान्यलक्षणमित्यर्थः। धर्मिण उपस्थानं किं गौरः कृष्णो वेत्यादिवैजात्यमनौचित्योद्भावने प्रकारमाह—। [a]"सहृदयानां मूकतैवे"ति। अन्यथैवं वाद्यप्रतिभयैव निगृह्येतेत्यर्थः। "तत्परम्परा-म"र्थान्तरपरम्पराम्। अर्थान्तरस्य निग्रहत्वे विमतस्तेन जेतुमशक्यो ऽनौचित्येनैव विजीयेतेत्यर्थः। अन्यथार्थान्तरभेदोऽर्थान्तरं वा एवं स्यादिदं जीयेतेत्याद्यनौचित्यं च दोषाय भवेदि

त्यर्थः । अनौचित्यस्य सूत्रान्तरमाह— [b] "अर्थान्तरे"ति । योऽप्यर्थान्तरं निग्रह नेच्छति प्रश्नपरम्परामालम्ब्यमानं वादिनं कथं विजीयेत किं द्रव्यमिति प्रश्ने गुणवद्द्रव्यमित्युत्तरे को गुण इति पुनः प्रश्ने स्पर्शाश्रयो गुण इत्युत्तरे स्पर्श एव क इति पृच्छन् वादी कथमनौचित्यमन्तरेण जेतव्यः ॥

मू० [a] न चानवस्थया जयतीति वाच्यम् । यावदुत्तरमर्थान्तरेण परिहरणे प्रश्नान्तरेण वा द्वयोरप्यनवस्थासाम्यात् [b] "दोषं व्यक्तिविवेके ऽमुष्मिलोकविलोचने । काव्यमीमांसिषु प्राप्तमहिमा महिमाहृत" ॥ [c] ननु कथमत्र प्रामाणिकव्यवहार्यत्वमिति पृष्टेन यदि मूकत्वमालम्ब्य तथात्वं वादिनि न व्युत्पाद्यते व्यु- तदानीमप्रतिभा पतेत् । अथ तथात्वं त्पाद्यते ॥

टी० ॥ नच प्रश्नावस्थैव तत्रोद्भाव्येत्याह—। [a] "नचे"- ति—। [a] "नचेति—। अनवस्थापादनेऽपि कानवस्थेति प्रश्नसंभवात् तथा च प्रश्नोत्तरपरम्परायां द्वयोरनवस्था स्यादित्यर्थः । अनौचित्यस्य प्रामाणिकाभ्युपगमेन प्रामाणिकत्वमाह—। [b] "दोषमि"ति । अमुं दोषमनौचित्याख्यं दोषम् महिमनामा कश्चिदालङ्कारिकः स्वकृते व्यक्तिविवेकनामग्रन्थे आहृत पुरस्कृतत्वात् काव्यमीमांसिषु काव्यविचारेषु प्राप्तमहिमा लब्धमहत्त्व इत्यर्थः । तथाच महिमा "अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । प्रसिद्धौचित्यमूला हि रसस्योपनिषत्परा"ति प्रामाणिकव्यवहार्यत्वमनौचित्यविशेषमालम्ब्य शङ्कते । [c] "नन्वि"ति । तथात्वमिति । प्रामाणिकव्यवहार्यत्वमित्यर्थः ॥

मू० प्रश्नार्थादेः प्रमाणाविषयत्वमुपन्यस्य तदात्यन्तासद्व्यवहार्यता स्वीकृतैव स्यादिति चेदत्र ब्रूवते मूकतैवात्र विजयायेति । नचाप्रतिभैवं प्रसज्येत, [a] उत्तरस्याप्रतिपत्तिरुत्तरार्हस्येति तल्लक्षणात् [b] यदि चायं नियमो वादिना दूष्यते पदभ्रान्त्यैव तेन

व्यवहर्तव्यम् अनुवादादन्यत्रेति तदा मध्यस्थो-द्भाव्यत्वमस्य दोषस्योपन्यस्य दे.षस्योपन्यस्यतां [c]मध्यस्थेन ह्यपभ्रंशभाषयापि यथा वादिप्रबोधनं क्रियते तथा यद्यप्रमाणमवलम्ब्यापि क्रियेत तदा को दोषस्तस्य स्यात्तत्र विषये तथैव तेन वादिबो-धनस्य शक्यत्वात् ॥

टी ॥ "प्रश्नार्थादेरिति" । विधिनिषेधव्यवहाराभाज-नत्वेन किं व्यवह्रियते न चेति प्रश्नार्थः । विधिनिषेधव्यव-हाराभाजनत्वेन यदि व्यवह्रियते तदापि दोषो न व्यवह्रियते चेत्तत्राप्युभयथा चोत्तरयितुरनुव्यवहार्यतास्वीकरणं व्याघात इत्यर्थः । अप्रतिभालक्षणे उत्तरार्हे उत्तराप्रतिपत्तिरिति कृते तस्योत्तरानर्हतया नाप्रतिभेत्याह—। [a]"उत्तरस्ये"ति । गत्यन्त-रमाह—। [b]"यदिचायमि"ति । मध्यस्थेन तत्रानौचित्यविषय-विषयकमनौचित्यमुद्भावनीयमिति समुदायार्थः । "पदश्रा-न्त्यैवेति" अनौचित्योल्लेखवादिनो भ्रान्त्या व्यवहारे नियम-भङ्गस्यादिति भावः । नन्वेवं मध्यस्थ एव निगृह्यते इत्यत आह—। [c]"मध्यस्थेन ही"ति । अन्यथापभ्रंशाभिधाने निर-र्थकनिग्रहेण मध्यस्थो निगृह्येतेत्यर्थः ॥

मू० [a]तस्मान्मध्यस्थं(१)प्रत्यनुत्तरदाने स्वदोषपरिहा-राय प्रतिवादिना वैजात्यलक्षणदर्शनं कार्यं मध्यस्थं प्रति तस्याप्रमाणेनापि प्रतिबोधने निर्दोषत्वात् । [b]ननु वादिभ्यामेव वा वादिनि मध्यस्थेन वा तं प्रति वादिना वात्यन्तासद्विषयव्यवहारोपगमे कथं नासत्ख्यातिः स्वीकृता स्यात्, [c]त्किन्नस्या द्विशिष्टरूपे संबन्धांशे चाऽसत्ख्यातेरन्यथाख्यातेरन्यथाख्याति-वादिभिरप्यभ्युपगमात् * [d]ननु वन्ध्यासुताख्यवि-

(१) प्रत्युत्तरदानमित्यपि पाठान्तरम् ।

चाश्वं भिन्नमित्यादिषु व्यवहरतः कथं विशेष्ये विशेषणेऽपि नासत्ख्यातिरुपगन्तव्या ?*-इति चेत् ॥

टी० ॥ ननु वादिनियोगमन्तरेण मध्यस्थोऽपि कथमिद्-मुद्भावयेत् नियोगश्चाभिदधानस्यानौचित्यमापतितमिति तथा-चासत्ख्यात्यैव वक्तव्यमिति नियमो भग्न इत्यत आह—। a"तत्त्वा-दि"ति। वादिनं प्रत्ययं नियमो न तु मध्यस्थमपि प्रतीत्यर्थः। नन्वेवमप्यसत्ख्यात्यापत्तिस्वीकारो दुर्वार इत्याशङ्कते। b"न न्वि"ति। वादिभ्यामेवासत्ख्यातिः स्वीकृता स्यादित्यन्वयः। यद्वा वादिभ्यामेवेत्यत आरभ्यैवासत्ख्यातिव्यवहारोपगम इत्यर्थः। ईदृशीमसत्ख्यातिमभ्युपगच्छन्त्येवान्यथाख्यातिवादि-नोऽपीत्याह—। c"किं न स्यादिति" नन्वन्यथाख्यातिवादिभि-र्वैशिष्ट्यांशेऽप्यसद्भावोऽभ्युपेयते स च विशेषणविशेष्ययोरपीति शङ्कते—। d"नन्विति। अत्रासदुल्लेखमात्र भासते स्यासत्ख्या-तिरङ्गीक्रियते प्रकृते च विशेषणविशेष्ययोरसत्त्वेऽपि भेद. सन्नेव भासते इति नासत्ख्यातिरिति ॥

सू० a"न, असत्ख्यात्यभ्युपगमस्य सत्ख्यातित्वात्यागनियमोपगमविश्रान्तत्वात् असदपि सदुपश्लिष्टमेव प्रतिभासते न तु केवलमसत् कयापि ख्यात्या समुल्लिख्यत इत्यन्यथाख्यातिवादिभिरिष्यमाणत्वात् वन्ध्यासुताच्छशविषाणं भिन्नमिति प्रतिपत्तावपि भिन्नमित्यपभ्रंशः सामान्यतोऽन्यत्र दृष्ट एव प्रतीयते केवलं भेदस्य सदाश्रयः प्रतियोगि चेति यद्वस्तुतः तदसदाश्रयः प्रतियोगि च तस्येत्यन्यथा कृत्वा प्रतीयत इत्यन्यथाख्यातिरेवोपगता भवति यथा तु विशिष्टमत्यन्तासदेव तथाश्रयप्रतियोगिनी अत्यन्तासती एव किं न प्रतिभासेते तावतापि यथोक्तान्यथाख्यात्यनुल्लङ्घनादेव । न चैवमसत्ख्यातिवा-

दिनापि शक्यं वक्तुं केवलं सदेव प्रकाशत इत्यस्मत्पक्षाद्विपरीतं विशिष्टं संबन्धश्च क्वचिद्विशेषणाद्यत्यन्तासद्भ्रान्त्योल्लिख्यत इत्येवंरूपा तावदसत्ख्यातिः परेणोपगतैव यदि तु सदपि प्रकाशते किंचित्तत्किं नासत् प्रकाशते इति ॥

टी० ॥ परिहरति—। [a]"नेति"। अन्यत्र सतोर्विशेषणविशेष्ययोर्वैशिष्ट्यमसद्भासते प्रकृते त्वसतोस्तयोर्भेदः सन्नेव भासत इति भानवैषम्यमित्यर्थः। "तावतापी"ति। अन्यथाख्यातिरेवमभ्युपगता भवतीत्यर्थः। न चेत्यस्मिन् प्रकाशत इत्यन्तं शङ्का किञ्चित्सद्भासने यथान्यथाख्यातिः तथाकिंचिदसद्भासने सत्ख्यातिरेव किं न स्यात्। तथाच स्वीकृता त्वयाप्यसत्ख्यातिरिति शङ्कार्थः ॥

मू० [a]यतः परेण विकल्पः सर्वथा वस्त्वनुल्लेखी केवलमलीकमुल्लिखन्नसत्ख्यात्यात्मा स्वीक्रियते यदि तु यथोक्तमेव परोऽप्यभ्युपगच्छति तदानीमनुमानप्रामाणादिवदत्राप्यविप्रतिपत्तिरेवेति * ननु सर्वथैवासत्ख्यातिरपि भवतानुमन्तव्यैव। तथाहि-वन्ध्यासुतशशविषाणे कूर्मरोमैवेति वदतः शब्दादर्थं प्रतिपादयतां(१) किं तदणुमात्रमपि समुल्लेख्यं तत्प्रतीतेः? *—इति चेन्न, तत्रापि तादात्म्यस्य सामान्यतोऽन्यत्र प्रतीतस्यैवाऽसदुपहितस्य स्फुरणोपगमात् [b]प्रकारभेदवैशिष्ट्येन भिन्नयोरेकत्वं हि तादात्म्यं तच्चान्यत्रास्त्येव ॥

टी० ॥ परिहारमाह—। [a]"यत"इति। विकल्पे सन्मात्रविषयः परेण बौद्धेन स्वीक्रियते तेन न सादृश्यं सत्ख्यातौ विप्रतिपन्नत्वादेव यदि विकल्पेऽपि सदुपरागस्त्वयेष्यते तदा

(१) किन्तदर्थमात्रमपि-इत्यपि ग्रन्थान्तरस्थः पाठः।

घटत्वादिजातीनां पारमार्थिकत्वाभ्युपगमे व्याप्तिग्रहसम्भवे त्वयाऽनुमानप्रमाण्यविप्रतिपत्तिरत्याज्या । न चासत्ख्यातिरित्यर्थः । सामान्यमलीकं, स्वलक्षणं च देशकालाननुगतमिति व्याप्तिग्रहो न संभवती(१)त्यनुमानप्रामाण्येन चानुदयः स त्वया त्यक्त एवेति भावः । यद्वा तत्प्रामाण्यमङ्गीकरोति असत्ख्यातिं च तं प्रतीदमुक्तम् "गुणात्मनापी"ति । स्वरूपेणापीत्यर्थः । ननु शशविषाणादीनामन्योन्यतादात्म्यं कथं स्यादित्यत आह । [f] "प्रकारे"ति । प्रकारभेदवत्त्वेनेत्यर्थः ॥

मू० [a] तर्कसंशयाभ्यामप्रमाभ्यां जननेऽपि तत्तत्प्रमावत् मध्यस्थाद्यप्रमया तथा प्रश्नानौचित्यादिप्रमोत्पादनाविरोधे बाधवत् भ्रमविषया ऽतथाभावेऽपि भ्रमस्याप्रमात्वपरमार्थिकतावत्प्रश्नविषयासत्यत्वेऽपि प्रश्नानौचित्यसत्यतोपपत्तिरेव । एतेन [b] भ्रान्तिजाया धियः प्रमात्वं तथाप्यदुष्टचरमित्यपि परास्तप्रायमिति । एवमन्यत्रा—

टी० ॥ ननु प्रश्नानौचित्यविषयगोचरभ्रान्तिमता मध्यस्थेन वादिन्यनौचित्यप्रमा कथमुत्पादनीया अनुत्पादने च कथमनौचित्यमप्रमितं न भवेदित्यत आह—। [a] "तर्कसंशयाभ्यामि"ति । नहि भ्रान्तेर्भ्रान्तिरेव जायते तर्कसंशयाभ्यां सदनुमितिजननात् । यद्वा तर्कसंशयविषयको विषयभेदः साक्षात्कार एव दृष्टान्तः शशशृङ्गं ऋजु वक्रं वा गगनारविन्दं सुरभि नवेति प्रश्नविषयस्यासत्त्वेऽप्यनुचितमेतत् यदयं पृच्छतीति ज्ञानं प्रमैवेत्यर्थः । "बाधवदि"ति । बाधवतो भ्रमस्य विषयतथात्वाभावे भ्रमत्वं प्रामाणिकानां तथानौचित्यज्ञानप्रमात्वमविरुद्धमित्यर्थः । नन्वन्यथाख्यातिजन्यं ज्ञानं भवतु प्रमा प्रकृते त्वसत्ख्यातिजन्यमिति नानौचित्यज्ञानं प्रमा स्यादित्यत आह । [b] "एतेने"ति । असत्ख्यातेरन्यथाख्यातित्वव्युत्पादनेनेत्यर्थः ॥

(१) अनुमानाप्रामाण्येनानुदय इति तु प्राचीनपाठः । अनुमानप्रामाण्ये तत्रानुदय इत्यपि क्वचित्कः पाठस्सोऽपि विचारणीय एव ।

मू० [a] एवंविधोदाहरणे वाक्यं, [b] नच कश्चिदुक्तप्रकारमन्यथाख्यातिसमाधानं नानुमन्तुं शक्नोति, [c] अन्यथा कथमसत्ख्यातिवादिनो मतमपि जानीयादज्ञात्वा च स्वपरमतवैचित्र्यं कथं वादे प्रवर्त्तेत [d] एते सर्वेपि तर्काः प्रमाणविरोधे वा प्रमाणाभावे वा निष्पीडिताः प्रविशन्तो न बाधासिद्धिभ्यां भिद्यन्ते [e] पूर्वैरपि लोकसिद्धत्वाद् व्यवहृताः [f] केवलमस्माभिरेव तर्कपदव्यामभिषिक्ताः ततो न प्रबन्धेन निरस्यन्ते "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमि"ति । येच परैस्तर्कदोषाः षट् स्वीक्रियन्ते आश्रयासिद्धिरनुकूलत्वं मूलशैथिल्यमिष्टापादनं विपर्ययापर्यवसानं मिथो विरोधश्चेति सोयं तर्कस्य दोषविभागो नोपपद्यते ॥

टी० ॥ ननु वन्ध्यासुते गगनारविन्दं तत्र च कूर्मरोमेत्यादौ चासत्ख्यातौ का गतिर्न ह्यत्र तादात्म्यं भेदो वान्यत्र गृहीतो भासते येनान्यथाख्यातिः स्यादित्यत आह—। [a] "एवमि"ति । एवं सत्यपि विप्रतिपन्नं प्रत्याह—। [b] "नच कश्चिदि"ति । नन्वेवमप्यनुपपन्नमेव तन्मते ज्ञानं चासत्ख्यातिपर्यवसन्नमेव स्यादित्यत आह—। [c] "अन्यथे"ति । नन्वात्माश्रयादीनामुत्सर्गादीनां च पृथक्त्वे निग्रहस्थानाधिक्यं स्यादिति सिद्धान्तमनुरुध्याह—। [d] "एते"इति । ननु बाधाऽसिद्ध्योरेवैषामनुप्रवेशे त्वयैव किं पृथक् पृथङ् निरूप्यत इत्यत आह—। [e] "पूर्वैरि"ति । ननूत्सर्गादीनां पूर्वैर्व्यवहृतानामपि तत्पूर्वैर्नोक्तमित्यत आह—। [f] "केवलमि"ति । "प्रबन्धेने"ति । खण्डनानन्तरोक्तेन तु खण्डिता एवेत्यर्थः । विशिष्टखण्डने हेतुमाह—। "विषवृक्षोऽपी"ति । हेत्वाभासा एव तर्काभासा अपि ननु तर्काणां दोषविशेषाभिधानं युक्तमित्याह ॥ "ये च परैरि"ति ॥

मू० [a] व्याप्तिपक्षधर्मत्वयोः प्रतीतिमपेक्ष्य यथानुमानं जायते तथैव तर्कोऽपि इयान् परमनयोर्विशेषो यदनुमानं तयोः प्रमित्य। जायते तर्कस्त्ववास्तवाभ्यामपि ताभ्यां पराभ्युपगममात्रसिद्धाभ्यां भवति तेन विमृष्यमाणः तर्कः पराभ्युपगममात्रप्रसादसिद्धपरिकरो नाश्रयसिद्धिमपि तावद्वास्तवीमनुरोद्धुमधिकरोति ततः प्रमित्यभ्युपगमसिद्धिकृतवैचित्र्याश्रयाद्भेदादन्यो यावान् यथा च हेत्वाभासविभागः तद्वदेव च तर्काभासविभागोऽपि न्याय्यः। [b] तस्मादाश्रयासिद्धिमूलशैथिल्येष्टापादनान्यसिद्धिरेकैव दोषोऽनुमानव—

टी० ॥ नन्वनुमानापेक्षया बीजवैषम्यमनोषामिति तद्दोषवैषम्येनापि भवितव्यमित्यत आह—। [a]"व्याप्ती" ति। व्याप्तिपक्षधर्मतयोरभ्युपगमो बीजमिति व्याप्तिपक्षधर्मताश्रया एव दोषा इतोऽपि भवितुमर्हन्तीत्यर्थः। "प्रमित्यभ्युपगमसिद्धी" ति। अनुमाने प्रमितिरूपा सिद्धिस्तर्के त्वभ्युपगमरूपा सिद्धिस्तत्कृतं यद्वैचित्र्यं तदाश्रयाद्भेदादित्यर्थः। तथा चेयानेव भेदस्तर्कानुमानयोर्न त्वन्यो येन वैषम्यं स्यादित्यर्थः। ननूक्तास्तर्कदोषा हेत्वाभासेषु चेन्नान्तर्भवन्ति तदा तत एव तत्र भविष्यन्तीत्यत आह- "तस्मादि" ति। "असिद्धिरेकैवे" ति। स्वाश्रयासिद्धिः स्फुटैव मूलशैथिल्यं व्याप्यत्वासिद्धिरेव इष्टापादनं स्वाश्रयासिद्धिरेव सिद्धसाधनद्वारिकेत्यर्थः॥

मू० तत्राप्रमितत्वावलम्बिनीह त्वनभ्युपगमावलम्बिनीति विशेषः मिथोविरोधश्च सत्प्रतिपक्षतैव [a]विपर्ययापर्यवसानं तु दोष एवापादनस्य न भवति यन्नाम विपर्ययापर्यवसानादापादनमात्मसाधनानुकूलं न भवति तदन्यदेव किमपि [b]बाधविरुद्धत्वव्यभिचा-

रास्त्वनुमानवत् तर्केऽपि दोषाः पृथग्वाच्याः ‘बाध उत्सर्गसम्भावनादेरन्यत्रानुकूलः तर्कस्य सप्तममपि दोषं तर्कस्यापत्तिसाम्यं न नामोपगच्छामः स चोभाभ्यामभ्युपगतव्याप्येनानभ्युपगतव्यापकेन प्रागेव [d]दर्शित इत्यास्तां विस्तर इति ॥

टी० ॥ तत्रेति । हेतौ । इहेति । तर्के । विपर्ययापर्यवसायितर्केण परसाधनदोषाभिधानस्यादर्शितत्वादित्याह—। [a]“विपर्यये” ति । तर्कदोषविभागे न्यूनत्वमाह—। [b]“बाधे” ति । यद्यपि विरुद्धहेतौ तथापि यथानुमाने व्याप्यत्वासिद्धेः प्रस्तावेन तयोः परिगणितं तथात्रापि स्यादित्यर्थः । ननु बाधेन गुण एव नतु दोष इत्यत आह—। [c]“बाध” इति । उत्सर्गोऽप्यसम्भवाच्चये च तर्के तत्रापि भवत्येवोत्सर्ग इत्यर्थः । पूर्वोपपादिततर्कदोषान्तरमाह—। [d]“दर्शित इती” ति । यत्रोभयोः सम्मो दोष इत्यादिस्थल इत्यर्थः । एतदेव विविच्याह—“स चे” ति ॥

मू० एवं प्रकाराणि तत्तल्लक्षणेषु खण्डनान्यूहनीयानि । तदेतासु खण्डनयुक्तिषु कामपि स्थानान्तरस्थां केनापि प्रकारान्तरेणानीय तत्सदृशीमन्यां वा स्वयमूहित्वा परैर्विविच्यमानानि पदार्थान्तराण्यपि बुद्धिमता बाधनीयानि । अत्र चास्माभिर्दूषयितुं शङ्कितेभ्यः परपक्षप्रकारेभ्यो यदि प्रकारान्तरं कोऽपि स्वयमूहति उक्तानां बाधकानां मध्ये क्वचित्प्रज्ञया समाधानमभिदध्यात्तत्र खण्डनवादिनः प्रस्तुता प्रतिक्रिया न स्फुरेत्तदा परेण प्रयुज्यमाने वाक्ये बहुपदात्मके कस्यचित्पदस्यार्थं खण्डयितुं [e]खण्डनान्तरमवतारणीयम् । एवं तत्रापि परेण प्रज्ञाशोधने पुनस्तथैव शाखान्तरेषु संक्रमणीयमिति प्रकारेण खण्डनमये चक्रे सम्यगवधेयम् ॥

टी० ॥ उक्तखण्डनमन्यत्रातिदिशति—। [a]"एवं प्रकाराणो" ति । ये पदार्थाः यानि च लक्षणानि खण्डितानि तेषां सिद्धान्तिभिः प्रकारान्तरेणोपन्यासे कृते तत्खण्डने स्वयं समाधाने वा कृते खाण्डनिकाय प्रकारमुपदिशति—। [b]"तदेतास्वि" ति । प्रश्नाशेषः खाण्डनिकस्य सर्वथात्यन्तमवधेय इति यत्किञ्चित्सिद्धान्ती वदति—। [c]"खण्डने" ति । तत्खण्डनमवतारणीयमित्यर्थः ॥

मू० [a]नच शाखान्तरसंक्रान्तावर्थान्तरं पतेत् अप्रकृतत्वाभावात् [b]न चैकनिर्णयारम्भे ऽन्यसंक्रान्तावनौचित्यं स्यात्, शब्दोऽनित्यः कृतकत्वादित्यादौ परेणोक्ते कृतकत्वादावविप्रतिपत्त्युपत्वापत्तेरन्यतरासिद्ध्याद्युच्छेदापातात् । येन हि तन्निर्वाह्यते तदनिर्वचनीयतयापि निर्वाह्यानिर्वचनीयतैवेति तस्मात् । [c]"तत्तुल्योरुस्तदीयं च योजनं विषयान्तरे । शृङ्खला तस्य शेषे च त्रिधा भ्रमति मत्क्रिया ॥ [d]ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया,

टी० ॥ प्रकृतपदार्थखण्डनमुपक्रम्य यत्किञ्चित्खण्डनाचरणेऽर्थान्तरं स्यादित्याशङ्क्याह—। [a]"नचे" ति । प्रकृतपदार्थखण्डनोपयोगितैव तदभिधानान्नार्थान्तरत्वमित्यर्थः । ननु माभूदर्थान्तरत्वमनौचित्यं स्यादेव शाखान्तराश्रयण इत्यत आह-। "नचे" ति । एवमनौचित्ये शब्दानित्यत्व विप्रतिपद्य तत्साधने कृतकत्वे पुनर्विप्रतिपत्तावनौचित्यं भवेत् येनान्यतरासिद्ध्युपन्यासोऽपि न घटेतेत्यर्थः । अर्थान्तरत्वनिरासायोक्तमर्थं कारिकया सङ्कलयति-। [c]"तत्तुल्ये", ति । उक्तखण्डनतुल्यस्य खण्डनान्तरस्योह उक्तस्यैव वा खण्डनस्य विषयान्तरे योजनम् । उभयथाऽपरिस्फूर्तौ यत्किञ्चित्पदमादाय खण्डनमुक्तं खण्डनस्मरणं चेति प्रक्रिया त्रिविधा भ्रमतीत्यर्थः । क्वचित् "धाम्रमतिमत्क्रियेति पाठः" मतिमतामत्र त्रिधा क्रियेत्यर्थः ।

कठिनोक्तिदोषं समाधातुमाह—। [d]"ग्रन्थग्रन्थिरि" ति। अभिसन्धिपूर्वकमेव क्वचित्क्वचित्काठिन्यं न स्वकौशलकृतमित्यर्थः ॥

मू० [a]"प्राज्ञंमन्यमना हठेन पठितो माऽस्मिन् खलः खेलतु श्रद्धाऽऽराद्धगुरुः श्लथीकृतदृढग्रन्थिः समासादयत्, त्वेतत्तर्करसोर्मिमज्जनसुखेष्वासङ्गनं सज्जनः, ॥ [b]ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वराद्यः साक्षात्कुरुते समाधिषु परब्रह्म प्रमोदार्णवम् । यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः, श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ॥ इतिश्रीश्रीहर्षतानिर्वचनीयसर्वस्वे खण्डनखाद्ये तुरीयः संकीर्णपरिच्छेदः । शुभमस्तु ॥

टी० ॥ ग्रन्थिन्यासे हेतुमाह—। "[a]प्राज्ञमि"ति। (१)प्रमत्ततायां स्वयमेव पुरुषस्तदर्थं जानीयादित्यर्थ एवास्य ग्रन्थस्य न स्यादिति भावः । श्रद्धया आराद्धः सेवितो गुरुर्येन तेन श्लथीकृतो दृढो ग्रन्थिर्यस्य स सज्जन एव तर्करूपो रसस्तस्योर्मिषु मज्जनेन यत्सुखं तेषु आसङ्गनमासंगमासादयत्वित्यर्थं रद्धरोरधीत्य खण्डनमयं तर्कप्रयोगेन विजयखण्डनमासादयतु सत्कृत इति भावः । स्वोत्कर्षख्यापनेन ग्रन्थस्य श्लाघनीयतामाह—। [b]"ताम्बूले"ति । "स्वभ्रातुर्जयनाथस्य व्याख्यामाख्यातवान् यतः । प्रत्यिा भवनाथोयं तामिहाखिलमुज्ज्वलाम् ॥ इति श्री महामहोपाध्यायसन्मिश्रभवनाथात्मज महामहोपाध्यायसन्मिश्रशङ्कर विरचिताखण्डनखाद्यचतुर्थपरिच्छेदशाङ्करी टीका (२)समाप्ता ॥ शुभमस्तु । परमेश्वराय नमः ॥

समाप्तोयं ग्रन्थः ॥

---

(१) प्रमत्ततायाम्—ग्रन्थस्य सरलत्वे ।

(२) अत्रेति पदस्य समाप्त्यर्थकत्वं समाप्तेति पुनरुपादानमाम्रेडनमात्रम् । पूर्वोपन्यस्तसन्धार्थकत्वे तु समाप्तेति यथावस्थितमेव—